१. एतद्ब्राह्मण गत विषया अन्यत्रोऽप्युपलभ्यन्ते यथा । का० श्र० २. १. १ ।

दो का अर्थ है शक्ति। जब किसी काम को दो मिलकर करते हैं तो वह काम सुदृढ होता है।

(६) *तेऽस्य विश्वे देवा गृहानागच्छन्ति तेऽस्य गृहेषूपवसन्ति स उपवसथः।*
(१।१।२।७)

यज्ञ के दिन को 'उपवसथ' कहते हैं क्योंकि इस दिन सब देव यजमान के घर आते हैं और वहाँ बैठते हैं (उप-समीप, वसन्ति-रहते हैं)। यह उपवास का दिन है।

अध्याय १—ब्राह्मण १

अथ शूर्पे चाग्निहोत्रहवणी चादत्ते। कर्मणे[1] *वां वेषाय वामिति यज्ञो वै कर्म यज्ञाय हि तस्मादाह कर्मणे वामिति वेषाय वामिति वेषे'टीव हि यज्ञम् ॥१॥*

अथ वाचं यच्छति। वाग्वै यज्ञोऽविदु'षो यज्ञं तनवाऽइत्यथ प्रतपति प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातय इति वा ॥२॥

देवा ह वै यज्ञं तन्वानाः। तेऽसुररक्षसेभ्य आसङ्गाद्भिर्यांचक्रुस्तद्यज्ञमुखादेवैतं-यापा रक्षाꣳस्यतोऽपहन्ति ॥३॥

अथ प्रैति[2]*। उर्वन्तरिक्षमन्वेमीत्यन्तरिक्षं वाऽअनु रक्षश्चरत्यलमुभयतः परिच्छिन्नं*

अब सूप और अग्निहोत्र हवणी को लेता है। इस मन्त्र से (यजु० १।६) "कर्म के लिये तुम दोनो को व्यापकत्व के लिये तुम दोनों को"। यज्ञ कर्म है। कर्म के लिये अर्थात् यज्ञ के लिये। 'व्यापकत्व के लिये तुम दोनो को' क्योंकि यजमान यज्ञ मे व्यापक होता है ॥१॥

अब वाणी रोकता है। वाणी यज्ञ है। इस प्रकार यज्ञ को निर्विघ्न पूरा करूँ। यह तात्पर्य है। अब इन दोनो (सूप और हवणी) को आग पर तपाता है यह मन्त्र बोलकर (यजु० १।७) "झुलस गया राक्षस, झुलस गये शत्रु। जल गया राक्षस, जल गये शत्रु" ॥२॥

क्योंकि जब देव यज्ञ करने लगे तो डरे कि कहीं असुर राक्षस यज्ञ में विघ्न न डालें। अतः पहले से ही वह दुष्ट राक्षसो को यज्ञ से दूर कर देता है ॥३॥

अब घर (धान की गाडी की ओर) चलता है। यह मन्त्रांश बोलकर (यजु० १।७) "अन्तरिक्ष मे चलता हूँ"। राक्षस अन्तरिक्ष में खुले-बन्द दोनों ओर चलता है। इसी

---

१. शु० स० अ० १ क० ६।
२. शु० सं० अ० १ क० ७।
३. शु० स० अ० १ क० ७।

यथाय पुरुषोऽमूल उभयत परिच्छिन्नोऽन्तरिक्ष मनुचरति तद्ब्रह्मणैवैतदन्तरिक्षमभयमनाप्रं कुरुते ॥४॥

स वाऽअनस एव गृह्णीयात्। अनो ह वाऽअग्रे पश्चेव वाऽइद यच्छालश्च स यदेवाग्रे तत्करवाणीति तस्मादनस एव गृह्णीयात् ॥५॥

भूमा वाऽअन । भूमा हि वाऽअनस्तस्माद्यदा बहु भवत्यनो वाह्यमभूदित्याहुस्तद्भूमानमेवैतदुपैति तस्मादनस एव गृह्णीयात् ॥६॥

यज्ञो वाऽअन । यज्ञो हि वाऽअनस्तस्मादनस एव यजूश्षि सन्ति न कौष्ठस्य न कुम्भ्यै भक्षायै ह स्मर्पयो गृह्णन्ति तद्वृषीन्प्रति भक्षायै यजूश्ष्यासुस्तान्येतर्हि प्राकृतानि यज्ञाद्यज्ञ निर्मिमाऽइति तस्मादनस एव गृह्णीयात् ॥७॥

उतो पात्र्यै गृह्णन्ति। अनन्तरायमु तर्हि यजूश्षि जपेत्स्यमु तर्ह्यवस्तदुपोह्यगृह्णीयाद्यतो युनजाम ततो विमुच्चामेति यतो ह्येव युञ्जन्ति ततो विमुञ्चन्ति ॥८॥

तस्य वाऽएतस्यानस । अग्निरेव धूरग्निहि वै धूरथ य एनद्वहन्त्यग्निदग्धमिवैषा वह भवत्यथ यज्जघनेन कस्तम्भी प्रऽउग वदिरेवास्य सा नीड एव हविर्धानम् ॥९॥

प्रकार यह पुरुष (अध्वर्यु) भी खुले-बन्द, दोनों ओर चलता है। इस प्रकार वह यह अनाश पदकर अन्तरिक्ष को दुष्ट राक्षसों से मुक्त कर देता है ॥४॥

(हवि के धान को) गाड़ी से ही लेना चाहिये। गाड़ी पहले है और यज्ञ शाला पीछे। जो पहले है उसको मैं पहले करूँ। इसलिये गाड़ी से ही लेना चाहिये ॥५॥

अनस् (गाड़ी) का अर्थ है भूमा (बहुतायत)। वस्तुत गाड़ी बहुतायत का चिह्न है। जो चीज बहुत होती है उसको कहते हैं 'गाड़ी भरकर है'। इस प्रकार बहुतायत का सम्पादन करता है। इसलिये गाड़ी से ही लेना चाहिये ॥६॥

यज्ञ गाड़ी है। यज्ञ वस्तुत गाड़ी है। इसलिये यजु मन्त्रों का संकेत गाड़ी की ओर है। कौष्ठ (कोठार) या घड़े की ओर नहीं। यह ठीक है कि ऋषियों ने चावलों को चमड़े के थैले से निकाला था। इसलिये यजु मन्त्र ऋषियों के सम्बन्ध में चमड़े के थैले की ओर संकेत करते हैं। परन्तु यहाँ तो प्रकृत अर्थ ही है। 'यज्ञ से यज्ञ को करूँ'। इसलिये गाड़ी से ही लेना चाहिये ॥७॥

कुछ पात्र से भी लेते हैं। फिर भी यजु मन्त्रों को पूरा-पूरा पढ़ना चाहिये। इस दशा में स्रुवा को पात्र में डालना चाहिये। यह सोचकर कि जहाँ जोड़ू वहाँ खोलूँ। जहाँ जोड़ते हैं वहीं खोलते हैं। (गाड़ी का जुआ जहाँ जोड़ा जाता है वहीं खोला जाता है) ॥८॥

इस गाड़ी का जुआ अग्नि हो। जुआ अग्नि है क्योंकि जुआ जब बैलों के कन्धों पर रक्खा जाता है तो कन्धे जल जाते हैं। डण्डे का जो बीच का भाग है वह मानो वेदी है और गाड़ी में जहाँ चाँवल रहता है वह मानो हविर्धान है। इस प्रकार गाड़ी की यज्ञ से उपमा दी गई है) ॥९॥

स धुरमभि मृशति । धूरसि[1] धूर्व धूर्वन्तं धूर्व तं योऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वाम इत्यग्निर्वाऽएष धुर्यस्तमेदत्येष्यन्भवति हविर्म्रहीष्यंस्तस्माऽएवैतान्निह्नुते तथो हैमेपोऽतियन्तमग्निर्धुर्यो न हिनस्ति ॥१०॥

तद्ध स्मैतदारुणिराह । अर्धमासशो वाऽअहꣳ सपत्नान्धूर्वामीत्येतद्ध स्म स तदभ्याह ॥११॥

अथ जघनेन कस्तम्भीमीपामभिमृश्य जपति । देवानामसि[2] वह्नितमꣳ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् । अह्नतमसि[3] हविर्धानं दृꣳहस्व मा ह्वारित्यन एवैतदुपरतौ-त्युपस्तुताद्रातमनसो हविर्ग्रहानीति मा[4] ते यज्ञपतिर्ह्वार्षीदिति यजमानो वै यज्ञपतिस्त-द्यजमानायैवैतदह्वलामाशास्ते ॥१२॥

अथाक्रमते । विष्णुस्त्वा[5] क्रमतामिति यज्ञो वै विष्णु स देवेभ्य इमां विक्रान्तिं विचक्रमे यैषामियं विक्रान्तिरिदमेव प्रथमेन पदेन पस्पाराथेदमन्तरिक्षं द्वितीयेन दिवमुत्तमे-नैताम्वेवैष एतस्मै विष्णुर्यज्ञो विक्रान्तिं विक्रमते ॥१३॥

अब वह जुए को छूता है, यजु० १।८ के इस अंश को पढ़कर "तू जुआ है। उसको सता जो सताने वाला है। उस को सता जो हम को सताता है या जिसको हम सताते हैं।" जुए में अग्नि होता है। जब वह हवि लेने जायगा तो जुए के पास से गुजरेगा। इस प्रकार जुए को प्रसन्न करता है जिससे जुआ उस को कष्ट न दे ॥१०॥

आरुणी ने जो कहा था कि मैं हर आधे मास में शत्रुओं का नाश करता हूँ वह इसी सम्बन्ध में कहा था ॥११॥

डण्डे को छूते हुये, यजु० १।८ और १।९ के इन अंशों का जाप करता है, "तू देवों में सबसे अच्छा ले जाने वाला, सबसे अच्छा जुड़ा हुआ, सबसे अच्छा भरा हुआ, सबसे अच्छा, प्यारा, सबसे अच्छा निमन्त्रण देने वाला है"। "तू सब से दृढ़ हविर्धान है। खड़ा रह, ढीला न पड़"। इस प्रकार वह गाड़ी की स्तुति करता है कि इस प्रकार स्तुत और प्रसन्न गाड़ी से वह हवि ले सके। "यज्ञपति स्खलित न हो" (यजु० १।९)। यजमान ही यज्ञपति है। यजमान की दृढ़ता के लिये ही यह प्रार्थना करता है ॥१२॥

(दाहिने पहिये पर से) गाड़ी पर चढ़ता है इस मन्त्र से (यजु० १।९) "विष्णु तुझ पर चढ़े"। यज्ञ का नाम विष्णु है। यज्ञ ने ही अपने पराक्रम से देवों को पराक्रम-युक्त किया जो पराक्रम कि देवों में है। पहले पैर से पृथ्वी को, दूसरे से अन्तरिक्ष को, तीसरे से द्यौलोक को। इस यजमान के लिये भी यह विष्णु नामक यज्ञ इस सब पराक्रम को प्राप्त कराता है ॥१३॥

१-२. शु० सं० अ० १ क० ८। ३-५. शु० सं० अ० १ क० ९।

अथ प्रेक्षते। उरु[1] वातायेति प्राणो वै वातस्तद्ब्रह्मणैवैतत्प्राणाय वातायोरुगायं कृणुते ॥१४॥

अथापास्यति। अपहतꣳ[2] रक्ष इति यद्यत्र किञ्चिदापन्नं भवति यद्वा नान्येव सरोत्तस्माद्वा एवैतद्राक्षाꣳस्यतोऽपहन्ति ॥१५॥

अथाभिपद्यते। यच्छन्ता[3] पञ्चेति पञ्च वाऽइमा अङ्गुलयः पाङ्क्तो वै यज्ञस्तद्यज्ञमेवैतदत्र दधाति ॥१६॥

अथ गृह्णाति। देवस्या[4] त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याꣳ पूष्णो हस्ताभ्यामग्नये जुष्टं गृह्णामीति सविता वै देवानां प्रसविता तत्सवितृप्रसूत एवैतद्गृह्णात्यश्विनोर्बाहुभ्यामित्यश्विनावध्वर्यू पूष्णो हस्ताभ्यामिति पूषा भागदुघोऽशनं पाणिभ्यामुपनिधाता सत्यं देवा अनृतं मनुष्याभ्यास्तत्सत्येनैवैतद्गृह्णाति ॥१७॥

अथ देवताया ऽआदिशति। सर्वो ह वै देवता अध्वर्युꣳ हविर्महीष्यन्तमुपतिष्ठन्ते मम नाम ग्रहीष्यति मम नाम ग्रहीष्यतीति ताभ्य एवैतत्सह सतीभ्योऽसमदं करोति ॥१८॥

अब यह (चाँवलों को देखता है) और गाडी को सम्बोधन करके इस मन्त्राश (यजु० १।६) का जाप करता है—"वायु के लिये खुल"। वायु प्राण है। इस मन्त्र के जाप से यह यजमान के प्राण को खुली वायु प्रदान करता है ॥१४॥

अगर (चाँवलों पर कोई तिनका या घास आ जावे) तो इस मन्त्राश (यजु० १।६) को पढ़ कर उड़ाता है—"राक्षस भाग गया"। यदि न हो तो भी छू ले और इस मन्त्र को पढ़ ले। इससे राक्षस दूर भाग जाय ॥१५॥

अब यह चाँवलों को इस मन्त्राश को जप कर (यजु० १।६) छूता है—"पाँचों इसको ले लेवें"। 'पाँची' का अर्थ है पाँच अँगुलियाँ, यज्ञ को भी पाक्त (पाँच वाला) कहते हैं। इस प्रकार यज्ञ को धारण करता है ॥१६॥

यजु० १।१० के इस अंश को पढ़ कर (चाँवल) लेता है—"देव सविता की प्रेरणा से, पूषा के दोनों हाथों से अग्नि के लिये तुझको लेता हूँ"। सविता देवों का प्रेरक है। सविता की इसी प्रेरणा से इसको लेता है। अश्विन की दोनों भुजाओं से। दोनों अध्वर्यु अश्विन हैं। "पूषा के दोनों हाथों से", पूषा बाँटने वाला है। जो हाथों से भागों को बाँटता है। देव सत्य हैं। मनुष्य अनृत है। इस प्रकार सत्य के द्वारा ही चाँवलों को ग्रहण करता है ॥१७॥

अब देवताओं का नाम निर्देश करता है। जब अध्वर्यु हवि देने को होता है तो सभी देव घिर आते हैं, "यह मुझको देगा, यह मुझको देगा" इस प्रकार सोच कर। इस प्रकार यह आये हुये देवों में सामञ्जस्य उत्पन्न करता है ॥१८॥

१-२. शु० स० अ० १. क० २। ४. शु० स० अ० १ क० १०।

यद्वेव देवताया ऽऽदिशति । यावतीभ्यो ह वै देवताभ्यो हवीꣳषि गृह्यन्त ऽऋद्धएषु हैव तास्तेन मन्यन्ते यदस्मै तं कामꣳ समर्धयेयुर्यत्कामया गृह्णाति तस्माद्वै देवताया ऽऽदिशत्येवमेव यथापूर्वꣳ हवीꣳषि गृहीत्वा ॥१६॥

अथाग्निमुपतिष्ठते भूताय[1] त्वा नारातय ऽइति तद्यत एव गृह्णाति तदेवैत्पुनराप्याययति ॥२०॥

अथ प्राङ्शेक्षते । [2]स्वरभिविख्येषमिति परिवृतमिव याऽएतदनो भवति तदस्यैतच्चक्षुः पाप्म गृहीतमिव भवति यज्ञो वै स्वरहर्देवाः सूर्य्यस्तत्स्वरेवैतदतोऽभिविपश्यति ॥२१॥

अथावरोहति । दृꣳहन्ता[3] दुर्याः पृथिव्यामिति गृहा वै दुर्यास्तो हेत ईश्वरो गृहा यजमानस्य याऽस्यैषोऽध्वर्युर्यज्ञेन चरति तं प्रयन्तमनु प्रच्योतेरतस्येश्वरः कुलं विक्षोभ्योस्तानेवैतदस्या पृथिव्या दृꣳहति तथा नानुप्रच्यवन्ते तथा न विक्षोभन्ते तस्मादाह दृꣳहन्ता दुर्याः पृथिव्यामित्यथ प्रैत्युर्वन्तरिक्षमन्वेमीति[4] सोऽसावेव वन्धु ॥२२॥

देवो के नामो के निर्देश का एक प्रयोजन यह भी है कि जिन देवताओं के लिये ग्रहण की जाती है उन देवताओं का यह कर्तव्य हो जाता है कि वे यजमान की इच्छाओं की पूर्ति करें इस लिये भी देवताओं का निर्देश करता है। पूर्ववत् देवताओ के लिये निर्देश करके ॥१६॥

यह (बचे हुये चावलों को) यजु० १।११ के इस अश को जपकर छूता है, "विभूति के लिये तुझको, न कि शत्रु के लिये"। जितना वह लेता है उतनी ही उसकी पूर्ति कर देता है ॥२०॥

अब (गाडी पर बैठ कर) पूर्व की ओर देखता है इस मन्त्राश (यजु० १।११) को जपकर "मैं प्रकाश का अवलोकन करूँ।" गाडी ढकी होती है मानो उसमें आँख पापयुक्त है। यज्ञ प्रकाश है। यज्ञ दिन है, यज्ञ देव है। यज्ञ सूर्य है। इस प्रकार वह प्रकाश रूपी यज्ञ का अवलोकन करता है ॥२१॥

इस मन्त्राश (यजु० १।११) को पढ़कर गाड़ी से उतरता है, "दरवाजों वाले पृथ्वी पर सुदृढ रहें।" दरवाजों वाले घर हैं। जब अध्वर्यु यज्ञ के साथ चलता है तो सभव है कि उसके पीछे यजमान के घर टूट जाय और उसका परिवार नष्ट हो जाय। अतः इस प्रकार यजमान के घर को भूमि पर सुदृढ करता है, कि वे टूटें न और परिवार नष्ट न हो। इस लिये वह कहता है, "दरवाजो वाले पृथ्वी पर सुदृढ होवें।" अब वह (गार्हपत्य के उत्तर की ओर) चलता है यह (यजु० १।१०) पढ़कर "मैं अन्तरिक्ष मे चलता हूँ।" इसका वही अर्थ है ॥२२॥

१-४, शु० स० अ० १ क० ११ ।

*स यस्य गार्हपत्ये हवीꣳषि श्रपयन्ति। गार्हपत्ये तस्य पात्राणि सꣳसादयन्ति जघनेनो तर्हि गार्हपत्यꣳ सादयेद्यस्याहवनीये हवीꣳषि श्रपयन्त्याहवनीये तस्य पात्राणि सꣳसादयन्ति जघनेनो तर्ह्याहवनीयꣳ सादयेत्पृथिव्यास्त्वा नाभौ सादयामीति[1] मध्यं वै नाभिर्मध्यमभयं तस्मादाह पृथिव्यास्त्वा नाभौ सादयामीत्या[2]ऽउपस्थऽइत्युपस्थऽइवैनदमा पुरिति वाऽआहुर्यत् सुगुप्तं गोपायन्ति तस्मादाहादित्याऽउपस्थऽइत्यग्ने हव्यꣳ रक्षेति[3] तदग्नये चैवैतद्धविः परिददाति गुप्त्याऽअस्यै च पृथिव्यै तस्मादाहाग्ने हव्यꣳ रक्षेति ॥२३॥ ब्राह्मणम् ॥२॥***

जिस यजमान की गार्हपत्य अग्नि में अध्वर्यु आदि हवि पकाते हैं उसी गार्हपत्य में पात्र भी रखते हैं। वह पात्र गार्हपत्य के पिछले भाग में रखने चाहिये। परन्तु जिसकी आहवनीय में हवि पकाते हैं उस आहवनीय में पात्र रखते हैं। इन पात्रों को आहवनीय के पीछे रखना चाहिये। यजु १।११ के इस अंश को जप कर ऐसा करे, "मैं तुझको पृथ्वी की नाभि में रखता हूँ।" नाभि का अर्थ है—मध्य में भय नहीं होता। इसलिये कहता है कि "मैं तुझे पृथ्वी की नाभि में रखता हूँ।" "अदिति की गोद में।" जब किसी चीज को सुरक्षित रखते हैं तो कहावत है कि 'गोद में रख ली है'। इसलिये कहा "अदिति की गोद में।" 'अग्नि! हवि की रक्षा कर'। इस प्रकार वह हवि को पृथ्वी और अग्नि के संरक्षण में देता है। इसलिये कहता है, "हे अग्नि, तू इस हवि की रक्षा कर" ॥२३॥

अध्याय १—ब्राह्मण ३

पवित्रे करोति। पवित्रे[1] स्थो वैष्णव्याविति यज्ञो वै विष्णुर्यज्ञिये स्थ इत्येवैतदाह ॥१॥

ते वै द्वे भवतः। अयं वै पवित्र योऽयं पवते सोऽयमेव—इवैव पवते सोऽयं

अब दो पवित्र बनाता है। यजु० १।१२ का यह अंश पढ़कर "तुम पवित्र हो विष्णु के।" यज्ञ का नाम विष्णु है। इसलिये कहता है कि तुम यज्ञ के हो ॥१॥

ये दो होते हैं। यह जो वायु बहता है यह पवित्र है। यह एक ही होता है। परन्तु जब यह पुरुष के भीतर जाता है तो उसके दो भाग हो जाते हैं एक अगला और दूसरा

१-३. शु० य० अ० १ क० १२। १. शु० य० अ० १ क० १२।

* एतत् ब्राह्मणारभ्य भिन्नया अन्यत्राऽप्युपलभ्यन्ते यथा—शा० श्र० १. १. २।

पुरुषेऽन्तः प्रविष्टः प्राङ च प्रत्यङ् च ताविमौ प्राणोदानौ तदेतस्यैवानुमात्रां तस्माद् द्वे भवतः ॥२॥

अथोऽअपि त्रीणि स्युः । व्यानो हि तृतीयो द्वे न्येव भवतस्ताभ्यामेताः प्रोक्षणी-रुत्पूयताभिः प्रोक्षति तद्यदेताभ्यामुत्पुनाति ॥३॥

वृत्रो ह वाऽइदꣳ सर्वं वृत्वा शिश्ये । यदिदमन्तरेण द्यावापृथिवी स यदिदꣳ सर्वं वृत्वा शिश्ये तस्माद्वृत्रो नाम ॥४॥

तमिन्द्रो जघान । स हतः पूतिः सर्वत एवापोऽभिप्र सुस्राव सर्वत इवह्यꣳ रामुद्रस्तस्मादु हैवाप्र आपो बीभत्साञ्चक्रिरे ता उपर्युपर्यैति पुप्रविरेऽत इमे दर्भास्ता हैता अनापूयिता आपोऽस्ति वाऽइतरासु सꣳसृष्टमिव यदेना वृत्रः पूतिरभिप्रास्रवत्तदेवासामेताभ्यां पवित्राभ्यामपहन्त्यथ मेध्याभिरेवाद्भिः प्रोक्षति तस्माद्वाऽएताभ्यामुत्पुनाति ॥५॥

स उत्पुनाति । सवितुर्वः[1] प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिरिति सविता वै देवानां प्रसविता तत्सवितृप्रसूत एवैतदुत्पुनात्यच्छिद्रेण पवित्रेणेति यो वाऽअयं पवतऽएषोऽच्छिद्रं पवित्रमेते नैतदाह सूर्य्यस्य रश्मिभिरित्येते वाऽउत्पवितारो यत् सूर्य्यस्य रश्मयस्तस्मादाह सूर्य्यस्य रश्मिभिरिति ॥६॥

पिछला । यह हैं प्राण और उदान । यह पवित्रीकरण भी उसी भांति का है । इसलिये पवित्रे दो होते हैं ॥२॥

तीन भी हो सकते हैं । क्योंकि व्यान भी तो है । परन्तु दो ही होने चाहिये । इन दोनों पवित्रों से प्रोक्षणी जल को छिड़कता है । इसका कारण यह है ॥३॥

वृत्र इस सब पृथ्वी को घेर कर सो रहा । द्यौ और पृथ्वी के बीच मे जो कुछ है उस सब को ढक कर सो रहा । इसलिये उसका नाम वृत्र पड़ा ॥४॥

उस वृत्र को इन्द्र ने मारा । वह मर कर बदबू करता हुआ चारों ओर जलो की ओर बह निकला । समुद्र तो चारो ओर ही हैं । इससे कुछ जल भयभीत हुये और ऊपर-ऊपर बहे । वहीं से यह दर्भ उत्पन्न हुये (जिनके पवित्रे बनते हैं) । यह उस जल के भाग हैं जो सड़ा नहीं था । परन्तु दूसरे जलों मे वह बदबूदार भाग मिल गया । क्योंकि वृत्र उनमें बह कर जा मिला । इन पवित्रों से वह उस भाग को शुद्ध करता है । इसलिये पवित्र जल से छिड़कता है । इसलिये उससे शुद्ध करता है ॥५॥

वह इस मन्त्रांश (यजु० १।१२) को पढ़कर पवित्र करता है :—"सविता की प्रेरणा से, छिद्र रहित पवित्रे से, सूर्य की किरणों से ।" सविता देवों का प्रेरक है, 'छिद्ररहित पवित्रे से' । वायु जो बहता है छिद्ररहित पवित्रा है । "सूर्य की किरणों से" क्योंकि सूर्य की किरणें पवित्र करने वाली हैं ॥६॥

---

१. शु० सं० अ० १ क० १२ ।

करोत्येवमेव यथापूर्वꣳ हवीꣳषि प्रोक्ष्य ॥११॥

अथ यज्ञपात्राणि प्रोक्षति । दैव्याय कर्म्मणे शुन्धध्वं देवयज्यायाऽइति दैव्याय हि कर्म्मणे शुन्धति देवयज्यायै यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामीति[2] तद्यदेवैषामत्राशुद्धस्तक्ता वान्यो वामेभ्यः कश्चित्पराहन्ति तदेवैषामेतदद्भिर्मेध्यं करोति तस्मादाह यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामीति ॥१२॥ ब्राह्मणम् ॥३॥※

हूँ' जिस देवता के लिये हवि होती है उसी के लिये पवित्र की जाती है । यथापूर्व सब हवियो को पवित्र करके ॥११॥

यज्ञ पात्रो को पवित्र करता है इस मंत्रांश (यजु० १।१३) को पढ़कर 'दिव्य कर्म के लिये, देव यज्ञ के लिये पवित्र होओ । दिव्य कर्म के लिये शुद्ध करता है । देव यज्ञ के लिये तुम्हारा जो भाग छूने से अपवित्र हो गया उसको मैं इस मंत्र के द्वारा शुद्ध करता हूँ । बढ़ई ने या किसी और ने छूकर इन को अशुद्ध कर दिया हो । इस अशुद्धि को वह इस प्रकार दूर करता है, इसी लिये कहा कि 'अपवित्रों ने जो तुम्हारा अंश अपवित्र किया हो उस को मैं पवित्र करता हूँ' ॥१२॥

अध्याय १—ब्राह्मण ४

अथ कृष्णाजिनमादत्ते । यज्ञस्यैव सर्वत्वाय यज्ञो ह देवेभ्योऽपचक्राम स कृष्णो भूत्वा चचार तस्य देवा अनुविद्य त्वचमेवामच्छायाजहृः ॥१॥

तस्य यानि शुक्लानि च कृष्णानि च लोमानि तान्यृचां च साम्नां च रूपं यानि शुक्लानि तानि साम्नाꣳ रूपं यानि कृष्णानि तान्यृचां यदि वेतरथा यान्येव कृष्णानि तानि साम्नाꣳ रूपं यानि शुक्लानि तान्यृचां यान्येव बभ्रूणि हरीणि तानि यजुषाꣳ रूपम् ॥२॥

अब यज्ञ की पूर्णता के लिये काले मृग का चमड़ा लेता है, एक बार यज्ञ देवताओं से भाग गया और काले मृग के रूप में विचरता रहा । देवताओं ने उसको खोज लिया और उसका चमड़ा ले आये ॥१॥

उसके जो सफेद और काले लोम हैं वह ऋक् और साम का रूप हैं । सफेद साम का और काले ऋक् का । या इससे उलटा अर्थात् काले साम का और सफेद ऋक् का । जो भूरे या खाकी हैं वे यजुः का रूप हैं ॥२॥

१-२. शु० सं० अ० १ क० १३ ।

※ एतद्ब्राह्मणस्था विषया अन्यत्रानुपलभ्यन्ते यथा—का० श्र० २. १. ३ ।

सैषा त्रयी विद्या यज्ञः । तस्या एतच्छिल्पमेषवर्ण्यस्तद्यत्कृष्णाजिन भवति यज्ञस्यैव सर्वत्वाय तस्मात्कृष्णाजिनमधि दीक्षन्ते यज्ञस्यैव सर्वत्वाय तस्मादध्यवहननमधिषेषणं भवत्यस्कन्नꣳ हविरसदिति तद्यदेवात्र तण्डुलो वा पिष्टं वा स्कन्दात्तद्यज्ञे यज्ञः प्रतितिष्ठादिति तस्मादध्यवहननमधिषेषणं भवति ॥३॥

अथ कृष्णाजिनमादत्ते । शर्मासीति[1] चर्म वाऽएतत्कृष्णस्य तदस्य तन्मानुषꣳ शर्म देवत्रा तस्मादाह शर्मासीति तदवधूनोत्यवधूꣳ रक्षोऽवधूता अरातय इति तन्नाप्ना एवैतद्रक्षाꣳस्यतोऽपहन्त्यतिनत्येव पात्राण्यवधूनोति यद्धवस्यामेध्यमभूत्तद्धवस्यै तदवधूनोति ॥४॥

तत्प्रतीचीनग्रीवमुपस्तृणाति । अदित्यास्त्वगसि प्रति त्वादितिर्वेत्त्वि[2]तीयं वै पृथिव्यदितिस्तस्या अस्यै त्वग्यदिदमस्यामधि किञ्च तस्मादाहादित्यास्त्वगसीति प्रति त्वादितिर्वेत्तिति प्रति हि स्वः सं जानीते तत्संज्ञामेवैतत्कृष्णाजिनाय च वदति नेदन्योऽन्यꣳ हिनसात इत्यभिनिहितमेव सव्येन पाणिना भवति ॥५॥

यह त्रयी विद्या यज्ञ है । उसका जो शिल्प है वह काले मृग चर्म के रूप मे है, वह इस चमड़े को यज्ञ की पूर्णता के लिये लेता है, इस लिये काले मृग चर्म पर ही दीक्षा ली जाती है । यज्ञ की पूर्णता के लिये चर्म को लेते हैं इसलिये चावलो के कूटने फटकने का काम भी इसी पर किया जाता है । जिससे हवि फैले न, यदि कुछ भाग गिरेगा भी तो इसी पर गिरेगा और यज्ञ की पूर्णता नष्ट न होगी । इसी लिये कूटने-पटकने का काम चर्म पर लिया जाता है ॥३॥

कृष्ण मृग चर्म लेते समय यजु० १।१४ के इस अश का जाप करता है, 'तू शर्म या कल्याणकारक है' । इस का मानुषी नाम है चर्म और दैवी नाम है शर्म । इसी लिये कहा 'तू शर्म है' । अब इसी मन्त्र के अगले टुकडे को बोल कर उसे झाड़ता है—'राक्षस झाड दिये गये, शत्रु झाड़ दिये गये' । ऐसा करके वह राक्षस या शत्रुओं को दूर करता है । पात्रो से हटकर झाडता है जो कुछ उसमें अपवित्र हो उसको झाड़ता है ॥४॥

अब उसकी गर्दन का भाग पश्चिम की ओर करके इस प्रकार बिछाता है कि बाल ऊपर को रहें । यजु० १४ का अगला भाग पढकर 'तू अदिति का चमडा है । अदिति तुझ को स्वीकार करें' । पृथिवी अदिति है । उसके ऊपर जो कुछ हो वह उसका चमड़ा है । इसी लिये कहता है, तू अदिति का चर्म है । अदिति तुझे स्वीकार करे' । अपना अपने को स्वीकार करता है । कृष्ण मृग चर्म को इसलिये ऐसा करता है कि चर्म और पृथ्वी मे सम्बन्ध स्थापित किया जाय और एक दूसरे को न सतावें । जब वह बायें हाथ में पकड़ा होता है उसी समय ॥५॥

१-२. शु० स० अ० १ क० १४ ।

* शर्म का अर्थ है कल्याणकारक, चर्म और शर्म मे थोड़ा सी भेद है । चर्म भी शरीर के लिये कल्याणकारक होता है ।

अथ दक्षिणेनोलूखलमाहरति । नेदिहपुरा नाष्ट्रारक्षाꣳस्याविशानिति ब्राह्मणोहि रक्षसामपहन्ता तस्मादभिनिहितमेव सव्येन पाणिना भवति ॥६॥

अथोलूखलं निदधाति । अद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्न[1]इति वा तद्यथैवादः सोमꣳ राजानं ग्रावभिरभिषुण्वन्त्येवमेवैतदुलूखलमुसलाभ्यां दृषदुपलाभ्याꣳ हविर्यज्ञमभिषुणोत्यद्रय इति वै तेषामेकं नाम तस्मादाहाद्रिरसीति वानस्पत्य इति वानस्पत्यो ह्येष ग्रावासि पृथुबुध्न इति ग्रावा ह्येष पृथुबुध्नो ह्येष प्रति त्वादित्यास्त्वग्वेत्स्यति[2] ततसंज्ञामेवैतत्कृष्णाजिनाय च वदति नेदन्योऽन्यꣳहिन सात इति ॥७॥

अथ हविरावपति । अग्नेस्तनूरसि वाचो विसर्जन[3]मिति यज्ञो हि तेनाग्नेस्तनूर्वाचो विसर्जनमिति यां वा अमूꣳ हविर्महीत्य वाचं यच्छत्यत्र वै तां विसृजते तद्यदेतामत्र वाचं विसृजत एष हि यज्ञ उलूखले प्रत्यष्ठादेष हि प्रासारि तस्मादाह वाचो विसर्जनमिति ॥८॥

स यदिदं पुरा मानुषीं वाचं व्याहरेत् । तत्रो वैष्णवीमृचं वा यजुर्वा जपेद्यज्ञो वै

दाहिने हाथ से उखली पकडता है कि कहीं इस बीच में राक्षस वहाँ न आ जायें। ब्राह्मण राक्षसों का घातक होता है, अतः जब कि बायें हाथ में चमड़ा पकड़ा होता है, तभी ॥६॥

उखली को रख देता है, यह कहकर 'तू पत्थर है वनस्पति का। चौड़ा पत्थर' (यजु० १।१४) जैसे सोमयज्ञ में सोमलता को पत्थरों पर पीसते हैं, उसी प्रकार यहाँ भी हवि को उखली और मूसल से कूटते हैं, इनका सामान्य नाम 'अद्रि' है। इसलिये कहा 'तू अद्रि (पत्थर) है'। वनस्पति का, इस लिये कहा कि वह सिल लकड़ी की होती है, 'चौड़ा पत्थर है' इसलिये 'चौड़ा पत्थर' कहा। 'अदिति का चमड़ा तुझे स्वीकार करे'। यह इसलिये कहा कि चमड़े और उखली मे सम्बन्ध हो जाय और एक दूसरे को हानि न पहुँचावें ॥७॥

अब यजु० १।१५ के एक टुकड़े को पढ़कर हवि डालता है, 'तू अग्नि का शरीर है। वाणी को मुक्त करने वाला'। चावल यज्ञ के लिये है इसलिये उसको अग्नि का शरीर कहा। वाणी को मुक्त करने वाला' इस लिये कहा कि जब गाड़ी से चावल लेने गया था उस समय मौन धारण किया था। अब उस मौन को तोड़ता है। मौन तोड़ने का हेतु यह है कि अब यज्ञ उखली में स्थापित हो गया। उसका प्रसार हो गया। इसीलिये कहा कि 'तू वाणी को मुक्त करने वाला है' ॥८॥

यदि इस बीच में (मौन के समय) कुछ लौकिक शब्द मुँह से निकल जाय तो ऋक् या यजुः से कोई विष्णु का मत्र बोलना चाहिये, यज्ञ विष्णु है। इस प्रकार यज्ञ का आरम्भ हो जाता है, और यह मौन तोड़ने का प्रायश्चित्त भी है। अब जपता है 'देवों की प्रसन्नता

१-२. शु० स० अ० १ क० १४। ३. शु० स० अ० १ क० १५।

विष्णुस्तद्यज्ञं पुनरारभते तस्यो हैषा प्रायश्चित्तिर्देववीतये त्वा गृह्णामीति[1] देवानवदित्यु हि हविर्गृह्यते ॥९॥

अथ मुसलमादत्ते । बृहद्भावासि वानस्पत्य[2] इति बृहद्भावा ह्येष वानस्पत्यो ह्येष तदवदधाति स इदं देवेभ्यो हविः शमीष्व सुशमि शमीष्वेति स इदं देवेभ्यो हविः[3] सꣳस्कुरु साधुसꣳस्कृतꣳसꣳस्कुर्वित्येवैतदाह ॥१०॥

अथ हविष्कृतमुद्वादयति । हविष्कृदेहि हविष्कृदेहीति[4] वाग्वै हविष्कृद्वाचमेवैतद्विसृजते वागु वै यज्ञस्तद्यज्ञमेवैतत्पुनरुपह्वयते ॥११॥

तानि वाऽएतानि । चत्वारि वाच एहीति ब्राह्मणस्यागह्यार्द्रवेति वैश्यस्य च राजन्यबन्धोश्चाधावेति शूद्रस्य स यदेव ब्राह्मणस्य तदाहैतद्धि यज्ञियतमगेतदु ह वै वाचः शान्ततमं यदेहीति तस्मा देहीत्येव ब्रूयात् ॥१२॥

तद्ध स्मैतत्पुरा । जायैव हविष्कृदुपोत्तिष्ठति तदिदमप्येतर्हि य एव कश्चोपोत्तिष्ठति स यत्रैष हविष्कृतमुद्वादयति तदेको दृषदुपले समाहन्ति तद्यदेतामत्र वाचं प्रत्युद्वादयन्ति ॥१३॥

के लिये मैं तुझको लेता हूँ' । वस्तुतः देवों की प्रसन्नता के लिये ही यज्ञ किया जाता है ॥९॥

अब यजु० १।१४ के इस अंश को पढ़कर मुसली पकड़ता है, 'तू लकड़ी का बड़ा पत्थर है' । क्योंकि यह लकड़ी का भी है और बड़ा भी । अब इस मन्त्रांश (यजु० १।१४) को पढ़कर मुसली ओखली में डालता है, 'देवों के लिये हवि तैयार कर । अच्छी तरह तैयार कर' । तात्पर्य, यह है कि इस हवि को देवों के लिये तैयार कर । जल्दी से तैयार कर ॥१०॥

अब वह हविष्कृत् (हवि तैयार करने वाले) को बुलाता है । 'हविष्कृत् आ, हविष्कृत् आ' । वाणी ही हविष्कृत् है । इस प्रकार वाणी को मुक्त करता है, वाणी यज्ञ है, इस प्रकार वह यज्ञ को फिर बुलाता है ॥११॥

बुलाने के चार प्रकार हैं—ब्राह्मण को बुलाना हो तो कहेंगे 'एहि' । वैश्य के लिये 'आगहि', क्षत्रिय के लिये 'आद्रव' । शूद्र के लिये 'आधाव' । इस स्थल पर ब्राह्मण वाला निमन्त्रण देना चाहिये, क्योंकि यही यज्ञ के उपयुक्त है और शान्ततम है । अतः कहता है, 'एहि' (यहाँ आइये) ॥१२॥

पहली प्रथा यह थी कि इस निमन्त्रण पर यजमान की पत्नी ही उठकर हविष्कृत् बनती थी । इसलिये यहाँ भी वह (पत्नी) या कोई ऋत्विज उठता है । जब अध्वर्यु हविष्कृत् को बुलाता है तो एक ऋत्विज दोनों सिलों को पीटता है, ऐसा शोर क्यों करते हैं ? इसलिये कि ॥१३॥

१-४. शु० स० अ० १ क० १५ ।

मनोर्ह वाऽश्वतूपभ आस । तस्मिन्नसुरघ्नी सपत्नघ्नी वाक्प्रविष्टास तस्य ह स्म ष्वसथाद्रवथादसुररक्षसानि म्रियमाणानि यन्ति ते हासुराः समूदिरे पापं बत नोऽयमश्वतूपभः सचते कथं न्विमं दम्नुयामेति किलाताकुलीऽइति हासुरब्रह्मा वासतुः ॥१४॥

तौ होचतुः । श्रद्दादेवो वै मनुरावं नु वेदावेति तौ हागत्योचतुर्मनो याजयाव त्वेति केनेत्यनेनर्षभेणेति तथेति तस्यालब्धस्य सावागपचक्राम ॥१५॥

सा मनोरेव जायांमनावीं प्रविवेश । तस्यै ह स्म यत्र वदन्त्यैम्रियन्ति ततो ह स्मैवासुररक्षसानि म्रियमानानि यन्ति ते हासुराः समूदिरऽइतो वै नः पापीयः सचते भूयो हि मानुषी वाग्वदतीति किलाताकुली हैवोचतुः श्रद्दादेवो वै मनुरावं न्वेव वेदावेति तौ हागत्योचतुर्मनो याजयाव त्वेति केनेत्यनयैव जाययेति तथेति तस्याऽआलब्धायै सा वागपचक्राम ॥१६॥

सा यज्ञमेव यज्ञपात्राणि प्रविवेश । ततो हैनां न शेकतुर्निर्हन्तुꣳ सैषासुरघ्नी वागुद्वदति स यस्य हैवं विदुष एतामत्र वाचं प्रत्युद्दादयन्ति पापीयाꣳसोहैवास्य सपत्ना भवन्ति ॥१७॥

मनु के पास एक बैल था । उसमें असुर को मारने वाली और शत्रु को मारने वाली वाणी घुस गई । जब वह हुँकारता और चिल्लाता तो असुर राक्षस मर जाते थे । तब असुरों ने कहा, 'यह यह बैल तो हमारा बड़ा अनर्थ करता है, इसको कैसे मारें ? 'असुरों के ऋत्विज थे 'किलात' और 'आकुली' ॥१४॥

यह दोनो बोले, 'कहते हैं कि मनु श्रद्धालु है, इसको जावें' । तब वे मनु के पास गये और कहा, 'हे मनु, हम तुम्हारे लिये यज्ञ करना चाहते हैं' । मनु ने पूछा 'किस से' । उन्होंने कहा, 'इस बैल से' । उसने कहा, 'अच्छा' । बैल के मरने पर वाणी वहाँ से चली गई ॥१५॥

वह मनु की पत्नी मनावी में घुस गई । जब वह उस को बोलते हुये सुनते तो राक्षस और असुर मर जावें । तब असुरों ने कहा, 'यह तो और भी बुरा हुआ क्योंकि (बैल की अपेक्षा) मनुष्य अधिक बोलता है' । तब किलात और आकुली ने कहा, 'मनु को श्रद्धालु कहते हैं, चलो इसकी जाच करें' । वे उसके पास गये और कहा, 'हम तुम्हारे लिये यज्ञ करना चाहते हैं' । मनु ने पूछा, 'किससे ?' उन्होंने कहा, 'इस तेरी पत्नी से' । उसने कहा, 'अस्तु', उसके मर जाने पर वाणी उसमें से निकल गई ॥१६॥

अब यह यज्ञ और यज्ञ-पात्रों में घुस गई । और वे दोनों (किलात और आकुली) उसको न निकाल सके । यही असुर और शत्रु को मारने वाली वाणी इन पत्थरों से निकलती है । जो इस रहस्य को समझता है उसके लिये जब यह शोर किया जाता है तो उसके शत्रुओं को बहुत हानि पहुँचती है ॥१७॥

समाहन्ति । कुक्कुटोऽसि मधुजिह्व[1] इति मधुजिह्वो वै स देवेभ्य आसीद्विषजिह्वोऽसुरेभ्यः स यो देवेभ्य आसीः स न एधीत्येवैतदाहैषमूर्जमावद त्वया वयꣳ सङ्घातꣳ सङ्घात जेष्मेति[2] नात्र तिरोहितमिवास्ति ॥१८॥

अथ शूर्पमादत्ते । वर्षवृद्धमसीति[3] वर्षवृद्धꣳ ह्येतदहि नडाना यदि वेणूना यदीषीकाणा वर्षमुह्येवैता वर्धयति ॥१९॥

अथ हविर्निर्वपति । अति त्वा वर्षवृद्ध वेत्त्विति[4] वर्षवृद्धा उह्येवैते यदि व्रीहयो यदि यवा वर्षमुह्येवैतान् वर्धयति तत्सङ्गामेवैतच्छूर्पाय च वदति नेदन्योऽन्यꣳ हिनसातऽइति ॥२०॥

अथ निष्पुनाति । परापूतꣳरक्ष परापूता अरातय[5] इत्यथ तुपान्प्रहन्त्यपहतꣳरक्ष[6] इति तद्वाघ्रा एवैतद्रक्षाꣳस्यतोऽपहन्ति ॥२१॥

अथापविनक्ति । वायुर्वो विविनक्त्विति वै वायुर्योऽय पवतऽएष वाऽइदꣳसर्वं विविनक्ति यदिद किञ्च विविच्यते तदेनानेष एवैतद्विविनक्ति स यदेतऽएतत्प्राप्नुवन्ति यत्रैना-

वह यह मंत्राश पढ़कर पत्थरो को पीटता है, 'तू मीठी वाणी वाला कुक्कुट या मुर्गा है' । वस्तुत (यह बैल) देवों के लिये मीठी वाणी वाला और असुरों के लिये विष युक्त वाणी वाला था । इसलिये वह कहता है, 'जैसा तू देवों के लिये था वैसा ही हमारे लिये भी हो' । फिर वह कहता है, 'रस और शक्ति हमारे लिये ला । तेरी इस सहायता से हम हर एक युद्ध को जीतें' । आगे सब स्पष्ट है ॥१८॥

अब अध्वर्यु इस मत्राश (यजु० १।१४) को पढकर सूप को लेता है 'तू वर्षा में बढा हुआ है ।' वस्तुत यह वर्षा में बढा हुआ होता है, चाहे वह नरकुल का हो, चाहे सिरकी का । यह सब वर्षा मे बढते हैं ॥१९॥

अब वह कुटे हुये चावलों को सूप में डालता है इस मत्राश (यजु० १।१६) को पढ कर 'वर्षा में बढा हुआ तुझे स्वीकार करे ।' क्योंकि यह हवि भी वर्षा में बढी हुई होती है चाहे यव या जौ हों, चाहे तण्डुल । ऐसा कहकर वह हवि और सूप के बीच में सम्बन्ध स्थापित कर देता है । जिससे एक दूसरे को सताने न पावें ॥२०॥

अब वह फटकता है इस मत्राश (यजु० १।१६) को पढकर 'राक्षस दूर हो गये, शत्रु दूर हो गये ।' 'राक्षस दूर हों' ऐसा कहकर भूसी फेंक देता है । ऐसा करने से राक्षस शत्रु दूर हो जाते हैं ॥२१॥

अब वह कुटे चावलों को बेकुटे चावलों से अलग करता है । इस मत्राश को पढ कर 'वायु तुमको अलग-अलग करे' (यजु० १।१६) । क्योंकि सूप की वायु ही चावलों को अलग करती है । और ससार म जिस चीज को अलग करना होता है वायु द्वारा ही अलग

---

१ शु० स० अ० क० १६ ।

नध्यपविनक्ति ॥२२॥

अथानुमन्त्रयते । देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना[1] सुप्रतिगृहीता असन्नित्यथ त्रिः फलीकरोति त्रिवृद्धि यज्ञः ॥२३॥

तद्धैके देवेभ्यः शुन्धध्वं देवेभ्यः शुन्धध्वमिति फलीकुर्वन्ति तदु तथा न कुर्य्यादादृष्टिं वाऽएतद्देवतायै हविर्भवत्यथैतद्वैथदेवं करोति यदाह देवेभ्यः शुन्धध्वमिति तत्समर्दं करोति तस्मादु तूष्णीमेव फलीकुर्य्यात् ॥२४॥ ब्राह्मणम् ॥४॥ अध्याय ॥१॥*

करते हैं । जब यह कृत्य जारी होता है और वह फटकते हैं तभी ॥२२॥

वह पात्र में डाले हुये चांवलों को सम्बोधन करके यह मंत्रांश (यजु० १।१६) पढ़ता है—'सोने के हाथों वाला सविता देव छिद्ररहित हाथ से तुमको ग्रहण करे' अर्थात् वे उस हवि को आदर के साथ लेवें । वह तीन बार फटकता है । क्योंकि यज्ञ त्रिवृत् (तिहरा) है ॥२३॥

कुछ लोग ऐसा पढ़कर फटकते हैं 'देवों के लिये शुद्ध हो ।' परन्तु ऐसा न करना चाहिये । क्योंकि यह हवि तो एक विशेष देवता की होती है । 'देवों के लिये शुद्ध हो' ऐसा कहने वाला उसको सब देवों की घोषित कर देता है । इसलिये चुपचाप ही फटकना चाहिये ॥२४॥

---

१. शु० सं० अ० क० १६ ।

* एतद्ब्राह्मणारभ्या विषया अन्यत्राऽप्युपलभ्यन्ते यथा । का० श्रौ० २. १. ३; तै० सं० ।

अध्याय १—ब्राह्मण १

स वै कपालान्येवान्यतर उपदधाति । इषदुपलेऽन्यतरत्तद्वाऽएतदुभयꣳ सह क्रियते तद्यदेतदुभयꣳ सह क्रियते ॥१॥

शिरो ह वाऽएतद्यज्ञस्य यत्पुरोडाशः । स यान्येवेमानि शीर्ष्णः कपालान्येतान्येवास्य कपालानि मस्तिष्क एव पिष्टानि तद्वाऽएतदेकमङ्गमेकꣳ सह करवाव समानं करवावेति तस्माद्वाऽएतदुभयꣳ सह क्रियते ॥२॥

स यः कपालान्युपदधाति । स उपवेपमादत्ते धृष्टिरसीति[1] स यदेनेनाग्नि धृष्णिवरोपचरति तेन धृष्टिरथ यदेनेन यज्ञ उपालभत उपेव वाऽएनेनैतद्वेवेष्टे तस्मादुपवेपो नाम ॥३॥

तेन प्राचोऽङ्गारानुद्यूहति । अधाग्ने अग्निमामाद जहि निष्क्व्यादꣳ सेधे[2]त्ययं वाऽआमादयेनेदं मनुष्याः पक्त्वाश्नन्त्यथ येन पुरुष दहन्ति स क्व्यादेतावेवैतदुभावतोऽपहन्ति ॥४॥

(अग्नीध्र) कपालों को (गार्हपत्य अग्नि पर) रखता है। और (अध्वर्यु) दोनो (इषदु पलों) सिलों को (मृग चर्म पर)। यह दोनों काम एक साथ होते हैं। यह दोनों काम एक साथ क्यों होते हैं? इसलिये :—॥१॥

पुरोडाश यज्ञ का सिर है। यह जो कपाल हैं वे सिर की खोपड़ी की हड्डियाँ है। पिसी हुई चावल की पीठी मस्तिष्क का भेजा है। यह सब मिलकर एक अग होते हैं। वे सोचते हैं कि इन सबको एक कर देवें। इसलिये इन दोनों कामों को एक साथ करते हैं ॥२॥

वह जो कपालों को आग पर रखता है उपवेश (निमटे) को हाथ में लेकर कहता है 'तू धृष्टि है' (यजु० १।१७) इसको 'धृष्टि' इसलिये कहा कि इसी से अग्नि को ठीक करेगा। (धृष्टि का अर्थ है साहस के साथ काम करने वाला)। इसका नाम उपवेश इसलिये है कि इसी से आग के अगारों का स्पर्श करेगा ॥३॥

इससे वह अगारों को आगे को निकालता है यह मत्र पढकर (यजु० १।१७) 'हे अग्नि! कच्चा खाने वाली अग्नि को छोड़। शव खाने वाली अग्नि को दूर कर'। कच्चा खाने वाली (आमाद) अग्नि वह है जिस पर मनुष्य खाना पकाते हैं। क्व्याद अग्नि वह है, जिस पर मरे हुये पुरुष के शव को जलाते हैं। इन दोनो अग्नियों को गार्हपत्य अग्नि से अलग करता है ॥४॥

१-२. शु० स० अ० १ क० १७।

अथाङ्गारमास्कोति । आ देवयजं वहेति[1] *यो देवयाट्तस्मिन्हवीऽपि श्रपयाम तस्मिन्यज्ञं तनवामहाऽइति तस्माद्वाऽआस्कोति ॥५॥*

तं मध्यमेन कपालेनाभ्युपदधाति । देवा ह वै यज्ञं तन्वानास्तेऽसुररक्षसेभ्य आसङ्गाद्विभयाञ्चक्रुर्नोबोऽधस्तान्नाष्ट्रा रक्षाꣳस्युपोत्तिष्ठानित्यग्निर्हि रक्षसामपहन्ता तस्मादेवमुपदधाति तथदेव एव भवति नान्य एष हि यजुष्कृतो मेध्यस्तस्मान्मध्यमेन कपालेनाभ्युपदधाति ॥६॥

स उपदधाति । ध्रुवमसि पृथिवीं दृꣳहेति[2] *पृथिव्या एव रूपेणैतदेव दृꣳहत्येतेनैव द्विषन्तं भ्रातृव्यमवबाधते ब्रह्मवनि त्वा क्षत्रवनि राजातवन्युपदधामि भ्रातृव्यस्य वधायेति*[3] *वह्नी वै यजुःष्याशीस्तद्ब्रह्म च क्षत्रं चाशास्तऽउभे वीर्ये सजातवतीति भूमा वै सजातास्तद्भूमानमाशास्तऽउपदधामि भ्रातृव्यस्य वधायेति यदि नाभिचरेद्यद्यु अभिचरेदमुष्य वधायेति ब्रूयादभिनिहितमेव सव्यस्य पाणेरङ्गुल्या भवति ॥७॥*

अब एक अगारे को अपनी ओर खींचता है यह मन्त्राश (यजु० १।१७) पढ़कर :— 'उस अग्नि को लाओ जिसमें देवताओं के लिये यज्ञ किया जाता है (देवयाज)'। मैं देवयाज अग्नि में हवि पकाऊँ। उसी में यज्ञ करूँ। इसीलिये वह उस अगारे को निकालता है ॥५॥

उस अगारे पर बीच का कपाल रखता है। जब देव यज्ञ करने लगे तो उनको भय हुआ कि कहीं असुर राक्षस यज्ञ को विध्वंस न करें। उनको भय हुआ कि कहीं हमारे नीचे से असुर राक्षस न उठ खड़े होवें। अग्नि राक्षसों का घातक है। इसलिये कपाल को आग पर रखता है। इसी अगारे पर क्यों रखता है, दूसरों पर क्यों नहीं? इसका कारण यह है कि यह अगारा यजुष्कृत है (यजु० मन्त्रों के पाठ से पवित्र किया हुआ है।) इसलिये इसके ऊपर मध्य कपाल को रखता है ॥६॥

इस समय वह यह मन्त्राश पढ़ता है (यजु० १।१७) 'तू ध्रुव है। पृथ्वी को दृढ़ कर।' पृथ्वी के रूप में ही वह यज्ञ को दृढ़ करता है। इसी से वह शत्रु का नाश करता है, अब कहता है 'ब्राह्मण के रक्षा करने वाले, क्षत्रिय के रक्षा करने वाले, सजातीय के रक्षा करने वाले! तुझको मैं शत्रु के नाश के लिये रखता हूँ'। आशीर्वाद के बहुत से यजुष् मन्त्र हैं। इस मन्त्र से ब्राह्मण और क्षत्रिय को आशीर्वाद देता है जो दो वीर्यवान् शक्तियाँ हैं। सजातीय की रक्षा करने वाले। ऐसा कहने से धन को आशीर्वाद देता है क्योंकि सजातीय धन है। 'शत्रु के वध के लिये', ऐसा कहते हुये चाहे किसी को मारना चाहे या न चाहे, उसको कहना चाहिये 'अमुक अमुक के वध के लिये'। अभी बायें हाथ की अँगुली से कपाल रक्खा ही था कि ॥७॥

१-२. शु० सं० अ० १ क० १७ ।

अथाङ्गारमास्कोति । नेदिह पुरा नाष्ट्रा रक्षाꣳस्याविशानिति ब्राह्मणो हि रक्षसामपहन्ता तस्मादभिनिहितमेव सव्यस्य पाणेरङ्गुल्या भवति ॥८॥

अथाङ्गारमध्यूहति । अग्ने ब्रह्म गृभ्णीष्वेति[1] नेदिह पुरा नाष्ट्रा रक्षाꣳस्याविशानित्यग्निहि रक्षसामपहन्ता तस्मादेनमध्यूहति ॥९॥

अथ यत्पश्चात्तदुपदधाति । धरुणमस्यन्तरिक्षꣳहेऽन्तरिक्षस्यैव रूपेणैतदेव दꣳहत्येतेनैव द्विषन्तं भ्रातृव्यमवबाधते ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधायेति[3] ॥१०॥

अथ यत्पुरस्तात्तदुपदधाति । धर्त्रमसि दिव दꣳहेति[4] दिव एव रूपेणैतदेव दꣳहत्येतेनैव वधायेति ॥११॥

अथ यद्दक्षिणतस्तदुपदधाति । विश्वाभ्यस्त्वाशाभ्य उपदधामीति[5] स यदिमाल्लोकानति चतुर्थमस्ति वा न वा तेनैवैतद्द्विषन्तं भ्रातृव्यमवबाधतेऽनद्धा वै तद्यदिमाल्लोकानति

दूसरे अंगारे को लेता है, कि कहीं इस बीच में असुर राक्षस घुस न आवें। ब्राह्मण राक्षसों का दूर करने वाला है। इसलिये ज्योंही बायें हाथ की अँगुली से सँभाल रक्खा, त्यों ही झट ॥८॥

उसे अंगारे पर रख देता है यह मन्त्राश पढ़कर, 'हे अग्नि, ब्रह्म, इसको ग्रहण कर'। वह ऐसा कहता है जिससे असुर राक्षस पहले से ही घुसने न पावें। वह इसीलिये कपाल को अंगारे पर रख देता है क्योंकि अग्नि राक्षसों का दूर करने वाला है ॥९॥

अब बीच वाले कपाल के पश्चिम की ओर के कपाल को यह मन्त्राश पढ़कर अंगारे पर रखता है (यजु० १।१८) 'तू सहारा है। अन्तरिक्ष को दृढ़ कर'। अन्तरिक्ष के रूप में वह यज्ञ को सुदृढ़ करता है। इससे वह दुष्ट शत्रु को दूर करता है। 'तुझे, ब्राह्मण की रक्षा करने वाले, क्षत्रिय की रक्षा करने वाले, सजातीय की रक्षा करने वाले तुझको मैं शत्रु के वध के लिये रखता हूँ' ॥१०॥

अब पूर्व की ओर के कपाल को इस मन्त्राश को (यजु० १।१८) पढ़ कर रखता है 'तू धर्ता है। द्यौ लोक को सुदृढ़ कर।' द्यौ के रूप में वह इस यज्ञ को सुदृढ़ करता है। इससे वह शत्रु को दूर भगाता है। 'ब्राह्मण की रक्षा करने वाले, क्षत्रिय की रक्षा करने वाले, सजातीय की रक्षा करने वाले तुझको मैं शत्रु के वध के लिये रखता हूँ' ॥११॥

अब दाहिने वाले कपाल को रखता है यह मन्त्राश (यजु० १।१८) पढ़ कर 'सब के लिये मैं तुझ को रखता हूँ' इन तीनों लोकों के आगे कोई चौथा लोक है या नहीं, यहाँ से भी वह शत्रु को दूर करता है। चौथा लोक है या नहीं, यह अनिश्चित है। और 'सब दिशाओं' का भी निश्चय नहीं। अत कहता है, 'सब दिशाओं के लिये'। शेष कपालों को

१-५. शु० स० अ० १ क० १८।

चतुर्थमस्ति वा वा न वानड्वो तद्याद्विश्वा आशास्तस्मादाह विश्वाभ्यस्त्वाशाभ्य उपदधामीति[1] तूष्णी वै वेतरांसिकपालान्युपदधाति चितः स्थोर्ध्वचित[2] इति वा ॥१२॥

अथाङ्गारैरभ्यूहति । भृगूणामङ्गिरसा तपसा तप्यध्वमि[3]त्येतद्वै तेजिष्ठं तेजो यद्भृग्वङ्गिरसाꣳ सुतप्तान्यसदिति तस्मादेनमभ्यूहति ॥१३॥

अथ यो ह्यधुपले उपदधाति । स कृष्णाजिनमादत्ते शर्मासीति[4] तदवधूनोत्यवधूतꣳ रक्षोऽवधूता अरायत[5] इति सोऽसावेव बन्धुस्तत्प्रतीचीनग्रीवमुपस्तृणात्यदित्यास्त्वगसि प्रति त्वादितिर्वेत्त्विति[6] सोऽसावेव बन्धु· ॥१४॥

अथ ह्यधदुपदधाति । धिषणासि[7] पर्वती प्रति त्वादित्यास्त्वग्वेत्त्विति धिषणा हि पर्वती हि प्रति त्वादित्यास्त्वग्वेत्त्विति तत्सङ्गामेवैतत्कृष्णाजिनाय च वदति नेदन्योऽन्यꣳ हिनसाव इतीयमेवैषा पृथिवी रूपेण ॥१५॥

अथ शम्यामुदीचीनामामुपदधाति । दिव· स्कम्भनीरसी[8]त्यन्तरिक्षमेव रूपेणान्तरि-

वह चुपचाप रख देता है या इस मन्त्राश को पढ़कर (यजु० १।१८) 'तुम चित हो' तुम ऊर्ध्वचित हो' (चिने हुये हो, ऊपर को चिने हुये हो) ॥१२॥

अब उनको अंगारों से ढक देता है इस मन्त्राश (यजु० १।१८) को पढ़कर 'भृगु और अंगिरसों के तप से तपो' । भृगु और अंगिरसों का तेज बहुत बलिष्ठ है । इसीलिये वह इसको अंगारों से ढक देता है ॥१३॥

अब जिसने दो पत्थरों को चमड़े पर रखा था वह उस चमड़े को यजु० १।१९ के इस मन्त्राश को पढ़कर उठाता है 'तू शर्म अर्थात् कल्याणप्रद है' । अब उसी मन्त्र के अगले टुकड़े को पढ़कर झाड़ता है, 'राक्षस झड़ गये । शत्रु झड़ गये' । अर्थ यही है । अब उसको पश्चिम की ओर गर्दन ही इस प्रकार बिछा देता है । इस मन्त्राश को पढ़कर, 'तू अदिति का चमड़ा है । अदिति तुझे स्वीकार करे' । इसका तात्पर्य यही है ॥१४॥

अब उस पर ह्यधद् अर्थात् नीचे का पाट रखता है इस मन्त्राश को पढ़ कर 'तू पहाड़ी पत्थर है । अदिति का चमड़ा तुझे स्वीकार करें' । यह पत्थर भी है और पहाड़ी भी । यह जो कहा, 'अदिति का चमड़ा तुझे स्वीकार करे' इसका तात्पर्य है कि इसमें और चमड़े में सम्बन्ध स्थापित हो जाय जिससे वे एक दूसरे को हानि न पहुँचावें । नीचे का पाट पृथ्वी का रूप है ॥१५॥

अब उसके ऊपर शमी§ का रखता है और इस प्रकार कि उसका सिरा उत्तर की ओर रहे । यह मन्त्राश (यजु० १।१९) पढ़ कर 'तू द्यौ लोक को थामने वाला है' । यह अन्तरिक्ष का रूप है । द्यौ और पृथिवी अन्तरिक्ष के द्वारा ही थमे हुये हैं । इसलिये कहता

---

१ ३ शु० स० अ० १ क० १८ । ४-८ शु० स० अ० १ क० १९ ।

§ शमी के द्वारा चक्की का नीचे का पाट ऊपर के पाट से संयुक्त रहता है ।

त्तेण हीमे द्यवापृथिवी विष्टब्धे तस्मादाह दिव स्कम्भनीरसीति ॥१६॥

अथोपलामुपदधाति । धिषणासि पार्वतेयी प्रति त्वा पर्वती वेत्त्विति[1] कनीयसी ह्येषा दुहितेव भवति तस्मादाह पार्वतेयीति प्रति त्वा पर्वती वेत्त्विति[2] प्रति हि स्वः सञ्जानीते तत्संज्ञामेवैतदुपदुपलाभ्या वदति नेदन्योऽन्यथं हिनसातऽइति द्यौरेवैषारूपेण हनूऽएव दुपदुपले जिह्वैव शम्या तस्माच्छम्यया समाहन्ति जिह्वया हि वदति ॥१७॥

अथ हविरधिवपति । धान्यमसि धिनुहि देवानिति[3] धान्यꣳहि देवान्धिनवदित्यु हि हविर्गृह्यते ॥१८॥

अथ पिनष्टि । प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धामिति[4] प्रोहति देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वेति[5] ॥१९॥ शतम् ॥१००॥

तद्यदेवं पिनष्टि । जीवं वै देवानाꣳ हविरमृतममृतानामथैतदुलूखलमुसलाभ्यां दुपदुपलाभ्याꣳ हविर्यज्ञं मन्ति ॥२०॥

स यदाह । प्राणाय त्वोदानाय त्वेति तत्प्राणोदानौ दधाति व्यानाय त्वेति तद्व्यानं

है, 'तू द्यौलोक को थामने वाला है' ॥१६॥

अब ऊपर के पाट (उपल) को नीचे के पाट पर रखता है यह मन्त्रांश (यजु० १।१६) पढ़ कर 'तू पर्वत से उत्पन्न हुआ पाट है। पहाड़ी तुझे स्वीकार करे'। यह पाट छोटा होता है। इसलिये यह नीचे के बड़े पाट की लड़की हुआ। इसलिये नीचे के पाट को पर्वती और ऊपर के पाट को पार्वतीय कहा'। 'पर्वती पार्वतीय को स्वीकार करे'। क्योंकि सजातीय सजातीय को स्वीकार करता है। इस प्रकार वह इन दोनों पाटों में सम्बन्ध स्थापित करता है। जिससे वे एक दूसरे को न सतावें। यह द्यौलोक का रूप है। या यह दोनों पाट दो हनु या जबड़े हैं और शमी जीभ (जिह्वा) है। इसीलिये शमी से पाटों को थपथपाता है। जीभ से ही तो बोला जाता है ॥१७॥

अब यजु० १।२० से नीचे के पाट पर हवि को छोड़ता है। 'तू धान्य है। देवों की तृप्ति कर'। हवि इसलिये ली जाती है कि देवताओं की तृप्ति हो सके ॥१८॥

अब यजु० १।२० को पढ़कर पीसता है, 'तुझको प्राण के लिये, उदान के लिये व्यान के लिये, मैं यजमान के जीवन में वृद्धि करूँ'। अब पिसे हुये भाग को चमड़े पर छोड़ता है यह पढ़कर 'सविता देव' सोने के हाथों वाला, छिद्ररहित हाथों से तुझे स्वीकार करे ॥१९॥

वह इसको इस प्रकार इसलिये पीसता है कि हवि देवताओं का जीवन है। अमरों के लिये अमृत है। अब उखली (उलूखल-मुसल) मूसली और दो पाटों (दृषद्-उपल) से हवि को पीसते हैं ॥२०॥

१-२. शु० स० अ० १ क० १९ । ३-५. शु० स० अ० १ क० २० ।

दधाति दीर्घामनु प्रसितिमायुषे धामिति तदायुर्दधाति देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना सुप्रतिगृहीतान्यसधिति चक्षुषे त्वेति तच्चक्षुर्दधात्येतानि वै जीवतो भवन्त्येवमु हैतज्जीवमेव देवानाꣳ हविर्भवत्यमृतममृतानां तस्मादेवं पिनष्टि पिष्ठꣳपन्ति पिष्टान्यभीन्धते कपालानि ॥२१॥

अथैक आज्यं निर्वपति । यद्वाऽआदिष्टं देवतायै हविर्गृह्यते यावद्वैवत्यं तद्भवति तदितरेण यजुषा गृह्णाति न वाऽएतत्कस्यै चन देवतायै हविर्गृह्णन्नादिशति यदाज्यं तस्मादनिरुक्तेन यजुषा गृह्णाति महीनां पयोऽसीति[1] मह इति ह वाऽएतासामेके नाम यद्गवां तासां वाऽएतत्पयो भवति तस्मादाह महीनां पयोऽसीत्येवमु हास्यैतत्सलु यजुषैव गृहीतं भवति तस्माद्वेवाह महीना पयोऽसीति ॥२२॥ ब्राह्मणम् ॥५॥ [२. १.] ॥

यह जो कहा कि 'प्राण के लिये तुझको, उदान के लिये तुझको' इससे प्राण और उदान धारण कराता है। 'व्यान के लिये तुझको' इससे व्यान को धारण करता है, बडी आयु हो'। इससे आयु बढ़ाता है, यह जो कहा कि 'सविता देव, सोने के हाथों वाला छिद्र-रहित हाथों से तुझे स्वीकार करे' यह इसलिये कि उसको भली भाति स्वीकार किया जाय। 'आँख के लिये तुझको' इससे आँख को धारण कराता है। यही जीवन के चिह्न हैं। इनसे हवि जीवित होता है। अमरों के लिये अमृत हो जाता है। इसीलिये हवि पीसते हैं। हवि को पीसने और कपालो को गर्म करते समय ॥२१॥

एक पुरुष (अग्नीध्र) आज्यथाली में घी डालता है। जब किसी निर्दिष्ट देवता के लिये हवि ली जाती है तो उसी देवता की हो जाती है। उसको विशेष यजुष् मन्त्र पढ़कर लेते हैं। यह घी किसी विशेष देवता के लिये नहीं है। अतः सामान्य यजुष् मन्त्र पढ़कर (यजु० १।२०) लिया 'तू बड़ों का दूध है'। बडो का अर्थ है गाय। यह गाय का रस है, इसलिये कहा, 'बडों का दूध' यह भी इसी यजुष् मन्त्र से लिया जाता है। इसलिये कहा, 'बड़ों का दूध' ॥२२॥

अध्याय १—ब्राह्मण १

पवित्रवति संयौति । पाभ्यां पवित्रेऽअवधाय देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ संयौमीति[2] सोऽसावेवैतस्य यजुषो बन्धुः ॥१॥

जिस पात्री मे दो पवित्रे रखे थे उसमे पिसे हवि को डालता है यह मन्त्र पढ़कर (यजु० १।२१), 'देव सविता की प्रेरणा से अश्विन की दो भुजाओं से पूषा के दो हाथों से तुझको उडेलता हूँ'। इस यजु० का तात्पर्य तो वही है (जो १।१।२।१७ में कह दिया गया) ॥१॥

---

१. शु० सं० अ० १ क० २० । २. शु० सं० अ० १ क० २१ ।

अथान्तर्वेद्युपविशति । अथैक उपसर्जनीभिरेति ता आनयति ताः पवित्राभ्यां प्रतिगृह्णाति समाप ओषधीभिरिति[1] *सꣳह्येतदाप ओषधिभिरेताभिः पिष्टाभिः सङ्गच्छन्ते समोषधयो रसेनेति*[2] *सꣳह्येतदोषधयो रसेनैताः पिष्टा अद्भिः सङ्गच्छन्तऽआपो ह्येतासाꣳ रसः सꣳरेवतीर्जगतीभिः पृच्यन्तामिति*[3] *रेवत्य आपो जगत्य ओषधयस्ता उ ह्येतदुभय्यः सम्पृच्यन्ते सं मधुमतीर्मधुमतीभिः पृच्यन्तामिति*[4] *सꣳ रसवत्यो रसवतीभिः पृच्यन्तामित्येवैतदाह ॥२॥*

अथ संयौति । जनयत्यै त्वा संयौमीति[5] *यथा श्रियेऽन्नाद्यायेमाः प्रजा यजमानाय यच्छेदेवं वै तत्संयौत्यधिवर्क्ष्यन्वै संयौति यथा वाऽन्यधिवृक्षोऽग्नेरधि जायेतैवं वै तत्संयौति ॥३॥*

अथ द्वेधा करोति । यदि द्वे हविषी भवतः पौर्णमास्या वै द्वे हविषी भवतः स यत्र पुनर्नꣳ सꣳ हरिष्यन्त्स्यात्तदभिमृशतीदमग्नेरिदमग्नीषोमयोरिति नाना वाऽएतदग्रे हविर्गृह्णन्ति तत्सहावघ्नन्ति तत्सह पिꣳषन्ति तत्पुनर्नाना करोति तस्मादेवमभिमृशत्यधिवृक्षेणक्त्येवैष पुरोडाशमधि श्रयत्यसावाज्यम् ॥४॥

अब वेदी के भीतर बैठता है । अब एक (अग्नीध्र) उपसर्जनी जल (आटा सानने का जल) लेकर आता है । और उसको उसके पास लाता है, वह इसको पवित्रों के द्वारा यह मंत्र पढकर लेता है (यजु० १।२१) 'जल ओषधियों से मिले' । इस प्रकार जल पिसे हुये चांवल रूपी ओषधियों में मिलता है, 'ओषधियाँ रस के साथ मिलें' । इस प्रकार जल पिसे हुये चावलों के रस के साथ मिलते हैं, रेवती जगती के साथ मिलें । जल रेवती है और ओषधियाँ जगती हैं । यह दोनों परस्पर मिलते हैं । 'मधु वाले मधु वालों के साथ मिलें' । अर्थात् रस वाले रस वालों के साथ मिलें ॥२॥

अब सानता है । यजु० १।२२ को पढकर 'जनने के लिये तुझे मिलाता हूँ' । यह पिसे आटे को गूंधता है कि जिससे वह यजमान के लिये श्री, पशु और सन्तान को देवे । वह इसलिये भी गूंधता है कि वह अग्नि के ऊपर रखा जा सके और पक सके ॥३॥

अब उसके दो भाग करता है । यदि दो हवि देनी हों तो । पूर्णमासी की इष्टि में दो हवियाँ दी जाती हैं । अब वह छूकर देखता है कि यह फिर तो नहीं मिल गईं और (यजु० १।२२) पढ़ता है, 'यह अग्नि के लिये और यह अग्नि-सोम के लिये' । पहले यह दोनों हवियाँ अलग-अलग ली गईं थीं (देखो १।१।२।१७) फिर इनको साथ पटका । साथ पीसा । अब फिर बाटकर अलग-अलग कर दिया । इसीलिये छूता है, एक (अध्वर्यु) पीठी आग पर रखता है और दूसरा (अग्नीध्र) घी को ॥४॥

१-४. शु० स० अ० १ क० २१ । ५. शु० स० अ० १ क० २२ ।

तद्वाऽएतत् । उभयꣳ सह क्रियते तद्यदेतदुभयꣳ सह क्रियतेऽर्धो ह वाऽएष आत्मनो यज्ञस्य यदाज्यमर्धो यदिह हविर्भवति स यथासावर्धो य उ चायमर्धस्ता उभावग्निं गमयावेति तस्माद्वाऽएतदुभयꣳ सह क्रियतऽएवमु हैष आत्मा यज्ञस्य सन्धीयते ॥५॥

सोऽसावाज्यमधिश्रयति । इषे त्वेति[1] वृष्ट्यै तदाह यदाहेषे त्वेति तत्पुनरुद्वासयत्यूर्जे त्वेति[2] यो वृष्टादूर्ग्सो जायते तस्मै तदाह ॥६॥

अथ पुरोडाशमधिवृणक्ति । धर्मोऽसीति[3] यज्ञमेवैतत्करोति यथा धर्मं प्रवृञ्ज्यादेवं प्रवृणक्ति विश्वायुरिति[4] तदायुर्दधाति ॥७॥

तं प्रथयति । उरुप्रथा उरु प्रथस्वेति[5] प्रथयत्येवैनमेतदुरु ते यज्ञपतिः प्रथतामिति[6] यजमानो वै यज्ञपतिस्तद्यजमानायैवैतदाशिषमाशास्ते ॥८॥

तं न सत्रा पृथुं कुर्य्यात् । मानुषꣳ ह कुर्य्याद्यत्पृथुं कुर्याद्वृद्धं वै तद्यज्ञस्य यन्मानुषं नेद्वृद्धं यज्ञे करवाणीति तस्मान्न सत्रा पृथुं कुर्यात् ॥९॥

यह दोनों काम साथ साथ किये जाते हैं । यह दोनो काम साथ क्यों किये जाते हैं । इसलिये कि यज्ञ के आत्मा का आधा भाग घी है और आधा हवि । वे दोनों सोचते हैं कि आधा भाग यह हुआ और आधा भाग यह हुआ । इन दोनों को साथ-साथ अग्नि में ले जावे ! इसलिये इन दोनों कामों को साथ-साथ करते हैं जिससे यज्ञों का आत्मा पूरा पूरा जुड़ जाय ॥५॥

अग्नीध घी को आग पर यह मन्त्रांश पढ़कर पकाता है (यजु० १।२२) 'रस के लिये तुझ को' । रस से तात्पर्य है वृष्टि का । फिर उसको आग पर से हटा लेता है और कहता है 'ऊर्ज के लिये तुझको' (यजु० १।२०) । वर्षा से यह ऊर्ज (वृक्षों में) उत्पन्न होता है उसी से तात्पर्य है ॥६॥

अब (अध्वर्यु) पुरोडाश को पकाता है यह पढ़कर 'तू धर्म है' (यजु० १।२२) । इस प्रकार उसको 'यज्ञ' बना देता है । यानी उसको कढ़ाई में पकाया । अब कहता है 'विश्वायुः' । इससे वह यजमान के लिये जीवन की वृद्धि करता है ॥७॥

अब वह उसको (कपालों) में फैलाता है, (यजु० १।२२) को पढ़कर 'तू फैला हुआ है । फैल जा' । 'तेरा यज्ञपति भी ऐसा ही फैले' । यज्ञपति यजमान है । यह यजमान के लिये आशीर्वाद है ॥८॥

उसको बहुत नहीं फैलाना चाहिये । बहुत फैलाने से वह मानुषी हो जाती है (दैवी नहीं रहती) । मानुषी हवि अशुभ होती है । यह चाहता है कि कोई ऐसा काम न हो कि अशुभ हो जाय, इसलिये बहुत नहीं फैलाता ॥९॥

---

१. शु० स० अ० १ क० २२ । २-३. शु० सं० अ० १ क० १ ।
४-६. शु० स० अ० १ क० २२ ।

अश्वशफमात्रं कुर्यादित्यु हैकऽआहुः । कस्तद्वेद यावानश्वशफो यावन्तमेव स्वयं मनसा न सन्ना पृथुं मन्येतैवं कुर्य्यात् ॥१०॥

तमद्भिरभिमृशति । सकृद्वा त्रिर्वा तद्वदेवास्या त्रावघ्नन्तो वा पिंशन्तो वा क्षिखन्ति वा वि वा बृहन्ति शान्तिरापस्तदद्भिः शान्त्या शमयति तदद्भिः सन्दधाति तस्मादद्भिरभिमृशति ॥११॥

सोऽभिमृशति । अग्निष्टे त्वचं मा हिंसीदित्यग्निना वाऽएनमेतदभितप्स्यन्भवत्येष ते त्वचं मा हिंसीदित्येवैतदाह ॥१२॥

तं पर्य्यग्निं करोति । अच्छिद्रमेवैनमेतदग्निना परिगृह्णाति नैनं नाष्ट्रा रक्षाꣳसि प्रमृशागित्यग्निर्हि रक्षसामपहन्ता तस्मात्पर्य्यग्निं करोति ॥१३॥

तꣳ श्रपयति । देवस्त्वा सविता श्रपयत्विति[2] न वाऽएतस्य मनुष्यः श्रपयिता देवो ह्येष तदेनं देव एव सविता श्रपयति वर्षिष्ठेऽधि नाक[3]ऽइति देवत्रो एतदाह यदाह वर्षिष्ठेऽधि नाकऽइति तमभिमृशति श्रृतं चेदानीति तस्माद्वाऽअभिमृशति ॥१४॥

सोऽभिमृशति । मा भेर्मा संविक्था[4] इति मा त्वं भैषीर्मा संविस्था यत्वाहमनुपꣳशु

कुछ का कहना है कि घोड़े की टाप के बराबर होना चाहिये । परन्तु कौन जाने कि घोड़े की टाप कितनी चौड़ी होती है ? अतः इतना चौड़ा करना चाहिये कि बुद्धि कहे कि बहुत चौड़ी नहीं है ॥१०॥

अब जल से स्पर्श कराता है । एक बार या तीन बार ? क्योंकि फटकने या पीसने में जो कुछ उसको क्षति हो गई हो, जल से दूर हो जाती है । जल शान्ति है । जल से उसका शमन कर देता है । इसीलिये जल स्पर्श कराता है ॥११॥

यह जल का स्पर्श इस मन्त्रांश (यजु० १।२२) से कराता है, 'अग्नि तेरी त्वचा को हानि न पहुँचावे' । अग्नि पर उसे तपाना है । इसीलिये कहता है कि 'अग्नि तेरी त्वचा को हानि न पहुँचावे' ॥१२॥

अब उसके चारों ओर अग्नि की परिक्रमा कराता है । मानों उसके चारो ओर एक छिद्र रहित परिखा बनाता है जिससे राक्षस उसको ग्रहण न कर सकें । क्योंकि अग्नि राक्षसों को दूर करने वाला है । इसीलिये अग्नि की परिखा बनाता है ॥१३॥

अब उसे पकाता है, यजु० १।२२ के इस मन्त्रांश को पढ़कर, 'देव सविता तुझे पकावें' । इसका बनाने वाला मनुष्य नहीं है । देव हैं । इसलिये 'देव सविता पकावें' ऐसा कहता है । अब कहता है 'स्वर्ग में; अर्थात् 'देवों के स्थान में' । अब यह कह कर छूता है, 'देखूँ पका कि नहीं' । इसीलिये छूता है ॥१४॥

यह इस मंत्रांश को पढ़कर छूता है । 'मत डर' । 'मत संकोच कर' । यह कहने का

१-३. शु० सं० अ० १ क० २२ । ४. शु० सं० अ० १ क० २३ ।

सन्तं मानुषोऽमिमृशामीत्येवैतदाह ॥१५॥

यदा श्रृतोऽथाभिवासयति । नेदेनमुपरिष्टाच्छ्रा रक्षाꣳस्यवपश्यानिति नेद्वेव नग्न-इव मुषित-इव शयाताऽइत्यु चैव तस्माद्वाऽअभिवासयति ॥१६॥

सोऽभिवासयति । अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयादिति नेदेतदनु यज्ञो वा यजमानो वा ताम्याद्यदिदमभिवासयामीति तस्मादेवमभिवासयति ॥१७॥

अथ पात्रीनिर्णेजनम् । अङ्गुलिप्रणेजनमाप्त्येभ्यो निनयति तद्यदाप्त्येभ्यो निन-यति ॥१८॥ ब्राह्मणम् ॥६॥ [२ २.] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासङ्ख्या १२१॥

तात्पर्य यह है कि 'डर मत, सकोच न कर, मैं मनुष्य हूँ और तू अमानुष अर्थात् देव है। मै तुझे छूता हूँ, डर मत' ॥१५॥

जब पक जाय तो ढक देता है कि 'कहीं राक्षस इसको देख न लें'। अथवा 'कहीं यह नगा और खुला न रहे'। इसलिये वह उसको ढक देता है ॥१६॥

उसको यजु० १।२३ के इस अश से ढकता है 'यज्ञ हीन न हो, यजमान की सन्तान हीन न हो जब मैं इसको ढक दूँ'। ऐसा सोच कर ॥१७॥

अब पात्री को धोकर और अँगुलियों को धोकर धोवन को आप्त्य देवों के लिये डालता है। आप्तों के लिये डालने का प्रयोजन (आगे कहा जायगा) ॥१८॥

अध्याय २—ब्राह्मण ३

चतुर्धा विहितो ह वाऽअग्नेऽग्निरास। स यमग्नेऽग्निꣳ होत्राय प्रावृणत स प्राध-न्वद्यं द्वितीयं प्रावृणत स प्रैवाधन्वद्यं तृतीयं प्रावृणत स प्रैवाधन्वद योऽयमेतर्ह्यग्निः स भीषा निलिल्ये सोऽपः प्रविवेश तं देवा अनुविद्य सहसैवाद्भ्य आनिन्युः सोऽपोऽभिति-ष्टेवावष्टभ्नुता स्थ या अग्रपदनꣳस्थ याभ्यो वो मामकामं नयन्तीति तत आप्त्याः सम्भूवु-स्तितो द्वित एकतः ॥१॥

अग्नि पहले चार प्रकार का था। वह अग्नि जिसको उन्होंने पहले होता के लिये वरण किया वह भाग गया। दूसरी बार जिसको चुना वह भी भाग गया। तीसरी बार जिसको चुना वह भी भाग गया। इस पर आज कल जो अग्नि है वह डर कर छिप गया। वह जलों में प्रविष्ट हो गया, देवों ने उसे खोज लिया और पश्चात् वहाँ से निकाल लाये। अग्नि ने जलों पर थूक दिया और कहा कि तुम रक्षा के स्थान नहीं हो। मेरी इच्छा के बिना यह देव उनको तुम में से खींच लाये। उनमें से आप्त्य देव निकले त्रित, द्वित और एकत ॥१॥

तऽइन्द्रेण सह चेरुः । यथेद ब्राह्मणो राजानमनुचरति स यत्र त्रिशीर्षाण त्वाष्ट्रं विश्वरूप जघान तस्य हैतेऽपि वध्यस्य विदाञ्चक्रु॰ शरपर्वैनं त्रित एव जघानात्य ह तदिन्द्रोऽमुच्यत देवो हि सः ॥२॥

त उ हैतऽऊचुः । उपैनमऽएनो गच्छन्तु येऽस्य वध्यस्यानेदिपुरिति किमिति यज्ञ एवैषु मृष्टामिति तदेभ्वेतद्यज्ञो मृष्टे यदेभ्यः पात्नीनिर्णेजनमङ्गुलिप्रणेजन निनयन्ति ॥३॥

तऽउ हाप्त्या ऊचुः । अत्येव वयमिदमस्मत्परो नयामेति कमभीति य एवादक्षिणेन हविषा यजाताऽइति तस्मान्नादक्षिणेन हविषा यजेताप्त्येषु ह यज्ञो मृष्ट आप्त्या उ ह तस्मिन्मृजते योऽदक्षिणेन हविष यजते ॥४॥

ततो देवाः । एता दर्शपूर्णमासयोर्दक्षिणाः कल्पन्त्यदन्वाहार्य नेददक्षिणꣳ हविरसदिति तस्माना निनयति तथैभ्योऽसमदं करोति तदभितर्पात तथैषाꣳ श्रृतं भवति स निनयति त्रिताय त्वा द्वितीय त्वैकताय त्वैति[1] पशुर्ह वाऽएष आलभ्यते यत्पुरोडाशः ॥५॥

पुरुषꣳ ह वै देवाः । अग्रे पशुमालेभिरे तस्यालब्धस्य मेधोऽपचक्राम सोऽश्वं

वे इन्द्र के साथ फिरते रहे जैसे आज कल ब्राह्मण राजा के साथ फिरा करते हैं। और जब इन्द्र ने त्वष्टा के तीन सिर वाले पुत्र विश्वरूप को मारना चाहा तो वे इसके मारे जाने की बात जान गये और त्रित ने उसको मार डाला। इन्द्र हत्या के इस पाप से बचा रहा। इन्द्र तो देव है ॥२॥

लोगों ने कहा, 'यह पाप उन्हीं को लगना चाहिये जो यह जानते थे कि इसका वध होगा'। उन्होंने कहा 'कैसे'? उत्तर मिला, 'यज्ञ उन तक पाप लगा देगा'। इस प्रकार जब यह पात्री को धोते हैं और उसी जल में अध्वर्यु अपनी अँगुलियाँ धोता है तो यह पाप यज्ञ द्वारा आप्त्यों को लग जाता है ॥३॥

आप्त्यों ने कहा, 'इस पाप को हम आगे बढ़ा दें'। लोगों ने पूछा 'किस तक'। आप्त्यों ने उत्तर दिया, 'उस तक जो बिना दक्षिणा दिये यज्ञ करता है'। अतः बिना दक्षिणा दिये यज्ञ नहीं करना चाहिये। अन्यथा यज्ञ उस पाप को आप्त्यों तक पहुँचा देगा और आप्त्य उस मनुष्य तक जो बिना दक्षिणा के यज्ञ करता है ॥४॥

इस पर देवों ने दर्श और पूर्णमास इष्टियों में उस दक्षिणा की योजना की जिसको अन्वाहार्य कहते हैं, जिससे हवि बिना दक्षिणा के न रह जाय। इस जल को तीनों आप्त्यों में अलग-अलग बाटता है। गरम करके। जिससे वह उनके लिये पक जाय। 'हे त्रित, यह तुम्हारा' 'हे द्वित, इतना तुम्हारा' 'हे एकत, इतना तुम्हारा' इस प्रकार झगड़ा न हो। यह जो पुरोडाश है वह मानों यज्ञ के पशु का आलभन है ॥५॥

देवों ने पहले-पहल पुरुष रूपी यज्ञ पशु का आलभन किया। उस आलभन किये पुरुष से मेध चला गया और घोड़े में जा घुसा। उन्होंने घोड़े का आलभन किया। तब

१. शु० स० अ० १ क० २३ ।

प्रविवेश तेऽश्वमालभन्त तस्यालब्धस्य मेधोऽपचक्राम स गां प्रविवेश ते गामालभन्त तस्यालब्धस्य मेधोऽपचक्राम सोऽविं प्रविवेश तेऽविमालभन्त तस्यालब्धस्य मेधोऽपचक्राम सोऽज प्रविवेश तेऽजमालभन्त तस्यालब्धस्य मेधोऽपचक्राम ॥६॥

स इमा पृथिवीं प्रविवेश । त सन्त इवान्वीषुस्तमन्वविन्दस्तावेमौ व्रीहियवौ तस्मादप्येतावेतर्हि सन्त—इवैवानुविन्दन्ति स यावद्वीर्यवद्ध वाऽस्यैते सर्वे पशव आलब्धा स्युस्तावद्वीर्यवद्धास्य हविरेव भवति य एवमेतद्वेदात्रो सा सम्पद्यदाहु पाङ्क्त पशुरिति ॥७॥

यदा पिष्टान्यथ लोमानि भवन्ति । यदाप आनयत्यथ त्वग्भवति यदा सयौत्यथ मांसं भवति सन्तत—इव हि स तर्हि भवति सन्ततमिव हि मांस यदा भृतोथारिथ भवति दारुण—इव हि स तर्हि भवति दारुणमिह्यस्थ्यथ यदुद्वासयिष्यन्नाभिघारयति तमज्जानन्दधात्यपा सा सम्पद्यदादु पाङ्क्त पशुरिति ॥८॥

स य पुरुषमालभन्त । स किम्पुरुषोऽभवद्यावश्च च गा च तौ गौरश्च गवयश्चाभवता यमविमालभन्त स उष्ट्रोऽभवद्यमजमालभन्त स शरभोऽभवत्तस्मादेतेषा पशूनानारिातव्य मपक्रान्तमेधा ह्येते पशव ॥९॥ ब्राह्मणम् ॥१ [२ ३] ॥

मेघ घोड़े से निकल कर गाय म घुस गया । तब उन्होंने गाय का आलभन किया । तब मेध गाय से निकल कर भेंड म घुस गया । तब उन्होंने भेड़ का आलभन किया । तब मेध भेड़ मे से निकल कर बकरी में चला गया । तब उन्होंने बकरी का आलभन किया । तब मेध बकरी म से निकल भागा ॥६॥

और पृथ्वी में चला गया । वह पृथ्वी को खोद कर खोजने लगे । और उसको पा लिया । यही चावल और जौ हैं । इनको आजकल भी पृथ्वी को जोत कर निकालते हैं । उन सब पशुओं के आलभन से जो लाभ होता है वही चावल की हवि से होता है । उस मनुष्य को जो इस रहस्य को समझ कर यज्ञ करता है । यह पाक यज्ञ है अर्थात् पाच पशुओं का ॥७॥

यह जो पीठी है वह लोम है । जो जल है वह त्वचा है । जब गूँधते हैं तो यह मास है । मास गूधा हुआ होता है । पकने से कड़ी हड्डी के समान हो जाता है । हड्डी तो कड़ी होती है । जब उस पर घी डालते हैं तो मजा हो जाता है । इस प्रकार यह हवि पाक पशु हो जाती है ॥८॥

जो पुरुष का आलभन किया था वह किंपुरुष हो गया । जो घोड़े का आलभन किया और गाय का, वह गौर और गवय बन गये । भेड़ का आलभन किया तो ऊँट बन गया । बकरी का आलभन किया तो वह शरभ बन गया । इसलिये इन पाँच पशुओं को न खाना चाहिये, क्योंकि इनमें मेध नहीं रहा ॥९॥

अध्याय १—ब्राह्मण ४

इन्द्रो ह यत्र वृत्राय वज्रं प्रजहार । स प्रहृतश्चतुर्धोऽभवत्तस्य स्फ्यस्तृतीयं वा यावद्वा यूपस्तृतीयं वा यावद्वा रथस्तृतीयं वा यावद्वाथ यत्र प्राहरत्तच्छकलोऽशीर्यत स पतित्वा शरोऽभवत्तस्माच्छरो नाम यदशीर्यतैवमु स चतुर्धा वज्रोऽभवत् ॥१॥

ततो द्वाभ्या ब्राह्मणा यज्ञे चरन्ति द्वाभ्याञ्च राजन्यबन्धवः संव्याधे यूपेन च स्फ्येन च ब्राह्मणा रथेन च शरेण च राजन्यबन्धवः ॥२॥

स यत्स्फ्यमादत्ते । यथैव तदिन्द्रो वृत्राय वज्रमुदयच्छदेवमेवैष एतं पाप्मने द्विषते भ्रातृव्याय वज्रमुद्यच्छति तस्माद्वै स्फ्यमादत्ते ॥३॥

तमादत्ते । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददेऽध्वरकृतं देवेभ्य इति[1] सविता वै देवाना प्रसविता तत्सवितृप्रसूतऽएवैनमेतदादत्तेऽश्विनोर्बाहुभ्या-मित्यश्विनावध्वर्यू तस्तयोरेव बाहुभ्यामादत्ते न स्वाभ्या पूष्णो हस्ताभ्यामिति पूषा भागदुघो तस्यैव हस्ताभ्यामादत्ते वज्रो वाऽएष तस्य न मनुष्यो भर्त्ता तमेताभिर्देवताभिरादत्ते ॥४॥

जब इन्द्र ने वृत्र के वज्र मारा तो उसके चार टुकड़े हो गये । इसके तीन भागों में तिहाई या उसके लगभग स्फ्या हो गई । तिहाई या लगभग यूप हो गया और तिहाई या लगभग रथ हो गया । जो भाग वृत्र के लगा वह टूट कर शर (बाण) हो गया । बाण को शर इसलिये कहते हैं कि वह टूट गया ('शृ' का अर्थ है टूटना') । वज्र के इस प्रकार चार टुकडे हो गये ॥१॥

इनमें से दो टुकड़े ब्राह्मण यज्ञ के काम मे लाता है अर्थात् स्फ्या और यूप । और शेष दो टुकड़े क्षत्रिय लडाई के काम म लाता है अर्थात् रथ और शर ॥२॥

वह स्फ्या को लेता है । जैसे इन्द्र ने वृत्र को मारने के लिये वज्र लिया था उसी प्रकार अध्वर्यु अपने वैरी शत्रु को मारने के लिये स्फ्याञ्च लेता है । स्फ्या को लेने का यही प्रयोजन है ॥३॥

वह स्फ्या को यजु० १।२४ के मन्त्राश को पढ़कर पकड़ता है, 'देव सविता की प्रेरणा से, अश्विनों की भुजाओं से, देव पूषा के दोनों हाथों से देवताओं के अध्वर के लिये तुझे उठाता हूँ' । सविता देवो का प्रेरक है । अतः वह देव सविता की प्रेरणा से ही स्फ्या लेता है । अग्नि दो अध्वर्यु हैं । उन्हीं की भुजाओ से उठाता है, अपनी से नहीं । यह वज्र है । वज्र कोई मनुष्य उठा नहीं सकता । इसलिये वह देवों की सहायता से यह काम करता है ॥४॥

---

१. शु० स० अ० १ क० २४ ।

ञ स्फ्या तलवार की आकृति की (खदिर की) लकड़ी की होती है जो यज्ञ में काम आती है ।

आददेऽध्वरकृत देवेभ्य[1] *इति । अध्वरो वै यज्ञो यज्ञ कृतदेवेभ्य इत्येवैतदाह तथ्सव्ये पाणौ कृत्वा दक्षिणेनाभिमृश्य जपति सथ्श्यत्येवैनमेतद्यज्जपति ॥५॥*

स जपति । इन्द्रस्य बाहुरसि दक्षिण[2] *इत्येष वै वीर्यवत्तमो य इन्द्रस्य बाहुर्दक्षिणस्तस्मादाहेन्द्रस्य बाहुरसि दक्षिणऽइति सहस्रभृष्टि शततेजा*[3] *इति सहस्रभृष्टिर्वै स वज्र आसीच्छततेजा य त वृत्राय प्राहरत्तमेवैतत्करोति ॥६॥*

वायुरसि तिग्मतेजाऽ[4] *इति । एतद्वै तेजिष्ठ तेजो यदय योऽय पवतऽएष हीमाल्लोकास्तिर्य्यङ्ङनुपवते सथ्श्यत्येवैनमेतद्विपतो वध इति*[5] *यदि नाभिचरेद्यद्युऽभिचरेदमुष्य वध इति ब्रूयात्तेन सथ्श्रितेन नात्मानमुपस्पृशति न पृथिवीं नेदनेन वज्रेण सथ्श्रितेनात्मान वा पृथिवी वा हिनसानीति तस्मान्नात्मानमुपस्पृशति न पृथिवीम् ॥७॥*

देवाश्च वाऽअसुराश्च । उभये प्राजापत्या पस्पृधिरे ते ह स्म यदेवा असुरान् जयन्ति ततो ह स्मैनान् पुनरुपोत्तिष्ठन्ति ॥८॥

ते ह देवा ऊचु । जयामो वाऽअसुरास्ततस्त्वेव नः पुनरुपोत्तिष्ठन्ति कथ न्वेनाननपजय्य जयेमेति ॥९॥

'मैं तुझे देवो के अध्वर के लिये लेता हूँ' 'अध्वर' का अर्थ है यज्ञ । इसका तात्पर्य है कि वह देवों के लिये यज्ञ करता है । इसको बायें हाथ से उठाकर और दाहिने हाथ से छू कर जप करता है, जप का प्रयोजन है तेज करना' ।

वह जपता है (यजु० १।२४), 'तू इन्द्र की दाहिनी बाहु है' । इन्द्र की दाहिनी बाहु बहुत बलवान होती है इसीलिये कहा कि 'तू इन्द्र की दक्षिण बाहु है' । 'हजार नोकों वाला, सैकडों धारों वाला' । वज्र हजारों नोकों वाला था । इन्द्र ने जो वज्र फेंका, वह सैकडो धारा वाला था । इस प्रकार वह स्पया में वैसी ही भावना करता है ॥६॥

'तू तेज धार वाला वायु है' । वायु जो बहता है तेज धार वाला होता है क्योंकि वह ससार भर को चीर कर बहता है, इस प्रकार वह उसको तेज करता है । 'वैरी के वध के लिये' । चाहे किसी को मारना चाहे, या न, उसको कहना चाहिये 'अमुक को मारने के लिये' । जब वह तेज हो जाय तो इससे न अपने को छुये, और न पृथ्वी को । यह सोच कर कि 'कहीं इससे मुझे या जमीन को हानि न पहुँच जाय' । इसीलिये वह न स्वय को छूता है न उससे पृथ्वी को छूता है ॥७॥

देव और असुर दोनो प्रजापति की सन्तान अपनी बडाई के लिये झगड बैठे । देवों ने असुरों को हरा दिया । परन्तु असुर भी देवों को कष्ट देने लगे ॥८॥

देवों ने कहा, 'हमने असुरों को हरा दिया । फिर भी असुर हमको सताते रहें । क्या काम करें कि अब फिर हम असुरों को हरा दें और दुबारा लड़ना न पड़े' ॥९॥

१-५. शु० स० अ० १ क० २४ ।

स हाग्निरुवाच । उदञ्चो वै नः पलाय्य मुच्यन्तऽइत्युदञ्चो ह स्मैवैषां पलाय्य मुच्यन्ते ॥१०॥

स हाग्निरुवाच । अहमुत्तरतः पर्य्येष्याम्यथ यूयमित उपसꣳरोत्स्यथ तान्तसꣳरुध्यैभिश्च लोकैरभिनिधास्यामो यदु चेमांल्लोकानति चतुर्थ ततः पुनर्न सꣳहास्यन्तऽइति ॥११॥

सोऽग्निरुत्तरतः पर्येत् । अथेमऽइत उपसमरुन्धंस्तान्तसꣳरुध्यैभिश्च लोकैरभिन्यदधुर्यदु चेमाल्लोकानति चतुर्थं ततः पुनर्न समजिहत तदेतद्विदानेन यत् स्तम्बयजुः ॥१२॥

स योऽसावग्नीदुत्तरतः पर्येति । अग्निरेवैष निदानेन तागध्वर्युरेवेत उपसꣳरुणद्धि तान्तसꣳ रुध्यैभिश्च लोकैरभिनिदधाति यदु चेमांल्लोकानति चतुर्थं ततः पुनर्न सञ्जिहते तस्मादप्येतर्ह्यसुरा न सञ्जिहते येन ह्येवैनान्देवा अबाबाधन्त तेनैवैनानप्येतर्हि ब्राह्मणा यज्ञेऽबबधन्ते ॥१३॥

य उऽएव यजमानायारातीयति । यश्चैनं द्वेष्टि तमेवैतदेभिश्च लोकैरभिनिदधाति यदु चेमांल्लोकानति चतुर्थमरया एव सर्वꣳ हरत्यस्याꣳ हीमे सर्वे लोकाः प्रतिष्ठिताः किꣳ हि हरेद्यदन्तरिक्षꣳ हरामि दिवꣳ हरामीति हरेत्तस्मादस्या एव सर्वꣳ

अग्नि ने कहा वे 'उत्तर को भागे । वहाँ वे बच गये' । उत्तर में भागने से वस्तुतः बच गये ॥१०॥

अग्नि ने कहा 'मैं उत्तर की ओर से इनको घेरे लेता हूँ, तुम इधर से रोको । जब हम रोकेंगे तो तीनों लोकों से इनको दबा देंगे । और तीनों लोकों के आगे जो चौथा लोक है, इससे वे फिर सिर न उठा सकेंगे' ॥११॥

इस पर अग्नि उत्तर को चला गया । और दूसरे देवों ने उन असुरों को इधर से रोक दिया । और रोक कर उनको तीनों लोकों से दबा दिया । और जो चौथा लोक इन लोकों से परे है उससे वह फिर न उठ सके । यह जो घास फेंकता है यह वही असुरों को दबाने के कृत्य का रूप है ॥१२॥

अग्नीध्र उत्तर की ओर जाता है क्योंकि अग्नीध्र अग्नि है । अध्वर्यु उनको इधर से रोक देता है । इनको रोक कर इन लोगों द्वारा उनको दबा देता है । इन तीन लोकों के अतिरिक्त जो चौथा लोक हो वहाँ से भी वे उठने न पायें । वे इस प्रकार नहीं उठ पाते क्योंकि जैसे देवों ने पहले उनको रोक दिया था । इसी प्रकार इन ब्राह्मणों ने भी उनको रोक दिया ॥१३॥

जो यजमान से वैर करता है या उससे द्वेष करता है उसको यह इन तीनों लोकों द्वारा या यदि कोई चौथा लोक हो उसके द्वारा भी दबा देता है । इन तीनों अथवा चौथे से भी इसको निकाल देता है क्योंकि इसी पृथ्वी पर तो सब लोक स्थित हैं । यदि यह कहेगा

हरति ॥१४॥

अथ तृणमन्तर्धाय प्रहरति । नेदनेन वज्रेण तथ्संशितेन पृथिवीश्च हिनसानीति तस्मात्तृणमन्तर्धाय प्रहरति ॥१५॥

स प्रहरति । पृथिवि देवयजन्योषध्यास्ते मूल मा हिथ्सिषमि[1]त्युत्तरमूलमिव वाऽएनामेतत्करोत्याददानस्तामेतदाहोषधीना ते मूलानि मा हिथ्सिषमितिव्रजंगच्छ गोष्ठानमि[2]त्यभिनिधाय्यन्वेवैतदनपक्रमि कुरुते तदयनपक्रमि यद्ध्यन्वेऽन्तस्तस्मादाह व्रज गच्छ गोष्ठानमिति वर्षतु ते द्यौरिति[3] यत्र वाऽअस्यै सनन्त. शूरीकुर्वन्त्यपघ्नन्ति शान्तिरापस्तदद्भिः शान्त्या शमयति तदद्भिः सन्दधाति तस्मादाह वर्षतु ते द्यौरिति यथान देव सवितः परमस्या पृथिव्यामिति[4] देवमेवैतत्सवितारमाहान्धे तमसि यथानेति यदाह परमस्या पृथिव्यामिति शतेन पाशैरि[5]त्यमुचे तदाह योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगिति[6] यदि नामिचरेद्यजुऽअभि चरेदमुमतो मा मौगिति ब्रूयात् ॥१६॥

अथ द्वितीयं प्रहरति । अपारुं पृथिव्यै देवयजनाद्ध्यास[7]मित्यरुर्हं वै नामासु-

कि मैं अन्तरिक्ष को पेंक दूं या द्यौ को पेंक दूं तो वह क्या पेंकेगा । अतः वह पृथ्वी से ही सब को पेंक देता है ॥१४॥

अब तृण को बीच में रख कर स्रुवा से प्रहार करता है । बीच में तृण को इसलिये रखता है कि कहीं वज्र से पृथ्वी को हानि न पहुँच जावे ॥१५॥

प्रहार करते समय इस मन्त्राश (यजु० १।२५) को पढ़ता है :—हे देवयजनि पृथ्वी, मैं तेरी ओषधियों के मूल को हानि न पहुँचाऊँ' । इस प्रकार कह उसको उत्तर-मूला कर देता है अर्थात् उसके मूल सुदृढ़ हो जाते हैं, जब वह स्रुवा से खुदी हुई मिट्टी उठाता है तो कहता है, 'मैं तेरी ओषधियों के मूल को हानि न पहुँचाऊँ । तू व्रज अर्थात् गोशाला को जा । देव (द्यौ) तुझ पर वर्षा करें' । जब पृथ्वी खोदी गई तो खुदाने में पृथ्वी को क्षति पहुँची । जल शान्ति है । अतः जल को वहाँ डाल कर उसका उपशमन कर देता है । इसीलिये कहा कि 'देव तुझ पर वर्षा करें' (खुदी हुई मिट्टी को फेंकते समय) कहता है, 'हे देव सविता, तू इससे पृथ्वी के परले सिरे से बाँध दे' । इसका तात्पर्य यह है कि 'गहरे अन्धेरे से बाँध' । 'सौ फन्दों (पाशों) से' । अर्थात् इस प्रकार कि यह छूटने न पावे । फिर कहता है, 'जो हमसे द्वेष करता है या जिससे हम द्वेष करते हैं उसको मत छोड़' । चाहे किसी निश्चित की ओर संकेत हो या न हो, उसे कहना चाहिये कि 'अमुक-अमुक को मत छोड़' ॥१६॥

अब स्रुवा को दुबारा फेंकता है । यह मन्त्र (यजु० १।२६) को पढ़ कर, 'मैं अरुं को इस यज्ञ की स्थली पृथ्वी से दूर कर दूं' । अरु एक राक्षस था । देवों ने उसे भगा दिया

१-६. शु० सं० अ० १ क० २५ । ७. शु० सं० अ० १ क० २६ ।

रक्षसमास तं देवा अस्या अपाघ्नत तथोऽएवैनमेतदेपोऽस्या अपहते व्रजं गच्छ गोष्ठानं वर्पतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याश्शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगिति[1] ॥१७॥

तमग्नीदभिनिदधाति। अररो दिवं मा पप्तऽइति[2] *तत्र वै देवाऽअररुमसुररक्षसमपाघ्नत स दिवमपिपतिपत्तमग्निरभिन्यदधादररो दिवं मा पप्त इति स न दिवमपप्तत थोऽएवैनमेतदध्वर्युरेवास्माल्लोकादन्तरोति*[3] *दिवोऽध्यग्नीत्तस्मादेवं करोति* ॥१८॥

अथ तृतीयं प्रहरति। द्रप्सस्ते द्यां मा स्क[4]*न्नित्ययं वाऽअस्यै द्रप्सो यमस्या इमश्ं रसं प्रजा उपजीवन्त्येप ते दिवं मा पप्तदित्येवैतदाह व्रजं गच्छ गोष्ठानि वर्पतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याश्शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगिति*[5] ॥१९॥

स वै त्रिर्यजुषा हरति। त्रयो वाऽइमे लोका एभिरेवैनमेतल्लोकैरभिनिदधात्यद्धा वै तद्यदिमे लोका अद्धा तद्यद्यजुस्तस्मात्त्रिर्यजुषा हरति ॥२०॥

तूष्णीं चतुर्थम्। स यदिमांल्लोकानतिचतुर्थमस्ति वा न वा तेनैनेतद्द्विपन्तं वा। इसी प्रकार अध्वर्यु भी अरु को भगाता है। अब फिर (वह उन-उन कृत्यों को दुहराते हुये) कहता है, 'तू गायों के स्थान अर्थात् व्रज को जा। देव तुझ पर वर्षा। सविता देव तुझे पृथ्वी के परले सिरे से बाँधे। जो हमसे द्वेष करता है या जिससे हम द्वेष करते हैं, उसको यहाँ से मत छोड़' ॥१७॥

अग्नीध्र उसको यह मंत्र (यजु० १।२६) पढ़ कर चूल्हे पर फेंकता है। हे अरु तू स्वर्ग को न जा। जब देवों ने राक्षस अरु को निकाला तो उसने स्वर्ग को जाना चाहा। अग्नि ने उसे दबा दिया और कहा, 'अरु, तू स्वर्ग को मत जा'। वह स्वर्ग को नहीं गया। इसी प्रकार अध्वर्यु उसको पृथ्वी से छुड़ा देता है और अग्नीध्र स्वर्ग से रोक देता है। यह इसीलिये किया जाता है ॥१८॥

अब (स्रुवा से) तीसरी बार फेंकता है इस मन्त्रांश (यजु० १।२६) को पढ़ कर 'तेरी बूँद द्यौलोक को न जावे'। यह बूँद वह रस है जिससे प्रजायें जीती हैं। इसलिये वह कहता है कि 'तेरी बूँदें द्यौलोक को न जावें'। अब कहता है, 'गोशाला या व्रज को जा। देव तुझ पर वर्षा। हे सविता देव, तू इसको पृथ्वी के परले सिरे से बाँध, सौ पन्थों से। जो हमसे द्वेष करे या हम जिससे द्वेष करें उसको मत छोड़' ॥१९॥

तीन बार यजुः मन्त्रों से उसको फेंकता है। लोक तीन हैं। इन तीन लोकों से इस चूल्हे को दबाता है। जो यह तीन लोक हैं यही सारा में यह यजुः है। इसलिये यह इस प्रकार यजुः मन्त्र पढ़ कर फेंकता है ॥२०॥

चौथी बार चुपचाप। इन लोकों से परे कोई चौथा लोक है नहीं। उस लोक में उस

---

[1] सं० मु० मं० ब्र० १ प्र० २६।

भातृव्यमवबाधतेऽनद्वा वै तद्यदिमाल्लोकानति चतुर्थमस्ति वा न वानड्वो तद्यत्पूर्णी चतुर्थम् ॥२१॥ ब्राह्मणम् ॥२॥ [४] ॥

शत्रु को भगा देता है। यह नहीं निश्चित कि इन तीन लोकों से आगे कोई चौथा लोक है या नहीं। और जो मौन होकर किया जाय वह भी अनिश्चित ही है। इसलिये वह चौथी बार मौन होकर फेंकता है ॥२१॥

अध्याय २—ब्राह्मण ५

देवाश्च वाऽअसुराश्च। उभये प्राजापत्याः पस्पृधीरे ततो देवा अनुव्यमिवासुरथहासुरा मेनिरेऽस्माकमेवेदं सलु मुचनमिति ॥१॥

ते होचुः हन्तेमा पृथिवीं विभजामहै ता विभज्योपजीवामेति तामौक्षणैश्चर्मभिः पश्चात्प्राञ्चो विभजमाना अमीयुः ॥२॥

तद्वै देवाः शुश्रुवुः। विभजन्ते ह वाऽइमामसुराः पृथिवीं मेति तदेष्यामो यत्रेमामसुरा विभजन्ते के ततः स्याम यदस्यै न भजेमहीति ते यज्ञमेव विष्णुं पुरस्कृत्येयुः ॥३॥

ते होचुः। अनु नोऽस्या पृथिव्यामा भजता स्वेव नोऽप्यस्यां भाग इति ते हासुरा अब्रूयन्त-इत्योचुर्यावदेवैष विष्णुरभिशेते तावद्दोदञ्च इति ॥४॥

वामनो ह विष्णुरास। तद्देवा न जिहीडिरे महाद्वै नोऽदुर्यं नोयज्ञसम्मितमदुरिति ॥५॥

प्रजापति की दो सन्तान देव और असुर अपने महत्व के लिये लड़ पड़े। देव हार गये। असुरों ने सोचा, अब तो यह जगत् हमारा ही हो गया' ॥१॥

उस पर उन्होंने कहा, 'अच्छा, इस पृथ्वी को परस्पर बाँट लें और उस पर बस जायँ। अब उन्होंने उसको बैल के चमड़े से पश्चिम से पूर्व तक बाँटा ॥२॥

देवों ने सुना और कहा, 'अरे, असुर तो पृथ्वी को वास्तव में बाँट रहे हैं। चलो, वहाँ चलें जहाँ बाँट हो रहा है। यदि हमको कोई भाग न मिला तो हम क्या करेंगे?' विष्णु अर्थात् इस यज्ञ को अपना नेता बना कर वे वहाँ गये ॥३॥

और कहा, 'अपने साथ हमको भी कुछ बाँट दो। हमारा कुछ तो भाग हो'। असुरों ने सकोच करते हुये कहा, 'अच्छा हम तुमको केवल इतना भाग देते हैं जितने में यह विष्णु लेट सके' ॥४॥

विष्णु तो वामन था। परन्तु देवों को भय नहीं हुआ। उन्होंने कहा, 'इस यज्ञ भर को यदि स्थान मिल गया तो बहुत मिल गया' ॥५॥

ते प्राञ्चं विष्णुं निपाद्य । छन्दोभिरभितः पर्यगृह्णन् गायत्रेण त्वा छन्दसा परिगृह्णामीति[1] दक्षिणतस्त्रैष्टुभेन त्वा छन्दसा परिगृह्णामीति[2] पश्चाज्जागतेन त्वा छन्दसा परिगृह्णामी[3]त्युत्तरतः ॥६॥

तं छन्दोभिरभितः परिगृह्य । अग्निं पुरस्तात् समाधाय तेनार्चन्तः श्राभ्यन्तश्चेरुस्तेनेमाꣳ सर्व्वां पृथिवीꣳ समविन्दन्त तदेतेनेमाꣳ सर्वाꣳ समविन्दन्त तस्माद्वेदिर्नाम तस्मादाहुर्य्यावती वेदिस्तावती पृथिवीत्येतया हीमाꣳ सर्वाꣳ समविन्दन्तेवꣳ ह वा उ इमाꣳ सर्व्वाꣳ सपत्नानाꣳ संवृङ्क्ते निर्भजत्यस्यै सपत्नान्य एवमेतद्वेद ॥७॥

सोऽयं विष्णुर्ग्लानिः । छन्दोभिरभितः परिगृहीतोऽग्निः पुरस्तान्नापक्रमणमास स तत एवौषधीनां मूलान्युपमुम्लोच ॥८॥

ते ह देवा ऊचुः । क्व नु विष्णुरभूत् क्व नु यज्ञोऽभूदिति ते होचुश्छन्दोभिरभितः परिगृहीतोऽग्निः पुरस्तान्नापक्रमणमस्त्यन्नैवान्विच्छतेति तं खनन्त इवान्वीयुस्तं त्र्यङ्गुलेऽन्वविन्दंस्तस्मात्त्र्यङ्गुला वेदिः स्यात्तदु हापि पाञ्चिस्त्र्यङ्गुलामेव सौम्यस्याध्वरस्य वेदिं चक्रे ॥९॥

उन्होंने उस विष्णु या यज्ञ को पूर्व की ओर लिटा कर तीन ओर से छन्दों से घेर दिया (यजु० १।२७)। दक्षिण की ओर 'गायत्री छन्द से तुझे घेरता हूँ', पश्चिम की ओर 'त्रिष्टुभ छन्द से तुझे घेरता हूँ', उत्तर की ओर 'जगती छन्द से तुझे घेरता हूँ' ॥६॥

इस प्रकार तीन ओर छन्दों से घेर कर पूर्व की ओर अग्नि को रख कर देव अर्चना और श्रम करते रहे। इस प्रकार होते-होते समस्त पृथ्वी ले ली । सब पृथ्वी ले ली इसलिये इसका नाम वेदी पड़ा। इसीलिये कहते हैं कि जितनी वेदी उतनी पृथ्वी। क्योंकि इसी वेदी के द्वारा उन्होंने पृथ्वी जीत ली। जो इस रहस्य को समझता है वह इसी प्रकार समस्त पृथ्वी को अपने शत्रुओं से छीन लेता है और उनको उसमें भाग नहीं देता ॥७॥

अब विष्णु थक गया। तीनों ओर से छन्दों द्वारा ढका हुआ था और पूर्व की ओर अग्नि था । अतः वहाँ से भाग न सकता था। इसलिये वह ओषधियों की जड़ों में छिप गया ॥८॥

देव कहने लगे विष्णु कहाँ गया ? यज्ञ कहाँ गया ? वह तो छन्दों द्वारा तीनों ओर और पूर्व की ओर अग्नि द्वारा घिरा हुआ था । भाग तो सकता नहीं। उसको यहीं खोजना चाहिये, कुछ खोदा ही था कि वह मिल गया। केवल तीन अँगुल नीचे । इसलिये वेदी को तीन अँगुल नीचे होना चाहिये । तदनुसार ही 'पाञ्चि' ने सोमयाग की वेदी तीन अँगुल गहरी ही रखी थी ॥९॥

१-३. शु० सं० अ० १ क० २७ ।

तद्ध तथा न कुर्य्यात् । ओषधीनां वै स मुलान्युपाम्लोचत्तस्मादोषधीनामेव मूलान्युच्छेत्तवै ब्रूयाद्यन्वेवात्र विष्णुमन्वविन्दंस्तस्माद्वेदिर्नाम ॥१०॥

तमनुविधोत्तरेण परिग्रहेण पर्यगृह्णन् । सुषमा चासि शिवा चासीति[1] दक्षिणत इमामेवैतत्पृथिवीꣳ संविद्य सुषमाꣳ शिवामकुर्वत स्योना चासि सुषदा चासीति[2] पश्चादिमामेवैतत् पृथिवीꣳ संविद्य स्योनाꣳ सुषदामकुर्वतोर्जस्वती चासि पयस्वती चे[2]त्युत्तरत इमामेवैतत्पृथिवीꣳ संविद्य रसवतीमुपजीवनीयामकुर्वत ॥११॥

स वै त्रिः पूर्वं परिग्रहं परिगृह्णाति । निरुत्तरं तत्सट्कृत्वः षड्वाऽऋतवः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावान्तमेवैतत्परिगृह्णाति ॥१२॥

षड्भिर्व्याहृतिभिः । पूर्वं परिग्रहं परिगृह्णाति षड्भिरुत्तरं तद् द्वादशकृत्वो द्वादश वै मासाः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावन्तमेवैतत्परिगृह्णाति ॥१३॥

व्याममात्री पश्चात्स्यादित्याहुः । एतावान्वै पुरुषः पुरुषसम्मिता हि व्यरलिः प्राची

किन्तु ऐसा न करे । यतः उन्होंने ओषधियों के मूल में यज्ञ को पाया, अतः (अध्वर्यु अग्नीध्र से कहे कि) ओषधियों की जड़ें काट दो । यतः वहाँ यज्ञ को पाया इसलिये (विद् लाभे धातु से बन कर) इसका नाम वेदि पड़ा ॥१०॥

अब उन्होंने उसको फिर घेर दिया । दक्षिण का घेरा बनाते हुये कहा (यजु० १।२७) 'तू सुषमा (अच्छी भूमि) और शिवा (कल्याणी) है' । इस प्रकार इस पृथ्वी को सुषमा और शिवा बना दिया । पश्चिम की ओर घेरा बना कर कहा 'तू स्योना (सुखदा) और सुषदा (अच्छा आसन) है' (यजु० १।२७) । इस प्रकार उसको स्योना, सुषदा बना दिया । उत्तर की ओर घेरा बना कर कहा (यजु० १।२७) तू ऊर्जस्वती, (अन्न वाली) और पयस्वती (दूध या रस वाली) है । इस प्रकार उस भूमि को रसवती और बसने योग्य बना दिया ॥११॥

पहले तीन रेखाओं का घेरा बनाता है, फिर तीन का । इस प्रकार छः हुये । ऋतुयें छः हैं, संवत्सर यज्ञ प्रजापति है । जितना बड़ा यज्ञ उतनी उसकी मात्रा, उतना ही उनको घेरता है ॥१२॥

पहला घेरा बनाने में छः व्याहृतियाँ पढ़ता है । और दूसरे में छः । इस प्रकार बारह हुईं । महीने बारह होते हैं । संवत्सर यज्ञ प्रजापति है, इसलिये जितना बड़ा यज्ञ, जितनी उसकी मात्रा, उतना ही बड़ा उसको बनाता है ॥१३॥

कुछ लोग कहते हैं कि पश्चिम की ओर उतनी लम्बाई 'व्याम मात्री' (मनुष्य की

१-२. शु० सं० अ० १ क० २७ ।

त्रिवृदि यज्ञो नात्र मात्रास्ति यावतीमेव स्वय मनसा मन्येत तावतीं कुर्य्यात् ॥१४॥

अभितोऽग्निमꣳ साऽऽउवयति । योषा वै वेदिर्वृषाऽग्निमꣳ परिगृह्य वै योषा वृषाणꣳ शेते मिथुनमेवैतत्प्रजननं क्रियते तस्मादभितोऽग्निमꣳ सा ऽऽउवयति ॥१५॥

सा वै पश्चाद्वरीयसी स्यात् । मध्ये सꣳहारिता पुनः पुरस्तादुर्व्येवगिव हि योषा प्रशꣳसन्ति पृथुश्रोणिर्विमृष्टान्तराꣳसा मध्ये सꣳग्राह्येति जुष्टामेवैनामेतद्देवेभ्यः करोति ॥१६॥

सा वै प्राक् प्रवणा स्यात् । प्राची हि देवाना दिगथोऽ उदक्प्रवणोदीचि हि मनुष्याणा दिग्दक्षिणतः पुरीषं प्रत्युदूहत्येषा वै दिक् पितृणाꣳ सा यदक्षिणाप्रवणा स्यात् क्षिप्रे ह यजमानोऽमुं लोकमियात्तथो ह यजमानो ज्योग्जीवति तस्माद्दक्षिणतः पुरीष प्रत्युदूहति पुरीषवतीं कुर्वंति पशवो वै पुरीष पशुमतीमेवैनामेतत्कुरुते ॥१७॥

ता प्रतिमार्ष्टि । देवा ह वै सꣳग्रामꣳ सन्निधारयन्तरते होचुर्हन्त यदस्यै पृथिव्याऽअन्नमृतं देवयजनं तच्चन्द्रमसि निदधामहै स यदि न ऽइतोऽसुरा जयेयुस्तत एवाऽ-

देह के बराबर) होना चाहिये । क्योंकि पुरुष इतना ही लम्बा होता है । पूर्व की ओर तीन हाथ क्योंकि यज्ञ त्रिवृत् है । परन्तु यहाँ कोई मात्रा निश्चित नहीं है । जितना मन आवे उतना रख लेवे ॥१४॥

वेदी की दो भुजाओं को आहवनीय अग्नि के दोनों ओर आगे तक ले जाते हैं। वेदी स्त्री है । अग्नि पुरुष है । स्त्री पुरुष को दोनों भुजाओं से लपेट कर सोया करती है । इस प्रकार वेदी की दोनों भुजाओं को अग्नि के दोनों ओर बढ़ा कर मानो वह उन स्त्री-पुरुषों का सन्तानोत्पत्ति के लिये सहर्ष करा देता है ॥१५॥

वेदी पश्चिम में चौड़ी, बीच में तंग और पूर्व में फिर चौड़ी होनी चाहिये । इसी प्रकार की स्त्री अच्छी समझी जाती है, नीचे का भाग भारी, कन्धों के निकट क्षुद्र कम चौड़ी और कमर पर पतली । इस प्रकार वह इसको देवों की दृष्टि में प्रिय बना देता है ॥१६॥

वह पूर्व की ओर ढालू होनी चाहिये क्योंकि पूर्व देवों की दिशा है । पश्चिम की ओर भी ढालू होनी चाहिये क्योंकि पश्चिम मनुष्यों की दिशा है । कूड़े को दक्षिण की ओर हटा देता है क्योंकि दक्षिण पितरों की दिशा है । यदि दक्षिण की ओर ढालू हो तो यजमान शीघ्र ही परलोक को सिधार जायगा । ऐसा करने से यजमान बहुत जीता है । इस लिये कूड़े को दक्षिण की ओर हटा देते हैं । पशु ही पुरीष है । इस प्रकार वह वेदी को पशु-सम्पन्न कर देता है ॥१७॥

(वेदी को पूर्व से पश्चिम की ओर अग्नीध) खींच देता है । जब देव सग्राम की तैयारी कर रहे थे तो वे बोले, 'इस पृथ्वी का जो क्षुद्र भाग यज्ञ के योग्य हो उसे चन्द्र लोक को ले चलें । यदि असुरों ने जीत कर हमको भगा दिया तो हम अर्चना और परिश्रम

र्चन्तः शाम्यन्तः पुनरभिभवेमेति स यदस्यै पृथिव्याऽअनामृतं देवयजनमासीत्तच्चन्द्रमसि न्यदधत तदेतच्चन्द्रमसि कृष्णं तस्मादाहुश्चन्द्रमस्यस्यै पृथिव्यै देवयजनमित्यपि ह वाऽअस्यैतस्मिन्देवयजनऽइष्टंभवति तस्माद्वै प्रतिमार्ष्टि ॥१८॥

स प्रतिमार्ष्टि । पुरा क्रूरस्य विसृपो विरप्शिन्नि[1] ति सङ्ग्रामो वै क्रूरꣳ सङ्ग्रामे हि क्रूरं क्रियते हतः पुरुषो हतोऽश्वः शेते पुरा ह्येतत्सङ्ग्रामान्यदधत तस्मादाह पुरा क्रूरस्य विसृपो विरप्शिन्नित्युदादाय पृथिवीं जीवदानुमि[2]त्युदादाय हि यदस्यै पृथिव्यै जीवमासीत्तच्चन्द्रमसि न्यदधत तस्मादाहोदादाय पृथिवीं जीवदानुमिति यामेरयꣳश्चन्द्रमसि स्वधाभिरिति[3] यां चन्द्रमसि ब्रह्मणा दधुरित्येवैतदाह तामु धीरासोऽअनुदिश्य यजन्तेऽइत्येतेनो ह तामनुदिश्य यजन्ते[4]ऽपि ह वा ऽअस्यैतस्मिन्देवयजन ऽइष्टं भवति यऽएवमेतद्वेद ॥१९॥

अथाह प्रोक्षणीरासादयेति[5] । वज्रो वै स्फ्यो ब्राह्मणश्चेमं पुरा यज्ञमभ्यजुगुपतां वज्रो वा ऽआपस्तद्वज्रमेवैतदभिगुप्याऽआसादयति स वा ऽउपर्य्युपर्य्येव प्रोक्षणीषु धार्य-

द्वारा फिर वैभव प्राप्त कर सकेंगे। इसने भी पृथ्वी का जो पवित्र यज्ञ के योग्य भाग था उसको चन्द्र लोक के अर्पण कर दिया। चाँद के काले धब्बे यही हैं। इसीलिये कहावत है कि चन्द्र लोक में इस पृथ्वी का यज्ञ स्थान है। देव यज्ञ इसी पृथ्वी पर उसी वेदी के स्थान में किया जाता है। अतः वह वेदी को लीपता है ॥१८॥

यजुर्वेद (१।२८) के इस अंश को पढ कर लीपता है, 'हे शक्तिमान्! इधर-उधर गति करते हुये क्रूर के पहले'। क्रूर नाम है संग्राम का। वे संग्राम में बहुत क्रूरता की जाती है। इस में बहुत से मनुष्य अश्व आदि मर कर धराशायी हो जाते हैं। वे संग्राम से पहले ही पृथ्वी के यज्ञ वाले भाग को चन्द्र लोक को ले गये थे इसीलिये कहा, 'हे शक्तिशालिन्! इधर उधर हिलते हुये क्रूर से पूर्व'। फिर कहता है 'जीवन देने वाली भूमि को उठा कर'। इसी पृथ्वी पर जो जीवन था उसको उठा कर ही चन्द्र लोक को ले गये थे। इसीलिये कहा, 'जीवन देने वाली भूमि को उठा कर'। 'जिसको स्वधाओं के साथ चन्द्र लोक को ले गये'। अर्थात् प्रार्थनाओं (ब्रह्म) के साथ। 'बुद्धिमान लोग अब भी इसी भूमि का अनुदेश करके यज्ञ करते हैं'। अपने यज्ञ को वह इसी भूमि पर करते हैं। जो इस रहस्य को समझता है उसका यज्ञ भी यहीं होता है ॥१९॥

अब वह (अध्वर्यु) (अग्नीध्र से) कहता है। (यजु० १।२८) 'प्रोक्षणी पात्र को (वेदी में) रक्खो'। स्फ्या रूपी वज्र ने और ब्राह्मण ने अब तक यज्ञ की रक्षा की। जल भी तो वज्र है। अब इस वज्र को रक्षा के लिये रखता है। प्रोक्षणी को स्फ्या पर रखते समय पहले वह स्फ्या को उठा लेता है। यदि स्फ्या रक्खी रहे और उस पर

१-५. शु० या० अ० १ क० २८।

माणारवथ स्फ्यमुद्यच्छत्यथ यन्निहितऽएव स्फ्ये श्रोक्षणीरासादयेद्वज्रो ह समृच्छेयातां तथो ह वज्रो न समृच्छेते तस्मादुपयुर्पपर्येव श्रोक्षणीषु धार्यमाणास्वथ स्फ्यमुद्यच्छति ॥२०॥

अथैता वाचं वदति । प्रोक्षणीरा[1]सादयेध्मं बर्हिरुपसादय स्रुचः सम्मृद्धि पत्नीꣳ सन्नह्याज्येनोदेहीति सग्नैप एवैप स यदि कामयेत न्यादेतद्यदु कामयेताऽपि नाद्रियेत स्वयमु ह्येवैतद्वेदेदमतः कर्म कर्त्तव्यमिति ॥२१॥

अथोदञ्चꣳ स्फ्यं प्रहरति । अमुष्मै त्वा वज्रं प्रहरामीति यद्यभिचरेद्वज्रो वै स्फ्य स्तृणुते हैवैनेन ॥२२॥

अथ पाणीऽअवनेनिक्ते । यदवस्यै क्रूरमभूत्तदवस्याऽएतदहार्षीत्तस्मात्पाणीऽअव-नेनिक्ते ॥२३॥

स ये हाग्नऽईजिरे । ते ह स्मावमर्शं यजन्ते ते पापीयाꣳस आसुरथ ये निजरे ते श्रेयाꣳस आसुस्ततोऽश्रद्धा मनुष्यान्विवेद ये यजन्ते पापीयाꣳसस्ते भवन्ति यऽउ न यजन्ते श्रेयाꣳसस्ते भवन्तीति तत इतो देवान्हविर्न जगामेतः प्रदानाद्धि देवा उप-जीवन्ति ॥२४॥

प्रोक्षणी रक्खी जाय तो दो वज्र परस्पर टकरा जायं । यह वज्र न टकराने पावें इसीलिये प्रोक्षणी को स्फ्या पर रखने से पूर्व स्फ्या को उठा लेता है ॥२०॥

अब इस (पूर्ण) वाणी को बोलता है, 'प्रोक्षणी को वेदी में रक्खो । उसी के पास समिधा और बर्हि भी रखो । स्रुक् को माजो, पत्नी की कमर को कसो और घी लेकर यहाँ आओ' । यह आदेश (अग्नीध्र के लिये) है । अध्वर्यु का जी चाहे तो इसको कहे, जी चाहे न कहे । क्योंकि अग्नीध्र तो जानता ही है कि क्या करना चाहिये । क्या नहीं करना चाहिये ॥२१॥

अब यह स्फ्या को उत्तर की ओर कूड़े पर फेंक देता है । यदि वह किसी शत्रु को मारने के अभिप्राय से फेंके तो उसको कहना चाहिये कि 'मै अमुक अमुक शत्रु के नाश के लिये वज्र फेंकता हूँ' । यह स्फ्या वज्र के समान ही शत्रु का घातक होगी ॥२२॥

अब यह हाथ धोता है । वेदी मे जो कुछ क्रूर था उसको फेंक दिया । अतः हाथ धोता है ॥२३॥

जिन्होंने पहले यज्ञ किया था उन्होंने यज्ञ करते हुये वेदी छली । यह पापकर्म था । जिन्होंने हाथ धो डाले, उन्होंने ठीक किया । अब अश्रद्धा उत्पन्न हो गई । लोग कहने लगे 'जो यज्ञ करते हैं वे पापी हो जाते हैं । जो यज्ञ नहीं करते वे पुण्यवान होते हैं' । अब इस पृथ्वी से देवताओं के पास कुछ भी हवि नहीं पहुँची । देवता तो उसी हवि के आश्रय रहते हैं जो इस पृथ्वी लोक से दी जाती है ॥२४॥

---

१. आ० स० परि० ।

तेह देवा ऊचु । बृहस्पतिमाङ्गिरसमश्रद्धा वै मनुष्यानविदत्तेभ्यो विधहि यज्ञमिति स हेत्योवाच बृहस्पतिराङ्गिरस कथा न यजध्व इति ते होचु किङ्कामया यजेमहि य यजन्ते पापीयाꣳसस्ते भवन्ति यऽउ न यजन्ते श्रेयाꣳसस्ते भवन्तीति ॥२५॥

स होवाच । बृहस्पतिराङ्गिरसो यद्वै शुश्रुम देवाना परिपूत तदप यज्ञो भवति यच्छृतानि हवीꣳषि वत्सृता वेदिस्तेनावमर्शमचारिष्ट तस्मात्पापीयाꣳसोऽभूत तेनानवमर्शं यजध्व तथा श्रेयाꣳसो भविष्यथेत्या हियत इत्या बर्हिषस्तरणादिति बर्हिषा ह वै खल्वेषा शाम्यति स यदि पुरा बर्हिषस्तरणात् किञ्चिदापद्येत बर्हिरेव तत्तृणद्यपास्येदथ यदा बर्हिस्तृणन्त्यपि पदाभितिष्ठन्ति स यो हैन विद्वाननवमर्शं यजते श्रेयान्हैव भवति तस्मादनवमर्शमेव यजेत ॥२६॥ ब्राह्मणम् ३ ॥ [५] ॥ अध्याय ॥२॥

तब देवों ने बृहस्पति आगिरस से कहा, 'मनुष्य में अश्रद्धा ने घर कर लिया है। उनके लिये यज्ञ का आदेश दीजिये'। तब बृहस्पति आगिरस ने कहा, 'आप लोग यज्ञ क्यों नहीं करते'? वे बोले, 'यज्ञ क्या करें? जो यज्ञ करते हैं, पापी हो जाते हैं जो यज्ञ नहीं करते पुण्यात्मा रहते हैं' ॥२५॥

तब बृहस्पति आगिरस ने कहा, 'हमने ऐसा सुना है कि जो देवताओं के लिये तैयार किया जाता है अर्थात् पकी हुई हवि, वही यज्ञ है। तुमने वेदी को छूकर उसको किया अतः पापी हो गये। वेदी को न छूकर करते तो पुण्यात्मा होते। बिना छुये हुये ही यज्ञ करो। ठीक हो जायगा'। बर्हि से वेदी सन्तुष्ट रहती है। इसलिये यदि बर्हि बिछाने से पूर्व वेदी पर कोई चीज गिर जाय तो बर्हि बिछाते समय ही उठानी चाहिये। क्योंकि जब वह बर्हि को बिछाते हैं तो वेदी पर पैर रखते हैं। जो इस रहस्य को समझ कर बिना स्पर्श किये यज्ञ करता है पुण्यात्मा हो जाता है। इसलिये (वेदी और हवि को) बिना छुये ही यज्ञ करे ॥२६॥

अध्याय ३—ब्राह्मण १

स वै स्रुचः सम्मार्ष्टि । तद्यत्स्रुचः सम्मार्ष्टि यथा वै देवानां चरणं तद्वाऽअनु मनुष्याणां तस्माद्यदा मनुष्याणां परिवेषणमुपकल्पितं भवति ॥१॥

अथ पात्राणि निर्णेनिजति । तैर्निर्णिज्य परिवेविषत्येवं वाऽएष देवानां यज्ञो भवति यच्छ्रुतानि हवींष्यपी क्लृप्ता वेदिस्तेषामेतान्येव पात्राणि यत्स्रुचः ॥२॥

स यत्सम्मार्ष्टि । निर्णेनेक्त्येवैना एतन्निर्णिक्ताभिः प्चराणीति तद्वै द्वयेनैव देवेभ्यो निर्णेनिजत्येकेन मनुष्येभ्योऽद्भिश्च मखस्य च देवेभ्यऽआपो हि कुशाश्चखयजुरेकेनैव मनुष्येभ्योऽद्भिरेवैवमेतन्नाना भवति ॥३॥

अथ स्रुवमादत्ते । तं प्रतिपति प्रत्युष्टꣳ रक्षः प्रत्युष्टाऽअरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातय[1] इति वा ॥४॥

देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्भिमयाञ्चक्रुस्तद्यज्ञमुपादेवैतन्नाष्ट्रा रक्षाꣳस्यतोऽपहन्ति ॥५॥

अब (अग्नीध्र) चमचों को मांजता है। चमचों को इसलिये मांजता है कि जैसा मनुष्यों का चलन होता है वैसा ही देवों का। जब मनुष्यों का भोजन परोसा जाता है तो ॥१॥

बरतनों को मांजते हैं, और तब उनमें खाना परोसते हैं। इसी प्रकार देवों को हवि दी जाती है; अर्थात् हवि को पकाते हैं और वेदी को बनाते हैं और देवों के पात्रों अर्थात् चमचो आदि को ठीक करते हैं ॥२॥

जब वह मांजता है तो धोता भी है। तात्पर्य यह है कि मै इस प्रकार करूँगा। देव पात्रों को दो चीजों से शुद्ध करते हैं और मनुष्य के पात्रो को एक से। देव पात्रों को जल और प्रार्थना से। कुश जल का प्रतिनिधि है और प्रार्थना तो है ही। मनुष्यों के पात्रो को केवल एक अर्थात् जल से। इस प्रकार दोनों मे भेद हो जाता है ॥३॥

पहले स्रुवा को लेता है, और आग पर तपाता है, इस (यजु० १।२६) मंत्र को जपते हुये, 'झुलस गये राक्षस, झुलस गये शत्रु। जल गये राक्षस जल गये शत्रु' ॥४॥

जब देवों ने यज्ञ किया था तो उनको भय था कि कहीं राक्षस असुर यज्ञ को विध्वंस न कर दें। अतः वह पहले से ही राक्षस और असुरों को भगा देता है ॥५॥

---

१. शु० सं० अ० १ कं० २६।

स वाऽइत्यग्रैरन्तरतः सम्माष्टि । अनिशितोऽसि सपत्नक्षिदिति[1] यथानुपरतो यजमानस्य सपत्नान्क्षिणुयादेवमेतदाह वाजिनं त्वा वाजेध्यायै सम्माज्मीति[2] यज्ञियं त्वा यज्ञाय सम्माज्मीत्येवैतदहैतेनैव सर्वाः स्रुचः सम्माष्टि वाजिनी त्वेति[3] स्रुचं तूष्णीं प्राशित्रहरणꣳ ॥६॥

स वाऽइत्यग्रैरन्तरतः सम्माष्टीति । मूलैर्वाह्यतऽइतीव वाऽअयं प्राण इतीवोदानः प्राणोदानावेवैतद्दधाति तस्मादितीवेमानि लोमानीतीवेमानि ॥७॥

स वै सम्मृज्य-सम्मृज्य प्रतप्य-प्रतप्य प्रयच्छति । यथावमर्शं निर्णिज्यानवमर्शमुत्तमं परिक्षालयेदेवं तत्तस्मात्प्रतप्य-प्रतप्य प्रयच्छति ॥८॥

स वै स्रुवमेवाग्रे सम्माष्टिं । अथेतराः स्रुचो योषा वै स्रुग्रूपा स्रुवस्तस्मादयमपि बह्व्य-इव स्त्रियः सार्धं यन्ति य एव तास्वपि कुमारक-इव पुमान् भवति स एव तत्र प्रथम एत्यनूच्य इतरास्तस्मात्स्रुवमेवाग्रे सम्मार्ष्टयथेतराः स्रुचः ॥९॥

स वै तथैव सम्मृज्यात् । यथाग्निं नाभिव्युद्धेधा यस्माऽअन्नमाहरिष्यन्त्स्यात्तं

वह पात्र के आगे से लेकर भीतर की ओर इस प्रकार स्रुवा को मांजता है । यह पढ़कर (यजु० १।२९) 'तू तेज तो नहीं है । परन्तु शत्रुओं का घातक है' । यह इस लिये कहता है कि यजमान के शत्रुओं को मार दे । 'मैं तुझ अन्न वाले को अन्न के लिये माजता हूँ' । इसी प्रकार सब को माजता है । स्रुवा पुल्लिङ्ग है अतः उसको मांजते हुये पुल्लिङ्ग 'वाजिन' का प्रयोग करता है । स्रुच् स्त्रीलिङ्ग है । अतः उसको माजते समय वाजिनी' (स्त्री लिङ्ग) का प्रयोग करता है । प्राशित्रहरण नामक खदिर के पात्र को मौन हो कर मांजता है ॥६॥

आगे से लेकर भीतर की ओर इसलिये मांजता है कि प्राण और उदान की गति इसी प्रकार है । इस प्रकार वह प्राण और उदान को यजमान को प्राप्त कराता है, भुजा में कोहनी से ऊपर के लोग ऊपर की ओर होते हैं और नीचे के नीचे की ओर ॥७॥

ज्यों-ज्यों वह धोकर तपाता है (अध्वर्यु को) देता जाता है । जैसे बर्तनों को मांजते समय पहले तो हाथ लगा कर माजते हैं फिर बिना हाथ लगाये पानी डाल कर धो देते हैं । इसी प्रकार वह माज कर तपा कर अध्वर्यु को दे देता है ॥८॥

स्रुवा को पहले मांजता है । सब स्रुच् तो स्त्री हैं और स्रुवा पुरुष । यों तो स्त्रियाँ एक साथ चलती हैं । परन्तु उनमें जो पुरुष होता है वह आगे चलता है । और स्त्रियाँ उसके पीछे । इसीलिये वह स्रुवा को पहले माजता है और अन्य स्रुच् आदि को पीछे ॥९॥

इसको इस प्रकार माजना चाहिये कि कोई भाग आग में न पड़ने पावे । ऐसा करने

१-३. शु० सं० अ० १ म० २९ ।

पात्रनिर्णेजनेनाभिव्युक्षेदेवं तत्तस्मादु तथैव सम्मृज्याद्यथाग्निं नाभिव्युक्षेत् प्राङ्वैवोत्क्रम्य ॥१०॥

तद्धैके । स्रुक्सम्मार्जनान्यग्नावभ्यादधति वेदस्याहाभूवन्स्रुच एभिः समभार्जिमुरिदं वै किञ्चिद्यज्ञस्य नेदिदं बर्हिर्धो यज्ञाद्भवदिति तदु तथा न कुर्याद्यथा यस्माऽअशनमाहरेत्तं पात्रनिर्णेजनं पाययेदेवं तत्तस्मादु परास्येदेवैतानि ॥११॥

अथ पत्नीꣳ संनह्यति । जघनार्धो वाऽएष यज्ञस्य यत्पत्नी प्राङ् मे यज्ञस्तायमानो यादिति युनक्त्येवैनामेतद्युक्ता मे यज्ञमन्वासाताऽइति ॥१२॥

योक्त्रेण संनह्यति । योक्त्रेण हि योग्यं युञ्जन्त्यरित वै पत्न्या अमेध्यं यदवाचीनं नाभेरथैतदाज्यमवेक्षिष्यमाणा भवति तदेवास्या एतद्योक्त्रेणान्तर्दधात्यथ मेध्येनैवोत्तरार्धेनाज्यमवेक्षते तस्मात्पत्नीꣳ संनह्यति ॥१३॥

स वाऽअभिवासः संनह्यति । ओषधयो वै वासो वरुण्या रज्जुस्तदोषधीरेवैतदन्तर्दधाति तथो हैनामेषा वरुण्या रज्जुर्न हिनस्ति तस्मादभिवासः संनह्यति ॥१४॥

से तो वह खाने वाले के ऊपर बर्तनों का मैल डाल देगा। इसलिये इस प्रकार मांजना चाहिये कि आग में बर्तनों का मैल न पड़ने पावे। अर्थात् आहवनीय अग्नि से कुछ दूर पूर्व की ओर हट कर मांजे ॥१०॥

कुछ लोग स्रुच् को मांज कर घास के टुकड़े जिनसे स्रुच् मांजा था आग में डाल देते हैं। वे कहते हैं कि यह तो कुश के ही भाग हैं। कुश यज्ञ का है। अतः यज्ञ का कोई भाग भी यज्ञ के बाहर नहीं जाना चाहिये। परन्तु ऐसा नहीं करना चाहिये। इससे तो जिस के लिये भोजन लाया उसी को मैल का भाग खिलाने के तुल्य होगा। इसलिये इन तृणों को बाहर ही फेंकना चाहिये ॥११॥

अब यजमान की पत्नी की (अग्नीध्र) कमर कसता है। पत्नी यज्ञ का पिछला भाग है। जब अग्नीध्र उसकी कमर कसता है तब यह यह सोचती जाती है कि यज्ञ मेरे सामने फूले फले। अग्नीध्र सोचता है कि यह मेरे यज्ञ में कमर कसी हुई बैठी रहे ॥१२॥

पत्नी की कमर रस्सी से कसता है। रस्सी से ही तो पशुओं को बाँधते हैं। पत्नी का यह भाग जो नाभि से नीचे होता है अपवित्र होता है, उस अपवित्र भाग से ही यह आज्य के सामने आवेगी। अतः यह कमर में रस्सी बाँध देता है कि उसका ऊपर का भाग ही जो पवित्र है सामने आवे ॥१३॥

रस्सी को वस्त्रों के ऊपर बाँधते हैं। वस्त्र ओषधि का रूपान्तर है। रस्सी वरुण की पाश है। इस प्रकार ओषधि पत्नी के शरीर और वरुण की गाँठ के बीच में आ जाती है। इस प्रकार यह वरुण की रस्सी पत्नी को हानि नहीं पहुँचा सकती। इसलिये वह वस्त्रों के ऊपर कसता है ॥१४॥

स सक्थ्यहति । अदित्यै रास्नासी[1]*तीयं वै पृथिव्यदितिः सेयं देवाना पत्न्येषा यऽ-एतस्य पत्नी भवति तदस्या एतद्रास्नामेव करोति न रज्जुꣳ हिरो वै रास्ना तामेवास्या एतत्करोति ॥१५॥*

स वै न ग्रन्थिं कुर्य्यात् । वरुत्र्यो वै ग्रन्थिर्वरुणो ह पत्नीं गृह्णीयाद्यद्ग्रन्थिं कुर्य्यात्तस्माद्व ग्रन्थिं करोति ॥१६॥

ऊर्ध्वमेवोद्गूहति । विष्णोर्वेष्योऽसीति[2] *सा वै न पश्चात्प्राची देवानां यज्ञमन्वासीतेयं वै पृथिव्यदितिः सेयं देवानां पत्नी सा पश्चात्प्राची देवानां यज्ञमन्वास्ते तद्देवामभ्यारोहेत् सा पत्नी क्षिप्रेऽमुं लोकमियात्तथो ह पत्नी ज्योग्जीवति तदस्या ऽएवैतच्छिनुते तथो हैनामियं न हिनस्ति तस्माद्दक्षिणत—इवैवान्वासीत ॥१७॥*

अथाज्यमवेक्षते । योषा वै पत्नीरेत आज्यं मिथुनमेवैतत्प्रजननं क्रियते तस्मादाज्यमवेक्षते ॥१८॥

सावेक्षते । अदब्धेन त्वा चक्षुषावपश्यामी[3]*त्यनार्त्तेन त्वा चक्षुषावपश्यामीत्येवैतदा-*

यह कमर कसते समय पढ़ता है । (यजु० १।३०) 'तू अदिति की रास्ना है' । यह पृथ्वी ही अदिति है । वह देवों की पत्नी है । और यह स्त्री यजमान की पत्नी है । इस प्रकार वह इस रस्सी को रस्सी न मानकर केवल यजमान की पत्नी की रास्ना बना देता है । (रास्ना का अर्थ है सीमा) । रज्जू पत्नी की रास्ना होती है ॥१५॥

रस्सी में गाँठ नहीं बाँधनी चाहिये । गाँठ वरुण की होती है । गाँठ बाँधने से तो वरुण पत्नी को पकड़ लेगा । इसलिये गाँठ नहीं बाँधता ॥१६॥

(यजु० १।३०) के निम्न मंत्रांश को पढ़कर वह उसे ऊपर की ओर मोड़ देता है 'तू विष्णु से व्याप्य है' । पत्नी को चाहिये कि वह वेदी के पश्चिम को पूर्वाभिमुख न बैठे । यह पृथ्वी अदिति है, वह देवों की पत्नी है, देवों की पत्नी वेदी के पश्चिम को पूर्वाभिमुख बैठती है । यदि यह स्त्री भी ऐसा ही करेगी तो अदिति हो जायगी और शीघ्र ही परलोक सिधारेगी । अपने नियत स्थान पर बैठकर बहुत दिनों जीती है । अदिति को प्रसन्न रखती है और अदिति उसको हानि नहीं पहुँचाती । इसलिये उसको दक्षिण की ओर हट कर बैठना चाहिये ॥१७॥

अब वह (पत्नी) आज्य को देखती है । पत्नी स्त्री है और आज्य वीर्य है । इस प्रकार दोनों में सम्पर्क स्थापित करके सन्तति-प्रजनन कर देता है । इसीलिये पत्नी आज्य को देखती है ॥१८॥

यह यजु० १।३० को पढ़कर आज्य को देखती है 'मैं तुझको दोषरहित आँख से देखती हूँ' । अर्थात् शुभ दृष्टि से । 'तू अग्नि की जीभ है' । अग्नि में उसकी आहुति देते

१-३. शु० सं० अ० १ क० ३० ।

हामेजिंह्वासीति[1] यदा वाऽएतदग्नौ जुह्वत्यथाग्नेर्जिह्वा—इवोत्तिष्ठन्ति तस्मादाहाग्नेर्जिह्वासीति सुहूर्देवेभ्य[2] इति साधु देवेभ्य इत्येवैतदाह धाम्ने—धाम्ने मे भव यजुषे—यजुषऽ[3]इति सर्वस्मै मे यज्ञायैधी त्येवैतदाह ॥१६॥

अथाज्यमादाय प्राङुदाहरति । तदाहवनीयेऽधिश्रयति यस्याहवनीये हवींश्ंषि श्रपयन्ति सर्वो मे यज्ञ आहवनीये श्रृतोऽसदित्यथ यदमुत्राग्नेऽधिश्रयति पत्नीश्ंश्ह्यवकाशयिष्यन्भवति न हि तदवकल्पते यत् सामिं प्रत्यग्धरेत्पत्नीमवकाशयिष्यामीत्यथ यत्पत्नीं नावमाशयेदन्तरियाद्द यज्ञात्पत्नीं तथो ह यज्ञात्पत्नीं नान्तरेति तस्मादु सार्धमेव विलाप्य प्रागुदाहरत्यवकाश्य पत्नीं यस्यो पत्नी न भवत्यथऽएव तस्याहवनीयेऽधिश्रयति ततत आदत्ते तदन्तर्वेद्यासादयति ॥२०॥

तदाहुः । नान्तर्वेद्यासादयेदतो वै देवाना पत्नीः संयाजयन्त्यवसाया अह देवानां पत्नीः करोति परः पुश्चली हारय पत्नी भवतीति तदु होवाच याज्ञवल्क्यो यथादिष्टं पत्न्या अस्तु करतदाद्रियेत यत्परः पुश्चली या पत्नी स्या द्यथा वा यज्ञो वेदिर्यत्र आज्यं यज्ञादत्तं है तो अग्नि की जीभ उसे ले लेती है । अतः आज्य अग्नि की जीभ है । 'तू देवों के लिये 'सुहू' है' । अर्थात् भली भाति निमन्त्रित । 'मेरे कल्याण के लिये यह कृत्य हो' । इसका तात्पर्य यह है कि यह आज्य समस्त यज्ञ के लिये सुहू हो ॥१६॥

अग्नीध्र आज्य को लेकर कुछ पूर्व की ओर ले जाता है । जो अपनी हवियों को आहवनीय अग्नि पर पकाते हैं उनके यहाँ यह आज्य आहवनीय अग्नि पर पकाते हैं, यह मान कर कि हमारी समस्त हवियाँ आहवनीय पर पकें । गार्हपत्य पर यह आज्य को इस लिये रखता है कि पत्नी को देखने का अवकाश मिल सके । यह तो ठीक न होगा कि यज्ञ करते समय आहवनीय अग्नि पर से उठा कर आज्य को केवल इसलिये पश्चिम को लाया जाय कि पत्नी को देखने का अवकाश मिल सके । यदि पत्नी को आज्य न दिखाया जाय तो इसका अर्थ यह होगा कि पत्नी को यज्ञ में कोई अधिकार नहीं दिया गया । ऐसा करने से यह पत्नी को यज्ञ के अधिकार से बहिष्कृत नहीं समझता, और (गार्हपत्य पर) पत्नी के निकट रखा कर और पत्नी को दिखा कर ही पूर्व की ओर ले जाता है । यदि पत्नी न हो (मर गई हो या अन्य कारण हो) तो पहले से ही आहवनीय पर रखा देता है । फिर वहाँ से उठा कर वेदी के भीतर रख देता है ॥२०॥

कुछ लोग कहते हैं कि वेदी के भीतर न रखना चाहिये । इससे देव-पत्नियों के लिये आहुति दी जाती है । देव-पत्नियों को सभा से बहिष्कृत कर देना है । और यजमान की पत्नी भी यजमान से रुष्ट हो जाती है । इस पर याज्ञवल्क्य का कहना है कि 'पत्नी के लिये जो नियत है वही होना चाहिये । किसी चिन्ता है कि उसकी पत्नी दूसरों से सम्बन्ध रखती

१-३. शु० सं० अ० १ क० ३० ।

निर्मिमाऽइति तस्मादन्तर्वेद्येवासादयेत् ॥२१॥

प्रोक्षणीषु पवित्रे भवतः । ते तत आदित्ते ताभ्यामाज्यमुत्पुनात्येको वाऽउत्पवनस्य बन्धुर्मेध्यमेवैतत्करोति ॥२२॥

स उत्पुनाति । सवितुस्त्वा प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिरिति[1] *सोऽसावेव बन्धुः ॥२३॥ शतम् १००॥*

अथाज्यलिप्ताभ्या पवित्राभ्याम् । प्रोक्षणीरुत्पुनाति सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिरिति[2] *सोऽसावेव बन्धु. ॥२४॥*

तद्यदाज्यालिप्ताभ्या पवित्राभ्याम् । प्रोक्षणीरुत्पुनाति तदप्सु पयो दधाति तदिदमप्सु पयो हितमिदꣳ हि यदा वर्षत्यथौषधयो जायन्तऽओषधीर्जग्ध्वाप· पीत्वा तत एष रसः सम्भवति तस्मादु रसस्यो चैव सर्वत्वाय ॥२५॥

अथाज्यमवेक्षते । तद्धैके यजमानमवस्थापयन्ति तदु होवाच याज्ञवल्क्यः कथं नु न स्वयमध्वर्यवो भवन्ति कथꣳ स्वय नान्वाहुर्यत्र भूयस्य—इवाशिषः क्रियन्ते कथ न्वेषाम-त्रैव श्रद्धा भवतीति यां वै का च यज्ञऽऋत्विज आशिषमाशासते यजमानस्यैव सा तस्मा-

है' । 'वेदी यज्ञ है । और आज्य भी यज्ञ है, मैं यज्ञ में से यज्ञ बनाऊँगा' । इसलिये आज्य को वेदी में ही रखना चाहिये ॥२१॥

दोनों पवित्रे प्रोक्षणी पात्रों में होते हैं । वह उनको वहाँ से निकाल कर आज्य को पवित्र करता है । उनमें से एक तो पवन का है । इस प्रकार वह आज्य को यज्ञ के योग्य बनाता है ॥२२॥

वह यह मन्त्र (यजु० १।३१) पढ कर पवित्र करता है, 'सविता की प्रेरणा से, छिद्र रहित पवित्रों से, सूर्य्य की रश्मियों से तुझे पवित्र करता हूँ' । शेष स्पष्ट है ॥२३॥

अब आज्य में लिपटे हुये पवित्रों से प्रोक्षणी पात्रों को पवित्र करता है । उसी मन्त्र (यजु० १।३१) से, 'सविता की प्रेरणा से, छिद्र रहित पवित्रों से, सूर्य्य की रश्मियों से, तुझे पवित्र करता हूँ' ॥२४॥

आज्य में लिपटे हुये पवित्रों से प्रोक्षणी को पवित्र करने का अर्थ यह है कि जल में दूध रख दिया । जल में दूध हितकर होता है । जब बरसता है तो ओषधियाँ उत्पन्न होती हैं । ओषधियों को खाकर और जल को पीकर ही रस बनता है । ऐसा करने से वह यजमान को रस-युक्त और पूर्ण कर देता है ॥२५॥

अब अध्वर्यु आज्य को देखता है । कुछ लोगों का मत है कि यजमान को देखना चाहिये । इस पर याज्ञवल्क्य कहते हैं कि यजमान स्वय ही अध्वर्यु क्यों नहीं बन जाते ? स्वय ही आशीर्वाद के मंत्र क्यों नहीं पढ लेते ? इनमें इतनी श्रद्धा कैसे हो जाती है ?

१-२. शु० सं० अ० १. क० ३१ ।

यज्यै त्वा त्रिष्टुभे त्वेति गृह्णीयात्तस्मादनादिश्याज्यस्यैव रूपेण गृह्णाति ॥६॥

अथ यच्चतुर्गृहीता गृह्णाति । सर्वस्मै तद्यज्ञाय गृह्णाति तत्तदनादिश्याज्यस्यैव रूपेण गृह्णाति कस्माऽउ ह्यादिशेद्यतः सर्वाभ्य एव देवताभ्योऽवद्यति तस्मादनादिश्याज्यस्यैव रूपेण गृह्णाति ॥१०॥

यजमान एव जुहूमनु । योऽस्माऽअरातीयती स उपभृतमन्वत्तैव जुहूमन्वाद्य उपभृतमन्वत्तैव जुहूराद्य उपभृत्स वै चतुर्जुह्वा गृह्णात्यष्टौकृत्व उपभृति ॥११॥

स यच्चतुर्जुह्वा गृह्णाति । अत्तारमेवैतत्परिमिततरं कनीयाꣳसं करोत्यथ यदष्टौकृत्व उपभृति गृह्णात्याद्यमेवैतदपरिमिततरं भूयाꣳसं कुरुते तद्धि समृद्धं यत्रात्ता कनीयानाद्यो भूयान् ॥१२॥

स वै चतुर्जुह्वा गृह्णन् । भूय आज्यं गृह्णात्यष्टौकृत्व उपभृति गृह्णन्कनीय आज्यं गृह्णाति ॥१३॥

स यच्चतुर्जुह्वा गृह्णन् । भूय आज्यं गृह्णात्यत्तारमेवैतत्परिमिततरं कनीयाꣳसं कुर्वंस्तस्मिन्वीर्यं बल दधात्यथ यदष्टौकृत्व उपभृति गृह्णन् कनीय आज्यं गृह्णात्याद्यमेवैतदपरिमिततरं भूयाꣳसं कुर्व्वंस्तमवीर्यमबलीयाꣳसं करोति तस्माद्धुत राजापारां विशं भाव

लिये या त्रिष्टुभ के लिये' तो जानिता आ जाय, इसलिये इसको आज्य के रूप में ही बिना देवता का नाम लिये ही लेता है ॥६॥

भृगु में जो चार बार लेता है वह समस्त यज्ञ के लिये । इसको भी वह आज्य के रूप में बिना देवता का नाम लिये ही लेता है, नाम किस देवता का लिया जाय ? वह तो सभी देवताओं के लिये निकालता है । इसलिये बिना नाम लिये ही आज्य के रूप में उसको लेता है ॥१०॥

यजमान जुहू के पीछे खड़ा होता है और जो उसका अशुभ चिन्तक है वह उपभृत के पीछे । खाने वाला जुहू के पीछे खड़ा होता है और खाई जाने वाली चीज उपभृत् के पीछे । जुहू खाने वाला है और उपभृत् खाद्य । जुहू में चार बार लेता है और उपभृत् आठ बार ॥११॥

जुहू में चार बार लेता है इसलिये कि खाने वाला परिमित और छोटा हो जाय । उपभृत् में आठ बार लेता है कि खाद्य पदार्थ अपरिमित और बहुत हो जाय । जहाँ खाने वाला छोटा हो और खाद्य पदार्थ बहुत हो यह समृद्धि का सूचक है ॥१२॥

जुहू में चार बार में बहुत आज्य ले लेता है और उपभृत् में आठ बार में कम आज्य लेता है ॥१३॥

जुहू में जो चार बार लेता है और अधिक लेता है, इससे वह खाने वाले को छोटा और परिमित बना कर उसमें अधिक वीर्य (बल) दे देता है । उपभृत् में जो आठ बार में थोड़ा आज्य लेता है उससे खाद्य को अपरिमित और बहुत बना देता है । और उस

सायाप्येकवेश्मनैव जिनाति त्वद्यथा त्वत्कामयते तथा सचतऽएतेनो ह तद्वीर्येण यज्जुह्वां भूय आज्यं गृह्णाति स यज्जुह्वां गृह्णाति जुहोत्येव तज्जुहोति यदुपभृति गृह्णाति जुहोत्येव तज्जुहोति ॥१४॥

तदाहुः । कस्माऽउ तर्ह्युपभृति गृह्णीयाद्यदुपभृता न जुहोतीति स यद्युपभृता जुहुयात्पृथग्वैवेमाः प्रजाः स्युर्नैवात्ता स्यान्नाद्यः स्यादथ यत्तज्जुहोत्येव समानीय जुहोति तस्मादिमा विशः क्षत्रियाय बलिमँ हरन्त्यथ यदुपभृति गृह्णाति तस्मादु क्षत्रियस्यैव वशे सति वैश्यं पशव उपतिष्ठन्तेऽथ यत्तज्जुहोत्येव समानीय जुहोति तस्माद्यदोत क्षत्रियः कामयतेऽथाह वैश्य मयि यत्तपरो निहितं तदाहरेति तं जिनाति त्वद्यथा त्वत्कामयते तथा सचतऽएतेनो ह तद्वीर्येण ॥१५॥

तानि वाऽएतानि । छन्दोभ्य आज्यानि गृह्यन्ते स यच्चतुर्जुहूवां गृह्णाति गायत्र्यै तद् गृह्णात्यथ यदष्टौकृत्व उपभृति गृह्णाति त्रिष्टुब्जगतीभ्यां तद्गृह्णात्यथ यच्चतुर्ध्रुवायां गृह्णात्यनुष्टुभे तद् गृह्णाति वाग्वाऽअनुष्टुब्वाचो वाऽइदꣳ सर्वं प्रभवति तस्मादु ध्रुवाया एव सर्वो यज्ञः प्रभवतीयं वाऽ अनुष्टुबस्यै वाऽइदꣳ सर्वं प्रभवति तस्मादु ध्रुवाया एव सर्वो यज्ञः प्रभवति ॥१६॥

शक्तिहीन तथा निर्बल बना देता है। जैसे राजा एक एक ही स्थान से बैठा-बैठा बहुत सी प्रजा को वश में करके उन पर मन-चाहा राज करता है, इसी प्रकार अध्वर्यु जुहू में बहुत सा घृत ले लेता है। जो जुहू में लेता है उसकी भी जुहू से आहुति देता है और जो उपभृत् में लेता है उसकी भी जुहू से ही आहुति देता है ॥१४॥

इस पर शंका करते हैं कि जब उपभृत् से आहुति नहीं देना तो उपभृत् में लेना क्यों? यदि उपभृत् से आहुति देवे तो इसका अर्थ यह होगा कि प्रजा राजा से छूट जाय। न खाने वाला रहे, न खाद्य। यह जो साथ-साथ जुहू से आहुति देता है यह ऐसा ही है जैसे वैश्य लोग राजा को कर देवें। उपभृत् में जो लेता है उसका अर्थ यह है कि राजा के अधीन प्रजा पशु आदि की प्राप्ति करती है और जब उपभृत् के आज्य की भी जुहू द्वारा आहुति दी जाय तो इसका तात्पर्य यह है कि राजा जब चाहे वैश्य से कहे 'जो इकट्ठा किया है उसको मुझे दो'। इस प्रकार वह उसको वश में भी रखता है और जो चाहता है उसको इस शक्ति के द्वारा ले लेता है ॥१५॥

यह आज्य छन्दों के लिये लिये जाते हैं। जो जुहू में चार बार लिये जाते हैं वह गायत्री के लिये होते हैं। जो उपभृत् में आठ बार लिये जाते हैं वे त्रिष्टुभ् और जगती के लिये। जो ध्रुवा में चार बार लिये जाते हैं वे अनुष्टुभ् के लिये। वाणी अनुष्टुभ् है। वाणी में ही यह सब प्रजा जन्म लेती है। ध्रुवा से ही सब यज्ञ उत्पन्न होता है। अनुष्टुभ् पृथ्वी है। पृथ्वी से सब जगत् उत्पन्न होता है। अतः ध्रुवा से ही सब यज्ञ उत्पन्न होता है ॥१६॥

दध्वर्युरेवावेक्षेत ॥२६॥

सोऽवेक्षते । सत्यं वै चक्षुः सत्यꣳ हि वै चक्षुस्तस्मादादिदानीं द्वौ विवदमानावेयाताम हमदर्शमहमश्रौषमिति य एव ब्रूयादहमदर्शमिति तस्माऽएव श्रद्दध्याम तत्सत्येनैवैतत्समर्द्धयति ॥२७॥

सोऽवेक्षते । तेजोसि शुक्रमस्यमृतमसीति[1] स एष सत्य एव मन्त्रस्तेजो ह्येतच्छुक्रꣳ ह्येतदमृतꣳ ह्येतत्तत्सत्येनैवतत्समर्द्धयति ॥२८॥ ब्राह्मणम् ॥४॥ [३. १.] ॥

यज्ञ में ऋत्विज लोग जो भी कृत्य करते हैं वह सब यजमान के लिये ही तो होता है। अतः अध्वर्यु को ही देखना चाहिये ॥२६॥

वह इसका अवलोकन करता है, सत्य चक्षु है। सत्य चक्षु ही है। क्योंकि यदि किसी विषय में विवाद उपस्थित हो जाय और एक कहे 'मैंने देखा है', दूसरा कहे, 'मैंने सुना है', तो देखे हुये की बात पर श्रद्धा की जाती है। इस प्रकार वह सत्य से इसकी वृद्धि करता है ॥२७॥

वह यजु० १।३१ से उसका अवलोकन करता है, 'तू तेज है, तू शुक्र है, तू अमृत है'। यह मंत्र ठीक तो है। क्योंकि आज्य तेज है, अमृत है। इस प्रकार वह इसकी सत्य से अभिवृद्धि करता है ॥२८॥

अध्याय ३—ब्राह्मण १

पुरुषो वै यज्ञः। पुरुषस्तेन यज्ञो यदेनं पुरुषस्तनुतऽएष वै तायमानो यावानेव पुरुषस्तावान् विधीयते तस्मात् पुरुषो यज्ञः ॥१॥

तस्येयमेव जुहूः। इयमुपभृदात्मैव ध्रुवा तद्वाऽआत्मन एवेमानि सर्वाण्ययज्ञानि प्रभवन्ति तस्माद्ध्रुवाया एव सर्वो यज्ञः प्रभवति ॥२॥

प्राण एव स्रुवः। सोऽयं प्राणः सर्वाण्ययज्ञान्यनुसञ्चरन्ति तस्माद्ध्रुवः सर्वा अनु

यज्ञ पुरुष है। यज्ञ पुरुष क्यों है? इसलिये कि पुरुष ही यज्ञ को तानता है। और जब तन जाता है तो यज्ञ इतना बड़ा हो जाता है जितना पुरुष[ꣳ] ॥१॥

यज्ञ की यह भुजा (दाहिनी) जुहू है और यह भुजा (बाईं) उपभृत् है। ध्रुवा धड़ है। धड़ से ही सब अंग उपजते हैं। इसलिये ध्रुवा से ही सब यज्ञ उत्पन्न होता है ॥२॥

स्रुवा प्राण है। प्राण सब अंगों में जाता है। इसलिये स्रुवा, सब स्रुचों

---

१. शु० सं० अ० १ क० ३१।

ꣳ यज्ञ पुरुष की कृति है। कृति कर्त्ता के अनुरूप होती है।

स्रुचः सञ्चरन्ति ॥३॥

तस्यासावेव द्यौर्जुहूः । अथेदमन्तरिक्षमुपभृदियमेव ध्रुवा तद्वाऽअस्या एवेमे सर्वे लोकाः प्रभवन्ति तस्माद्ध्रुवाया एव सर्वो यज्ञः प्रभवति ॥४॥

अयमेव स्रुवो याऽयम्पवते । सोऽयमिमान्त्सर्वाल्लोकाननुपवते तस्माद्ध्रुवः सर्वा अनु स्रुचः सञ्चराते ॥५॥

स एष यज्ञस्तायमानः । देवेभ्यस्तायतऽऋतुभ्यश्छन्दोभ्यो यद्धविस्तद्देवाना यत्सोमो राजा यत्पुरोडाशस्तत्तदादिश्य गृह्णात्यमुष्मै त्वा जुष्टं गृह्णामीतत्येवमु हैतेषाम् ॥६॥

अथ यान्याज्यानि गृह्यन्ते । ऋतुभ्यश्चैव तानि छन्दोभ्यश्च गृह्यन्त तत्तदनादिश्याज्यस्यैव रूपेण गृह्णाति स वै चतुर्जुहा गृह्णात्यष्टाकृत्व उपभृति ॥७॥

स यच्चतुर्जुहा गृह्णाति । ऋतुभ्यस्तद् गृह्णाति प्रयाजेभ्यो हि तद्गृह्णात्यृतवो हि प्रयाजास्तत्तदनादिश्याज्यस्यैव रूपेण गृह्णात्यजामितायै जामि ह कुर्यादद्वसन्ताय त्वा ग्रीष्माय त्वेति गृह्णीयात्तस्मादनादिश्याज्यस्यैव रूपेण गृह्णाति ॥८॥

अथ यदष्टाकृत्व उपभृति गृह्णाति । छन्दोभ्यस्तद्गृह्णात्यनुयाजेभ्यो हि तद् गृह्णाति छन्दाꣳसि ह्यनुयाजास्तत्तदनादिश्याज्यस्यैव रूपेण गृह्णात्यजामितायै जामि ह कुर्यादद्गा-

(चमचियों) में जाता है ॥३॥

जुहू द्यौ लोक है । उपभृत् अन्तरिक्ष और ध्रुवा पृथ्वी । पृथ्वी से ही सब लोक उपजते हैं । इसी प्रकार ध्रुवा में ही सब यज्ञ उत्पन्न होता है ॥४॥

स्रुवा बहने वाला वायु है । वायु का सञ्चार सब लोकों में होता है । इसीलिये स्रुवा सब स्रुचों तक जाता है ॥५॥

जब यज्ञ ताना जाता है तो देवों के लिये, ऋतुओं के लिये और छन्दों के लिये । हवि, सोमराजा और पुरोडाश देवों के लिये होती है । यह जब इनको लेता है तो उन-उन देवताओं का नाम लेकर कहता है 'मैं अमुक देवता के लिये तुझ प्रिय को लेता हूँ' । इस प्रकार वह उस देवता की हो जाती है ॥६॥

जो आज्य लिये जाते हैं वे ऋतुओं और छन्दों के लिये लिये जाते हैं । इनको बिना नाम लिये लेता है । जुहू में चार बार आज्य लिया जाता है, उपभृत् में आठ बार ॥७॥

जुहू में जो चार बार लेता है वह ऋतुओं के लिये लेता है । प्रयाजों के लिये लेता है, प्रयाज ही ऋतु हैं । वह आज्य को लेने में किसी का नाम नहीं लेता । अजामिता के लिये । यदि कहे कि 'वसन्त के लिये लेता हूँ या ग्रीष्म के लिये लेता हूँ' तो जामिता आ जाय इसलिये बिना नाम लिये ही आज्य को लेता है ॥८॥

आठ बार उपभृत से जो लेता है वह छन्दों के लिये । अनुयाजों के लिये । अनुयाज छन्द हैं । इनको बिना नाम लिये ही लेता है अजामिता के लिये । यदि कहे कि 'गायत्री के

स गृह्णाति । धाम नामासि प्रियं देवानामि[1]*त्येतद्वै देवानां प्रियतमं धाम यदाज्यं तस्मादाह धाम नामासि प्रियं देवानामित्यनाधृष्टं देवयजनमसीति*[2] *वज्रोवाज्यं तस्मादाहानाधृष्टं देवयजनमसीति ॥१७॥*

स एतेन यजुषा । सकृज्जुहूं गृह्णाति त्रिस्तूष्णीमेतेनैव यजुषा सकृदुपभृति गृह्णाति सप्तकृत्वस्तूष्णीमेतेनैव यजुषा सकृदध्रुवायां गृह्णाति त्रिस्तूष्णीं तदाहुस्त्रिरेव यजुषा गृह्णीयात्त्रिवृद्धि यज्ञ इति तदु नु सकृत्सकृदेवानो ह्येव त्रिर्गृहीतꣳ सम्पद्यते ॥१८॥ ब्राह्मणम् ॥५॥ [३. २.] ॥

स्रुवा में आज्य इस मन्त्रारा (यजु० १।३१) को पढ़कर लेते हैं 'तू देवों का धाम है' । आज्य देवों का प्रियतम धाम है । इसीलिये कहा कि 'तू देवों का प्रियतम धाम है', तू देवों के यज्ञ का अजेय स्थान है' । आज्य वज्र है । इसीलिये ऐसा कहता है । ॥१७॥

जुहू में एक बार मन्त्र पढ़कर भरता है और तीन बार मौन । उपभृत् में एक बार मन्त्र बोलकर, सात बार मौन । ध्रुवा में एक बार मन्त्र बोलकर, तीन बार मौन । कुछ लोग कहते हैं कि तीन बार मन्त्र बोलें क्योंकि यज्ञ त्रिवृत् है । परन्तु यह उद्देश्य तो एक बार मन्त्र बोलकर भी पूरा हो जाता है । (क्योंकि जुहू, उपभृत्, और ध्रुवा में तीन बार मन्त्र हो जाते हैं) ॥१८॥

अध्याय ३—ब्राह्मण ३

प्रोक्षणीरध्वर्युरादत्ते । स इध्मसंनाम्ने प्रोक्षति कृष्णोऽस्यखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामीति[3] *तन्मेध्यमेवैतदग्नये करोति ॥१॥*

अथ वेदिं प्रोक्षति । वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि[4] *तन्मेध्यामेवैतद्बर्हिषे करोति ॥२॥*

अथास्मै बर्हिः प्रयच्छति । तत्पुरस्ताद् मन्थ्यासादयति तत्प्रोक्षति बर्हिरसि

अध्वर्यु प्रोक्षणी को लेकर पहले समिधों पर जल छिड़कता है यह मन्त्र (यजु० २।१) बोलकर 'तू खर में रहने वाला कृष्ण मृग है । तुझे अग्नि की तुष्टि के लिये पवित्र करता हूँ' । इस प्रकार यह उसको अग्नि के लिये पवित्र करता है ॥१॥

फिर वेदी पर जल छिड़कता है, (यजु० २।१) से 'तू वेदी है, बर्हि के लिये तुझे पवित्र करता हूँ' । इस प्रकार उसको बर्हि के लिये पवित्र करता है ॥२॥

अब (अग्नीध्र) बर्हि को (अध्वर्यु को) देता है । वह उसको इस प्रकार वेदी पर

१-२. शु० सं० अ० १ क० ३१ । ३-४. शु० सं० अ० २ क० १ ।

स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि[1] तमेध्यमेनेतत्स्रुग्भ्यं करोति ॥३॥

अथ या प्रोक्षण्यः परिशिष्यन्ते । ताभिरोषधीना मूलान्युपनिनयत्यदित्यै व्युन्दनमसी[2]तीयं वै पृथिव्यदितिस्तदस्या एवैतदोषधीना मूलान्युपोनत्ति ता इमा आर्द्रमूला ओषधयस्तस्माद्यद्यपि शुष्काण्यग्राणि भवन्त्यार्द्राण्येव मूलानि भवन्ति ॥४॥

अथ बिल्मस्य ग्रन्थिम् । पुरस्तात्प्रस्तर गृह्णाति विष्णोस्तुपोऽसीति[3] यज्ञो वै विष्णुस्तस्येयमेव शिरसा स्तुप एतामेवास्मिन्नेतद्दधाति पुरस्ताद् गृह्णाति पुरस्ताद्ध्ययꣳ स्तुपस्तस्मात्पुरस्ताद् गृह्णाति ॥५॥

अथ सक्थ्न बिल्मयति । प्रक्लृप्तꣳ हैवास्य स्त्री विजायतऽइति तस्मात्सक्थ्न बिल्मयति तद्दक्षिणायाꣳ श्रोणौ निदधाति नीविर्हैवास्यैषा दक्षिणत—इव हीय नीविस्तस्माद्दक्षिणायाꣳ श्रोणौ निदधाति तत्पुनरभिच्छादयत्यभिच्छन्नेव हीय नीविस्तस्मात्पुनरभिच्छादयति ॥६॥

अथ बर्हिः स्तृणाति । अयं वै स्तुप प्रस्तरोऽथ यान्यवाञ्चि लोमानि तान्येवास्य यदितर बर्हिः स्तान्येवास्मिन्नेतद्दधाति तस्माद्बर्हिः स्तृणाति ॥७॥

रस देता है कि उनकी ग्रन्थियाँ पूर्व की ओर रहें । अब उन पर जल छिड़कता है । (यजु० २।१) से 'तू बर्हि है । मैं तुझे स्रुचों के लिये पवित्र करता हूँ' । इस प्रकार वह उस बर्हि को स्रुचों के लिये पवित्र करता है ॥३॥

अब जो पानी बच रहता है उसको ओषधियों की जड़ में डालता है इस मन्त्र (यजु० २।२) से, 'तू अदिति के लिये रस है' । यह पृथ्वी ही अदिति है । वह पृथ्वी पौधों के मूलों को तर करता है । पौधों की जड़ें तर होती हैं । आगे के भाग शुष्क भी हों तो भी जड़ें तर ही रहती हैं ॥४॥

अब ग्रन्थियों को खोलकर बर्हि के सिरों से प्रस्तरों को लेता है यह मन्त्र पढ़कर (यजु० २।२) 'तू विष्णु की चोंच है' । यज्ञ विष्णु है । यह उसका स्रुप या शिरा है । इस यज्ञ में वह इसको शिरा बनाता है । आगे के सिरे से लेता है क्योंकि शिखा आगे होती है । इसीलिये आगे से लेता है ॥५॥

वह बर्हि के पूले को खोलता है । यह सोचकर कि यजमान की पत्नी बिना कष्ट के बच्चा जने । उसको वेदी की दाहिनी श्रोणि में रखता है । क्योंकि यह यजमान की कमर का प्रतिनिधि है । इसलिये दाहिना श्रोणि में रखता है । वह उसको बर्हि से ढक देता है । क्योंकि कमर भी कपड़ों से ढकी रहती है । उसको ढक देने का दूसरा हेतु यह है ॥६॥

अब वह बर्हि को वेदी पर बिछाता है । प्रस्तर आगे का सिरा है । और यज्ञ के लिये दूसरी घास लेनी ही है जैसे चोटी से इतर स्थान के लोम । यह उन लोमों का सम्पादन करता है । इसलिये बर्हि को बिछाता है ॥७॥

---

१ शु० स० अ० २ क० १ । २ शु० स० अ० २ क० २ ।

योषा वै वेदिः । तामेतदेवाश्च पर्यासते ये चेमे ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्तेष्वेवैनामेतत्पर्यासीनेष्वनग्ना करोत्यनग्नतायाऽएव तस्माद्बर्हिं स्तृणाति ॥८॥

यावती वै वेदिः । तावती पृथिव्योषधयो बर्हिस्तदस्यामेवैतत्पृथिव्यामोषधीर्दधाति ता इमा अस्यां पृथिव्यामोषधयः प्रतिष्ठितास्तस्माद्बर्हिं स्तृणाति ॥९॥

तद्वै बहुलꣳ स्तृणीयादित्याहुः । यत्र वाऽअस्यै बहुलतमा ओषधयस्तदस्या उपजीवनीयतमं तस्माद्बहुलꣳस्तृणीयादेति तद्वै तदाहर्तयैवाधि त्रिद्वत्स्तृणाति त्रिवृद्धि यज्ञोऽथोऽअपि प्रवर्हꣳ स्तृणीयात्स्तृणन्ति बर्हिरानुपगिति त्वपिणाग्यनूक्तमधरमूलꣳ स्तृणात्यधरमूला—इव हीमा अस्या पृथिव्यामोषधयः प्रतिष्ठितास्तस्मादधरमूलꣳ स्तृणाति ॥१०॥

स स्तृणाति । ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्यऽ[1]इति साध्वीं देवेभ्य इत्येवैतदाह यदाहोर्णम्रदसं त्वेति स्वासस्थां देवेभ्य इति स्वासदां देवेभ्य इत्येवैतदाह ॥११॥

अथाग्निं कल्पयति । शिरो वै यज्ञस्याहवनीयः पूर्वोऽर्धो वै शिरः पूर्वार्धमेवैतद्यज्ञस्य कल्पयत्युपर्युपरि प्रस्तरं धारयन्कल्पयत्ययं वै स्तुपः प्रस्तर एतमेवास्मिन्नेतत्प्रति

वेदी स्त्री है । उस के चारों ओर देवता और वेद के विद्वान ब्राह्मण बैठते हैं । स्त्री को नग्न नहीं होना चाहिये, इसलिये भी बर्हि को बिछाता है ॥८॥

जितनी वेदी है उतनी ही पृथ्वी है । बर्हि ओषधि का रूप है । मानो वह पृथ्वी में ओषधियाँ रखता है । इस पृथ्वी में यह ओषधियां स्थापित हो जाती हैं । इसलिये वह बर्हि को बिछाता है ॥९॥

कुछ लोग कहते हैं कि बहुत से कुश बिछाना चाहिये । क्योंकि पृथ्वी पर जहाँ पौधे बहुत होते हैं वहाँ जीविका भी बहुत होती है । इसलिये बहुत बिछाना चाहिये । तीन बार बिछाना चाहिये क्योंकि यज्ञ त्रिवृत् है । ऐसा बिछावें कि सिरे ऊपर को रहें । ऋषि ने कहा था (मनु० ७।३२) जड़ को नीचे की ओर रखना चाहिये', पृथ्वी में पौधों की जड़ें भी नीचे को होती हैं । इसीलिये जड़ों को नीचे की ओर करके ही बिछाना चाहिये ॥१०॥

यह इस मन्त्र को पढ़ कर बिछाता है (यजु० २।२) 'ऊन के समान नरम, तुझको देवों के लिये प्रिय बिछाता हूँ' । ऊन के समान नरम इसलिये कहा कि देव सुख से बैठ सकें ॥११॥

अब अग्नि को ठीक करता है । आहवनीय अग्नि यज्ञ का सिर है । पूर्वार्ध सिर । इस को यज्ञ का पूर्वार्ध करता है । जब आग को ठीक करता है तो ऊपर प्रस्तर को उठाये रखता है । प्रस्तर स्तुप या चोटी है । मानो यह उसको धारण कराता है । इसीलिये प्रस्तर को

---

१. शु० या० अ० २ क० २ ।

दधाति तस्मादुपर्युपरिप्रस्तरं धारयन्कल्पयति ॥१२॥

अथ परिधीन् परिदधाति । तद्यत्परिधीन्परिदधाति यत्र वै देवा अग्नेऽग्निꣳ होत्राय प्रावृणत तद्धोवाच न वाऽअहमिदमुत्सहे यद्धो होतास्यां यद्धो हव्यं वहेयं त्रीन्पूर्वान्प्रावृढ्वं ते प्राधन्निपुस्तान्नु मेऽवकल्पयताथ वाऽअहमेतदुत्साद्ये यद्धो होता स्या येद्धा हव्यं वहेयमिति तथेति तानस्माऽएतानवाकल्पयंस्तऽएते परिधयः ॥१३॥

स होवाच । वज्रो वै तान्वषट्कारः प्रावृणग्वज्राद्वै वषट्कारादिमेमि यन्मा वज्रो वषट्कारो न प्रवृञ्ज्यादेतैरेव मा परिधत्त तथा मा वज्रो वषट्कारो न प्रवर्क्ष्यतीति तथेति तमेतैः पर्यदधुस्त न वज्रो वषट्कारः प्रावृणक्तद्वर्मवैतदग्नये नह्यति यदेतैः परिदधाति ॥१४॥

तऽऊ हैत ऽऊचुः । इदमु चेदस्मान्यज्ञे युङ्ध्वथास्त्वेवास्माकमपि यज्ञे भागऽइति ॥१५॥

तथेति देवा अब्रुवन् । यद्बहिष्परिधि स्कन्त्स्यति तदुष्मासु हुतमथ यद्ध उपर्युपरि होष्यन्ति तद्धोऽविष्यतीति स यदग्नौ जुह्वति तदेनानवत्यथ यदेनानुपर्युपरि जुह्वति तदेनानवत्यथ यद्बहिष्परिधि स्कन्दति तदेतेषु हुतं तस्मादु ह नाग—इव स्कन्नꣳ स्यादिमां वै

इसके ऊपर-ऊपर उठाये रखकर अग्नि को ठीक करता है ॥१२॥

अब आग के चारों ओर तीन परिधियाँ (लकड़ियाँ) रखता है । परिधियाँ इसीलिये रक्खी जाती हैं । जब देवों ने अग्नि को होता के रूप में वरण किया तो अग्नि बोला 'मुझे उत्साह नहीं कि होता बनूँ और हव्य को ले जाऊँ । तुमने पहले तीन होता बनाये थे, वे लुप्त हो गये । उनको मुझे दिला दो, तब मैं तुम्हारा होता बनूँगा और हव्य को ले जाऊँगा' । तब उन्होंने इन तीन परिधियों की कल्पना की ॥१३॥

उसने अब कहा, 'वषट्कार रूपी वज्र ने उन तीनों (होताओं) को मार डाला था । मुझे डर है कि वषट्कार मुझे भी मार डाले । इसीलिये इन तीन परिधियों की स्थापना कर दो । तब वषट्कार मुझे मार नहीं सकेगा' । उन्होंने इसीलिये इन तीन परिधियों की स्थापना कर दी और वषट्कार उसको मार न सका । यह तीन परिधियाँ मानों उस अग्नि के लिये वर्म हैं ॥१४॥

तब (दूसरी अग्नियों ने) कहा 'यदि तुम हमारे साथ इस प्रकार यज्ञ में शामिल हो तो हमको भी यज्ञ में भाग दो' ॥१५॥

देवों ने उत्तर दिया, 'अच्छा, जो परिधियों के बाहर गिर जाय वह तुम्हारा । और जो आहुति तुम में ही दी जाय वह तुम्हारी । जो आहुति अग्नि में दी जाय वह तुम्हारी' । इस प्रकार जो आहुति अग्नि में दी जाती है वह इन अग्नियों की तृप्ति के लिये होती है । जो आहुतियाँ उन्हीं परिधियों पर दी जाती हैं वह भी उनकी तृप्ति के लिये होती हैं । और जो परिधियों के बाहर गिर जाता है वह भी उन्हीं की आहुति है । इस प्रकार जो

ते प्राविशन्यद्वा ऽइद किञ्च स्कन्दत्यस्यामेव तत्सर्वं प्रतितिष्ठति ॥१६॥

स स्कन्दमभिमृशति । भुवपतये स्वाहा भुवनपतये स्वाहा भूताना पतये स्वाहे-[1] त्येतानि वै तेषामग्नीना नामानि यद्भुवपतिर्भुवनपतिर्भूताना पतिस्तद्यथा वषटकृतꣳ हुतमेवमस्यैतेष्वग्निषु भवति ॥१७॥

तद्धैके । इध्मस्यैवैतान् परिधीन् परिदधाति तदु तथा न कुर्यादनवक्लृप्ता ह तस्यैते भवन्ति यानिध्मस्य परिदधात्यभ्याधानाय ह्येवेध्मः क्रियते तस्यो हैवैतेऽवक्लृप्ता भवन्ति यस्यैतानन्यानाहरन्ति परिधय ऽइति तस्मादन्यानेवाहरेयुः ॥१८॥

ते वै पालाशाः स्युः । ब्रह्म वै पलाशो ब्रह्माग्निरग्नयो हि तस्मात्पालाशाः स्युः ॥१९॥

यदि पालाशान्न विन्देत् । अथोऽअपि बैकङ्कता स्युर्यदि वैकङ्कतान्न विन्देदथोऽ अपि कार्ष्मर्यमयाः स्युर्यदि कार्ष्मर्यमयान्न विन्देदथो ऽअपि वैल्वाः स्युरथो खादिरा अथोऽ औदुम्बरा एते हि वृक्षा यज्ञियास्तस्मादेतेषा वृक्षाणा भवन्ति ॥२०॥ ब्राह्मणम् ॥६॥ [३. ३] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासङ्ख्या १२२ ॥

आज्य गिर पड़ता है उसका पाप नहीं लगता । क्योंकि जब अग्नियाँ जाने लगीं तो पृथ्वी मे प्रविष्ट हो गईं । जो गिरा वह पृथ्वी में ही तो रहेगा ॥१६॥

जो गिर जाता है उसको वह इस मन्त्राश (यजु० २।२) को पढकर स्पर्श करता है—'भुवपतये स्वाहा, भुवनपतये स्वाहा, भूताना पतये स्वाहा' । भुवपति, भुवनपति और भूतपति अग्नियों के नाम हैं । वषट्कार कहकर जो आहुति दी जाती है वह उसी देवता की होती है जिसका नाम लिया जाता है । यहाँ यह आहुतियाँ इन्हीं अग्नियो की हैं जिनका नाम लिया जाता है ॥१७॥

कुछ लोग समिधाओं मे से ही लेकर परिधियाँ बना देते हैं । उनको ऐसा नहीं करना चाहिये । समिधायें अग्नि पर रखने के लिये बनाई जाती हैं अत. वे परिधियों के योग्य नहीं होतीं । अत अलग से ही परिधियाँ बनानी चाहिये ॥१८॥

यह पलाश वृक्ष की होनी चाहिये । पलाश ब्राह्मण है । अग्नि भी ब्राह्मण है । इस लिये अग्नियाँ पलाश की होनी चाहिये ॥१९॥

यदि पलाश न मिले तो विकङ्कत की हो । विकङ्कत की न हों तो कार्ष्मर्य की हों । कार्ष्मर्य की न हो तो बेल की हों, या खदिर की, या उदुम्बर की । यही वृक्ष यज्ञ के योग्य हैं । इन्हीं से परिधियाँ लेनी चाहिये ॥२०॥

---

१. शु० स० अ० २ क० २ ।

अध्याय ३—ब्राह्मण ४

ते वाऽआर्द्राः स्यु. । एतद्धवेषा जीवमेतेन सतेजस एतेन वीर्यवन्तस्तस्मादार्द्राः स्युः ॥१॥

स मध्यममेवाग्रे । परिधिं परिदधाति गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्या-रिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडित[1] *इति ॥२॥*

अथ दक्षिणं परिदधाति । इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमानाय परिधिरस्यग्निरिड ईडित[2] *इति ॥३॥*

अथोत्तरं परिदधाति । मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्या-रिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडित[3] *इत्यग्नयो हि तस्मादाहाग्निरिड ईडित इति ॥४॥*

अथ समिधमभ्यादधाति । स मध्यममेवाग्रे परिधिमुपस्पृशति तेनैतानग्रे समिन्धे-ऽथाग्नावभ्यादधाति तेनोऽअग्निं प्रत्यक्षꣳ समिन्धे ॥५॥

सोऽभ्यादधाति । वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधीमहि । अग्ने बृहन्त-

वे हरी होनी चाहिये । यही हरापन उनका जीवन है । इसी से उनमें शक्ति रहती है । इसीलिये हरी होनी चाहिये ॥१॥

बीच की परिधि के पहले (अग्नि के पश्चिम की ओर) यह मन्त्र (यजु० २।३) पढ़कर रखता है :—'गन्धर्व विश्वावसु तुझको विश्व के कल्याण के लिये रखे । तू यजमान की परिधि (रक्षक) है । तू पूज्य अग्नि है' ॥२॥

दक्षिण की परिधि को यह पढ़कर रखता है 'तू इन्द्र की दाहिनी भुजा है । विश्व की शान्ति के लिये । तू यजमान की परिधि (रक्षक) है । तू पूज्य अग्नि है' ॥३॥

अब उत्तर की ओर परिधि को यह पढ़कर रखता है—'मित्र और वरुण देवता तुझको उत्तर की ओर रक्खें । ध्रुव नियम से विश्व के कल्याण के लिये । तू यजमान की परिधि है । तू अग्नि है । यह परिधियाँ अग्नि ही हैं' । इसीलिये कहता है कि 'तुम पूज्य अग्नि हो' ॥४॥

अब एक समिधा रखता है । पहले वह समिधा से बीच की परिधि को छूता है । इस प्रकार वह तीन परिधियों को जलाता है । फिर वह उस समिधा को आग पर रख देता है । इससे वह प्रत्यक्ष अग्नि को जलाता है ॥५॥

वह इसको गायत्री छन्द से (यजु० २।४) रखता है 'हे कवि अग्नि, तुझ देवों

१-३. शु० स० अ० २ क० ३ ।

मघवन्[1]ऽइत्येतया गायत्र्या गायत्रीमेवैतत्समिन्धे सा गायत्री समिद्धान्यानि छन्दाꣳसि समिन्धे छन्दाꣳसि समिद्धानि देवेभ्यो यज्ञ वहन्ति ॥६॥

अथ या द्वितीयाꣳ समिधमभ्यादधाति । वसन्तमेव तया समिन्धे स वसन्तः समिद्धोऽन्यानृतून्त्समिन्धऽऋतव· समिद्धा· प्रजाश्च प्रजनयन्त्योषधीश्च पचन्ति सोभ्यादधाति समिदसीति[2] समिद्ध. वसन्त· ॥७॥

अथाभ्याधाय जपति सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्या[3]ऽइति गुप्त्यै वाऽअमित. परिधयो भवन्त्यथैतत्सूर्यमेव पुरस्तादगोपारं करोति नेत्पुरस्तान्नाष्ट्रा रक्षाꣳस्यभ्यवचरानिति भूर्यो हि नाष्ट्राणाꣳ रक्षसामपहन्ता ॥८॥

अथ यामेवामू तृतीयाꣳ समिधमभ्यादधाति । अनुयाजेषु ब्राह्मणमेव तया समिन्धे स ब्राह्मणः समिद्धो देवेभ्यो यज्ञ वहति ॥९॥

अथ स्तीर्णां बेदिमुपावर्त्तते । सद्वे तृणेऽआदाय तिरश्ची निदधाति सवितुर्बाहू[4]स्थ इत्यवै स्तुप. प्रस्तरोऽथास्यैते भ्रुवावेव तिरश्ची निदधाति तस्मादिमे तिरश्च्यौ भ्रुवौ क्षत्र वै प्रस्तरो विशऽइतर बहिः क्षत्रस्य चैव विशश्च विधृत्यै तस्मात्तिरश्ची निदधाति

को बुलाने वाले, प्रकाश-स्वरूप को हम जलाते हैं । यज्ञ मे बलवान तुझको' । इस प्रकार वह गायत्री को जलाता है । गायत्री जल कर दूसरे छन्दों को जला देती है और दूसरे छन्द जल कर यज्ञ को देवों तक ले जाते हैं ॥६॥

अब वह दूसरी समिधा रखता है । उससे वह वसन्त को प्रज्वलित करता है । वह प्रज्वलित वसन्त दूसरी ऋतुओं को प्रज्वलित करता है । प्रज्वलित ऋतुयें सन्तान को उत्पन्न करती हैं, ओषधियों को पकाती हैं । वह इस मन्त्र (यजु० २।५) को पढकर रखता है 'दू समित्' । वस्तुत वसन्त समित् है ॥७॥

अब उसको रखकर जपता है, 'सूर्य तेरी पूर्व की ओर से रक्षा करे और अन्य बुराई से भी' । परिधियाँ चारों ओर से रक्षा के लिये होती हैं । इस प्रकार वह पूर्व में सूर्य को रक्षक बना देता है कि वहीं पूर्व से दुष्ट राक्षस विघ्न न करें । सूर्य दुष्ट राक्षसों को मारने वाला है ॥८॥

यह जो तीसरी समिधा को अनुयाज के पीछे रखता है, उससे वह ब्राह्मण को प्रज्वलित करता है । प्रज्वलित होकर ब्राह्मण देवों तक हवि ले जाता है ॥९॥

अब वह तृणों से ढकी हुई वेदी तक लौटता है । दो तृणों को लेकर टेढा रख देता है । इस मन्त्र (यजु० २।५) से 'तुम सविता की भुजायें हो' । प्रस्तर स्तुप या चोटी है । वह इन दोनों को भौहों के समान तिरछा रख देता है । इसीलिये भौंहें टेढी होती हैं । प्रस्तर क्षत्रिय है और दूसरे यहाँ वैश्य । क्षत्रिय और वैश्य को अलग-अलग करने के लिये इनको

---

१. शु० सं० अ० २ क० ४ । २-४. शु० स० अ० २ क० ५ ।

तस्माद्देव विधृती नाम ॥१०॥

तत्प्रस्तरꣳ स्तृणाति । ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्य[1] *इति साधु देवेभ्य इत्येवैतदाह यदाहोर्णम्रदसं त्वेति स्वासस्थं देवेभ्य इति स्वासदं देवेभ्य इत्येवैतदाह ॥११॥*

तमभिनिदधाति । आ त्वा वसवो रुद्रा आदित्याः सदन्त्वित्येति[2] *वै त्रयो देवा यद्वसवो रुद्रा आदित्या एते त्वासीदन्त्वित्येवैतदाहाभिनिहित एव सव्येन पाणिना भवति ॥१२॥*

अथ दक्षिणेन जुहूं प्रतिगृह्णाति । नेदिह पुरा नाष्ट्रा रक्षाꣳस्याविशानिति ब्राह्मणो हि रक्षसामपहन्ता तस्मादभिनिहित एव सव्येन पाणिना भवति ॥१३॥

अथ जुहूं प्रतिगृह्णाति । घृताच्यसि जुहूर्नाम्नेति[3] *घृताची हि जुहूर्हि नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद आसीदेति*[4] *घृताच्यस्युपभृन्नाम्ने*[5] *त्युपभृतं घृताची ह्युपभृन्हि नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद आसीदेति*[6] *घृताच्यसि ध्रुवा नाम्नेति*[7] *ध्रुवां घृताची हि ध्रुवा हि नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद आसीदेति*[8] *प्रियेण धाम्ना प्रियꣳ सद आसीदेति*[9] *यदन्यद्धविः ॥१४॥*

रखता है इनको 'विधृति' कहते हैं। 'विधृति' का अर्थ है अलग-अलग करने वाला ॥१०॥

अब वह प्रस्तर को (यजु० २।५) पढ़कर बिछाता है 'तू ऊन के समान नरम और देवों के योग्य आसन है'। 'ऊन के समान नरम' कहने का तात्पर्य है कि बहुत अच्छा है। 'देवों के योग्य आसन' कहने का तात्पर्य है कि वह देवों को सुख पहुँचाने वाला है ॥११॥

वह (बायें हाथ से) उसको यह पढ़कर दबाता है (यजु० २।५) :—'वसु, रुद्र और आदित्य तुझ पर बैठें'। वसु, रुद्र और आदित्य तीन देवता हैं। यही बैठते हैं। अब उसको बायें हाथ से दबाये होता है उस समय ॥१२॥

दाहिने हाथ से जुहू को पकड़ता है कि कहीं दुष्ट राक्षस न घुस आवें। ब्राह्मण राक्षसों को रोकने वाला है। इसीलिये जब वह प्रस्तर को बायें हाथ से दबाये होता है उस समय ॥१३॥

वह दाहिने हाथ से जुहू को यह पढ़कर पकड़ता है (यजु० २।६) :—'तू जुहू नाम वाली घृताची (घी को प्यार करने वाली) है। यह घृताची भी है और जुहू भी। प्रिय धाम वाली इस पर सुख से बैठ'। अब उपभृत् को लेता है यह पढ़कर 'तू उपभृत् घृताची है। प्रिय धाम वाली। सुख से बैठ'। यह उपभृत् भी है और घृताची भी। अब ध्रुवा को लेता है यह पढ़कर 'ध्रुवा है घृताची। प्रिय धाम वाली। सुख से बैठ'। यह ध्रुवा भी है। घृताची भी। जो कुछ शेष रहे उसको यह कहकर आहुति देता है, 'प्रिय धाम में, प्रिय स्थान में बैठ' ॥१४॥

१-२. शु० सं० अ० २ क० ५ । ३-९. शु० सं० अ० २ क० ६ ।

स वा ऽउपरि जुहूꣳ सादयति । अध इतराः स्रुचः क्षत्रं वै जुहूर्विश इतराः स्रुचः क्षत्रमेवैतद्विशि उत्तरं करोति तस्मादुपर्यासीन क्षत्रियमधस्तादिमाः प्रजा उपासते तस्मादुपरि जुहूꣳ सादयत्यध इतराः स्रुचः ॥१५॥

सोऽग्निमृशति । ध्रुवा असदन्निति[1] ध्रुवा ह्यसदन्नृतस्य योनाविति[2] यज्ञो वा ऽऋतस्य योनिर्यज्ञे ह्यसदस्ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिमिति तद्यजमानमाह पाहि मां यज्ञन्यमिति[3] तदप्यात्मान यज्ञमान्तरेति यज्ञो वै विष्णुस्तद्यज्ञायैवैतत्सर्वं परिददाति गुप्त्यै तस्मादाह तो विष्णो पाहीति ॥१६॥ ब्राह्मणम् ॥१॥ [४]

वह जुहू को प्रस्तर पर रखता है और अन्य स्रुचों को नीचे। जुहू क्षत्रिय है और अन्य स्रुचे वैश्य। इस प्रकार क्षत्रिय को वैश्य से महान् करता है। इसीलिये वैश्य नीचे स्थान से काम करते हैं और क्षत्रिय ऊपर के स्थान से। इसीलिये जुहू को ऊपर रखता है और अन्य स्रुचों को नीचे ॥१५॥

वह अब हवियों का स्पर्श करता है इस मन्त्राश (यजु० २।६) को पढ़कर 'ठीक बैठ गये'। वह ठीक बैठ गये। 'ऋत के घर में'। यज्ञ ऋत की योनि है। यज्ञ में ही वह बैठ गये। 'हे विष्णु! इनकी रक्षा करो, यज्ञ की रक्षा करो, यज्ञपति की रक्षा करो'। यज्ञपति का अर्थ है 'यजमान'। 'यज्ञ के मुख्य नेता की रक्षा करो'। इस प्रकार यज्ञ में अपने को भी सम्मिलित करता है। यज्ञ विष्णु है। इस प्रकार यज्ञ से ही यज्ञ की रक्षा चाहता है। इसलिये कहता है, 'हे विष्णु रक्षा कर' ॥१६॥

अध्याय ३—ब्राह्मण ५

इध्मे ह वा एतदध्वर्युः। इध्मेनाग्नि तस्मादिध्मो नाम समिन्धे सामिधेनीभिर्होता तस्मात्सामिधेन्यो नाम ॥१॥

स आह। अग्नये समिध्यमानायानुब्रूहीत्यग्नये ह्येतत्समिध्यमानायान्वाह ॥२॥

अध्वर्यु अग्नि को इध्म (लकड़ी से) इन्धे अर्थात् जलाता है। इसलिये इसको इध्म (ईंधन) कहते हैं। और होता सामिधेनियों को बोल कर अग्नि को अधिक प्रज्वलित करता है अत उन मन्त्रों को सामिधेनी कहते हैं। (लकड़ी इध्म है और मन्त्र सामिधेनी) ॥१॥

अध्वर्यु होता से कहता है 'अग्नि जलने वाली के लिये मन्त्र बोलो'। होता जलने वाली अग्नि के लिये ही मन्त्र बोलता है ॥२॥

१-२. शु० सं० अ० २ क० ६।

तदु हैकऽआहुः । अग्नये समिध्यमानाय होतरनुब्रूहीति तदु तथा न ब्रूयाद्· होता वाऽएष पुरा भवति यदैवैनं प्रवृणीतेऽथ होता तस्माद्धु ब्रूयादग्नये समिध्यमानायानुब्रूहीत्येव ॥३॥

आग्नेयीरन्वाह । स्वयैवैनमेतद्देवतया समिन्धे गायत्रीरन्वाह गायत्रं वाऽअग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसा समिन्धे वीर्यं गायत्री ब्रह्म गायत्री वीर्येणैवैनमेतत्समिन्धे ॥४॥

एकादशान्वाह । एकादशाक्षरा वै त्रिष्टुब्ब्रह्म गायत्री क्षत्रं त्रिष्टुबेताभ्यामेवैनमेतदुभाभ्यां वीर्याभ्याꣳ समिन्धे तस्मादेकादशान्वाह ॥५॥

स वै त्रिः प्रथमामन्वाह । त्रिरुत्तमां त्रिवृत्प्रायणा हि यज्ञास्त्रिवृदुदयनास्तस्मात्रिः प्रथमामन्वाह त्रिरुत्तमाम् ॥६॥

ताः पञ्चदश सामिधेन्यः सम्पद्यन्ते । पञ्चदशो वै वज्रो वीर्यं वज्रो वीर्यमेवैतत्सामिधेनीरभिसम्पादयति तस्मादेतास्वनूच्यमानासु यं द्विष्यात्तमङ्गुष्ठाभ्यामवबाधेतेदमहममुमवबाधऽइति तदेनमेतेन वज्रेणावबाधते ॥७॥

कुछ लोग कहते हैं 'हे होता, जलने वाली अग्नि के लिये मंत्र बोलो' । परन्तु ऐसा नहीं कहना चाहिये । क्योंकि अभी वह 'होता' तो बना नहीं । जब यजमान उसका वरण कर लेगा तभी तो वह होता बनेगा । इसलिये (बिना होता को सम्बोधन किये) केवल इतना ही कहना चाहिये 'जलती हुई अग्नि के लिये मंत्र बोलो' ॥२॥

अग्नि की ऋचायें बोली जाती हैं । अर्थात् अग्नि को उसी के देवता के द्वारा प्रज्वलित करता है । गायत्री छन्द के मंत्र बोलता है । गायत्री अग्नि का छन्द है अतः अपने ही छन्द से अग्नि प्रज्वलित होती है । गायत्री वीर्य है । गायत्री ब्रह्म है । अतः वीर्य से ही इसको प्रज्वलित करता है ॥४॥

ग्यारह मंत्र बोलता है । त्रिष्टुभ् में ग्यारह ही अक्षर होते हैं । गायत्री ब्राह्मण है । त्रिष्टुभ् क्षत्रिय है । इन्हीं दो शक्तियों द्वारा आग को प्रज्वलित करता है । इसीलिये ग्यारह मंत्र बोलता है ॥५॥

पहले मंत्र को तीन बार बोलता है और अन्तिम मंत्र को तीन बार । यज्ञ आदि में त्रिवृत् है और अन्त में भी त्रिवृत् । इसलिये वह आदिम और अन्तिम मंत्रों को तीन-तीन बार बोलता है ॥६॥

सामिधेनियाँ १५[क] होती हैं । १५ का अंक यज्ञ है । वज्र वीर्य है । अतः वीर्य रूपी वज्र से वह यज्ञ को समन्वित करता है । यदि वह किसी से द्वेष करता हो तो जब सामिधेनियों का उच्चारण हो रहा हो उस समय वह अपने पैर से शत्रु को कुचल सकता है । वह उसको उस वज्र से मार सकता है ॥७॥

[क] ग्यारह मंत्रों में से पहले और पिछले को तीन-तीन बार पढ़ने से १५ हो जाते हैं ।

पञ्चदश वा अर्द्धमासस्य रात्रयः । अर्द्धमासशो वै संवत्सरो भवन्नेति तद्रात्रीरामोति ॥८॥

पञ्चदशानामु वै गायत्रीणाम् । त्रीणि च शतानि षष्टिश्चाक्षराणि त्रीणि च वै शतानि षष्टिश्च संवत्सरस्याहानि तदहान्यामोति तद्वेव संवत्सरमाप्नोति ॥९॥

सप्तदशसामिधेनीः । इष्ट्याऽअनुवाक्यादुपाꣳशु तस्यै देवतायै यजति यस्याऽइष्टिं निर्वपति द्वादश वै मासाः संवत्सरस्य पञ्चर्त्तव एष एव प्रजापतिः सप्तदशः सर्वे वै प्रजापतिस्तत्सर्वेणैव तं काममनपराधꣳ राध्नोति यस्मै कामायेष्टिं निर्वपत्युपाꣳशु देवतां यजत्यनिरुक्तं वाऽउपाꣳशु सर्वं वाऽअनिरुक्तं तत्सर्वेणैव तं काममनपराधꣳ राध्नोति यस्मै कामायेष्टिं निर्वपत्येष इष्टेरुपचारः ॥१०॥

एकविꣳशतिꣳ सामिधेनीः । अपि दर्शपूर्णमासयोरनुवाक्यादित्याहुर्द्वादश वै मासाः संवत्सरस्य पञ्चर्त्तवस्त्रयो लोकास्तद्विꣳशतिरेषऽएवैकविꣳशो य एष तपति सैषा गतिरेषा प्रतिष्ठा तदेतां गतिमेतां प्रतिष्ठां गच्छति तस्मादेकविꣳशतिमनुवाक्यात् ॥११॥

ता हैता गत श्रेरेवानुवाक्यात् । य इच्छेच्च श्रेयान्स्यान्च पापीयानिति यावदाय हैव सतेन्वाहुस्तावद्वा हैव भवति पापीयान्वा यस्यैवं विदुष एता अन्वाहुः सो ऽएषा मीमा-

अर्ध-मास या आधे महीने में पन्द्रह रातें होती हैं । वर्ष पाख-पास करके ही समाप्त हो जाता है । इसलिये वह रातों की प्राप्ति करता है ॥८॥

पन्द्रह गायत्रियों में ३६० अक्षर हुये । एक वर्ष में ३६० दिन होते हैं । इस प्रकार वह दिनों की प्राप्ति करता है और वर्ष की भी ॥९॥

यदि (किसी विशेष उद्देश्य से) इष्टि करना हो तो सत्रह सामधेनियाँ पढ़नी चाहिये । जिस देवता की इष्टि देनी होती है उसके लिये चुपचाप धीरे से इष्टि दी जाती है । वर्ष में बारह मास होते हैं और पाँच ऋतुयें । इस प्रकार प्रजापति में सत्रह हो गये । प्रजापति है सम्पूर्ण । इसलिये जिस देवता के लिये इष्टि की जाती है वह सब सम्पूर्णता के लिये । अर्थात् यज्ञ करने वाले को सम्पूर्णता प्राप्त हो जाती है । इष्टि के लिये यही उपचार है ॥१०॥

कुछ लोगों का कहना है कि दर्श और पौर्णमास यज्ञों में इक्कीस सामिधेनियाँ पढ़नी चाहियें । बारह मास हुये, पाँच ऋतुयें, तीन लोक और इक्कीसवाँ वह जो नित्य तपता है अर्थात् सूर्य । वही गति है वही प्रतिष्ठा है । गति और प्रतिष्ठा को प्राप्त होता है । इसलिये इक्कीस सामिधेनियाँ पढ़नी चाहिये ॥११॥

इन को गड्ढे ही पड़े जो चाहे कि मुझे न इससे अधिक होना है न कम । क्योंकि जिस देवता के लिये पढ़ते हैं, पढ़ने वाला उसी देवता के समान होगा या कम । जो इस रहस्य को समझता है उसी के लिये वे (इक्कीस मन्त्र) बोलते हैं । परन्तु यह तो मीमांसा

शꣳसैव न त्वेवैता अनूच्यन्ते ॥१२॥

त्रिरेव प्रथमां त्रिरुत्तमामनवानन्वनुब्रूयात् । त्रयो वा ऽइमे लोकास्तदिमानेवैतल्लोकान्त्सन्तनोतीमांल्लोकान्त्स्पृणुते त्रय इमे पुरुषे प्राणा एतमेवास्मिन्नेतत्सन्ततमव्यवच्छिन्नं दधात्येतदनुवचनꣳ ॥१३॥

स यावदस्य वचः स्यात् । एवमेवानुविवक्षेत्तस्यैतस्य परिचक्षीत साम्यवान्यादनवानन्वनुविवक्षेत्तत्कर्म विवृह्येत सा परिचक्षा ॥१४॥

स यद्येतनो दाशꣳसेत । अप्येकैकामेवानवानन्वनु ब्रूयात्तदेकैकयैवेमांल्लोकान्त्सन्त नोत्येकैकयेमांल्लोकान्त्स्पृणुतेऽथ यत्प्राणं दधाति गायत्री वै प्राणः स यत्कृत्स्नां गायत्रीमन्वाह तत्कृत्स्नं प्राणं दधाति तस्मादेकैकामेवानवानन्वनुब्रूयात् ॥१५॥

ता वै सन्तता अव्यवच्छिन्ना अन्वाह । संवत्सरस्यैवैतदहोरात्राणि सन्तनोति तानीमानि संवत्सरस्याहोरात्राणि सन्ततान्यव्यवच्छिन्नानि परिलघन्ते द्विषतऽउचैवैतद् भ्रातृव्याय नोपस्थानं करोत्युपस्थानꣳ ह कुर्याद्यदसन्तता अनुब्रूयात्तस्माद्वै सन्तता अव्यवच्छिन्ना अन्वाह ॥१६॥ ब्राह्मणम् ॥ २॥ [५] अध्यायः ॥३॥

माग है । इक्कीस मंत्र बोले नहीं जाते ॥१२॥

पहले मंत्र को तीन बार और पिछले को तीन बार एक साँस में पढ़ना चाहिये । तीन ही यह लोक हैं । अतः वह इन तीन लोकों को तानता है । पुरुष में तीन प्राण होते हैं । ऐसा करने से उसका जीवन बढ़ जाता है । (मृत्यु) उसको बीच से काटता नहीं ॥१३॥

होता को चाहिये कि बिना बीच में तोड़े हुये जितनी भर उसमें शक्ति हो उससे मंत्रों को पढ़ता रहे । बीच में साँस तोड़ देने का अर्थ यह है कि यज्ञ का अनादर किया गया । बिना साँस तोड़े लगातार पढ़ने से यह पाप नहीं लगता ॥१४॥

यदि वह ऐसा करना न चाहे तो एक-एक मन्त्र को ही बिना साँस तोड़े बोले । इस प्रकार वह एक-एक करके लोकों की प्राप्ति करेगा । वह साँस इसलिये लेता है कि गायत्री प्राण है । पूरी गायत्री पढ़कर मानो वह यजमान के लिये पूरे प्राण का सम्पादन करता है । इसलिये उसको एक-एक मन्त्र बिना साँस तोड़े पढ़ने चाहिये ॥१५॥

उनको बराबर बिना तोड़े हुये पढ़ना चाहिये, इस प्रकार वह सम्वत्सर के दिन और रातों को लगातार कर देता है । वर्ष के दिन और रात बिना अन्तर के ही गुजरते हैं । इस प्रकार वह द्वेषी शत्रु को अवसर नहीं देता । यदि बीच में तोड़ कर पढ़ेगा तो अपने शत्रु को अवकाश दे देगा । इसलिये वह बिना तोड़े हुये लगातार पढ़ता है ॥१६॥

अध्याय ४—ब्राह्मण १

हिङ्कृत्यान्वाह । नासामा यज्ञोऽस्तीति वाऽऽहुर्न वाऽअहिङ्कृत्य साम गीयते सयद्धिङ्करोति तद्धिङ्कारस्य रूपं क्रियते प्रणवेनैव साम्नो रूपमुपगच्छत्योरेम् ओरेमित्येतेनो हारयैष सर्व एव ससामा यज्ञो भवति ॥१॥

यद्वेव हिङ्करोति । प्राणो वै हिङ्कारः प्राणो हि वै हिङ्कारस्तस्मादपिगृह्य नासिके न हिङ्कर्तुꣳ शक्नोति वाचा वाऽऋचमन्वाह वाक्च वै प्राणश्च मिथुनं तदेतत्पुरस्तान्मिथुनं प्रजननं क्रियते सामिधेनीनां तस्माद्वै हिङ्कृत्यान्वाह ॥२॥

स वाऽउपाꣳशु हिङ्करोति । अथ यदुच्चैर्हिङ्कुर्य्यादन्यतरदेव कुर्याद्वाचमेव तस्मादुपाꣳशु हिङ्करोति ॥३॥

स वाऽएति च प्रेति चान्वाह । गायत्रीमेवैतदर्वाचीं च परांचीं च युनक्ति पराच्यह देवेभ्यो यज्ञं वहत्यर्वाची मनुष्यानवति तस्माद्वाऽएति च प्रेति चान्वाह ॥४॥

यद्वेवेति च प्रेति चान्वाह । प्रेति वै प्राण एत्युदानः प्राणोदानावेवैतद्दधाति तस्मा-

मन्त्र बोलने से पहले 'हिङ्' बोलना चाहिये । ऐसा कहते हैं कि बिना सामगान के यज्ञ नहीं होता और साम बिना हिङ्कार के गाया नहीं जाता । हिङ्कार से हिङ् का रूप होता है और प्रणव या ओङ्कार से साम का रूप । 'ओरेम्' कहने से समस्त यज्ञ सामरूप हो जाता है ॥१॥

हिङ्कार क्यों कहता है ? इसलिये कि प्राण हिङ्कार है । प्राण हिङ्कार इसलिये है कि नाक के नथने बन्द करने पर हिङ्कार नहीं बोल सकते । ऋचाओं को वाणी से बोलता है । वाणी और प्राण का जोड़ा है । हिङ्कार बोलकर सामिधेनियाँ पढ़ने का तात्पर्य यह है कि सामिधेनियों में सन्तान का प्रजनन करा देता है (जोड़ा मिलाकर) ॥२॥

हिङ्कार मन्द स्वर से बोला जाता है । हिङ्कार उच्च स्वर से बोलेगा तो हिङ्कार और वाणी एक ही हो जायगी । अतः हिङ्कार को मन्द स्वर से बोलना चाहिये ॥३॥

'आ' और 'प्र' कहकर बोलता है । इस प्रकार वह उधर जाने वाली गायत्री को इधर आने वाली गायत्री से जोड़ देता है । उधर जाने वाली गायत्री देवों के लिये यज्ञ को ले जाती है । इधर आने वाली गायत्री मनुष्यों की रक्षा करती है । इसलिये 'आ' और 'प्र' का प्रयोग करता है ॥४॥

'आ' और 'प्र' कहने का एक कारण और भी हो सकता है । 'प्र' प्राण है और 'आ' उदान । इस प्रकार प्राण और उदान को धारण कराता है । इसलिये 'आ' और 'प्र'

ह्याऽएति च प्रेति चान्वाह ॥५॥

यद्वेवेति च प्रेति चान्वाह । प्रेति वै रेतः सिच्यतऽएति प्रजायते प्रेति पशवो वितिष्ठन्तऽएति समावर्त्तन्ते सर्वं वाऽइदमेति च प्रेति च तस्माद्वा एऽति च प्रेति चान्वाह ॥६॥

सोऽन्वाह । प्र वो वाजा अभिद्यव इति तन्नु प्रेति भवत्यग्न ऽआयाहि वीतयऽइति तद्वेति भवति ॥७॥

तदु हैकऽआहुः । उभयं वाऽ एतत्प्रेति सम्पद्यतऽइति तदु तदातिविज्ञान्यमिव प्र वो वाजा अभिद्यवऽइति तन्नु प्रेत्यग्नऽआयाहि वीतयऽइति तद्वेति ॥८॥

सोऽन्वाह । प्र वो वाजा अभिद्यव इति तन्नु प्रेति भवति वाजा इत्यन्नं वै वाजा अन्नमेवैतदभ्यनूक्तमभिद्यव इत्यर्द्धमासा वा ऽअभिद्यवोऽर्द्धमासा नेवैतदभ्यनूक्तꣳ हविष्मन्त इति पशवो वै हविष्मन्तः पशूनेवै तदभ्यनूक्तम् ॥९॥

घृताच्येति । विदेघो ह माधवोऽग्निं वैश्वानरं मुखे बभार । तस्य गोतमो राहूगण ऋषिः पुरोहित आस तस्मै ह स्तामन्त्र्यमाणो न प्रतिशृणोति नेन्मेऽग्निर्वैश्वानरो मुखाद्वि-ष्पद्याताऽइति ॥१०॥

का प्रयोग करता है ॥५॥

'आ' और 'प्र' कहने का एक कारण और भी हो सकता है। 'प्र' से वीर्य सींचा जाता है। 'आ' से सन्तान उत्पन्न होती है। 'प्र' से पशु चरने के लिये जाते हैं। 'आ' से घर को लौटते हैं। वस्तुतः संसार में हर एक वस्तु आती और जाती है। इसलिये 'आ' और 'प्र' का प्रयोग करता है ॥६॥

वह कहता है 'प्र वो वाजा अभिद्यवः'। 'आप के अन्न द्यौलोक को जावें'। यह हुआ 'प्र' या जाना। अब कहता है 'अग्न आ याहि वीतये,' 'हे अग्नि, वृद्धि के लिये आ'। इससे 'आ' या आना हुआ ॥७॥

कुछ का कहना है कि इन दोनों से 'प्र' अर्थात् जाने का ही अर्थ निकलता है। परन्तु यह तो साधारण बुद्धि में आता नहीं। वस्तुतः 'प्र वो वाजा अभिद्यवः' से जाना ही अभीष्ट है और 'अग्न आया हि वीतये' से आना ॥८॥

वह (पहली सामिधेनी को) पढ़ता है 'प्र वो वाजा अभिद्यवः' इससे जाना अभिप्रेत है। वाज कहते हैं अन्न को। इसके पाठ से अन्न की प्राप्ति होती है। 'अभिद्यवः' से अर्द्धमास का अर्थ निकलता है। क्योंकि अर्द्धमास द्यौलोक को जाते हैं। अब कहता है, 'हे हवि वालो'। हवि वाले पशु होते हैं। इस प्रकार पशुओं की प्राप्ति कराता है ॥९॥

अब वह कहता है 'घृताची'। विदेघ का राजा माधव अपने मुख में वैश्वानर अग्नि रखता था। उसका राहूगण गोतम पुरोहित था। पुरोहित ने पुकारा तो यह न बोला कि कहीं मेरे मुख से अग्नि निकल न पड़े ॥१०॥

तमृग्भिर्ह्वयितु दध्रे । वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधीमहि । अग्ने बृहन्तमध्वरे विदेघेति ॥११॥

स न प्रतिशुश्राव । उदग्ने शुचयस्तव शुका भ्राजन्त ईरते । तव ज्योतीꣳष्यर्च्चयो विदेघाऽ इति ॥१२॥

स ह नैव प्रतिशुश्राव । तं त्वा घृतस्नवीमहऽइत्येवाभिव्याहरदथास्य घृतकीर्त्तावेवाग्निर्वैश्वानरो मुखादुज्जज्वाल । तन्न शशाक धारयितुꣳसोऽस्य मुखान्निष्पेदे स इमां पृथिवीं प्रापादः ॥१३॥

तर्हि विदेघो माथव आस । सरस्वत्याꣳ स तत एव प्राङ्दहन्न्गीयायेमा पृथिवीं तं गोतमश्च राहूगणो विदेघश्च माथवः पश्चाद्दहन्तमन्वीयतुः । स इमाः सर्वा नदीरतिददाह सदानीरेऽयुत्तराद्गिरेर्निर्द्धावति ताꣳ हैव नातिददाह । ताꣳ ह स्म ता पुरा ब्राह्मणा न तरन्त्यनतिदग्धाग्निना वैश्वानरेणेति ॥१४॥

तत एतर्हि । प्राचीनं बहवो ब्राह्मणास्तदाक्षेत्रतरमिवास स्रावितरमिवास्वदितमग्निना वैश्वानरेणेति ॥१५॥

तब उस पुरोहित ने उसका (ऋग्वेद ५।२६।३) से आह्वान किया—'वीति होत्र त्वा कवे द्युमन्त समिधीमहि । अग्ने बृहन्तमध्वरे' । 'हे बुद्धिमान, बड़े, प्रकाश वाले और हवन में प्रिय अग्नि ! हम तुझको यज्ञ में बुलाते हैं' हे विदेघ ॥११॥

राजा ने कुछ उत्तर नहीं दिया, तब उसने आगे पढा (ऋ० ८।४४।१७)—'उदग्ने शुचयस्तव शुका भ्राजन्त ईरते । तव ज्योतीꣳष्यर्चय' विदेघ इति 'हे अग्नि अपनी चमकीली, प्रकाश युक्त ज्योतियों को ऊपर को फेंक' । ओ विदेघ ॥१२॥

वह तब भी न बोला । तब पुरोहित ने आगे पढ़ा—'त्वा घृतस्नवीमहे चित्र भानो स्वर्दृशं देवाँ आ वीतये वह' । यह मन्त्र पूरा पढने भी न पाया "घृत' शब्द तक ही आया था कि अग्नि वैश्वानर जल उठा । वह अपने मुख में न रख सका । अग्नि उसके मुँह से निकल कर पृथ्वी पर आ पड़ा ॥१३॥

विदेघ माथव उस समय सरस्वती के किनारे पर था । उस समय अग्नि जलते-जलते पूर्व की ओर बढ़ा । गोतम राहूगण और विदेघ माथव उस जलते हुये अग्नि के पीछे-पीछे चले । अग्नि ने इन सब नदियों को सुखा दिया । एक नदी सदानीरा उत्तरी पहाड़ से निकलती है । उसे वह न सुखा सका । ब्राह्मण लोग पहले इस नदी को पार नहीं करते थे यह सोचकर कि अग्नि वैश्वानर ने इसको नहीं जलाया ॥१४॥

परन्तु आजकल बहुत से ब्राह्मण इस नदी के पूर्व की ओर रहते हैं । उस समय सदानीरा के पूर्व की भूमि ऊसर पड़ी थी । उसमें दल-दल बहुत था । क्योंकि अग्नि वैश्वानर ने उसका आस्वादन नहीं किया था ॥१५॥

तदु हैतर्हि । क्षेत्रतरमिव माहणा उ हि नूनमेनद्यज्ञैरसिष्यदन्तसापि जघन्ये नैदाघे समिवैन क्षेपयति तापच्छीतानतिदग्धा ह्यग्निना वैश्वानरेण ॥१६॥

स होवाच । विदेघो माधवः क्वाह भवानीत्यत एव ते प्राचीनं सुवनमिति होवाच सैषाप्येतर्हि कोसलविदेहाना मर्यादा ते हि माधवाः ॥१७॥

अथ होवाच । गोतमो राहूगण' कथं नु नऽआमन्त्र्यमाणो न प्रत्यश्रौषीरिति स होवाचाग्निर्मे वैश्वानरो मुखेऽभूत्स नेन्मे मुखान्निष्पद्यातै तस्मात्ते न प्रत्यश्रौषमिति ॥१८॥

तदु कथमभूदिति । यत्रैव त्व घृतस्नरीमहऽइत्यभिव्याहार्षीस्तदेव मे घृतकीर्त्यामिर्वैवैश्वानरो मुखादुद ज्वालीत्त नाशकं धारयितु श्रुस मे मुखान्निरपादीति ॥१९॥

स यत्सामिधेनीषु घृतवत् । सामिधेनमेव तत्समेवैन तेनेन्धे वीर्यमेवास्मिन्दधाति ॥२०॥

तदु घृताच्येति । देवान् जिगाति सुम्नयुरिति यजमानो वै सुम्नयुः सहि देवान् जिगीषिति सहि देवान् जिघाश्रसति तस्मादाह देवान् जिगातिसुम्नयुरिति सैषाग्नेयी सत्यनि-

अब तो यह बहुत उपजाऊ है क्योंकि ब्राह्मणों ने यज्ञ करके उसको अग्नि को चढ़ा दिया है। गर्मी के अगले दिनों में भी (यह नदी) खूब बहती है। अग्नि वैश्वानर ने इससे दग्ध नहीं किया था। अत' यहाँ ठण्डक बहुत होती है ॥१६॥

विदेघ माधव ने अग्नि से पूछा, 'मैं कहाँ रहूँ' ? 'इस नदी के पूर्व की ओर तेरा घर हो', ऐसा अग्नि ने उत्तर दिया। अब तक यह नदी कौसल और विदेह देशों के बीच की सीमा है। क्योंकि यह माधव की सन्तान हैं ॥१७॥

अब गोतम राहूगण ने राजा से पूछा, 'मैंने तुमको बुलाया। तुम क्यों नहा बोले' ? उसने कहा, 'मेरे मुँह में अग्नि वैश्वानर था। कहीं यह गिर न पड़े इसलिये मैं नहीं बोला' ॥१८॥

गोतम ने पूछा, 'फिर यह क्या हुआ' ? राजा ने उत्तर दिया, 'जब तुमने मन्त्र पढे और घी का नाम ही लिया कि अग्नि वैश्वानर जल उठा और मैं उसको मुख में न रख सका। वह पृथ्वी पर निकल पडा' ॥१९॥

इसलिये सामिधेनियों म जो घृत शब्द है वह अग्नि जलाने के लिये बडा उपयुक्त है। इन्हीं सामिधेनियो को पढकर वह अग्नि को जलाता है और यजमान को शक्ति देता है ॥२०॥

अब (वह शब्द) है 'घृताच्या', अर्थात् घी से भरे (चमचे) से। 'देवान् जिगाति सुम्नयु'। 'शान्ति का इच्छुक वह देवों के पास आता है', यजमान सुम्नयु (शान्ति का इच्छुक) है। वह देवो के पास आना चाहता है। इसीलिये कहा 'देवान् जिगाति सुम्नयु'।

रुक्का सर्वं वाऽअनिरुक्तꣳ सर्वेणैवैतत्प्रतिपद्यते ॥२१॥

अग्नऽआयाहि वीतयऽइति । तद्वेति भवति वीतयऽइति समन्तिक्रमिव ह वाऽइमेऽमे लोका आसुरित्युन्मृश्या हैव वीरास ॥२२॥

ते देवा अकामयन्त । कथ नु ने इम लोका नितराꣳ स्युः कथं न इदं वरीय—इव स्यादिति तानेतैरेव त्रिभिरक्षरैर्व्यनयन् वीतयऽइति तऽइमे विदूरं लोकास्ततो देवेभ्यो वरीयोऽमवद्वरीयो ह वाऽअस्य भवति यस्यैवं विदुष एतामन्याहुर्वीतयऽइति ॥२३॥

गृणानो हव्य दातयऽइति । यजमानो वै हव्यदातिर्गृणानो यजमानायेत्येवैतदाह निहोता सत्सि बर्हिषीत्यग्निर्वै होतायं लोको बर्हिरस्मिन्नेवैतल्लोकेऽग्निं दधाति सोऽयमस्मिल्लोकेऽग्निर्हितः सैषेममेव लोकमभ्यनूक्तेममेवैतया लोकं जयति यस्यैवं विदुष एतामन्वाहुः ॥२४॥

तं त्वा समिद्भिरङ्गिर इति । समिद्भिर्ह्येतमङ्गिरस पेन्धताङ्गिर इत्यङ्गिरा उ ह्यग्निर्घृतेन वर्द्धयामसीति तत्सामिधेन पदꣳ समेवैन तेनेन्धे वीर्यमेवास्मिन्दधाति ॥२५॥ शतम् ॥१००॥

यह आग्नेयी ऋचा अनिरुक्त (अनियत) है । 'सब' भी अनियत होता है । अतः अनिरुक्त ऋचा पढ़कर 'सब' का सम्पादन करता है ॥२१॥

अब कहता है कि, 'अग्न आयाहि वीतये', 'अग्नि यज्ञ की वृद्धि के लिये आ' (यह दूसरी सामिधेनी है) वृद्धि या फैलाव के लिये । पहले लोक मिले हुये थे । हम आकाश को इस प्रकार (हाथ बढ़ाकर) छू सकते थे ॥२२॥

देवों ने चाहा, 'यह लोक दूर-दूर कैसे हो ? कैसे हमको अधिक आकाश मिले' । यह कहकर उन्होंने यह तीन अक्षरों का 'वीतये' शब्द उच्चारण किया । यह कहते ही लोक दूर दूर हो गये । देवों को दूर-दूर जगह मिल गई । जो इस रहस्य को समझ कर 'वीतये' कहता है उसके लिये भी दूर-दूर अवकाश मिल जाता है ॥२३॥

जब वह कहता है 'गृणानो हव्य दातये' । 'हव्य देने वाले के लिये' । हव्य देने वाला यजमान है । यजमान के लिये ही यह कहा गया । 'निहोता सत्सि बर्हिषि' । 'होता आसन पर बैठता है । 'होता' अग्नि है । बर्हि से आच्छादित वेदी आसन है । यह जगत् बर्हि है । अग्नि को इस जगत् में स्थापित करता है । जगत् के कल्याण के लिये अग्नि यहाँ स्थापित की जाती है । जो इस रहस्य को समझता है और जिसके लिये यह सामिधेनी पढ़ी जाती है उसकी इस लोक में विजय होती है ॥२४॥

(अब तीसरी सामिधेनी) 'त त्वा समिद्भिरङ्गिर.' 'अङ्गिरस, तेरे लिये समिधाओं से' । आंगिरस अग्नि है 'घृतेन वर्द्धयामसि' घी से हम बढ़ाते हैं । 'घृत' अग्नि जलाने के लिये बहुत उपयुक्त शब्द है । उसी अग्नि को प्रज्वलित करते हैं, और यज्ञ को शक्ति देते हैं ॥२५॥

बृहच्छोचा यविष्ठ्येति । बृहदुह्येष शोचति समिद्धो यविष्ठ्येति यविष्ठो ह्यग्निस्तस्मादाह यविष्ठ्येति सैषैतमेव लोकमभ्यनूक्तान्तरिक्षलोकमेव तस्मादाग्नेयी सत्यनिरुक्तानिरुक्तो ह्येष लोक एतमेवैतया लोकं जयति यस्यैवं विदुष एतामन्वाहुः ॥२६॥

स नः पृथु श्रवाय्यमिति । अदो वै पृथु यस्मिन्देवा एतच्छ्रवाय्यं यस्मिन्देवा अच्छा देव विवाससीत्यच्छ देव विवाससीत्येतन्नो गमयेत्येवैतदाह ॥२७॥

बृहदग्ने सुवीर्यमिति । अदो वै बृहद्यस्मिन्देवा एतत्सुवीर्यं यस्मिन् देवाः सैषैतमेव लोकमभ्यनूक्ता दिवमेवैतमवैतया लोकं जयति यस्यैवं विदुष एतामन्वाहुः ॥२८॥

सोऽन्वाह । ईडेन्यो नमस्य इतीडेन्यो ह्येष नमस्यो ह्येष तिरस्तमाꣳसि दर्शत इति तिर—इव ह्येष तमाꣳसि समिद्धो ददृशे समग्निरिध्यते वृषेत सꣳ ह्येष्यते वृषा वृषोऽग्निः समिध्यतऽइति सꣳहीध्यते ॥२९॥

अश्वो न देववाहन इति । अश्वो ह वाऽएष भूत्वा देवेभ्यो यज्ञं वहति यद्वै नेत्र्योमिति तत्तत्समादाहाश्वो न देववाहन इति ॥३०॥

'बृहच्छोचा यविष्ठ्य', 'तू सब से छोटी, बहुत चमकदार है' । समिधा बहुत चमकती है । यह ही सब से कम आयु की अग्नि है । इसीलिये उसको 'यविष्ठ्य' कहा । यह ऋचा उस लोक अर्थात् अन्तरिक्ष के लिये कही गई । अतः आग्नेयी होते हुये अनिरुक्त है । जो इस रहस्य को समझता है और जिसके लिये यह सामिधेनी पढ़ी जाती है उसको इस लोक में विजय प्राप्त होती है ॥२६॥

(अब चौथी सामिधेनी) 'स नः पृथु श्रवाय्यम्' । वह तू हमारे लिये चौड़ा-चकला और प्रकाश युक्त अवकाश प्राप्त कर' । वह लोक जिसमें देवता रहते हैं चौड़ा-चक्ला और चमकदार है । 'अच्छा देव विवाससि' अर्थात् 'मैं उस लोक को जाऊँ' ॥२७॥

'बृहदग्ने सुवीर्यम्' 'हे अग्नि, वह बड़ा और शक्तिशाली' । वह बडा लोक है जिसमें देव रहते हैं । वह शक्तिशाली लोक है जिसमे देव निवास करते हैं । इसी लोक के अभिप्राय से यह कहा गया । जो इस रहस्य को समझता है और जिसके लिये सामिधेनी पढ़ी जाती है उसको इस लोक में विजय प्राप्त होती है ॥२८॥

(पाँचवीं सामिधेनी) 'ईडेन्या नमस्य' । 'स्तुति और नमस्कार के योग्य' । यह स्तुत्य भी है और नमस्य भी । 'तिरस्तमासि दर्शत' । अन्धकार में होकर चमकता है' । अग्नि जब जलता है तो अन्धकार में होकर चमकता है । 'समग्निरिध्यते वृषा' 'बलवान अग्नि प्रज्वलित होता है' । बलवान अग्नि है यह, प्रज्वलित भी होता है (समग्नि—यहाँ से छठी सामिधेनी आरम्भ होती है) ॥२९॥

'अश्वो न देववाहन' वह अग्नि अश्व या घोडा होकर देवों को हवि ले जाता है । यहाँ 'न' का अर्थ है 'ओ३म्' । इसका अर्थ है कि वस्तुतः वह अश्व बनकर हवि को ले जाता है ॥३०॥

तꣳ हविष्मन्त ईडतऽइति । हविष्मन्तो ह्येतं मनुष्या ईडते तस्मादाह तꣳ हविष्मन्त ईडतऽइति ॥३१॥

वृषणं त्वा वयं वृषन्वृषणः समिधीमहीति । सꣳ ह्येनमिन्धतेऽग्ने दीदयं बृहदिति दीदयेव ह्येष बृहत्समिद्धः ॥३२॥

तं वाऽएतम् । वृषण्वन्तं त्रिचमन्वाहाग्नेय्यो वाऽएताः सर्वाः सामिधीन्यो भवन्तीन्द्रो वै यज्ञस्य देवतेन्द्रो वृषैतेनो ह्यस्यैताः सेन्द्राः सामिधेन्यो भवन्ति तस्माद्वृषण्वन्तं त्रिचमन्वाह ॥३३॥

सोऽन्वाह अग्निं दूतं वृणीमहऽइति देवाश्च वाऽअसुराश्चोभये प्राजापत्याः पस्पृधिरे तान्त्स्पर्धमानानायन्त्यन्तरा तस्थौ या वै सा गायत्र्यासीदियं वै सा पृथिवीयꣳ हैव तदन्तरा तस्थौ त ऽउभयऽएव विदाञ्चक्रुर्यतरान्वै न इयमुपावर्त्स्यति ते भविष्यन्ति परेतरे भविष्यन्तीति तामुभयऽएवोपमन्त्रयाञ्चक्रिरेऽग्निरेव देवानां दूत आस सहरक्षा इत्यसुररक्षसमसुराणाꣳ सान्निमेवानुप्रेयाय तस्मादन्वाहाग्निं दूतं वृणीमहऽइति रा हि देवानां दूत आसीद्धोतारं विश्ववेदसमिति ॥३४॥

'त हविष्मन्त ईडत' उसको हवि वालो पूजो' मनुष्य हवि वाले हैं। वह अग्नि को पूजते हैं। इसलिये कहा 'त हविष्मन्त ईडत' ॥३१॥

(सातवीं सामिधेनी) 'वृषणः त्वा वय वृषन् वृषणः समिधीमहि' 'अग्ने दीद्यत बृहत्'। 'हम शक्तिशाली तुझ शक्तिशाली को प्रज्वलित करते हैं। हे अग्ने, तू बहुत चमकने वाला है' क्योंकि जब वह प्रज्वलित किया गया, वह वस्तुतः बहुत चमका ॥३२॥

इस तृच् (तीन ऋचाओं के समूह) को पढ़ता है जिसमें 'वृषण्' (बलवान) शब्द आया है। यह सब सामिधेनियाँ अग्नि देवता की होती हैं। परन्तु यज्ञ का देवता 'इन्द्र' है। और वह 'वृषण्' (बलवान) है। अतः वृषण् शब्द आने से यह तृच् इन्द्र देवता का हो जाता है। इसलिये 'वृषण्' वाली तीन ऋचाओं को पढ़ता है ॥३३॥

(अब आठवीं सामिधेनी को) 'अग्नि दूत वृणीमहे' 'अग्नि दूत का वरण करते हैं'। प्रजापति की सन्तान देव और असुर प्रभुत्व के लिये लड पडे। गायत्री बीच में पड़ गई। जो गायत्री थी वही यह पृथ्वी है। यही पृथ्वी उन देवों के बीच में थी। वे जानते थे कि जिधर को यह रहेगी, वही पक्ष जीत जायगा, और दूसरा पक्ष पराजित होगा। अतः उन दोनों दलों ने चुपके-चुपके उसको अपनी ओर मिल जाने के लिये निमंत्रण दिया। देवों का दूत बनी अग्नि, और असुर राक्षसों का एक राक्षस जिसका नाम था 'सहरक्ष'। यह गायत्री (या पृथ्वी) अग्नि के साथ चली गई। इसलिये कहते हैं 'हम अग्नि दूत वरण करते हैं' अग्नि ही दूत था। इसलिये कहा, 'होतारं विश्ववेदसम्'। अर्थात् अग्नि होता थो जो सब कुछ जानने वाला है ॥३४॥

तदु हैकेऽन्वाहुः होता यो विश्ववेदस इति नेदरमित्यात्मानं ब्रवाणीति तदु तथा न ब्रूयान्मानुषꣳ ह ते यथे कुर्वन्ति व्यृद्धं वै तद्यज्ञस्य यन्मानुषं नेदव्यृद्धं यज्ञे करवाणीति तस्माद्यथैवर्चानूक्तमेवानूब्रूयाद्धोतारं विश्ववेदसमित्येवास्य यज्ञस्य सुकृतमित्येष हि यज्ञस्य सुकृतुर्यदग्निस्तस्मादाहास्य यज्ञस्य सुकृतमिति रोयं देवानुपावर्त्त ततो देवा अभवन्परासुरा भवति ह त्वाऽऽत्मना परास्य सपत्ना भवन्ति यस्यैवं विदुष एतामन्वाहुः ॥३५॥

तां वाऽअष्टमीमनूब्रूयात् । गायत्री वाऽएषा निदानेनाष्टाक्षरा वै गायत्री तस्मादष्टमीमनूब्रूयात् ॥३६॥

तेऽदैके । पुरस्ताद्धाय्ये दधत्यन्नं धाय्ये मुखतऽइदमन्नाद्यं दध्म इति वदन्तस्तदु तथा न कुर्य्यादनवक्लृप्ता तस्यैषा भवति यः पुरस्ताद्धाय्ये दधाति दशमी वा हि तर्ह्येकादशी वा सम्पद्यते तस्यो हैवैषावक्लृप्ता भवति यस्यैतामष्टमीमन्वाहुस्तस्मादुपरिष्टादेव धाय्ये दध्यात् ॥३७॥

समिध्यमानो ऽअध्वरऽइति । अध्वरो वै यज्ञः समिध्यमानो यज्ञऽइत्येवैतदाहाग्निः

कुछ लोग मंत्र में थोड़ा सा परिवर्तन करके ऐसा कहते हैं 'होता यो विश्ववेदसः'। अर्थात् होता जो सब कुछ जानने वाला है। इसका कारण यह है कि वह 'होतारं' के दो टुकड़े कर देते हैं 'होता + अरम्' 'अरम्' का अर्थ 'अलम्' (बस इतना ही) भी होता है। (याज्ञवल्क्य का कहना है कि) ऐसा नहीं करना चाहिये। वेद मंत्र में परिवर्तन कर देने से भाषा मानुषी हो जाती है। यज्ञ में मानुषी भाषा को अशुभ समझा जाता है अतः जैसा वेद मन्त्र में आया है वैसा ही बोलना चाहिये अर्थात् 'होतार विश्ववेदसम्'।

अब आगे कहता है—'अस्य यज्ञस्य सुकृतुः'। 'इस यज्ञ को अच्छी प्रकार करने वाला'। क्योंकि अग्नि यज्ञ का सुकृतुः है।

गायत्री ने देवों का साथ दिया था। वह जीत गये। असुर हार गये। जो इस रहस्य को समझता है और जिसके लिये यह ऋचा पढ़ी जाती है वह जीत जाता है और शत्रु उसका पराजित हो जाता है ॥३५॥

इसीलिये वह इस (आठवीं सामिधेनी) को पढ़ता है। यह विशेष रीति से गायत्री है क्योंकि गायत्री में आठ अक्षर होते हैं। इसीलिये वह इस आठवीं सामिधेनी का पाठ करता है ॥३६॥

कुछ लोग आठवीं सामिधेनी से पहले दो 'धाय्य' पढ देते हैं। वे कहते हैं कि धाय्य अन्न हैं। हम अन्न को मुख में रख देते हैं परन्तु ऐसा नहीं करना चाहिये। क्योंकि ऐसा करने से आठवीं सामिधेनी का स्थान हट जाता है और आठवीं और नवमी सामिधेनी दसवीं और ग्यारहवीं हो जाती है। यह आठवीं सामिधेनी का ही उचित स्थान है। इसलिये दो धाय्यों को नवमी सामिधेनी के पीछे रखना चाहिये ॥३७॥

(अब नवमी सामिधेनी पढ़ता है) 'समिध्यमानो अध्वरः' 'यज्ञ में जलती हुई'।

पावक ईड्य इति पावको ह्येष ईड्यो ह्येष शोचिष्केशस्तमीमहऽइति शोचन्तीव ह्येतस्य केशाः समिद्धस्य समिद्धोऽग्नऽआहुतेत्यतः प्राचीनꣳ सर्वमिध्ममभ्यादध्याद्यदन्यत्समिधोऽपवृङ्क्तऽइव ह्येतद्धोता यद्वाऽअन्यत्समिध इध्मस्यातिरिच्यतेऽतिरिक्तं तद्यद्वै यज्ञस्यातिरिक्तं द्विपन्तꣳ हारय तद्आहृव्यमभ्यतिरिच्यते तस्मादतः प्राचीनꣳ सर्वमिध्ममभ्यादध्याद्यदन्यत्समिधः ॥३८॥

देवान्यक्षि स्वध्वरेति । अध्वरो वै यज्ञो देवान्यक्षि सुयक्षियेत्येवैतदाह त्वꣳ हि हव्यवाडसीत्येष हि हव्यवाड्यदग्निस्तस्मादाह त्वꣳ हि हव्यवाडसीत्या जुहोता दुवस्यताग्निं प्रयत्यध्वरे । वृणीध्वꣳ हव्यवाहनमिति सम्प्रेष्यत्येवैतयाजुहुत च यजत च यस्मै कामाय समैन्धिढ्वं तत्करुतेत्येवैतदाहाग्निं प्रयत्यध्वरऽइत्यध्वरो वै यज्ञोऽग्निं प्रयति यज्ञऽइत्येवैतदाह वृणीध्वꣳ हव्यवाहनमित्येष हि हव्यवाहनो यदग्निस्तस्मादाह वृणीध्वꣳ हव्यवाहनामिति ॥३९॥

तं वाऽएतम् । अध्वरवन्तं त्रिचमन्वाह देवान्ह वै यज्ञेन यजमानान्तसपत्ना असुरा दुर्धर्षाञ्चक्रुस्ते दुर्धर्षन्त एव न शेकुर्जेतुं ते पराबभूवुस्तस्माद्यज्ञोऽध्वरो नाम दुर्धर्षन्ह

अध्वर यज्ञ को कहते हैं। उसमें जो प्रज्वलित होता है वह अग्नि है। 'पावकः ईड्यः'। यह पवित्र भी है और स्तुत्य भी। 'शोचिष्केशस्तमीमहे'। 'चमकदार केश वाले तुझको हम बुलाते हैं'। इसके केश चमकते हैं। दसवीं सामिधेनी अर्थात् 'समिद्धस्य समिद्धोऽग्ने' ऐसा कहने से पूर्व सब समिधाओं को अग्नि पर रख दे, सिवाय एक के। क्योंकि यहाँ होता अग्नि-प्रज्वालन काम समाप्त करता है। अब जो एक समिधा बच रही, इसका नियम यह है कि जो यज्ञ से बच रहे वह शत्रु का होता है। इसलिये इस सामिधेनी से पहले-पहले एक बचाकर अन्य सब समिधायें रख देनी चाहिये ॥३८॥

अब वह कहता है 'देवान्यक्षि स्वध्वर'। 'हे अच्छे अध्वर्यु, देवों की पूजा कर'। 'अध्वर' का अर्थ है यज्ञ। तात्पर्य यह है कि अच्छे अध्वर, देवों की पूजा कर'। 'त्वं हि हव्यवाडसि', 'तू हव्य का ले जाने वाला है'। अब अन्तिम सामिधेनी पढ़ता है 'आ जुहोता दुवस्यताग्निं प्रयत्यध्वरे। वृणीध्व हव्यवाहनम्'। 'यज्ञ में अग्नि की पूजा करो। हव्य ले जाने वाले का वरण करो'। अग्नि वस्तुतः हव्यवाट् है। इसीलिये कहा 'अग्नि तू हव्यवाट् है'। वह अन्तिम सामिधेनी को पढता है—'आ जुहोता दुवस्यताग्नि प्रयत्यध्वरे। वृणीध्वꣳहव्यवाहनम्'। आहुति दो। अग्नि की पूजा करो, जब यज्ञ हो रहा हो। हव्य को ले जाने वाले का वरण करो'। इसका अर्थ यह है कि आहुति दो, पूजा करो अर्थात् जिस कामना के लिये यज्ञ रचा है उसकी पूर्ति करो। अग्नि हव्य का ले जाने वाला है। इसलिये कहा 'वृणीध्व हव्यवाहनम्' ॥३९॥

'अध्वर' शब्द वाले तृच (तीन ऋचाओं के समूह) को पढ़ता है। जब देव यज्ञ कर रहे थे तो उनके शत्रु असुरों ने उस यज्ञ का विध्वंस करना चाहा 'दुर्धर्षाञ्चक्रुः'। परन्तु

वाऽएनꣳ सपत्नः पराभवति यस्यैवं विदुषोऽध्वरवन्तं क्रिचमन्वाहुर्य्यन्नद्वेव सौम्येनाध्वरेणेष्ट्वा जयति तायज्जयति ॥४०॥ ब्राह्मणम् ॥३॥ [४. १.] ॥

क्रिचम की इच्छा करते हुये भी वह क्रिचम न कर सके। वे हार गये। इसलिये यज्ञ का नाम अध्वर हुआ (न शेकुर्यूचितम्)। जो इस रहस्य को समझता है और अध्वर शब्द वाले तृच् को पढ़ता है उसके शत्रु उसका क्रिचम चाहते हुये भी उसका विध्वस नहीं कर सकते। वे परास्त हो जाते हैं। वह सौम्य-अध्वर को करके विजय प्राप्त कर लेता है। जीत जाता है। (सौम्येन अध्वरेण = सोमयाग सम्बन्धी अध्वर) ॥४०॥

अध्याय ४—ब्राह्मण १

एतद्ध वै देवा अग्निं गरिष्ठेऽयुञ्जन्। यद्धोतृत्वऽइदं नो हव्यं वहेति तमेतद्गरिष्ठे युक्त्वोपामदन्वीर्यवान्वै त्वमस्यलं वै त्वमेतस्माऽअसीति वीर्ये समादधतो यथेदमप्येतर्हि ज्ञातीनां यं गरिष्ठे युञ्जन्ति तमुपमदन्ति वीर्यवान्वै त्वमस्यलं वै त्वमेनस्माऽअसीति वीर्ये समादधतः स यदत ऊर्ध्वमन्वाहोपस्तौत्येवैनमेतद्वीर्यमेवास्मिन्दधाति ॥१॥

अग्ने महाँऽअसि ब्राह्मण भारतेति। ब्रह्म ह्यग्निस्तस्मादाह ब्राह्मणेति भारतेत्येष हि देवेभ्यो हव्यं भरति तस्माद्भरतोऽग्निरित्याहुरेष उ वा ऽइमाः प्रजाः प्राणो भूत्वा बिभर्त्ति तस्माद्देवाह भारतेति ॥२॥

अथार्षेयं प्रवृणीते। ऋषिभ्यश्चैवैनमेतद्देवेभ्यश्च निवेदयत्ययं महावीर्यो यो यज्ञं

पहले देवों ने अग्नि को मुख्य होता के पद पर नियुक्त किया, और उसको इस मुख्य पद पर नियुक्त करके कहा, 'तू हमारी हवि को ले जा' और यह कहकर बड़ाई करने लगे, 'निश्चय करके तू वीर्यवान है। 'निश्चय करके तू इस काम के योग्य है'। इस प्रकार उसको बल देते हुये जैसा कि आजकल की जातियों में जब किसी को मुख्य पद पर चुनते हैं तो यह कहकर बड़ाई करते हैं, 'आप वीर्यवान हैं, आप योग्य हैं, आप इसी कार्य के लिये हैं'। और उसको बल-सम्पन्न करते हैं। इसलिये जो कुछ पढ़कर वह उसकी बड़ाई करता है, मानो उसकी स्तुति करता है अर्थात् उसको बल से सम्पन्न करता है ॥१॥

वह स्तुति यह है—'अग्ने महाँऽअसि ब्राह्मण भारत'। 'हे ब्राह्मण, भारत, अग्नि तू बड़ा है'। अग्नि ब्रह्म है इसलिये कहा 'ब्राह्मण'। 'भारत' इसलिये कहा कि यही देवों के लिये हव्य रखता है (भरति)। इसलिये कहता है 'अग्नि भारत है'। इन प्रजाओं का प्राण बन कर पोषण करता है इसलिये भारत है ॥२॥

अब वह (अग्नि को) आर्ष होता चुनता है। (अर्थात् ऋषियों की शैली के

प्रापदिति तस्मादार्षेयं प्रवृणीते ॥३॥

परस्तादर्वाक्प्रणीते । परस्ताद्धवर्वाच्यः प्रजाः प्रजायन्ते ज्यायसस्पतयऽउ चैवैतं निह्नुतऽइदꣳ हि पितैवाग्रेऽथ पुत्रोऽथ पौत्रस्तस्मात्परस्तादर्वाक् प्रवृणीते ॥४॥

स आर्षेयमुक्त्वाह । देवेद्धो मन्विद्ध इति देवा ह्येतमग्रऽऐन्धत तस्मादाह देवेद्ध इति मन्विद्ध इति मनुर्ह्येतमग्र ऽऐन्द्ध तस्मादाह मन्विद्ध इति ॥५॥

ऋषिष्टुत इति । ऋषयो ह्येतमग्रेऽस्तुवंस्तस्मादाहर्षिष्टुत इति ॥६॥

विप्रानुमदित इति । एते वै विप्रायद्ग्रय एते ह्येतमन्वमदंस्तस्मादाह विप्रानुमदित इति ॥७॥

कविशस्त इति एते वै कवयो यद्ग्रय एते ह्येतमशꣳसंस्तस्मादाह कविशस्त इति ॥८॥

ब्रह्मसꣳशित इति । ब्रह्मसꣳशितो ह्येष घृताहवन इति घृताहवनो ह्येषः ॥९॥

प्रणीर्यज्ञानाꣳ रथीरध्वराणामिति । एतेन वै सर्वान्यज्ञान्प्रणयन्ति ये च पाकयज्ञा

अनुसार । इस प्रकार वह ऋषियों और देवों से उसका परिचय कराता है (निवेदयति) 'यह महावीर्य है जो यज्ञ को कराता है' । यही कारण है कि यह (अग्नि को) आर्ष होता बनाता है ॥३॥

वह अति पुराने से नये तक का वरण करता है (अर्थात् ऋषियों में सबसे प्रथम से लेकर पीढ़ी-पर-पीढ़ी आज तक के ऋषि का वरण करता है) क्योंकि प्राचीन से ही तो नई पीढ़ी उत्पन्न होती है । इस प्रकार वह सबसे बड़े को नियुक्त करता है । क्योंकि पहले पिता होता है, फिर पुत्र, फिर पौत्र । इसलिये पूर्वजों से लेकर नई पीढ़ी तक का वरण करता है ॥४॥

उसको आर्ष होता बनाकर कहता है—'देवेद्धो मन्विद्धः' । 'तुझे देवों ने प्रज्वलित किया, तुझे मनु ने प्रज्वलित किया' । देवों ने पहले इसे जलाया । इसलिये कहा 'देवेद्धः' । मनु ने पहले इसे जलाया इसलिये कहा 'मन्विद्धः' ॥५॥

अब कहता है—'ऋषिष्टुत' । 'ऋषियों से स्तुति किया गया' । पहले ऋषियों ने ही इसकी स्तुति की । इसलिये इसको कहा, 'ऋषिष्टुत' ॥६॥

अब कहा—'विप्रानुमदित' । 'विप्रों से प्रसन्न किया गया' । यह विप्र ऋषि ही थे जिन्होंने उसे प्रसन्न किया । इसलिये कहा 'विप्रानुमदित' ॥७॥

अब कहा—'कविशस्त' । 'कवियों से प्रशंसित' । यह कवि ऋषि ही थे जिन्होंने इसकी प्रशंसा की । इसलिये कहा 'कविशस्त' ॥८॥

अब कहा—'ब्रह्मसꣳशित' । 'वेद से प्रशंसित' । क्योंकि वह ब्रह्म अर्थात् वेद मंत्रों से प्रशंसित होता है । 'घृताहवन' भी कहा क्योंकि यह घी को लेता है ॥९॥

अब कहा—'प्रणीर्यज्ञानाꣳ रथीरध्वराणम्' । 'यज्ञों का प्राणी और अध्वरों का

ये चेतरे तस्मादाह प्रणीर्यज्ञानामिति ॥१०॥

रथीरध्वराणामिति । रथा ह वाऽएष भूत्वा देवेभ्यो यज्ञ वहति तस्मादाह रथीरध्वराणामिति ॥११॥

अतूर्त्तो होता तूर्णिर्हव्यवाडिति । न ह्येतश्च रक्षाश्चसि तरन्ति तस्मादाहातूर्त्तो होतेति तूर्णिर्हव्यवाडिति सर्वश्च ह्येष पाप्मान तरति तस्मादाह तूर्णिर्हव्यवाडिति ॥१२॥

आस्पात्र जुहूर्देवानामिति । देवपात्र वाऽएष यदग्निस्तस्मादग्नौ सर्वेभ्यो देवेभ्यो जुह्वति देवपात्रञ्च ह्येष प्राप्नोति ह वै तस्य पात्र यस्य पात्र प्रेप्सति य एवमेतद्वेद ॥१३॥

चमसो देवपान इति । चमसेन ह वाऽएतेन भूतेन देवा भक्षयन्ति तस्मादाह चमसो देवपान इति ॥१४॥

अरो२॥ ऽइवाग्ने नेमिर्देवास्त्व परिभूरसीति । यथाराऽनेमि. सर्वत परिभूरेव त्वं देवाऽन्त्सर्वतः परिभूरसीत्येवैतदाह ॥१५॥

आवह देवान्यजमानायेति । तदस्मै यज्ञाय देवानावोढवाऽआहाग्निमग्नऽआवहेति तदाग्नेयायाज्यभागायाग्निमावोढवाऽआह सोममावहेति तत्सौम्यायाज्यभागाय सोममा-

रथी' । इसी से सब यज्ञों को प्राण देते हैं अर्थात् पाक-यज्ञ (खाना पकाने के यज्ञ) को और दूसरे यज्ञों को । इसलिये कहा, 'प्रणीर्यज्ञानाम्' ॥१०॥

'रथीरध्वराणाम्'—रथ बनकर देवों के यज्ञ को ले जाता है । इसलिये कहा, 'रथीरध्वराणाम्' ॥११॥

अब कहा—'अतूर्त्तो होता तूर्णिर्हव्यवाट्' । 'अतूर्त्तो होता तूर्णिर्हव्यवाट्' । इसको राक्षस नहीं रोक सकते, इसलिये कहा 'अतूर्त अर्थात् न रुकने वाला होता' । सब पापियों को परास्त कर देता है इसलिये कहा 'तूर्णिर्हव्यवाट्' । अर्थात् ऐसा हव्य ले जाने वाला जो दूसरों को परास्त कर देता है ॥१२॥

अब कहा—'आस्पात्र जुहूर्देवानाम्' । 'देवों के खाने की थाली या मुख-पात्र । यह अग्नि जो है वह देवों का पात्र है । इसलिये अग्नि में सब देवों के लिये हवि देते हैं, क्योंकि वह देवपात्र है । निश्चय करके जो इस बात को जानता है वह उसके पात्र को ले लेता है जिसके पात्र को वह चाहता है ॥१३॥

अब कहा—'चमसो देवपान' । 'देवों के पीने का चमचा' । इसी चमचे अर्थात् अग्नि से देव भोजन करते हैं इसलिये इसको कहा, 'देवपान' ॥१४॥

अब कहा—'अराँऽइवाग्ने नेमिर्देवास्त्व परिभूरसि' । 'हे अग्नि जिस प्रकार पहिये की परिधि अरों के चारों ओर लगी रहती है उसी प्रकार तू देवों के चारों ओर है' ॥१५॥

अब कहा—'आवह देवान् यजमानाय' । 'देवों को यजमान के लिये बुला' । यह इसलिये कहा कि अग्नि देवों को यज्ञ के लिये बुलावे । अब कहा—'अग्निमग्नऽआवह' । 'हे अग्नि ! अग्नि को बुला' । यह इसलिये कहा कि अग्नि के लिये जो 'आयाज्य भाग' था

अध्याय ४—ब्राह्मण ३

यो ह वा ऽग्निः सामिधेनीभिः समिद्धः । अतितराꣳ ह वै स इतरस्मादग्नेस्तपत्यनवधृष्यो हि भवत्यनवमृश्यः ॥१॥

स यथा हैवाग्निः । सामिधेनीभिः समिद्धस्तपत्येवꣳ हैव ब्राह्मणः सामिधेनीर्विद्वाननुब्रुवंस्तपत्यनवधृष्यो हि भवत्यनवमृश्यः ॥२॥

सोऽन्वाह । प्रव इति प्राणो वै प्रवान्प्राणमेवैतया समिन्द्धेऽग्नऽआयाहि वीतयऽइत्यपानो वाऽएतवा नपानमेवैतया समिन्द्धे वृहच्छोचा यविष्ठ्येत्युदानो वै बृहच्छोचा उदानमेवैतया समिन्द्धे ॥३॥

स नः पृथु श्रवाय्यमिति । श्रोत्रं वै पृथु श्रवाय्यꣳ श्रोत्रेण हीदमुरु पृथु शृणोति श्रोत्रमेवैतया समिन्द्धे ॥४॥

ईडेन्यो नमस्य इति । वाग्वाऽइडेन्या वाग्वीदꣳ सर्वमीट्टे वाचेदꣳ सर्वमीडितं वाचमेवैतया समिन्द्धे ॥५॥

जो अग्नि सामिधेनियों द्वारा जलाई जाती है वह अन्य अग्नियों से अधिक चमकती है क्योंकि वह 'अनवधृष्य' है अर्थात् उस पर कोई आक्रमण नहीं कर सकता। और वह 'अनवमृश्य' है अर्थात् उसे कोई बुझा नहीं सकता ॥१॥

जैसे सामिधेनियों द्वारा जलाई गई अग्नि चमकती है। इसी प्रकार वह ब्राह्मण भी चमकता है जो सामिधेनियों को जानता और बोलता है। क्योंकि वह 'अनवधृष्य' और 'अनवमृश्य' हो जाता है। (अर्थात्) कोई उस पर आक्रमण नहीं कर सकता और न उसे पराजित कर सकता है ॥२॥

अब वह कहता है 'प्रव' (पहली सामिधेनी)। 'प्राण' शब्द में 'प्र' अक्षर आता है। इस सामिधेनी द्वारा वह 'प्राण' को ही प्रज्वलित करता है। अब कहा—'अग्नऽआयाहि वीतये'। (दूसरी सामिधेनी) 'अपान' ऐसा ही है। इससे वह 'अपान' को प्रज्वलित करता है। अब कहा—'बृहच्छोचा यविष्ठ्य'। (तीसरी सामिधेनी) 'उदान ही बृहच्छोचा' है। इससे वह 'उदान' को प्रज्वलित करता है ॥३॥

अब कहा—'स नः पृथु श्रवाय्यम्'। (चौथी सामिधेनी) कान ही 'पृथु श्रवाय्य' है। क्योंकि कान से ही निकट और दूर का सुनते हैं। इससे कान को ही प्रज्वलित करता है ॥४॥

अब कहा—'ईडेन्यो नमस्य'। (पाँचवीं सामिधेनी) वाणी ही 'ईडेन्य' है। वाणी ही इस सब की स्तुति करती है। वाणी ही से इस सब की स्तुति की जाती है। इससे वाणी को ही प्रज्वलित करता है ॥५॥

यद्यष्टम्यामनुव्याहरेत् । तं प्रति ब्रूयान्मध्यं वाऽएतत्प्राणमात्मनोऽग्नावाधा मध्येन प्राणेनात्मन आर्तिमार्च्छिष्यस्युद्ध्याय मरिष्यसीति तथा हैव स्यात् ॥१८॥

यदि नवम्यामनुव्याहरेत् तं प्रति ब्रूयाच्छिश्नं वाऽएतदात्मनोऽग्नावाधाः शिश्नेनात्मन आर्तिमार्च्छिष्यसि क्लीबो भविष्यसीति तथा हैव स्यात् ॥१९॥

यदि दशम्यामनुव्याहरेत् । तं प्रति ब्रूयादवाञ्चं वाऽएतत्प्राणमात्मनो ऽग्नावाधा अवाचा प्राणेनात्मन आर्त्तिमार्च्छिष्यस्यपिनद्धो मरिष्यसीति तथा हैव स्यात् ॥२०॥

यद्येकादश्यामनुव्याहरेत् । तं प्रति ब्रूयात्सर्वं वाऽएतदात्मानमग्नावाधाः सर्वेणात्मनार्त्तिमार्च्छिष्यसि क्षिप्रेऽमुं लोकमेष्यसीति तथा हैव स्यात् ॥२१॥

स यथा हैवाग्निꣳ । सामिधेनीभिः समिद्धमापद्यार्तिं न्येत्येवꣳ हैव ब्राह्मणꣳ सामिधेनीर्विद्वाꣳसꣳ समनुब्रुवन्तमनुव्याहृत्यार्त्तिं न्येति ॥२२॥
ब्राह्मणम् ॥५॥ [४. ३.] ॥

अगर आठवीं सामिधेनी पढ़ते समय बुरा कहे तो उससे कहना चाहिये कि तूने अपने मध्य प्राण को आग में डाल दिया । तुझे इस मध्य प्राण से पीड़ा होगी । तू इससे मर जायगा । और ऐसा ही होगा भी ॥१८॥

अगर नवीं सामिधेनी को पढ़ते समय बुरा कहे तो उससे कहना चाहिये कि तूने अपने शिश्न को आग में डाल दिया । तुझे इससे पीड़ा होगी, तू नपुंसक हो जायगा । और ऐसा ही होगा भी ॥१९॥

अगर दसवीं सामिधेनी को पढ़ते समय बुरा कहे तो उससे कहना चाहिये कि तूने अपने निचले प्राण को अग्नि में डाल दिया । इस अपने निचले प्राण से तुझे पीड़ा होगी । तू कम से मर जायगा और ऐसा ही होगा भी ॥२०॥

अगर ग्यारहवीं सामिधेनी को पढ़ते समय बुरा कहे तो उससे कहना चाहिये कि तूने अपना शरीर आग में डाल दिया । तुझे इस अपने शरीर से पीड़ा होगी । इससे तू शीघ्र ही उस लोक को चला जायगा । और ऐसा ही होगा भी ॥२१॥

जिस-जिस प्रकार सामिधनियों से जलाई हुई अग्नि के पास जाकर जो कोई पीड़ा उठाता है उसी प्रकार की पीड़ा उस-उस पुरुष को होती है जो सामिधेनियों को समझ कर पढ़ने वाले ब्राह्मण को बुरा कहता है ॥२२॥

अध्याय ४—ब्राह्मण ४

त वाऽएतमग्निꣳ समैन्धिषत । समिद्धे देवेभ्यो जुहवामेति तस्मिन्नेतेऽग्न्य प्रथमेऽआहुती जुहोति मनसे चैव च मनश्च हैव वाक् च द्वौ देवेभ्यो यज्ञ वहत ॥१॥

स यदुपाꣳशु क्रियते । तन्मनो देवेभ्यो यज्ञ वहत्यथ यद्वाचा निरुक्त क्रियते तद्वाग्देवेभ्यो यज्ञ वहत्येतद्वाऽइद द्वय क्रियते तदेतेऽएवैतत्सन्तर्पयति तृप्ते प्रीते दवभ्यो यज्ञ वहात इति ॥२॥

स्रुवेण तमाघारयति । य मनसऽआघारयति वृषा हि मनो वृषा हि स्रुव ॥३॥

स्रुचा तमाघारयति । य वाचऽआघारयति योषा हि वाग्योषा हि स्रुक् ॥४॥

तूष्णी तमाघारयति । य मनसऽआघारयति न स्वाहेति चनानिरुक्तꣳ हि मनो ऽनिरुक्तꣳ ह्येतद्यत्तुष्णीम् ॥५॥

मन्त्रेण तमाघारयति । य वाचऽआघारयति निरुक्ता हि वाङ्निरुक्तो हि मन्त्र ॥६॥

इस अग्नि को इन्होंने प्रज्वलित किया कि इस प्रज्वलित अग्नि म देवा क लिये आहुतियाँ दें। पहले इसमे दो आहुतियाँ देते हैं। एक मन के लिये और दूसरी वाणी के लिये। क्योंकि मन और वाणी दोनों मिल कर देवों के लिये यज्ञ को ले जाते हैं ॥१॥

यह जो चुपके चुपके (धीमी आवाज से) किया जाता है, इस यज्ञ को मन देवो को ले जाता है। और जो वाणी से स्पष्ट करके किया जाता है उस यज्ञ को वाणी देवो तक ले जाती है। इस प्रकार दुहरी क्रियायें होती हैं। यह इन दोना का तृप्त करता है जिससे यह दोनों (मन और वाणी) तृप्त और प्रसन्न होकर यज्ञ को देवा तक ले जाय ॥२॥

जो आहुति मन के लिये देता है वह स्रुवा से देता है। क्योंकि मन पुरुष है और स्रुवा भी पुरुष है। (मन नपुसक लिंग है। समझ म नहीं आता कि मन को पुरुष क्यों कहा) ॥३॥

एतद्ध वै मनुर्विभयाचकार । इदं वै मे तनिष्ठं यज्ञस्य यदियमिडा पाकयज्ञिया यद्वै मऽइह रक्षाꣳसि यज्ञं न हिꣳस्युरिति तामेतत्पुरा रक्षोभ्यः पुरा रक्षोभ्य इत्येव प्रापयत तथोऽएवैनामेष एतत्पुरा रक्षोभ्यः पुरा रक्षोभ्य इत्येव प्रापयतेऽथ यत्प्रत्यक्षं न प्राश्नाति नेदनुपहूता प्राक्षामीत्येतदेवैना प्रापयते यदोष्ठ्योर्निलिम्पते ॥१६॥

अथ होतुः पाणौ समवद्यति । समवत्तामेव सतीं तदेना प्रत्यक्षꣳ होतरि श्रयति तयात्मंहृतया होता यजमानायाशिषमाशास्ते तस्माद्धोतुः पाणौ समवद्यति ॥१७॥

अथोपाꣳशूपह्वयते । एतद्ध वै मनुर्विभयाचकारेदं वै तनिष्ठं यज्ञस्य यदियमिडा पाकयज्ञिया यद्वै मऽइह रक्षाꣳसि यज्ञं न हन्युरिति तामेतत्पुरा रक्षोभ्यः पुरा रक्षोभ्य इत्येवोपाꣳशूपाह्वयत तथोऽएवैनामेष एतत्पुरा रक्षोभ्यः पुरा रक्षोभ्य इत्येवोपाꣳशूपह्वयते ॥१८॥

स उपह्वयते । उपहूतꣳ[1] रथन्तरꣳ सह पृथिव्योप मांꣳ रथन्तरꣳ सह पृथिव्या ह्वयतामुपहूतं वामदेव्यꣳ सहान्तरिक्षेणोप मां वामदेव्यꣳ सहान्तरिक्षेण ह्वयतामुपहूतं बृहत्सह दिवोप मा बृहत्सह दिवा ह्वयतामिति तदेतामेवैतदुपह्वयमान इमाꣳश्चलोकानुपह्वयत-

इस पर मनु डरा । यह जो पाक-यज्ञिया इडा है, यह मेरे यज्ञ का सबसे कमजोर भाग है । कहीं ऐसा न हो कि राक्षस लोग मेरे यज्ञ को इस स्थान पर विध्वंस कर दें इसलिये (उस इडा को) राक्षसों के आने से पहले ही उसने (होठों से लगाकर) सुरक्षित कर दिया । इसी प्रकार यह होता भी राक्षसों के आने से पहले ही सुरक्षित कर देता है । यद्यपि वह हवं खाता नहीं कि बिना आहुति दिये कैसे खाऊँ, परन्तु वह होठों से लगाकर उसे सुरक्षित कर देता है ॥१६॥

अब वह होता के हाव्य में इडा के टुकड़े-टुकड़े करता है । इस प्रकार टुकड़े-टुकड़े की गई इडा को वह प्रत्यक्ष रूप से होता के हवाले कर देता है । जो उसके हवाले हो गई उस इडा से वह यजमान के लिये आशीर्वाद चाहता है । इसलिये होता के हाथ में रखता है ॥१७॥

अब (इडा को) चुपके-चुपके बुलाता है । उस समय सचमुच मनु यह सोचकर डरा कि यह पाक-यज्ञिया इडा मेरे यज्ञ का सबसे कमजोर भाग है, कहीं राक्षस इसकी हानि न पहुँचावे । इसलिये उसने चुपके-चुपके कहा, 'राक्षस (के आने) से पूर्व, राक्षस (के आने) से पूर्व' । इसी प्रकार यह होता भी चुपके-चुपके कहता है, 'राक्षस (के आने) से पूर्व' ॥१८॥

वह इस प्रकार (धीरे से) कहता है, 'पृथ्वी के साथ रथन्तर बुलाया गया । पृथ्वी के साथ रथन्तर मुझे बुलाये । अन्तरिक्ष के साथ वामदेव्य बुलाया गया । अन्तरिक्ष के साथ वामदेव्य मुझे बुलाये । द्यौ के साथ बृहत् बुलाया गया । द्यौ के साथ बृहत् मुझे

---

[1] तै० ब्रा० ३. ५. १३ ।

ऽएतानि च सामानि ॥१६॥

उपहूता गावः सहऽर्षभा[1] इति । पशवो वाऽइडा तदेना परोऽक्षमुपह्वयते सहऽर्षभा इति समिथुनामेवैनामेतदुपह्वयते ॥२०॥

उपहूता सप्तहोत्रेति[2] । तदेनाꣳ सप्तहोत्रा सौम्येनाध्वरेणोपह्वयते ॥२१॥

उपहूतेडा ततुरिरिति[3] । तदेना प्रत्यक्षमुपह्वयते ततुरिरिति सर्वꣳ ह्येषा पाप्मानं तरति तस्मादाह ततुरिरिति ॥२२॥

उपहूतः ससा भद्र[4] इति । प्राणो वै ससा भद्रस्तत्प्राणमुपह्वयतऽउपहूतꣳ हेगिति तच्छरीरमुपह्वयते तत्सर्वमुपह्वयते ॥२३॥

अथ प्रतिपद्यते । इडोपहूतोपहूतेडोपोऽअस्मा२॥ऽइडा ह्यतामिडोपहूतेति[5] तदुपहूतामेवैनामेतत्सर्ता प्रत्यक्षमुपह्वयते या वै सासीद्गौर्वै सासच्चितुष्पदी वै गौस्तस्माच्चतुरुपह्वयते ॥२४॥

स वै चतुरुपह्वयमान । अथ नानेवोपह्वयतेऽजामितायै जामि ह कुर्याद्यदिडोपहूते-

बुलावे' । वह इस प्रकार बोलकर तीनों लोकों और तीनों सामों को बुलाता है (रथन्तर, वामदेव्य और बृहत् तीन साम हैं) ॥१९॥

अब कहता है, 'गायें बैलों के साथ बुलाई गईं' । पशु ही ईडा है । उन्हीं को परोक्ष रीति से बुलाता है । 'बैलों के साथ' से तात्पर्य उनके जोड़े से है ॥२०॥

अब कहता है, 'सात होताओं से की गई इडा बुलाई गई' । इस प्रकार वह सात होताओं द्वारा किये गये सौम्य यज्ञ के नाम से उसे बुलाता है ॥२१॥

अब कहता है, 'विजय पानी वाली (ततुरि) इडा बुलाई गई' । इस प्रकार उसको प्रत्यक्ष रूप से बुलाता है । यह सब पापों को पार कर देती है । इसलिये इसको 'ततुरि' कहा गया ॥२२॥

अब कहता है, 'भद्र-मित्र बुलाया गया' । प्राण ही सच्चा भद्र है । इससे प्राण को बुलाता है । 'हे! बुलाया गया' । इससे वह शरीर को बुलाता है । इस प्रकार यह सब को बुलाता है ॥२३॥

अब यह जोर से कहता है, 'इडा बुलाई गई । बुलाई गई इडा हमको अपनी ओर बुलाये' । 'इडा यहाँ बुलाई गई' से तात्पर्य यह है कि जो पहले वास्तविक रूप में बुलाई जा चुकी है उसे अब प्रत्यक्ष रूप से बुलाता है । इडा गौ चार पैर वाली होती है । इसलिये उसको चार बार बुलाया ॥२४॥

चार बार बुलाता हुआ कई प्रकार से बुलाता है जिससे दुहराने का दोष न लगे । यदि 'इडा उपहूता' 'इडा उपहूता' ही कई बार कहे या 'उपहूता इडा' 'उपहूता इडा' ही कई बार कहे तो दुहराने का दोषी हो । इसलिये 'इडा उपहूता' कहकर यह उसे ऊपर

१-५. तै० ब्रा० ३. ५. १३ ।

डोपहूतेत्येवोपह्वयेतोपहूतेडेति[1] वेडोपहूतेति तदर्वाचीमुपह्वयतऽउपहूतेडेति[2] तत्सराचीमुखो[3]ऽअस्मा२।।ऽइडा ह्वयतामिति तदात्मानं चैवैतच्चान्तरेत्यन्यथेव च भवतीडोपहूतेति तत्पुनरर्वाचीमुपह्वयते तदर्वाचीं चैवैनामेतत्पराचीं चोपह्वयते ।।२५।।

मानवीघृतपदीति । मनुर्वै तामग्रेऽजनयत तस्मादाह मानवीति घृतपदीति यदेवास्यै घृतं पदे समतिष्ठत तस्मादाह घृतपदीति ।।२६।।

उत मैत्रावरुणीति । यदेव मित्रावरुणाभ्याꣳ समगच्छत स एव मैत्रावरुणो न्यङ्गो यद्वा देवकृतोपहूतेति ब्रह्मा[4] ह्येषां देवकृतोपहूतोपहूता दैव्या[5] अध्वर्यव उपहूता मनुष्या इति तद्दैवांश्चैवाध्वर्यूनुपह्वयते ये च मानुषा वत्सा वै दैव्या अध्वर्यवोऽथ यऽइतरे ते मानुषाः ।।२७।।

यऽइमं यज्ञमवान्ये च यज्ञपतिं वर्धानिति । एते वै यज्ञमवन्ति ये ब्राह्मणाः शुश्रुवाꣳसः सोऽनूचाना एते ह्येनं तन्वतऽएतऽएनं जनयन्ति तदु तेभ्यो निह्नुते वत्सा उ वै यज्ञपतिं वर्धन्ति यस्य ह्येते भूयिष्ठा भवन्ति स हि यज्ञपतिर्वर्धते तस्मादाह ये च यज्ञपतिं वर्धानिति ।।२८।।

बुलाता है और 'उपहूत इडा' कहकर वह उसे उधर बुलाता है। 'इडा हमको बुलाये' यह कहकर वह अपने को अलग नहीं करता और कहने की शैली भी बदल जाती है। 'इडा उपहूता' कहकर वह उसे फिर इधर बुलाता है। इस प्रकार वह उसको इधर भी बुलाता है और उधर भी बुलाता है ।।२५।।

अब कहता है, 'मानवी घृतपदी'। 'मनु की लड़की घी के पैरों वाली'। मनु ने ही पहले उसे जना था। इसीलिये कहा, 'मानवी' (मनु की लड़की)। 'घृतपदी' इसलिये कहा कि उसके पद चिह्न में घृत रहता है। इसलिये 'घृतपदी' नाम हुआ ।।२६।।

अब कहता है, 'मैत्रा-वरुणी' 'मित्र और वरुणी वाली'। चूँकि उसका मित्र और वरुण से समागम हुआ, इसलिये उसकी मैत्रा-वरुण प्रकृति हुई। वह देवकृत ब्रह्मा हुई क्योंकि वह देवकृत ब्रह्मा कहकर बुलाई गई। 'देव अध्वर्यु और मनुष्य बुलाये गये' ऐसा कहकर वह दैव्य अध्वर्यु और मनुष्य अध्वर्यु दोनों को बुलाता है। दैव्य अध्वर्यु बत्स या बछड़े हैं। और जो दूसरे हैं वह मनुष्य अध्वर्यु ।।२७।।

अब कहता है, 'जो इस यज्ञ को बढ़ावें, जो इस यज्ञपति को बढ़ावें'। जिन ब्राह्मणों ने वेदों को पढ़ा और पढ़ाया है वे इस यज्ञ की रक्षा करते हैं, चूँकि वह इसको फैलाते और करते हैं। उनको इस प्रकार सन्तुष्ट करता है। और बछड़े यज्ञपति को बढ़ाते हैं क्योंकि जिस यज्ञपति के बछड़े बहुत होंगे वह बढ़ेगा। इसीलिये कहा 'वह जो इस यज्ञपति को बढ़ावें' ।।२८।।

१-५. तै० ब्रा० ३. ५. १३ ।

उपहूते[1] द्यावापृथिवी पूर्वजेऽऋतावरी देवी देवपुत्रेऽइति। तदिमे द्यावापृथिवीऽउपह्वयते ययोरिदꣳ सर्वमध्युपहृतोऽयं यजमान इति तद्यजमानमुपह्वयते तद्यदत्र नाम न गृह्णाति परोऽक्षꣳ ह्यत्राशीर्यदिडाया मानुषꣳ ह कुर्याद्यन्नाम गृह्णीयाद्वधृदं वै तद्यज्ञस्य यन्मानुषं नेद्वधृदं यज्ञे करवाणीति तस्मान्न नाम गृह्णाति ॥२९॥

उत्तरस्या[2] देवयज्यायामुपहूत इति। तदस्माऽएतज्जीवातुमेव परोऽक्षमाशास्ते जीवन्हि पूर्वमिष्ट्वाथापरं यजते ॥३०॥

तदस्मा एतत्प्रजामेव परोऽक्षमाशास्ते। यस्य हि प्रजा भवत्यमुं लोकमात्मनेत्यथास्मिंल्लोके प्रजा यजते तस्मात्प्रजोत्तरा देवयज्या ॥३१॥

तदस्माऽएतत्पशूनेव परोऽक्षमाशास्ते। यस्य हि पशवो भवन्ति स पूर्वमिष्ट्वाथापरं यजते ॥३२॥

भूयसि[3] हविष्करणऽउपहूत इति। तदस्मा एतज्जीवातुमेव परोऽक्षमाशास्ते

अब कहता है, 'उपहूते द्यावापृथ्वी पूर्वजेऽऋतावरी देवी देवपुत्रे'। 'बुलाई गई द्यावा-पृथ्वी जो दोनों पूर्वज (पहले जन्मी हुई हैं), ऋतावरी (ऋत को पालने वाली), देवी (दिव्य गुण वाली), देवपुत्र (देवता हैं पुत्र जिनके ऐसी) हैं। इस प्रकार वह द्यावा-पृथ्वी को बुलाता है, जिसमें सब संसार आ जाता है। अब कहता है, 'यजमान बुलाया गया' इससे यजमान को बुलाता है। यहाँ नाम नहीं लेता। इससे, परोक्ष रूप में इडा के लिये आशीर्वाद है। यदि नाम ले तो मानुषी-भाषा हो जाय। जो मानुषी-भाषा है वह यज्ञ में अशुभ है। यज्ञ में अशुभ नहीं करना चाहिये, इसलिये नाम नहीं लेना चाहिये ॥२९॥

अब कहता है, 'उत्तरस्या देव यज्यायामुपहूतः'। 'अर्थात् आगे होने वाली देव पूजा के लिये (यजमान) बुलाया गया'। इस प्रकार उस (यजमान) के लिये परोक्ष रीति से जीविका के लिये आशीर्वाद देता है। जैसे उसने जीवन भर यज्ञ किया है, आगे भी करेगा ॥३०॥

वह उसके लिये परोक्ष-रीति से सन्तान के लिये भी आशीर्वाद देता है। क्योंकि जिसके सन्तान होती है जब वह मर जाता है तो उसकी सन्तान इस लोक में यज्ञ करती है। इसलिये 'उत्तरा देवयज्या' का अर्थ है 'सन्तान' ॥३१॥

इस प्रकार वह परोक्ष-रीति से पशुओं के लिये भी आशीर्वाद देता है। क्योंकि जिसके पशु हैं वह जैसे उसने पहले यज्ञ किया उसी प्रकार फिर भी यज्ञ करेगा ॥३२॥

अब कहा, 'भूयसि हविष्करण उपहूतः'। 'वह बहुत ज्यादा हवि देने के लिये बुलाया गया'। इस प्रकार वह उसकी जीविका के लिये परोक्ष रीति से आशीर्वाद देता है।

१-२. तै० ब्रा० ३. ५. १३।

जीवन्हि पूर्वमिष्ट्वाथ भूयो भूय एव हविष्करोति ॥३३॥

तदस्माऽएतत्प्रजामेव परोऽक्षमाशास्ते । यस्य हि प्रजा भवत्येक आत्मना भवत्यथोत दशधा प्रजया हविष्क्रियते तस्मात्प्रजा भूयो हविष्करणम् ॥३४॥

तदस्मा एतत्पशूनेव परोऽक्षमाशास्ते । यस्य हि पशवो भवन्ति स पूर्वमिष्ट्वाथ भूयो भूय एव हविष्करोति ॥३५॥

एषा वा आशीः । जीवेयं प्रजा मे स्याद्भियं गच्छेयमिति तद्यत्पशूनाशास्ते तद्भियमाशास्ते श्रीर्हि पशवस्तदेताभ्यमेवैतदाशीर्भ्यां सर्वमाप्तं तस्माद्वा ऽएतेऽग्रत्र द्वेऽआशिषौ क्रियेते ॥३६॥

देवा[1] मऽइदꣳ हविर्जुषन्तामिति । तस्मिन्नुपहूत इति तद्यज्ञस्यैवैतत्समृद्धिमाशास्ते यद्धि देवा हविर्जुषन्ते तेन हि महज्जयति तस्मादाह जुषन्तामिति ॥३७॥

शतम् ७००॥

तां वै प्राश्नन्त्येव । नाग्नौ जुह्वति पशवो वाऽइडा नेत्पशूनग्नौ प्रवृणजामेति तस्माद्वाग्नौ जुह्वति ॥३८॥

क्योंकि जैसे उसने पहले यज्ञ किया इस प्रकार जीता रहेगा तो आगे भी यज्ञ करेगा ॥३३॥

इससे वह परोक्ष रूप से सन्तान के लिये भी आशीर्वाद देता है । क्योंकि जिसके सन्तान होती है वह चाहे अकेला ही हो सन्तान द्वारा दश गुनी हवि देता है । इसीलिये कहा कि 'सन्तान का अर्थ है बहुत सी हवि देना' ॥३४॥

इस प्रकार वह परोक्ष रूप से पशुओं के लिये भी आशीर्वाद देता है । जिसके पशु होते हैं वह पहले जैसे यज्ञ करता था फिर भी अधिक यज्ञ करता है ॥३५॥

अब आशीर्वाद यह है, 'जीवेय प्रजा मे स्यात् द्वियं गच्छेयम्' । 'मैं जियूँ । मेरी प्रजा हो, मेरी सम्पत्ति हो' । 'पशुओं के लिये आशीर्वाद से तात्पर्य है 'सम्पत्ति से' । क्योंकि पशु ही सम्पत्ति है । इन दो आशीर्वादों मे सब आ गया इसलिये यहाँ दो आशीर्वाद किये जाते हैं ॥३६॥

अब कहता है, 'देवा म इदꣳहविर्जुषन्ताम्' । 'देव मेरी इस हवि को स्वीकार करें' । 'इसी यज्ञ में बुलाया गया' । यह जो देव हवि को स्वीकार करते हैं मानो यज्ञ की समृद्धि के लिये ही आशीर्वाद देते हैं । इससे बड़ी जय होती है । इसलिये कहा, 'स्वीकार करें' ॥३७॥

(यजमान और पुरोहित) उस (इडा) को खाते हैं । अग्नि मे नहीं छोड़ते । इडा का अर्थ है पशु । इसलिये अग्नि मे नहीं छोड़ते कि कहीं पशुओं को अग्नि मे न छोड़ दें ॥३८॥

---

१. तै० ब्रा० ३. ५. १३ ।

प्राणेष्वेव हूयते । होतरि त्वद्यजमाने त्वदध्वर्यौ त्वदथ यत्पूर्वार्धं पुरोडाशस्य प्रशीर्य पुरस्ताद्भुवायै निदधाति यजमानो वै भुवा तद्यजमानस्य प्राशितं भवत्यथ यत्प्रत्यक्षं न प्राश्नाति नेदसश्श्रथिते यज्ञे प्राश्नानीत्येतदेवास्य प्राशितं भवति सर्वे प्राश्नन्ति सर्वेषु मे हुतासदिति पञ्च प्राश्नन्ति पशवो वाऽइडा पाङ्क्ता वै पशवस्तस्मात्पञ्च प्राश्नन्ति ॥३९॥

अथ यत्र प्रतिपद्यते । तच्चतुर्धा पुरोडाशं कृत्वा बर्हिषदं करोति तदत्र पितृणा भाजनेन चतस्रो वाऽअवान्तरदिशोऽवान्तरदिशो वै पितरस्तस्माच्चतुर्धा पुरोडाशं कृत्वा बर्हिषदं करोति ॥४०॥

अथ यत्राहोपहूते द्यावापृथिवीऽइति । तदग्नीधऽआदधाति तदग्नीत्प्राश्नात्युपहूता[1] पृथिवी मातोप मा पृथिवी माता ह्वयतामग्निराग्नीध्रात्स्वाहोपहूतो द्यौष्पितोप मा द्यौष्पिता ह्वयतामग्निराग्नीध्रात्स्वाहेति द्यावापृथिव्यो वाऽएष यदाग्नीध्रस्तस्मादेवं प्राश्नाति ॥४१॥

अथ यत्राशिषमाशास्ते । तज्जपति मयीदमिन्द्र[2] इन्द्रियं दधात्वस्मान् रायो मघ-

प्राणों में ही आहुति दी जाती है, कुछ होता में, कुछ यजमान में, कुछ अध्वर्यु में । अब पुरोडाश का पूर्वार्द्ध काटकर भुवा में रखता है । भुवा यजमान है । इसलिये यजमान इसको खाता है । यदि वह प्रत्यक्ष में उसे नहीं भी खाता है कि कहीं यज्ञ की समाप्ति के पहले खा लूँ तो भी वह खाई हुई समझ ली जाती है । सब खाते हैं । तात्पर्य है 'कि यज्ञ में यह मेरे लिये हुत होवे' । पाँच इसमें से खाते हैं । इडा का अर्थ है पशु । पशु पाँच प्रकार के होते हैं । इसलिये पाँच इसमें से खाते हैं ॥३९॥

जब (होता) ओर से बोलता है तो वह (अध्वर्यु) पुरोडाश के चार भाग करके कुशों पर रखता है । वह यहाँ पितरों के स्थान पर होता है । अवान्तर दिशायें चार होती हैं । अवान्तर दिशा ही पितर हैं । इसलिये पुरोडाश के चार भाग करके उनको कुशों पर रखता है ॥४०॥

और जब वह कहता है, 'उपहूते द्यावापृथिवी' । 'द्यावा-पृथ्वी बुलाये गये' । तो उसको अग्नीध्र को दे देता है । अग्नीध्र (उनमें से दो टुकड़ों को) यह मन्त्र पढ़कर खाता है, 'उपहूता पृथिवी मातोप मा पृथिवी माता ह्वयतामग्निराग्नीध्रात् स्वाहा' (यजु० २।१०) । 'उपहूता द्यौष्पितोप मा द्यौष्पिता ह्वयतामग्निराग्नीध्रात् स्वाहा' (यजु० २।११) । 'बुलाई गई पृथ्वी माता । पृथ्वी माता मुझे बुलावे । अग्नीध्र होने के कारण मैं अग्नि हूँ' । 'बुलाया गया द्यौ पिता । द्यौ पिता मुझे बुलावे । अग्नीध्र होने के कारण मैं अग्नि हूँ' । यह जो अग्नीध्र है यह मानो द्यावा पृथ्वी है । इसलिये वह इस प्रकार खाता है ॥४१॥

और जब होता आशीर्वाद देता है तब इस मन्त्र का जप करता है, 'मयीदमिन्द्रऽइन्द्रिय

---

१. शु० यं० अ० २ क० १०-११ । २. शु० यं० अ० २ क० ११ ।

वानः सचन्तां अस्माकꣳ सन्त्वाशिषः सत्या नः सन्त्वाशिष इत्याशिषामेवैष प्रतिग्रहस्तया एवाग्रऽर्त्विजो यजमानायाशिष आशासते ता एवैतत्प्रतिगृह्यात्मन्कुरुते ॥४२॥

अथ पवित्रयोर्मार्जयन्ते । पाक्तयज्ञियया वाऽएतदिडयाचारिषुः पवित्रूपता यदत ऊर्ध्वमसꣳ स्थितं यज्ञस्य तत्तनवामहाऽइति तस्मात्पवित्रयोर्मार्जयन्ते ॥४३॥

अथ ते पवित्रे प्रस्तरेऽपिसृजति । यजमानो वै प्रस्तरः प्राणोदानौ पवित्रे यजमाने तत्प्राणोदानौ दधाति तस्मात्ते पवित्रेऽपिसृजति ॥४४॥ ब्राह्मणम् ॥२॥ [८. १.] ॥

दधात्वस्मान् रायो मघवानः सचन्ताम् । अस्माकꣳ सन्त्वाशिषः सत्या नः सन्त्वाशिषः' (यजु० २।१०)। 'इन्द्र मुझमें इन्द्र की शक्ति दे। हमको बहुत सा धन प्राप्त हो। आशिष हमारे लिये हो। सच्ची आशिषें हमारे लिये हो। यह आशिष का परिग्रह (लेना) है। यहाँ ऋत्विज् जी आशिष यजमान के लिये देता है वह उनको ग्रहण करके अपनी बना लेता है ॥४२॥

अब दोनों पवित्रों से मार्जन करते हैं। क्योंकि अब उन्होंने इडा को पाक-यज्ञिया दे दिया। और अब वह दोनों पवित्रों से इसलिये मार्जन करते हैं कि अब जो यज्ञ का भाग बच रहा है उसको हम पवित्रों से मार्जन करके पूरा करेंगे ॥४३॥

वह (अध्वर्यु) दोनों पवित्रों को प्रस्तर पर छोड़ देता है। यजमान ही प्रस्तर है। प्राण और अपान पवित्रे हैं। इस प्रकार वह यजमान में प्राण और अपान को धारण कराता है। इसलिये उन पवित्रों को प्रस्तर पर छोड़ता है ॥४४॥

अध्याय ८—ब्राह्मण २

ते वाऽएतेऽउल्मुकेऽउद्दहन्ति । अनुयाजेभ्यो यातयामेव वाऽएतदग्निर्भवति देवेभ्यो हि यज्ञमूहिवान्भवत्ययातयाम्न्यनुयाजांस्तनवामहाऽइति तस्माद्वाऽएतेऽउल्मुके-ऽउद्दहन्ति ॥१॥

ते पुनरनुसꣳस्पर्शयन्ति । पुनरेवैतदग्निमाप्याययन्त्ययातयामानं कुर्वन्त्ययातया-

अब वे (आहवनीय अग्नि में से) दो जलती हुई समिधायें निकालते हैं। यह अग्नि अनुयाजों के लिये व्यर्थ सी हो जाती है। क्योंकि देवों के लिये यज्ञ को ले जाती है। (वे सोचते हैं) कि ऐसी आग में अनुयाज करें जो यातयामा (बुझी या व्यर्थ सी) न हो। इसलिये दो जलती हुई समिधाओं को निकालते हैं ॥१॥

वे फिर उनको (आग के) पास लाते हैं। इस प्रकार यह आग को फिर बढ़ा देते

ग्नि यदत उर्ध्वमसꣳस्थितं यज्ञस्य तत्तनवामहाऽइति तस्मात्पुनरनुसꣳस्पर्शयन्ति ॥२॥

अथ समिधमभ्यादधाति । समिन्द्धऽएवैनमेतत्समिद्धे यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य तत्तनवामहाऽइति तस्मात्समिधमभ्यादधाति ॥३॥

ताꣳ होतानुमन्त्रयते । एषा तेऽअग्ने समित्तया वर्धस्व चा च प्यायस्व वर्धिषीमहि च वयमा च प्यासिषीमहीति[1] तद्यथैवादः समिध्यमानायान्वाहैवमेवैतदन्वाह तदेतज्जोतुः कर्म स यदि मन्येत न होता वेदेत्यपि स्वयमेव यजमानोऽनुमन्त्रयेत ॥४॥

अथ सम्मार्ष्टि । युनक्त्येवैनमेतद्युक्तो यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य तद्वहादिति तस्मात्सम्मार्ष्टि सकृत्सकृत्सम्मार्ष्टि त्रिस्त्रिर्वाऽअग्नेर्देवेभ्यः सम्मृजन्ति नेत्तथा करवाम यथा देवेभ्य इति तस्मात्सकृत्सकृत्सम्मार्ष्टर्थं जामितायै जामि ह कुर्याद्यत्त्रिः पूर्वं त्रिरपरं तस्मात्सकृत्सकृत्सम्मार्ष्टि ॥५॥

और ताजा कर देते हैं। (वे सोचते हैं) कि जो कुछ यज्ञ में से शेष रह गया है उसको ऐसी अग्नि में करें जो यातयामा न हो। (जिस अग्नि से एक बार काम ले चुके वह मानो थक सी गई। उसे यातयामा कहा। अब दो समिधाओं को पहले निकाल कर फिर उसी में रखने से मानो वह ताजा हो गई।) इसीलिये वे उनको फिर पास लाते हैं ॥२॥

अब (अग्नीध्र) समिधा रखता है। इससे वह अग्नि को प्रज्वलित करता है। (वह सोचता है) कि जो यज्ञ की शेष क्रिया रह गई है उसको प्रज्वलित अग्नि में करूँ। अतः वह समिधा रखता है ॥३॥

होता इस मन्त्र को पढ़कर उसका अनुमन्त्रण (पवित्रीकरण) करता है; 'एषा तेऽग्ने समित् तया वर्द्धस्व चा च प्यायस्व। वर्धिषीमहि च वयमा च प्यासिषीमहि' (यजु० २।१४)। 'हे अग्नि! ये तेरी समिधा हैं। इसके द्वारा बढ और प्रज्वलित हो, और हम भी बढ़ें और प्रतापी हों'। जैसे पहले समिधा लगाते हुये जिस प्रकार मन्त्र पढा था उसी प्रकार अब भी पढ़ता है। यह होता का कर्म है। परन्तु यदि समझे कि होता नहीं जानता तो यजमान स्वयं ही अनुमन्त्रण करे ॥४॥

अब वह उसका समार्जन करता है। अर्थात् उसे इकट्ठा कर देता है, जैसे इधर-उधर से चिमटे द्वारा बुझती हुई आग को इकट्ठा करके फिर ताजा कर देते हैं। 'इस प्रकार इकट्ठा होकर यह जो कुछ यज्ञ में शेष रहा है उसको भी (देवताओं के लिये) ले जावे'। इसलिये उसका समार्जन करता है। (प्रत्येक समिधा को) एक-एक बार समार्जित करता है। इससे पहले देवों के लिये उन्होंने फिर से तीन-तीन बार समार्जन किया था। 'ऐसा न हो कि जैसा देवों के लिये किया था वैसा ही हो जाय'। इसलिये एक-एक बार समार्जन करता है। यदि तीन बार पहले करे फिर तीन बार करे तो दुहराने का दोष लगे। इसलिये एक-एक बार ही समार्जन करता है ॥५॥

---

१. शु० स० अ० २ क० १२।

स सम्मार्ष्टि । अग्ने वाजजिद्वाजं त्वा सरिष्यन्तं वाजजितꣳ सम्माज्मीति[1] सरिष्यन्तमिति वाऽग्रमऽआह सरिष्यन्निव हि तर्हि भवत्यथात्र सस्वाꣳसमिति सस्वेव ह्यत्र भवति तस्मादाह सस्वाꣳसमिति ॥६॥

अथानुयाजान्यजति । या वाऽएतेन यज्ञेन देवता ह्वयति याभ्य एष यज्ञस्तायते सर्वा वै तत्ता इष्टा भवन्ति तद्यत्तासु सर्वास्विष्टास्वथैतत्पश्चेवानुयजति तस्मादनुयाजा नाम ॥७॥

अथ यदनुयाजान्यजति । छन्दाꣳसि वाऽअनुयाजाः पशवो वै देवानां छन्दाꣳसि तद्यथेदं पशवो युक्ता मनुष्येभ्यो वहन्त्येवं छन्दाꣳसि युक्तानि देवेभ्यो यज्ञं वहन्ति तद्यत्र छन्दाꣳसि देवान्त्समतर्प्ययन्नथ छन्दाꣳसि देवाः समतर्प्ययंस्तदेतन्मत्सागमूद्यच्छन्दाꣳसि युक्तानि देवेभ्य यज्ञमवाहन्तर्यदेनान्त्समतीतृपन् ॥८॥

अथ यदनुयाजान्यजति । छन्दाꣳसि वाऽअनुयाजाश्छन्दाꣳस्येवैतत्सन्तर्पयति तस्मादनुयाजान्यजति तस्माद्येन वाहनेन धावयेत्तद्विमुच्य ब्रूयात्पाययतैनत्सुहितं कुरुतेत्येष उ वाहनस्यापह्नवः ॥९॥

वह इस मन्त्र से समार्जित करता है, 'अग्ने वाजजिद् वाज त्वा सस्वाꣳ स वाजजितꣳ समार्ज्मि' (यजु० २।१४) । 'हे अन्न को जीतने वाले अग्नि, अन्न लिये हुये और अन्न को जीतने वाले तुझको समार्जित (इकट्ठा) करता हूँ' । पहले कहा था, 'सरिष्यन्तम्' अर्थात् लेते हुये । क्योंकि उस समय लेने का काम जारी था । अब कहा, 'सस्वांसम्' अर्थात् लिये हुये । क्योंकि अब लेने का काम पूरा हो चुका, इसलिये कहा, 'सस्वांसम्' ॥६॥

अब वह अनुयाजों की आहुति देता है । इस यज्ञ द्वारा जिस-जिस देवता को आहुति दी गई और जिस-जिस के लिये यज्ञ किया गया, उनके लिये आहुतियाँ दी जा चुकीं । अब उन्हीं इष्ट देवों के लिये फिर आहुतियाँ देता है, इसलिये इसका नाम अनुयाज है । (जिस देवता के लिये यज्ञ हो चुका उस देवता को 'इष्ट' कहते हैं । अनुयाज का अर्थ है अनु + याज । 'जो आहुति पीछे से दी जाय') ॥७॥

अनुयाज इसलिये किये जाते हैं । अनुयाज ही छन्द हैं । छन्द ही देवों के पशु हैं । जिस प्रकार पशु जुत कर मनुष्यों के लिये बोझ ले जाते हैं, उसी प्रकार छन्द भी युक्त हो कर देवताओं के लिये यज्ञ को ले जाते हैं । जब छन्दों ने देवों को तृप्त किया और देवों ने छन्दों को तृप्त किया, यह पहले था । अब युक्त छन्दों ने देवों तक यज्ञ को पहुँचाया और उनको तृप्त किया ॥८॥

और अनुयाज करने का यह भी कारण है—अनुयाज ही छन्द हैं । इस प्रकार यह इन (छन्दों) को तृप्त करता है, इसलिये अनुयाज करता है । जिस वाहन से यात्रा की उसी वाहन को छोड़ कर कहते हैं, 'इसको जल दो । इसको खाना दो' । और यही वाहन का तृप्त करना है ॥९॥

---

१. शु० सं० अ० २ क० १४ ।

स वै खलु बर्हिः प्रथमं यजति । तद्वै कनिष्ठं छन्दः सद्गायत्री प्रथमा छन्दसां युज्यते तदु तद्वीर्येणैव यच्छ्येनो भूत्वा दिवः सोममाहरत्तद्यथायथं मन्यन्ते यत्कनिष्ठं छन्दः सद्गायत्री प्रथमा छन्दसां युज्यतेऽथात्र यथायथं देवाश्छन्दाꣳस्यकल्पयन्ननुयाजेषु नेत्पापवस्यसमसदिति ॥१०॥

स वै खलु बर्हिः प्रथमं यजति । अयं वै लोको बर्हिरोषधयो बर्हिरस्मिन्नेवैतल्लोकऽओषधीर्दधाति ता इमा अस्मिल्लोकऽओषधयः प्रतिष्ठितास्तदिदꣳ सर्वं जगदस्यां तेनेयं जगती तज्जगतीं प्रथमामकुर्वन् ॥११॥

अथ नराशꣳसं द्वितीयं यजति । अन्तरिक्षं वै नराशꣳसः प्रजा वै नरस्ता इमा अन्तरिक्षमनु वावद्यमानाः प्रजाश्चरन्ति यद्वै वदति शꣳसतीति वै तदाहुस्तस्मादन्तरिक्षं नराशꣳसोऽन्तरिक्षमु वै त्रिष्टुप्तत्त्रिष्टुभं द्वितीयामकुर्वन् ॥१२॥

अथाग्निरुत्तमः । गायत्री वाऽअग्निस्तद्गायत्रीमुत्तमामकुर्वन्नेवं यथायथेन कल्पेन छन्दाꣳसि प्रत्यतिष्ठंस्तस्मादिदमपापवस्यसम् ॥१३॥

देवान्यजेत्येवाध्वर्युराह । देवं देवमिति सर्वेषु होता देवानां वै देवाः सन्ति छन्दाꣳस्येव पशवो येषां गृहा हि पशवः प्रतिष्ठो हि गृहाश्छन्दाꣳसि वाऽअनुयाजास्तस्मा-

वह पहले बर्हि-यज्ञ करता है । छन्दों में सब से पहले छोटा छन्द गायत्री बोला जाता है । छन्दों को पशु या वाहन कहा, इसलिये 'जोतना' शब्द प्रयुक्त हुआ । और यह शक्ति (वीर्य) के कारण । क्योंकि यह श्येन होकर सोम को देवों तक ले गया था । अब इसको यथार्थ नहीं समझते कि छोटे से गायत्री छन्द को छन्दो में सब से पहले जोतें । इसीलिये अनुयाजों मे देवों ने छन्दों को ठीक-ठीक कर दिया जिससे भूल न हो जाय ॥१०॥

अब सबसे पहले बर्हि-यज्ञ करता है । यह लोक ही बर्हि है । ओषधि बर्हि है । इस प्रकार इस लोक में ओषधियों को रखता है । ये ओषधियाँ इस लोक में स्थापित होती हैं । इस छन्द मे सब 'जगत्' प्रतिष्ठित है, इसलिये इसको 'जगती' कहा । इसलिये उन्होंने जगती छन्द को पहले कहा ॥११॥

अब नराशस यज्ञ करता है । अन्तरिक्ष ही नराशस है । प्रजा को नर कहते हैं । यह नर (मनुष्य) अन्तरिक्ष में बोलते हुये विचरते हैं । जब मनुष्य बोलता है तो कहते हैं 'शसति' । इसलिये अन्तरिक्ष को नराशस कहा । अन्तरिक्ष ही त्रिष्टुप् है । इसलिये त्रिष्टुप् छन्द को दूसरा दर्जा दिया ॥१२॥

अब अग्नि अन्तिम है । गायत्री ही अग्नि है । इसीलिये गायत्री को अन्तिम दर्जा दिया । इस प्रकार उन्होंने छन्दों को यथार्थ दर्जा में प्रतिष्ठित कर दिया, जिससे भूल न हो ॥१३॥

अध्वर्यु कहता है, 'देवो के लिये यज्ञ करो' । और होता इस प्रकार आरम्भ करता है, 'देवं, देवं' । क्योंकि छन्द देवों के देव हैं, यह पशु हैं । पशु ही इनके घर हैं । घर ही

देवान्यजेत्येनाध्वर्युराह देवं देवमिति सर्वेषु होता ॥१४॥

वसुवने वसुधेयस्येति[1] । देवताया एव वषट्क्रियते देवतायै हूयते न वा अत्र देवतास्त्यनुयाजेषु देवं बर्हिरिति[2] तत्र नाग्निर्नेन्द्रो न सोमो देवो नराशंस[3] इति नात एकं चन यो वा अत्राग्निर्गायत्री स निदानेन ॥१५॥

अथ यद्वसुवने[4] वसुधेयस्येति यजति । अग्निर्वै वसुवनिरिन्द्रो वसुधेयोऽस्ति वै छन्दसां देवतेन्द्राग्नी एवैवमु हैतद्देवताया एव वषट्क्रियते देवतायै हूयते ॥१६॥

अथोत्तममनुयाजमिष्ट्वा समानीय जुहोति । प्रयाजानुयाजा वा एते तद्यथैवादः प्रयाजेषु यजमानाय द्विपन्तं भ्रातृव्यं बलिꣳ हारयत्यत्रऽआद्यं बलिꣳ हारयत्येवमेवैतदनुयाजेषु बलिꣳ हारयति ॥१७॥ ब्राह्मणम् ॥ ४ ॥ [८. २.] ॥ षष्ठः प्रपाठकः ॥

करिष्यासङ्ख्या ॥१११॥

प्रतिष्ठा है । अनुयाज ही छन्द हैं । इसीलिये अध्वर्यु कहता है कि 'देवों के लिये यज्ञ करो' । और हर एक बार होता इस प्रकार आरम्भ करता है, 'देव देवम्' ॥१४॥

अब कहता है, 'वसुवने वसुधेयस्य' । अर्थात् 'वसुधा की अधिक प्राप्ति के लिये' । अब वषट्कार देवता के लिये ही होता है । देवता के लिये ही आहुति दी जाती है । परन्तु यहाँ अनुयाजों में कोई देवता नहीं है । जब वह कहता है, 'देव बर्हिः', तब न तो अग्नि है, न इन्द्र, न सोम । और जब कहता है, 'देवो नराशंसः', तब भी कोई नहीं । और जो अग्नि है वह निदान में गायत्री ही है ॥१५॥

अब 'वसुवने वसुधेयस्य' कहने का प्रयोजन यह है कि अग्नि ही वसुवन (धन को लेने वाला) और इन्द्र ही वसुधेय (धन को धारण करने वाला) है । छन्दों के देवता हैं इन्द्र + अग्नि । इस प्रकार देवता के लिये ही वषट्कार बोला जाता है । और देवता के लिये ही आहुति दी जाती है ॥१६॥

अन्तिम अनुयाज में सब घी लाकर छोड देता है । क्योंकि यही प्रयाज और अनुयाज है । इसलिये यहाँ अनुयाजों में भी वह हानिकारक शत्रु से यजमान के लिये बलि दिलवाता है । जो साद्य है उससे बलि दिलवाता है । अनुयाजों में बलि दिलवाता है ॥१७॥

अध्याय ८—ब्राह्मण ३

स वै स्रुचौ व्यूहति । अग्नीषोमयोरूर्ज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामीति[5] अब वह दो स्रुचों (जुहू और उपभृत्) को अलग करता है इस मन्त्र से 'अग्नीषोमयोरूर्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि' (यजु० २।१५) । 'अग्नि और सोम की

१-४. तै० ब्रा० ३. ५. ६ ।

५. शु० स० अ० २ क० १५ ।

जुहूं प्राची दक्षिणेन पाणिनाग्नीषोमौ तमपनुदता योऽस्मान्द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामी[1]त्युपभृतं प्रतीचीꣳ सव्येन पाणिना यदि स्वयं यजमानः ॥१॥

यद्युऽअध्वर्युः । अग्नीषोमयोरुज्जितिमनूज्जयत्वयं यजमानो वाजस्यैनं प्रसवेन प्रोहाम्यग्नीषोमौ तमपनुदता यमय यजमानो द्वेष्टि यञ्चैनं द्वेष्टि वाजस्यैनं प्रसवेनापोहामीति पौर्णमास्यामग्नीषोमीयꣳ हि पौर्णमासꣳ हविर्भवति ॥२॥

अथामावास्यायाम् । इन्द्राग्न्योरुज्जितिमनूज्जेष वाजस्य मा प्रसवेन प्रोहामीन्द्राग्नी तमपनुदता योऽस्मान्द्वेष्टि यं च वय द्विष्मो वाजस्यैनं प्रसवेनापोहामीति[2] यदि स्वयं यजमानः ॥३॥

यद्युऽअध्वर्युः । इन्द्राग्न्योरुज्जितिमनूज्जयत्वयं यजमानो वाजस्यैनं प्रसवेन प्रोहा-

जीत से म विजयी होऊँ । अन्न की प्रेरणा से म आगे बढता हूँ । जुहू को पूर्व से सीधे हाथ से पूर्व की ओर हटाता है इस मन्त्र से 'अग्नीषोमौ तमपनुदता योऽस्मान् द्वेष्टि य च वय द्विष्मो वाजस्यैन प्रसवेनापोहामि' (यजु० २।१५) । 'अग्नि और सोम उसको हटा दें, जो हमसे द्वेष करता है या जिससे हम द्वेष करते हैं । अन्न की इस प्रेरणा से मैं आगे बढता हूँ । उपभृत् को बायें हाथ से पश्चिम की ओर हटाता है । यदि यजमान स्वय हटावे तो इस प्रकार से ॥१॥

और यदि अध्वर्यु (हटावे तो वह कहेगा) अग्नीषोमयोरुज्जितिमनूज्जयत्वय यजमानो वाजस्यैन प्रसवेन प्रोहाम्यग्नीषोमौ तमपनुदता यमय यजमानो द्वेष्टि यश्चैन द्वेष्टि वाज्यस्यैनं प्रसवेनापोहामि' (यजु० २।१५) । 'अग्नि और सोम की जीत से यह यजमान विजयी होवे । अन्न की प्रेरणा से म आगे बढता हूँ । अग्नि और सोम उसको हटा दें जो इस यजमान से द्वेष करता है या जिससे यह यजमान द्वेष करता है । इस अन्न की प्रेरणा से मैं आगे बढता हूँ । यह पौर्णमास यज्ञ में ऐसा करता है । क्योंकि पौर्णमास यज्ञ अग्नि-सोम का है ॥२॥

अमावस्या में वह यह कहता है, 'इन्द्राग्न्योरुज्जितिमनूज्जेष वाजस्य मा प्रसवेन प्रोहामीन्द्राग्नी तमपनुदता योऽस्मान् द्वेष्टि य च वय द्विष्मो वाजस्यैन प्रसवेनापोहामि' (यजु० २।१५) । 'इन्द्र और अग्नि की जीत से मैं विजयी होऊँ । अन्न की प्रेरणा से मैं आगे बढता हूँ । इन्द्र और अग्नि उसको हटा दें, जो हमसे द्वेष करता है या जिससे हम द्वेष करते हैं । अन्न की इस प्रेरणा से मैं आगे बढता हूँ' । यह उस समय कहना चाहिये जब यजमान स्वय करे ॥३॥

और अध्वर्यु कहे तो इस प्रकार—'इन्द्राग्न्योरुज्जितिमनूज्जयत्वय यजमानो वाजस्यैन प्रसवेन प्रोहामीन्द्राग्नी तमपनुदता यमय यजमानो द्वेष्टि यश्चैन द्वेष्टि वाजस्यैन प्रसवेनापोहामि' । 'इन्द्र और अग्नि की जीत से यजमान विजयी होवे । अन्न की प्रेरणा से मैं आगे

१-२. शु० य० अ० २ क० १५ ।

मीन्द्राग्नी तमपनुदतां यमयं यजमानो द्वेष्टि यश्चैनं द्वेष्टि वाजस्यैनं प्रसवेनापोहामीत्यमावास्यायामैन्द्राग्नश्ं ह्यामावास्यश्ं हविर्भवत्येवं यथादेवतं व्यूहति तद्यदेवं व्यूहति ॥४॥

यजमान एव जुहूमनु । योऽस्माऽअरातीयति स उपभृतमनु प्राञ्चमेवैतद्यजमानमुदूहत्यपाञ्चं तमपोहति योऽस्माऽअरातीयत्यत्तैव जुहूमन्वाद्य उपभृतमनु प्राञ्चमेवैतदत्तारमुदूहत्यपाञ्चमाद्यमपोहति ॥५॥

तद्वाऽएतत् । समानऽएव कर्मन्व्याक्रियते तस्मादु समानादेव पुरुषादत्ता चाद्यश्च जायेतेऽइदश्ं हि चतुर्थे पुरुषे तृतीये सङ्गच्छामहऽइति विदेवं दीव्यमाना जात्या आसतऽएतस्मादु तत् ॥६॥

अथ जुहा परिधीन्त्समनक्ति । यया देवेभ्योऽहौषीद्यया यज्ञश्ं समतिष्ठिपत्तयैवैतत्परिधीन्प्रीणाति तस्माज्जुहा परिधीन्त्समनक्ति ॥७॥

स समनक्ति । वसुभ्यस्त्वा रुद्रेभ्यस्त्वादित्येभ्यस्त्वेत्येते[1] वै त्रयो देवा यद्वसवो रुद्रा

चढ़ता हूँ । इन्द्र और अग्नि उसको हटा दें, जिससे यह यजमान द्वेष करता है या जो इस यजमान से द्वेष करता है । अन्न की प्रेरणा से मै आगे बढ़ता हूँ । यह आमावास्य यज्ञ में होता है । इन्द्र और अग्नि ही अमावस्या के देवता हैं । इस प्रकार वह चमचों को भिन्न-भिन्न देवतों के लिये अलग करता है । यही कारण है कि वह इस प्रकार उनको अलग करता है ॥४॥

जो जुहू के पीछे यजमान होता है और उपभृत् के पीछे वह जो उससे शत्रुता करता है । इस प्रकार वह यजमान को पूर्व मे लाता है, और जो उसका शत्रु है उसको वह पीछे हटा देता है । जुहू के पीछे अत्ता (खाने वाला) होता है । और उपभृत् के पीछे अद्य (खाद्य पदार्थ) होता है । इस प्रकार वह खाने वाले को सामने लाता है और खाद्य को पीछे हटा देता है ॥५॥

इस प्रकार एक ही कर्म से वियोग हो जाता है । इसलिये एक ही पुरुष से अत्ता (भोक्ता या पति) और अद्य (भोग्य या पत्नी) उत्पन्न होते हैं । इसीलिये लोग हँसी मे कहते हैं कि चौथे या तीसरे पुरुष में हम मिल जाते हैं । (तात्पर्य यह मालूम होता है कि तीसरी या चौथी पीढ़ी में विवाह हो सकता था जैसा कि दक्षिणियों मे आजकल भी होता है) । इसके अनुसार चमचे भी अलग होते हैं ॥६॥

अब परिधि समिधाओं को जुहू से (घी लेकर) चुपड़ता है । जिससे देवों के लिये यज्ञ आहुति दी, जिससे यज्ञ को समाप्त किया, उसी से परिधियों को प्रसन्न करता है, इसीलिये जुहू से चुपड़ता है ॥७॥

वह इस मन्त्र को पढ कर घी लगाता है, 'वसुभ्यस्त्वा रुद्रेभ्यस्त्वादित्येभ्यस्त्वा' (यजु० २।१६) । 'वसुओं के लिये तुझको, रुद्रो के लिये तुझको, आदित्यों के लिये

१. शु० स० अ० २ क० १६ ।

आदित्या एतेभ्यस्त्वेत्येवैतदाह ॥८॥

अथ परिधिमभिपद्याश्रावयति । परिधिभ्यो ह्येतदाश्रावयति यज्ञो वाऽआश्रावणं यज्ञेनैवैतत्प्रत्यक्तं परिधीन्प्रीणाति तस्मात्परिधिमभिपद्याश्रावयति ॥९॥

स आश्राव्याह । इषिता दैव्या होतार इति दैव्या वाऽएते होतारो यत्परिधयोऽग्नयो हीष्टा देव्या होतार इत्येवैतदाह यदाहेषिता दैव्या होतार इति भद्रवाच्यायेति स्वयं वाऽएतरमै देवा युक्ता भवन्ति यत्साधु वदेयुर्यत्साधु कुर्युस्तस्मादाह भद्रवाच्यायेति प्रेषितो मानुषः सूक्तवाकायेति तदिम मानुषꣳ होतारꣳ सूक्तवाकाय प्रसौति ॥१०॥

अथ प्रस्तरमादत्ते । यजमानो वै प्रस्तरस्तद्यत्रास्य यज्ञोऽगस्तदेवैतद्यजमानꣳ स्वगाकरोति देवलोकं वाऽअस्य यज्ञोऽगन्देवलोकमेवैतद्यजमानमपि नयति ॥११॥

स यदि वृष्टिकामः स्यात् । एतेनैवाददीत सञ्जानाथा द्यावापृथिवी[1]ऽइति यदा वै द्यावापृथिवी सञ्जानाथेऽअथ वर्षति तस्मादाह सञ्जानाथां द्यावापृथिवीऽइति मित्रावरुणौ[2] तुझको' । यही तीन देव हैं वसु, रुद्र, और आदित्य । 'इनके लिये तुझको' ऐसा कहने का तात्पर्य है ॥८॥

अब परिधि को उठवाकर आश्रावण करता है । (अर्थात् सुनवाता है) । परिधियों के लिये ही इसको सुनवाता है । यज्ञ ही आश्रावण है । स्पष्ट बात यह है कि यज्ञ से ही परिधियों को प्रसन्न कराता है । इसलिये परिधि को उठवाकर आश्रावण करता है ॥९॥

आश्रावण के पश्चात् कहता है, 'इषिता देव्या होतार' । 'दिव्य होता बुलाये गये' । यह जो परिधियाँ हैं वे ही दिव्य होता हैं क्योंकि यह अग्नि हैं । जब यह कहता है कि 'इषिता देव्या होतार' तो यहाँ तात्पर्य है 'इष्टा देव्या होतार' से (इषत) 'इष्ट' के अर्थ में लिया गया है । 'बुलाये गये' अर्थात् 'चाहे गये' । अब कहता है—'भद्रवाच्याय' । 'शुभ वाणी के लिये' । देव स्वयं ही तैयार होते हैं कि इसके लिये अच्छी बात कहें, अच्छी बात करें । इसलिये कहा, 'शुभ वाणी के लिये' । अब कहता है—'प्रेषितो मानुष सूक्तवाकाय' । 'सूक्तवाक (प्रशंसा १) के लिये मनुष्य बुलाया गया' । इस प्रकार मनुष्य होता को सूक्तवाक के लिये बुलाता है ॥१०॥

अब प्रस्तर को लेता है । यजमान ही प्रस्तर है । इसलिये जहाँ कहीं उसका यज्ञ जाय वहीं यजमान का स्वागत करता है । चूँकि उसका यज्ञ देव लोक में गया, इसलिये इस प्रकार वह यजमान को भी ले जाता है ॥११॥

यदि वृष्टि की इच्छा हो तो (प्रस्तर को यह पढ़कर) उठावें । 'सञ्जानाथा द्यावा पृथिवी' (यजु० २।१६) । 'द्यौ और पृथ्वी साथ चलें' । क्योंकि जब द्यौ और पृथ्वी साथ साथ चलते हैं तभी वर्षा होती है । इसलिये कहा, 'द्यावापृथ्वी साथ चलें' । अब कहता

१-२. शु० य० अ० २ क० १६ ।

त्वा वृष्टयावतामिति तद्यो वर्षस्येष्टे स त्वा वृष्टयावत्वित्येवैतदाहायं वै वर्षस्येष्टे योऽय पवते सोऽयमेक इवैव पवते सोऽयं पुरुषेऽन्तः प्रविष्टः प्राङच प्रत्यङ्च ताविमौ प्राणोदानौ प्राणोदानौ वै मित्रावरुणौ तद्य एव वर्षस्येष्टे स त्वो वृष्टयावत्वित्येवैतदाह तमेतेनैवा-ददीत यदा ह्येव कदा च वृष्टिः स मिव तमनक्त्याहुतिमेवैतत्करोत्याहुतिर्भूत्वा देवलोकं गच्छादिति ॥१२॥

स वाऽअग्र जुहामनक्ति । मध्यमुपभृति मूल ध्रुवायामग्रमिव हि जुहूर्मध्यमिवोप-भृन्मूलमिव ध्रुवा ॥१३॥

सोऽनक्ति । व्यन्तु वयोऽक्तश्रि रिहाण[1] इति वय एवैनमेतद्भूतमस्मान्मनुष्यलो-कादेवलोकमभ्युत्पातयति तन्नीचैरिव हरति द्वयं तद्यस्मान्नीचैरिव हरेद्यजमानो वै प्रस्तरो-ऽस्याऽएवैनमेतत्प्रतिष्ठायै नोद्यन्तीहोऽएव वृष्टिं नियच्छति ॥१४॥

स हरति । मरुता[2] पृषतीर्गच्छेति देवलोक गच्छेत्येवैतदाह यदाह मरुता पृषती-

है—'मित्रावरुणौ त्वा वृष्ट्यावताम्' (यजु० २।१६)। 'मित्र और वरुण तेरी वृष्टि द्वारा रक्षा करें'। इस कहने से तात्पर्य यह है कि जो वर्षा का अध्यक्ष है वह तेरी वृष्टि द्वारा रक्षा करे। वही वर्षा का अध्यक्ष है जो यह बहता है (अर्थात् वायु) यह एक ही के समान बहता है। परन्तु वही पुरुष के भीतर जाकर आगे-पीछे होकर दो हो जाते हैं। उनका नाम है प्राण और उदान। प्राण और उदान ही मित्र और वरुण है। इसीलिये यह कहता है 'वह जो वर्षा का अध्यक्ष है तेरी वृष्टि द्वारा रक्षा करे'। इस (प्रस्तर) को वह इस (मन्त्र) द्वारा ले तो सदा वृष्टि उसके अनुकूल रहेगी। वह (प्रस्तर पर) घी लगाता है। मानो यजमान को भी आहुति का रूप देता है, जिससे वह आहुति हो कर देव-लोक को चला जाय ॥१२॥

वह उस (प्रस्तर) के अगले भाग को जुहू में से चुपड़ता है, बीच को उपभृति में से, जड़ को ध्रुवा में से। क्योंकि जुहू अग्रभाग के समान है उपभृति मध्य भाग के और ध्रुवा मूल के समान है ॥१३॥

वह इस मन्त्र से घी लगाता है, 'व्यन्तु वयोक्तश्रि रिहाणा' (यजु० २।१६)। 'व्यन्तु (खावें देव लोग) उक्त (चुपड़े हुये)। वय (पक्षी को) रिहाण. (चाटते हुये)। इस प्रकार वह (यजमान की) पक्षी का रूप देता है और इस मनुष्य लोक से देव-लोक को भेजता है। अब वह उसको दो बार नीचे लाता है। नीचे इसलिये लाता है कि प्रस्तर यजमान का रूप है। इस प्रकार वह उसको प्रतिष्ठा से नहीं हटाता। और अपने स्थान पर वर्षा को लाता है ॥ ४॥

वह नीचे लाने मे यह मन्त्र पढता है। 'मरुता पृषतीर्गच्छ'। (यजु० २।१६)।

१-२. शु० स० अ० २ क० १६ ।

र्गच्छेति वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावहेतीयं[1] वै वशा पृश्निर्यदिदमस्या मूलि चामूल चाबाद्य प्रतिष्ठित तेनेय वशा पृश्निरिय भूत्वा दिव गच्छेत्येवैतदाह ततो नो वृष्टिमावहेति वृष्टाद्धाऽऽद्यसः सुभूत जायते तस्मादाह ततो नो वृष्टिमावहेति ॥१५॥

अथैक तृणमपगृह्णाति । यजमानो वै प्रस्तरः स यत्कृत्स्न प्रस्तरमनुप्रहरेत् क्षिप्रे ह यजमानोऽमु लोकमियात्तथो ह यजमानो ज्योग्जीवति यावद्वेवास्येह मानुषमायुस्तस्मा-ऽएवैतदपगृह्णाति ॥१६॥

तन्मुहूर्त्त धारयित्वानुप्रहरति । तद्यत्रास्येतर आत्मागस्तदेवास्यैतद्गमयत्यथ यत्रा-नुप्रहरेदन्तरियाद्ध यजमानं लोकात्तथो ह यजमान लोकाद्यान्तरेति ॥१७॥

तं प्राञ्चमनुसमस्यति । प्राची हि देवाना दिगथोऽउदञ्चमुदीची हि मनुष्याणा दिक्तमङ्गुलिभिरेव योयुप्येरन काष्ठैर्दर्भैर्वाऽइतरथ्सं शवं व्यूपन्ति नेत्तथा करवाम यथे-

मरुतो की चितकबरी (घोड़ियों) के पास जाओ' । जब वह कहता है कि 'मरुतों की चित-कबरियों के पास जाओ' तो ऐसा कहने का तात्पर्य है । देव-लोक को जाओ । अब कहता है—'वशा पृश्निर्भूत्वा दिव गच्छ ततो नो वृष्टिमावह' (यजु० २।१६) । 'पृश्नि. (चित-कबरी) वशा (गाय) होकर द्यौलोक को जा और हमारे लिये वहाँ से वर्षा ला' [इसका ठीक अर्थ शायद यह होगा कि पृथ्वी अन्तरिक्ष में होकर द्यौ को जावे । (वशा=पृथ्वी, पृश्नि, अन्तरिक्ष) अर्थात् यज्ञ पृथ्वी से अन्तरिक्ष और वहाँ से द्यौ में होकर वर्षा लावे] यह (पृथ्वी) वशा पृश्नि (चितकबरी) गाय है । जिसमें मूल वाले और बिना मूल के अन्न आदि खाद्य-पदार्थ होते हैं । ऐसा कहने से अर्थ यह है कि पृथ्वी बनकर द्यौ लोक को जा और वहाँ से वर्षा ला 'वहाँ से वर्षा ला' । वर्षा से शक्ति, रस और सम्पत्ति होती है । इसी-लिये वह कहता है *'वहाँ से यहाँ वर्षा ला'* ॥१५॥

अब उसमें से एक तृण उठा लेता है । प्रस्तर यजमान है । इसलिये यदि कहीं समस्त प्रस्तर को आग में डाल दे तो यजमान तुरन्त ही परलोक को चला जाय । परन्तु इस प्रकार यजमान बहुत जीता है । और जितनी इस संसार में मनुष्य की आयु हो सकती है उसी के लिये उस प्रस्तर को लेता है ॥१६॥

उसको थोड़ी देर पकड़े रखकर आग में फेंक देता है । और जहाँ उसका इतना आत्मा या भाग गया वहाँ उसको भी भेज देता है । यदि वह उसको आग में न फेंके तो वह उसका परलोक से सम्बन्ध तोड़ देता है । परन्तु इस प्रकार करने से वह यजमान को परलोक से अलग नहीं करता ॥१७॥

उसको पूर्व की ओर (सिर करके) फेंकता है । पूर्व ही देवों की दिशा है । या उत्तर की ओर क्योंकि उत्तर मनुष्यों की दिशा है । उसको अँगुलियों से ही चिकना करें ।

---

१. शु० य० अ० २ क० १६ ।

तरश्छ शवमिति तस्मादङ्गुलिभिरेव योयुप्येरन्न काष्ठैर्यदा होता सूक्तवाहमाह ॥१८॥

अथाग्नीदाहानुप्रहरेति । तद्यत्रास्येतर आत्मागंस्तदेवास्यैतद्गमयेत्येवैतदाह तूष्णीमेवानुप्रहृत्य चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहि[1]त्यात्मानमुपस्पृशति तेनोऽआप्यात्मानं नानुप्रहृणक्ति ॥१९॥

अथाह संवदस्वेति । संवादयैनं देवैरित्येवैतदाहागानग्नीदित्यगन्म्यल्वित्येवैतदाहागन्नितीतरः प्रत्याह श्रावयेति तं वै देवैः श्रावय तमनुबोधयेत्येवैतदाह श्रौषडिति विदुर्वोऽएनमनु वाऽएनममुत्सतेत्येवैतदाहैवमध्वर्युश्चाग्नीच्च देवलोकं यजमानमपि नयतः ॥२०॥

अथाह स्वगा देव्या होतृभ्य इति । दैव्या वाऽएते होतारो यत्परिधयोऽग्नयो हि तानेवैतत्स्वगाकरोति तस्मादाह स्वगा दैव्या होतृभ्य इति स्वस्तिर्मानुषेभ्य इति तदस्मै

लकड़ी या काठ से नहीं । काष्ठ या लकड़ी से लाश को छेदते हैं । ऐसा न हो कि इसके साथ लाश के जैसा, व्यवहार करें इसलिये वह उसे अँगुलियो से ही चिकना करते हैं । लकड़ी से नहीं । जब होता सूक्तवाक को कहता है—॥१८॥

अग्नीध्र कहता है, 'अनुप्रहर अर्थात् (प्रस्तर के) पीछे फेंक दो' । इससे तात्पर्य यह है कि जहाँ उसका दूसरा भाग गया वहाँ इसे भी जाने दो । (अध्वर्यु) उसे चुपके से फेंककर इस मन्त्र से अपने शरीर को छूता है, 'चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहि' (यजु० २।१६) । 'हे अग्नि ! तू आँख का रक्षा करने वाला है । मेरी आँख की रक्षा कर' । इस प्रकार वह अपने को आग में नहीं फेंकता ॥१९॥

अब (अग्नीध्र अध्वर्यु से) कहता है, 'संवदस्व अर्थात् संवाद कर' । इसके कहने से तात्पर्य यह है कि देवताओं के साथ संवाद कर । अब (अध्वर्यु) पूछता है, 'हे अग्नीध्र ! क्या वह (देव लोक) चला गया' ? इसका तात्पर्य यह है कि क्या सचमुच चला गया । वह उत्तर देता है, 'हाँ ! चला गया' । अब (अध्वर्यु) कहता है, 'श्रावय अर्थात् सुना' । इससे तात्पर्य यह है कि (यजमान की बात को) देव सुनें और देव जानें' । अब कहता है, 'श्रौषट् अर्थात् उसको सुनें' । (अग्नीध्र का) ऐसा कहने से तात्पर्य है कि देवों ने उसे जान लिया, पहचान लिया । इस प्रकार अध्वर्यु और अग्नीध्र यजमान को देवलोक को ले जाते हैं ॥२०॥

अब (अध्वर्यु) कहता है, 'स्वगा॰ दैव्या होतृभ्य.' अर्थात् 'देवताओं के होता लोग विदा हों' । ये जो परिधियाँ हैं यही देवताओं के होता हैं क्योंकि (परिधियाँ ही) अग्नि हैं । उन्हीं को विदा करता है । इसलिये कहता है, 'स्वगा दैव्या होतृभ्य.' । अब कहता है,

---

१. शु० स० अ० २ क० १६ ।

॰ जिस प्रकार बुलाने के लिये स्वागत (सु + आगत) होता है, इसी प्रकार भेजने के लिये स्वगा (सु + अगा) कहा ।

मानुषाय होत्रेऽह्वलामाशास्ते ॥२१॥

अथ परिधीननुप्रहरति। स मध्यममेवाग्ने परिधिमनुप्रहरति यं परिधिं पर्यधत्थ अग्ने देव पणिभिर्गुह्यमानः। तं तऽ एतमनु जोषं भराम्येष नेत्त्वदपचेतयाताऽइत्यग्नेः प्रि पाथोऽपीत[1]मितीत रावनुसमस्यति ॥२२॥

अथ जुहूं चोपभृतं च सम्प्रगृह्णाति। अदो हैवाहुतिं करोति यदनक्त्याहुतिर्भूत्व देवलोकं गच्छादिति तस्माज्जुहूं चोपभृतं च सम्प्रगृह्णाति ॥२३॥

स वै विश्वेभ्यो देवेभ्यः सम्प्रगृह्णाति। यद्वाऽअनादिष्टं देवतायै हविर्गृह्यते सर्व वै तस्मिन्देवता अपित्विन्यो मन्यन्ते न वाऽएतत्कस्यै चन देवतायै हविर्गृह्णादिशति यदाज्यं तस्माद्विश्वेभ्यो देवेभ्यः सम्प्रगृह्णात्येतदु वैश्वदेवꣳ हविर्यज्ञे ॥२४॥

स सम्प्रगृह्णाति। सꣳसवभागा स्थेषा बृहन्त[2] इति सꣳसव्रवो ह्येव खलु परिशि

'स्वस्तिर्मानुषेभ्यः' अर्थात् 'मनुष्य के सम्बन्धियों के लिये कल्याण हो'। इसके द्वारा व आशीष देता है कि मनुष्य होता असफल न हो ॥२१॥

अब वह परिधियों को आग में डालता है। पहले मध्यपरिधि को यह मन्त्र पढ़क डालता है, 'यं परिधिं पर्यधत्था अग्ने देव पणिभिर्गुह्यमानः। तं तऽएतमनु जोषं भराम्ये नेत् त्वदपचेतयाता' (यजु० २।१७)। 'हे अग्नि देव। जिस परिधि को तूने अपने चा ओर रक्खा जब तू पणियों से छिपा हुआ था, मैं उस तुझको तेरी प्रसन्नता के लिये भरत हूँ। यह तेरे प्रतिकूल न हो'। शेष दोनों (परिधियों) को इस मंत्रांश से डालता है 'अग्नेः प्रियं पाथोऽपीतम्' (यजु० २।१७)। 'तुम दोनों अग्नि के प्रिय स्थान प प्राप्त हो' ॥२२॥

अब वह जुहू और उपभृत को ग्रहण करता है। पहले जो वह (प्रस्तर को चुपड़ता है तो मानों यह आहुति देता है कि यह आहुति बनकर देवलोक को जा सके इसीलिये वह जुहू और उपभृत् को साथ-साथ पकड़ता है ॥२३॥

वह विश्वे देवों के लिये उनको ग्रहण करता है। क्योंकि जब कोई हवि ऐसी दी जाती है जिसमें किसी देवता के लिये निर्देश न हो तो उसमें सभी देवता समझते हैं कि हमारा भाग है। जब वह आज्य को लेता है तो किसी देवता का निर्देश करके तो हवि ग लेता नहीं, इसलिये वह सब देवों के लिये लेता है। इसलिये वह उस हविर्यज्ञ में आज्य को 'वैश्वदेव' अर्थात् सब देवताओं का बना देता है ॥२४॥

वह उनको इस मन्त्र से ग्रहण करता है, 'सꣳसवभागा स्थेषा बृहन्तः' (यजु २।१८)। 'इषा अर्थात् शक्ति के द्वारा बढ़े आप बचा हुआ भाग लेने वाले होओ' ('संसव' कहते हैं बचे हुये को)। अब कहता है—'प्रस्तरेष्ठाः परिधेयाश्च देवाः' (यजु

---

१. शु० सं० अ० २ क० १७। २. शु० सं० अ० २ क० १८।

भवति प्रस्तरेष्ठाः परिधेयाश्च देवा[1] इति प्रस्तरश्च हि परिधयश्चानुमन्त्रता भवन्तीमां वाचमभि विश्वे गृणन्त[2] इत्येतदु वैश्वदेवं करोत्यासद्यास्मिन्बर्हिषि[3] मादयध्वं३ स्वाहा वाडिति तद्यथा वषट्कृतꣳ हुतमेवमस्यैतद्भवति ॥२५॥

स यस्यानसो हविर्गृह्णन्ति । अनसस्तस्य धुरि विमुञ्चन्ति यतो युनजाम ततो विमुञ्चामेति यतो ह्येव युञ्जन्ति ततो विमुञ्चन्ति यस्यो पात्र्यै स्रुचे तस्य यतो युनजाम ततो विमुञ्चामेति यतो ह्येव युञ्जन्ति ततो विमुञ्चन्ति ॥२६॥

युजौ ह वाऽएते यज्ञस्य यत्स्रुचौ । ते ऽएतद्युड्क्ते यत्प्रचरति स यं निधायावधेद्यथा वाहनमवार्ङ्देवं तत्तेऽएतत्रिवृष्टकृति विमोचनमागच्छतस्ते तत्सादयति तद्विमुञ्चति तेऽएतत्पुनः प्रयुड्क्तेऽनुयाजेषु सोऽनुयाजैश्चरित्वैतद्विमोचनमागच्छति ते तत्सादयति तद्विमुञ्चति तेऽएतत्पुनः प्रयुड्क्ते यत्सम्प्रगृह्णाति तद्या गतिमभियुड्क्ते ता गतिं गत्वा विमुञ्चते यज्ञं वाऽअनु प्रजास्तस्मादय पुरुषो युड्क्तेऽथ विमुञ्चतेऽथ युड्क्ते तद्यां गतिमभियुड्क्ते तां

२।१८) । अर्थात् हे प्रस्तर पर बैठे हुये और परिधि वाले देव' । प्रस्तर और परिधियाँ तो आग में फेंकी जा चुकीं । अब कहता है—'इमा वाचमभि विश्वे गृणन्त.' (यजु० २।१८) । 'इस वाणी को आप सब गृहण करते हुए' । इससे वह उसे वैश्वदेव (सब देवों वाली) करता है । अब कहता है—'आसद्यास्मिन् बर्हिषि मादयध्वꣳस्वाहा वाट्' (यजु० २।१८) । 'इस आसन पर बैठो और स्वाहावाट् को चखो' । जैसे वषट्कृत हवि होता है वैसे ही यह भी है ॥२५॥

गाड़ी से जिसकी हवि लेते हैं उसकी ही गाड़ी की धुरी से (स्रुवों को) अलग करते हैं, कि जहाँ हम जोड़ें वहीं अलग करें । क्योंकि जहाँ जोड़ा करते हैं वहीं अलग करते हैं । (गाड़ी के जिस स्थान पर बैल जोते जाते हैं उसी स्थान पर खोले जाते हैं) । परन्तु पात्र से जिसकी हवि ली जाय उसके लिये स्रुवों को स्रुचा पर रखकर (अलग करें) । कि जहाँ जोड़ें वहीं अलग करें । इसलिये जहाँ जोड़ते हैं वहीं अलग करते हैं ॥२६॥

यह जो स्रुच् (चमचे हैं) यही यज्ञ के दो बैल हैं । जब वह चलता है (यज्ञ आरम्भ करता है) तब उनको जोतता है । अब यदि वह इसको रखकर ही अलग कर दे जैसे बैल को (बिना खोले ही) बिठा दें, तो वह गिर पड़ेगा । स्विष्टकृत् में दोनो चमचों का विमोचन होता है । अब वह इनको खोलता है अर्थात् विमोचन करता है । वह इनको अनुयाजों में फिर जोतता है । अनुयाजों को करने के पश्चात् फिर इनका विमोचन करता है । वह इनको खोलता है अर्थात् विमोचन करता है । जब वह इनका सम्प्रगृहण (साथ छूना) करता है तो फिर जोतता है । जिस गति (यात्रा या कार्य) के लिये उनको जोतता है उसी गति के पार करने पर विमोचन करता है । यज्ञ के पीछे ही प्रजा होती है ।

१-३. शु० य० अ० २ क० १८ ।

गतिं गत्वान्ततो विमुञ्चते स सादयति धृताची स्थो धुर्यौ पातꣳ सुम्ने स्थः सुम्ने मा धत्तमिति[1] *साध्व्यौ स्थः साधौ मा धत्तमित्येवैतदाह ॥२७॥ ब्राह्मणम् ॥१॥ [८. ३.] ॥ अध्यायः ॥ ८ ॥*

इसलिये यह पुरुष पहले जोतता है फिर खोलता है। फिर जोतता है और जिस गति के लिये उसने जोता था वह गति हो जाने के पश्चात् उसको छोड देता है। वह इस मंत्र को पढ़ कर रखता है, 'धृताची स्थो धुर्यौ पातꣳसुम्ने स्थः सुम्ने मा धत्तम्'। 'आप घी के प्रेमी हैं धुरियो की रक्षा करो। आप भद्र हैं। मेरे लिये भद्र कीजिये'। इससे तात्पर्य है कि आप साधु हैं मुझे साधुत्व दीजिये ॥२७॥

---

१. शु० सं० अ० २ क० १६।

अध्याय ९—ब्राह्मण १

स यत्राह । इषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकायेति यदतो होतान्वाह सूक्तऽ इय तदाह यजमानायैवैतदाशिषमाशास्ते तद्धाऽएतदुपरिष्टाद्यज्ञस्याशिषमाशास्ते द्वयं तद्यस्मादुपरिष्टाद्यज्ञस्याशिषमाशास्ते ॥१॥

यज्ञं याऽएष जनयति । यो यजतऽएतेन हुक्ता ऋत्विजस्तन्वते तं जनयन्त्यथाशिषमाशास्ते तामस्मै यज्ञ आशिषꣳ सन्नमयति यामाशिषमाशास्ते यो माजीजनतेति तस्माद्धाऽउपरिष्टाद्यज्ञस्याशिषमाशास्ते ॥२॥

देवान्वाऽएष प्रीणाति । यो यजतऽएतेन यज्ञेनऽर्ग्भिरिव त्वद्यजुर्भिरिव त्वदाहुतिभिरिव त्वत्स देवान्प्रीत्वा तेष्वपित्वी भवति तेष्वपित्वी भूत्वाथाशिषमाशास्ते तामस्मै देवा आशिषꣳ सन्नमयन्ति यामाशिषमाशास्ते यो नोऽप्रैषीदिति तस्माद्धाऽउपरिष्टाद्यज्ञस्याशिषमाशास्ते ॥३॥

अथ प्रतिपद्यते । इदं[1] द्यावापृथिवी भद्रमभूदिति भद्रꣳ ह्यभूद्यो यज्ञस्य सꣳस्था-

जब अध्वर्यु कहता है, 'इषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय' । अर्थात् 'देवों के होता लोग बुलाये गये कल्याण को कहने के लिये और होता सूक्तवाक के लिये' और जब उस पर होता सूक्त कहता है तो वह यजमान के लिये आशीष देता है । वह यज्ञ के पीछे ही आशीष देता है । दो कारण हैं कि वह यज्ञ के पीछे आशीष देता है ॥१॥

जो यज्ञ करता है वह यज्ञ को उत्पन्न करता है । इसी की आज्ञा से ऋत्विज यज्ञ को तानते अर्थात् उत्पन्न करते हैं । अब (होता) आशीष देता है । यह यज्ञ उस आशीष को उसी के लिये मानता है जो आशीष दी जाती है । क्योंकि (यज्ञ समझता है कि) मुझे इसने उत्पन्न किया । इसलिये यज्ञ के अनन्तर ही आशीष दी जाती है ॥२॥

जो यज्ञ करता है वह देवों को अवश्य ही प्रसन्न करता है । इस यज्ञ से देवों को ऋचाओं, यजुओं तथा आहुतियों द्वारा प्रसन्न करके वह देवों का हिस्सेदार हो जाता है । और जब हिस्सेदार हो गया तो होतृ उसके लिये आशीष देता है । और इस उसकी दी हुई आशीष को देवता लोग (यजमान के लिये) मानते हैं क्योंकि वे जानते हैं कि उसने हमें प्रसन्न किया है । इसलिये भी वह यज्ञ के पश्चात् आशीष देता है ॥३॥

अब वह जपता है, 'इदं द्यावा पृथिवी भद्रमभूत्' । 'हे द्यौ और पृथ्वी! यह भद्र हो

---

१. तै० ब्रा० ३. ५. १० ।

स्थामगन्नार्ष्मं सूक्तवाकमुत[1] *नमोवाकमित्युभयं वाऽएतद्यज्ञ एव यत्सूक्तवाकश्च नमोवाकश्चारात्स्म यज्ञमविदाम यज्ञमित्येवैतदाहाग्ने*[2] *त्वꣳ सूक्तवागस्युपश्रुती दिवस्पृथिव्योरित्यग्निमेवैतदाह त्वꣳ सूक्तवागस्युपश्रुत्वत्योरनयोर्द्यावापृथिव्योरित्योमन्वती तेऽस्मिन्यज्ञे यजमान द्यावापृथिवी स्तामित्यन्नवत्यौ तेऽस्मिन्यज्ञे यजमान द्यावापृथिवी स्तामित्येवैतदाह ॥४॥*

शंगवी[3] *जीवदानूऽइति । शंगवी ते जीवदानू स्तामित्येवैतदाहानरनूऽअप्रवेदेऽइति माह कस्माच्चन प्रत्रासीर्मो तऽइदं पुष्टं कश्चन प्रविदतेत्येवैतदाह ॥५॥*

उरुगव्यूती[4]*ऽअभयऽकृताविति । उरुगव्यूती तेऽभये स्तामित्येवैतदाह वृष्टिद्यावा*[5] *रीत्यापेति वृष्टिमत्यौ ते स्तामित्येवैतदाह ॥६॥*

शम्भुवौ[6] *मयोभुवाविति । शम्भुवौ ते मयोभुवौ स्तामित्येवैतदाहोर्ज्जस्वती*[7] *च पयस्वती चेतिरसवत्यौ तऽउपजीवनीये स्तामित्येवैतदाह ॥७॥*

गया' । जिसने यज्ञ समाप्त कर लिये उसके लिये अवश्य ही कल्याण हो गया । 'आर्ष्मं सूक्तवाकमुत नमो वाकम्' । 'हमने सूक्तवाक और नमोवाक कह दिया', क्योंकि यह सूक्तवाक और नमोवाक यज्ञ ही हैं । इसका तात्पर्य है कि हमने यज्ञ को पूरा कर लिया या हमने यज्ञ को प्राप्त कर लिया । अब कहता है, 'अग्ने त्वꣳसूक्तवागस्युपश्रुति दिवस्पृथिव्योः' । इसका तात्पर्य है कि 'हे अग्नि ! तू सूक्तवाक् है और द्यौ तथा पृथिवी उसको सुनते हैं' । अब कहता है, 'ओ मन्वती तेऽस्मिन् यज्ञे यजमान द्यावापृथिवी स्ताम्' । 'हे यजमान ! इस यज्ञ में द्यौ और पृथिवी तेरे लिये कल्याणकारी होवें' । इसका तात्पर्य यह है कि 'हे यजमान इस यज्ञ में द्यौ और पृथ्वी तेरे लिये अन्नवती (अन्न को देने वाली) होवें' ॥४॥

अब कहता है, 'शंगवी जीवदानू' । इसका तात्पर्य यह है कि वह दोनों पशुओं के लिये हितकारी और जीवन को बढ़ाने वाले हैं । अब कहा, 'अनरनूऽअप्रवेदे' । न डरने वाले और समझ में न आने वाले' । इसके कहने से तात्पर्य यह है कि तू किसी से न डरे और तेरे इस धन को तुमसे कोई न ले ॥५॥

अब कहा, 'उरुगव्यूतीऽअभयऽकृतौ' । 'विशाल घर वाले और अभय पाने वाले इससे तात्पर्य है कि उनके घर विशाल हों और वह भय से मुक्त हों । अब कहा, 'वृष्टिद्यावारीत्यापा' यह इसलिये कहा कि वे दोनों वर्षा वाले हों ॥६॥

अब कहा, 'शम्भुवौ मयोभुवौ' । यह इसलिये कहा कि वे दोनों कल्याण करने वाले और दान देने वाले हों । अब कहा, 'ऊर्जस्वती च पयस्वती च' । इसके कहने से तात्पर्य यह है कि वे दोनों रस वाले और जीविका देने वाले हों ॥७॥

१-७. तै० ब्रा० ३, ५, १० ।

सूपचरणा[1] च स्वधिचरणा चेति । सूपचरणाह तेऽसावस्तु यामधस्तादुपचरसि स्वधिचरणो तऽइयमस्तु यामुपरिष्टादधिचरसीत्येवैतदाह तयोरावदीति[2] तयोरनुमन्यमान योरित्येवैतदाह ॥८॥

अग्निरिदꣳ[3] हविः । अजुषतावीवृधत महो ज्यायोऽकृतेति तदाग्नेयमाज्य भागमाह सोम[4] इदꣳ हविरजुषतावीवृधत महो ज्यायोऽकृतेति तत्सौम्यमाज्यभागमाहाग्निरिदꣳ हविरजुषतावीवृधत[5] महो ज्यायोऽकृतेति तद्य एष उभयत्राच्युत आग्नेय पुरोडाशो भवति तमाह ॥९॥

अथ यथादेवतम् । देवा[6] आज्यपा आज्यमजुषन्तावीवृधन्त महो ज्यायोऽकृतेति तत्प्रयाजानुयाजानाह प्रयाजानुयाजा वै देवा आज्यपा अग्निहोत्रेणेदꣳ[7] हविरजुषतावीवृधत महो ज्यायोऽकृतेति तदग्निꣳ होत्रेणाहा जुषतेत्येवं या इष्टा देवता भवन्ति ता सम्पश्यत्यसौ हविरजुषतासौ हविरजुषतेति तद्यज्ञस्यैवैतत्समृद्धिमाशास्ते यदि देवा हविर्जुषन्ते तेन हि

अत्र कहा, 'सूपचरणा च स्वधिचरणा' । 'सूपचरणा' इसलिये कहा कि द्यौ जिसको तू नीचे से छूता है तुझे सुगमता से प्राप्त हो जाय । 'स्वधिचरणा' इसलिये कहा कि यह पृथ्वी जिस पर तू रहता है तुझे स्थान दे । अब कहा, 'तयोरावदी' । 'उन दोनों के ज्ञान से' । इससे तात्पर्य है कि 'उन दोनों की अनुमति से' ॥८॥

अब कहा, 'अग्निरिदꣳहविरजुषतावीवृधत महो ज्यायोऽकृत' । 'अग्नि ने इस हवि को ले लिया । वह बढ गया । वह बड़ा हो गया' । इससे अग्नि के आज्य की ओर संकेत है । अब कहा, 'सोम इदꣳहविरजुषतावीवृधत महो ज्यायोऽकृत' । 'सोम ने इस हवि को ले लिया । वह बढ गया । वह बड़ा हो गया' । इससे सोम के आज्य की ओर संकेत है । अब कहा, 'अग्निरिदꣳहविरजुषतावीवृधत महो ज्यायोऽकृत' । 'अग्नि ने यह हवि ले ली । वह बढ गया । वह बड़ा हो गया' । इससे अग्नि के पुरोडाश से तात्पर्य है जो दर्श और पूर्णमास दोनों यज्ञों में अवश्य ही दिया जाता है ॥९॥

इसी प्रकार अन्य देवों के लिये । 'देवा आज्यपा आज्यमजुषन्तावीवृधन्त महो ज्यायोऽकृत' । 'आज्य या घी को पीने वाले देवों ने आज्य को ले लिया । वह बढ गये । वह बडे हो गये' । यहाँ प्रयाज और अनुयाजों से तात्पर्य है क्योंकि प्रयाज और अनुयाज ही आज्य पान करने वाले देव हैं । अब कहा, 'अग्निहोत्रेणेदꣳहविरजुषतावीवृधत महो ज्यायोऽकृत' । 'होत्र अग्नि ने इस हवि को लिया । वह बढ गया । वह बडा हो गया' । यहाँ 'होत्र अग्नि के लिये कहा । 'जुषता' अर्थात् स्वीकार कर लिया । ऐसा कहकर वह जो देवता इष्ट होते हैं उनको गिनाता है कि इस देव ने हवि स्वीकार की । इस प्रकार यज्ञ की समृद्धि को चाहता है क्योंकि जो कुछ हवि देवता स्वीकार करते हैं उसी से उसको यही चीजों की

१-७ तै० ब्रा० ३ ५. १० ।

महज्जयति तस्मादाहाजुषतेत्यवीवृधतेति यद्वै देवा हविर्जोपयन्ते तदपि गिरमात्रं कुर्वते तस्मादाहावीवृधतेति ॥१०॥

महो[1] ज्यायोऽकृतेति । यज्ञो वै देवाना महस्तथ्ं ह्येतज्ज्यायाथ्ंसमिव कुर्वते तस्मादाह महो ज्यायोऽकृतेति ॥११॥

अस्यामूर्धेद्धोत्रायां[2] देवङ्गमायामिति । अस्याथ्ं राध्नोतु होत्राया देवङ्गमायामित्येवैतदाहाशास्तेऽयं यजमानोऽसाविति नाम गृह्णाति तदेनं प्रत्यक्षमाशिषा सम्पादयति ॥१२॥

दीर्घा[3]युत्वमाशास्तऽइति । सा यामुत्रोत्तरा देवयज्या तदिह प्रत्यक्षं दीर्घायुत्वथ्ं ॥१३॥

सुप्रजास्त्वमाशास्तऽइति । तद्यदमुत्र भूयो हविष्करणं तदिह प्रत्यक्षथ्ं सुप्रजास्त्वं प्रशासनथ्ं स कुर्य्याद्य एवं कुर्यादुत्तरां देवयज्यामाशास्तऽइति त्वेव ब्रूयात्तदेव जीवातुं तत्प्रजां तत्पशून् ॥१४॥

भूयो हविष्करण[4]माशास्तऽइति । तद्वेव तत्सजात[5]वनस्यामाशास्तऽइति प्राणा वै

प्राप्ति होती है । इसलिये कहा कि 'स्वीकार किया' । 'बढ़ गये' इसलिये कहा कि जब देव हवि स्वीकार करते हैं तो पहाड़ से बढ़ जाते हैं । इसलिये कहता है, 'बढ़ गये' ॥१०॥

'बड़े हो गये' इसलिये कहा कि यज्ञ ही देवों का बड़ापन है । इसी को यह बड़ा करते हैं । इसलिये कहा 'बड़े हो गये' ॥११॥

अब कहा, 'अस्यामूर्धेद्धोत्रायां देवङ्गमायाम्' । 'इस देवों के पास जाने वाले होत्र में वृद्धि को प्राप्त हो' । उसके कहने से तात्पर्य यह है कि इस देवों के पास जाने वाले होत्र में फूले फले । अब कहा, 'आशास्तेऽयं यजमानोऽसौ' । 'यह यजमान प्रार्थना करता है' । यहाँ ('असौ') के स्थान में यजमान का नाम लेता है । इस प्रकार प्रत्यक्ष रूप से उस के लिये आशीर्वाद का सम्पादन करता है ॥१२॥

अब कहा, 'दीर्घायुत्वमाशास्ते' । 'बड़े जीवन के लिये प्रार्थना करता है' । जिसको पहले (इदा में) 'देवयज्या' कहा उसी को यहाँ 'दीर्घायु' कहता है ॥१३॥

अब कहा, 'सुप्रजास्त्वमाशास्ते' । 'अच्छी सन्तान के लिये प्रार्थना करता है' । यहाँ पहले 'भूयो हविष्करण' कहा । यहाँ उसी को 'सुप्रजास्त्व' कहा । जो इस प्रकार करेगा उसे शासन प्राप्त होगा । उसको कहना चाहिये, 'देव यज्यामाशास्ते' । 'देव यज्या के लिये प्रार्थना करता है' । इससे दीर्घायु, प्रजा और पशु की प्राप्ति होगी ॥१४॥

अब कहा, 'भूयो हविष्करणमाशास्ते' । बहुत हविष्करण की प्रार्थना करता है' । इससे उसी की प्रार्थना करता है । अब कहा, 'सजातवनस्यामाशास्ते' । 'अपने साथियों

१-५. तै० ब्रा० १. ५. १० ।

सजाताः प्राणैर्हि सह जायते तत्प्राणानाशास्ते ॥१५॥

दिव्यं[1] धामाशास्तऽइति । देवलोके मेऽप्यस्तिति वै यजते यो यजते तद्देवलोकऽएवैनमेतदपीत्यनं करोति यदनेन[2] हविषाशास्ते तदस्यात्तद्ध्यादिति यदनेन हविषाशास्ते तदस्मै सर्वꣳ समृध्यतामित्येवैतदाह ॥१६॥

ता वाऽएताः । पञ्चाशिषः करोति तिस्र इडायां ता अष्टावष्टाक्षरा वै गायत्री वीर्यं गायत्री वीर्यमेवैतदाशिषोऽभिसम्पादयति ॥१७॥

नातो भूयसीः कुर्यात् । अतिरिक्तꣳ ह कुर्यादतो भूयसीः कुर्याद्वै यज्ञस्यातिरिक्तं द्विषन्तꣳ हास्य तदातृव्यमभ्यतिरिच्यते तस्मान्नातो भूयसीः कुर्यात् ॥१८॥

अपीद्वै कनीयसीः सꣳः । तदस्मै देवा[3] रासन्तामिति तदस्मै देवा अनुमन्यन्तामित्येवैतदाह तदग्निर्देवो देवेभ्यो वनुतां[4] वयमग्नेः परि मानुषा इति तदग्निर्देवो देवेभ्यो वनुतां वयमग्नेरध्यस्माऽएतद्वनवामहाऽइत्येवैतदाह ॥१९॥

इष्टं[5] च वित्तं चेति । ऐषिषुरिव वाऽएतद्यज्ञं तमविदंस्तस्मादाहेष्टं च वित्तं चेत्युभे[6] चैनं द्यावापृथिवीऽअन्नꣳहसस्तामित्युभे चैनं द्यावापृथिवीऽआत्तेगोंपायतामित्येके लिये प्रार्थना करता है[1] । प्राण ही 'सजाता' हैं क्योंकि यह साथ उत्पन्न होते हैं । इसलिये प्राणों के लिये प्रार्थना करता है ॥१५॥

अब देव इकट्ठे होकर बोले । हमने शत्रु मार डाले । यह तो चित्र अर्थात् विचित्र बात हुई । इसलिये चित्रा नक्षत्र का चित्रत्व (विचित्रता) है । जो इस रहस्य को समझकर चित्र नक्षत्र में आग्न्याधान करता है वह विचित्र हो जाता है और अहितकारी शत्रुओं का नाश कर देता है । इसलिये क्षत्रिय को अवश्य ही इस नक्षत्र में आग्न्याधान करने की इच्छा होनी चाहिये । क्योंकि ऐसा आदमी प्रायः अपने शत्रु के नाश की इच्छा किया करता है ॥१७॥

पहले यह (नक्षत्र) बहुत से क्षत्र थे जैसे वह सूर्य । जब वह उदय हुआ तो उसने उनके क्षत्र और वीर्य (शक्ति) को ले लिया । इसलिये उसको आदित्य कहते हैं कि वह इन (नक्षत्रों) के वीर्य और क्षत्र को ले लेता है । ['आदत्ते' का अर्थ है 'ले लेता है' । इसी 'आदत्ते' से आदित्य शब्द को निकाला है] ॥१८॥

अब उन देवों ने कहा, 'जो अब तक क्षत्र अर्थात् शक्ति थे वे अब क्षत्र न रहेंगे । इसीलिये नक्षत्रों का नक्षत्रत्व है । अर्थात् पहले वह 'क्षत्र' थे, अब देवों के कहने से क्षत्र नहीं रहे । अर्थात् न + क्षत्र = नक्षत्र हो गये) । इसलिये सूर्य को ही नक्षत्र मानना चाहिये क्योंकि उनका वीर्य सूर्य ने ले लिया । यदि (यजमान को) (आग्न्याधान के लिये) नक्षत्र की आवश्यकता हो तो यह सूर्य अच्छा नक्षत्र है । इस पुण्य दिन में वह जिन नक्षत्रों को चाहे उनका पुण्य ले ले । इसलिये उसको सूर्य को ही नक्षत्र मानना चाहिये ॥१९॥

अध्याय १—ब्राह्मण ३

वसन्तो ग्रीष्मो वर्षाः । ते देवा ऋतवः शरद्धेमन्तः शिशिरस्ते पितरो य एवापूर्यते-

वसन्त, ग्रीष्म, वर्षा ये देव ऋतुएँ हैं । शरद्, हेमन्त और शिशिर ये पितृ-ऋतुएँ हैं

ऽर्धमासः स देवा योऽपक्षीयते स पितरोऽहरेव देवा रात्रिः पितरः पुनरह्नः पूर्वाह्णो देवा अपराह्णः पितरः ॥१॥

ते वाऽएतऽऋतवः । देवाः पितरः स यो हैवं विद्वान्देवाः पितर इति ह्वयत्या ह्वास्य देवा देवहूयं गच्छन्त्या पितरः पितृह्वयमवन्ति हैनं देवा देवहूयेऽवन्ति पितरः पितृह्वये य एवं विद्वान्देवाः पितर इति ह्वयति ॥२॥

स यत्रोदगावर्तते । देवेषु तर्हि भवति देवांस्तर्ह्यभिगोपायत्यथ यत्र दक्षिणावर्तते पितृषु तर्हि भवति पितॄंस्तर्ह्यभिगोपायति ॥३॥

स यत्रोदगावर्तते । तर्ह्यग्नीऽआदधीतापहतपाप्मानो देवा अप पाप्मानꣳ हते ऽमृता देवा नामृतत्वस्याशास्ति सर्वमायुरेति यस्तर्ह्याधत्तेऽथ यत्र दक्षिणावर्तते यस्तर्ह्याधत्तेऽनपहतपाप्मानः पितरो न पाप्मानमपहते मर्त्याः पितरः पुरा हायुषो म्रियते यस्तर्ह्याधत्ते ॥४॥

वसैव वसन्तः । क्षत्रं ग्रीष्मो विडेव वर्षास्तस्माद्ब्राह्मणो वसन्तऽआदधीत ब्रह्म हि वसन्तस्तस्मात्क्षत्रियो ग्रीष्मऽआदधीत क्षत्रꣳ हि ग्रीष्मस्तस्माद्वैश्यो वर्षास्वादधीत विड्ढ

जो आधा-मास बढ़ता है (अर्थात् शुक्ल पक्ष) वह देवों का है और जो घटता है (अर्थात् कृष्ण पक्ष) वह पितरों का है । दिन देवों का है, रात पितरों की । फिर दिन का दोपहर से पूर्व का भाग देवों का है, पिछला भाग पितरों का ॥१॥

अब ये ऋतुयें देवों और पितरों की हैं । जो मनुष्य इस रहस्य को समझकर देवों और पितरों को बुलाता है उसका देव-निमन्त्रण सुनकर देव आ जाते हैं और पितृ-निमन्त्रण सुनकर पितर । जो मनुष्य देव और पितरों को जानकर बुलाता है उसकी देव देव-निमंत्रण में और पितर पितृ-निमन्त्रण में रक्षा करते हैं ॥२॥

वह (सूर्य) जब उत्तर की ओर होता है तो देवों में होता है और देवों की रक्षा करता है और जब दक्षिण की ओर होता है तो पितरों में होता है और पितरों की रक्षा करता है ॥३॥

जब (सूर्य) उत्तरायण हो तो अग्न्याधान करे । (सूर्य के द्वारा) देवों का पाप नष्ट हो गया । उसका भी पाप दूर हो जायगा । देव अमर हैं । इसलिये जो इस समय अग्न्याधान करता है उसको अमरत्व की आशा तो नहीं हो सकती परन्तु वह पूर्ण आयु को प्राप्त हो जाता है । परन्तु जो दक्षिणायन सूर्य में अग्न्याधान करता है उसका पाप नहीं छूटता क्योंकि पितरों का पाप नहीं छूटा । और वह आयु से पहले मर जाता है क्योंकि पितर अमर नहीं हैं ॥४॥

वसन्त ब्राह्मण है, ग्रीष्म क्षत्रिय, वर्षा वैश्य । इसलिये ब्राह्मण वसन्त में अग्न्याधान करे क्योंकि वसन्त ब्राह्मण है । इसलिये क्षत्रिय ग्रीष्म में अग्न्याधान करे क्योंकि ग्रीष्म

वर्षाः ॥५॥

स यः कामयेत । ब्रह्मवर्चसी स्यामिति वसन्ते स आदधीत ब्रह्म वै वसन्तो ब्रह्मवर्चसी हैव भवति ॥६॥

अथ यः कामयेत । क्षत्रञ्च श्रिया यशसा स्यामिति ग्रीष्मे स आदधीत क्षत्रं वै ग्रीष्मः क्षत्रञ्चं हैव श्रिया यशसा भवति ॥७॥

अथ यः कामयेत । बहुः प्रजया पशुभिः स्यामिति वर्षासु स आदधीत विड्वै वर्षा अन्नं विशो बहुर्हैव प्रजया पशुभिर्भवति य एवं विद्वान्वर्षास्वाधत्ते ॥८॥

ते वाऽएतऽऋतवः । उभयऽएवापहतपाप्मानः सूर्य एनेषां पाप्मनोऽपहन्तोद्यन्नेवैषामुभयेषां पाप्मानमपहन्ति तस्माद्यदैवैनं कदा च यज्ञ उपनमेदथाग्नीऽआदधीत न श्वः श्रमुपासीत को हि मनुष्यस्य श्वो वेद ॥९॥ ब्राह्मणम् ॥३॥

क्षत्रिय है । इसलिये वैश्य वर्षा में अग्न्याधान करे क्योंकि वर्षा वैश्य है ॥५॥

जो इच्छा करे कि मैं ब्रह्मवर्चसी हो जाऊँ वह वसन्त में अग्न्याधान करे क्योंकि वसन्त ब्राह्मण है । वह निश्चय करके ब्रह्मवर्चसी हो जाता है ॥६॥

जो चाहे कि मुझे शक्ति, श्री और यश प्राप्त हो वह ग्रीष्म में अग्न्याधान करे, क्योंकि ग्रीष्म क्षत्रिय है । उसे शक्ति, श्री और यश मिलेगा ॥७॥

और जो चाहे बहुत सन्तान तथा पशु हो जायं, वह वर्षा में अग्न्याधान करे, क्योंकि वर्षा वैश्य है । अन्न वैश्य है । जो इस रहस्य को समझ कर वर्षा में अग्न्याधान करता है, उसके बहुत सन्तान और पशु होते हैं ॥८॥

(कुछ का मत है कि) ये दोनों प्रकार की ऋतुयें (देव-ऋतु और पितृ-ऋतु) पापों से मुक्त हैं । सूर्य इनके पापों का दूर करने वाला है । जब वह चमकता है तो इनके पाप नष्ट हो जाते हैं । इसलिये जब कभी यज्ञ की इच्छा हो तभी अग्न्याधान कर ले । कल के ऊपर न टाले क्योंकि कौन जानता है कि कल क्या होगा ? ॥९॥

अध्याय १—ब्राह्मण ४

यदहरस्य ग्नौऽउन्या धेयꣳ स्यात् । दिवैवाग्नीयान्मनो ह वै देवा मनुष्यस्याजानन्ति तेऽस्मैतदहराजानंयं विदुस्तेऽस्य गृहेषूपवसन्ति स उपवसथः ॥१॥

जिस दिन से अगले दिन अग्न्याधान करना है उस दिन (यजमान और उसकी पत्नी) दिन में ही भोजन करे । क्योंकि देव मनुष्यों के मन की बातें जानते हैं । वे जानते हैं कि अगले दिन अग्न्याधान होगा । इसलिये वह देव यज्ञ में आ जाते हैं । वे उसके घरों में ठहरते हैं (उपवसन्ति) । इसलिये इस दिन को उपवसथ (उपवास) कहते हैं ॥१॥

तन्वेवानवक्लृप्तं यो मनुष्येष्वनश्नत्सु पूर्वोऽश्नीयादथ किमु यो देवेष्वनश्नत्सु पूर्वोऽश्नीयात्तस्मादु दिवैवाश्नीयात्तद्वपि काममेव नक्तमश्नीयान्नो ह्यनाहिताग्नेर्व्रतचर्यास्ति मानुषो ह्येवैष तावद्भवति यावदनाहिताग्निस्तस्माद्वपि काममेव नक्तमश्नीयात् ॥२॥

तद्धैकेऽजमुपबध्नन्ति । आग्नेयोऽजोऽग्नेरेव सर्वत्वायेति वदन्तस्तदु तथा न कुर्याद्यद्यस्याजः स्यादग्नीधऽएवैनं प्रातर्दद्यात्तेनैव त काममाप्नोति तस्मादु तन्नाद्रियेत ॥३॥

अथ चातुष्प्राश्यमोदनं पचंति । छन्दाꣳस्येनेन प्रीणीम इति यथा येन वाहनेन स्यन्त्स्यन्त्स्यात्तत्सुहितं कर्नैरं नयादेवमेतदिति वदन्तस्तदु तथा न कुर्याद्यद्धाऽअस्य ब्राह्मणाः कुले वसन्त्यृत्विजश्चानृत्विजश्च तेनैव त काममाप्नोति तस्मादु तन्नाद्रियेत ॥४॥

तस्य सर्पिरासेचनं कृत्वा । सर्पिरासिच्याश्वत्थीस्तिस्रः समिधो घृतेनान्वज्य समिद्ध-

यह अनुचित है कि ठहरे हुये मनुष्यों के भोजन करने से पूर्व वह भोजन कर ले। इससे भी अधिक अनुचित यह है कि ठहरे हुये देवों के भोजन करने से पूर्व भोजन कर ले। इसलिये उस दिन, दिन में ही भोजन करना चाहिये। परन्तु यदि इच्छा हो तो रात में भी भोजन कर सकता है। क्योंकि अभी अग्न्याधान नहीं किया, इसलिये व्रत-चारी तो है नहीं। जब तक अग्न्याधान नहीं करता उस समय तक मनुष्य रहता है। इसलिये इच्छा हो तो रात में भी भोजन कर ले ॥२॥

कुछ लोग बकरे को बाँध लेते हैं। बकरा अग्नि का है। और यह काम अग्नि के सर्वत्व अर्थात् पूर्ति के लिये किया जाता है। परन्तु उसे ऐसा नहीं करना चाहिये। जिसके पास बकरा हो वह प्रातःकाल अग्नीध् (आग्नीध्र) को दे दे, उसी से काम चल जायगा। इसलिये इस प्रथा का आदर न करे ॥३॥

अब वह चार मनुष्यों के योग्य ओदन (चातुष्प्राश्य भात) पकाते हैं (और कहते हैं कि) 'हम इसके द्वारा छन्दों को प्रसन्न करते हैं'। जैसे जिस वाहन (बैलों की जोड़ी) को जोतना चाहें उनको पहले से अच्छी प्रकार खिलाने-पिलाने की आज्ञा देते हैं। परन्तु उसे ऐसा नहीं करना चाहिये। चूँकि ब्राह्मण उसी के कुल में रहते हैं, चाहे वे ऋत्विज हों, चाहे ऋत्विज न हों, इसलिये इसी से उसका काम निकल जाता है। इसलिये इस (प्रथा) का आदर नहीं करना चाहिये ॥४॥

उस (भात) में घी के लिये गड्ढा करके उसमें घी छोड़ कर अश्वत्थ की तीन समिधायें घी में भिगो कर 'समिधा' और 'घी' वाली तीन ऋचाओं* से उनको अग्नि पर

---

* समिधा और घी वाली तीन ऋचायें यह हैं :—

१. समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्। आस्मिन् हव्या जुहोतन ॥
२. सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन। अग्नये जातवेदसे ॥
३. तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य ॥

(यजु० ३। १, २, १)

तीभिर्घृतवतीभिर्ऋग्भिरभ्यादधति शमीगर्भमतदाप्नुम इति वदन्तः स यः पुरस्तात्संवत्सरमभ्यादध्यात्स ह त काममाप्नुयात्तस्मादु तथाद्रियेत ॥५॥

तदु होवाच भाल्लवेयः । यथा वाऽअन्यत्करिष्यन्त्सोऽन्यत्कुर्याद्यथान्यद्वदिष्यन्त्सोऽन्यद्वदेद्यथान्येन पथैष्यन्त्सोऽन्येन प्रतिपद्येतैवं तद्य एतं चातुष्प्राश्यमोदनं पचेदपराद्धिरेव सेति न हि तदवकल्पते यस्मिन्नग्नावृचा वा साम्ना वा यजुषा वा समिधं वाभ्यादध्यादाहुतिं वा जुहुयाद्यत्तं दक्षिणा वा हरेयुरनु वा गमयेयुर्दक्षिणा वा ह्येनꣳ हरन्त्यन्वाहार्यपचनो भविष्यतीत्यनु वा गमयन्ति ॥६॥

अथ जाग्रति जाग्रति देवाः । तद्देवानेवैतदुपावर्तते स सदेवतरः श्रान्ततरस्तपस्वितरोऽग्नीऽआधत्तो तद्वपि काममेव स्वप्यान्नो ह्यनाहिताग्नेर्न तच्चर्यास्ति मानुषो ह्येष तावद्भवति यावदनाहिताग्निस्तस्माद्वपि काममेव स्वप्यात् ॥७॥

तद्धैकेऽनुदिते मथित्वा । तमुदिते प्राञ्चमुद्धरन्ति तदु तदुभेऽअहोरात्रे परिगृह्णीमः प्राणोदानयोर्मनसश्च वाचश्च पर्याप्त्याऽइति वदन्तस्तदु तथा न कुर्यादुभौ हैवास्य तथानुदित-

रस देते हैं, यह कहकर कि शमीगर्भ (शमी वृक्ष के भीतर उत्पन्न हुये अश्वत्थ की लकड़ियों से अग्नि निकाली जाती है) का फल इसी से मिल जाता है । परन्तु उसको यह फल तभी मिलता है जब वह निरन्तर साल भर तक अग्न्याधान से पहले यह तीन आहुतियाँ देता रहे । इसलिये इस प्रथा का आदर नहीं करना चाहिये । [अर्थात् जो फल शमीगर्भ में उत्पन्न हुई समिधाओं से होता है वह अश्वत्थ की तीन समिधाओं को भात में भरे हुये घी में भिगोकर चढ़ाने से होता है । परन्तु याज्ञवल्क्य इसको केवल एक अंश में मानते हैं] ॥५॥

इस पर भाल्लवेय का कहना है कि 'चातुष्प्राश्य' भात पकाना उसी प्रकार अनुचित है जैसे कोई एक कार्य की इच्छा करे और करे दूसरा, या एक बात कहना चाहे और कहे दूसरी । या एक मार्ग से जाना चाहे और जाये दूसरे से । यह ठीक नहीं है कि जिस अग्नि में ऋक्, यजु या साम से आहुति चढ़ावें उसी अग्नि को या तो दक्षिण में ले जाये या बुझा दे । परन्तु अन्वाहार्यपचन (भात पकाने) के लिये या तो यह इस भाग को दक्षिण को ले जाते हैं या बुझा देते हैं । (इसलिये यह कार्य अनुचित है) ॥६॥

अब यह जागरण करते हैं । देव जागते रहते हैं । इसलिये यह इस प्रकार देवों के निकट हो जाता है और अधिक देवता बनकर, श्रान्त बनकर और तपस्वी होकर अग्न्याधान करता है । परन्तु यदि उसकी इच्छा हो तो सो भी रहे क्योंकि अग्न्याधान करने से पहले तो ब्रह्मचारी होता नहीं । जब तक अग्न्याधान नहीं किया तब तक यह साधारण मनुष्य है और इच्छा के अनुसार सो सकता है ॥७॥

कुछ लोग सूर्योदय से पूर्व अग्नि को मथकर सूर्योदय के पश्चात् पूर्व की ओर (गार्हपत्य से आहवनीय की ओर) ले जाते हैं जिससे रात और दिन दोनों का काम निकल

ऽआहितो भवतोऽनुदिते हि मथित्वा तमुदिते प्राञ्चमुद्धरन्ति स य उदितऽआहवनीयं मन्येत्स ह तत्पर्याप्नुयात् ॥८॥

अहर्वै देवाः । अनपहतपाप्मानः पितरो न पाप्मानमपहते मर्त्याः पितरः पुरा हायुषो म्रियते योऽनुदिते मन्थत्यपहतपाप्मानो देवा अप पाप्मानꣳ हतेऽमृता देवा नामृतत्वस्याशास्ति सर्वमायुरेति श्रीर्देवाः श्रियं गच्छति यशो देवा यशो ह भवति य एवं विद्वानुदिते मन्थति ॥९॥

तदाहुः । यन्नऽर्चा न साम्ना न यजुषाग्निराधीयतेऽथ केनाधीयतऽइति ब्रह्मणो हैवैष ब्रह्मणाधीयते वाग्वै ब्रह्म तस्यै वाचः सत्यमेव ब्रह्म ता वाऽएताः सत्यमेव व्याहृतयो भवन्ति तदस्य सत्येनैवाधीयते ॥१०॥

भूरिति वै प्रजापतिः । इमामजनयत भुव इत्यन्तरिक्षꣳ स्वरिति दिवमेतावद्वाऽइदꣳ सर्वं यावदिमे लोकाः सर्वेणैवाधीयते ॥११॥

भूरिति वै प्रजापतिः । ब्रह्माजनयत भुव इति क्षत्रꣳ स्वरिति विशमेतद्वाऽइदꣳ

आवे तथा प्राण उदान और मन वाणी का भी । परन्तु उसको ऐसा नहीं करना चाहिये । क्योंकि जब सूर्योदय के पश्चात् पूर्व की ओर ले जाते हैं तो दोनों अग्नियाँ सूर्योदय के पूर्व की ही हो जाती हैं । सूर्योदय के पश्चात् आहवनीय को मथने से भी यही कार्य निकल सकता है ॥८॥

देव दिन हैं । पितर पाप-शून्य नहीं हैं । (अर्थात्) सूर्य ने पितरों के पाप छुड़ाये नहीं इसलिये जो सूर्योदय से पूर्व अग्नि को मथता है वह पापों से मुक्त नहीं होता । और पितर अमर नहीं हैं इसलिये वह जो सूर्योदय से पूर्व अग्नि को मथता है, पूर्ण आयु से पूर्व मर जाता है । जो पुरुष इस रहस्य को समझकर सूर्योदय के पश्चात् अग्नि को मथता है, वह पापों से छूट जाता है क्योंकि देव पापों से मुक्त हैं । और यद्यपि अमर नहीं होता तो भी पूर्ण आयु को अवश्य प्राप्त होता है क्योंकि देव अमर हैं । श्री को प्राप्त होता है क्योंकि देव श्री हैं । यश को प्राप्त होता है क्योंकि देव यश हैं ॥९॥

इस पर कुछ लोग कहते हैं कि यदि ऋक्, साम और यजुः से अग्न्याधान न किया जाय तो किससे किया जाये । (इसका उत्तर यह है कि) यह अग्नि ब्रह्म की है इसलिये ब्रह्म से ही इसका आधान होना चाहिये । वाणी ब्रह्म है । उसी वाणी का यह (अग्नि) है । ब्रह्म सत्य है और इन व्याहृतियों में सत्य है । इसलिये सत्य के द्वारा इसका आधान होता है ॥१०॥

प्रजापति ने 'भूः' से इस (पृथ्वी) को उत्पन्न किया । 'भुवः' से अन्तरिक्ष को और 'स्वः' से द्यौलोक को । यह जो तीन लोक हैं उतना ही जगत् है । इसलिये 'भूः' से ही आधान किया जाता है ॥११॥

प्रजापति ने 'भूः' से ब्राह्मण उत्पन्न किये, 'भुवः' से क्षत्रिय और 'स्वः' से वैश्य ।

सर्वं यावद्ब्रह्मक्षत्रं विट् सर्वेणैवाधीयते ॥१२॥

भूरिति वै प्रजापतिः । आत्मानमजनयत भुव इति प्रजाꣳ स्वरिति पशूनेतावद्वाऽ-इदꣳ सर्वं यावदात्मा प्रजा पशवः सर्वेणैवाधीयते ॥१३॥

स वै भूर्भुव इति । एतावतैव गार्हपत्यमादधात्यथ यत्सर्वैरादध्यात्केनाहवनीयमाद-ध्याद्द्वेऽक्षरे परिशिनष्टि तेनोऽएतान्ययातयामानि भवन्ति तैः सर्वैः पञ्चभिराहवनीयमा-दधाति भूर्भुवः स्वरिति तान्यष्टावक्षराणि सम्पद्यन्तेऽष्टाक्षरा वै गायत्री गायत्रमग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसाधत्ते ॥१४॥

देवान्ह वाऽअग्नीऽआधास्यमानान् । तानसुररक्षसानि ररक्षुर्नाग्निर्जनिष्यते नाग्नी आधास्यध्वऽइति तद्यदरक्षांस्तस्माद्रक्षाꣳसि ॥१५॥

ततो देवा एतं यज्ञं ददृशुः । यदश्वं तं पुरस्तादुदधयंस्तस्याभयेऽनाष्टे निवातेऽ-ग्निरजायत तस्माद्यत्राग्निं मन्थिष्यन्त्स्यात्तदश्वमानेतवै ब्रूयात्स पूर्वेणोपतिष्ठते वज्रमेवैतदु-द्यच्छति तस्याभयेऽनाष्टे निवातेऽग्निर्जायते ॥१६॥

यह जो ब्राह्मण, क्षत्रिय और वैश्य हैं इतना ही सब जगत् है, इसलिये 'सब' से ही आधान किया जाता है ॥१२॥

प्रजापति ने 'भू' से आत्मा को, 'भुवः' से प्रजा को और 'स्वः' से पशुओं को उत्पन्न किया । यह जो आत्मा, प्रजा और पशु हैं उतना ही यह सब जगत् है इसलिये 'सब' से ही आधान किया जाता है ॥१३॥

वह 'भूर्भुवः' से गार्हपत्य अग्नि का आधान करता है । यदि सब (तीनों व्याहृतियों) से आधान करता तो आहवनीय का आधान किससे करता । इसलिये दो अक्षर (स्वः) छोड़ देता है । इससे (शेष तीन अक्षर) अधिक प्रभावशाली हो जाते हैं । इन पाँचों अक्षरों से अर्थात् 'भूर्भुवः स्वः' से आहवनीय का आधान करता है । इस प्रकार आठ अक्षर हो जाते हैं । गायत्री में भी आठ अक्षर होते हैं । गायत्री अग्नि का छन्द है । इस प्रकार वह (अग्नि का) आधान (अग्नि के ही) छन्द से करता है ॥१४॥

देवों ने अग्नियों का आधान करना चाहा । असुर और राक्षसों ने उनको रोका (और कहा कि) 'अग्नि उत्पन्न न होगी', 'अग्नि का आधान मत करो' । चूँकि उन्होंने रोका (अरक्षन्) इसलिये 'रक्ष्' धातु से उनका नाम राक्षस पड़ा ॥१५॥

तब देवों ने इस यज्ञ अर्थात् 'अश्व' को देखा । उन्होंने उसको सामने खड़ा कर लिया । और उसके भय रहित, शत्रुरहित संरक्षण में अग्नि को उत्पन्न किया । इसलिये जहाँ अग्नि को मथना हो वहाँ अश्व को ले जाओ, ऐसा (अध्वर्यु अग्नीध्र को) बोले । यह सामने खड़ा होता है । यज्ञ को उठाता है और उसके भयरहित और शत्रु-शून्य संरक्षण में अग्नि उत्पन्न होती है ॥१६॥

स वै पूर्ववाट् स्यात् । सह्यपरिमितं वीर्यमभिवर्धते यदि पूर्ववाहं न विन्देदपि य एव कश्चाश्वः स्याद्यश्च न विन्देदप्यनड्वानेव स्यादेष ह्येवानडुहो बन्धुः ॥१७॥

तं यत्र प्राञ्चꣳ हरन्ति । तत्पुरस्तादश्व नयन्ति तत्पुरस्तादेवैतन्नाष्ट्रा रक्षाꣳस्यपघ्नन्त्येत्यथाभयेनानाष्ट्रेण हरन्ति ॥१८॥

त वै तथैव हरेयुः । यथैनमेष प्रत्यङ्ङुपा चरेदेष वै यज्ञो यदग्निः प्रत्यङ् हैवैनं यज्ञः प्रविशति त क्षिप्रे यज्ञ उपनमत्यथ यस्मात्पराङ् भवति पराङ हैवास्माद्यज्ञो भवति स यो हैनं तत्रानुव्याहरेत्पराङस्माद्यज्ञोऽभूदितीश्वरो ह यत्तथैव स्यात् ॥१९॥

एष उ वै प्राणाः । तं वै तथैव हरेयुर्यथैनमेष प्रत्यङ्ङुपाचरेत्प्रत्यङ् हैवैनं प्राणः प्रविशत्यथ यस्मात्पराङ् भवति पराङ् हैवास्मात्प्राणो भवति स यो हैनं तत्रनुव्याहरेत्पराङस्मात्प्राणोऽभूदितीश्वरो ह यत्तथैव स्यात् ॥२०॥ शतम् ॥ ९०० ॥

अय वै यज्ञो योऽयं पवते । तं वै तथैव हरेयुर्यथैनमेष प्रत्यङ्ङुपाचरेत्प्रत्यङ् हैवैनं यज्ञः प्रविशति तं क्षिप्रे यज्ञ उपनमत्यथ यस्मात्पराङ भवति पराङ् हैवास्माद्यज्ञो भवति

इसको पूर्ववाट् (पूर्व को चलने वाला या शायद अगुआ या युवा घोडा) होना चाहिये । क्योंकि इसमें अपरिमित वीर्य होता है । यदि पूर्ववाट् अश्व न मिले तो जैसा अश्व मिले वही सही । यदि अश्व न मिले तो अनड्वान (बैल) ही ले ले । क्योंकि यह (अग्नि) बैल का बन्धु है ॥१७॥

और जब वह इस (अग्नि) को पूर्व की ओर ले जाते हैं तो आगे-आगे घोड़े को ले जाते हैं । इस प्रकार आगे-आगे चलकर यह दुरात्मा राक्षसों को हटाता चलता है । और वे इस (अग्नि) को (आहवनीय तक) बिना भय और बिना शत्रु के ले जाते हैं ॥१८॥

इस (अग्नि) को इस प्रकार ले जायें कि उसका मुँह (यजमान की ओर) रहे । यह अग्नि ही यज्ञ है । यजमान की ओर ही यज्ञ प्रवेश होता है उसी की ओर यज्ञ शीघ्र झुक जाता है । और जिसकी ओर से यह (अग्नि) मुँह फेर लेता है उसकी ओर से यज्ञ भी मुँह फेर लेता है । यदि कोई किसी को दुर्वाक्य कहे कि यज्ञ तुझसे मुँह फेर ले तो उसका ऐसा ही हो जाय ॥१९॥

यह (अग्नि) प्राण है । इस (अग्नि) को इस प्रकार ले जाये कि इसका मुँह (यजमान की ओर) रहे । क्योंकि उधर से ही प्राण घुसता है । यदि (अग्नि) किसी से मुँह फेर लेता है तो प्राण भी उससे मुँह फेर लेता है । यदि कोई किसी से दुर्वाक्य कहे कि प्राण तुझसे मुँह फेर ले तो ऐसा ही हो जाय ॥२०॥

यह जो पवन है वही यज्ञ है । इस (अग्नि) को इस प्रकार ले जायें कि उसका मुँह (यजमान की) ओर रहे । क्योंकि इसी की ओर यज्ञ प्रवेश होता है, इसी की ओर मुँह फेर लेता है, उसकी ओर से यज्ञ भी झुक जाता है । जिसकी ओर से यह (अग्नि) मुँह फेर लेता है, उसकी ओर से यज्ञ भी

स यो हैनं तत्रानुव्याहरेत्पराङस्माद्यज्ञोऽभूदितीश्वरो ह यत्तथैव स्यात् ॥२१॥

एष उ वै प्राणः । ते वै तथैव हरेयुर्यथैनमेष एतत्पङ्क्तमाचरेत्प्रत्यङ् हैवैनं प्राणः प्रविशत्यथ यस्मात्पराङ् भवति पराङु हैवास्मात्प्राणो भवति स यो हैनं तत्रानुव्याहरेत्पराङस्मात्प्राणोऽभूदितीश्वरो ह यत्तथैव स्यात्तस्मादु तथैव हरेयुः ॥२२॥

अथाश्वमाक्रमयति । तमाक्रम्य प्राच्यमुन्नयति त पुनरावर्तयति तमुदञ्चं प्रमुञ्चति वीर्यं वाऽअश्वो नेदस्मादिदं परागीर्यमसदिति तस्मात्पुनरावर्तयति ॥२३॥

तमश्वस्य पदऽआधत्ते । वीर्यं वाऽअश्वो वीर्यऽएवैनमेतदाधत्ते तस्मादश्वस्य पदऽआधत्ते ॥२४॥

स वै तूष्णीमेवाग्नऽउपस्पृशति । अथोद्यच्छत्यथोपस्पृशति भूर्भुवः स्वरित्येव तृतीयेनादधाति त्रयो वाऽइमे लोकास्तदिमानेवैतल्लोकानाप्नोत्येतन्न्वेकम् ॥२५॥

अथेदं द्वितीय । तूष्णीमेवाग्नऽउपस्पृशत्यथोद्यच्छति भूर्भुवः स्वरित्येव द्वितीयेना-

मुँह फेर लेते हैं । यदि कोई किसी से दुर्वाक्य कहे कि यज्ञ तुझ से मुँह फेर ले तो ऐसा ही हो जाय ॥२१॥

यह (अग्नि) प्राण है । इस (अग्नि) को इस प्रकार ले जाये कि इसका मुँह (यजमान की ओर) रहे क्योंकि इधर से ही प्राण घुसता है । यदि (अग्नि) किसी से मुँह फेर लेता है तो प्राण भी उससे मुँह फेर लेता है । यदि कोई किसी से दुर्वाक्य कहे कि प्राण उससे मुँह फेर ले तो ऐसा ही हो जाय । इसलिये अग्नि को हम इस प्रकार ले जायँ ॥२२॥

अश्व (अध्वर्यु) अश्व को (आहवनीय की ओर) ले जाता है । जब वह वहाँ पहुँच गया तो वह उसे पूर्व की ओर ले जाता है । (गार्ही ओर से दाक्षिणी ओर) घुमाता है । और पश्चिम-मुख खड़ा कर देता है । अश्व वीर्य है । वह अश्व को फिर इस प्रकार घुमाता है कि वीर्य उसकी ओर मुँह न मोड़ ॥२३॥

वह अग्नि को अश्व के पद-चिह्न पर रखता है । अश्व वीर्य है । इस प्रकार वीर्य में वह इस अग्नि को रखता है । इसीलिये अश्व के पद-चिह्न में वह अग्नि को रखता है ॥२४॥

पहले वह चुपके से (अग्नि से पद-चिह्न को) छूता है । फिर वह उसको उठाता है और फिर छूता है । फिर तीसरी बार रख देता है यह मन्त्र पढ़कर—'भूर्भुवः स्व' (यजु० ३।५) । तीन ही लोक हैं । इस प्रकार वह इन लोकों को प्राप्त होता है । यह अग्न्याधान की एक विधि है ॥२५॥

दूसरी विधि यह है—कि चुपके से पहले छुये, फिर उठाये फिर दूसरी बार में ही 'भूर्भुवः स्व' से आधान कर दे । बिना भूमि पर पैर जमाये जो बोझ को उठाता है वह उठा

दधाति यो वाऽअस्यामप्रतिष्ठितो भारमुद्यच्छति नैनꣳ शक्नोत्युद्यन्तुꣳ सꣳ हैनꣳ शृणाति ॥२६॥

स यत्तूष्णीमुपस्पृशति । तदस्यां प्रतिष्ठायां प्रतितिष्ठन्ति सोऽस्यां प्रतिष्ठित आधत्ते तथा न व्यथते तदु हैतत्पश्चेव दभ्रिरऽआसुरिः पाञ्चिर्माधुकिः सर्व वाऽअन्यदियसितमिव प्रथमेनैवोद्यत्यादध्याद्भूर्भुवः स्वरिति तदेवानियसितमित्यतो यतमथा कामयेत तथा कुर्यात् ॥२७॥

अथ पुरस्तात्परीत्य । पूर्वार्धमुल्मुकानामभिपद्य जपति द्यौरिव भूम्ना पृथिवीव वरिम्णेति यथासौ द्यौर्बह्वी नक्षत्रैरेवं बहुर्भूयासमित्येवैतदाह यदाह द्यौरिव भूम्नेति पृथिवीव वरिम्णेति यथेयं पृथिव्युर्व्येवमुरुर्भूयासमित्येवैतदाह तस्यास्ते पृथिवि देवयजनि पृष्ठेऽइत्यस्यै ह्येनं पृष्ठेऽआधत्तेऽग्निमन्नादमन्नाद्यायादधेऽइत्यन्नादो ऽग्निरन्नादो भूयासमित्येवैतदाह सैषाशीरेव स यदि कामयेत जपेदेतद्यदु कामयेतापि नाद्रियेत ॥२८॥

अथ सर्पराज्ञ्या ऋग्भिरुपतिष्ठते । आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥ अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन्महिषो दिवम् ॥ त्रिꣳशन्नहीं सकता । बोझ उसको दबा देता है । इसलिये वह पहली बार पैर जमा लेता है फिर बोझ उठाता है । पहली बार अग्नि से पद चिह्न को छूना पैर जमाने के तुल्य है ॥२६॥

यह जो चुपके से छूता है मानो इस पृथ्वी मे पैर जमाता है और आधान करता है । अब इसमें कोई व्यथा अर्थात् आपत्ति नहीं होती । आसुरि, पाञ्जि और माधुकि इस अग्नि को कुछ पश्चिम की ओर हटाकर रखते थे । उनका कथन था कि (अग्नि के छूने से) सब चीजें कुछ हट जाती हैं इसलिये पहले ही उठाकर 'भूर्भुवः स्वः' से आधान करना चाहिये । परन्तु जैसा चाहे करे ॥२७॥

अब (यजमान) (अग्नि के) पूर्व की ओर मुड़ता है । और जलती हुई समिधाओं का पूर्वार्ध पकड़ कर कहता है—'द्यौरिव भूम्ना पृथिवीव वरिम्णा' (यजु० ३।५) । 'द्यौ के समान बहुत और पृथ्वी के समान विस्तृत' । 'द्यौरिव भूम्ना' कहने से तात्पर्य यह है कि जैसे द्यौलोक मे बहुत से नक्षत्र हैं इसी प्रकार मैं भी बहुत हो जाऊँ' । और 'पृथिवीव वरिम्णा' कहने से तात्पर्य यह है कि जैसे पृथ्वी बड़ी है वैसे ही मैं भी हो जाऊँ । अब कहता है—'तस्यास्ते पृथिवि देवयजनि पृष्ठे' (यजु० ३।५) । 'हे देव-यज्ञ के योग्य पृथ्वी, उस तेरी पीठ पर' । क्योंकि इसी की पीठ पर आधान करता है । अब कहता है—'अग्निमन्नादमन्नाद्यायादधे' (यजु० ३।५) । 'अन्न के खाने वाले अग्नि को अन्न की प्राप्ति के लिये रखता हूँ' । अग्नि अन्न का खाने वाला है । ऐसा कहने से तात्पर्य यह है कि मैं अन्न को खाने वाला होऊँ । यह आशीर्वाद है । चाहे तो जपे और चाहे तो छोड़ दे ॥२८॥

अब सर्प-राज्ञी वाली (तीन) ऋचाओं को पढ़कर यज्ञ करता है—'आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥१॥ अन्तश्चरति रोचनास्य प्राणादपा-

द्धाम विराजति वाक्पतङ्गाय धीयते । प्रति वस्तोरह द्युभिरिति तद्यदेवास्यात्र सम्भारैर्वा नक्षत्रैर्वर्तुभिर्वाधानेन वानाप्तं भवति तदेवास्यैतेन सर्वमाप्तं भवति तस्मात्सर्पराज्ञ्या ऋग्भिरुपतिष्ठते ॥२६॥

तदाहुः । न सर्पराज्ञ्या ऋग्भिरुपतिष्ठेतेतीयं वै पृथिवी सर्पराज्ञी स यदेवास्यामाधत्ते तत्सर्वान्कामानाप्नोति तस्मान्न सर्पराज्ञ्या ऋग्भिरुपतिष्ठेतेति ॥३०॥ ब्राह्मणम् ॥४॥ अध्यायः १ ॥ [१०] ॥

नती । व्यख्यन् महिषो दिवम् ॥२॥ त्रिꣳशद्धाम विराजति वाक् पतङ्गाय धीयते । प्रति वस्तोरह द्युभिः ॥३॥ (यजु० ३।६,७,८ या ऋग्वेद १०।१८६।१,२,३) ।

[टिप्पणी :—इन मन्त्रों की ऋषिका सार्पराज्ञी है) । 'यह पृश्नि (चितकबरी) गौ आई और मा के आगे खड़ी हो गई । और पिता के आगे स्वर्लोक को हुई' ॥१॥ 'इसने प्राण से साँस लेती हुई चमकने वाले अन्तरिक्ष के बीच में चलती है । बड़े (पदार्थ) द्वारा द्यौलोक को व्याख्या करती हुई' ॥२॥ 'तीन सौ धामों के ऊपर विराजती है । वाणी पतङ्ग (सूर्य) के लिये धारण की जाती है । प्रात.काल प्रकाशों के द्वारा'] ॥३॥

यह इन सर्पराज्ञी वाली ऋचाओं को खड़े खड़े इसलिये पढ़ता है कि जिस वस्तु की प्राप्ति उसको यज्ञ की तैयारी से, या नक्षत्रों से, या ऋतुओं से, या अग्न्याधान से न हो सकी वह सब इससे हो जाती है ॥२६॥

परन्तु कुछ लोगों का कहना है कि सर्पराज्ञी वाली ऋचाओं को खड़े-खड़े पढ़ने की आवश्यकता नहीं । क्योंकि यह पृथ्वी ही सर्पराज्ञी है । जब पृथ्वी में अग्न्याधान किया जाता है तो सब कामनाओं की पूर्ति हो जाती है । इसलिये सर्पराज्ञी वाली ऋचाओं को खड़े-खड़े पढ़ने की आवश्यकता नहीं ॥३०॥

अध्याय १—ब्राह्मण १

उद्धृत्याहवनीयं पूर्णाहुतिं जुहोति । तद्यत्पूर्णाहुतिं जुहोत्यन्नादं वाऽएतमात्मनो जनयते यदग्निं तस्माऽएतदन्नाद्यमपिदधाति यथा कुमाराय वा जाताय वत्साय वा स्तनमपिदध्यादेवमस्माऽएतदन्नाद्यमपिदधाति ॥१॥

स एतेनान्नेन शान्तः । उत्तराणि हवींष्यपि श्रप्यमाणान्युपरमति शश्वद्ध वाऽअध्वर्युं वा यजमानं वा प्रदहेत्तौ ह्यस्य नेदिष्ठं चरतो यदस्मिन्नेतामाहुतिं न जुहुयात्तस्माद्वाऽएतामाहुतिं जुहोति ॥२॥

तां वै पूर्णां जुहोति सर्वं वै पूर्णꣳ सर्वेणैवैनमेतच्छमयति स्वाहाकारेण जुहोत्यनिरुक्तो वै स्वाहाकारः सर्वं वाऽअनिरुक्तꣳ सर्वेणैवैनमेतच्छमयति ॥३॥

यां वै प्रजापतिः । प्रथमामाहुतिमजुहोत्स्वाहेति वै तामजुहोत्सो स्विदेषा निदानेन तस्मात्स्वाहेति जुहोति तस्यां वरं ददाति सर्वं वै वरः सर्वेणैवैनमेतच्छमयति ॥४॥

तदाहुः । एतामेवाहुतिꣳ हुत्वाथोत्तराणि हवींꣳषि नाद्रियेतैतयेव तं काममाप्नोति

आहवनीय अग्नि को निकाल कर पूर्ण आहुति देता है । पूर्ण आहुति इसलिये देता है कि वह अपने लिये (अग्नि को) अन्न का खाने वाला बनाता है । इसलिये वह उसको अन्न देता है । जैसे उत्पन्न हुये कुमार या बछड़े के लिये स्तन पिलाते हैं उसी प्रकार वह इस को अन्न देता है ॥१॥

इस अन्न से शान्त होकर (अग्नि) आने वाली हवियों के पकाने की प्रतीक्षा करता है । यदि उस (अग्नि) में यह आहुति न दी जाय तो वह अध्वर्यु को या यजमान को जला दे क्योंकि यही उसके पास होकर चलते हैं । इसीलिये वह उसको यह आहुति देता है ॥२॥

इस आहुति को (चमसे में) पूरा भर कर देता है । पूर्ण का अर्थ है 'सब' । इस प्रकार वह 'सब' से उसको शान्त करता है । 'स्वाहा' कह के वह यह आहुति देता है । 'स्वाहा' अनिरुक्त अर्थात् अपरिमित है । 'सब' भी अपरिमित है । इस प्रकार 'सब से' इस को शान्त करता है ॥३॥

प्रजापति ने जो पहली आहुति दी वह 'स्वाहा' कहकर दी । निदान से यह आहुति भी वैसी ही है इसलिये स्वाहा कहके देता है । इसमें वह वर देता है । 'वर' का अर्थ है 'सब' इसलिये 'सब' के द्वारा उसको शान्त करता है ॥४॥

इस पर कुछ लोग कहते हैं कि इस आहुति को देकर अब पीछे से कोई आहुतियाँ न दी जावें क्योंकि जो इच्छा उन आहुतियों के देने से पूरी होती वह इसी आहुति के देने

यमभिकाममुत्तराणि हवींष्यपि निर्वपतीति ॥५॥

स वाऽअग्नये पवमानाय निर्वपति । प्राणो वै पवमानः प्राणमेवास्मिन्नेतद्दधाति तद्वेतयैवास्मिंस्तद्दधात्यन्नꣳ हि प्राणोऽन्नमेषाहुतिः ॥६॥

अथाग्नये पावकाय निर्वपति । अन्नं वै पावकमन्नमेवास्मिन्नेतद्दधाति तद्वेतयैवास्मिंस्तद्दधात्येषा ह्येव प्रत्यक्षमन्नमाहुतिः ॥७॥

अथाग्नये शुचये निर्वपति । वीर्यं वै शुचि यद्वाऽअस्यैतदुज्ज्वलत्येतदस्य वीर्यꣳ शुचि वीर्यमेवास्मिन्नेतद्दधाति तद्वेतयैवास्मिंस्तद्दधाति यदाह्येवास्मिन्नेतामाहुतिं जुहोत्यथारयैतद्वीर्यꣳ शुच्युज्ज्वलति ॥८॥

तस्मादाहुः । एतामेवाहुतिꣳ हुत्वाथोत्तराणि हवींष्यपि नाद्रियेतैतयैव तं काममाप्नोति यमभिकाममुत्तराणि हवींष्यपि निर्वपतीति तदु निर्वपेदेवोत्तराणि हवींष्यपि परोऽक्षमिव वाऽएतद्यददस्तदिदमितीव ॥९॥

स यदग्नये पवमानाय निर्वपति । प्राणा वै पवमानो यदा वै जायतेऽथ प्राणोऽथ

से पूरी हो जाती है ॥५॥

अब वह 'अग्नि पवमान' के लिये आहुति निकालता है । प्राण ही पवमान है । इसलिये वह इस प्रकार उस (यजमान) मे प्राण धारण कराता है । और वह इस (आहुति) के द्वारा उसमे धारण कराता है । अन्न ही प्राण है और अन्न ही यह आहुति है ॥६॥

अब वह 'अग्नि पावक' के लिये आहुति देता है । अन्न ही पावक है । उस (यजमान) मे वह इस प्रकार अन्न को धारण कराता है । वह इसी (आहुति) के द्वारा उसमे धारण कराता है । और वह इस आहुति के द्वारा ऐसा करता है क्योंकि प्रत्यक्ष रूप से यह आहुति अन्न है ॥७॥

अब 'शुचि अग्नि' के लिये वह आहुति देता है । शुचि वीर्य है । यह जो उसकी ज्वाला है वही वीर्य है । इस प्रकार वह यजमान मे वीर्य (पराक्रम) धारण कराता है । वह इस आहुति के द्वारा उसमें वीर्य धारण कराता है क्योंकि जब वह आहुति देता है तो वीर्य (अर्थात् शुचि) प्रज्वलित होता है ॥८॥

इसलिये कहते हैं कि इस आहुति को देकर पीछे की आहुतियाँ न दी जायें क्योंकि जो काम पीछे की आहुतियाँ देने से चलता है वह इसी आहुति के देने से चल जाता है । परन्तु उनको पिछली आहुतियाँ भी देनी चाहिये क्योंकि (पूर्ण आहुति में) जो परोक्ष सा था वह इसमें प्रत्यक्ष हो जाता है ॥९॥

अग्नि पवमान के लिये आहुति इसलिये देता है कि प्राण ही पवमान है । जब बच्चा उत्पन्न होता है तब प्राण (का सचार) होता है । और जब तक उत्पन्न नहीं होता

वावन्न जायते मातुर्वैव तावत्प्राणमनु प्राणिति यथा वा तज्जातऽएवास्मिन्नेतत्प्राणं दधाति ॥१०॥

अथ यदग्नये पावकाय निर्वपति । अन्नं वै पावकं तज्जातऽएवास्मिन्नेतदन्नं दधाति ॥११॥

अथ यदग्नये शुचये निर्वपति । वीर्यं वै शुचि यदा वाऽअन्नेन वर्धतेऽथ वीर्यं तदनेनैवैनमेतद्वर्धयित्वाथास्मिन्नेतद्वीर्यꣳ शुचि दधाति तस्मादग्नये शुचये ॥१२॥

तद्वेतदेव सद्विपर्यस्तमिव । अग्निर्ह यत्र देवेभ्यो मनुष्यानभ्युपावर्तत तदेक्षां चक्रे सर्वेणैवात्मना मनुष्यानभ्युपावृतमिति ॥१३॥

स एतास्तिस्रस्तनूरेषु लोकेषु विन्यधत्त । यदस्य पवमानꣳ रूपमासीत्तदस्यां पृथिव्यां न्यधत्ताथ यत्पावकं तदन्तरिक्षेऽथ यच्छुचि तद्दिवि तद्वाऽऋषयः प्रतिबुबुधिरे यऽउ तर्ह्यृषय आसुरसर्वेण वै न आत्मनाग्निरभ्युपावृतदिति तस्मा ऽएतानि हवीꣳष्यपि निरवपन् ॥१४॥

स यदग्नये पवमानाय निर्वपति । यदेवास्याग्यां पृथिव्याꣳ रूपं तदेवास्यैतेनाप्नोत्यथ यदग्नेय पावकाय निर्वपति यदेवास्यान्तरिक्षे रूपं तदेवास्यैतेनाप्नोत्यथ यदग्नये शुचये

तब तक मा के प्राण से साँस लेता है और जब वह उत्पन्न होता है तो उसमें प्राण आता है ॥१०॥

अग्नि पावक के लिये आहुति इसलिये देता है कि अन्न ही पावक है । इस प्रकार जब बच्चा उत्पन्न होता है तब उसमें अन्न धारण कराया जाता है ॥११॥

अग्नि-शुचि के लिये आहुति इसलिये देता है कि शुचि वीर्य है । जब अन्न से बढ़ता है तो वीर्य होता है । अन्न से ही इसकी वृद्धि करा के उसमें शुचि अर्थात् वीर्य को धारण कराता है । इसलिये अग्नि-शुचि के लिये आहुति दी जाती है ॥१२॥

दूसरी प्रथा (केवल पूर्ण आहुति देने की) ठीक नहीं । जब अग्नि देवों से चलकर मनुष्यों तक आया तो उसने चाहा कि मैं अपनी सम्पूर्ण आत्मा से मनुष्यों के पास न आऊँ ॥१३॥

तब उसने इन लोकों में अपने तीन शरीर रक्खे । उसका जो पवमान रूप था वह पृथिवी में रक्खा । जो पावक रूप था वह अन्तरिक्ष में और जो 'शुचि' रूप था वह द्यौलोक में । जो ऋषि उस समय थे उन ऋषियों को यह मालूम हो गया कि अग्नि सम्पूर्ण आत्मा से हमारे पास नहीं आया । इसलिये उन्होंने अग्नि के लिये वे आहुतियाँ तैयार कीं ॥१४॥

अब वह अग्नि-पवमान के लिये आहुति देता है तो वह उस रूप को प्राप्त करता है जो इस पृथिवी में रक्खा हुआ है । अब अग्नि-पावक के लिये आहुति देता है तो उस रूप को प्राप्त करता है जो अन्तरिक्ष में रक्खा हुआ है । और अग्नि शुचि के लिये आहुति देता है तो उस रूप को प्राप्त करता है जो द्यौ में रक्खा हुआ है । इस प्रकार वह सम्पूर्ण

निर्वपति यदेवास्य दिवि रूपं तदेवास्यैतेनाप्नेत्येवमु कृत्स्नमेवाग्निमनपनिहितमाधत्ते तस्मादु निर्वपेदेवोत्तराणि हवींष्यपि ॥१५॥

केवलबर्हिः प्रथमयै हविर्भवति । समानबर्हिषीऽउत्तरेऽअयं वै लोकः प्रथमयै हविरथेदमन्तरिक्षं द्वितीयं द्यौरेव तृतीयं बहुलेव वाऽइयं पृथिवी लेलयेवान्तरिक्षं लेलयेवासौ द्यौरुभे चिदेनां प्रत्युद्यामिनीस्तामिति तस्मात्समानबर्हिषि ॥१६॥

अष्टाकपालाः सर्वे पुरोडाशा भवन्ति । अष्टाक्षरा वै गायत्री गायत्रमग्नेश्छन्दः स्वेनै-वैनमेतच्छन्दसाधत्ते तानि सर्वाणि चतुर्विंशतिः कपालानि सम्पद्यन्ते चतुर्विंशत्यक्षरा वै गायत्री गायत्रमग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसाधत्ते ॥१७॥

अथादित्यै चरुं निर्वपति । प्रच्यावतऽइव वाऽएषोऽस्माल्लोकाद्य एतानि हवींष्यपि निर्वपतीमान्हि लोकान्त्समारोहन्नेति ॥१८॥

स यदादित्यै चरुं निर्वपति । इयं वै पृथिव्यदितिः सेयं प्रतिष्ठा तदस्यामेवैतत्प्रति-ष्ठायां प्रतितिष्ठति तस्मादादित्यै चरुं निर्वपति ॥१९॥

तस्यै विराजौ संयाज्ये स्यातामित्याहुः । विराड्वीयमित्यथो त्रिष्टुभौ त्रिष्टुभीयमि-

अग्नि को बिना बिगाड़े हुये रख देता है । इसलिये भी उसको पिछली आहुतियाँ देनी चाहिये ॥१५॥

पहली आहुति में केवल बर्हि (कुश) होता है । बाद की दो आहुतियों में एक ही बर्हि होता है । पहली हवि इस लोक को, दूसरी अन्तरिक्ष को तीसरी द्यौ लोक को (प्रकट करती है)। यह पृथिवी बहुला (दृढ या ठहरी हुई) सी है । अन्तरिक्ष लेलया अर्थात् काँपता सा है, द्यौ भी लेलया अर्थात् काँपता सा है । यह दोनों उस पृथिवी के समान हो जायँ इसलिये उन दोनों के लिये एक ही बर्हि होता है ॥१६॥

सब पुरोडाश आठ कपालों में होते हैं । गायत्री में आठ अक्षर होते हैं । गायत्री अग्नि का छन्द है । इस प्रकार वह अग्नि को उसी के छन्द के द्वारा रखता है । कुल कपाल २४ होते हैं । गायत्री में भी चौबीस अक्षर होते हैं । गायत्री अग्नि का छन्द है । वह अग्नि को उसी के छन्द के द्वारा रखता है ॥१७॥

अदिति के लिये चरु (उबला भात) देता है । जो इन हवियों को देता है वह इस लोक से उठता जैसा है अर्थात् वह इन लोकों को चढ़ता है ॥१८॥

जब वह अदिति के लिये चरु (भात) देता है तो यही पृथिवी अदिति है । यही ठहरी हुई है । इस प्रकार वह इस ठहरी हुई पृथिवी में स्थित होता है इसलिये अदिति के लिये चरु (भात) देता है ॥१९॥

कुछ लोग कहते हैं कि उस (अदिति) के लिये दो विराज् छन्द संयाज्य होवें । क्योंकि विराज् ही पृथिवी है; या त्रिष्टुभ् क्योंकि त्रिष्टुभ् यह पृथिवी है; या जगती

त्यथो जगत्यौ जगती हीयमिति विराजावित्येव स्याताम् ॥२०॥

तस्यै धेनुर्दक्षिणा । धेनुरिव वाऽइयं मनुष्येभ्यः सर्वान्कामान्दुहे माता धेनुर्मातेव वाऽइयं मनुष्यान्बिभर्ति तस्माद्धेनुर्दक्षिणैतन्वेकमयनम् ॥२१॥

अथेदं द्वितीयम् । आग्नेयमेवाष्टाकपालं पुरोडाशं निर्वपति परोऽक्षमिव वाऽएतद्यदग्नये पवमानायाग्नये पावकायाग्नये शुचयऽइतीवाथाञ्जसैवैनमेतत्प्रत्यक्षमाधत्ते तस्मादग्नेऽयादित्यै चरुं निर्वपति स य एव चरोर्बन्धुः स बन्धुः ॥२२॥ ब्राह्मणम् ॥५॥ [२. १]

क्योंकि जगती यह पृथिवी है परन्तु विराज् छन्द ही होने चाहिये ॥२०॥

इसके लिये दक्षिणा धेनु है । धेनु जैसी ही यह पृथिवी है । वह मनुष्यों की सब कामनाओं को दूध के समान देती है । धेनु मा है । यह पृथिवी भी मा है । क्योंकि मनुष्यों का पालन करती है । इसलिये इसकी दक्षिणा धेनु है । यह (आहुतियों की) एक विधि हुई ॥२१॥

अब दूसरी । आठ कपालों के पुरोडाश को केवल अग्नि के लिये अर्पण कर देता है । मानो परोक्ष रीति से अग्नि-पवमान के लिये, अग्नि-पावक के लिये और अग्नि-शुचि के लिये और इसके पश्चात् ही वह अग्नि का प्रत्यक्ष रूप से आधान कर देता है । इसलिये वह पहले अग्नि के लिये, फिर अदिति के लिये चरु देता है । चरु के साथ वैसी ही करता है (जैसा पूर्व विधि में) ॥२२॥

अध्याय २—ब्राह्मण २

घ्नन्ति वाऽएतद्यज्ञं । यदेनं तन्वते यन्त्रवेव राजानमभिषुण्वन्ति तत्तं घ्नन्ति यत्पशुꣳ संज्ञपयन्ति विशासति तत्तं घ्नन्त्युलूखलमुसलाभ्यां दृषदुपलाभ्याꣳ हविर्यज्ञं घ्नन्ति ॥१॥

स एष यज्ञो हतो न ददत्ते । तं देवा दक्षिणाभिरदत्तयंस्तद्यदेनं दक्षिणाभिरदत्तयंस्तस्माद्दक्षिणा नाम तद्यदेवान्न यज्ञस्य हतस्य व्यथते तदेवास्यैतद्दक्षिणाभिर्दत्तयत्यथ

जब यज्ञ को करते हैं तो उसका आघात करते हैं । जब (सोम) राजा को निचोड़ते हैं तो उसका आघात करते हैं । जब पशु को मारते या काटते हैं तो उसका आघात करते हैं । ऊखल और मूसली से तथा (चक्की के) दोनों पत्थरों से हवि का आघात करते हैं ॥१॥

मारा हुआ यज्ञ शक्ति-रहित हो गया (दत्त न रहा) । देवों ने दक्षिणा देकर उसको दत्त बनाया । चूँकि दक्षिणाओं द्वारा उसको दत्त बनाया इसलिये इनका दक्षिणा नाम पड़ा । इन दक्षिणाओं के द्वारा उन्होंने उस (यज्ञ) को दत्त बनाया । यज्ञ समृद्ध (शक्तिशाली)

समृद्ध एव यज्ञो भवति तस्माद्दक्षिणा ददाति ॥२॥

ता वै षड्दद्यात् । षड्वाऽऋतवः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतीभिर्दक्षयति ॥३॥

द्वादश दद्याद् । द्वादश वै मासाः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतीभिर्दक्षयति ॥४॥

चतुर्विंशतिं दद्यात् । चतुर्विंशतिर्वै संवत्सरस्यार्धमासाः संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतीभिर्दक्षयत्येषा मात्रा दक्षिणानां दद्यात्त्वेव यथाश्रद्धं भूयसीस्तद्दक्षिणा ददाति ॥५॥

द्वया वै देवा देवाः । अहैव देवा अथ ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्ते मनुष्यदेवास्तेषां द्वेधा विभक्त एव यज्ञ आहुतय एव देवानां दक्षिणा मनुष्यदेवानां ब्राह्मणानाꣳ शुश्रुवुषामनूचानानामाहुतिभिरेव देवान्प्रीणाति दक्षिणाभिर्मनुष्यदेवान्ब्राह्मणाञ्छुश्रुवुषोऽनूचानांस्तऽएनमुभये देवाः प्रीताः सुधाया दधति ॥६॥

तद्यथा योनौ रेतो दध्यात् । एवमेवैतदृत्विजो यजमानं लोके दधति तद्यदेभ्यो हिरण्यं दक्षिणा ददाति तद्यथा योनौ रेतो दधत्येवमेवैतदृत्विजो यजमानं लोके दधति तद्यदेभ्यो

दी जाती है इसीलिये दक्षिणा दी जाती है ॥२॥

(दक्षिणा में) छः (गौयें) दे । संवत्सर में छः ऋतुयें होती हैं । संवत्सर यज्ञ-प्रजापति है । जितना यज्ञ है, जितनी उसकी मात्रा है, उतनी ही दक्षिणाओं से इसको दक्ष बनाता है ॥३॥

बारह (गौयें) दे । संवत्सर के बारह मास होते हैं । संवत्सर यज्ञ प्रजापति है । जितना बड़ा यज्ञ है, जितनी इसकी मात्रा है, उतनी ही दक्षिणाओं से उसको दक्ष बनाता है ॥४॥

चौबीस दे । संवत्सर के चौबीस अर्द्धमास (पक्ष) होते हैं । संवत्सर यज्ञ प्रजापति है । जितना बड़ा यज्ञ होता है, जितनी उसकी मात्रा होती है, उतनी ही दक्षिणाओं से वह उसको दक्ष बनाता है । दक्षिणाओं की यह मात्रा है । या श्रद्धा हो तो अधिक भी दे । दक्षिणा इसलिये दी जाती है कि— ॥५॥

दो प्रकार के देव होते हैं । देव तो देव ही हैं और जो ब्राह्मण वेदों के जानने वाले और उपदेश करने वाले हैं वे मनुष्य देव हैं । उनका यज्ञ दो भागों में विभक्त है । देवों की आहुतियाँ हैं, और मनुष्यदेव, ब्राह्मण, वेदज्ञ, वेदोपदेष्टाओं की दक्षिणा । आहुतियों से देवों को प्रसन्न करता है और मनुष्य देव, ब्राह्मण, वेदज्ञ, वेदोपदेष्टाओं को दक्षिणाओं से । दोनों प्रकार के देव प्रसन्न होकर उसके लिये सुधा (अमृत) देते हैं ॥६॥

जैसे योनि में वीर्य रक्खा जाता है इसी प्रकार ऋत्विज लोग यजमान को (स्वर्ग) लोक में रखते हैं, अब कि वह इनको दक्षिणा देता है कि ये उसे वहाँ पहुँचा देंगे ।

एतद्ददाति ये मेदश्च सम्प्रापिपक्षिति नु दक्षिणानाम् ॥७॥

देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे तऽउभयऽएवानात्मान आसुर्मर्त्या ह्यासुरनात्मा हि मर्त्यस्तेषूभयेषु मर्त्येष्वग्निरेवामृत आस तꣳ ह स्मोभयेऽमृतमुपजीघ्नन्ति स यꣳ ह स्मैषां घ्नन्ति तद्ध स्म वै स भवति ॥८॥

ततो देवाः । तनीयाꣳस इव परिशिशिपिरे तेऽर्चन्तः श्राम्यन्तश्चेरुस्तासुरान्त्सपत्नान्मर्त्यानभिभवेमेति तऽएतदमृतमग्न्याधेयं ददृशुः ॥९॥

ते होचुः । हन्तेदममृतमन्तरात्मन्वादधामहै त ऽइदममृतमन्तरात्मन्नाधायामृता भूत्वा स्तर्या भूत्वा स्तर्यान्त्सपत्नान्मर्त्यानभिभविष्याम इति ॥१०॥

ते होचुः । उभयेषु वै नोऽयमग्निः प्रत्वेवासुरेभ्यो ववामेति ॥११॥

ते होचुः । आ वै वयमग्नी धास्यामहेऽथ यूयं किं करिष्यथेति ॥१२॥

ते होचुः । अथैनं वयं न्येन धास्यामहेऽत्र तृणानि दहात्र दारूणि दहात्रोदनं पचात्र माꣳसं पचेति स यं तमसुरा न्यदधत तेनानेन मनुष्या भुञ्जते ॥१३॥

अथैनं देवाः । अन्तरात्मन्वादधत तऽइममृतमन्तरात्मन्नाधायामृता भूत्वा स्तर्या भूत्वा स्तर्यान्त्सपत्नान्मर्त्यानभ्यभवंस्तथोऽएवैष एतदमृतमन्तरात्मन्नाधत्ते नामृतत्वस्याशास्ति

दक्षिणाओं के विषय मे (यह बात हुई) ॥७॥

देव और असुर दोनों प्रजापति की सन्तान (बडाई के लिये) भगाइने लगे । वे दोनों आत्मा-रहित थे । क्योंकि वह मर्त्य थे । जो मर्त्य होता है वह आत्मा-रहित होता है । इन दोनों मर्त्यों में केवल अग्नि ही अमर था । और इसी अमर के सहारे वे दोनों जीते थे । अब (असुरों ने) जिस (देव) को मारा वही मर गया ॥८॥

अब देव निर्बल हो गये । अब वह पूजा करते और तप करते रहे कि अपने शत्रु मर्त्य असुरों पर विजय पा सकें । उन्होंने इस अमर आग्न्याधेय को देखा ॥९॥

उन्होंने कहा, 'हम इस अमर को अपने आत्मा के भीतर धरें । हम इस अमृत को अपने आत्मा के भीतर रख लेंगे और अमर और अजेय हो जायँगे तो हम अपने जीतने के योग्य शत्रुओं पर विजय पा लेंगे' ॥१०॥

उन्होंने कहा, 'यह अग्नि हम दोनों के पास है । इसलिये असुरों से खुल्लमखुल्ला कहें' ॥११॥

उन्होंने कहा, 'हम दोनों अग्नियों का आधान करेंगे । तब तुम क्या करोगे' ? ॥१२॥

उन्होंने कहा, 'हम इसका आधान करेंगे और कहेंगे, यहाँ तिनकों को जला, यहाँ लकड़ियों को जला, यहाँ भात पका, यहाँ मास पका' । असुरों ने जिस अग्नि का आधान किया वह वही है जिससे मनुष्य खाना पकाते हैं ॥१३॥

तब देवों ने इस अग्नि को अपने अन्तरात्मा में धारण किया और इसको अपने अन्तरात्मा में धारण करके अमर और विजयी हो गये तथा अपने जीतने योग्य असुर मर्त्य

सर्वमायुरेत्यस्तयों हैव भवति न हैनꣳ सपत्नस्तुस्तूर्षमाणश्चन स्तृणुते तस्माद्यदाहिताग्निश्चानाहिताग्निश्च स्पर्धेतेऽआहिताग्निरेवाभिभवत्यस्तयों हि खलु स तर्हि भवत्यमृतः ॥१४॥

तद्यैनमदो मथन्ति । तज्जातमभिप्राणिति प्राणो वाऽअग्निर्जातमेवैनमेतत्सन्तं जनयति स पुनरपानिति तदेनमन्तरात्मन्नाधत्ते सोऽस्यैषोऽन्तरात्मन्नग्निराहितो भवति ॥१५॥

तमुद्दीप्य समिन्द्धे । इह यच्चऽइह सुकृतं करिष्यामीत्येवैनमेतत्समिन्द्धे योऽस्यैषोऽन्तरात्मन्नग्निराहितो भवति ॥१६॥

अन्तरेणागाद्व्यवृतदिति । न ह वाऽअस्यैतं कश्चनान्तरेणैति यावज्जीवति योऽस्यैषोऽन्तरात्मन्नग्निराहितो भवति तस्माद्धु तन्नाद्रियेत यदनुगच्छेन्न ह वाऽअस्यैषोऽनुगच्छति यावज्जीवति योऽस्यैषोऽन्तरात्मन्नग्निराहितो भवति ॥१७॥

ते वाऽएते प्राणा एव यदग्नयः । प्राणोदानावेवाहवनीयश्च गार्हपत्यश्च व्यानोऽन्वाहार्यपचनः ॥१८॥

शत्रुओं पर विजय प्राप्त कर लेता। इसी प्रकार यह (यजमान) भी अपनी अन्तरात्मा में इस अमर अग्नि को धारण करता है और यद्यपि उसे अमर होने की आशा नहीं होती वह पूर्ण आयु को प्राप्त होता है क्योंकि वह अजेय हो जाता है और उसका शत्रु उस पर विजय पाना चाहता है परन्तु विजय पा नहीं सकता। और इसलिये जब एक आहिताग्नि और अनाहिताग्नि परस्पर झगड़ते हैं तो आहिताग्नि अनाहिताग्नि को जीत लेता है। क्योंकि ऐसा करने से वह अवश्य ही दुर्जेय और अमर हो जाता है ॥१४॥

अब जब (अग्नि को) मथते हैं, तो उस उत्पन्न हुये (अग्नि) को (यजमान) फूँकता है। प्राण ही अग्नि है। मानो उस पैदा हुये को वह पैदा करता है। अब वह (यजमान) साँस को भीतर खींचता है। इस प्रकार वह (अग्नि को) अपने अन्तरात्मा में धारण करता है और वह अग्नि उसके अन्तरात्मा में स्थापित हो जाती है ॥१५॥

उसको जलाकर उद्दीप्त करता है 'इससे यज्ञ करूँगा। इससे शुभ कर्म करूँगा'। इस प्रकार वह उस अग्नि को उद्दीप्त करता है जो उसके अन्तरात्मा में स्थापित होती है ॥१६॥

(कुछ लोगों को भय है) कि कोई विघ्न बीच में आ जाय या अग्नि बुझ जाय। परन्तु जीवन-पर्यन्त कोई उसके और अग्नि के बीच में नहीं आ सकता जिसके अन्तरात्मा में अग्नि स्थापित रहती है। इसलिये उसे भय न करना चाहिये। और बुझने के विषय में—जब तक वह जीता है वह अग्नि नहीं बुझ सकती जो उसके अन्तरात्मा में स्थापित रहती है ॥१७॥

ये जो अग्नियाँ हैं वे प्राण ही हैं। आहवनीय प्राण है। गार्हपत्य उदान है। अन्वाहार्यपचन अग्नि व्यान है ॥१८॥

तस्य वाऽएतस्याग्न्याधेयस्य । सत्यमेवोपचारः स यः सत्यं वदति यथाग्निꣳ समिद्धं तं घृतेनाभिषिञ्चेदेवꣳहैनꣳ स उद्दीपयति तस्य भूयो भूय एव तेजो भवति श्वः श्वः श्रेयान्भवत्यथ योऽनृतं वदति यथाग्निꣳ समिद्धं तमुदकेनाभिषिञ्चेदेवꣳ हैनꣳ स जासयति तस्य कनीयः कनीय एव तेजो भवति श्वः श्वः पापीयान्भवति तस्मादु सत्यमेव वदेत् ॥१६॥

तदु हाप्यरुणौपवेशि ज्ञातय ऊचुः । स्थविरो वाऽअस्यग्नीऽआधत्स्वेति स होवाच ते मैतद्ब्रूथ वाचंयम एवैधि न वाऽआहिताग्निनानृतं वदितव्यं न वदन्जातु नानृतं वदेत्तावत्सत्यमेवोपचार इति ॥२०॥ ब्राह्मणम् ॥६॥ [२. २.] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या ॥११४॥

इस अग्न्याधेय का उपचार (सेवा) सत्य है । जो कोई सच बोलता है मानो वह अग्नि पर घी छिड़कता है । क्योंकि उससे वह उसको प्रज्वलित करता है । उसका दिन-प्रति-दिन तेज बढ़ता है । दिन-प्रति-दिन उसका कल्याण होता है । और जो कोई झूठ बोलता है मानो वह जलती आग पर पानी डालता है क्योंकि वह इस प्रकार उसको कमजोर करता है । दिन-प्रति-दिन उसका तेज कम होता जाता है और दिन-प्रति-दिन वह पापी होता जाता है । इसलिये सच ही बोलना चाहिये ॥१६॥

औपवेशि अरुण से उसके बिरादरी वालों ने कहा, 'आप स्थविर (बूढ़े) हैं । दोनों अग्नियों का आधान कीजिये' । उसने उत्तर दिया, 'ऐसा मत कहो । वाणी का संयम करो । जो आहिताग्नि है उसे झूठ नहीं बोलना चाहिये । अच्छा हो कि वह कुछ न बोले । परन्तु झूठ बोले ही नहीं । इसलिये सत्य ही उपचार है' ॥२०॥

पुनराधेयम्

अध्याय १—ब्राह्मण ३

वरुणो हैनद्राज्यस्याग आदधे। स राज्यमगच्छत्तस्माद्यश्चैवं वेद यश्च न वरुणो राजेत्येवाहुः सोमो यशस्कामः स यशोऽगच्छत्तस्माद्यश्च सोमे लभते यश्च नोभावेवागच्छतो यश एवैतद्द्रष्टुमागच्छन्ति यशो ह भवति राज्यं गच्छति य एवं विद्वानाधत्ते ॥१॥

अग्नौ ह वै देवाः। सर्वाणि रूपाणि निदधिरे यानि च ग्राम्याणि यानि चारण्यानि विजयं वोपप्रेप्यन्तः कामचारस्य वा कामायार्थं नो गोपिष्टो गोपायदिति वा ॥२॥

तान्वु हाग्निर्निचक्रमे। तैः संवृतऽर्नून्प्रविवेश पुनरेम इति देवा एदग्नि तिरोभूतं तेपाध्य हेयसेनास किमिह कर्तव्यं केह प्रदेति वा ॥३॥

तत एतत्त्वष्टा पुनराधेयं ददर्श। तदादधे तेनाग्नेः प्रियं धामोपजगाम सोऽस्माऽउभयानि रूपाणि प्रतितिःससर्ज यानि च ग्राम्याणि यानि चारण्यानि तस्मादाहुस्त्वाष्ट्राणि वै

वरुण ने इस (अग्नि) का राज्य की कामना से आधान किया। उसने राज्य को पा लिया। इसलिये चाहे कोई (अग्न्याधान करने वाला) जाने या न जाने, लोग उस (अग्न्याधान करने वाले) को 'वरुण राजा' कहते हैं। सोम ने यश की कामना से (अग्न्याधान किया)। वह यशस्वी हो गया। इसलिये चाहे कोई सोम का लाभ करे या न करे दोनों ही यश पाते हैं, क्योंकि लोग यश को ही देखने आते हैं। जो पुरुष इस रहस्य को समझकर अग्न्याधान करता है वह यशस्वी होता है और राज्य को प्राप्त होता है ॥१॥

देवों ने सब रूपों को अग्नि के सुपुर्द कर दिया। चाहे वह ग्राम सम्बन्धी हो या अरण्य सम्बन्धी। चाहे विजय करने की इच्छा से, चाहे स्वतन्त्र विचरने के लिये, चाहे यह सोच कर कि (अग्नि) अच्छा रक्षक है इनकी रक्षा करेगा ॥२॥

अग्नि को उनका लोभ हो गया। वह उनको इकट्ठा करके ऋतुओं में छिप गया। देवों ने सोचा कि वहीं चलें। जहाँ अग्नि छिपा हुआ था, वहीं गये। वे निराश हो गये कि 'क्या करना चाहिये' ? 'क्या राय है' ? ॥३॥

तब त्वष्टा ने पुनराधेय अग्नि (फिर रक्खी हुई अग्नि) को देखा। उसने उसका आधान किया और इस प्रकार अग्नि के प्रिय धाम को पहुँच गया। उस (अग्नि) ने उस (त्वष्टा) के लिये दोनों रूप अर्थात् ग्राम सम्बन्धी और अरण्य सम्बन्धी छोड़ दिये। इसीलिये इन रूपों को त्वाष्ट्र (त्वष्टा) कहते हैं क्योंकि त्वष्टा से ही यह सब रूप आते

रूपाणीति त्वष्टुर्ह्येव सर्वꣳ रूपमुप ह त्वेवान्याः प्रजा यावत्सो यावत्स इव तिष्ठन्ते ॥४॥

तस्मै कं पुनराधेयमादधीत । एवꣳ हैवाग्नेः प्रिय धामोपगच्छति सोऽस्माऽउभयानि रूपाणि प्रतिनिः सृजति यानि च ग्राम्याणि यानि चारण्यानि तस्मिन्नेतान्युभयानि रूपाणि दृश्यन्ते परमता वै सा स्पृहयन्त्यु हास्मै स्मै तथा पुष्यति लोक्यꣳवैनापि ॥५॥

आग्नेयोऽय यज्ञः । ज्योतिरग्निः पाप्मनो दग्धा सोऽस्य पाप्मान दहति स इह ज्योतिरेव श्रिया यशसा भवति ज्योतिरमुत्र पुण्यलोकत्वैतन्नु तद्यस्मादादधीत ॥६॥

स वै वर्षास्वादधीत । वर्षा वै सर्वऽऋतवो वर्षा हि वै सर्वऽऋतवोऽथादो वर्षमकुर्मादो वर्षमकुर्मेति सवत्सरान्त्संपश्यन्ति वर्षा ह त्वेव सर्वेषामृतूनाꣳ रूपमुत हि तद्वर्षासु भवति यदाहुर्ग्रीष्मऽइव वाऽअद्येत्युतो तद्वर्षासु भवति यदाहुः शिशिरऽइव वाऽअद्येति वर्षादिद्वर्षाः ॥७॥

अथैतदेव परोक्षꣳ रूपम् । यदेव पुरस्ताद्धाति तद्वसन्तस्य रूपं यत्तनयति तद्ग्रीष्मस्य यद्वर्षति तद्वर्षाणा यद्विद्योतते तच्छरदो यद्वृष्ट्वोदगृह्णाति तद्धेमन्तस्य वर्षाः सर्वऽऋतव ऋतून्प्राविशद्ऋतुभ्य एवैनमेतन्निर्मिमीते ॥८॥

है । परन्तु दूसरी प्रजा इस-इस प्रकार रहती है ॥४॥

इसलिये (मनुष्य को चाहिये) कि त्वष्टा के लिये ही पुनराधेय करे । इसी प्रकार यह अग्नि के प्रिय धाम का लाभ कर सकता है । और वह (अग्नि) उसके लिये दोनों रूप छोड़ देता है अर्थात् ग्राम के भी और अरण्य के भी । उसी में यह दोनों रूप दिखाई पड़ते हैं । वह बड़ा हो जाता है, लोग उससे डाह करते हैं । वह फूलता-फलता है और लोक में उसका यश होता है ॥५॥

यह यज्ञ अग्नि का है । अग्नि ज्योति है । यह पापों को जलाती है । यह उस (यजमान) के पापों को भी जलाती है । यही ज्योति श्री और यश को देने वाली होती है । ज्योति दूसरे लोक में पुण्य का मार्ग बनाती है । इसलिये (फिर) आधान करना चाहिये ॥६॥

वर्षा में पुनराधान करे । वर्षा ही सब ऋतुओं का (प्रतिनिधि) है । वर्षा ही सब ऋतुयें हैं । इसीलिये कहते हैं कि अमुक वर्ष में यह काम किया, अमुक वर्ष में यह काम किया । वर्षा सब ऋतुओं का एक रूप है । जब कहते हैं 'यह ग्रीष्म सा है' तो यह वर्षा में ही है और जब कहता है कि 'आज शिशिर सा है' तो यह भी वर्षा ही है । 'वर्ष से ही 'वर्षा' है ॥७॥

(वर्षा का) एक परोक्ष रूप है । जब यह पूर्व से बहता है तो वसन्त का रूप है । जो गरजता है वह ग्रीष्म का । जो बरसता है वह वर्षा का । जो बिजली चमकती है यह शरद का । जब बरस कर बन्द हो जाता है वह हेमन्त का । वर्षा सब ऋतुयें हैं । यह (अग्नि) ऋतुओं में प्रविष्ट हो गया । इसलिये ऋतुओं में से ही इसका निर्माण करते हैं ॥८॥

आदित्यस्त्वेव सर्वऽऋतवः । यदैवोदेत्यथ वसन्तो यदा संगवोऽथ ग्रीष्मो यदा मध्यन्दिनोऽथ वर्षा यदापराह्णोऽथ शरद्यदैवास्तमेत्यथ हेमन्तस्तस्मादु मध्यन्दिनऽएवादधीत तर्हि ह्येषोऽस्य लोकस्य नेदिष्ठं भवति तन्नेदिष्ठादेवैनमेतन्मध्याद्विमिमीते ॥९॥

छायेव वाऽअयं पुरुषः । पाप्मनानुपक्तः सोऽस्यात्र कनिष्ठो भवत्यधस्पदमिवेयस्यते तत्कनिष्ठमेवैतत्पाप्मानमवबाधते तस्मादु मध्यन्दिनऽएवादधीत ॥१०॥

तं वै दर्भैरुद्धरति । दारुभिर्वै पूर्वमुद्धरति दारुभिः पूर्वं दारुभिरपरं जामि कुर्यात्समदं कुर्यादापो दर्भा आपो वर्षा ऋतून्त्राविशदद्भिरेवैनमेतदद्भ्यो निर्मिमीते तस्माद्दर्भैरुद्धरति ॥११॥

अर्कपलाशाभ्याम् । व्रीहिमयमपूपं कृत्वा यत्र गार्हपत्यमाधास्यन्भवति तस्मिदधाति तद्गार्हपत्यमादधाति ॥१२॥

अर्कपलाशाभ्याम् । यवमयमपूपं कृत्वा यत्राहवनीयमाधास्यन्भवति तस्मिदधाति तदाहवनीयमादधाति पूर्वाभ्यामेवैनावेतदग्निभ्यामन्तर्दधा इति वदन्तस्तदु तथा न कुर्याद्रात्रिभिर्ह्येवान्तर्हितौ भवतः ॥१३॥

लेकिन आदित्य भी सब ऋतुये हैं । जब उदय होता है तो वसन्त, जब सगव होता है (अर्थात् जब गौयें दूहने के लिये इकट्ठी की जाती हैं) तब ग्रीष्म, जब दोपहर होता है तो वर्षा, तीसरा पहर शरद्, जब अस्त होता है तब हेमन्त । इसलिये दोपहर के समय ही (पुनराधान) करे । क्योंकि उस समय सूर्य इस लोक के निकटतम होता है और इसलिये वह मध्य से ही (अग्नि का) निर्माण करता है ॥९॥

यह पुरुष छाया के समान पाप से लिप्त है । (दोपहर के समय) यह छाया सबसे छोटी होती है । पैर के नीचे ही सिकुड़ जाती है । इस प्रकार वह पाप को सबसे छोटा कर देता है । इसलिये दोपहर के समय ही पुनराधान करे ॥१०॥

वह (गार्हपत्य में से) दर्भों के द्वारा निकालता है । पहले वह दारु (लकड़ी) से निकालता है । पहले भी दारु से निकाले और फिर भी दारु से, तो दुहराने का दोषी हो और विषम पड़े । जल ही दर्भ है और जल ही वर्षा है । (अग्नि) ऋतुओं में प्रविष्ट हो गया । इसलिये वह उसे जलों में से जलों के द्वारा ही निकालता है । इसलिये दर्भों के द्वारा निकालता है ॥११॥

भात पकाकर के वह दो आक के पत्तों पर रखता है; और उसको उस जगह रखता है जहाँ गार्हपत्य अग्नि रखनी है । फिर गार्हपत्य अग्नि की स्थापना कर देता है ॥१२॥

जौ के अपूप (पूये) पकाकर दो आक के पत्तों पर रखकर उस जगह रखता है जहाँ आहवनीय स्थापित करनी होती है और आहवनीय को स्थापित कर देता है । कुछ लोग कहते हैं कि हम इस प्रकार पहली दो अग्नियों से इनको ढक देते हैं । परन्तु ऐसा न करे क्योंकि यह रातों के द्वारा ढकी जाती हैं ॥१३॥

आग्नेयमेव पञ्चकपालं पुरोडाशं निर्वपति । तस्य पञ्चपदाः पङ्क्तयो याज्यानुवाक्या भवन्ति पञ्च वाऽऋतव ऋतूनाविशदनुम्य एवैनमेतन्निर्मिमीते ॥१४॥

सर्व आग्नेयो भवति । एषऽ हि त्वष्टाग्नेः प्रियं धामोपागच्छत्तस्मात्सर्व आग्नेयो भवति ॥१५॥

तेनोपाऽशु चरन्ति । यद्वै ज्ञातये वा सख्ये वा निष्केवल्यं चिकीर्षति तिर इवैतेन योभवद्वैश्वदेवोऽन्यो यज्ञोऽथैष निष्केवल्य आग्नेयो यद्वै तिर इव तदुपाऽशु तस्मादुपाऽशु चरन्ति ॥१६॥

उच्चैरुत्तमनुयाजं यजति । कृतकर्मैव हि स तर्हि भवति सर्वो हि कृतमनुबुध्यते ॥१७॥

स आश्राव्याह । समिधो यजेति तदाग्नेयऽ रूपं परोऽक्षं त्वग्नीन्यजेति तेव ब्रूयात्त देव प्रत्यक्षमाग्नेऽ रूपऽ ॥१८॥

स यजति । अग्नऽआज्यस्य व्यन्तु वौषगग्निमाज्यस्य वेतु वौषगग्निनाज्यस्य व्यन्तु

अब पाँच कपालों पर पुरोडाश को अग्नि के लिये तैयार करता है। इसके याज्य और अनुवाक्य पंक्ति छन्द के पाँच-पाँच पद वाले होते हैं। पाँच ही ऋतुयें हैं। अग्नि ऋतुओं में घुसा था। इसलिये ऋतुओं से ही इसको निकालता है ॥१४॥

यह सब (यज्ञ) अग्नि का होता है। क्योंकि इसी से त्वष्टा अग्नि के प्रियधाम में घुसा। इसलिये यह सब अग्नि का ही होता है ॥१५॥

इसे चुपके-चुपके करते हैं। किसी सम्बन्धी या सखा के लिये जब कोई कुछ बनाना चाहता है तो छिपाकर रखता है। अन्य यज्ञ विश्व देवों का होता है और यह यज्ञ केवल अग्नि का ही है। जो छिपाकर किया जाता है वह चुपके से किया जाता है। इसलिये वह इसको चुपके-चुपके करते हैं ॥१६॥

अन्तिम अनुयाज को जोर से बोलते हैं। क्योंकि तब कार्य समाप्त हो जाता है। जब कार्य हो चुकता है तो उसे सभी जान जाते हैं ॥१७॥

वह पुकार (और आग्नीध्र द्वारा उत्तर दिये जाने के पश्चात् होतृ से) कहता है,* 'समिधाओं का यज्ञ करो'। वह अग्नि का परोक्ष रूप है। परन्तु उसको यह भी कहना चाहिये कि 'अग्नियों का यज्ञ करो'। क्योंकि वह अग्नि का प्रत्यक्ष रूप है ॥१८॥

अब वह पढ़ता है—(अ) 'अग्नऽआज्यस्य व्यन्तु वौषट्'। 'हे अग्नि ! (यह समिधायें) घी को ग्रहण करें। वौषट्'। (आ) 'अग्निमाज्यस्य वेतु वौषट्'। ('तनूनपात्) आज्य की अग्नि को स्वीकार करे। वौषट्'। (इ) 'अग्निनाज्यस्य व्यन्तु वौषट्'। 'वे (इडा) अग्नि के द्वारा आज्य को स्वीकार करें, वौषट्'। (ई) 'अग्निराज्यस्य वेतु

---

* अध्वर्यु कहता है, 'ओ श्रावय', इस पर आग्नीध्र कहता है, 'अस्तु, श्रौषट्'।

वौभ्रगग्निराज्यस्य वेतु वौभ्रगिति ॥१६॥

अथ स्वाहाग्निमित्याह । आग्नेयमाज्य भागꣳ स्वाहाग्नि पवमानमिति यदि पवमानाय ध्रियेरन्त्स्वाहाग्निमिन्दुमन्तमिति यद्यग्नयऽइन्दुमते ध्रियेरन्त्स्वाहाग्निꣳ स्वाहाग्नीनाज्यपान्नुपाणोऽग्निराज्यस्य वेत्विति यजति ॥२०॥

अथा हाग्नयेऽनुब्रूहीति । आग्नेयमाज्यभागꣳ सोऽन्वाहाग्निꣳ स्तोमेन बोधय समिधानोऽअमर्त्यम् । हव्या देवेषु नो दधदिति स्वपितीव खलु वाऽएतद्यदुद्वासितो भवति सम्प्रबोधयत्येवैनमेतत्समुदीर्यति जुषाणोऽअग्निराज्यस्य वेत्विति यजति ॥२१॥

अथ यद्यग्नये पवमानाय ध्रियेरन् । अग्नये पवमानायानुब्रूहीति ब्रूयात्सोऽत्वाहामऽआयूꣳषि पवसऽआसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनामिति तथाग्नेयो भवति सोमो वै पवमानस्तदु सौम्यादाज्यभागान्नयन्ति जुषाणोऽग्निः पवमान आज्यस्य वेत्विति यजति ॥२२॥

अथ यद्यग्नयऽइन्दुमते ध्रियेरन् । अग्नयऽइन्दुमतेऽनुब्रूहीति ब्रूयात्सोऽन्वाहेह्यू षु

वौभ्रक्' । 'अग्नि आज्य को स्वीकार करे, वौभ्रक्' ॥१६॥

अब कहता है—'स्वाहाग्निम्' । आग्नेय आज्य भाग के लिये । यदि पवमान के लिये आधान करे तो कहे 'स्वाहाग्निं पवमानम्' । यदि इन्दुमान् अग्नि के लिये आधान करे तो कहे, 'स्वाहाग्निमिन्दुमन्तम्' । 'स्वाहाग्निम्', 'स्वाहाग्नीनाज्यपान् जुषाणोऽग्निराज्यस्य वेतु' । यह (होता) पढ़ता है ॥२०॥

आग्नेय आज्य भाग के सम्बन्ध मे (अध्वर्यु) कहता है, 'अग्नयेऽनुब्रूहि' । 'अग्नि के लिये पढ़ो' । तब (होता) पढ़ता है—'अग्निं स्तोमेन बोधय, समिधानोऽमर्त्यम् । हव्या देवेषु नो दधत्' । 'स्तुति द्वारा अग्नि को जगाओ जो अमरत्व को प्रज्वलित करता है, जिससे यह अग्नि हमारे हवियों को देवताओं तक ले जावे' । जब अग्नि अपने स्थान से निकाला जाता है तो सोता सा है । अब (ऋत्विज) उसको जगाता है । अब वह पढ़ता है—'जुषाणोऽग्निराज्यस्य वेतु' । अर्थात् 'अग्नि कृपा करके आज्य को ग्रहण करे' ॥२१॥

अन्न इन्द्र और अग्नि वाला मन्त्र—'उभा वामिन्द्राग्नीऽआहुवध्याऽउभा राधस सह मादयध्यै । उभा दातारावियाꣳ रयीणामुभा वाजस्य सातये हुवे वाम्' (यजु॰ ३।१३) । 'इन्द्र और अग्नि, म तुम दोनो को बुलाता हूँ । मैं तुम दोनों की प्रीति की हवि से प्रसन्न करूँगा । तुम दोनों बल और धन के दाता हो । तुम दोनों को अन्न की प्राप्ति के लिये बुलाता हूँ' । इन्द्र सूर्य का नाम है । जब वह अस्त हो जाता है तो आहवनीय अग्नि में प्रविष्ट हो जाता है । इसलिये प्रार्थी उन दोनों मिले हुओ से प्रार्थना करता है कि यह दोनों मिलकर मुझको देंगे । इसीलिये इन्द्र और अग्नि वाला मन्त्र पढता है ॥१२॥

अन्न पढता है, 'अय ते योनिर्ऋत्वियो यतो जातोऽअरोचथा । त जानन्नग्नऽआरोहाथा नो वर्धया रयिम्' (यजु॰ ३।१४) । 'यह तेरी ऋतु के अनुकूल योनि है जहाँ से उत्पन्न होकर तू चमकता है । हे अग्नि ! इस बात को जानकर उठ और हमारा धन बढा' । 'रयि' का अर्थ है पुष्टि । इस मन्त्र का अर्थ यह है कि तू हमारी बढोतरी कर' ॥१३॥

अयमिह प्रथमः । धायि धातृभिर्होता यजिष्ठोऽअध्वरेष्वीड्यः । यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्र विभ्वं विशे-विशऽइत्यन्वेव धावति तद्यथा याचन्कल्याणं वदेदामुष्यायणो वै त्वमस्यलं वै त्वमेतस्माऽअसीत्येवमेषा यथोऽएवैष तथोऽएवैनमेतदाह यदाह विभ्वं विशे-विशऽइति विभूर्ह्येष विशे-विशे ॥१४॥

अस्य प्रत्नाम् । अनु द्युतꣳ शुक्रं दुदुह्रेऽअह्रयः । पयः सहस्रसामृषिमिति परमा वाऽएषा सनीना यत्सहस्रसनिस्तदेतस्यैवावरुद्ध्यै तस्मादाह पयः सहस्रसामृषिमिति ॥१५॥

तदेतत्समाहार्यꣳ षड्ऋचं । तस्योपवती प्रथमा प्रत्नवत्युत्तमावोचाम तद्यस्मादुपवत्यथाद एव प्रत्नं यावन्तो ह्येव सनाग्रे देवास्तावन्त एव देवास्तस्माददः प्रत्नं तदिमेऽएवान्तरेण सर्वे कामास्तेऽअस्माऽइमे संजानाने सर्वान्कामान्त्संनमतः ॥१६॥

स वै त्रिः प्रथमा जपति । त्रिरुत्तमां त्रिवृत्प्रायणा हि यज्ञास्त्रिवृदुदयनास्तस्मात्त्रिः प्रथमां जपति त्रिरुत्तमाम् ॥१७॥

अब कहता है, 'अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठोऽअध्वरेष्वीड्यः । यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्र विभ्वं विशेविशे' (यजु० ३।१५) । 'विधाताओं द्वारा प्रथम यह यहाँ बनाया गया । सर्वश्रेष्ठ होता और यज्ञ मे पूजा के योग्य । जिसको अप्नवान और भृगु ने प्रज्वलित किया । वनों मे विचित्रता से चमकते हुये और घर घर मे फैलते हुये' ॥१४॥

अब कहता है, 'अस्य प्रत्नामनु द्युतꣳ शुक्र दुदुह्रे अह्रयः । पयः सहस्रसामृषिम्' (यजुर्वेद ३।१५) । '(अह्रयः) न शरमाने वाले लोगो ने (अस्य) इस अग्नि के (प्रत्नाम्) सन्तान (द्युतꣳ) प्रकाश युक्त (शुक्र) शुद्ध (पयः) दूध को । सहस्रसाम् + ऋषिम्) हजारों देने वाले ऋषि से (दुदुह्रे) दूहा' । 'सहस्रसा' का अर्थ है परम दान देने वाला । इसी की प्राप्ति के लिये वह कहता है 'सहस्रसाम् ऋषिम्' ॥१५॥

यह छः ऋचाओं के मन्त्र हैं । पहले मे 'उप' शब्द है और पिछले मे 'प्रत्न' । (अर्थात् यजुर्वेद के तीसरे अध्याय, ११ से १६ मन्त्र तक) । हमने इनका उच्चारण इसलिये किया 'उप' वाली यह अर्थात् पृथ्वी है और प्रत्न (सन्तान) वह अर्थात् द्यौ है । क्योंकि जितने देव पहले थे उतने अब भी हैं इसलिये 'प्रत्न' का अर्थ द्यौ लोक है । अब इन्हीं दोनों के बीच मे सब कामनायें हैं और यह दोनों यजमान के हित के लिये और उसकी कामनाओं की पूर्ति के लिये संयुक्त हैं ॥१६॥

पहला मन्त्र तीन बार जपता है और अन्तिम तीन बार । क्योंकि यज्ञ तीन आरम्भ और तीन अन्त वाले होते हैं । इसलिये तीन बार प्रथम मन्त्र जपता है और तीन बार अन्तिम ॥१७॥

यद्ध वाऽअत्राग्निहोत्रं जुह्वत् । वाचेन वा कर्मणा वा मिथ्या करोत्यात्मनस्तदवद्यत्यायुषो वा वर्चसो वा प्रजायै वा ॥१८॥

तदु सलु तनूपा अग्नेऽसि । तन्वं मे पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि । अग्ने यन्मे तन्वा ऊनं तन्मऽआपृणेति ॥१९॥

यद्ध वाऽअत्राग्निहोत्रं जुह्वत् । वाचेन वा कर्मणा वा मिथ्या करोत्यात्मनस्तदवद्यत्यायुषो वा वर्चसो वा प्रजायै वा तन्मे पुनराप्याययेत्येवैतदाह तथो हास्यैतत्पुनराप्यायते ॥२०॥

इन्धानास्त्वा । शतथ्ँ हिमा द्युमन्तथ्ँ समिधीमहीति शतं वर्षाणि जीव्यास्मेत्येवैतदाह तावत्त्वा महान्तथ्ँ समिधीमहीति यदाह द्युमन्तथ्ँ समिधीमहीति वयस्वन्तो वयतदाह तावत्त्वा सहस्रकृतथ्ँ सहस्वन्तः सहस्रकृतमिति वयस्वन्तो वयं भूयास्म वयस्कृत्त्वं भूया इत्येवैतदाह सहस्रकृतथ्ँ सहस्वन्तः सहस्रकृतमिति वयस्वन्तो वयं भूयास्म सहस्रकृत्वं भूया इत्येनेतदाहाग्ने सपत्नदम्भनमदब्धासोऽअदाभ्यमिति त्वया वयथ्ँ सपत्नान्पापीयसः क्रियास्मेत्येवैतदाह ॥२१॥

अग्निहोत्र करने में जो कुछ भूल वाणी या कर्म से करता है उससे वह आत्मा आयु, वर्चस् और प्रजा को हानि पहुँचाता है ॥१८॥

इसलिये कहता है, 'तनूपाऽ अग्नेऽसि तन्वं मे पाह्यायुर्दाऽ अग्नेऽस्यायुर्मे देहि वर्चोदाऽअग्नेऽसि वर्चो मे देहि । अग्ने यन्मे तन्वाऽ ऊनं तन्मऽ आपृण' (यजु० ३।१७) । 'हे अग्नि ! तू शरीरों की रक्षक है, मेरे शरीर की रक्षा कर । हे अग्नि ! तू आयु की देनी वाली है, मुझे आयु दे । हे अग्नि ! तू वर्चस् की देने वाली है, मुझे वर्चस् दे । हे अग्नि ! जो मेरे शरीर में कमी है उसको मेरे लिये पूरा कर' ॥१९॥

और अग्निहोत्र करने में वह वाणी या कर्म से जो भूल करता है उससे वह आत्मा आयु, वर्चस् और प्रजा को हानि पहुँचाता है । जब वह इस मंत्र को पढ़ता है 'मेरी कमी को पूरा कर' तो यह कमी पूरी हो जाती है ॥२०॥

इसलिये कहता है, 'इन्धानास्त्वा शतथ्ँ हिमा द्युमन्तथ्ँ समिधीमहि' (यजु० ३।१८) । 'प्रज्वलित हम सौ वर्षों तक तुझ जलते हुये के ऊपर समिधा रखते हैं' । इससे तात्पर्य है कि हम सौ वर्ष जीते रहें । और 'जलते हुये तुझ पर समिधा रखें' का अर्थ है कि 'हे महान् ! हम तुझको प्रज्वलित करते हैं' । अब कहता है—'वयस्वन्तो वयस्कृतथ्ँ सहस्वन्तः सहस्रकृतम्' (यजु० ३।१८) । 'अन्न वाले हम तुझ अन्न देने वाले को, बलवान हम बल देने वाले तुझको' । इसका अर्थ है कि 'हम अन्न वाले हों, तू अन्न देने वाला हो । हम बल वाले हों, तू बल देने वाला हो' । अब कहा—'अग्ने सपत्नदम्भनमदब्धासोऽअदाभ्यम्' । (यजु० ३।१८) । 'हे अग्नि ! शत्रुहिंसक हम तुझ दुर्धर्षित और शत्रुओं को दमन करने वाले को' । इसका तात्पर्य यह है कि मेरी सहायता से शत्रुओं को सर्वथा दबाने को' ॥२१॥

चित्रावसो स्वस्ति ते पारमशीयेति। निरेतज्जपति रात्रिर्वै चित्रावसुः सा हीयꣳ सर्वाणि चित्राणि वसति तस्माच्चारकाच्चिन्न दृश्ये ॥२२॥

एतेन ह स्म वाऽऋषयः। रात्रेः स्वस्ति पारꣳ समश्नुवतऽएतेनो ह स्मैनान्त्रेर्णाऽरक्षाꣳसि न विन्दन्त्येतेनोऽएवैष एतद्रात्रेः स्वस्ति पारꣳ समश्नुतऽएतेनोऽएनꣳ रात्रेर्णाऽरक्षाꣳसि न विन्दन्त्येतावन्नु तिष्ठन्जपति ॥२३॥

अथासीन॰। स त्वमग्ने सूर्यस्य वर्चसा गथा इति तद्यदस्त मन्नादित्य आहवनीयं प्रविशति तेनैतदाह समृषीणाꣳ स्तुतेनेति तद्यदुपतिष्ठते तेनैतदाह सं प्रियेण धाम्नेत्याहुतयो वाऽअस्य प्रिय धामाहुतिभिरेव तदाह समहमायुषा स वर्चसा स प्रजया सꣳरायस्पोषेण गमेयेति यथा त्वमेतैः समगथा एवमहमायुषा वर्चसा प्रजया रायस्पोषेणेति यद्भूम्नेति तदेवमहमेतैः सगच्छाऽइत्येवैतदाह ॥२४॥

अथ गामभ्यैति। अन्ध स्थान्धो वो भक्षीय मह स्थ महो वो भक्षीयेति यानि वो वीर्याणि यानि वो महाꣳसि तानि वो भक्षीयेत्येवैतदाहोर्ज स्थोर्ज वो भक्षीयेति रस

तीन बार इस मन्त्राश को जपे—'चित्रावसो स्वस्ति ते पारमशीय' (यजु० ३।१८)। 'हे चित्र वाली, हम भलीभाँति तेरे पार को पा जायँ'। 'चित्रावसु' रात है। क्योंकि यह चित्रों को इकट्ठा करके रहती है। इसीलिये (रात में) दूर से चित्र अर्थात् स्पष्ट नहीं दीखता ॥२२॥

इसी मन्त्र से ऋषि लोग रात के पार को भलीभाँति पा गये। और इसी के कारण दुरात्मा राक्षसों ने उनको न पाया। इसी प्रकार इसी मन्त्र के द्वारा यह रात के पार को भली भाति पा जाता है और इसी के कारण दुरात्मा राक्षस उसको नहीं पा सकते। इस मन्त्र को वह खड़े होकर जपता है ॥२३॥

अब बैठे बैठे यह जपता है—'स त्वमग्ने सूर्यस्य वर्चसागथा"। (यजु० ३।१६) 'हे अग्नि, तू सूर्य के वर्चस् (प्रकाश) को प्राप्त हो गया'। यह यह कहता है क्योंकि डूबता हुआ सूर्य आहवनीय मे घुस जाता है। इसीलिये कहा। अब कहा—'समृषीणाꣳ स्तुतेन'। (यजु० ३।१६)। 'ऋषियों की स्तुति से'। चूँकि वह खड़े होकर स्वय प्रार्थना करता है इसलिये ऐसा कहता है—'स प्रियेण धाम्ना' (यजु० ३।१६)। 'प्रिय घर के द्वारा'। आहुतियाँ इसका प्रियधाम हैं। इसलिये 'धाम के द्वारा' का अर्थ है आहुतियों के द्वारा। अब कहा—'समहमायुषा स वर्चसा स प्रजया सꣳरायस्पोषेण गमेय' (यजु० ३।१६)। 'मैं आयु, वर्चस्, सन्तान और धन की प्राप्ति करूँ'। इसका तात्पर्य यह है कि 'जैसे तूने यह चीजें प्राप्त की, वैसे मैं भी आयु, वर्चस्, सन्तान और धन अर्थात् समृद्धि को प्राप्त हो जाऊँ' ॥२४॥

अब इस मन्त्र को पढ़कर गाय के पास जाता है—'अन्ध स्थान्धो वो भक्षीय मह स्थ महो वो भक्षीय (यजु० ३।२०)। 'तुम अन्ध (अन्न) हो, मैं तुम्हारा अन्न खाऊँ,

स्थ रसं वो भक्षीयेत्येवैतदाह रायस्पोष स्थ रायस्पोषं वो भक्षीयेति भूमा स्थ भूमानं वो भक्षीयेत्येवैतदाह ॥२५॥ शतम् ११०० ॥

रेवती रमध्वमिति रेवन्तो हि पशवस्तस्मादाह रेवती रमध्वमित्यस्मिन्योनावस्मिन्गोष्ठेऽस्मिल्लोकेऽस्मिन्क्षये । इहैव स्त मापगातेत्यात्मन एवैतदाह मदेव मापगातेति ॥२६॥

अथ गामभिमृशति । सꣳहितासि विश्वरूपीति विश्वरूपा इव हि पशवस्तस्मादाह विश्वरूपीत्यूर्जा मा विश गोपत्येनेत्यूर्जेति यदाह रसेनेति तदाह गोपत्येनेति यदाह भूम्नेति तदाह ॥२७॥

अथ गार्हपत्यमभ्यैति । स गार्हपत्यमुपतिष्ठतऽउप त्वाग्ने दिवे-दिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसीति नम एवास्माऽएतत्करोति यथैनं न हिꣳस्यात् ॥२८॥

राजन्तमध्वराणां । गोपामृतस्य दीदिवम् । वर्धमानꣳ स्वे दमऽइति स्वं वै

तुम धन हो, मैं तुम्हारा धन खाऊँ'। इसका तात्पर्य है कि तुम्हारे जो पराक्रम हों और जो धन हों उनका मैं उपभोग करूँ। अब कहा—'ऊर्जं स्थोर्जं वो भक्षीय (यजु० ३।२०)। 'तुम ऊर्ज हो मैं तुम्हारे ऊर्ज को भोगूँ'। अर्थात् 'तुम रस हो। मैं तुम्हारे रस को भोगूँ'। अब कहा—'रायस्पोष स्थ रायस्पोषं वो भक्षीय' (यजु० ३।२०)। 'तुम धन हो, तुम्हारे धन को मैं भोगूँ'। अर्थात् तुम समृद्धि हो, मैं तुम्हारी समृद्धि का भोग करूँ ॥२५॥

अब कहा 'रेवती रमध्वम् (यजु० ३।२१)। 'हे धन वालो। रमण करो'। रेवन्त अर्थात् धन वाले पशु हैं। इसलिये कहा, 'रेवती रमध्वम्'। अब कहा—'अस्मिन् योनावस्मिन् गोष्ठेऽस्मिँल्लोकेऽस्मिन्क्षये। इहैव स्त मापगात'। 'इस स्थान में, इस बाड़े में, इस लोक में, इस घर में। यहाँ ही रहो। यहाँ से न जाओ। यहाँ अपने लिये यहाँ है अर्थात् 'मुझको छोड़कर न जाओ' ॥२६॥

अब इस मंत्र से गाय को छूता है—'सꣳहितासि विश्वरूपी' (यजु० ३।२२)। 'तू इकट्ठा करने वाली और ...तें रूप वाली है'। पशु भिन्न-भिन्न रूप वाले होते हैं इसलिये (गाय को) 'विश्वरूपी' कहा। अब कहा—'ऊर्जा मा विश गोपत्येन' (यजु० ३।२२)। '(गोपत्येन ऊर्जा) गौओं से युक्त ऊर्ज के द्वारा (मा) मुझमें (विश) प्रविष्ट हो'। यहाँ 'ऊर्ज' कहने से 'रस' का तात्पर्य है और 'गोपत्य' कहने से तात्पर्य है 'संवृद्धि' का ॥२७॥

अब गार्हपत्य में जाता है और उसकी अर्चना करता है इस मंत्र से—'उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम्। नमोभरन्त एमसि' (यजु० ३।२२)। 'हे अग्नि! दिन-प्रतिदिन नमस्कार करते हुये हम रात को प्रकाशित करने वाले तुझको बुद्धि से प्राप्त होते हैं'। यह इसलिये इसकी अर्चना करता है कि कहीं यह उसको हानि न पहुँचा दे ॥२८॥

अब कहता है, 'राजन्तमध्वराणां गोपामृतस्य दीदिवम्। वर्धमानꣳ स्वे दमे'

तऽइदं यन्मम तन्नो भूयो-भूय एव कुर्वित्येवैतदाह ॥२६॥

स नः पितेव सूनवे । अग्ने सूपायनो भव । सचस्वा नः स्वस्तयऽइति यथा पिता पुत्राय सूपचरो नैवैनं केन चन हिनस्त्येवं नः सूपचर एधि मैव त्वा केन चन हिथ्ँसिप्मेत्येवैतदाह ॥३०॥

अथ द्विपदाः । अग्ने त्वं नोऽअन्तम उत त्राता शिवो भवा वरूथ्यः । वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमꣳ रयिं दाः ॥ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः । स नो बोधि श्रुधी हवमुरुष्या णोऽअघायतः समस्मादिति ॥३१॥

यद्वा आहवनीयमुपतिष्ठते । पशूंस्तद्याचते तस्मात्तमुच्चावचैश्छन्दोभिरुपतिष्ठतऽउच्चावचा इव हि पशवोऽथ यद्गार्हपत्यं पुरुषांस्तद्याचते तद्गायत्रं प्रथमं त्रिचं गायत्रं वाऽअग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसोपपरैति ॥३२॥

अथ द्विपदाः । पुरुषछन्दसं वै द्विपदा द्विपद्याऽअयं पुरुषः पुरुषानेवैतद्याचते (यजु० ३।२३) । 'यज्ञों के प्रकाशित करने वाले, ऋत के चमकने वाले रक्षक, अपने घर में बढ़ने वाले तुझको' । इसका तात्पर्य है कि यह मेरा घर तेरा ही घर है । इसको हमारे लिये समृद्धि-शील कर ॥२६॥

अब कहा, 'स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये' (यजु० ३।२४) । 'हे अग्नि, तू हमारे लिये उसी प्रकार सुलभ हो जैसे पिता पुत्र को । और हमारी स्वस्ति कर' । इसका तात्पर्य है कि जैसे पिता पुत्र के लिये सुलभ होता है और किसी प्रकार उसको हानि नहीं पहुँचाता, इसी प्रकार तू भी हमारे लिये सुलभ हो, किसी प्रकार हानि न पहुँचा ॥३०॥

अब यह दो पद वाले मन्त्र को पढ़ता है, 'अग्ने त्वं नोऽअन्तमऽ उत त्राता शिवो भवा वरूथ्यः । वसुरग्निर्वसुश्रवाऽ अच्छा नक्षि द्युमत्तमꣳ रयिं दा.' (यजु० ३।२५) । 'तं त्वा शोचिष्ठ दीदिव सुम्नाय नूनमीमहे सखिभ्यः । स नो बोधि श्रुधी हवमुरुष्या णोऽअघायत' समस्मात्' (यजु० ३।२६) । 'हे अग्नि ! तू मेरे निकट रह । रक्षक, कल्याणकारी और घर का हितकर हो । हे अग्नि, तुम वसु (धन) हो, वसुश्रवा अर्थात् धन देने के लिये प्रसिद्ध हो । हमको अच्छा अच्छा चमकदार धन दो' (यजु० ३।२५) । 'अपने मित्रों को सुख के लिये हम तुझ प्रकाश-स्वरूप और चमकने वाले के पास आते हैं । हमारे साथ रह, हमारी बात सुन और हमको पापी शत्रु से बचा । (यजु० ३।२६) ॥३१॥

जब आहवनीय की अर्चना करता है तो पशुओं की याचना करता है, इसलिये ऊँचे-नीचे मन्त्रों को जपता है । क्योंकि पशु भिन्न आकार के होते हैं । जब गार्हपत्य की अर्चना करता है तो पुरुषों की याचना करता है । इसलिये पहली तीन ऋचायें गायत्री छन्द में हैं । गायत्री अग्नि का छन्द है । इसलिये उसी के छन्द से स्तुति करता है ॥३२॥

अब वह (ऊपर के) दो पद वाले मन्त्र जपता है । दो पद वाले मन्त्र पुरुष छन्द

पुरुषान्हि याचते तस्मादद्विपदाः पशुमान्ह वै पुरुषवान्भवति य एवं विद्वानुपतिष्ठते ॥३३॥

अथ गामभ्येति । इडऽएहदितऽएहीतीडा हि गौरदितिर्हि गौस्तामभिमृशति काम्या एतेति मनुष्याणाꣳ ह्येतासु कामाः प्रविष्टास्तस्मादाह काम्या एतेति मयि वः कामधरणं भूयादित्यहं वः प्रियो भूयासमित्येवैतदाह ॥३४॥

अथान्तरेणाहवनीयं च गार्हपत्यं च । प्राङ् तिष्ठन्नग्निमीक्षमाणो जपति सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः ॥ यो रेवान्योऽअमीवहा वसुवित्पुष्टिवर्धनः । स नः सिषक्तु यस्तुरः ॥ मा नः शꣳसोऽअररुषो धूर्तिः प्रणङ् मर्त्यस्य । रक्षा णो ब्रह्मणस्पतऽइति ॥३५॥

यद्वाऽआहवनीयमुपतिष्ठते । दिवं तदुपतिष्ठतेऽथ यद्गार्हपत्यं पृथिवीं तदथैतदन्तरिक्षमेषा हि दिग्बृहस्पतेरेताꣳ ह्येतद्दिशमुपतिष्ठते तस्माद्बार्हस्पत्यं जपति ॥३६॥

महि त्रीणामवोऽस्तु । द्युक्षंमित्रस्यार्यम्णः । दुराधर्षं वरुणस्य ॥ न हि तेषाममा-

हैं, क्योंकि पुरुष भी दो पैर वाला है, इसलिये पुरुषों की याचना करता है। पुरुषों की याचना करता है इसलिये दो पदों वाले मंत्र को जपता है। जो इस रहस्य को समझकर (दोनों अग्नियों की) सेवा करता है उसको पशु और पुरुष दोनों प्राप्त होते हैं ॥३३॥

अब वह इस मंत्र को जप कर गाय के पास जाता है, 'इड ऽएहदित ऽएहि' (यजु० ३।२७)। 'हे इडा, आ। हे अदिति आ'। इडा गौ है। अदिति गौ है। 'काम्याऽ एत' अर्थात् 'कामना के योग्य तुम आओ' यह कहकर छूता है। इनमें मनुष्यों की कामनायें हैं। इसलिये इनको 'काम्या एत' कहा' (यजु० ३।२७)। अब कहा—'मयि वः कामधरणं भूयात्' (यजु० ३।२७)। 'आपकी मेरे में इच्छा-पूर्ति हो'। अर्थात् मैं आपका प्रिय होऊँ, यह तात्पर्य है ॥३४॥

अब आहवनीय और गार्हपत्य के बीच में खड़ा होकर पूर्व को देखकर (इन तीन मंत्र) को जपता है—'सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं यऽ औशिजः ॥ यो रेवान् योऽ अमीवहा वसुवित् पुष्टिवर्धनः। स नः सिषक्तु यस्तुरः ॥ मा नः शꣳसोऽअररुषो धूर्तिः प्रणङ् मर्त्यस्य। रक्षा णो ब्रह्मणस्पते' (यजु० ३।२८,२९,३०)। 'हे वाणी के पति, सोम को अर्पण करने वाले कक्षीवान औशिज को सुरीला कर'। 'धन वाला, दुःखनाशक, समृद्धिशील और पुष्टि देने वाला तथा तीव्र, हमारे पास आवे'। 'हे वाणी के पति! हमारी रक्षा कर। बुरों का शाप हम तक न आवे और न किसी मनुष्य की धूर्तता' ॥३५॥

जब वह आहवनीय में जाता है तो मानो द्यौ लोक में जाता है और जब गार्हपत्य में जाता है तो मानो पृथ्वी लोक में, इससे वह अन्तरिक्ष में जाता है। यह बृहस्पति की दिशा है। इस दिशा को प्राप्त होना चाहता है इसलिये बृहस्पति वाला मंत्र जपता है ॥३६॥

अब जपता है, 'महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः। दुराधर्षं वरुणस्य' (यजु० ३।३१)। 'नहि तेषाममा चन नाध्वसु वारणेषु। ईशे रिपुरघशꣳसः' (यजु० १।३२)।

चन नाध्वसु वारणेषु । ईशे रिपुरघशंसः ॥ ते हि पुत्रासो अदितेः प्र जीवसे मर्त्याय । ज्योतिर्यच्छन्त्यजस्रमिति तत्रास्ति नाध्वसु वारणेष्वित्येते ह वाऽअध्वानो वारणा यऽइमेऽन्तरेण द्यावापृथिवीऽएतान्ह्येतदुपतिष्ठते तस्मादाह नाध्वसु वारणेष्विति ॥३७॥

अथैन्द्री । इन्द्रो वै यज्ञस्य देवता सेन्द्रमेवैतदग्न्युपस्थानं कुरुते कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषऽइति यजमानो वै दाश्वान्न यजमानाय द्रुह्यसीत्येवैतदाहोपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यतऽइति भूयो-भूय एव न इदं पुष्टं कृधित्येवैतदाह ॥३८॥

अथ सावित्री । सविता वै देवानां प्रसविता तथो हास्माऽएते सवितृप्रसूता एव सर्वे कामाः समृध्यन्ते तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयादिति ॥३९॥

अथाग्नेयी । तदग्नयऽएवैतदात्मानमन्ततः परिददाति गुप्त्यै परि ते दूडभो रथोऽस्मां ॥ ३ऽअश्नोतु विश्वतः । येन रक्षसि दाशुष इति यजमाना वै दाश्वाꣳसो

ते हि पुत्रासोऽ अदितेः प्र जीवसे मर्त्याय । ज्योतिर्यच्छन्त्यज्रस्रम्' (यजु० ३।३३) । 'बड़ी द्यौ लोक सम्बन्धी, न पराजित होने वाली मित्र, अर्यमा और वरुण तीनों की रक्षा (हमारे लिये) हो' । '(इन देवों से रक्षित) लोगों पर भयानक मार्गों अथवा घरों में पापी शत्रु प्रभुत्व नहीं प्राप्त कर सकते' । '(ये देव) निरन्तर मनुष्य के लिये अदिति के पुत्रों के जीवन के लिये ज्योति देते हैं' । यहाँ कहा 'नाध्वसु वारणेषु (भयानक मार्गों में)' क्योंकि द्यौ और पृथिवी के बीच के मार्ग भयानक हैं । इन्हीं मार्गों में उसको चलना है । इसलिये कहता है 'भयानक मार्गों में' ॥३७॥

अब इन्द्र की स्तुति है । इन्द्र ही यज्ञ का देवता है । इसलिये इन्द्र से ही अग्नि के उपस्थान को सम्बद्ध करता है, 'कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे' (यजु० ३।३४) । 'हे इन्द्र ! तू कभी रिक्त (barren) नहीं । और कभी अपने सेवक को विफल नहीं करता' । 'दाशुषे' का तात्पर्य है यजमान । 'तू यजमान से कभी द्रोह नहीं करता' । इस मन्त्र के पढ़ने से यही तात्पर्य है । अब कहता है, 'उपोपेन्नु मघवन् भूयऽ इन्नु ते दानं देवस्य पृच्यते' (यजु० ३।३४) । 'हे मघवन्, तुझ देव का दान अधिक ही होता जाता है' । इसका तात्पर्य यह है कि हमको यहाँ अधिक पुष्ट कर ॥३८॥

अब सावित्री का जाप है । सविता देवों का प्रेरक है । सविता की प्रेरणा से ही सब काम सफल होते हैं । इसलिये कहा, 'तत् सवितुर्वरेण्य भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात्' (यजु० ३।३५) ॥३९॥

अब अग्नि के लिये एक मन्त्र है । अपने को अन्त में रक्षार्थ अग्नि के ही समर्पण करता है, 'परि ते दूडभो रथोऽस्मांऽ अश्नोतु विश्वतः । येन रक्षसि दाशुषः' (यजु० ३।३६) । 'तेरा अवध्य रथ हमको चारों ओर से ढक ले जिससे तू पूजकों की रक्षा करता है' ।

यो ह वाऽअस्यानाधृष्यतमो रथस्तेनैप यजमानानभिरक्षति स यस्तेऽनाधृष्यतमो रथो येन यजमानानभिरक्षसि तेन नः सर्वतोऽभिगोपायेत्येवैतदाह त्रिरेतज्जपति ॥४०॥

अथ पुत्रस्य नाम गृह्णाति । इदं मेऽयं वीर्यं पुनोऽनुसंतनवदिति यदि पुत्रो न स्यादात्मन एव नाम गृह्णीयात् ॥४१॥ ब्राह्मणम् ॥२॥ [३. ४.] ॥ अध्यायः ॥३॥ [१२] ॥

'दाशुषः' का अर्थ है यजमान । और अग्नि के पास जो अवध्य रथ है उससे वह यजमानों की रक्षा करता है । इस कहने का तात्पर्य है कि 'हे अग्नि, जो अवध्य रथ तेरे पास है और जिससे तू यजमानों की रक्षा किया करता है उससे हर ओर से हमारी रक्षा कर' । तीन बार इसको जपता है ॥४०॥

अब वह अपने पुत्र का नाम लेता है । 'मेरा यह लड़का (नाम लेकर) मेरे इस एक क्रम को जारी रक्खे' । यदि उसके पुत्र न हो तो अपना ही नाम ले ले ॥४१॥

अध्याय ४—ब्राह्मण १

अथ हुतेऽग्नीहोत्रऽउपतिष्ठते । भूर्भुवः स्वरिति तत्सत्येनैवैतद्वाचꣳ समर्धयति यदाह भूर्भुवः स्वरिति तया समृद्धयाशिषमाशास्ते सुप्रजाः प्रजाभि स्यामिति तत्प्रजामाशास्ते सुवीरो वीरैरिति तद्वीरानाशास्ते सुपोषः पोषैरिति तत्पुष्टिमाशास्ते ॥१॥

यद्वाऽअदो दीर्घमग्न्युपस्थानम् । आशीरेव साशीरियं तदेतावतैवैतत्सर्वमाप्नोति तस्मादेतेनैवोपतिष्ठेतैतेन ह्येव वयमुपचराम इति ह स्माहासुरिः ॥२॥

अथ प्रवत्स्यन् । गार्हपत्यमेवाग्नऽउपतिष्ठतेऽथाहवनीयꣳ ॥३॥

स गार्हपत्यमुपतिष्ठते । नर्य प्रजा मे पाहीति प्रजाया हैष इष्टे तत्प्रजामेवास्मा ऽ एतत्परिददाति गुप्त्यै ॥४॥

अथाहवनीयमुपतिष्ठते । शꣳस्य पशून्मे पाहीति पशूनाꣳ हैष ईष्टे तत्पशूनेवास्मा-एतत्परिददाति गुप्त्यै ॥५॥

अग्निहोत्र के पश्चात् यह अग्नि को 'भूर्भुवः स्वः' (यजु० ३।३७) कहकर प्रार्थना करता है। ऐसा कहकर वह अपनी वाणी को सत्य से पवित्र करता है। और वाणी को पवित्र करके आशीर्वाद माँगता है—'सुप्रजा. प्रजाभि. स्याꣳ' । (यजु० ३।३७)। अर्थात् 'मैं अच्छी सन्तान वाला होऊँ'। इससे सन्तान को चाहता है। 'सुवीरो वीरै.' (यजु० ३।३७)। इससे वीरों को चाहता है। 'सुपोषः पोषैः' (यजु० ३।३७)। इससे पुष्टि चाहता है ॥१॥

वह बड़ी प्रार्थना भी आशीर्वाद थी और यह छोटी प्रार्थना भी उसी के लिये। इसलिये इससे भी वह सबको प्राप्त करता है इसलिये वह यह प्रार्थना करे। असुरि का कथन है, 'हम इसी से (अग्निहोत्र) करें' ॥२॥

यदि प्रवास (यात्रा) करना हो तो पहले गार्हपत्य में जावे, फिर आहवनीय में ॥३॥

प्रजापति के पास जाकर कहे, 'नर्य प्रजा मे पाहि' (यजु० ३।३७)। 'हे नरों के हित, मेरी सन्तान की रक्षा कर'। (गार्हपत्य अग्नि) प्रजा का अधिष्ठाता है, इसलिये रक्षा के लिये वह प्रजा को उसी के सुपुर्द कर जाता है ॥४॥

अब आहवनीय के पास जाकर कहता है, 'शꣳस्य पशून् मे पाहि' (यजु० ३।३७)। 'हे प्रशंसनीय मेरे पशुओं को बचा'। (आहवनीय अग्नि) पशुओं का अधिष्ठाता है, इसलिये पशुओं की रक्षा के लिये (आहवनीय के) सुपुर्द करता है ॥५॥

अथ प्र वा व्रजति प्र वा धावयति । स यत्र वेलां मन्यते तत्स्यन्त्वा वाचं विसृजते-ऽथ प्रोप्य परेद्य यत्र वेलां मन्यते तद्वाचं यच्छति स यद्यपि राजान्तरेण स्यान्नैव तमुपेयात् ॥६॥

स आहवनीयमेवाग्रऽउपतिष्ठते । अथ गार्हपत्यं गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तद्गृहेष्वेवैतत्प्रतिष्ठायां प्रतितिष्ठति ॥७॥

स आहवनीयमुपतिष्ठते । आगन्म विश्ववेदसमस्मभ्यं वसुवित्तमम् । अग्ने सम्राडभि द्युम्नमभि सह आयच्छस्वेत्यथोपविश्य तृणान्यपलुम्पति ॥८॥

अथ गार्हपत्यमुपतिष्ठते । अयमग्निर्गृहपतिर्गार्हपत्यः प्रजाया वसुवित्तमः । अग्ने गृहपतेऽभि द्युम्नमभि सह आयच्छस्वेत्यथोपविश्य तृणान्यपलुम्पत्येतन्नु जपेनैतेन न्वेव भूतिष्ठा इवोपतिष्ठन्ते ॥९॥

स वै खलु तूष्णीमेवोपतिष्ठेत । इदं वै यस्मिन्वसति ब्राह्मणो वा राजा वा श्रेयान्मनुष्योन्येव तमेव नार्हति वक्तुमिदं मे त्वं गोपाय प्राहं वत्स्यामीत्यथस्मिन्नेते श्रेयाथ्संसो

अब वह चलता है या (किसी यान में बैठकर) रवाना होता है । और जिस किसी सीमा को मान लेता है वहाँ तक चलकर बोलता है (अर्थात् अब तक मौन था अब बोलता है) । और जब यात्रा से वापिस आता है तो मानी हुई सीमा के भीतर आने पर मौन रहता है और चाहे उस समय घर मे राजा भी उपस्थित हो (तो भी उसके पास न जाकर) पहले अग्नि के पास जाता है ॥६॥

पहले आहवनीय के पास और फिर गार्हपत्य के पास जाता है । गार्हपत्य ही घर है । और घर ही प्रतिष्ठा का स्थान है । इसलिये वह अपने को घर में अर्थात् प्रतिष्ठा के स्थान में स्थापित करता है ॥७॥

वह इस मंत्र से आहवनीय मे जाता है—'आगन्म विश्ववेदसमस्मभ्यं वसुवित्तमम्' अग्ने सम्राडभि द्युम्नमभि सहऽ आयच्छस्व' (यजु० ३।३८) । 'हे सम्राट अग्नि ! हम तुझ विश्ववेद (सबके जानने वाले), वसुवित्तम (धन बाँटने वाले) के पास आते हैं । हमको प्रकाश और बल दे' । और तृणों से आग को हाँकता है ॥८॥

इस मत्र से गार्हपत्य के पास जाता है—'अयमग्निर्गृहपतिर्गार्हपत्यः प्रजाया वसुवित्तमः । अग्ने गृहपतेऽभि द्युम्नमभि सहऽ आयच्छस्व' (यजु० ३।३९) । 'गार्हपत्य अग्नि घर का स्वामी और हमारी सन्तान के लिये दान देने वाला है । हे घर के स्वामी ! अग्नि हमको प्रकाश और बल दे' । अब वह बैठकर तृणों से अग्नि को हाँकता है । इस प्रकार (यजमान) जप करके अग्नि के पास जाया करते हैं ॥९॥

मौन होकर भी जा सकता है और यह इसलिये—'यदि किसी स्थान में कोई ब्राह्मण राजा या श्रेष्ठ मनुष्य रहता हो तो कोई उससे यह नहीं कह सकता कि मैं यात्रा पर जा रहा हूँ, तुम मेरे माल की रक्षा करना । वहाँ भी श्रेष्ठ अग्नि देवों का निवास है । इसलिये इनसे

वसन्ति देवा अग्नयः क उ तानर्हति वक्तुमिदं मे यूयं गोपायत अहं वत्स्यामीति ॥१०॥

मनो ह वै देवा मनुष्यस्याजानन्ति । स वेद गार्हपत्यः परिदा मेदमुपागादिति तूष्णीमेवाहवनीयमुपतिष्ठते स वेदाहवनीयः परिदा मेदमुपगादिति ॥११॥

अथ प्र वा व्रजति प्र वा धावयति । स यत्र वेलो मन्यते तत्स्यन्त्वा वाचं विसृजते ऽथ प्रोष्य परेद्य यत्र वेला मन्यते तद्वाचं यच्छति स यद्यपि राजान्तरेण स्यान्नैव तमुपेयात् ॥१२॥

स आहवनीयमेवाग्रऽउपतिष्ठते । अथ गार्हपत्यं तूष्णीमेवाहवनीयमुपतिष्ठते तूष्णीमुपविश्य तृणान्यपलुम्पति तूष्णीमेव गार्हपत्यमुपतिष्ठते तूष्णीमुपविश्य तृणान्यपलुम्पति ॥१३॥

अथातो गृहाणामेवोपचारः । एतद्ध वै गृहपतेः प्रोषुष आगताद्गृहाः समुत्सृष्टा इव भवन्ति किमयमिह वदिष्यति कि वा करिष्यतीति स यो ह तत्र किंचिद्वदति वा करोति वा तस्माद्गृहाः प्रत्रसन्ति तस्येश्वरः कुलं विक्षोभ्योरथ यो ह तत्र न वदति न किं चन करोति तं गृहा उपसश्श्रयन्ते न वाऽअयमिहावादीच्च किं चनाकरदिति स यदिहापि सुकुद्ध इव स्याद्ध्व एव ततस्तत्कुर्याद्यद्वदिष्यन्वा करिष्यन्वा स्यादेष उ गृहाणामुपचारः ॥१४॥ ब्राह्मणम् ॥३॥ [४. १.] ॥

कौन कह सकता है कि आप रुका कीजिये, मै यात्रा को जा रहा हूँ ॥१०॥

देव मनुष्यों के मन को जानते है । गार्हपत्य पर अग्नि को मालूम है कि यह अपने को मुझे सौंपने आया है । आहवनीय मे भी मौन होकर जावे क्योंकि आहवनीय को भी मालूम है कि यह अपने को मुझे सौंपने आया है ॥११॥

अब वह पैदल या सवारी मे चल पड़ता है और नियत सीमा तक जाने के बाद बोलता है (मौन तोड़ता है) । और जब लौटता है तो जिसको सीमा मान रक्खा है उसको देखते ही मौन धारण कर लेता है और चाहे भीतर राजा भी क्यों न हो वह उसके पास नहीं जाता ॥१२॥

वह पहले आहवनीय के पास जाता है और फिर गार्हपत्य के पास । आहवनीय के पास मौन होकर जाता है और मौन ही बैठकर तृणों से अग्नि को हाँकता है । गार्हपत्य में भी मौन होकर जाता है और मौन ही बैठकर तृणों से अग्नि को हाँकता है ॥१३॥

अब घर (मे आने के विषय मे) यह उपचार है । जब कोई गृहपति बाहर से वापिस आता है तो घर वाले डर जाते है कि यह क्या कहेगा या क्या करेगा । और जब यह कुछ कहता या करता है तो घर वाले डर जाते हैं और उसके कुल मे क्षोभ होता है । और जो गृहपति न कुछ कहता है, न करता है तो उसके घर वाले सन्तुष्ट रहते हैं कि इसने कुछ नहीं कहा या कुछ नहीं किया । इसलिये यदि गृहपति किसी कारण क्रुद्ध भी हो तो जो कुछ कहना या करना हो वह दूसरे दिन कहे या करे । यह घर में आने की विधि है ॥१४॥

अध्याय ४—ब्राह्मण १

प्रजापतिं वै भूतान्युपासीदन् । प्रजा वै भूतानि वि नो धेहि यथा जीवामेति ततो देवा यज्ञोपवीतिनो भूत्वा दक्षिणं जान्वाच्योपासीदंस्तानब्रवीद्यज्ञो वोऽन्नममृतत्वं व ऊर्वः सूर्यो वो ज्योतिरिति ॥१॥

अथैनं पितरः । प्राचीनावीतिनः सव्यं जान्वाच्योपासीदंस्तानब्रवीन्मासि मासि वोऽशनꣳ स्वधा वो मनोजवो नश्चन्द्रमा वो ज्योतिरिति ॥२॥

अथैनं मनुष्याः । प्रावृता उपस्थं कृत्वोपासीदंस्तानब्रवीत्सायं प्रातर्वोऽशनं प्रजा वो मृत्युर्वोऽग्निर्वो ज्योतिरिति ॥३॥

अथैनं पशव उपासीदन् । तेभ्यः स्वैपमेव चक्कार यदैव यूयं कदा च लभाध्वै यदि काले यद्यनाकलिथैवाश्नाथेति तस्मादेते यदैव कदा च लभन्ते यदि काले यद्यनाकालेऽथैवाश्नन्ति ॥४॥

अथ हैनꣳ शश्वदप्यसुरा उपसेदुरित्याहुः । तेभ्यस्तमश्च मायां च प्रददावस्त्य-

प्राणि-लोक एक बार प्रजापति के पास गये। यह साधारण प्राणी थे। उन्होंने कहा, 'हमको यह विधि बताओ जिससे जीवन व्यतीत करें'। इस पर यज्ञोपवीत पहने हुये देव दाहिनी जानु को नमाकर, उसके पास आकर बैठे। उसने उनसे कहा, 'यज्ञ तुम्हारा अन्न है, अमृतत्व तुम्हारा बल है और सूर्य तुम्हारी ज्योति' ॥१॥

अब पितर दाहिने कंधे पर यज्ञोपवीत पहने बाईं जानु नमाकर उसके पास बैठे। उसने उनसे कहा, 'तुम्हारा मासिक भोजन होगा। तुम्हारे मन की तेजी (मनोजवा), तुम्हारी स्वधा और चन्द्रमा तुम्हारी ज्योति' ॥२॥

अब मनुष्य उसके पास आये कपड़े पहने (प्रावृत) और शरीर को झुकाये हुये। उनको उसने कहा, 'साय और प्रातः तुम्हारा भोजन होगा। मृत्यु तुम्हारी प्रजा और अग्नि तुम्हारी ज्योति' ॥३॥

अब उसके पास पशु आये। उनको उसने अपनी इच्छावाला (स्वेच्छाचारी) कर दिया। जब कभी तुम कोई चीज पाओ, चाहे समय पर, चाहे कुसमय, तुम खा जाओ। इसलिये जब वे कोई चीज पाते हैं चाहे समय पर, चाहे कुसमय, वे खा जाते हैं ॥४॥

तत्पश्चात् कहते हैं कि असुर भी (प्रजापति के पास) पहुँचे। उनको उसने

हैवासुरमायेतीव परभृता ह त्येव ताः प्रजास्ता इमाः प्रजास्तथैवोपजीवन्ति यथैवाभ्यः प्रजापतिर्व्यदधात् ॥५॥

नैव देवा अतिक्रामन्ति । न पितरो न पशवो मनुष्या एवैकेऽतिक्रामन्ति तस्माद्यो मनुष्याणा मेद्यत्यशभे मेद्यति विहूर्छति हि न ह्ययनाय चन भवत्यनृतꣳ हि कृत्वा मेद्यति तस्मादु सायंप्रातरश्नेव स्यात्स यो हैवं विद्वान्त्सायंप्रातराशी भवति सर्वꣳ हैवायुरेति यदु ह कि च वाचा व्याहरति तदु हैव भवत्येतद्धि देवसत्यं गोपायति तद्धैतत्तेजो नाम ब्राह्मण य एतस्य व्रतꣳ शक्नोति चरितुम् ॥६॥

तद्धाऽएतत् । मासि मासीव पितृभ्यो ददतो यदैवैप न पुरस्तान्न पश्चाद्दद्दशेऽथैभ्यो ददात्येप वो सोमो राजा देवानामन्नं यच्चन्द्रमाः स एताꣳ रात्रि क्षीयते तस्मिन्क्षीणे ददाति तथैभ्योऽसमद करोत्यथ यदक्षीणे दद्यात्समदꣳ ह कुर्याद्देवेभ्यश्च पितृभ्यश्च तस्माद्यदैवैप न पुरस्तान्न पश्चाद्दद्दशेऽथैभ्यो ददाति ॥७॥

स वाऽअपराह्णे ददाति । पूर्वाह्णो वै देवाना मध्यन्दिनो मनुष्याणामपराह्णः पितृणां तस्मादपराह्णे ददाति ॥८॥

अन्धकार और माया दी । इसीलिये आसुरी माया होती है । वह तो नष्ट हो गये, परन्तु आजकल भी वैसी प्रजा है जो उसी प्रकार बरतती है, जैसे प्रजापति ने उनके लिये निर्धारित किया था ॥५॥

देव, पितर या पशु इन नियमों का उल्लङ्घन नहीं करते । कुछ मनुष्य ही उल्लङ्घन करते हैं । इसलिये मनुष्यों में जो मोटा हो जाता है वह अशुभ कार्यों के कारण मोटा हो जाता है, और चूँकि वह अनृत के कारण मोटा होता है इसलिये वह चल नहीं सकता और उसके पैर लड़खड़ाते हैं । इसलिये साय और प्रातः काल को ही खाना चाहिये । जो इस रहस्य को जानकर साय और प्रातः ही खाता है वह पूर्ण आयु को प्राप्त होता है । और जो कुछ वह बोलता है वही होता है, क्योंकि देव सत्य की रक्षा करता है । जो आदमी प्रजापति के व्रत को पाल सकता है उसमें ब्रह्म तेज आ जाता है ॥६॥

यह तेज उसी को होता है जो मास में एक बार पितरों को भोजन देता है । जब पूर्व या पश्चिम में चाँद न दीखे तब उनको भोजन देता है । क्योंकि चन्द्रमा सोम राजा है जो देवों का भोजन है । (अमावस्या की) रात को वह क्षीण होता है तब (देवताओं का भोजन भी क्षीण होता है इसलिये उस समय पितरों को) भोजन देता है । इस प्रकार वह (देवों और पितरों में) समन्वय कराता है । परन्तु यदि उस समय देगा जब (चाँद) क्षीण नहीं है तो देवों और पितरों में झगड़ा हो जायगा । इसलिये तभी भोजन दे जब (चन्द्र) न पूर्व में दीखे न पश्चिम में ॥७॥

वह दोपहर के बाद देता है । देवों का पहला पहर (पूर्वाह्ण) है, दोपहर (मध्यन्दिन) मनुष्यों का और तीसरा पहर (अपराह्ण) है पितरों का । इसलिये तीसरे पहर देता है ॥८॥

स जघनेन गार्हपत्यं । प्राचीनावीती भूत्वा दक्षिणासीन एतं गृह्णाति स तत एवोपोत्थायोत्तरेणान्वाहार्यपचनं दक्षिणा तिष्ठन्व वहेन्ति सकृत्फलीकरोति सकृदु ह्येव पराञ्चः पितरस्तस्मात्सकृत्फलीकरोति ॥९॥

तथ्ँ श्रयति । तस्मिन्नधिश्रितऽआज्यं प्रत्यानयत्यग्नौ वै देवेभ्यो जुह्वत्युद्धरन्ति मनुष्येभ्योऽथैव पितॄणां तस्मादधिश्रित ऽआज्यं प्रत्यानयति ॥१०॥

स उद्वास्याग्नौ द्वेऽआहुती देवेभ्यः । देवान्वाऽएष उपावर्तते य आहिताग्निर्भवति यो दर्शपूर्णमासाभ्यां यजतेऽथैतत्पितृयज्ञेनेवाचारीत्तदु देवेभ्यो निन्हुते स देवैः प्रसूतोऽथैतत्पितृभ्यो ददाति तस्मादुद्वास्याग्नौ द्वेऽआहुती जुहोति देवेभ्यः ॥११॥

स वाऽअग्नये च सोमाय च जुहोति । स यदग्नये जुहोति सर्वत्र ह्येवाग्निरन्वाभक्तोऽथ यत्सोमाय जुहोति पितृदेवत्यो वै सोमस्तस्मादग्नये च सोमाय च जुहोति ॥१२॥

स जुहोति । अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेत्यग्नौ मेक्षणमभ्यादधाति तत्स्विष्टकृद्भाजनमथ दक्षिणेनान्वाहार्यपचनथ्ँ सकृदुल्लिखति तद्वेदिभाजनथ्ँ

वह गार्हपत्य के पीछे बैठकर जनेऊ दक्षिण कन्धे पर रक्खे हुये दक्षिण की ओर मुँह कर के (गाड़ी में से हवि) लेता है । फिर वहाँ से उठकर अन्वाहार्य-पचन के उत्तर की ओर खड़ा होकर दक्षिण की ओर मुँह करके (चाँवलों को) फटकता है । एक बार ही फटकता है क्योंकि एक ही बार पितर गुजर गये इसलिये एक बार ही फटकता है ॥९॥

फिर पकाता है । इसके पकते हुये में घी छोड़ता है । देवों के लिये हवि अग्नि में छोडी जाती है । मनुष्यों के लिये (भोजन) अग्नि से निकाल कर लिया जाता है । और पितरों के लिये इस प्रकार करते हैं । इसलिये जब यह आग पर पक रहा हो, उसमें घी छोड़ते हैं ॥१०॥

वहाँ से उठाकर अग्नि में देवों के लिये दो आहुतियाँ देता है । जो अग्नि स्थापित करता है (अग्निहोत्र के लिये) या जो दर्शपूर्णमास करता है वह देवों की सेवा में उपस्थित होता है । परन्तु यहाँ उसे पितृयज्ञ करना है । इसलिये देवों को प्रसन्न करता है कि उनको प्रसन्न करने के पश्चात् पितरों को देवे । इसलिये वहाँ से (हवि को) उठाकर अग्नि में देवों के लिये दो आहुतियाँ देता है ॥११॥

वह अग्नि और सोम के लिये आहुतियाँ देता है । अग्नि को आहुति इसलिये देता है कि अग्नि का भाग तो सभी जगह दिया जाता है । सोम के लिये यों देता है कि सोम पितरों का देवता है । इसलिये अग्नि और सोम के लिये देता है ॥१२॥

वह इस मन्त्र से आहुति देता है, 'अग्नये कव्यवाहनाय स्वाहा । सोमाय पितृमते स्वाहा' (यजु० २।२९) । 'बुद्धिमान् पितरों के लिये, ले जाने वाले अग्नि के लिये' । पितृयुक्त सोम के लिये' । स्विष्टकृत के बदले आग पर मेक्षण (चमचा pot-ladle) रखता है । अब दक्षिणाग्नि के दक्षिण की एक रेखा खींचता है । वेदि के पहले । पितर लोग

सकृदु ह्येव पराञ्चः पितरस्तस्मात्सकृदुल्लिखति ॥१३॥

अथ परस्तादुल्मुकं निदधाति । स यदनिधायोल्मुकमथैतत्पितृभ्यो दद्यादसुररक्षसानि हैषामेतद्विमन्थीरंस्तथो हैतत्पितॄणामसुररक्षसानि न विमथ्नते तस्मात्परस्तादुल्मुकं निदधाति ॥१४॥

स निदधाति । ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मादित्याग्नहि रक्षसामपहन्ता तस्मादेव निदधाति ॥१५॥

अथोदपात्रमादायावनेजयति । असाववनेनिक्ष्वेत्येव यजमानस्य पितरमसाववनेनिक्ष्वेति पितामहमसाववनेनिक्ष्वेति प्रपितामह तद्यथाशिष्यतेऽभिपिञ्चेदेव तत् ॥१६॥

अथ सकृदाच्छिन्नान्युपमूलं दिनानि भवन्ति । अग्रमिव वै देवाना मध्यमिव मनुष्याणां मूलमिव पितॄणा तस्मादुपमूलं दिनानि भवन्ति सकृदाच्छिन्नानि भवन्ति सकृदु ह्येव पराञ्चः पितरस्तस्मात्सकृदाच्छिन्नानि भवन्ति ॥१७॥

तानि दक्षिणोपरतॄणाति । तत्र ददाति स वाऽइति ददातीतीव वै देवेभ्यो जुह्वत्युद-

एक ही बार गुजर गये इसलिये एक ही बार रेखा खींचता है ॥१३॥

अब दूसरे छोर पर जलती हुई लकड़ी (उल्मुक) रखता है। क्योंकि यदि बिना इस लकड़ी के रक्खे पितरों को भोजन दिया गया तो असुर और राक्षस उसको बिगाड़ ही जायँगे और इस प्रकार असुर और राक्षस उसको नहीं बिगाड़ते इसलिये वह जलती हुई लकड़ी को रखता है ॥१४॥

वह मन्त्र पढ़कर रखता है, 'ये रूपाणि प्रतिमुञ्चमानाऽ असुरा सन्त स्वधया चरन्ति । परापुरो निपुरा ये भरन्त्यग्निष्टाँल्लोकात् प्रणुदात्यस्मात्' (यजु० २।३०)। 'जो असुर रूपों को बदलते हुये स्वतंत्रता से विचरते हैं, छोटे शरीर वाले या बड़े शरीर वाले, अग्नि उनको इस लोक से निकाल दे'। अग्नि राक्षसों को भगाने वाला है इसलिये वह इस लकड़ी को रखता है ॥१५॥

अब जल का पात्र लाकर हाथ धुलाता है। यजमान के बाप का नाम लेकर 'आप हाथ धोइये,' यजमान के बाबा का नाम लेकर, 'आप हाथ धोइये'। यजमान के परबाबा का नाम लेकर, 'आप हाथ धोइये'। जैसे महमान को जल देते हैं ऐसे यहाँ भी ॥१६॥

जिन एक चोट में ही मूल से काटे जाते हैं। उनका अगला भाग देवों का होता है, बीच का मनुष्यों का और मूल पितरों का। इसलिये वह मूल से काटे जाते हैं। वह एक ही चोट से इसलिये काटे जाते हैं कि पितर लोग एक ही बार में गुजर गये ॥१७॥

वह उनके तिनों को दक्षिण की ओर करके फैलाता है। तब (पिण्ड) देता है। वह इस प्रकार पिण्ड देता है। (हाथ से बताकर)। देवों को इस प्रकार दिया जाता है (यहाँ भी हाथ से विधि बताई जाती है)। मनुष्यों को इस प्रकार परोसते हैं। और पितरों

रन्ति मनुष्येभ्योऽथैन पितृणा तस्मादिति ददाति ॥१८॥

स ददाति । असावेतत्तऽइत्येव यजमानस्य पित्रे ये च त्वामन्वित्यु हैकऽआहुस्तदु तथा न ब्रूयात्स्वयं वै तेपाञ्छ सहयेपाञ्छ सह तस्मादु ब्रूयादसावेतत्तऽइत्येव यजमानस्य पित्रेऽसावेतत्तऽइति पितामहायासावेतत्तऽइति प्रपितामहाय तद्यदितः परान्ददाति सकृदु ह्येव पराञ्चः पितरः ॥१९॥

तत्र जपति । अत्र पितरो मादयध्य यथाभागमावृषायध्वमिति यथाभागमश्नीतेत्येवैतदाह ॥२०॥

अथ पराङ् पर्यावर्तते । तिर इव वै पितरो मनुष्येभ्यस्तिर इवै तद्भवति स वाऽआतमितोरासीतेत्याहुरेतावान्ह्यसुरिति स वै मुहूर्तमेवासित्वा ॥२१॥

अथोपपल्ययय्य जपति । अमीमदन्त पितरो यथाभागमावृषायिषतेति यथाभागमाशिषुरित्येवैतदाह ॥२२॥

अथोदपात्रमादायावनेजयति । असावावनेनिक्तेत्येव यजमानस्य पितरमसावावनेनि-

के लिये इस प्रकार । इसलिये वह इस प्रकार देता है ॥१८॥

यजमान के बाप का नाम लेकर 'यह तुम्हारे लिये' कुछ लोग इसके साथ यह भी कहते हैं, 'और उनके लिये जो तुम्हारे पीछे आवें' । परन्तु उसको ऐसा न कहना चाहिये । क्योंकि वह भी तो उन्हीं में से है, इसलिये पिता का नाम लेकर कहे 'यह तुम्हारे लिये' । बाबा का नाम नाम लेकर, 'यह तुम्हारे लिये' । पर-दादे का नाम लेकर, 'यह तुम्हारे लिये' । वर्तमान समय से आरम्भ करके पिछले पिछले के क्रम से देता है क्योंकि पितरों के गुजरने का वर्तमान की अपेक्षा यही क्रम है ॥१९॥

अब वह जपता है, 'अत्र पितरो मादयध्व यथाभागमावृषायध्वम्' (यजु० २।३१) । 'हे पितरो ! यहाँ प्रसन्नता से खाओ जैसे बैल आकर खाते हैं अपने अपने हिस्से का' । इसका तात्पर्य यह है कि 'अपना-अपना भाग खाओ' ॥२०॥

अब मुड़ कर खड़ा होता है (अर्थात् उत्तर की ओर) । क्योंकि पितर मनुष्यों से बिलकुल दूसरी ओर हैं । और वह भी पितरों से दूसरी ओर है । कुछ लोग कहते हैं कि जब तक साँस रोक सके उस समय तक खड़ा रहे क्योंकि प्राण इतने ही होते हैं । अस्तु, एक मुहूर्त रहकर ॥२१॥

(दाहिनी ओर) मुड़कर जपता है, 'अमीमदन्त पितरो यथा भागमावृषायिषत' (यजु० २।३१) । 'पितरों ने खा लिया । वैसों के समान उन्होंने अपना-अपना भाग पा लिया' ॥२२॥

अब जल पात्र लेकर हाथ धुलाता है । यजमान के बाप का नाम लेकर 'तुम धोओ' । बाबा का नाम लेकर 'तुम धोओ', पर-दादे का नाम लेकर 'तुम धोओ' । जिस प्रकार

क्त्वेति पितामहमसावनेनिक्त्वेति प्रपितामहं तद्यथा जक्षुपेऽभिपिञ्चेदेवं तत् ॥२३॥

अथ नीविमुद्वृह्य नमस्करोति । पितृदेवत्या वै नीविस्तस्मान्नीविमुद्वृह्य नमस्करोति यज्ञो वै नमो यज्ञियानेवैनानेतत्करोति षट्कृत्वो नमस्करोति षड् वाऽऋतव ऋतवः पितरस्तस्मात्षट्कृत्वो नमस्करोति गृहान्नः पितरो दत्तेति गृहाणाथं ह पितर ईशतऽएषोऽएतस्याशीः कर्मणोऽथावजिघ्रति प्रत्यवघाय पिण्डान्त्स यजमानभागोऽग्नौ सकृदाछिन्नान्यभ्यादधाति पुनरुल्मुकमपि सृजति ॥२४॥ ब्राह्मणम् ॥४॥ [४.२.] ॥

मेहमानों को खाना खिलाकर बुलाते हैं उसी प्रकार यहाँ भी ॥२३॥

नीवि (निचला कपड़ा और ऊपर का कपड़ा दोनों में गाँठ दी जाती है) को खोल कर नमस्कार करता है । नीवि पितरों की है इसलिये उसे खोलकर नमस्कार करता है । नमस्कार यज्ञ है । इसलिये इस प्रकार वह उनको यज्ञ के योग्य बनाता है । छः बार नमस्कार करता है क्योंकि छः ऋतुयें हैं और पितर ऋतुयें हैं इसलिये छः बार नमस्कार करता है । अब वह कहता है, 'गृहान्नः पितरो दत्त' (यजु० २।३२) । 'हे पितरो, हमको घर दीजिये' । पितर घरों के रक्षक हैं इसलिये इस कर्म से आशीर्वाद चाहता है । पिण्डों को पीछे हटाकर सूँघता है । क्योंकि यह यजमान का भाग है । एक चोट से काटी हुई (कुश) को अग्नि पर रखता है । और जलती हुई लकड़ी (उल्मुक) को फेंकता है ॥२४॥

अध्याय ४—ब्राह्मण ३

तदु होवाच कहोडः कौपीतकिः । अनयोर्वाऽअयं द्यावापृथिव्यो रसोऽस्य रसस्य हुत्वा देवेभ्योऽयेममन्नमेति तस्माद्वाऽआग्रयणेष्ट्या यजतऽइति ॥१॥

तदु होवाच याज्ञवल्क्यः । देवाश्च वाऽअसुराश्चोभये प्राजापत्याः पस्पृधिरे ततोऽसुरा उभयीरोषधीर्याश्च मनुष्या उपजीवन्ति याश्च पशवः कृत्ययैव त्वद्विषेणैव त्वत्परिलिलिपुरुतैवं चिद्देवानभिभवेमेति ततो न मनुष्या आशकुर्न पशव आलिलिशिरे ता हेमाः प्रजा अनाशकेन नोत्परावभूवुः ॥२॥

तद्धै देवाः शुश्रुवुः । अनाशकेन ह वाऽइमाः प्रजाः परामवन्तीति ते होचुर्हन्तेदमासामपजिघांश्सामेति केनेति यज्ञेनैवेति यज्ञेन ह स्म वै तद्देवाः कल्पयन्ते यदेषां कल्पमाऽऋषयश्च ॥३॥

ते होचुः । कस्य न इदं भविष्यतीति ते मम ममेत्येव न सम्पादयां चक्रुस्ते हास्याद्योचुराजिमेवास्मिन्नजामहै स यो न उज्जेष्यति तस्य न इदं भविष्यतीति तथेति तस्मिन्नाजिमाजन्त ॥४॥

कहोड कौपीतकि ने कहा, यह (वृक्षों का) रस वस्तुतः द्यावा, पृथिवी का है। हम देवों को आहुति देकर खावें। इसलिये 'आग्रयणेष्टि' यज्ञ किया जाता है ॥१॥

याज्ञवल्क्य का भी कथन है कि प्रजापति की सन्तान देव और असुर बड़ाई के लिये लड़ पड़े। तब असुरों ने दोनों प्रकार की ओषधियों को अर्थात् उनको भी जिनके सहारे मनुष्य रहते हैं और उनको भी जिनके सहारे पशु रहते हैं कुछ अपनी चालाकी से (कृत्यया) और कुछ विष के द्वारा नष्ट कर दिया कि इस प्रकार हम देवों पर विजय पालेंगे। इस पर न मनुष्य कुछ खा सके और न पशु, और भोजन के अभाव में यह सब पराजित से हो गये ॥२॥

अब देवों ने सुना कि बिना भोजन के यह सब प्रजा पराजित हो रही है। उन्होंने कहा, 'इस सब (विष आदि) को हटाना चाहिये'। 'कैसे ?'। 'यज्ञ के द्वारा'। देव जो कुछ करना चाहते थे वह उन्होंने यज्ञ के द्वारा किया और ऋषियों ने भी ॥३॥

तब उन्होंने कहा, 'यह (यज्ञ) हम में से किसका होगा' ? हर एक ने कहा, 'मेरा' 'मेरा' और निश्चित न कर सके। निश्चय न कर सकने पर उन्होंने कहा, 'चलो बाजी बदकर दौड़ें। हममें से जो जीत जायगा यह (यज्ञ) उसी का होगा। 'अच्छा' कहकर वह दौड़े ॥४॥

तावि॑न्द्राग्नी ऽउदजयतां । तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवतीन्द्राग्नी ह्यस्य भागधेयमुदजयतां तौ यत्रेन्द्राग्नीऽउज्जिगीषाꣳसो तस्थतुस्तद्विश्वे देवा अन्वाजग्मुः ॥५॥

क्षत्रं वाऽइन्द्राग्नी । विशो विश्वे देवा यत्र क्षत्रैवे मुज्जयत्यन्वागत्ता वै तत्र विट तद्विश्वान्देवानन्वाभजतां तस्मादेष वैश्वदेवश्चरुर्भवति ॥६॥

तं वै पुराणानां कुर्यादित्याहुः क्षत्रं वाऽइन्द्राग्नी नेरक्षत्रमभ्यारोहयाणीति तौ वाऽउभावेव नवानाꣳ स्यातां यदि पुरोडाश इतरश्चरुरितरस्तेनैव क्षत्रमनभ्यारूढं तस्मादुभावेव नवानाꣳ स्यातां ॥७॥

तऽउ ह विश्वे देवा ऊचुः । अनयोर्वाऽअयं द्यावापृथिव्योः रसो हन्तेमेऽअस्मिन्नाभजामेति ताभ्यामेतं भागमकल्पयन्नेतं द्यावापृथिव्यमेककपालं पुरोडाशं तस्माद्द्यावापृथिव्य एककपालः पुरोडाशो भवति तस्येयमेव कपालमेकेव ह्ययं तस्मादेककपालो भवति ॥८॥

तस्य परिक्रयः । यस्यै वै कस्यै च देवतायै हविर्गृह्यते सर्वमेव रिक्तकृदन्वागत्तो-

इन्द्र और अग्नि जीत गये । इसलिये पुरोडाश के बारह कपाल इन्द्र और अग्नि के होते हैं क्योंकि इन्द्र और अग्नि ने अपना भाग जीत लिया और इन्द्र और अग्नि जीतने पर जहाँ खड़े थे वहाँ सब देव भी चले गये ॥५॥

इन्द्र और अग्नि क्षत्रिय हैं, सब देव वैश्य । जहाँ क्षत्रिय जीतता वहाँ वैश्यों को अवश्य भाग मिलता है । इसलिये देवों को भाग मिल गया इसलिये चरु सब देवों (विश्वेदेवा) का होता है ॥६॥

कुछ लोगों का विचार है कि (चरु) पुराने (अन्न) का हो क्योंकि इन्द्र और अग्नि क्षत्रिय हैं इसलिये (विश्वेदेवों को भी यदि इन्द्र और अग्नि के समान नया अन्न दिया जायगा तो) वैश्य क्षत्रियों के बराबर हो जायंगे । परन्तु दोनों को नया ही होना चाहिये । केवल यह पुरोडाश है और यह चरु है । इन दोनों के नये होने से ही क्षत्रियों के बराबर (वैश्य) नहीं हो सकते । इसलिये दोनों (पुरोडाश और चरु) नये अन्न के ही हों ॥७॥

अब देवों ने कहा, 'यह रस वस्तुतः द्यावापृथिवी का है । इसलिये हम इनको यज्ञ में भाग देवें' । इसलिये उन्होंने उन दोनों को भाग दिया अर्थात् एक कपाल का पुरोडाश द्यावापृथिवी को दिया । इसलिये एक कपाल का पुरोडाश द्यावापृथिवी का होता है । अब चूंकि यह पृथिवी उस (रस) का कपाल है और यह एक ही है इसलिये (पुरोडाश भी) एक कपाल का होता है ॥८॥

(लेना करने में) क्रय का एक दोष (है) । चाहे किसी देवता को हवि दी जाय, पीछे से एक भाग रिक्तकृत् का होता है । परन्तु यहाँ (पुरोडाश) की पूरी आहुति दे दी

ऽथैतथ्ँ सर्वमेव जुहोति न स्विष्टकृतेऽवद्यति सा परिचक्षोतो हुतः पर्यावर्तते ॥६॥

तदाहुः । पर्याभूद्वाऽअयमेककपालो मोहिष्यति राष्ट्रमिति नास्य सा परिचक्षाहवनीयो वाऽआहुतीना प्रतिष्ठा स यदाहवनीयं प्राप्यापि दशकृत्वः पर्यावर्तत न तदाद्रियेत यदीत्वन्ये वदन्ति कन्ततसंधमुपेयात्तस्मादाज्यस्यैव यजेदाज्यथ्ँ ह वाऽअनयोर्द्यावापृथिव्योः प्रत्यक्षथ्ँ रसस्तत्प्रत्यक्षमेवैनेऽएतत्स्वेन रसेन मेधेन प्रीणाति तस्मादाज्यस्यैव यजेत् ॥१०॥

एतेन वै देवाः । यज्ञेनेष्ट्वोभयीनामोषधीनां याश्च मनुष्या उपजीवन्ति याश्च पशवः कृत्यामिव त्वद्विषमिव त्वदपजघ्नुस्तत आश्नन्मनुष्या आलिशन्त पशवः ॥११॥

अथ यदेष एतेन यजते । तद्वाह त्वेवैतस्य तथा करचन कृत्ययेव त्वद्विषेणेव त्वत्प्रलिम्पतीति देवा ऋकुर्वचिति त्वेवैष एतत्करोति यमु चैव देवा भागमकल्पयन्त तमु चैवेभ्य एष एतद्भाग करोतीमा उ चैवैतदुगयीरोषधीर्याश्च मनुष्या उपजीवन्ति याश्च पशवस्ता अनमीवा अकिल्विषा कुरुते ता अस्यानमीवा अकिल्विषा इमाः प्रजा उपजीवन्ति तस्माद्वाऽएष एतेन यजते ॥१२॥

तस्य प्रथमजो गौर्दक्षिणा । अग्रथमिव हीदथ्ँ स यदीजानः स्यादर्शपूर्णमासाभ्यो

जाती है । स्विष्टकृत के लिये कुछ बचाया नहीं जाता । यह एक दोष है, इसलिये आहुति उलटी पड़ जाती है ॥६॥

इसलिये कहते हैं, 'यह एक कपाल उलटा पड़ गया । यह राष्ट्र को बिगाड़ देगा' । परन्तु इसमें कुछ दोष नहीं । आहुतियों की प्रतिष्ठा आहवनीय है । जब आहुति आहवनीय में पहुँच गई तो चाहे दस बार उलट जाय कुछ परवाह नहीं । और यदि कोई कहे कि इन (दोनों) के भार को कौन सहे तो केवल घी की ही आहुति दे क्योंकि इन द्यावा-पृथिवी का प्रत्यक्ष रस घी है । इस प्रकार प्रत्यक्ष रूप में इनको वह इन्हीं के रस या मेध (तत्व) से तृप्त करता है इसलिये घी की ही आहुति दे ॥१०॥

यज्ञ करके देवों ने उन सब ओषधियों को जिनके सहारे मनुष्य रहते हैं या पशु रहते हैं (असुरों की) चालाकी और विष (के प्रभाव) से मुक्त कर दिया । इसलिये अब मनुष्य भोजन करने लगे और पशु चरने लगे ॥११॥

अब यह जो यज्ञ करता है, या तो इसलिये करता है कि कोई चालाकी या विष से (वनस्पति) को बिगाड़ने न पाये या केवल इसलिये कि देवों ने ऐसा किया था । और जो भाग देवों ने अपने लिये निकाला था वह भी उनके लिये निकाल देता है । इसके अतिरिक्त वह दोनों प्रकार के पौधों की अर्थात् जिनके सहारे मनुष्य रहते हैं और जिनके सहारे पशु रहते हैं उनको विष रहित कर देता है । और यह मनुष्य और पशु इसके दोष-रहित पौधों के सहारे जीते हैं । इसलिये वह इस यज्ञ को करता है ॥१२॥

इस यज्ञ की दक्षिणा है पहलौठी बछड़ा । क्योंकि यह (गाय का) अग्र अर्थात्

वा यजेताथैतेन यजेत यद्युऽअनीजानः स्याच्चातुष्प्राश्यमेवैतमोदनमन्वाहार्यपचने पचेयुस्तं ब्राह्मणा अश्नीयुः ॥१३॥

द्वया वै देवा देवाः। अहैव देवा अथ ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्ते मनुष्यदेवास्तद्यथा वषट्कृतꣳ हुतमेवमस्यैतद्भवति तन्नो यच्छक्नुयात्तद्दद्यान्नादक्षिणꣳ हविः स्यादिति ह्याहुर्नाग्निहोत्रे जुहयात्समदꣳ ह कुर्याद्यदग्निहोत्रे जुहुयादन्यद्वाऽआमयणमन्यदग्निहोत्रं तस्मान्नाग्निहोत्रे जुहुयात् ॥१४॥ ब्राह्मणम् ॥५॥ [४. ३.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या ॥ ११३ ॥

पहला फल होता है। यदि दर्श और पूर्णमास यज्ञ कर चुका हो तो पहले वह आहुतियाँ दे और फिर इस यज्ञ को पीछे से करे। और यदि (दर्श और पूर्ण मास) नहीं किया तो अन्वाहार्य-पचन अग्नि पर चातुष्प्राश्य को पकाले और ब्राह्मणों को खिला दे ॥१३॥

देव दो प्रकार के हैं। एक तो देव और दूसरे ब्राह्मण जो वेदपाठी हैं, यह मनुष्य-देव हैं। जिस प्रकार वषट्कार की आहुति होती है वैसी यह भी है। इस समय भी वह जितना हो सके उतनी दक्षिणा दे क्योंकि कहते हैं कि कोई हवि दक्षिणा के बिना पूरी नहीं होती। अग्निहोत्र में (नया अन्न) न डाले नहीं तो झगड़ा होगा। आमयण भिन्न है और अग्निहोत्र भिन्न। इसलिये अग्निहोत्र में (नया अन्न) न डाले ॥१४॥

अध्याय ४—ब्राह्मण ४

प्रजापतिर्ह वाऽएतेनाग्ने यज्ञेनेजे । प्रजाकामो बहुः प्रजया पशुभिः स्याꣳ श्रियं गच्छेयं यशः स्यामन्नादः स्यामिति ॥१॥

स वैदक्षो नाम । तद्यदेनेन सोऽग्नेऽयजत तस्माद्दाक्षायणयज्ञो नामोतैनमेके वसिष्ठयज्ञ इत्याचक्षतऽएष वै वसिष्ठ एतगोत्र तदन्वाचक्षते स एतेन यज्ञेनेजे स एतेन यज्ञेनेष्ट्वा येयं प्रजापतेः प्रजातिर्या श्रीरेतद्वभूवैताꣳ ह वै प्रजाति प्रजायतऽएताꣳ श्रियं गच्छति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥२॥

तेनो ह तत ईजे । प्रतीदर्शः स्वैनः स ये तं प्रत्यासुस्तेषां विवचनमिवास विवचनमिव ह वै भवति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥३॥

तमाजगाम । सुप्ला साऱ्ज्जयो ब्रह्मचर्यं तस्मादेतं च यज्ञमनूचेऽन्यꣳ च सोऽनूच्य पुनः सृञ्जयान्जगाम तेह सृञ्जया विदा चक्रुर्यज्ञं वै नोऽनूच्यागन्निति ते होचुः सह वै नस्तदेवैरागन्यो नो यज्ञमनूच्यागन्निति स वै सहदेवः साऱ्ज्जयस्तदप्येतन्निवचनमिवास्त्यन्यद्वा-

प्रजापति ने पहले प्रजा की कामना से यह यज्ञ किया। उसने सोचा—'मैं बहुत प्रजा और पशु-युक्त हो जाऊँ, श्री मिल जाय, यशस्वी हो जाऊँ, अन्न पचाने वाला हो जाऊँ' ॥१॥

उसका नाम दक्ष था। और चूँकि पहले उसने इस यज्ञ को किया इसलिये यज्ञ का 'दाक्षायण यज्ञ' नाम पड़ा। कुछ लोग दक्ष को वसिष्ठ यज्ञ कहते हैं क्योंकि वह वसिष्ठ ही है। उसी के नाम पर यज्ञ का नाम पड़ा। उसने यज्ञ किया और इस यज्ञ से उस प्रजापति ने जो सन्तान, जो श्री, जो विभूति प्राप्त की उसी सन्तान, उसी श्री को वह भी प्राप्त होता है जो इस यज्ञ को समझकर करता है। इसलिये इस यज्ञ को अवश्य करे ॥२॥

प्रतीदर्श स्वैन ने भी इसी यज्ञ को किया। और जिन्होंने उसका अनुकरण किया उनके लिये वह विवचन (authority) सा था। जो इस रहस्य को समझ कर इस यज्ञ को करता है वह विवचन ही हो जाता है। इसलिये इस यज्ञ को अवश्य करे ॥३॥

सुप्ला साऱ्ज्जय ब्रह्मचर्य व्रत के लिये उसके पास आया इसलिये उसे यह यज्ञ और अन्य भी सिखाया। यह उनको सीख कर साऱ्ज्जय वाले लोगों के पास (अपने देश में) चला गया। अब उन्होंने जान लिया कि यह हमारे लिये यज्ञ को सीख कर आया है।

ऽश्रे सुत्रा नाम दधऽइति स एतेन यज्ञेनेजे स एतेन यज्ञेनेष्ट्वा येयꣳ सृञ्जयानां प्रजापतिर्यो श्रीरेतद्वभूवैताꣳ ह वै प्रजाति प्रजायतऽएताꣳ श्रियं गच्छति य एव विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥४॥

तेनो ह तत ईजे । देवभाग॰ श्रौतर्ष॰ स उभयेषां कुरूणा च सृञ्जयाना च पुरोहित आस परमता वै सा यो न्वेवैकस्य राष्ट्रस्य परोहितोऽसत्सा न्वेव परमता किमु यो द्वयो परमतामिव ह वै गच्छति य एव विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥५॥

तेनो ह तत ईजे । दक्ष पार्वतिरतऽइमेऽप्येतर्हि दाक्षायणा राज्यमिवैव प्राप्ता राज्यमिह वै प्राप्नोति य एव विद्वानेतेन यजते तस्माद्वाऽएतेन यजेत स वाऽएकैक एवान्वहं पुरोडाशो भवत्येतेनो हास्यासपत्नानुपबाधा श्रीर्भवति स वै द्वे पौर्णमास्यौ यजते द्वेऽअमावास्ये द्वे वै मिथुन मिथुनमेवैतत्प्रजननं क्रियते ॥६॥

अथ यत्पूर्वेद्यु॰ । अग्नीषोमीयेण यजते पौर्णमास्या ते द्वे देवते द्वे वै मिथुन मिथुनमेवैतत्प्रजननं क्रियते ॥७॥

उन्होंने कहा, 'यह जो यज्ञ सीख कर आया है मानो 'देवों के साथ' आया है इसलिये उसका सहदेव सार्ञ्जय नाम पड़ गया। अब तक यह कहावत चली आती है कि अरे सुत्रा का दूसरा नाम रख दिया गया। उसने उस यज्ञ को किया और जो सन्तान और वैभव इस यज्ञ के करने से सृञ्जयों को प्राप्त हुआ उसी सन्तान को वह भी उत्पन्न करता है और उसी वैभव को प्राप्त होता है जो इस रहस्य को समझकर यह यज्ञ करता है। इसलिये इस यज्ञ को अवश्य करे ॥४॥

देवभाग श्रौतर्ष ने भी यह किया था। वह कुरुओं और सृञ्जयों दोनों का पुरोहित था। जो एक राष्ट्र का पुरोहित होता है उसकी बड़ी पदवी होती है और उसकी पदवी का क्या कहना जो दो राष्ट्रों का पुरोहित हो। जो इस रहस्य को समझ कर इस यज्ञ को करता है वह उसी बड़ी पदवी को पाता है। इसलिये इस यज्ञ को अवश्य करे ॥५॥

दक्ष पार्वति ने भी यही यज्ञ किया था। और आज तक वह दाक्षायण (उसी की सन्तान) राज्य को पाये हुये हैं। जो कोई इस रहस्य को समझ कर इस यज्ञ को करता है वह भी राज्य को पा जाता है। इसलिये इस यज्ञ को अवश्य करे। एक एक पुरोडाश प्रति दिन देना होता है। इसलिये उसकी श्री बिना सपत्नी के और बिना बाधा के होती है। वह पूर्णमासी के दो दिन और अमावस्या के दो दिन यज्ञ करता है। दो का नाम है जोड़ा। इस प्रकार वह उत्पन्न करने वाले जोड़े से सम्पन्न हो जाता है ॥६॥

पूर्णमासी को पहले दिन अग्नि और सोम को एक पुरोडाश देता है। यह दो देवता हैं। दो का अर्थ है जोड़ा। इस प्रकार वह उत्पन्न करने वाले जोड़े से सम्पन्न हो जाता है ॥७॥

अथ प्रातः । आग्नेयः पुरोडाशो भवत्यैन्द्रश्च सांनाय्यं ते द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियते ॥८॥

अथ यत्पूर्वेद्युः । ऐन्द्राग्नेन यजतेऽमावास्याया ते द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियते ॥९॥

अथ प्रातः । आग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेद्यज्ञादयानीति नैवाग्नेयः पुरोडाशोऽथैतावेव मित्रावरुणौ द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियतऽएतदु हास्य सद्रपं येन बहुर्भवति येन प्रजायते ॥१०॥

अथ यत्पूर्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्यां यमेवामुमुपवसथे ऽग्नीषोमीयं पशुमालभते स एवास्य सः ॥११॥

अथ प्रातः । आग्नेयः पुरोडाशो भवत्यैन्द्रश्च सानाय्यं प्रातः सवनमेवास्याग्नेयः पुरोडाश आग्नेयश्हि प्रातः सवनमथैन्द्रश्च सानाय्य माध्यन्दिनमेवास्य तत्सवनमैन्द्रश्च हि मध्यन्दिनश्च सवनम् ॥१२॥

अथ यत्पूर्वेद्युः । ऐन्द्राग्नेन यजतेऽमावास्याया तृतीयसवनमेवास्य तद्वैश्वदेवं वै तृतीयसवनमिन्द्राग्नी वै विश्वे देवाः ॥१३॥

दूसरे दिन अग्नि का पुरोडाश और इन्द्र का सान्नाय्य यह दो देवता हैं। दो का अर्थ है जोड़ा। इस प्रकार वह उत्पन्न करने वाले जोड़े से सम्पन्न हो जाता है ॥८॥

अमावस्या को पहले दिन इन्द्र और अग्नि को पुरोडाश देता है। यह दो देवता हैं। दो का अर्थ है जोडा। इस प्रकार एक उत्पत्ति करने वाले जोड़े से सम्पन्न हो जाता है ॥९॥

दूसरे दिन अग्नि के लिये पुरोडाश और मित्र-वरुण के लिये दही (पयस्या)। अग्नि का पुरोडाश केवल इसलिये कि वह यज्ञ से चला न जाय। मित्र और वरुण दो देवता हैं। दो का अर्थ है जोडा। वह इस प्रकार उत्पन्न करने वाले जोड़े से सम्पन्न हो जाता है। यह उसका वह रूप है जिससे वह बहुत (या अनेक) हो जाता है जिससे [illegible] होता है ॥१०॥

और जो पूर्णमासी को पहले दिन अग्नि-सोम का पुरोडाश दिया जाता है [illegible] ही है जैसा कि (सोम यज्ञ में) उपवास के दिन पशु-आलभन है ॥११॥

दूसरे दिन अग्नि का पुरोडाश और इन्द्र का सान्नाय्य। अग्नि का [illegible] है जैसा (सोम यज्ञ में) प्रातः काल की आहुति। क्योंकि प्रातः [illegible] होता है। इन्द्र का सान्नाय्य वैसा ही है जैसा (सोम याग में) मध्य दिन का [illegible] मध्य दिन का सवन इन्द्र का होता है ॥१२॥

अमावस्या को पहले दिन जो इन्द्र और अग्नि का [illegible] ही है जैसा तृतीय सवन। क्योंकि तृतीय [illegible] अग्नि विश्वेदेव ही हैं ॥१३॥

अथ प्रातः। आग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेद्यज्ञादयानीति न्वेवाग्नेयः पुरोडाशोऽथ यामेवामूं मैत्रावरुणीं वशामनूवन्ध्यामालभते सैवास्य मैत्रावरुणी पयस्या स पौर्णमासेन चामावास्येन चेष्ट्वा यावत्सौम्येनाध्वरेणेष्टवा यजति तावज्जयति तदु खलु महायज्ञो भवति ॥१४॥

अथ यत्पूर्वेद्युः। अग्नीषोमीयेण यजते पौर्णमास्यामेतेन वाऽइन्द्रो वृत्रमहन्नेतेनोऽएव व्यजयत यास्येयं विजितिस्तां तथोऽएवैष एतेन पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथोऽएव विजयतेऽथ यत्संनयत्यामावास्यं वै सांनाय्यं दूरे तद्यदमावास्येति क्षिप्रऽएवैतद्वृत्रं जघ्ने तमेतेन रसेनाप्रीणन्क्षिप्रे ह वै पाप्मानमपहते य एवं विद्वान्पौर्णमास्याꣳ संनयत्येष वै सोमो राजा देवानामन्नं यच्चन्द्रमास्तमेतत्पूर्वेद्युरभिपुण्वन्ति प्रातर्भक्षयिष्यन्तस्तमेतद्भक्षयन्ति यदपक्षीयते ॥१५॥

अथ यत्पूर्वेद्युः। अग्नीषोमीयेण यजते पौर्णमास्यामभिपुणोत्येवैनमेतत्तस्मिन्नभिपुतऽएतꣳ रसं दधात्येतेन रसेन तीव्रीकरोति स्वदयति ह वै देवेभ्यो हव्यꣳ स्वदते हास्य

और जो दूसरे दिन अग्नि के लिये पुरोडाश और मित्र-वरुण के लिये दही होता है, इसमे अग्नि का पुरोडाश केवल इसलिये है कि कहीं अग्नि यज्ञ को छोड़ कर चला न जाय। और पयस्या अर्थात् दही मित्र और वरुण के लिये उसी प्रकार है जैसे (सोमयज्ञ में) मित्र और वरुण के लिये अनूवन्ध्या (बाँझ गाय) मारी जाती है। इस प्रकार पूर्णमासी और अमावस्या की इष्टियों से मनुष्य को उतना ही फल मिल जाता है जितना सोमयज्ञ से। क्योंकि यह महायज्ञ है ॥१४॥

और यह जो पूर्णमासी को पहले दिन अग्नि और सोम के लिये आहुति दी जाती है वह इसलिये है कि इन्द्र ने वृत्र को मारा था। इसी से उसको यह विजय प्राप्त हुई जो आज उसे प्राप्त है। इसी प्रकार यह (यजमान) भी इस यज्ञ से द्वेषी पापी शत्रु को मारता है और उस पर विजय प्राप्त करता है। और यह जो सान्नाय्य और अर्थात् दूध और दही को मिलाना है, यह सान्नाय्य अमावस्या का है। अमावस्या का अर्थ है दूर होना। जिस (इन्द्र) ने वृत्र को मारा था उसको तुरन्त ही यह आहुति दी गई थी और तुरन्त ही उसको रस से प्रसन्न किया गया था। इसलिये जो पुरुष इस रहस्य को समझकर पूर्णमासी को सान्नाय्य बनाता है वह तुरन्त ही पाप को दूर भगा देता है। यह जो चन्द्र है वह सोम राजा और देवों का अन्न है। वे पहले दिन रस निकालते हैं कि दूसरे दिन खायेंगे। इसलिये जब (चाँद) क्षीण होने लगता है तो मानो (देव) उसको खाने लगते हैं ॥१५॥

और यह जो पूर्णमासी को पहले दिन अग्नि और सोम के लिये पुरोडाश दिया जाता है मानो उस प्रकार यह सोम रस निचोड़ लेते हैं। और निचोड़ने के पश्चात् उसमें मिलाता है और उस रस को तीव्र करता है। जो पुरुष इस भेद को समझकर पूर्णमासी को सान्नाय्य तैयार करता है वह मानो देवों के लिये हव्य को स्वादिष्ट बनाता है और उसका

देवेभ्यो हव्यं य एवं विद्वान्पौर्णमास्याध्ं संनयति ॥१६॥

अथ यत्पूर्वेद्युः । ऐन्द्राग्नेन यजतेऽमावास्यागां दर्शपूर्णमासयोर्वै देवते स्त इन्द्राग्नी-ऽएव तेऽएवैतदञ्जसा प्रत्यक्षं यजत्यञ्जसा ह वा अस्य दर्शपूर्णमासाभ्यामिष्टिं भवति य एवमेतद्वेद ॥१७॥

अथ प्रातः । आग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेयज्ञादयानीति न्वेवा-ग्नेयः पुरोडाशोऽथेतावेवार्धमासौ मित्रावरुणौ य एवापूर्यते स वरुणो योऽपक्षीयते स मित्र-स्तावेताध्ं रात्रिमुभौ समागच्छतस्तदुभावेवैतत्सह सन्तौ प्रीणाति सर्वध्ं ह वाऽअस्य प्रीतं भवति सर्वमाप्तं य एवमेतद्वेद ॥१८॥

तद्वाऽएताध्ं रात्रिं । मित्रो वरुणे रेतः सिञ्चति तदेतेन रेतसा प्रजायते यदापूर्यते तद्यदेवात्र मैत्रावरुणी पयस्यावक्लृप्ततमा भवति ॥१९॥

सान्नाय्य भाजना वाऽअमावास्या । तददस्तत्पौर्णमास्यां क्रियते स यद्यत्रापि संनयेज्जामि कुर्यात्समदं कुर्यात्तदेनमद्भ्य ओषधिभ्यः सम्भृत्याहुतिभ्योऽभिजनयति स एष आहुतिभ्यो जातः पश्चाद्दृशे ॥२०॥

हव्य देवों के लिये स्वादिष्ट हो जाता है ॥१६॥

और यह जो अमावस्या को पहले दिन इन्द्र और अग्नि के लिये पुरोडाश दिया जाता है वह इसलिये है कि इन्द्र और अग्नि अमावस्या और पूर्णमासी के देवता हैं। इन्हीं के लिये यह सीधा प्रत्यक्ष रूप से हव्य देता है। और जो इस भेद को समझता है वह दर्श और पूर्णमास की इष्टियों को करता है ॥१७॥

और दूसरे दिन अग्नि का पुरोडाश होता है और मित्र और वरुण के लिये पयस्या (दही)। अब अग्नि का पुरोडाश इसलिये है कि अग्नि यज्ञ को छोड़कर न चला जाय। मित्र और वरुण अर्धमास हैं। बढ़ता हुआ वरुण है और घटता हुआ मित्र। उस (अमावस्या की) रात्रि को ये दोनों मिलते हैं। और जब वह मिलते हैं तब (यजमान) दोनों को प्रसन्न करता है। जो इस रहस्य को समझता है सब उससे प्रसन्न रहते हैं और उसको सब कुछ प्राप्त होता है ॥१८॥

उसी रात को मित्र वरुण में वीर्य सींचता है। और जब यह (चन्द्र) घटता है तो फिर उसी वीर्य से उत्पन्न होता है। यह जो मित्र और वरुण की पयस्या (दही) है वह (सान्नाय्य के) समान है ॥१९॥

अमावस्या सान्नाय्य के ही योग्य है। यह (अमावस्या को भी) और पूर्णमासी को भी तैयार किया जाता है। अब यदि वह यहाँ भी (अर्थात् पूर्णमासी को भी) सान्नाय्य बनावे तो दुहराने के दोष का भागी हो और देवताओं मे झगड़ा हो जाय। इस (सोम) को जलों और ओषधियों से इकट्ठा करके आहुतियों में होकर उत्पन्न करता है। और यह (सोम या चाँद) आहुतियों से उत्पन्न होकर पश्चिम की ओर चमकता है ॥२०॥

मिथुनादिद्धाऽएनमेतत्प्रजनयति । योषा पयस्या रेतो वाजिनं तद्धाऽअनुष्ठ्या यन्मिथुनाज्जायते तदेनमेतस्मान्मिथुनात्प्रजननात्प्रजनयति तस्मादेषात्र पयस्या भवति ॥२१॥

अथ वाजिज्यो वाजिनं जुहोति । ऋतवो वै वाजिनो रेतो वाजिनं तद्वनुष्ठ्यै वैतद्रेतः सिच्यते तद्दतवो रेतः सिक्तमिमाः प्रजाः प्रजनयन्ति तस्माद्वाजिभ्यो वाजिनं जुहोति ॥२२॥

स वै पश्चादिव यज्ञस्य जुहोति । पश्चाद्वै परीत्य दृषा योषामधिद्रवति तस्याथ्ं रेतः सिञ्चति स वै प्रागेवाग्ने जुहोत्यग्ने वीहीत्यनुवषट्करोति तत्स्विष्टकृद्राजनथ्ं, स वै प्रागेव जुहोति ॥२३॥

अथ दिशो व्याघारयति । दिशः प्रदिश आदिशो विदश उद्दिशो दिग्भ्यः स्वाहेति पञ्च दिशः पञ्चर्तवस्तद्दतुभिरेवैतद्दिशो मिथुनीकरोति ॥२४॥

तद्वै पञ्चैव भक्षयन्ति । होता चाध्वर्युश्च ब्रह्मा चाग्नीच्च यजमानः पञ्च वाऽऋतवस्तद्दतूनामेवैतद्रूपं क्रियते तद्दतुष्वेवैतद्रेतः सिक्तं प्रतिष्ठापयति प्रथमो यजमानो भक्षयति प्रथमो रेतः परिगृह्णानीत्यथोऽअप्युत्तमो मय्युत्तमे रेतः प्रतितिष्ठादित्युपहूत उपह्वयस्वेति सोममेवैतत्कुर्वन्ति ॥२५॥ ब्राह्मणम् ॥१॥ [४. ४.] अध्यायः ॥४॥ [१३] ॥

इसको जोड़े से उत्पन्न करता है । पयस्या स्त्री है और मन्था वीर्य है । जो जोड़े से उत्पन्न होता है वह ठीक होता है । इसलिये वह इसको जोड़े से उत्पन्न करता है और इसीलिये यहाँ पयस्या तैयार की जाती है ॥२१॥

अब मन्थे की आहुति दोनों घोड़ों (वाजियों) के लिये दी जाती है । घोड़े (वाजी) ऋतुयें हैं । और (वाजी) मन्था वीर्य है । यह वीर्य अनुष्ठान से सींचा जाता है । सींचे हुये वीर्य से ऋतुयें इन प्रजाओं को उत्पन्न करती हैं । इसीलिये 'वाजी' घोड़े के लिये 'वाजी' मन्थे की आहुति देता है । ('वाजी' घोड़े को भी कहते हैं और मन्थे को भी) ॥२२॥

वह यज्ञ के पीछे की ओर से आहुति देता है । पीछे की ओर से ही पुरुष स्त्री के पास जाता और वीर्य-सिंचन करता है । वह पहले पूर्व की ओर आहुति देता है । 'अग्ने वीहि' (हे अग्नि, स्वीकार करो) यह पढ़कर वषट्कार को दुहराता है । यह स्विष्टकृत के बदले में है । इसको पूर्व की ओर देता है ॥२३॥

अब वह इस मंत्र से दिशाओं के लिये आहुति देता है—'दिशः प्रदिशऽआदिशो विदिशऽउद्दिशो दिग्भ्यः स्वाहा' (यजु० ६।१६) । पाँच दिशायें हैं और पाँच ऋतुयें । इस प्रकार दिशाओं का जोड़ा मिलाता है ॥२४॥

(चमसे में जो मन्था बच रहता है उसे) पाँच लोग चखते हैं । होता, अध्वर्यु, ब्रह्मा, आग्नीध्र और यजमान । पाँच ही तो ऋतुयें हैं । इस प्रकार वह ऋतुओं का तद्रूप हो जाता है । और जो वीर्य सींचा जाता है वह प्रतिष्ठित हो जाता है । यजमान (यह सोचते हुये) पहले चखता है कि मुझे पहले वीर्य की प्राप्ति हो । और वह पीछे भी चखता है कि मुझमें वीर्य अन्त तक रहे । 'उपहूत उपह्वयस्व' कहकर वह इस (मन्थे) को सोम बना लेता है ॥२५॥

अध्याय ५—ब्राह्मण १

प्रजापतिर्ह वाऽइदमग्र एक एवास । स ऐक्षत कथं नु प्रजायेयेति सोऽश्राम्यत्स तपोऽतप्यत स प्रजा असृजत ता अस्य प्रजाः सृष्टाः पराबभूवुस्तानीमानि वयाꣳसि पुरुषो वै प्रजापतेर्नेदिष्ठं द्विपाद्वा अयं पुरुषस्तस्माद्द्विपादो वयाꣳसि ॥१॥

स ऐक्षत प्रजापतिः । यथा न्वेव पुरैकोऽभूवमेवमु न्वेवाप्येतर्ह्येक एवास्मीति स द्वितीयाः ससृजे ता अस्य परैव बभूवुस्तदिदं क्षुद्रꣳ सरीसृपं यदन्यत्सर्पेभ्यस्तृतीयाः ससृज ऽइत्याहुस्ता अस्य परैव बभूवुस्तऽइमे सर्पा एता ह न्वेव द्वयीर्याज्ञवल्क्य उवाच त्रयीरु तु पुनर्ऋचा ॥२॥

सोऽर्चँश्राम्यन्प्रजापतिरीक्षां चक्रे । कथं नु मे प्रजाः सृष्टाः पराभवन्तीति स हैतदेव ददर्शानशनतया वै मे प्रजाः पराभवन्तीति स आत्मन एवाग्रे स्तनयोः पय आप्याययां चक्रे स प्रजा असृजत ता अस्य प्रजाः सृष्टा रतनाधेवाभिपद्य तास्ततः सम्बभूवुस्ता इमा अपराभूताः ॥३॥

तस्मादेतदृषिणाभ्यनूक्तं । प्रजा ह तिस्रोऽत्यायमीयुरिति तद्याः पराभूतास्ता

पहले केवल प्रजापति ही था । उसने सोचा कि कैसे प्रजा उत्पन्न करूँ । उसने श्रम किया और तप तपा । उसने प्रजा उत्पन्न की । वह उत्पन्न हुई प्रजा गुजर गई । यह वे पक्षी हैं । पुरुष प्रजापति के निकटतम है । पुरुष के दो पैर होते हैं इसलिये चिड़ियों के भी दो पैर होते हैं ॥१॥

प्रजापति ने सोचा कि मै पहले भी अकेला था और अब भी अकेला हूँ । इसलिये उसने दुबारा सृष्टि की । वह भी गुजर गई । यह वह कीड़े हैं जो सांप के अतिरिक्त हैं । कहते हैं कि उसने तीसरी बार सृष्टि की । वह भी गुजर गई । वह सांप हैं । याज्ञवल्क्य उनको दो प्रकार के बताते हैं । परन्तु ऋग्वेद के अनुसार तीन प्रकार के हैं ॥२॥

प्रजापति ने पूजा और श्रम करते हुये सोचा कि मेरी बनाई प्रजा गुजर कैसे जाती है । तब उसे मालूम हुआ कि मेरी प्रजा बिना भोजन के मर जाती है । इसलिये उसने अपने स्तनों में पहले से ही दूध भर दिया । तब उसने प्रजा उत्पन्न की । और यह उत्पन्न प्रजा स्तनों का दूध पीकर जीती रही । वह वह है जो मरे नहीं ॥३॥

इसीलिये ऋषि ने ऐसा कहा—'प्रजा ह तिस्रोऽत्यायमीयुः' (ऋ० ८।१०१।१४) ।

एवैतदभ्यनूक्तं न्यन्या अर्कमभितो विविक्षऽइत्यग्निर्वाऽअर्कस्तद्या इमाः प्रजा अपराभूतास्ता अग्निमभितो निविष्टास्ता एवैतदभ्यनूक्तम् ॥४॥

महद्ध तस्थौ भुवनेष्वन्तरिति । प्रजापतिमेवैतदभ्यनूक्तं पवमानो हरित आविवेशेति दिशो वै हरितस्ता अयं वायुः पवमान आविष्टस्ता एवैषऽर्गभ्यनूक्ता ता इमाः प्रजास्तथैव प्रजायन्ते यथैव प्रजापतिः प्रजा असृजतेदध्ं हि यदैव स्त्रियै स्तनावाप्यायेतेऽऊधः पशूनामथैव यज्जायते तज्जायते तास्तत स्तनावेवाभिपद्य सम्भवन्ति ॥५॥

तद्वै पय एवान्नम् । एतद्धयग्रे प्रजापतिरन्नमजनयत तद्वाऽअन्नमेव प्रजा अन्नाद्दि सम्भवन्तीदध्ं हि यासां पयो भवति स्तनावेवाभिपद्यतास्ततः सम्भवन्त्यथ यासां पयो न भवति जातमेव ता अथादयन्ति तद्धु ता अन्नादेव सम्भवन्ति तस्माद्धवमेव प्रजाः ॥६॥

स यः प्रजाकामः । एतेन हविषा यजतऽआत्मानमेवैतद्यज्ञं विधत्ते प्रजापतिं भूतध्ं ॥७॥ शतम् ॥१००॥

स वाऽआग्नेयोऽष्टाकपालः पुरोडाशो भवति । अग्निर्वै देवतानां मुखं प्रजनयिता 'तीन प्रजायें मर चुकीं' यह उसके लिये कहा गया जो मर चुकीं। 'न्यन्याऽअर्कमभितो विविक्षे' (ऋ० ८।१०१।१४)। 'दूसरी आग (प्रकाश) के चारों ओर बस गई।' 'अग्नि' ही 'अर्क' है। इसलिये कहा कि जो प्रजा जीती रही वह अग्नि के चारों ओर बस गई ॥४॥

'महद्ध (बृहद्ध) तस्थौ भुवनेष्वन्तः' (ऋ० ८।१०१।१४)। 'महान् (आत्मा) भुवनों के भीतर रही।' यह प्रजापति के विषय में कहा गया। 'पवमानो हरितऽआविवेश' (ऋ० ८।१०१।१४)। 'पवमान (पवित्र करने वाला वायु) देशों में प्रवेश हो गया।' 'हरित' का अर्थ हैं दिशायें। 'पवमान' यह हवा है। यह हवा ही दिशाओं में भर गई। इसी का ऋचा में संकेत है। जिस प्रकार प्रजापति ने इन प्रजाओं को उत्पन्न किया उसी प्रकार यह उत्पन्न होते हैं। क्योंकि जब स्त्रियों और पशुओं के थनों में दूध आ जाता है तभी बच्चा पैदा होता है, और स्तन को पीकर ही वह जीते हैं ॥५॥

यह दूध ही अन्न है। क्योंकि प्रजापति ने पहले इसी भोजन को उत्पन्न किया। अन्न ही प्रजा है क्योंकि अन्न ही से यह उत्पन्न होती हैं। जिनके स्तनों में दूध है उसको पीकर ही वह जीते हैं। और जिनके दूध नहीं होता वह अपने बच्चों को जन्मते ही 'चुगा' देते हैं। इस प्रकार वह अन्न से ही जीते हैं इसलिये अन्न ही प्रजा है ॥६॥

जो सन्तान की कामना करता है वह इस हवि से यज्ञ करता है। इस प्रकार अपने को प्रजापति रूपी यज्ञ बना लेता है ॥७॥

अग्नि का पुरोडाश आठ कपालों में होता है। अग्नि ही देवतागणों का मुख और

प्रजापतिस्तस्मा दाग्नेयो भवति ॥८॥

अथ सौम्यश्चरुर्भवति । रेतो वै सोमस्तदग्नौ प्रजनयितरि सोमꣳ रेतः सिञ्चति तत्पुरस्तान्मिथुनं प्रजननम् ॥९॥

अथ सावित्रः । द्वादशकपालो वाष्टाकपालो वा पुरोडाशो भवति सविता वै देवानां प्रसविता प्रजापतिर्मध्यतः प्रजनयिता तस्मात्सावित्रो भवति ॥१०॥

अथ सारस्वतश्चरुर्भवति । पौष्णश्चरुर्योषा वै सरस्वती घृषा पूषा तत्पुनर्मिथुनं प्रजननमेतस्माद्वाऽउभयतो मिथुनात्प्रजननात्प्रजापतिः प्रजाः ससृजऽइतश्चोर्ध्वा इतश्चावाचीस्तथोऽएवैष एतस्मादुभयत एव मिथुनात्प्रजननात्प्रजाः सृजतऽइतश्चोर्ध्वा इतश्चावाचीस्तस्माद्वाऽएतानि पञ्च हवीꣳष्यपि भवन्ति ॥११॥

अथातः पयस्याया एवायतनं । मारुतस्तु सप्तकपालो विशो वै मरुतो देवविशस्ता हेदमनिपेदुषा इव चेरुस्ताः प्रजापति यजमानमुपेत्योचुर्वि वै ते मथिष्यामहऽइमाः प्रजा या एतेन हविषा सञ्चयसऽइति ॥१२॥

स ऐक्षत प्रजापतिः । परा मे पूर्वाः प्रजा अभूवन्निमा उ चेदिमे विमथ्नते न ततः किं चन परिशेक्ष्यतऽइति तेभ्य एतं भागमकल्पयदेतं मारुतꣳ सप्तकपालं पुरोडाशꣳ स एष मारुतः सप्तकपालस्तद्यत्सप्तकपालो भवति सप्त-सप्त हि मारुतो गणस्तस्मान्मारुतः

उत्पादक है । वह प्रजापति है । इसलिये अग्नि के लिये पुरोडाश होता है ॥८॥

इसके पीछे सोम का चरु होता है । सोम वीर्य है और वह उत्पादक अग्नि में है । वह अग्नि उस सोम या वीर्य को सींचता है । इस प्रकार उत्पादक जोड़ा होता है ॥९॥

अब आठ या बारह कपालों में सविता के लिये पुरोडाश होता है । सविता देवों का प्रेरक है । वह प्रजापति है । बीच का जनक है । इसलिये पुरोडाश होता है ॥१०॥

अब सरस्वती के लिये चरु आता है, और एक चरु पूषा के लिये । सरस्वती स्त्री है और पूषा पुरुष । इस प्रकार जनने वाला जोडा मिल गया । इस प्रकार दो प्रकार के जोड़ों के मिलने से प्रजापति ने प्रजा को उत्पन्न किया । एक से ऊपर की ओर एक से नीचे की । इसलिये इनके पाँच हवियाँ होती हैं । (अर्थात् १. अग्नि का पुरोडाश २. सोम का चरु ३. सविता का पुरोडाश, ४. सरस्वती का चरु ५. पूषा का चरु) ॥११॥

अब इसके पश्चात् पयस्या का आयतन एवं मरुत का सात कपालों का पुरोडाश । मरुत हैं वैश्य अर्थात् देवों के आदमी । वे स्वतन्त्र फिरते थे । जब प्रजापति यज्ञ कर रहा था तो उन्होंने उसके पास जाकर कहा, 'तू इस यज्ञ के द्वारा जो प्रजा उत्पन्न करेगा उसे हम नष्ट कर डालेंगे ॥१२॥

प्रजापति ने सोचा कि मेरी पहली प्रजायें तो मर चुकीं । यदि (मरुत) इस प्रजा को भी मार डालेंगे, तो कुछ न बचेगा । इसलिये उसने उनके लिये अलग भाग रख दिया । अर्थात् सात कपालों में मरुत के लिये पुरोडाश । यह सात कपाल इसलिये होते

सप्तकपालः पुरोडाशो भवति ॥१३॥

तं वै स्वतवोभ्य इति कुर्यात् । स्वयꣳ हि तऽएतं भागमकुर्वतो तो स्वतवोभ्यो याज्यानुवाक्ये न विन्दन्ति स उ खलु मारुत एव स्यात्स वाऽएष प्रजाभ्य एवाहिꣳसायै क्रियते तस्मान्मारुतः ॥१४॥

अथातः पयस्येव । पयसो वै प्रजाः सम्भवन्ति पयसः सम्भूतास्तयत एव सम्भूता यतः सम्भवन्ति तदेवाभ्य एतत्करोति तद्याः पूर्वैर्हविर्भिः प्रजाः सृजते ता एतस्मात्पयस एतस्यै पयस्यायै सम्भवन्ति ॥१५॥

तस्यां मिथुनमस्ति । योषा पयस्या रेतो वाजिनं तस्मान्मिथुनाद्विश्वꣳसंभितमनु प्राजायत तद्यदेतस्मान्मिथुनाद्विश्वꣳसंभितमनु प्रजायत तस्माद्वैश्वदेवी भवति ॥१६॥

अथ द्यावापृथिव्य एककपालः पुरोडाशो भवति । एतैर्वै हविर्भिः प्रजापतिः प्रजा सृष्ट्वा ता द्यावापृथिवीभ्या पर्यगृह्णात्ता इमा द्यावापृथिवीभ्यां परिगृहीतास्तथोऽएवैष एतद्य एतैर्हविर्भिः प्रजाः सृजते ता द्यावापृथिवीभ्या परिगृह्णाति तस्माद् द्यावापृथिव्य एक-

हैं कि मरुत लोगों के सात-सात के गण* होते हैं। इसलिये मरुतों के सात कपाल होते हैं ॥१३॥

'स्वतवोभ्यः' (अपने स्वत्व को बढ़ाने वालों के लिये) ऐसा कहकर आहुति देनी चाहिये। क्योंकि उन्होंने अपने स्वत्व को ले लिया। परन्तु यदि याज्ञिकों को याज्य अनुवाक्य न मिले तो केवल 'मरुतों के लिये' ऐसा कर देवें। यह प्रजा की अहिंसा के लिये किया जाता है इसलिये मरुतों के लिये होता है ॥१४॥

अब इसके बाद पयस्या की आहुति। दूध से ही प्रजायें पलती हैं। दूध से ही प्रजायें पली थीं। इसलिये वह अब उनके लिये उसी की आहुति देता है जिसके द्वारा वह पली थीं। जिसको प्रजापति ने पहली हवियों से उत्पन्न किया वह दूध से ही पलती हैं अर्थात् उसी पयस्या से ॥१५॥

इसमें जोड़ा हो जाता है। पयस्या स्त्री है और महा वीर्य है। इसी जोड़े से क्रमानुसार अनन्त विश्व उत्पन्न हुआ। और चूँकि इस जोड़े से विश्वदेव उत्पन्न हुआ इसलिये इसको 'वैश्वदेवी' अर्थात् सब देवों की आहुति कहते हैं ॥१६॥

अब एक कपाल पर द्यावापृथिवी की आहुति होती है। इन्हीं हवियों से प्रजापति ने प्रजा को उत्पन्न करके द्यौ और पृथिवी के बीच में रख दिया। इसलिये यह द्यौ और पृथिवी के बीच में रक्खे हुये हैं। जो कोई इन आहुतियों से कोई आहुति देता है वह प्रजा को

---

* त्रिः पञ्चिस्पा मरुतो वावृधाना उक्षा इव रशयो यक्षियासः। उप त्वेमः कृधि नो भागधेय शुष्म त एना हविषा विधेम (ऋ० ८।६६।८)। यहाँ ६३ मरुत हैं। उनके सात-सात के नौ गण हुये।

कपालः पुरोडाशो भवति ॥१७॥

अथात आवृदेव । नोपकरिन्त्युत्तरवेदिं विसृष्टमसत्सर्वमसद्वैश्वदेवमसदिति त्रेधा बर्हिः संनद्धं भवति तत्पुनरेकधेतद्धि प्रजननस्य रूपं प्रजननमु हीदं पिता माता यज्जायते तत्तृतीयं तस्मात्त्रेधा सत्पुनरेकधा प्रस्व उपसंनद्धा भवन्ति तं प्रस्तरं गृह्णाति प्रजननमु हीदं प्रजननमु हि प्रस्वस्तस्मात्प्रसूः प्रस्तरं गृह्णाति ॥१८॥

आसाद्य हवीꣳष्यग्निं मन्थन्ति । अग्निꣳ ह वै जायमानमनु प्रजापतेः प्रजा जज्ञिरे तथोऽएवैतस्याग्निमेव जायमानमनु प्रजा जायन्ते तस्मादासाद्य हवीꣳष्यग्निं मन्थन्ति ॥१९॥

नवप्रयाजं भवति । नवानुयाजं दशाक्षरा वै विराडथैतामुभयतो न्यूनां विराजं करोति प्रजननायैतस्माद्वाऽउभयतो न्यूनात्प्रजानात्प्रजापतिः प्रजाः ससृजऽइतश्चोर्ध्वा इतश्चावाचीस्तथोऽएवैष एतस्मादुभयत एव न्यूनात्प्रजननात्प्रजाः सृजतऽइतश्चोर्ध्वा इतश्चावाचीस्तस्मान्नव प्रयाजं भवति नवानुयाजम् ॥२०॥

त्रीणि समिष्टयजूꣳषि भवन्ति । ज्याय इव हीदꣳ हविर्यज्ञाद्यत्र नव प्रयाजं नवानु-

उत्पन्न करके द्यौ और पृथिवी के बीच में रख देता है । इसलिये द्यावापृथिवी का एक कपाल होता है ॥१७॥

अब इसके पीछे सायंक्रम कहते हैं । उत्तर-वेदि नहीं बनाते जिससे यह परिमित न हो । पूर्ण हो और विश्वेदेवों की हो । बर्हि को तीन गठों में बाँधते हैं फिर एक में कर लेते हैं । उत्पत्ति का यही रूप है । माता-पिता दो होते हैं । जो सन्तान उत्पन्न होती है वह तीसरी होती है । इसलिये जो त्रित्व है वह पीछे से एक हो जाता है । बर्हि के फूले हुये सिरे (प्रस्वः) बँधे होते हैं । उनको वह प्रस्तर के रूप में ग्रहण करता है । क्योंकि यह जलने वाला सयोग है । फूले हुये बर्हि उत्पन्न करने वाले होते हैं । यही कारण है कि वह फूले हुये कुशों को प्रस्तर के रूप में ग्रहण करता है ॥१८॥

हवियों को रखकर अग्नि को मथता है । अग्नि के उत्पन्न होने के पश्चात् ही प्रजापति की प्रजा हुई । इसी प्रकार इस यजमान के भी अग्नि के उत्पन्न होने पर ही प्रजा होगी । यही कारण है कि वह हवियों को रखने के पश्चात् अग्नि का मथन करते हैं ॥१९॥

नौ प्रयाज होते हैं और नौ अनुयाज । विराट् छन्द में दस अक्षर होते हैं । इसलिये वह दोनों ओर विराट् से न्यून (दस से कम नौ ओर) ही जनने के लिये लेता है । क्योंकि प्रजापति ने न्यून प्रजनन से ही दो ओर उत्पत्ति की, ऊपर की ओर और नीचे की ओर । इसीलिये नौ प्रयाज होते हैं और नौ अनुयाज ॥२०॥

तीन समिष्ट यजुष् होते हैं । क्योंकि यह हविर्यज्ञ से बड़ा होता है । क्योंकि इसमें नौ प्रयाज होते हैं और नौ अनुयाज । समिष्ट-यजुष् एक भी हो सकता है तब यह हविर्यज्ञ ही

याजमथोऽअप्येकमेव स्याद्वत्सिर्यज्ञो हि तस्य प्रथमजो गौर्दक्षिणा ॥२१॥

एतेन वै प्रजापतिः यज्ञेनेष्ट्वा । येयं प्रजापतेः प्रजातिर्या श्रीरेतद्वभूवेताꣳ ह वै प्रजाति प्रजायतऽएताꣳ श्रियं गच्छति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥२२॥ ब्राह्मणम् ॥ २ ॥ [५ १] ॥

होता है । इसकी दक्षिणा पहलौटी गौ होती है ॥२१॥

जो इस रहस्य को समझकर इस यज्ञ को करता है उसको वही प्रजा उत्पन्न होती है और वही श्री प्राप्त होती है जो प्रजापति के यज्ञ करने से प्रजा उत्पन्न हुई और श्री उसको प्राप्त हुई ॥२२॥

अध्याय ५—ब्राह्मण १

वैश्वदेवेन वै प्रजापतिः । प्रजाः ससृजे ता अस्य प्रजाः सृष्टा वरुणस्य यवान्यजुर्वरुणयो ह वाऽअग्रे यवस्तद्यन्त्येव वरुणस्य यवान्प्रादस्तस्माद्वरुणप्रघासा नाम ॥१॥

ता वरुणो जग्राह । ता वरुणगृहीताः परिदीर्णा अनत्यश्च प्राणत्यश्च शिश्यिरे च निषेदुश्च प्राणोदानौ हैवाभ्यो नापचक्रमतुरथान्याः सर्वा देवता अपचक्रमुस्तयोर्हैवास्य हेतोः प्रजा न पराबभूवुः ॥२॥

ता एतेन हविषा प्रजापतिरभिषज्यत् । तद्याश्चैवास्य प्रजा जाता आसन्याश्चाजातास्ता उभयीर्वरुणपाशात्प्रामुञ्चत्ता अस्यानमीवा अकिल्विषाः प्रजाः प्राजायत ॥३॥

अथ यदेष एतैश्चतुर्थे मासि यजते । तद्याह न्वेवैतस्य तथा प्रजा वरुणो गृह्णातीति

प्रजापति ने वैश्वदेव यज्ञ करके ही प्रजा उत्पन्न की । वह उससे उत्पन्न हुई प्रजा वरुण के जौ को खा गई । जौ पहले वरुण का ही था । चूँकि उन्होंने वरुण के जौ खाये इसलिये इस यज्ञ का नाम 'वरुण प्राघास' पड़ा ॥१॥

वरुण ने उनको पकड़ लिया । वरुण से पकड़े जाकर वह सूज गये । और वह लेट गये और साँस बाहर भीतर लेते हुये बैठे रहे । केवल प्राण और उदान ने उनको न छोड़ा और सब देवता छोड़ गये, और इन्हीं दो के कारण प्रजा मरी नहीं ॥२॥

प्रजापति ने इस हवि के द्वारा उनको चंगा किया । और जो प्रजा उत्पन्न हो चुकी थी और जो अभी उत्पन्न नहीं हुई थी उस सब को वरुण के जाल से मुक्त कर दिया, और उसकी प्रजा रोग रहित और दोष रहित उत्पन्न हुई ॥३॥

यह यजमान जो चौथे मास में यज्ञ करता है वह इसलिये करता है कि प्रजा वरुण

देवा अकुर्वन्निति नेवैष एतत्करोति याश्च नेवास्य प्रजा जाता याश्चाजातास्ता उभयी-र्वरुणपाशात्प्रमुञ्चति ता अस्यानमीवा अक्लिष्टाः प्रजाः प्रजायते तस्माद्धाऽएष एतेश्च-तुर्थे मासि यजते ॥४॥

तद्वै द्वे वेदी द्वावग्नी भवतः । तद्यद्द्वे वेदी द्वावग्नी भवतस्तदुभयत एवैतद्वरुण-पाशात्प्रजाः प्रमुञ्चतीतश्चोर्ध्वा इतश्चावाचीस्तस्माद्वे वेदी द्वावग्नी भवतः ॥५॥

स उत्तरस्यामेव वेदौ । उत्तरवेदिमुपकिरति न दक्षिणस्या क्षत्रं वै वरुणो विशो मरुतः क्षत्रमेवैतद्विश उत्तरं करोति तस्मादुपर्यासीनं क्षत्रियमधस्तादिमाः प्रजा उपासते तस्मादुत्तरस्यामेव वेदाऽउत्तरवेदिमुपकिरति न दक्षिणस्याम् ॥६॥

अथैतान्येव पञ्च हवींष्यपि भवन्ति । एतैर्वै हविर्भिः प्रजापतिः प्रजा असृजतै-तैरुभयतो वरुणपाशात्प्रजाः प्रामुञ्चदितश्चोर्ध्वा इतश्चावाचीस्तस्माद्धाऽएतानि पञ्च हवी-ष्यपि भवन्ति ॥७॥

अथैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति । प्राणोदानौ वाऽइन्द्राग्नी तद्यथा पुण्यं चक्रुषे पुण्यं कुर्य्यादेवं तत्तयोर्हैवास्य हेतोः प्रजा न पराबभूवुस्तत्प्राणोदानाभ्यामेवै-

के जाल से बची रहें या चूँकि देवों ने यह यज्ञ किया था, और वह जो सन्तान उत्पन्न हो चुकी और जो होने वाली है उसको वरुण के जाल से मुक्त कर देता है और उसकी सन्तान निर्दोष और निरोग उत्पन्न होती है। इसलिये वह चौथे मास में (वरुण प्रघास यज्ञ) करता है ॥४॥

इस (यज्ञ) मे दो वेदियाँ होती हैं और दो अग्नियाँ। दो वेदियाँ और दो अग्नियाँ क्यों होती हैं? इसलिये कि वह दोनों ओर से प्रजा को वरुण के जाल से छुडा देता है, ऊपर की भी और नीचे भी। इसलिये दो वेदियाँ और दो अग्नियाँ होती हैं ॥५॥

उत्तर की दिशा मे उत्तर की वेदी बनाई जाती है, दक्षिण की दिशा मे नहीं। वरुण क्षत्रिय है और मरुत वैश्य लोग। वह इस प्रकार क्षत्रियों को वैश्यों से उच्च ठहराता है। इसीलिये क्षत्रियों को उच्च आसन पर बिठा कर सर्व साधारण उनकी पूजा करते हैं। यही कारण है कि उत्तर की दिशा में वेदी बनाते हैं, दक्षिण की दिशा मे नहीं ॥६॥

पहले पाँच हवियाँ होती हैं। क्योंकि इन पाँच हवियों के द्वारा ही प्रजापति ने प्रजायें उत्पन्न कीं और इन्हीं के द्वारा प्रजाओं को दोनों ओर से वरुण के जाल से बचाया, वह जो ऊपर की ओर थे और जो नीचे की ओर। यही कारण है कि पाँच हवियाँ होती हैं ॥७॥

अब इन्द्र-अग्नि के लिये बारह कपालो में पुरोडाश दिया जाता है। इन्द्र-अग्नि वस्तुतः प्राण और उदान है। यह एक प्रकार से उसके लिये पुण्य करना है जिसने पुण्य किया। क्योंकि इन्हीं दो के कारण प्रजा मरी नहीं। इसलिये अब यह अपनी प्रजा को प्राण और उदान के द्वारा चंगा करना है। प्रजाओं में प्राण और उदान को स्थापित करता है।

तत्प्रजा मिपद्यति प्राणोदानौ प्रजासु दधाति तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति ॥८॥

उभयत्र पयस्ये भवतः। पयसो वै प्रजाः सम्भवन्ति पयसः सम्भूतास्तद्यत एव सम्भूता यतः सम्भवन्ति तत एवैतदुभयतो वरुणपाशात्प्रजाः प्रमुञ्चतीतश्चोर्ध्वा इतश्चावाचीस्तस्मादुभयत्र पयस्ये भवतः ॥९॥

वारुण्युत्तरा भवति। वरुणो ह वाऽस्य प्रजा अगृह्णात्तत्प्रत्यक्षं वरुणपाशात्प्रजाः प्रमुञ्चति मारुती दक्षिणाजामितायै न्वेष मारुती भवति जामि ह कुर्य्याद्यदुभे वारुण्यौ स्यातामतो ह वाऽस्य दक्षिणतो मरुतः प्रजा अजिघाꣳसंस्तानेतेन भागेनाशमयत्तस्मान्मारुती दक्षिणा ॥१०॥

तयोरुभयोरेव करीराण्यावपति। कं वै प्रजापतिः प्रजाभ्यः करीरैरकुरुत कम्बेवैष एतत्प्रजाभ्यः कुरुते ॥११॥

तयोरुभयोरेव शमीपलाशान्यावपति। शं वै प्रजापतिः प्रजाभ्यः शमीपलाशैरकुरुत शम्बेवैष एतत्प्रजाभ्यः कुरुते ॥१२॥

अथ काय एककपालः पुरोडाशो भवति। कं वै प्रजापतिः प्रजाभ्यः कायेनैककपा-

इसलिये बारह कपालों का पुरोडाश इन्द्र और अग्नि के लिये होता है ॥८॥

दोनों (अग्नियों) के लिये पयस्या की आहुतियाँ होती हैं। दूध से ही प्रजा जीती है। और दूध से ही जीते रहे। इसलिये उसी वस्तु के द्वारा जिससे वह बचे रहे और जिससे वह पलते हैं वह उनको वरुण के जाल से दोनों ओर छुड़ाता है, ऊपर की ओर से और नीचे की ओर से। इसलिये दोनों (अग्नियों) के लिये पयस्या की आहुति होती है ॥९॥

उत्तर की हवि वरुण के लिये होती है। क्योंकि वरुण ने ही तो उसकी प्रजा पकड़ी थी। इसलिये वह प्रत्यक्ष ही वरुण के जाल से प्रजा को छुड़ाता है। दक्षिण की हवि मरुतों के लिये होती है। एकसा न हो इसलिये मरुतों के लिये होती है। यदि दोनों आहुतियाँ वरुण के लिये होतीं तो एक सी हो जातीं। दक्षिण से ही मरुतों ने प्रजा को मारना चाहा था। और उसी भाग से (प्रजापति ने) उनको शान्त किया। इसलिये दक्षिण की आहुति मरुतों की होती है ॥१०॥

उन दोनों आहुतियों के ऊपर करीर फल* (करीराणि) डालता है। प्रजापति ने करीर फल से ही प्रजाओं को सुखी (संस्कृत में 'क' का अर्थ सुख है।) किया। इसलिये वह प्रजाओं को उसी से सुख पहुँचाता है ॥११॥

उनके ऊपर वह शमी वृक्ष के पत्ते भी डालता है। प्रजापति ने प्रजाओं को शमी के पत्तों से ही शान्त (श) किया। इसलिये वह प्रजाओं को उसी से शान्त करता है ॥१२॥

अब एक कपाल का पुरोडाश 'क' अर्थात् प्रजापति के लिये होता है। 'क'

---

* क्या यह बज का करील तो नहीं है? एगेलिंग के अनुसार Capparis Aphylla.

लेन पुरोडाशेनाकुरुत कम्वेवैष एतत्प्रजाभ्यः कायैनैककपालेन पुरोडाशेन कुरुते तस्मात्कायै एककपालः पुरोडाशो भवति ॥१३॥

अथ पूर्वेद्युः। अन्वाहार्यपचनेऽनुपानिव यवान्कृत्वा तानीष दिवोपतप्य तेषां करम्भपात्राणि कुर्वन्ति यावन्तो गृह्याः स्युरतावन्त्येकेनातिरिक्तानि ॥१४॥

तत्रापि मेषं च मेषीं च कुर्वन्ति। तयोर्मेषे च मेष्यां च यद्यनेडमीरूर्णा विन्देत्ताः प्रणिज्य निश्लेपयेद्यद्युऽअनेडकीर्न विन्देदथो ऽअपि कुशोर्णा एव स्युः ॥१५॥

तद्यन्मेषश्च मेषी च भवतः। एष वै प्रत्यक्षं वरुणस्य पशुर्यन्मेषस्तत्प्रत्यक्षं वरुणपाशात्प्रजाः प्रमुञ्चति यवमयी भवतो यवान्हि जक्षुषीरेणोऽ गृह्यान्मिथुनौ भवतो मिथुनादेवैतद्वरुणपाशात्प्रजाः प्रमुञ्चति ॥१६॥

स उत्तरस्यामेव पयस्याया मेषीमवदधाति। दक्षिणस्यां मेषमेवमिव हि मिथुनं क्लृप्तमुत्तरतो हि स्त्री पुमाꣳसमुपशेते ॥१७॥

स सर्वाण्येव हवीꣳष्यध्वर्युः। उत्तरस्या वेदावासादयत्यथैतामेव पयस्यां प्रतिप्रस्थाता दक्षिणस्या वेदावासादयति ॥१८॥

प्रजापति ने 'क' के लिये एक कपाल के पुरोडाश से प्रजाओं को सुख (क) पहुँचाया। इसी प्रकार यह भी 'क' के लिये एक कपाल के पुरोडाश से प्रजा को सुख (क) पहुँचाता है। इसलिये 'क' (प्रजापति) के लिये एक कपाल का पुरोडाश होता है ॥१३॥

अब यज्ञ के पहले दिन अन्वाहार्य पचन अर्थात् दक्षिणाग्नि पर जौ की भूसी निकाल कर और उनको कुछ पकाकर करम्भ के इतने पात्र बनाते हैं जितने घर के लोग हों और एक अधिक। (करम्भ जौ और दही का बनता है) ॥१४॥

वहीं एक मेष और एक मेषी भी बनाते हैं। यदि एडक भेड़ के सिवाय किसी अन्य भेड़ की ऊन मिले तो उस मेष और मेषी को साफ करके उस पर लगा दें। और यदि एडक भेड़ को छोड़कर अन्य की ऊन न मिले तो कुशों का अग्र-भाग ही लगा दें ॥१५॥

यह मेष-मेषी क्यों बनाते हैं। मेष प्रत्यक्ष रूप से वरुण का पशु है। इस प्रकार प्रत्यक्ष ही वरुण के पाश से प्रजा को छुड़ा देता है। इनको जौ का इसलिये बनाते हैं, कि जब इन्होंने जौ खाये तभी तो वरुण ने इनको पकड़ा। जोड़ा इसलिये बनाते हैं कि जोड़े से ही प्रजा वरुण के पाश से छूटती है ॥१६॥

उत्तरी पयस्या पर मेषी को रखता है और दक्षिण की पयस्या पर मेष को। क्योंकि इसी प्रकार ठीक जोड़ा मिलता है। क्योंकि स्त्री पुरुष से उत्तर की (बाईं) ओर लेटती है ॥१७॥

अध्वर्यु अन्य सब हवियों को उत्तर की वेदी में रखता है। और प्रतिप्रस्थाता दक्षिण की वेदी में पयस्या को रखता है ॥१८॥

आसाद्य हवीꣳष्यग्निं मन्थति । अग्निं मन्थित्वानुप्रहृत्याग्निजुहोत्यथाध्वर्युरेवाहाग्नये समिध्यमानायानुब्रूहीति ताऽउभावेवेध्मावभ्याधत्त उभौ समिधौ परिशिꣳष्टऽउभौ पर्वाधारावाघारयतोऽथाध्वर्युरेवाहाग्निमग्नीत्समृड्ढीत्य समृष्टमेव भवति सम्प्रेषितम् ॥१६॥

अथ प्रतिप्रस्थाता पतिपरैति । स पत्नीमुदानेष्यन्पृच्छति केन चरसीति वरुणयं वाऽएतत्स्त्री करोति यदन्यस्य सत्यन्येन चरत्यथो नेन्मेऽन्त शल्या जुहवदिति तस्मात्पृच्छति निरुक्त वाऽएन कनीयो भवति सत्यꣳहि भवति तस्माद्वेव पृच्छति सा यत्र प्रतिजानीत ज्ञातिभ्यो हास्यै तदहितꣳ स्यात् ॥२०॥

ता याचयति । प्रवासिनो हवामहे मरुतश्च रिशादस' । करम्भेण सजोषस इति यथा पुरोऽनुवाक्यैवमेवैतयैवैनानेतेभ्यः पात्रेभ्यो ह्वयति ॥२१॥

तानि वै प्रतिपुरुष । यावन्तो गृह्या स्युस्तावन्त्येकेनातिरिक्तानि भवन्ति तत्प्रतिपुरुषमेवैतदेकैकेन या अस्य प्रजा जातास्ता वरुणपाशात्प्रमुच्यत्येकेनातिरिक्तानि भवन्ति तद्या

हवियों को रखकर अग्नि का मथन करता है । अग्नि को मथकर और वेदी पर लाकर आहुति देता है । पहले अध्वर्यु होता से कहता है, 'अग्नये समिध्यमानाम्' । (जलाई गई अग्नि लिये) ऐसा कह । तब दोनो (अध्वर्यु और प्रतिप्रस्थाता) ईंधन रखकर एक एक समिधा रखते हैं । और दोनों पहली आधार या आहुति छोड़ते हैं । इस पर अध्वर्यु कहता है । 'अग्निमग्नीत् समृड्ढि' । (हे अग्नीध्, अग्नि को ठीक कर) । अभी केवल कहा जाता है, अग्नि ठीक नहीं की जाती ।

अब प्रतिप्रस्थाता (उस जगह जहाँ वह पत्नी होती है) लौटता है । वह पत्नी को ले जाने की इच्छा करता हुआ पूछता है, 'तू किसके साथ सहवास करती है' ? (केन चरसि) । यदि स्त्री एक को छोड़कर दूसरे के साथ सहवास करे तो पाप करती है । वह इस लिये पूछता है कि कहीं वह मन में पछतावा करके आहुति न दे दे । निरुक्त पाप (अर्थात् पाप कहा हुआ) कम हो जाता है, क्योंकि यह सच होता है । इसलिये वह ऐसा पूछता है । यदि वह पाप को छिपा लेगी तो उसके सम्बन्धियों के लिये अहित होगा ॥२०॥

अब वह उससे कहलवाता है, 'प्रवासिनो हवामहे मरुतश्च रिशादस । करम्भेण सजोषस' (यजु० ३।४४) । 'प्रपास और करम्भ नामी हवियों को खूब खाने वाले और इन शत्रुओं का नाश करने वाले मरुतों को हम बुलाते हैं' । यह अनुवाक्य है । इससे वह मरुतों को पात्रों तक बुलाती है ॥२१॥

हर एक के लिये एक एक पात्र होता है । जितने घर के लोग होते हैं उतने ही पात्र होते हैं और एक अधिक । एक एक पुरुष के लिये एक एक इसलिये होता है कि जो प्रजा उत्पन्न हुई है वह वरुण के पाश से छूट जाय । और एक पात्र बच रहा यह इसलिये कि उससे जो सन्तान अभी उत्पन्न नहीं हुई वह वरुण के पाश से छूट जाय । इसलिये एक पात्र

एवास्य प्रजा अजातास्ता वरुणपाशात्प्रमुञ्चति तस्मादेकेनातिरिक्तानि भवन्ति ॥२२॥

पात्राणि भवन्ति पात्रेषु ह्यशानमश्नते यवमयानि भवन्ति यवान्हि जघ्नुपीर्वरुणो-ऽग्रहाच्छूर्पेण जुहोति शूर्पेण ह्यशानं क्रियते पत्नी जुहोति मिथुनादेवैतद्वरुणपाशात्प्रजाः प्रमुञ्चति ॥२३॥

पुरा यज्ञात्पुराहुतिभ्यो जुहोति । अहुतादो वै विशो विशो वै मरुतो यत्र वै प्रजापतेः प्रजा वरुणगृहीता' परिदीर्णा अनत्यश्च प्राणत्यश्च शिश्रिरे च निपेदुश्च तद्वासांमरुतः पाप्मानं विमेथिरे तथोऽएवैतस्य प्रजाना मरुत' पाप्मानं विमथ्नते तस्मात्पुरा यज्ञात्पुराहुतिभ्यो जुहोति ॥२४॥

स वै दक्षिणेऽग्नौ जुहोति । तदग्रामे यदरण्येऽइति ग्रामे वा ह्यरण्ये वैनः क्रियते यत्सभायां यदिन्द्रियेऽइति यत्सभायामिति यन्मानुषेऽइति तदाह यदिन्द्रियेऽइति यद्देवत्रेति तदाह यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहेति यदिदं च वयमेनश्चकृमेदं वयं तस्मात्तस्मात्सर्वस्मात्प्रमुच्यामहेऽइत्येवैतदाह ॥२५॥

अथैन्द्रीं मरुत्वतीं जपति । यत्र वै प्रजापतेः प्रजाना मरुतः पाप्मान विमेथिरे अधिक होता है ॥२२॥

पात्र इसलिये होते हैं कि पात्रों में ही खाना खाते हैं । जौ के इसलिये बनाये जाते हैं क्योंकि जब प्रजा ने जौ खाये तभी वरुण ने उनको पकडा । शूर्प (छाज) से आहुति देते हैं कि शूर्प (छाज) से ही भोजन तैयार किया जाता है । (पति के साथ) पत्नी भी आहुति देती है क्योंकि जोड़े द्वारा ही वरुण के पाश से प्रजा को छुडाता है ॥२३॥

यज्ञ से पूर्व, आहुति से पूर्व ही इसलिये अर्पण करती है क्योंकि लोग (विश) आहुतियों को नहीं खाते और मरुत लोग (विश) हैं । जब प्रजापति की प्रजा को वरुण ने पकड़ लिया और विदीर्ण कर दिया और वह श्वास प्रश्वास लेते हुये लेट गये और बैठ गये तब उनके पापों को मरुतों ने ही दूर किया था । इसी प्रकार इस यजमान की सन्तान का पाप भी मरुत ही दूर करते हैं इसलिये यज्ञ के पहले ही और आहुतियों से ही अर्पण करती है ॥२४॥

वह दक्षिण-अग्नि में आहुति देता है यह पढकर, 'यद्ग्रामे यदरण्ये' (यजु० ३।४५) । 'जो (पाप) गाँव में किया और जो वन में' । पाप गाँव में भी होता है और वन में भी । फिर कहता है—'यत् सभाया यदिन्द्रिये' । (यजु० ३।४५) । अर्थात् 'जो पाप सभा में किया और जो इन्द्रिय (अपने) में' । 'सभा में' का अर्थ है मनुष्यों के प्रति । 'इन्द्रिय में' का अर्थ है देवताओं के प्रति । अब कहता है—'यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहा' । (यजु० ३।४५) । 'जो कुछ पाप हमने किया उसके लिये हम यज्ञ करते हैं' । तात्पर्य यह है कि जो कुछ पाप हमने किया उस सबसे हम छुटकारा पाते हैं ॥२५॥

अब इन्द्र और मरुत का मन्त्र पढता है । जब प्रजापति की प्रजाओं का मरुतों ने

तद्वेत्तां चक्रऽइमे ह मे प्रजा न विमथ्नीरिति ॥२६॥

स एतामैन्द्रीं मरुत्वतीमजपत् । क्षत्रं वाऽइन्द्रो विशो मरुतः क्षत्रं वै विशो निषेद्धा निषिद्धा असदिति तस्मादैन्द्री ॥२७॥

मो षू णः । इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः । महश्चिद्यस्य मीळुषो यव्या हविष्मतो मरुतो वन्दते गीरिति ॥२८॥

अथैना वाचयति । अकन्कर्म कर्मकृत इत्यकन्हि कर्म कर्मकृतः सह वाचा मयो भुवेति सह हि वाचाकन्देवेभ्यः कर्म कृत्वेति देवेभ्यो हि कर्म कृत्वास्तं प्रेत सचाभुव इत्य न्यतो ह्योढया सह भवन्ति तस्मादाह सचाभुव इत्यस्तं प्रेतेति जघनार्धो वाऽएष यज्ञस्य यत्पत्नी तामेतत्प्राचीं यज्ञं प्रासीषदद्गृहा वाऽअस्तं गृहाः प्रतिष्ठा तद्गृहेष्वेवैनामेतत्प्रति ष्ठाया प्रतिष्ठापयति ॥२९॥

प्रतिप्रस्थायीयोदेति प्रतिप्रस्थाता । संमृजन्त्यग्निꣳ संमृष्टेऽग्नौ ताऽउत्तरावेवोत्तरा

पाप छुड़ाया उसने सोचा, 'यह मेरी प्रजा का नाश न करेंगे' ॥२६॥

उसने इन्द्र और मरुत के मन्त्र को पढ़ा। इन्द्र क्षत्रिय है और मरुत वैश्य (या साधारण लोग)। क्षत्रिय लोगों को वश में करने वाले हैं। इन्द्र के मंत्र को इसलिये पढ़ता है कि वह लोगों को वश में कर लेगा ॥२७॥

'मो षू णः इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः। महश्चिद् यस्य मीळुषो यव्या हविष्मतो मरुतो वन्दते गीः' (यजु० ३।४६)। 'हे इन्द्र, युद्धों में हमारा देवों के साथ (झगड़ा) न हो। हे बलवान! तेरे लिये यज्ञ में भाग है। हे बहुत बड़े दान की वर्षा करने वाले, यजमान की स्तुति तेरे जौ के द्वारा पूज्य मरुतों की प्रशंसा करती है ॥२८॥

अब वह (पत्नी से) कहलवाता है—'अकन् कर्म कर्मकृते' (यजु० ३।४७)। 'कर्म के कुशल लोगों ने कर्म कर लिया'। कर्म कुशल लोगों ने कर्म कर ही लिया। अब कहता है—'सह वाचा मयो भुवा' (यजु० ३।४७)। 'हर्ष-पूर्ण वाणी के साथ'। उन्होंने वाणी के साथ कर्म किया (अर्थात् मन्त्र पढ़ते हुये)। अब कहती है—'देवेभ्यः कर्मकृत्वा'। (यजु० ३।४७)। 'देवों के लिये कर्म करके'। क्योंकि देवों के लिये ही तो कर्म किया गया। अब कहती है, 'अस्त प्रेत सचाभुवः (यजु० ३।४७)। 'हे साथियो! घर जाओ'। 'सचा भुवः' इसलिये कहा कि वह दूसरी जगह से लाई गई और अब वे उसके साथ हैं। यह कहती है, 'अस्तं प्रेत' (घर जाओ'); पत्नी यज्ञ का निचला भाग है। और उसने उसको यज्ञ के पूर्व की बिठलाया है। 'अस्त' का अर्थ है 'गृह'। घर बैठने की जगह है। इसलिये वह उसको बैठने की जगह अर्थात् घर में बिठालता है। (Perhaps this part is to be addressed by यजमान to his पत्नी। He asks her to go home from the sacrificial place) ॥२९॥

प्रतिप्रस्थाता उसको बिठाल कर लौट आता है। अब वह आग को ठीक करते हैं।

वाघारावाघारयतोऽथाध्वर्युरवोश्राव्य होतारं प्रवृणीते प्रवृतो होतोत्तरस्यै वेदेर्होतृपदनऽउपविशत्युपविश्य प्रसौति ताऽउभावेव प्रसूतौ स्रुच आदायातिक्रामतोऽतिक्रम्या श्राव्याध्वर्युरेवाह समिधो यजेति यज-यजेति चतुर्थे-चतुर्थे प्रयाजे समानयमानौ नवभिः प्रयाजैश्चरतः ॥३०॥

अथाध्वर्युरेवोहाग्नयेऽनुब्रूहीति । आग्नेयमाज्यभागं ता उभावेव चतुराज्यस्यावदायातिक्रामतोऽतिक्रम्याश्राव्याध्वर्युरेवाहाग्निं यजेति ताऽउभावेव वषट्कृते जुहुतः ॥३१॥

अथाध्वर्युरेवाह सोमायानुब्रूहीति । सौम्यमाज्यभागं ताऽउभावेव चतुराज्यस्यावदायातिक्रामतोऽतिक्रम्या श्राव्याध्वर्युरेवाह सोमं यजेति ताऽउभावेव वषट्कृते जुहुतः ॥३२॥

तद्यत्किं च वाचा कर्तव्यम् । अध्वर्युरेव तत्करोति न प्रतिप्रस्थाता तद्यदध्वर्युरेवाश्रवयतीहैव यत्र वषट्क्रियते ॥३३॥

कृतानुकर एव प्रतिप्रस्थाता । क्षत्रं वै वरुणो विशो मरुतस्तत्क्षत्रायैवैतद्विशं कृतानुकरामनुवर्त्मानं करोति प्रत्युद्यामिनीथ्ं ह क्षत्राय विशं कुर्याद्यदपि प्रतिप्रस्थाताश्रावयेत्तनुकरामनुवर्त्मानं करोति प्रत्युद्यामिनीथ्ं ह क्षत्राय विशं कुर्याद्यदपि प्रतिप्रस्थाताश्रावयेत्त-

जब याग ठीक हो गई तो दोनों (अध्वर्यु और प्रतिस्थाता) दूसरी आहुति देते हैं। फिर अध्वर्यु (आग्नीध्र को) औषट् की आज्ञा देकर होता का वरण करता है। वरा हुआ होता वेदी के उत्तर में होता के स्थान में बैठता है। और बैठकर दोनों को प्रेरणा करता है। इस प्रकार प्रेरित होकर वे दोनों स्रुचों को लेकर (दक्षिण की ओर) आते हैं। और 'औषट्' की आज्ञा देकर अध्वर्यु (होता से) कहता है। 'समिधो यज'। और हर प्रयाज में कहता है 'यज, यज'। चौथे प्रयाज में (चमचे से जुहू में) घी डालता है और दोनों नौ प्रयाजों को करते हैं ॥३०॥

अब अध्वर्यु (होता से) कहता है, 'अग्नये अनुब्रूहि'। (अग्नि के लिये प्रार्थना कर)। यह अग्नि के आज्य भाग की ओर संकेत है। अब ये दोनों आज्य भाग में से चार भाग लेकर (उत्तर की ओर) चले जाते हैं। (उत्तर की ओर) जाकर और 'औषट्' कहकर अध्वर्यु कहता है। 'अग्नि यज'। 'वषट्' कहकर वे दोनों आहुतियाँ देते हैं ॥३१॥

अब अध्वर्यु कहता है। 'सोमाय अनुब्रूहि'। (सोम के लिये प्रार्थना कर)। यह सोम के आज्य-भाग के लिये कहा। दोनों आज्य के चार भाग लेकर चलते हैं और चलकर और 'औषट्' कहकर अध्वर्यु होता से कहता है 'सोम यज'। तब दोनों 'वषट्' कहकर आहुतियाँ डालते हैं ॥३२॥

जो कुछ वाणी से कहना होता है उसे अध्वर्यु कहता है, न कि प्रतिप्रस्थाता। अब केवल अध्वर्यु ही 'औषट्' क्यों कहता है? वस्तुतः जब वषट् कहा जाता है—॥३३॥

तो प्रतिप्रस्थाता केवल किये का अनुकरण करता है। वरुण क्षत्रिय है। मरुत विश या लोग हैं। इस प्रकार वह विशों या लोगों से क्षत्रिय का अनुकरण कराता है। अगर प्रतिप्रस्थाता भी 'औषट्' कहेगा तो क्षत्रिय और अन्य लोग समान हो जायेंगे। इसलिये प्रति-

स्माच्च प्रतिप्रस्थाता श्रावयति ॥३४॥

पाणावेव प्रतिप्रस्थाता । स्रुचौ कृत्वोपास्तेऽथाध्वर्युरेवैतैर्हविर्भिः प्रचरत्याग्नेयेनाष्टा कपालेन पुरोडाशेन सौम्येन चरुणा सावित्रेण द्वादशकपालेन वाष्टाकपालेन वा पुरोडाशेन सारस्वतेन चरुणा पौष्णेन चरुणैन्द्राग्नेन द्वादशकपालेन पुरोडाशेन ॥३५॥

अथैताभ्यां पयस्याभ्यां प्रचरिष्यन्तौ विपरिहरतः । स यो मेषो भवति मारुत्यां तं वारुण्यामवदधाति या मेषी भवति वारुण्यां तां मारुत्यामवदधाति तद्यदेवं विपरिहरतः क्षत्रं वै वरुणो वीर्यं पुमान्वीर्यमेवैतत्क्षत्रे धत्तेऽवीर्या वै स्त्री विशो मरुतस्तदवीर्यमेवैतद्विशं कुरुतस्तस्मादेवं विपरिहरतः ॥३६॥

अथाध्वर्युरेवाह वरुणायानु ब्रूहीति । स उपस्तृणीतऽआज्यमधास्यै वारुण्यै पयस्यायै द्विरवद्यति सोऽन्यतरेणावदानेन सह मेषमवदधात्यथोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्त्यवदाने ऽ अतिक्रामत्यति क्रम्याश्राव्याह वरुणं यजेति वषट्कृते जुहोति ॥३७॥

राज्ञे पाणावध्वर्युः । स्रुचौ कृत्वा दक्षिणेन प्रतिप्रस्थातुर्वा सोऽन्वारभ्याह मरुद्भ्यो-ऽनु ब्रूहीत्युपस्तृणीतऽआज्यं प्रतिप्रस्थाताधास्यै मारुत्यै पयस्यायै द्विरवद्यति सोऽन्यतरेणा-

प्रस्थाता औषट् नहीं कहता ॥३४॥

प्रतिप्रस्थाता दो स्रुचों को हाथ में लेकर बैठ जाता है । तब अध्वर्यु उन आहुतियों को करता है । अग्नि की आहुति आठ कपाल वाले पुरोडाश की, सोम की चरु से, सविता की बारह कपालों या आठ कपालों के पुरोडाश से, सरस्वती की चरु से, पूषा की चरु से, इन्द्र-अग्नि की कपालों के पुरोडाश से ॥३५॥

इन दोनों पयस्यों को करने की इच्छा करते हुये दोनों (अध्वर्यु और प्रतिप्रस्थाता) मेष और मेषी को बदल लेते हैं । जो मेष मरुतों के पात्र में था उसे वरुण के पात्र में रख देता है । जो वरुण के पात्र में मेषी थी उसे मरुतों के पात्र में रख देता है । यह परिवर्तन इसलिये करते हैं कि वरुण क्षत्रिय है । पुरुष वीर्य है । इस प्रकार वह क्षत्रिय में वीर्य धारण कराते हैं । स्त्री वीर्य शून्य है । मरुत लोग (विश) हैं । इस प्रकार वह लोगों को वीर्य रहित करते हैं । इसीलिये वह इस प्रकार बदलते हैं ॥३६॥

अब अध्वर्यु (होता से) कहता है, 'वरुणाय अनुब्रूहि' । 'वरुण के लिये प्रार्थना कर') । वह अब आज्य का नीचे का भाग (जुहू में) डालता है और वरुण की पयस्या में से दो भाग लेकर इनमें से किसी भाग के साथ मेष को रखता है । अब उन पर घी छोड़ता है और जहाँ से यह भाग काटे गये उस स्थान को पूर्ण कर देता है । फिर (दक्षिण की ओर) आ जाता है । इसके पश्चात् अध्वर्यु 'औषट्' कहकर होता से कहता है, 'वरुणं यज' । और 'वषट्कार' कहकर आहुति देता है ॥३७॥

अब अध्वर्यु बायें हाथ में दोनों स्रुचों को लेकर दाहिने हाथ से प्रतिप्रस्थाता का कपड़ा पकड़ कर कहता है, 'मरुद्भ्योऽनुब्रूहि' । 'मरुतों के लिये प्रार्थना कर' । अब प्रति-

वदानेन सह मेपीमवदधात्यथोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्तयवदानेऽतिक्रामत्यथाध्वर्युरेवाश्राव्याह मरुतो यजेति वषट्कृते जुहोति ॥३८॥

अथाध्वर्युरेव कायेन । एककपालेन पुरोडाशेन प्रचरति कायेनैककपालेन पुरोडाशेन प्रचर्याध्वर्युरेवाहाग्नये स्विष्टकृतेऽनुब्रूहीति स सर्वेषामेव हविषामध्वर्युः सकृत्सकृदवद्यत्यथैतस्या ऽ एव पयस्यायै प्रतिप्रस्थाता सकृदवद्यत्यथोपरिष्टाद्द्विराज्येस्याभिघारयतस्ताऽउभावेवातिक्रामतोऽतिक्रम्याश्राव्याध्वर्युरेवाहाग्निꣳ स्विष्टकृतं यजेति ताऽउभावेव वषट्कृते जुहुतः ॥३९॥

अथाध्वर्युरेव प्राशित्रमवद्यति । इडाꣳ समवदाय प्रतिप्रस्थात्रेऽतिप्रजिहीते तत्रापि प्रतिप्रस्थाता मारुत्यै पयस्यायै द्विरभ्यवद्यत्यथोपरिष्टाद्विराज्यस्याभिघारयत्युपहूय मार्जयन्ते ॥४०॥

अथाध्वर्युरेवाह बह्वन्प्रस्थास्यामि । समिधमाधायाभिमृशत्संमृड्ढीति स श्रुचोरेवाध्वर्युः पृषदाज्यं व्यानयतेऽथ यदि प्रतिप्रस्थातुः पृषदाज्यं भवति तत्स द्वेधा व्यानयतऽउतो तत्र पृषदाज्यं न भवति स यदेवोपभृत्याज्यं तत्स द्वेधा व्यानयते ताऽउभावेवातिक्रामतोऽति-

प्रस्थाता आज्य के निचले भाग को (जुहू में) डालकर मरुतों के पयस्या से दो भाग काटकर किसी एक के साथ मेपी को रखता है और ऊपर से घी छोड़ता है और जहाँ से दो भाग काटे गये थे उनके स्थान की पूर्ति कर देता है। और (दक्षिण की ओर) चला आता है। अब अध्वर्यु 'श्रौषट्' कहकर कहता है—'मरुतो यज'। और वषट्कार कहकर आहुति देता है ॥३८॥

अब अध्वर्यु 'क' के एक कपाल वाले पुरोडाश को लेता है। और 'क' के एक कपाल वाले पुरोडाश को लेकर अध्वर्यु कहता है, 'अग्नये स्विष्टकृतेऽनुब्रूहि'। 'स्विष्टकृत अग्नि के लिये प्रार्थना कर'। अब अध्वर्यु सब हवियों में से एक-एक भाग लेता है; और प्रतिप्रस्थाता भी उसी पयस्या में से एक भाग लेता है। अब वे दो बार घी छोड़ते हैं। और दोनों (दक्षिण की ओर) आते हैं। और अध्वर्यु 'श्रौषट्' कहकर कहता है, 'अग्निं स्विष्टकृतं यज'। वे दोनों 'वषट्' कहकर आहुति देते हैं ॥३९॥

अब अध्वर्यु अगला भाग काटता है। अब इडा को टुकड़े-टुकड़े करके प्रतिप्रस्थाता के हवाले करता है। प्रतिप्रस्थाता उन पर मरुतों के पयस्या से दो भाग रख देता है। (अध्वर्यु) उन पर दो बार घी छोड़ता है और 'इडा' कहकर वह आगे को पवित्र कर लेता है ॥४०॥

अब अध्वर्यु कहता है, 'ब्रह्मन्! मैं आगे जाऊँ'। समिधाओं को रखकर कहता है, 'हे अग्नीध्र, अग्नि ठीक कर'। अब अध्वर्यु स्रुचों में नवनी (पृषदाज्य) को डालता है। और प्रतिप्रस्थाता भी यदि उसके पास नवनी हो तो उसके दो भाग करके स्रुचों में उँडेलता है। परन्तु यदि नवनी न हो तो उपभृति में जो घी हो उसके दो भाग करके अलग

कम्याश्राव्याध्वर्युरेवाह देवान्यजेति यजयजेति चतुर्थेचतुर्थेनुयाजे समानयमानो नवभिरनुयाजैश्चरतस्तद्यन्नवप्रयाज भवति नवानुयाजं तदुभयत एवैतद्वरुणपाशात्प्रजाः प्रमुञ्चतीतश्चोर्ध्वा इतश्चावाचीस्तस्मान्नवप्रयाजं भवति नवानुयाजम् ॥४१॥

ताऽउभावेव सादयित्वा स्रुचो व्यूहतः । स्रुचो व्यूह्य परिधीन्त्समज्य परिधिमभिघाश्राव्याध्वर्युरेवाहेषिता दैव्या होतारो भद्रावाच्याय प्रेषितो मानुषः सूक्तवाकायेति सूक्तवाकꣳ होता प्रतिपद्यतेऽथैताऽउभावेव प्रस्तरौ समुल्लुम्पताऽउभावनुप्रहरत उभौ तूष्णीऽअपगूह्योपासाते यदा होता सूक्तवाकमाह ॥४२॥

अथाग्नीदाहानुप्रहरेति ताऽउभावेवानुप्रहरत उभावात्मानाऽउपस्पृशेते ॥४३॥

अथाह संवदस्वेति । अगानग्नीदगंछावय श्रौषट् स्वगा दैव्या होतृभ्य स्वस्तिर्मानुषेभ्यः शं योर्ॅहीत्यध्वर्युरेवैतदाह ताऽउभावेव परिधीननुप्रहरत उभौ स्रुचः सम्प्रगृह्य स्फ्ये सादयतः ॥४४॥

अथाध्वर्युरेव प्रतिपरेत्य । पत्नीः संयाजयत्युपास्तऽएव प्रतिप्रस्थाता पत्नीः

अलग उँडेल देता है । अब वे दोनों (दक्षिण की ओर) चलते हैं और अध्वर्यु 'औषट्' कहकर कहता है—'देवान् यज यज' । इस प्रकार हर अनुयाज में कहता है और हर चौथे अनुयाज में चमचे में घी छोड़ता है । इस प्रकार वह दोनों नौ अनुयाज करते हैं । नौ प्रयाज और नौ अनुयाज क्यों किये जाते हैं ? इसलिये कि दोनों बार प्रजा को वरुण के पाश से छुड़ाता है । पहले से ऊपर के और पिछले से नीचे के । इसीलिये नौ प्रयाज होते हैं, और नौ अनुयाज ॥४१॥

अब वे दोनों स्रुचों को (वेदी में) रखकर अलग कर देते हैं । स्रुचों को अलग करके, परिधियों पर घी डालकर और एक परिधि को लेकर 'औषट्' कहकर अध्वर्यु होता से कहता है—'दिव्य-होता लोग भद्र कहने के लिये बुलाये गये और मनुष्य होता सूक्तवाक अर्थात् प्रार्थना के लिये' । अब होता सूक्तवाक कहता है । इस पर दोनों प्रस्तरों को लेकर (आग में) डाल देते हैं । दोनों एक तृण लेकर (आग के पास) बैठे रहते हैं । और अब होता सूक्तवाक को कहता है ॥४२॥

आग्नीध्र कहता है, 'अनुप्रहर (डाल)' । दोनों डालते हैं और अपने शरीर का स्पर्श करते हैं ॥४३॥

अब आग्नीध्र कहता है, '(मुझसे) संवाद कर' । अध्वर्यु कहता है, 'आग्नीध्र ! क्या यह गया' ? 'हाँ यह गया' । 'यहाँ देवताओं को सुनाओ' । 'यह सुने' । 'दैवी-होता विदा हो । मनुष्य होता का कल्याण हो' । अब अध्वर्यु होता से कहता है, 'शान्ति कह' । वे दोनों परिधियों को फेंक देते हैं, और दोनों स्रुचों को मिलाकर स्फ्य पर रख देते हैं ॥४४॥

अब अध्वर्यु (गार्हपत्य अग्नि के पास) लौटकर 'पत्नी संयाज' करता है । प्रति-

संयाज्योदेत्यध्वर्युः ॥४५॥

त्रीणि समिष्टयजूंष्यपि जुहोति । तूष्णीमेव प्रतिप्रस्थाता स्रुचं प्रगृह्णाति तद्ये वैश्वदेवेन यजमानयोर्वाससी परिहिते स्यातां तेऽएवात्रापि स्यातां यथास्यै वारुण्यै पयस्यायै क्षामकर्षमिश्रमादायावभृथं यन्ति वरुण्यं वाऽएतन्निर्वरुणतायै तत्र न साम गीयते न ह्यत्र साम्ना किं चन क्रियते तूष्णीमेवेत्याप्यवेत्योपमारयति ॥४६॥

अवभृथ निचुम्पुण । निचेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिपस्पाहीति कामश्छैते यस्मै कामयेत तस्मै दद्यान्न हि दीक्षितवसने भवतः स यथाहिस्त्वचो निर्मुच्येतैवꣳ सर्वस्मात्पाप्मनो निर्मुच्यते ॥४७॥

अथ केशश्मश्रूप्त्वा । समारोह्याग्नीऽउदवसायेव ह्येतेन यजते न हि तदवकल्पते यदुत्तरवेदावग्निहोत्रं जुहुयात्तस्मादुदवस्यति गृहानित्वा निर्मथ्याग्नी पौर्णमासेन यजतऽउत्सन्नयज्ञ इव वाऽएष यच्चातुर्मास्यान्यथैव कल्पतः प्रतिष्ठितो यज्ञो यत्पौर्णमासं तत्कल्पते नैवैतद्यज्ञे नान्ततः प्रतितिष्ठति तस्मादुदवस्यति ॥४८॥ ब्राह्मणम् ॥ ३ ॥ [५. २.] ॥

प्रस्थाता ठहरा रहता है । अध्वर्यु पत्नी-संयाज करके उत्तर की ओर चला जाता है ॥४५॥

अब अध्वर्यु तीन समिष्ट-यजुष् की आहुति देता है । प्रतिप्रस्थाता स्रुच लेकर मौन होकर आहुति देता है । यजमान और पत्नी ने जो वस्त्र वैश्वदेव के समय पहने थे वह अब भी पहनें । अब वरुण की पयस्या के जले भाग को लेकर अवभृथ अर्थात् स्नान के स्थान में आवें । यह (स्नान) वरुण के लिये है जिसके पाश से छूट जाय । वहाँ साम नहीं गाया जाता क्योंकि साम से तो कुछ किया नहीं जाता । अध्वर्यु चुपके से वहाँ जाकर (जले भाग के पात्र को) जल में डुबो देता है ॥४६॥

अब वह कहता है, 'अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिपस्पाहि' (यजु० ३।४८) । 'हे धीरे चलने वाले जलाशय, तू चुपके चुपके चलता है । देवों की सहायता से ये देव-कृत पापों से छूट जाऊँ और मनुष्यों की सहायता से मनुष्य-कृत पापों से । हे देव मुझे राक्षस से बचा' । (स्नान के समय के वस्त्रों को) मन चाहे किसी (पुरोहित) को दे देवे । क्योंकि यह वस्त्र दीक्षित पुरुष के तो होते ही नहीं । जैसे सांप केंचुल छोड़ता है, इसी प्रकार यह पापों को छोड़ता है ॥४७॥

अब यजमान के बाल और डाढ़ी बनाते हैं । अब दोनों अग्नियों को लेते हैं । क्योंकि जगह बदलकर ही दूसरा यज्ञ होता है । उत्तर वेदी पर अग्निहोत्र करना ठीक नहीं । अब घर जाकर अग्नि मथ कर वह पूर्णमासी का यज्ञ करता है । यह चातुर्मास्य यज्ञ अलग है पूर्णमासी का निश्चित यज्ञ है । इसलिये वह निश्चित यज्ञ द्वारा अपने को स्थापित कर लेता है । इसीलिये वह जगह बदलता है ॥४८॥ (वर्षाकाल का वरुण-प्रघास पर्व समाप्त)

अध्याय ५—ब्राह्मण ३

वरुणप्रघासैर्वै प्रजापतिः । प्रजा वरुणपाशात्प्रामुञ्चत्ता अस्यानमीवा अकिल्बिषाः प्रजाः प्राजायन्ताथैतैः साकमेधैरेतैर्वै देवा वृत्रमघ्नन्नेतैर्वैव व्यजयन्त येयमेषां विजितिस्तां तथोऽएवैष एतैः पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथोऽएव विजयते तस्माद्वाऽएष एतैश्चतुर्थे मासि यजते स वै द्वयहमनूचीनाहं यजते ॥१॥

स पूर्वेद्युः । अग्नयेऽनीकवतेऽष्टाकपालं पुरोडाशं निर्वपत्यग्निꣳ ह वै देवा अनीकं कृत्वोपप्रेयुर्वृत्रꣳ हनिष्यन्तः स तेजोऽग्निर्नाव्यथत तथोऽएवैष एतत्पाप्मानं द्विषन्तं भ्रातृव्यꣳ हनिष्यन्नग्निमेवानीकं कृत्वोपैति स तेजोऽग्निर्न व्यथते तस्मादग्नयेऽनीकवते ॥२॥

अथ मरुद्भ्यः सांतपनेभ्यः । मध्यन्दिने चरुं निर्वपति मरुतो ह वै सांतपना मध्यन्दिने वृत्रꣳ संतेपुः स संतप्तोऽनन्नेव प्राणन्परिदीर्णः शिश्ये तथोऽएवैतस्य पाप्मानं द्विषन्तं भ्रातृव्यं मरुतः सांतपनाः संतपन्ति तस्मान्मरुद्भ्यः सांतपनेभ्यः ॥३॥

अथः मरुद्भ्यो गृहमेधिभ्यः । शाखया वत्सानपाकृत्य पवित्रवति संदोह्य तं चरुꣳ

वरुण-प्रघास के द्वारा प्रजापति ने प्रजा को वरुण के जाल से छुड़ाया, और प्रजा रोगरहित और दोषरहित उत्पन्न हुई । और इन 'साकमेध' आहुतियों के द्वारा देवों ने वृत्र को मारा । और उस विजय को प्राप्त किया जिसको वह इस समय भोग रहे हैं । उसी प्रकार यह (यजमान) भी अपने पापी शत्रुओं और अहितैषियों को मारता है और उन पर विजयी होता है । इसीलिये (वरुणप्रघास के) चौथे मास मे यह (साकमेध) यज्ञ करता है । वह इस यज्ञ को दो लगातार दिनों मे करता है ॥१॥

पहले दिन 'अनीकवत्' अग्नि के लिये आठ कपालों का पुरोडाश देता है । क्योंकि अग्नि को 'अनीक' (नुकीला) करके ही वह देव वृत्र को मारने दौड़े थे । और उस तेज को अग्नि ने छोड़ा नहीं । उसी प्रकार (यजमान भी) पापी अहितकारी शत्रु को मारने के लिये अग्नि को 'अनीक' (नुकीला) करके दौड़ता है । उस तेज को अग्नि नहीं छोड़ता । इसलिये 'अग्नि अनीकवत् के लिये' ॥२॥

दोपहर को 'सांतपन मरुतों' के लिये 'चरु' देता है । क्योंकि दोपहर को गर्म (अतप्त) हवाओं ने वृत्र को झुलसा दिया । और इस प्रकार झुलस कर वह हाँपता हुआ और जख्मी पड़ा था । इसी प्रकार 'सांतपन मरुत्' (गर्म हवायें) उस यजमान के पापी, अहितकारी, शत्रु को झुलसा देते हैं । इसलिये 'सांतपन मरुतों के लिये' ॥३॥

इसके पश्चात् (सायंकाल को) 'गृहमेधी मरुतों' के लिये (चरु)। (पलाश की) शाखा से बछड़ों को दूर करके पवित्रों वाले बर्तन मे (गायों को) दूहकर चरु को

श्वपयति चरुꣳ ह्येव स यत्र क्व च तण्डुलानावपन्ति तन्मेधो देवा दधिरे प्रातर्वृत्रꣳ हनिष्यन्तस्तथोऽएवैष एतत्पाप्मानं द्विषन्तं भ्रातृव्यꣳ हनिष्यन्मेधो धत्ते तद्यत्क्षीरौदनो भवति मेधो वै पयो मेधस्तण्डुलास्तमुभयं मेधमात्मन्धत्ते तस्मात्क्षीरौदनो भवति ॥४॥

तस्याहत् । सैव स्तीर्णा वेदिर्भवति या मरुद्भ्यः सातपनेभ्यस्तस्यामेव स्तीर्णायां वेदौ परिधींश्च शकलांश्चोपनिदधति तथा संदोह चरुꣳ श्वपयति श्वपयित्वाभिघार्योद्वासयति ॥५॥

अथ द्वे पिशीले वा पात्र्यौ वा निर्णेनिजति । तयोरेनं द्वेधोद्धरन्ति तयोर्मध्ये सर्पिरासेचने कृत्वा सर्पिरासिञ्चति स्रुवं च स्रुचं च संमार्ष्ट्यर्थैताऽओदनावादायोदेति स्रुवं च स्रुचं चादायोदेति स इमामेव स्तीर्णां वेदिमभिमृश्य परिधीन्परिधाय यावतः शकलान्कामयते तावतोऽभ्यादधात्यथैताऽओदनावासादयति स्रुवं च स्रुचं चासादयत्युपविशति होता होतृषदने स्रुवं च स्रुचं चाददान आह ॥६॥

अग्नयेऽनुब्रूहीति । आग्नेयमाज्यभागꣳ स दक्षिणस्यौदनस्य सर्पिरासेचनाच्चतु-

पकाता है । जिसमें तण्डुल या चावल पकाते हैं वह 'चरु' कहलाता है । जिस अगले दिन देव वृत्र को मारने जा रहे थे उसकी शाम को देवों ने यही भोजन किया था (मेधो दधिरे) । यहाँ 'मेध' का अर्थ भोजन है ('nourishment' according to Eggeling) । इसी प्रकार यह यजमान भी पापी अहितकारी शत्रु को मारने के लिये इसी मेध या भोजन को करता है । यह दूध और चावल दोनों का क्यों बनाते हैं ? दूध 'मेध' या शक्तिवाला भोजन है और चावल भी शक्तिवाला भोजन है । इस प्रकार वह अपने में दोनों शक्तियों (मेध) को धारण करता है । इसलिये दूध और चावल का चरु बनाते हैं ॥४॥

यह इस प्रकार से—जो कुशों से आच्छादित वेदी 'सातपन मरुतों' के लिये थी वही अब भी काम में आती है । इसी कुशों से आच्छादित (स्तीर्णा) वेदी में 'परिधि' और 'शकल' अर्थात् बड़ी समिधाओं और छोटे टुकड़ों को रखता है और उसी प्रकार दूहकर चरु पकाता है । और पकाकर और चुपड़कर (घी डालकर) आग से हटा लेता है ॥५॥

तब दो बर्तनों या थालियों को माँजता है । और उनमें उस (चरु) के दो बराबर भाग करके रख देता है । उनमें बीच में गड्ढा करके उनमें घी छोड़ता है । अब स्रुवा और स्रुक दोनों को पोंछता है । और भात के दोनों पात्रों को लेकर (वेदी तक) आता है । फिर वह स्रुवा और स्रुक् को लेकर (वेदी तक) आता है । और कुशों से आच्छादित वेदी को छूकर समिधायें रखकर जितने टुकड़ों को चाहता है रख देता है । तब वह दोनों भात की थालियों को और स्रुवा और स्रुक् को यथोचित स्थान पर रख देता है । होता होता के आसन पर बैठ जाता है । स्रुवा और स्रुक् को लेकर अध्वर्यु कहता है—॥६॥

'अग्नि के लिये कह' । अग्नि के आज्य भाग की ओर संकेत करके । दाहिने भात की प्याली के गड्ढे के घी में से चार भाग लेकर दक्षिण की ओर जाता है । और जाकर

राज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याहाग्नि यजेति वषट्कृते जुहोति ॥७॥

अथाह सोमायानुब्रूहीति। सौम्यमाज्यभागꣳ स उत्तरस्यौदनस्य सर्पिरासेचनाच्च-तुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याह सोमं यजेति वषट्कृते जुहोति ॥८॥

अथाह मरुद्भ्यो गृहमेधिभ्योऽनुब्रूहीति। स दक्षिणस्यौदनस्य सर्पिरासेचनात्तत आज्यमुपस्तृणीते तस्य द्विरवद्यत्यथोपरिष्टादाज्यस्यामिघारयत्यतिक्रामत्यतिक्रम्याश्राव्याह मरुतो गृहमेधिनो यजेति वषट्कृते जुहोति ॥९॥

अथाग्नये स्विष्टकृतेऽनुब्रूहीति। स उत्तरस्यौदनस्य सर्पिरासेचनात्तत आज्य मुपस्तृणीते तस्य द्विरवद्यत्यथापरिष्टादाज्यस्यामिघारयत्यतिक्रामत्यतिक्रम्याश्राव्याहाग्निꣳ स्विष्टकृत यजेति वषट्कृते जुहोत्यथेडामेपावद्यति न प्राशित्रमुपहृत्य मार्जय-न्तऽएतन्नूवे कमयनम् ॥१०॥

अथेद द्वितीयꣳ। सैव स्तीर्णा बेदिर्भवति या मरुद्भ्य सातपनेभ्यस्तस्यामेव स्तीर्णायां वेदौ परिधींश्च शकलाश्चोपनिदधति तथा सदोहा चरुꣳ श्रपयति नेदेव प्रति-वेशमाज्यमधिश्रयति श्रपयित्वाभिघार्योद्वास्यानक्ति स्थाल्यामाज्यमुद्वासयति स्रुव च स्रुच संमार्ष्टर्धैतꣳ सोखमेव चरुमादायोदेति स्थाल्यामाज्यमादायोदेत स्रुव च स्रुच चादायो-

आग्नीध्र के लिये 'औपट्' कहता है। फिर (होता से) कहता है, 'अग्नि यज'। और वषट्कार कहने के अनन्तर आहुति देता है ॥७॥

अब सोम के आज्य भाग की ओर संकेत करके कहता है, 'सोम के लिये कह'। और बायें भात की थाली के गड्ढे के घी में से चार भाग लेकर आता है और आकर 'औपट्' कहकर यह कहता है 'सोम यज। इसके अनन्तर 'वषट्कार' कह के आहुति देता है ॥८॥

अब कहता है, 'गृहमेधी मरुतों के लिये कह'। दाहिने भात की प्याली के गड्ढे में घी फैलाता है। उसमें से दो भाग लेकर उन पर घी छोड़ता है और चला आता है। वहाँ आकर औपट् कहकर कहता है, 'मरुतो गृहमेधिनो यज'। और वषट्कार कहकर आहुति देता है ॥९॥

अब कहता है, 'स्विष्टकृत अग्नि के लिये कह'। बायें भात के गड्ढे के घी को फैलाता है और दो भाग लेकर उन पर घी छोड़ता है और चला आता है। आकर 'औपट्' कहकर कहता है—'अग्ने स्विष्टकृत यज'। और 'वषट्' कहकर आहुति देता है। अब इडा को काटता है परन्तु अगला भाग नहीं। इडा कहकर वह अपने को पवित्र कर लेते हैं। यह एक प्रकार है (साकमेध का) ॥१०॥

अब यह दूसरा। वही वही स्तीर्ण रहती है जो 'सातपन मरुतों' के लिये थी। इसी आच्छादित वेदी में परिधि और शकलों को रखता है। और (गौओं को उसी तरह) दूह कर चरु पकाता है। घृत वहीं (?) रखता है। चरु पका कर घी डालता है। और आग से

दैति स इमामेव स्तीर्णां वेदिमभिमृश्य परिधीन्परिधाय यावतः शकलान्कामयते तावतोभ्यादधात्यथैतथ्ं सोममेव चरुमासादयति स्थाल्यामाज्यमासादयति स्रुवं च स्रुचं चासादयत्युपविशति होता होतृपदने स्रुवं च स्रुचं चाददान आह ॥११॥

अग्नयेऽनुब्रूहीति । आग्नेयमाज्यभागथ्ं स स्थाल्यै चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याहाग्निं यजेति वषट्कृते जुहोति ॥१२॥

अथाह सोमायानुब्रूहीति । सौम्यमाज्यभागथ्ं स स्थाल्याऽएव चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याह सोमं यजेति वषट्कृते जुहोति ॥१३॥

अथाह मरुद्भयो गृहमेधिभ्योऽनुब्रूहीति । स उपस्तृणीतऽआज्यमथास्य चरोर्द्विरवद्यत्यथोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्तयवदानेऽअतिक्रम्याश्राव्याह मरुतो गृहमेधिनो यजेति वषट्कृते जुहोति ॥१४॥

अथाहाग्नये स्विष्टकृतेऽनुब्रूहीति । स उपस्तृणीतऽआज्यमथास्य चरोः सकृदवद्यत्यथोपरिष्टाद्द्विराज्यस्याभिघारयति न प्रत्यनक्तयवदानमतिक्रामत्यतिक्रम्याश्राव्याहाग्निꣳ

हटा लेता है । थाली में घी को निकालता है, स्रुवा और स्रुक को पोंछता है । चरु को बर्तन में लेकर (वेदी तक) आता है । फिर थाली मे घी लेकर आता है और फिर स्रुवा और स्रुव को लेकर आता है । अब वह कुशो से ढकी हुई वेदी को छूता है । और परिधियों को (आहवनीय अग्नि पर)रखता है और जितने लकड़ी के टुकड़ो को चाहता है रख देता है । अब वह चरु के बर्तन को रख देता है, घी की थाली को रख देता है, स्रुवा और स्रुक को रख देता है । होता होता के आसन पर बैठ जाता है । स्रुवा और स्रुक् को लेकर (अध्वर्यु) कहता है—॥११॥

'अग्नि के लिये कह' । यह अग्नि के आज्य भाग के विषय में । अब थाली मे से घी के चार भाग लेकर (अग्नि के दक्षिण को) जाता है । जाकर और (आग्नीध्र को) औषट कह कर (होता से) कहता है, 'अग्नि यज' । और वषट्कार कहकर आहुति डालता है ॥१२॥

अब वह कहता है, 'सोम के लिये कह' । यह सोम को आज्य भाग के सम्बन्ध में कहा । अब प्याली में से चार भाग लेकर जाता है । जाकर श्रौषट् कहकर कहता है 'सोम यज' । और वषट्कार के पश्चात् आहुति देता है ॥१३॥

अब कहता है, 'गृहमेधी मरुतो के लिये कह' । अब वह (जुहू मे) घी को फैलाता है । चरु में से दो भाग काटता है । उस पर घी डालता है । फिर दो भागों को चुपड़ता है और (वेदी तक) जाता है । जाकर और श्रौषट् कहकर कहता है, 'मरुतो गृहमेधिनो यज' । और वषट्कार कहकर आहुति दे देता है ॥१४॥

अब कहता है, 'अग्निस्विष्टकृत के लिये कह' । अब वह घी को फैलाता है, चरु में से एक टुकडा लेता है और दो बार घी छोड़ता है । और दोनों टुकड़ों को बिना चुपड़े हुये

स्विष्टकृत यजेति वषट्कृते जुहोति ॥१५॥

अथेडामेवावद्यति न प्राशित्रम् । उपहूय प्राश्नन्ति यावन्तो गृह्या हविरुच्छिष्टाशाः स्युस्तावन्तः प्राश्नीयुरथो ऽअप्यृत्विजः प्राश्नीयुरथो ऽअप्यन्ये ब्राह्मणाः प्राश्नीयुर्यदि बहुरोदन स्यादथैतामनिरशितां कुम्भीमपिधाय निदधति पूर्णदर्वाय मातृभिर्वत्सान्त्समवार्जन्ति तदु पशवो मेघमात्मन्दधते यवाग्वैताथ्सं रात्रिमग्निहोत्रं जुहोति निवान्या प्रातर्दुहन्ति पितृयज्ञाय ॥१६॥

अथ प्रातर्हुत वाहुते वा । यतरथा कामयेत सोऽस्याऽअनिरशिताये कुंभ्यै दर्व्योपहन्ति पूर्णा दर्वि परापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहाऽइषमूर्जथ्सं शतक्रतविति यथा पुरोऽनुवाक्यैवमेवैतयैवैनमेतस्मै भागाय ह्वयति ॥१७॥

अथऽर्षभमाह्वयितवै ब्रूयात् । स यदि रुयात्स वषट्कार इत्यु हैकऽआहुस्तस्मिन्वषट्कारे जुहुयादितियथोऽइन्द्रमेवैतत्स्वेन रूपेण ह्वयति वृत्रस्य वधायैतद्वाऽइन्द्रस्य रूपं यदृषभस्तत्स्वेनैवैनमेतद्रूपेण ह्वयति वृत्रस्य वधाय स यदि रुयादा मऽइन्द्रो यज्ञमगन्त्सेजाता है। जाकर श्रौषट् कहकर कहता है, 'अग्नि स्विष्टकृत यज' । वषट्कार कहकर आहुति दे देता है ॥१५॥

अब इडा में से काटता है परन्तु आगे का भाग नहीं। (इडा को) कह कर वे (ऋत्विज) खाते हैं। घर के जितने लोग बची हुई हवि को खाने वाले हों वह खावें। या ऋत्विज लोग खावें। यदि भात अधिक हो तो अन्य ब्राह्मण भी खावें। जब एक कुम्भी (पात्र) बिल्कुल खाली न होने पावे उसे ढककर 'पूर्णदर्व' के लिये रख देते हैं। अब गायों के लिये बछड़ों को छोड़ देते हैं। इस प्रकार पशु भोजन को जाते हैं। उस रात को वह यवागू (जौ और गुड़ का मिला हुआ) से अग्निहोत्र करता है। प्रातः काल पितृयज्ञ के लिये निवान्या गौ को (जो गौ दूसरे के बछड़े को पिलाती है) दूहता है ॥१६॥

इसके बाद, प्रातः के समय, अग्निहोत्र करने के बाद अथवा उससे पहले, जैसा भी वह चाहे, वह (शेष चरु को) दर्वी चमचे से बिना खाली हुई कुम्भी में से काटता है, यह कहकर (यजु० ३।४६)। 'पूर्णा दर्वि परापत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहाऽइषमूर्जथ्शतक्रतो'। अर्थात् 'पूर्ण हे दर्वि। दूर उड़ो। अच्छी तरह पूर्ण, वापस हम तक उड़ो; हे शतक्रतु इन्द्र, वस्तु या व्यापार वस्तु के समान हम दोनों भोज्य और पेय का मोल भाव करें'। उसी प्रकार अनुवाक्य के समान इस ऋचा को कहकर वह उसे (इन्द्र को) भाग के लिये बुलाता है ॥१७॥

अब वह यजमान से कहे, 'बैल को बुलवा'। कुछ लोग कहते हैं कि 'यदि बैल डकारे तो यह वषट्कार है। इसी वषट्कार के पश्चात् आहुति देनी चाहिये'। इस प्रकार वह वृत्र के वध के लिये इन्द्र को उसी के रूप में बुलाता है। ऋषभ (बैल) इन्द्र का ही रूप है। इस प्रकार वह वृत्र के वध के लिये इन्द्र को उसी के रूप में बुलाता है। यदि

न्दो मे यज्ञ इति ह विद्यायन्न रुयाद्ब्राह्मण एव दक्षिणत आसीनो ब्रूयाज्जुहुधीति सैवैन्द्री वाक् ॥१८॥

स जुहोति । देहि मे ददामि ते नि मे धेहि नि ते दधे । निहार च हरासि मे निहारं निहराणि ते स्वाहेति ॥१९॥

अथ मरुद्भ्य. क्रीडिभ्य. । सप्तकपाल पुरोडाश निर्वपति मरुतो ह वै क्रीडिनो वृत्रश्ं हनिष्यन्तमिन्द्रमागत तमभितः परिचिक्रीडुर्महयन्तस्तथोऽएवैत पाप्मान द्विषन्त भ्रातृव्यश्ं हनिष्यन्तमभितः परिक्रीडन्ते महय-न्तस्तस्मान्मरुद्भ्यः क्रीडिभ्योऽथातो महाहविष एव तद्यथा महाहविषस्तयो तस्य ॥२०॥ ब्राह्मणम् ॥४॥ [५ ३] ॥ चतुर्थः प्रपाठकः समाप्तः ॥ कण्डिका सख्या ॥१०५॥

वह डकारे तो जानना चाहिये कि मेरे यज्ञ मे इन्द्र आ गया । मेरा यज्ञ इन्द्र-युक्त हो गया । और यदि (बैल) न डकारे तो दक्षिण की ओर बैठा हुआ ब्राह्मण कहे 'जुहुधि' (आहुति दो) यह वस्तुत इन्द्र की वाणी है ॥१८॥

वह इस मन्त्र से आहुति देता है, 'देहि मे ददामि ते नि मे धेहि नि ते दधे । निहार च हरासि मे निहार निहराणि ते स्वाहा' (यजु० ३।५०) । 'मुझे दे । मैं तुझे देता हूँ । मेरे अर्पण कर । म तेरे अर्पण करता हूँ । मेरे लिये उपहार ला । म तेरे लिये उपहार लाऊँ । स्वाहा' ॥१९॥

अब सात कपालो का पुरोडाश खेलने वाले मरुतो के लिये देता है । क्योंकि जब इन्द्र वृत्र व मारने के लिये गया तो खेलने वाले मरुत उसके चारो ओर खेलते थे और उसकी प्रशसा करते थ । ऐसे ही वह यजमान के चारो ओर प्रशसा करते हुये खेलते हैं । क्योंकि वह अपने दुष्ट और अहितकर शत्रु को मारने जा रहा है । इसलिये 'खेलने वाले मरुतों' के लिये आहुति दी जाती है । इसके पश्चात् महाहविष् होता है । यह उसी प्रकार है जैसे महाहविष् की अलग आहुति दी जाय ॥२०॥

अध्याय ५—ब्राह्मण ४

महाहविषा ह वै देवा वृत्र जघ्नु । तेनोऽएव व्यजयन्त येयमेषा विजतिस्ता तथोऽएवेष एतेन पाप्मान द्विषन्त भ्रातृव्यश्ं हन्ति तथोऽएव विजयते तस्माद्वाऽएष एतेन यजते ॥१॥

देवों ने वृत्र को महाहवि के द्वारा मारा । उसी से उन्होंने वह विजय प्राप्त की जो उनको मिली हुई है । इसलिये जो इस यज्ञ को करता है वह अपने पापी, अहितकारी शत्रु को मार डालता और उस पर विजय पा लेता है ॥१॥

ब्रह्म च क्षत्रं च क्षत्रं च सयुजौ कृत्वा ताभ्यामेनमुभाभ्यां वीर्याभ्यामघ्नंस्तस्मादैन्द्राग्नो द्वादशकपाल' पुरोडाशो भवति ॥८॥

अथ माहेन्द्रश्चरुर्भवति । इन्द्रो वाऽएष पुरा वृत्रस्य वधादथ वृत्रꣳ हत्वा यथा महाराजो विजिग्यान एव महेन्द्रोऽभवत्तस्मान्माहेन्द्रश्चरुर्भवति महान्तमु चैवैनमेतत्सन्तं करोति वृत्रस्य वधाय तस्माद्वेव माहेन्द्रश्चरुर्भवति ॥९॥

अथ वैश्वकर्मणं एककपाल पुरोडाशो भवति । विश्व वाऽएतत्कर्म कृतꣳ सर्वं जित देवानामासीत्साकमेधे रीजानाना विजिग्यानाना विश्वम्वेतस्यैतत्कर्म कृतꣳ सर्वं चित भवति साकमेधेरीजानस्य विजिग्यानस्य तस्माद्वैश्वकर्मणं एककपाल पुरोडाशो भवति ॥१०॥

एतेन वै देवा । यज्ञेनेष्ट्वा येय देवाना प्रजातिर्या श्रीरेतद्वभूवुरेताꣳ ह वै प्रजाति प्रजायतऽएताꣳ श्रिय गच्छति य एव विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥११॥ ब्राह्मणम् ॥१॥ [५ ४] अध्याय ॥ ५ [१४] ॥

उन्होंने उसे मारा । अग्नि ब्राह्मण है, इन्द्र क्षत्रिय । इन दोनों को मिलाकर अर्थात् ब्रह्म शक्ति और क्षत्र शक्ति को मिला कर उन्होंने उसको इन दो शक्तियों के द्वारा मारा था । इसलिये बारह कपालों का पुरोडाश इन्द्र और अग्नि के लिये हुआ ॥८॥

अब महेन्द्र के लिये चरु होता है । वृत्र के बध से पहले वह केवल इन्द्र था । वृत्र के बध के अनन्तर महेन्द्र हो गया जैसे विजय के पीछे महाराजा । इसलिये महेन्द्र के लिये चरु हुआ । इससे वह वृत्र के मारने के लिये उसको बड़ा (बलिष्ठ) भी कर देता है । इसलिये महेन्द्र के लिये चरु हुआ ॥९॥

अब विश्वकर्मा के लिये एक कपाल का पुरोडाश होता है । देवों ने साकमेध यज्ञ करके और (वृत्र पर) विजय पाकर अपने काम को पूरा कर लिया ('विश्व कृत' का अर्थ है पूरा कर लेना) और सब कुछ जीत लिया । इसी प्रकार जो पुरुष साकमेध यज्ञ कर लेता है और विजय पा लेता है वह अपने काम को पूरा कर लेता है । इसी लिये विश्वकर्मा के लिये एक कपाल का पुरोडाश होता है ॥१०॥

देवों की जो प्रजाति (फूलना फलना) और श्री इस समय है वह सब इसी यज्ञ को करके हुई है । इसी प्रकार जो इस रहस्य को समझ कर इस यज्ञ को करता है उसकी सन्तान फूलती फलती है और उसको श्री भी प्राप्त होती है । इसलिये इस यज्ञ को करे ॥११॥

अध्याय ६—ब्राह्मण १

महाहविषा ह वै देवा वृत्रं जघ्नुः । तेनोऽएव व्यजयन्त येयमेषां विजितिस्तामथ यानेवैषां तस्मिन्त्समाम्नेऽम्रंस्तान्पितृयज्ञेन समैरयन्त पितरो वै तऽआसंस्तस्मात्पितृयज्ञो नाम ॥१॥

तद्वसन्तो ग्रीष्मो वर्षाः । एते ये व्यजयन्त शरद्धेमन्तः शिशिरस्तऽउ ते यान्पुनः समैरयन्त ॥२॥

अथ यदेष एतेन यजते । तद्वाह न्वेवैतस्य तथा कं चन घ्नन्तीति देवा अकुर्वन्निति न्वेवैष एतत्करोति यमु चैवेभ्यो देवा भागमकल्पयंस्तमु चैवेभ्य एष एतद्भागं करोति यानु चैव देवाः समैरयन्त तानु चैवैतदवति स्वानु चैवैतत्पितॄं ह्येयाꣳश्रꣳ लोकमुपोदयति यदु चैवास्यात्मनोऽचरणेन हन्यते वा मीयते वा तदु चैवास्यैतेन पुनराप्यायते तस्माद्वा ऽएष एतेन यजते ॥३॥

स पितृभ्यः सोमवद्भ्यः । षट्कपालं पुरोडाशं निर्वपति सोमाय वा पितृमते षड्वाऽऋतव ऋतवः पितरस्तस्मात्षट्कपालो भवति ॥४॥

अथ पितृभ्यो बर्हिषद्भ्यः । अन्वाहार्यपचने धानाः कुर्वन्ति ततोऽर्धाः पिण्डंपन्त्यर्धा

देवों ने 'महाहवि' के द्वारा ही वृत्र को मारा और उस विजय को पाया जो इस समय उनको प्राप्त है। और जो उनमें वीर उस संग्राम में मारे गये उनको पितृयज्ञ से जिलाया। वे पितर ही तो थे। इसलिये पितृयज्ञ नाम पड़ा ॥१॥

अब वसन्त, ग्रीष्म और वर्षा। यह वे हैं जिन्होंने (वृत्र) को जीता। शरद, हेमन्त और शिशिर यह वह हैं जिनको दुबारा जिलाया ॥२॥

जब वह यह यज्ञ करता है तो इसलिये करता है कि एक तो (असुर) उसके किसी (सम्बन्धी) को न मार सकें, दूसरे चूँकि देवों ने यज्ञ किया था। इसके अतिरिक्त वह इसलिये भी यज्ञ करता है कि देवों ने जिन पितरों के लिये भाग निकाला था वह भाग उन तक पहुँच जाये। इस प्रकार जिनको देवों ने पुनर्जीवित किया उनको सन्तुष्ट करता है। और अपने पितरों को श्रेय लोक तक पहुँचाता है। और जो कुछ हानि या मृत्यु अपने अनुचित आचार से होती उसका प्रतीकार हो जाता है। इसलिये यह यज्ञ करता है ॥३॥

छः कपालों का पुरोडाश 'सोमवन्त पितरों' के लिये होता है। या 'पितृमत सोम' के लिये। छः ऋतुयें होती हैं। ऋतुयें ही पितर हैं। इसलिये छः कपाल होते हैं ॥४॥

अब 'बर्हिषद् पितरों' के लिये अन्वाहार्यपचन (या दक्षिणाग्नि) पर धान भूनते

इत्येव धाना अपिष्टा भवन्ति ता धानाः पितृभ्यो बर्हिषद्भ्यः ॥५॥

अथ पितृभ्योऽग्निष्वात्तेभ्यः । निवान्याये दुग्धे सकृदुपमथित एकशलाकया मन्थो भवति सकृदु ह्येव पराञ्चः पितरस्तस्मात्सकृदुपमथितो भवत्येतानि हवींष्यपि भवन्ति ॥६॥ शतम् १२०० ॥

तद्ये सोमेनेजानाः । ते पितरः सोमवन्तोऽथ ये दत्तेन पक्वेन लोकं जयन्ति ते पितरो बर्हिषदोऽथ ये ततो नान्यतरच्चन यानग्निरेव दहन्त्स्वदयति ते पितरोऽग्निष्वात्ता एत उते ये पितरः ॥७॥

स जघनेन गार्हपत्यम् । प्राचीनावीतीभूत्वा दक्षिणासीन एतꣳ षट्कपालं पुरोडाशं गृह्णाति स तत एवोपोत्थायोत्तरेणान्वाहार्यपचनं दक्षिणा तिष्ठन्नवहन्ति सकृत्फलीकरोति सकृदुह्येव पराञ्चः पितरस्तस्मात्सकृत्फलीकरोति ॥८॥

स दक्षिणैव द्रपदुपलेऽवपदधाति । दक्षिणार्धे गार्हपत्यस्य षट्कपालान्युपदधाति तद्यदेतां दक्षिणां दिशꣳ सचन्तऽएषा हि दिक् पितॄणां तस्मादेतां दक्षिणां दिशꣳ सचन्ते ॥९॥

अथ दक्षिणेनान्वाहार्यपचनं चतुःस्रक्ति वेदिं करोत्यवान्तरदिशोऽनु सक्तीः

हैं। आधे धान पीस लेते हैं और आधे बिना पिसे होते हैं। यह 'बर्हिषद् पितरों' के लिये धान होते हैं ॥५॥

अब 'अग्नि-ष्वात्ता पितरों' के लिये हवि को बनाते हैं। इस प्रकार कि (पिसे हुये धानों में) अन्य के बछड़े को पिलाने वाली गाय का दूध मिलाकर और उसे एक शलाका से एक बार ही हिला कर बनाते हैं। पितर एक बार ही परलोक को चले गये इसलिये एक ही बार चलाते हैं; यह हवियाँ हुईं ॥६॥

जिन्होंने सोम यज्ञ किया था वह हुये 'सोमवन्त पितर'। और जो दिये हुये पके अन्न से लोक को जीतते हैं वे हुये 'बर्हिषद् पितर'। और जिन्होंने न यह किया न वह और जिनको अग्नि ने जला दिया वे हुये 'अग्नि-ष्वात्ता'। ये पितर हुये ॥७॥

वह छः कपालों के पुरोडाश के लिये (चावल) गार्हपत्य के पीछे दक्षिण की ओर बैठ कर और दाहिने कंधे पर सामने की ओर जनेऊ रखकर निकालता है। यहाँ से उठकर अन्वाहार्यपचन के उत्तर की ओर खड़ा होकर दक्षिण की ओर मुख किये हुये पलोटता है। उनको एक ही बार साफ़ करता है ॥८॥

दक्षिण की ओर ऊपर और उपल (चाकी के पाट) को रखता है और गार्हपत्य के दक्षिण भाग में छः कपालों को रखता है। दक्षिण दिशा में इसलिये रखते हैं कि दक्षिण दिशा पितरों की है। इसलिये दक्षिण दिशा की ओर रखते हैं ॥९॥

अब दक्षिणाग्नि के दक्षिण की ओर एक चौकोर वेदि बनाता है, जिसके कोने

करोति चतस्रो वाऽअवान्तरदिशोऽवान्तरदिशो वै पितरस्तस्मादवान्तरदिशोऽनु सक्षीः करोति ॥१०॥

तन्मध्येऽग्निꣳसमादधाति । पुरस्ताद्वै देवाः प्रत्यञ्चो मनुष्यानभ्युपावृत्तास्तस्मात्तेभ्यः प्राङ् तिष्ठन्नुहोति सर्वतः पितरोऽवान्तरदिशो वै पितरः सर्वत इव हीमा अवान्तरदिशस्तस्मान्मध्येऽग्निꣳ समादधाति ॥११॥

स तत एव प्राक् स्तम्बयजुर्हरति । स्तम्बयजुर्हृत्वाथेत्येवाग्रे परिगृह्यत्यथेत्यथेति पूर्वेण परिग्रहेण परिगृह्य लिखति हरति यदार्यं भवति स तथैवोत्तरेण परिग्रहेण परिगृह्यत्युत्तरेण परिग्रहेण परिगृह्य प्रतिमृज्याह प्रोक्षणीरासादयेत्यासादयन्ति प्रोक्षणीरिध्म बर्हिरुपसादयन्ति स्रुच समार्ष्टर्ज्येनोदेति स यज्ञोपवीती भूत्वाज्यानि गृह्णाति ॥१२॥

तदाहुः । द्विरुपभृति गृह्णीयाद्द्वौ ह्यत्रानुयाजौ भवत इति तद्धुतमेव कृत्व उपभृति गृह्णीयान्नेयज्ञस्य विधाया अयानीति अयानीति तस्मादुतमेव कृत्व उपभृति गृह्णीयादाज्यानि गृहीत्वा स पुन प्राचीनावीती भूत्वा ॥१३॥

प्रोक्षणीरध्वर्युरादत्ते । स इध्ममेवाग्रे प्रोक्षत्यथ वेदिमथास्मै बर्हिः प्रयच्छन्ति अवान्तर दिशाओं की ओर होते हैं । अवान्तर दिशा चार हैं और अवान्तर दिशा ही पितर हैं । इसलिये वेदि के कोने अवान्तर दिशाओं की ओर होते हैं ॥१०॥

इसके मध्य में अग्नि को रखता है । देव पूर्व से पश्चिम को मनुष्यों तक आये । इसलिये पूर्व की ओर मुख करके खडा होकर आहुति देता है । पितर सभी ओर हैं । अवान्तर दिशा ही पितर है । इसलिये वह अग्नि को मध्य में रखता है ॥११॥

वहाँ से वह स्तम्बयजु (कुश) को पूर्व की ओर फेंकता है । अब कुशों से वेदी को घेरता, है पहले इस प्रकार (पश्चिम की ओर), फिर इस प्रकार (उत्तर की ओर), फिर इस प्रकार (पूर्व की ओर) । पहली लकीर (या पंक्ति) से घेर कर (अध्वर्यु) रेखा खींचता है । और जो कुछ हटाना होता है उसे हटा देता है । अब वह दूसरी लकीर से घेरता है और दूसरी लकीर से घेर कर और चिकना कर कहता है, 'प्रोक्षणी को रख' । अतः वे प्रोक्षणी को रखते हैं । और समिधा और बर्हि को वह उसके पास रखते हैं । वह मुखों को पोंछता है । और घी लेकर आता है । वह यज्ञोपवीत पहने पहने ही घी को लेता है ॥१२॥

इस सम्बन्ध में कुछ लोग कहते हैं कि अनुयाज दो होते हैं इसलिये उपभृति में दो बार घी ले । परन्तु उसे आठ बार करके घी लेना चाहिये । कहीं ऐसा न हो कि वह यज्ञ की विधि से दूर हो जाय । इसलिये आठ बार करके घी लेवे । घी लेकर और जनेऊ को दाहिने कन्धे पर करके ॥१३॥

अध्वर्यु प्रोक्षणी रखता है । पहले समिधा पर जल छिडकता है, फिर वेदी पर । अब

तत्पुरस्ताद्मन्थ्यासादयति तत्प्रोक्ष्योपनिनीय विस्रश्सस्य ग्रन्थिं न प्रस्तरं गृह्णाति सकृदु ह्येव पराञ्चः पितरस्तस्मान्न प्रस्तरं गृह्णाति ॥१४॥

अथ संनहनमनुविस्रश्संस्य । अपसलवि त्रिः परिस्तृणन्पर्येति सोऽपसलवि त्रिः परिस्तीर्य यावत्प्रस्तर भाजनं तावत्परिशिनष्टयथ पुनः प्रसलवि त्रिः पर्येति यत्पुनः प्रसलवि त्रिः पर्येति तद्यानेवामंस्तयान्पितॄनन्ववागात्तेभ्य एवैतत्पुनरपोदेतीमश्च स्वं लोकमभि तस्मात्पुनः प्रसलवि त्रिः पर्येति ॥१५॥

स दक्षिणैव परिधीन्परिदधाति । दक्षिणा प्रस्तरश्चं स्तृणाति नान्तर्दधाति विधृति सकृदु ह्येव पराञ्चः पितरस्तस्मान्नान्तर्दधाति विधृती ॥१६॥

स तन जुहूमासादयति । अथ पूर्वमुपभृत्तमथ ध्रुवामथ पुरोडाशमथ धाना अथ मन्थमासाद्य हवीश्सपि संमृशति ॥१७॥

ते सर्वऽएव यज्ञोपवीतिनो भूत्वा । इत्थाद्यजमानश्च ब्रह्मा च पश्चात्परीतः पुरस्तादग्नीत् ॥१८॥

तेनोपाश्शु चरन्ति । तिर इव वै पितरस्तिर इवैतद्यदुपाश्शु तस्मादुपाश्शु चरन्ति ॥१९॥

वह बर्हि को उसे देते हैं। और वह बर्हि को पूर्व की ओर गाँठ करके रखता है। अब उस पर जल छिड़क कर, गाँठ को खोलकर वह गाँठ को पकड़ता है, न कि प्रस्तर को। पितर एक बार ही चले गये इसलिये वह प्रस्तर को नहीं लेता ॥१४॥

(बर्हि के मुट्ठे को) खोल कर वह दाहिनी ओर से बाईं ओर को तीन बार घूमता है (वेदि पर) बर्हि को फैलाता हुआ। दाहिनी ओर से बाईं ओर को तीन तहों में फैलाकर वह इतने कुश बचा लेता है कि प्रस्तर बन सके। अब वह तीन बार बाईं ओर से दाहिनी ओर को मुड़ता है। वह तीन बार बाईं ओर से दाहिनी ओर को इसलिये मुड़ता है कि पहले वह अपने तीन पितरों के पीछे गया था अब वह फिर अपने लोक को वापिस आ जाता है। इसलिये वह तीन बार बाईं ओर से दाहिनी ओर को मुड़ता है ॥१५॥

वह परिधियों को दक्षिण की ओर रखता है। और प्रस्तर को भी दक्षिण की ओर रखता है। दो विधृतियों को बीच में नहीं रखता। पितर एक बार ही परलोक को सिधार गये। इसलिये दो विधृतियों को बीच में नहीं रखता ॥१६॥

अब वह जुहू को रखता है और उसके पूर्व को उपभृत को। अब ध्रुवा पुरोडाश, धान, मन्थ को रखकर हवियों को छूता है ॥१७॥

यह सब यज्ञोपवीती होकर यजमान और ब्रह्मा इस प्रकार पश्चिम को चलते हैं और अग्नीध् पूर्व को ॥१८॥

वे इसको धीरे धीरे करते हैं। पितर भी छिपे हुये हैं और जो धीरे-धीरे पढ़ा जाय वह भी छिपे के ही समान है। इसलिये धीरे-धीरे ही पढ़ते हैं ॥१९॥

परिवृते चरन्ति । तिर इव वै पितरस्तिर इवैतद्यत्परिवृतं तस्मात्परिवृते चरन्ति ॥२०॥

अथेध्ममभ्यादधदाह । अग्नये समिध्यमानायानु ब्रूहीति स एकामेव होता सामिधेनीं निरूवाह सकृदु ह्येव पराञ्चः पितरस्तस्मादेकाथ्ं होता सामिधेनीं निरूवाह ॥२१॥

सोऽन्वाह । उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि । उशन्नुशत आवह पितॄन्हविषेऽअत्तवेऽइत्यथाग्निमावह सोमंमावह पितन्त्सोमवत आवह पितॄन्बर्हिषद आवह पितॄनग्निष्वात्तानावह देवाꣳऽआज्यपांꣳऽआवहाग्निꣳ होत्रायावह स्वं महिमानमावहेत्याह्वोपविशति ॥२२॥

अथाश्राव्य न होतारं प्रवृणीते । पितृयज्ञो वाऽअयं नेद्धोतारं पितृषु दधानीति तस्मान्न होतारं प्रवृणीते सीद होतरित्येवाहोपविशति होता होतृषदनऽउपविश्य प्रसौति प्रसूतोऽध्वर्युः स्रुचावादाय प्रत्यङ्ङतिक्रामत्यतिक्रम्याश्राव्याह समिधो यजेति सोऽपबर्हिपश्चतुरः प्रयाजान्यजति प्रजा वै बर्हिनेत्प्रजाः पितृषु दधानीति तस्मादपबर्हिपश्चतुरः प्रयाजा-

वह इस यज्ञ को घिरे हुये स्थान मे करते हैं। पितर छिपे हुये हैं और जो घिरे स्थान मे किया जाता है वह भी छिपे के तुल्य है ॥२०॥

अब वह समिधो को रखकर कहता है, 'जलती हुई आग के लिये यह'। होता एक सामिधेनी ऋचा को तीन बार पढ़ता है। पितर लोग एक ही बार परलोक को चले गये, इसलिये एक ही सामिधेनी ऋचा को तीन बार पढ़ता है ॥२१॥

यह जपता है, 'उशन्तस्त्वा नि धीमहि। उशन्तः समिधीमहि। उशन्नुशतः ऽआ वह पितॄन् हविषेऽअत्तवे' (यजु० १६।७०)। 'प्रेम से हम तुझको रखते हैं। प्रेम से तुझे प्रज्वलित करते हैं। हे प्यारे, प्यारे पितरों को हवि खाने के लिये ला'। अब कहता है, 'अग्नि को ला, सोम को ला, सोमवन्त पितरों को ला। बर्हिषद् पितरों को ला, अग्निष्वात्ता पितरों को ला। घी पीने वाले देवों को ला, होना के लिये अग्नि को ला, अपनी महिमा को ला'। इस प्रकार बुलाकर वह बैठ जाता है ॥२२॥

अब 'श्रौषट्' करने के पश्चात् यह होता का वरण नहीं करता। यह पितृयज्ञ है। ऐसा न हो कि होता को पितरों के हवाले कर दे इसलिये होता का वरण नहीं करता। केवल यह कहकर कि, 'होता, बैठ', बैठ जाता है। होता होता-के-आसन पर बैठकर (अध्वर्यु को) प्रेरणा करता है। प्रेरित होकर अध्वर्यु दो स्रुवों को लेता है और पश्चिम की ओर जाता है। और जाकर 'श्रौषट्' कहकर करता है, 'समिधो यज' (समिधों का यज्ञ कर)। बर्हि को छोड़कर चार प्रयाजों को करता है। बर्हि प्रजा है। ऐसा न हो कि प्रजा पितरों के हवाले हो जाय इसलिये बर्हि को छोड़कर चार प्रयाजों को करता है। अब दो आज्य भागों

न्यजत्यथाज्यभागाभ्यां चरन्त्याज्यभागाभ्यां चरित्वा ॥२३॥

ते सर्वऽएव प्राचीनावीतिनो भूत्वा । एतैर्वै हविर्भिः प्रचरिष्यन्त इत्याघजमानश्च ब्रह्मा च पुरस्तात्परीतः पश्चादग्नीत्तदुताश्रावयन्त्यो३श्रौ३ स्वधेत्यस्तु स्वधेति प्रत्याश्रावणꣳ स्वधा नम इति वषट्कारः ॥२४॥

तदुहोवाचासुरिः । आश्रावयेयुरेव प्रत्याश्रावयेयुर्वषट् कुर्युर्नेघ्नस्य विधाया अयामेति ॥२५॥

अथाह पितृभ्यः सोमवद्भ्योऽनुब्रूहीति सोमाय वा पितृमते स द्वे पुरोऽनुवाक्येऽअन्वाहैकया वै देवान्प्रच्यावयन्ति द्वाभ्यां पितॄन्त्सकृदु ह्येव पराञ्चः पितरस्तस्माद्द्वेव पुरोऽनुवाक्येऽअन्वाह ॥२६॥

स उपस्तृणीतऽआज्यम् । अथास्य पुरोडाशस्यावद्यति स तेनैव सह धानानां तेन सह मन्थस्य तत्सकृदवदधात्यथोपरिष्टाद्द्वेवराज्यस्याभिघारयति प्रत्यनक्तवदानानि नातिक्रामतीत एवोपोत्थायाश्राव्याह पितॄन्त्सोमवतो यजेति वषट्कृते जुहोति ॥२७॥

अथाह पितृभ्यो बर्हिषद्भ्योऽनुब्रूहीति । स उपस्तृणीतऽआज्यमथासा धानानामवद्यति स तेनैव सह मन्थस्य तेन सह पुरोडाशस्य तत्सकृदवदधात्यथोपरिष्टाद्द्विरा-

को देते हैं और उनको देकर—॥२३॥

वह अपने जनेऊ को दाहिने कन्धे पर कर लेते हैं क्योंकि इन हवियों को देने की इच्छा कर रहे हैं। यजमान और ब्रह्मा इस प्रकार करके (पश्चिम से) पूर्व की ओर मुड़ते हैं, और आग्नीध्र (पूर्व से) पश्चिम की ओर। आगे (अध्वर्यु) औपट् में कहते हैं 'ओ३म् ! सुधा'। (आग्नीध्र) उत्तर देता है, 'अस्तु सुधा'। और वषट्कार है 'स्वधा नमः' ॥२४॥

इस पर आसुरि ने कहा, 'औपट् कहो' और उत्तर में औपट् कहना चाहिये। और वषट्कार बोलना चाहिये। कहीं ऐसा न हो कि यज्ञ की विधि से हम हट जायँ ॥२५॥

तब (अध्वर्यु) कहता है, 'सोमवन्त पितरों को बुलाओ'। सोमवन्त पितरों के लिये (होता) दो अनुवाक्य बोलता है, एक अनुवाक्य देवों के लिये बोला जाता है और दो पितरों के लिये। पितर एक बार ही परलोक को सिधार गये, इसलिये पितरों के लिये दो अनुवाक्य हुये ॥२६॥

अब घी को फैलाता है। अब पुरोडाश में से टुकड़ा काटता है। और साथ ही धान और मन्थ। यह सब एक ही साथ (जुहू में) रख देता है। दो बार घी छोड़ता है और टुकड़ों को फिर चुपड़ता है। वह दक्षिण को जाता नहीं किन्तु उठकर और औपट् कहकर कहता है, 'पितॄन् सोमवतो यज'। और वषट्कार के पश्चात् आहुति दे देता है ॥२७॥

अब कहता है, 'बर्हिषद् पितरों को बुलाओ'। अब घी को फैलाता है। और धानों में से एक टुकड़ा लेकर मन्थ तथा पुरोडाश के साथ एक ही बार (जुहू में) रख देता है। दो बार घी छोड़ता है और उन टुकड़ों को चुपड़ता है। वह जाता नहीं किन्तु उठकर और

ज्यस्याभिघारयति प्रत्यनक्तघवदानानि नातिक्रामतीत एवोपोत्थायाश्राव्याह पितृन्वहिषदो यजेति वषट्कृते जुहोति ॥२८॥

अथाह पितृभ्योऽग्निष्वात्तेभ्योऽनुब्रूहीति । स उपस्तृणीतऽआज्यमथास्य मन्थस्यावद्यति स तेनैव सह पुरोडाशस्य तेन सह धानाना तत्सकृदवदधात्यथोपरिष्टाद्द्विराज्यस्याभिघारयति प्रत्यनक्तघवदानानि नातिक्रामतीत एवोपोत्थायाश्राव्याह पितृनग्निष्वात्तान्यजेति वषट्कृते जुहोति ॥२९॥

अथाहाग्नये कव्यवाहनायानुब्रूहीति । तत्स्विष्टकृते हव्यवाहनो वै देवाना कव्यवाहनः पितृणा तस्मादाहाग्नये कव्यवाहनायानुब्रूहीति ॥३०॥

स उपस्तृणीतऽआज्यम् । अथास्य पुरोडाशस्यावद्यति स तेनैवतस धानाना तेन सह मन्थस्य तत्सकृदवदधात्यथोपरिष्टाद्द्विराज्यस्याभिघारयति न प्रत्यनक्तघवदानानि नातिक्रामतीत एवोपोत्थायाश्राव्याहाग्निं कव्यवाहन यजेति वषट्कृते जुहोति ॥३१॥

स यन्नातिक्रामति । इत एवोपोत्थायं जुहोति सकृदु ह्येव पराचः पितरोऽथ यत्सकृत्सकृत्सर्वेपाश्च हविषाश्च समवद्यति सकृदु ह्येव पराच्चः पितरोऽथ यद्वषतिपक्षमेव 'ओषट्' कहकर कहता है, 'बर्हिषद् पितरों के लिये हवि दो', और वषट्कार के पश्चात् आहुति दे देता है ॥२८॥

अब कहता है, 'अग्निष्वात्ता पितरों को बुलाओ' । घी को फैलाता है । मन्थ में से एक टुकड़ा काटता है । और धान और पुरोडाश के साथ एक ही बार में (जुहू में) रख देता है । दो बार ऊपर से घी छोड़ता है, फिर उन टुकड़ों को चुपड़ता है । वह चलता नहीं किन्तु उठकर 'ओषट्' कह कर कहता है, 'अग्निष्वात्ता पितरों के लिये आहुति दो' । फिर वषट्कार के पश्चात् आहुति दे देता है ॥२९॥

अब कहता है, 'कव्यवाहन अग्नि को बुलाओ' । यह स्विष्टकृत् अग्नि के लिये कहा । यह देवों के लिये हव्यवाहन है और पितरों के लिये कव्यवाहन, इसलिये 'कव्यवाहन अग्नि के लिये' ऐसा कहा ॥३०॥

अब यह घी को फैलाता है । पुरोडाश में से टुकड़ा काटता है और धान और मन्थ के साथ (जुहू में) रख देता है । दो बार घी छोड़ता है और टुकड़ों को चुपड़ता नहीं, न चलता है, किन्तु उठकर और 'ओषट्' कह कर कहता है, 'कव्यवाहन अग्नि के लिये आहुति दो' और वषट्कार के पश्चात् आहुति दे देता है ॥३१॥

यह चलता क्यों नहीं और उठकर ही आहुति क्यों दे देता है ? इसका कारण यह है कि पितर लोग एक बार ही परलोक को चले गये । और हविर्यों में से एक ही टुकड़ा क्यों काटता है ? इसलिये कि पितर एक ही बार परलोक को चले गये । और टुकड़ों को काटकर एक साथ क्यों रखता है ? इसलिये कि आधे ही पितर हैं । इस प्रकार यह आहुति

दानान्यवद्यत्यृतवो वै पितर ऋतूनेवैतद्व्यतिपद्यत्यृतून्त्संदधाति तस्माद्व्यतिपन्नमवदाना न्यवद्यति ॥२२॥

तद्वैके । एतमेव होत्रे मन्थमादधति तꣳ होतोपहूयावैव जिघ्रति तं ब्रह्मणे प्रयच्छति तं ब्रह्मावैव जिघ्रति तमग्नीधे प्रयच्छति तमग्नीदवैव जिघ्रत्येतन्वेवैतदुर्वन्ति यथा खल्वेतरस्य यज्ञस्येडाप्राशित्रꣳ समनक्त्येवमेवैतस्यापि समक्तेयुस्तामुपहूयावैव जिघ्रन्ति न प्राश्नन्ति प्राशितव्य खल्वेव वय मन्यामह इति ह स्माहासुर्यस्य कस्य चाग्नौ जुह्वतीति ॥२३॥

अथ यतरो दास्यन्मन्यते । यदध्वर्युर्वा यजमानो वा स उदपात्रमादायापसलवि त्रि॰ परिषिञ्चन्पर्येति स यजमानस्य पितरमवनेजयत्यसाववनेनिक्ष्वेत्यसाववनेनिक्ष्वेति पितामहम॰ साववनेनिक्ष्वेति प्रपितामह तद्यथाशिष्यतेऽभिषिञ्चेदेव तत् ॥२४॥

अथास्य पुरोडाशस्यावदाय । सव्ये पाणौ कुरुते धानानामवदाय सव्ये पाणौ कुरुते मन्थस्यावदाय सव्ये पाणौ कुरुते ॥२५॥

स येमामनान्तरदिशमनु सक्तिः । तस्या यजमानस्य पित्रे ददात्यसावेतत्तऽइत्यथ

को मिलाकर रखता है । ऋतुओं में सधि करता है । इसलिये इन टुकड़ों को एक साथ रखता है ॥२२॥

कुछ लोग सब मन्थ को होता को दे देते हैं । होता उसका आवाहन करके सूघता है, और ब्रह्मा को दे देता है । उसे ब्रह्मा सूँघता है । और आग्नीध्र को देता है । आग्नीध्र भी उसे सूघता है । वे ऐसा करते हैं । दूसरे यज्ञों में इडा को काटते हैं । इसमें भी काटना चाहिये । (इडा का) आवाहन करके सूघते हैं, खाते नहीं । परन्तु आसुरि की सम्मति है कि 'हमारा विचार है कि जो कुछ अग्नि में डाला जाय उसका कुछ भाग खाना भी चाहिये' ॥२३॥

अब जो हवि देने वाला हो, चाहे अध्वर्यु, चाहे यजमान, वह पानी का बर्तन लेकर तीन बार दाहिनी से बाईं ओर को पानी छिड़कता हुआ चलता है । वह यजमान के (पितरों) के लिये 'असौ अवनेनिक्ष्व' (आप धोवें) इस प्रकार दो बार कहकर पानी डालता है । और 'आप धोवें, आप धोवें' कहकर नाना (पितामह) के लिये (दक्षिण पश्चिमी कोने में), फिर परनाना (प्रपितामह) के लिये 'आप धोवें, आप धोवें' कहकर दक्षिण पूर्व कोने में । जैसे अतिथि को सत्कार के लिये जल देते हैं उसी प्रकार यहाँ भी ॥२४॥

अब पुरोडाश में से एक टुकडा काटकर बायें हाथ मे लेता है । घानों में से भी एक भाग काटकर बायें हाथ म लेता है । और मन्थ में से भी एक टुकडा काटकर बायें हाथ में लेता है ॥२५॥

अब वह अवान्तर दिशा के सामने (उत्तर-पश्चिम की ओर) यजमान के बाप के लिये देता है, यह कह कर कि 'यह तुम्हारे लिये' । और इस अवान्तर दिशा के सामने

येमामवान्तरदिशमनु स्वक्तिस्तस्यां यजमानस्य पितामहाय ददात्यसावेतत्त इत्यथ येमामवान्तरदिशमनु स्वक्तिरतस्या यजमानस्य प्रपितामहाय ददात्यसावेतत्त इत्यथ येमामवान्तरदिशमनु स्वक्तिरतस्या निमृष्टेऽत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति यथाभागमश्नीतेत्येवैतदाह तद्यदेवं पितृभ्यो ददामि तेनो स्वान्पितॄनेतस्माद्यज्ञान्तरेति ॥३६॥

ते सर्वेऽएव यज्ञोपवीतिनो भूत्वा। उदञ्च उपनिष्क्रम्याहवनीयमुपतिष्ठन्ते देवान्वाऽएष उपावर्तते य आहिताग्निर्भवति यो दर्शपूर्णमासाभ्यां यजतेऽथैतत्पितृयज्ञेनेवाचरिष्यंस्तदु देवेभ्यो निह्नुवते ॥३७॥

ऐन्द्रीभ्यामाहवनीयमुपतिष्ठन्ते। इन्द्रो ह्याहवनीयोऽक्तनमीमदन्त ह्यव प्रिया अधूषत। अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी॥ सुसंदृशं त्वा वयं मघवन्वन्दिषीमहि। प्र नूनं पूर्णवन्धुर स्तुतो यासि वशाऽ२॥अनु योजान्विन्द्र ते हरीऽ इति ॥३८॥

अथ प्रतिपरेत्य गार्हपत्यमुपतिष्ठन्ते। मनो न्वाह्वामहे नाराशंसेन स्तोमेन। (दक्षिण पश्चिम की ओर) यजमान के बाबा के लिये, यह कहकर कि 'यह तुम्हारे लिये'। और इस अवान्तर दिशा के सामने (दक्षिण-पूर्व की ओर) यजमान के पर-बाबा के लिये यह कहकर कि 'यह तुम्हारे लिये'। और इस अवान्तर दिशा के सामने (उत्तर-पूर्व की ओर) इस मन्त्र से (हाथ) धोता है। 'अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्' (यजु० २।३२)। 'हे पितरो यहाँ खाओ। बैल के समान अपने-अपने भागों को'। इसका तात्पर्य यह है कि 'आप अपना-अपना भाग खाइये'। वह इस प्रकार पितरों को क्यों खिलाता है? इसलिये कि अपने पितरों को यज्ञ से वंचित नहीं करता ॥३६॥

अब वे सब यज्ञोपवीत धारण किये हुये उत्तर की ओर जाकर आहवनीय के (उत्तर को) खड़े होते हैं। जो आहिताग्नि होकर दर्श-पूर्णमास यज्ञ करता है वह देवों का निकटवर्ती होता है। परन्तु यह अभी पितृ-यज्ञ कर रहे थे। इसलिये अब यह देवों को सन्तुष्ट करते हैं ॥३७॥

अब वे इन्द्र सम्बन्धी दो मन्त्रों को पढ़कर आहवनीय के पास खड़े होते हैं—'अक्तनमीमदन्त ह्यव प्रियाऽअधूषत। अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी। सुसंदृशं त्वा वयं मघवन् वन्दिषीमहि। प्र नूनं पूर्णवन्धुर स्तुतो यासि वशाऽ२अनु योजा न्विन्द्र ते हरी' (यजु० ३।५१,५२ या ऋ० १।८२।२,३)। 'प्यारों ने खा लिया। वे सन्तुष्ट हो गये। और उन्होंने (अपने को भर डाला। प्रकाशयुक्त विप्रों ने स्तुति की—'हे इन्द्र अपने दोनों घोड़ों को जोत'। 'हे इन्द्र, तुझ उत्तम की हम स्तुति करेंगे'। इस प्रकार स्तुति किया गया तू अपने रथ में हमारी इच्छा के अनुसार आ'। 'हे इन्द्र तू अपने दोनों घोड़ों को जोत' ॥३८॥

अब वे गार्हपत्य तक लौटते हैं और खड़े होकर इन मन्त्रों को पढ़ते हैं, 'मनो न्वाह्वा-

पितृणां च मन्मभिः ॥ आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक्च सूर्यं दृशे ॥ पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातꣳ सचेमहीति पितृयज्ञेनेव वाऽएतच्चारिष्टस्तदु खलु पुनर्जीवानपिपद्यन्ते तस्मादाह जीवं व्रातꣳ सचेमहीति ॥३६॥

अथ यतरो ददाति । स पुनः प्राचीनावीती भूत्वाभिप्रपद्य जपत्यमी मदन्त पितरो यथाभागमावृषायिषतेति यथाभागमाशिषुरित्येवैतदाह ॥४०॥

अथोदपात्रमादाय । पुनः प्रसलवि त्रिः परिषिञ्चन्पर्येति स यजमानस्य पितरमवनेजयत्यसाववनेनिक्ष्वेत्यसाववनेनिक्ष्वेति पितामहमसाववनेनिक्ष्वेति प्रपितामहतंवथा जघनेऽभिषिञ्चदेवं तत्तद्यत्पुनः प्रसलवि त्रिः परिषिञ्चन्पर्येति प्रसलवि न इदं कर्मानुसंतिष्ठाताऽइति तस्मात्पुनः प्रसलवि त्रिः परिषिञ्चन्पर्येति ॥४१॥

अथ नीविमुद्वृह्य नमस्करोति । पितृदेवत्या वै नीविस्तस्मान्नीविमुद्वृह्य नमस्करोति यज्ञो वै नमो यज्ञियानेवैनानेतत्करोति षट्कृत्वो नमस्करोति षड् वाऽऋतव ऋतवः

महे नाराशꣳसेन स्तोमेन । पितृणां च मन्मभिः ॥ आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक् च सूर्यं दृशे ॥ पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातꣳसचेमहि' । (यजु० ३।५३,५४,५५ । या ऋग्वेद १०।५७।३,४,५) । 'हम नाराशंसी स्तोम के द्वारा मन का आवाहन करते हैं, और पितरों के स्तोम से । हमारे पास बुद्धि, शक्ति और जीवन के लिये मन फिर आवे कि हम बहुत दिनों तक सूर्य के दर्शन करें' । 'हे पितरो, दैव्य जन हम को फिर मन दें, कि हम जीवित लोगों के साथ रह सकें' । अब तक वे पितृ-यज्ञ कर रहे थे । अब वे फिर जीवन को लौटते हैं । इसीलिये कहा, 'हम जीवित लोगों के साथ रह सकें' ॥३६॥

अब जिसने (पिण्ड) दिया था वह फिर दाहिने कन्धे पर जनेऊ रखकर यह मन्त्र जपता है, 'अमीमदन्त पितरो यथाभागमावृषायिषत' (यजु० २।३१) । 'पितरों ने खा लिया । बैलों के समान यह अपने-अपने भाग को ले गये' । इससे तात्पर्य यह है कि उन्होंने अपना अपना भाग खाया ॥४०॥

अब यह जल के पात्र को लेता है और छिड़कता हुआ फिर तीन बार बाईं ओर से दाहिनी ओर को लौटता है । और 'आप धोइये' यह कहकर यजमान के पिता के लिये जल छोड़ता है । 'आप धोइये' यह कहकर यजमान के बाबा के लिये । 'आप धोइये' यह कहकर यजमान के पर-बाबा के लिये । जैसे अतिथि के सत्कार के लिये जो खाना खाता है, जल दिया जाता है वैसे ही यहाँ भी किया जाता है । और तीन बार बाईं ओर से दाहिनी ओर जल छिड़कते हुये चलने के विषय में वह सोचता है, कि हमारा यह काम इसी प्रकार (?) पूरा हो जायगा' । इसलिये वह तीन बार बाईं ओर जल छिड़कता हुआ चलता है ॥४१॥

अब नीवि अर्थात् धोती के निचले भाग को नीचे खींचकर नमस्कार करता है । नीवि पितरों की है इसलिये उसे खींचकर नमस्कार करता है । नमस्कार यह है । इस प्रकार

पितरस्तद्वतुष्वेनेतद्यज्ञं प्रतिष्ठापयति तस्मात्षट् कृत्वो नमस्करोति गृहान्नः पितरो दत्तेति गृहाणाश्ँ ह पितर ईशतऽएषोऽएतस्याशीः कर्मणः ॥४२॥

ते सर्वेऽएव यज्ञोपवीतिनो भूत्वा। अनुयाजाभ्यां प्रचरिष्यन्त इत्थायजमानश्च ब्रह्मा च पश्चात्परीतः पुरस्तादग्नीदुपविशति होता होतृषदने ॥४३॥

अथाह ब्रह्मन्प्रस्थास्यामि। समिधमाधायाग्निमग्नीत्समृद्धीति स्रुचावादाय प्रत्यङ्ङतिक्रामत्यतिक्रम्याश्राव्याह देवान्यजेति सोऽपबर्हिषौ द्वावनुयाजौ यजति प्रजा वै बर्हिनेत्प्रजाः पितृषु दधानीति तस्मादपबर्हिषौ द्वावनुयाजौ यजति ॥४४॥

अथ सादयित्वा स्रुचौ व्यूहति। स्रुचौ व्यूह्य परिधीन्त्समज्य परिधिमभिघार्याश्राव्याहेषिता देव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकायेति सूक्तवाकश्ँ होता प्रतिपद्यते नाध्वर्युः प्रस्तरश्ँ समुल्लुम्पतीत्येवोपास्ते यदा होता सूक्तवाकमाह ॥४५॥

अथाग्नीदाहानुप्रहरेति। स न किं चनानुप्रहरति तूष्णीमेवात्मानमुपरिस्पृशति ॥४६॥

अथाह संनदस्वेति। अगानग्नीदगच्छावय श्रौषट् स्वगा देव्या होतृभ्यः स्वस्तिर्मानुवह उनको यज्ञ का अधिकारी बनाता है। छः बार नमस्कार करता है। क्योंकि छः ऋतुयें होती हैं। ऋतुयें पितर हैं। इस प्रकार ऋतुओं में ही इस यज्ञ की स्थापना करता है। इसलिये छः बार नमस्कार करता है। अब कहता है, 'पितरो! हमको घर दो'। क्योंकि पितर घर के रक्षक हैं, और इस यज्ञ में यह आशीर्वाद है ॥४२॥

वे सब यज्ञोपवीत धारण करके (बायें कन्धे पर जनेऊ लाकर) तैयारी करते हैं। इस प्रकार यजमान और ब्रह्मा पश्चिम की ओर आते हैं और आग्नीध्र पूर्व की ओर। और होता होता के स्थान पर बैठ जाता है ॥४३॥

अब वह कहता है, 'हे ब्रह्मा! मैं आगे चलूँगा'। अब वह समिधा रखकर कहता है, 'आग्नीध्र! आग ठीक कर'। अब दोनों स्रुकों को लेकर पश्चिम की ओर जाता है। वहाँ जाकर और 'श्रौषट्' कहकर कहता है, 'देवों के लिये आहुति दे'। वह दो अनुयाज देता है, बर्हि का अनुयाज छोड़कर। बर्हि प्रजा है। इसलिये बर्हि का अनुयाज छोड़कर दो अनुयाज ही करता है जिससे प्रजा पितरों के हवाले न हो जाय ॥४४॥

अब दोनों स्रुकों को रखकर अलग-अलग कर देता है। उनको अलग करके और परिधियों को घी में मिगोकर एक परिधि को लेता है और 'श्रौषट्' कहकर कहता है, 'भद्र कहने के लिये दिव्य होता बुलाये गये और स्तुति के लिये मनुष्य होता बुलाया गया। होता सूक्तवाक या स्तुति कहता है। अध्वर्यु प्रस्तर को नहीं उठाता। केवल देखता रहता है जब कि होता स्तुति करता है ॥४५॥

अब आग्नीध्र कहता है, 'छोड़'। अध्वर्यु कुश छोड़ता नहीं। केवल चुपचाप अपने शरीर को छू लेता है ॥४६॥

अब आग्नीध्र कहता है, 'सन्नद्ध कर'। अध्वर्यु पूछता है, 'हे आग्नीध्र! वह गया'?

पेभ्यः शं योर्नूहीत्युपस्पृशत्येव परिधीनानुप्रहरत्यथैतद्बर्हिरनुसमस्यति परिधींश्च ॥४७॥

तदैके । हविरुच्छिष्टमनुसमस्यन्ति तदु तथा न कुर्याद्धुतोच्छिष्टं वाऽएतन्नेद्धुतोच्छिष्टगामी जुहवामेति तस्मादपो वैवाभ्यवहरेयुः प्राश्नीयुर्वा ॥४८॥ ब्राह्मणम् ॥२॥ [६. १.] ॥

(उत्तर देता है) 'वह गया' । 'देव सुनें' । 'दैवी होता विदा हो' । मनुष्य-होता का कल्याण हो' । 'कल्याण के वाक्य कह' । यह कहकर वह केवल परिधियों को छूता है । परन्तु अग्नि मे डालता नहीं । बर्हि और परिधियों को पीछे से छोडता है ॥४७॥

कुछ लोग बची खुची हवि को भी (अग्नि) मे डाल देते हैं परन्तु ऐसा न करना चाहिये । क्योंकि यह आहुति का उच्छिष्ट (झूठा) है । इसलिये ऐसा न हो कि आहुति की झूठन छोड़ दी जाय । इसलिये उसे या तो जल मे छोड देना चाहिये या खा लेना चाहिये ॥४८॥

अध्याय ६—ब्राह्मण २

महाहविषा ह वै देवा वृत्रं जघ्नुः । तेनोऽएव व्यजयन्त येयमेषां विजितिस्तामथ यानेवैषां तस्मिन्त्संग्रामऽइषव आर्च्छंस्तानेतैरेव शल्यैरहरन्त तान्व्यबृहन्त यत्र्यम्बकैरयजन्त ॥१॥

अथ यदेष एतैर्यजते । तद्वाह न्वेवैतस्य तथा कं चनेपुर्ऋच्छतीति देवा अकुर्वन्निति त्वेवैष एतत्करोति याश्च त्वेवास्य प्रजा जाता याश्चाजातास्ता उभयी रुद्रियात्प्रमुच्यति अरयानमीवा अकिल्विषाः प्रजाः प्रजायन्ते तस्माद्वाऽएष एतैर्यजते ॥२॥

ते वै रौद्रा भवन्ति । रुद्रस्य हीषुस्तस्माद्रौद्रा भवन्त्येककपाला भवन्त्येकदेवत्या

देवों ने महाहवि के द्वारा ही वृत्र को मारा था । उसी से उनको वह विजय मिली जो उनको प्राप्त है । उनमें से जिनके शरीर मे उस युद्ध मे बाण लगे थे उनको निकाला । उनको उन्होंने त्र्यम्बक यज्ञ करके निकाला ॥१॥

इसलिये जो कोई इस प्रकार यज्ञ करता है वह या तो इसलिये करता है कि उसके लोगों के कोई तीर न लगेगा; या इसलिये कि देवताओं ने ऐसा किया था । इस प्रकार वह उस सन्तान को जो उत्पन्न हो चुकी है और उस सन्तान को भी जो अभी उत्पन्न नहीं हुई रुद्र के पन्दे से छुड़ा देता है । और उसकी सन्तान रोग रहित और दोष रहित उत्पन्न होती है । इसीलिये वह यज्ञ करता है ॥२॥

(त्र्यम्बक यज्ञ) रुद्र के लिये किया जाता है । बाण रुद्र के ही हैं । इसलिये रुद्र की ही आहुतियाँ दी जाती हैं । यह एक कपाल (का पुरोडाश) होता है । एक देवता के

असचिति तस्मादेककपाला भवन्ति ॥३॥

ते वै प्रतिपुरुषं । यावन्तो गृहाः स्युस्तावन्त एकेनातिरिक्ता भवन्ति तत्प्रतिपुरुषमेवैतदेकैकेन या अस्य प्रजा जातास्ता रुद्रियात्प्रमुञ्चत्येकेनातिरिक्ता भवन्ति तद्या एवास्य प्रजा अजातास्ता रुद्रियात्प्रमुञ्चति तस्मादेकेनातिरिक्ता भवन्ति ॥४॥

स जघनेन गार्हपत्य । यज्ञोपवीती भूत्वोदङ्डासीन एतानगृह्णाति स तत एवोपोत्थायोदङ्तिष्ठन्वहन्त्युदीच्यौ हवदुपलेऽउपदधात्युत्तरार्धे गार्हपत्यस्य कपालान्युपदधाति तद्यदेव तामुत्तरा दिशꣳ सचन्तऽएषा ह्येतस्य देवस्य दिक्तस्मादेतामुत्तरा दिशꣳ सचन्ते ॥५॥

ते वा अक्ताः स्यु । अक्तꣳ हि हविस्तऽउ वाऽअनक्ता एव स्युरभिमानुको ह रुद्रः पशून्त्स्याद्यदन्ज्यात्तस्मादनक्ता एव स्युः ॥६॥

तान्त्सार्धं पात्र्याꣳ समुद्रास्य । अन्वाहार्यपचनादुल्मुकमादायोदङ् परेत्य जुहोत्येषा ह्येतस्य देवस्य दिक् पथि जुहोति पथा हि स देवश्चरति चतुष्पथे जुहोत्येतद्ध वाऽअस्य जाघितं प्रज्ञातमवसान यच्चतुष्पथ तस्माच्चतुष्पथे जुहोति ॥७॥

लिये ही होती है, इसलिये वे एक कपाल की ही होती हैं ॥३॥

प्रति पुरुष के लिये एक-एक । जितने घर के लोग हों उनके लिये एक एक और एक अधिक । एक एक के लिये एक एक । इससे वह उत्पन्न हुई सन्तान को रुद्र के वश से छुडाता है । और जो एक अधिक हुई उसके सहारे से जो सन्तान अभी उत्पन्न नहीं हुई उसको रुद्र के वश से छुडाता है । इसीलिये वह इतने होते हैं और एक अधिक ॥४॥

यह यज्ञोपवीत धारण किये हुये उत्तराभिमुख गार्हपत्य के पीछे बैठकर (पुरोडाश के लिये चावलों को) निकालता है । वहाँ से वह उठता है और उत्तराभिमुख खडा होकर पछोरता है । अब दृषद् और उपल (चक्की के पाट) उत्तर की ओर रखता है । और गार्हपत्य के उत्तरार्द्ध में कपालों को रखता है । उत्तर की ओर ही क्यों रखता है ? इसलिये कि उत्तर देव की दिशा है । इसलिये उत्तर की दिशा में रखते हैं ॥५॥

(मुख की राय में) उनमें घी मिलाना चाहिये । हवि में घी मिला होता है, परन्तु घी न मिलाना ही अच्छा है । यदि घी मिला दिया जायगा तो रुद्र यजमान के पशुओं के पीछे पड़ेगा । इसलिये घी नहीं मिलाना चाहिये ॥६॥

एक पात्र में सत्र (पुरोडाश) को करके दक्षिणाग्नि से एक जलती लकड़ी लेकर उत्तर की ओर जाकर आहुति दे देता है । क्योंकि उत्तर की दिशा इस देव की है । मार्ग में ही आहुति देता है क्योंकि वह देव (रुद्र) मार्ग में ही चलता है । चौराहे पर ही देता है क्योंकि चौराहे पर ही (रुद्र का) प्राचीन स्थान है । इसलिये चौराहे पर ही आहुति देता है ॥७॥

पलाशस्य पलाशेन मध्यमेन जुहोति । ब्रह्म वै पलाशस्य पलाशं ब्रह्मणैवैतज्जुहोति स सर्वेषामेवावद्यत्येकस्यैव नावद्यति य एषोऽतिरिक्तो भवति ॥८॥

स जुहोति । एष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व स्वाहेत्यम्बिका ह वै नामास्य स्वसा तयारयैष सह भागस्तद्यदस्यैष स्त्रिया सह भागस्तस्मात्त्र्यंबका नाम तया अस्य प्रजा जातास्ता रुद्रियात्प्रमुञ्चति ॥९॥

अथ य एष एकोऽतिरिक्तो भवति । तमाखूत्करऽउपकिरत्येष ते रुद्र भाग आखुस्ते पशुरिति तदस्माऽआखुमेव पशूनामनुदिशति तेनोऽइतरान्पशून हिनस्ति तद्यदुपकिरति तिर इव वै गर्भास्तिर इवैतद्यदुपकीर्णं तस्माद्वाऽउपकिरति तया एवास्य प्रजा अजातास्ता रुद्रियात्प्रमुञ्चति ॥१०॥

अथ पुनरेत्य जपन्ति । अव रुद्रमदीमहव देवं त्र्यम्बकम् । यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात् । भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजम्॥

पलाश पत्र के बीच के पत्ते से आहुति देता है । पलाश ब्रह्म है । इसलिये ब्रह्म के द्वारा ही आहुति देता है । वह सब (पुरोडाशों में से) एक एक टुकड़ा काटता है, केवल अधिक पुरोडाश (जो एक अधिक था) में से नहीं काटता ॥८॥

वह इस मन्त्र को पढ़कर आहुति देता है, 'एष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व स्वाहा' (यजु० ३।५७) । 'हे रुद्र तेरी बहिन अम्बिका के साथ यह तेरा भाग है, तू इसे ग्रहण कर; स्वाहा' । उसकी बहिन का नाम अम्बिका है । उसके साथ मिला हुआ उसका यह भाग है । और चूँकि एक स्त्री उस भाग में शरीक है अतः उन आहुतियों का नाम पड़ा 'अम्बिका' । इन आहुतियों के द्वारा, उसके जो सन्तान हुई है उसको रुद्र के पंजे से छुड़ा देता है ॥९॥

और एक जो (पुरोडाश की टिकिया) उसको चूहे के बिल में गाड़ देती है । यह मन्त्र पढ़कर—'एष ते रुद्र भागऽआखुस्ते पशुः' (यजु० ३।५७) । 'हे रुद्र ! यह भाग है और चूहा तेरा पशु है' । इस प्रकार वह चूहे को ही (रुद्र का पशु) नियत कर देता है और वह (रुद्र) किसी अन्य पशु को नहीं सताता । गाड़ता क्यों है ? इसलिये कि गर्भ गुप्त होते हैं । और जो गड़ा हुआ होता है वह भी गुप्त होता है । इसीलिये वह उसको गाड़ता है । इसके द्वारा वह अपनी उस सन्तान को जो अभी उत्पन्न नहीं हुई रुद्र के पंजे से छुड़ा देता है ॥१०॥

अब वह लौट कर यह मन्त्र जपते हैं—'अव रुद्रमदीमहव देव त्र्यम्बकम् । यथा नो वस्य सस्करद् यथा नः श्रेयसस्करद् यथा नो व्यवसाययात् ॥ भेषजमसि भेषज गवेऽश्वाय पुरुषाय भेषजम् । सुख मेषाय मेष्यै' (यजु० ३।५८,५९) । 'हम त्र्यम्बक देव रुद्र को सन्तुष्ट करते हैं कि वह हमको घर आदि से युक्त करे, हमको कल्याण दे, और हमको व्यवसायी बनावे' (यजु० ३।५८) । 'हे रुद्र ! आप औषध हैं—गाय, घोड़े, पुरुष के लिये औषध

सुरं मेषाय मेष्याऽत्याशीरेवैपैतरय कर्मणः ॥११॥

अथापसलवि त्रिः परियन्ति । सव्यानूरूनुपाघ्नानास्त्र्यम्बकं यजामहे सुगन्धि पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतादित्याशीरेवैपैस्य कर्मणा आशिषमेवैतदाशासते तदु ह्येव शमिव यो मृत्योर्मुच्यते नामृतात्तस्मादाह मृत्योर्मुक्षीय मामृतादिति ॥१२॥

तदु हापि कुमार्यः परीयुः । भगस्य भजामहाऽइति या ह वै सा रुद्रस्य स्वसाम्बिका नाम सा ह वै भगस्येष्टे तस्मादु हापि कुमार्यः परीयुर्भगस्य भजामहा ऽइति ॥१३॥

तासामुतासां मन्त्रोऽस्ति । त्र्यम्बकं यजामहे सुगन्धि पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय मामुत इति सा यदित इत्याह ज्ञातिभ्यस्तदाह मामुत इति पतिभ्य-स्तदाह पतयो ह्येव स्त्रियै प्रतिष्ठा तस्मादाह मामुत इति ॥१४॥

अथ पुनः प्रसलवि त्रिः परियन्ति । दक्षिणानूरूनुपाघ्नाना एतेनैव मन्त्रेण तद्यत्पुनः प्रसलवि त्रिः परियन्ति प्रसलवि न इदं कर्मानुसंतिष्ठाताऽइति तस्मात्पुनः प्रसलवि त्रिः

हैं। भेड़े और भेड़ी के लिये सुख हैं (अर्थात् सब प्राणियों के लिये सुखों के दाता हैं), इस यज्ञ में यह आशीर्वाद है' (यजु० ३।५६) ॥११॥

अब वे तीन बार वेदी के चारों ओर (बाईं ओर से) फिरते हैं, बाईं जाघों को पीटते हुये और यह मन्त्र जपते हुये—'त्र्यम्बक यजामहे सुगन्धि पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय माऽमृतात्' (यजु ३।६०)। 'सुगन्ध युक्त और पुष्टि को बढ़ाने वाले त्र्यम्बक की हम स्तुति करते हैं कि वह हमको मौत के बन्धन से इस प्रकार छुड़ा लें जैसे उर्वारुक (लौकी) अपने डण्ठल से। परन्तु मोक्ष से नहीं' ॥१२॥

कुमारियाँ भी परिक्रमा करें इसलिये कि उनका कल्याण हो। रुद्र की बहिन अम्बिका भाग्य की अधिष्ठात्री है। इसलिये कुमारियों को भी परिक्रमा देनी चाहिये, इस इच्छा से कि उनका भाग्य जागे ॥१३॥

उनके लिये यह मन्त्र है, 'त्र्यम्बक यजामहे सुगन्धि पतिवेदनम्। उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः' (यजु० ३।६०)। 'हम सुगन्ध युक्त पतियों को प्राप्त कराने वाले त्र्यम्बक की स्तुति करती हैं, कि वह हमको इस (लोक) से लौकी के डण्ठल की भाँति छुड़ादे न कि उस (लोक) से' (यजु० ३।६०)। 'इस (लोक) से' का तात्पर्य है 'मेरे माता पिता आदि से'। 'वहाँ से नहीं' का तात्पर्य है, 'पति से नहीं'। (अर्थात्) वधू अपने माँ-बाप को छोड़कर पति के घर में नित्य रहने की प्रार्थना करती है)। पति ही स्त्री की प्रतिष्ठा है। इसलिये कहती हैं 'वहाँ से नहीं' ॥१४॥

अब वे फिर वेदी के चारों ओर दाहिनी ओर से फिरते हैं, दाहिनी जाँघों को पीटते हुये और यही मन्त्र जपते हुये। यह दाहिनी ओर घूमकर तीन बार क्यों फिरते हैं? इसलिये

परियन्ति ॥१५॥

अथैतान्यजमानोऽञ्जलौ समोप्य । ऊर्ध्वानुदस्यति यथा गौर्नोदाप्नुयात्तदात्मन्य एवैतच्छल्यान्निर्मिमते तान्विलिप्सन्त उपस्पृशन्ति मेषजमेवैतत्कुर्वते तस्माद्विलिप्सन्त उपस्पृशन्ति ॥१६॥

तान्द्वयोर्मतक्योरुपनह्य । वेणुयष्ट्यां वा कुपे वोभयत आबध्योदङ् परेत्य यदि वृक्षं वा स्थाणुं वा वेणुं वा वल्मीकं वा विन्देत्तस्मिन्नासजत्येतत्ते रुद्रावसं तेन परोमूजवतोऽतीहीत्यवसेन वाऽअध्वानं यन्ति तदेनꣳ सावसमेवान्ववार्जेति यत्र यत्रास्य चरणं तोऽतीहीत्यवसेन वाऽअध्वानं यन्ति तदेनꣳ सावसमेवान्ववार्जेति यत्र यत्रास्य चरणं तदन्वत्र ह वाऽअस्य परो मूजवद्भवश्चरणं तस्मादाह परो मूजवतोऽतीहीत्यवततधन्वा पिनाकावस इत्यहिꣳसन्नः शिवोऽतीहीत्येवैतदाह कृत्तिवासा इति निष्वापयत्येवैनमेतत्स्वपन्नु हि न कं चन हिनस्ति तस्मादाह कृत्तिवासा इति ॥१७॥

अथ दक्षिणान्याहूनन्यावर्तन्ते । ते प्रतीचं पुनरायन्ति पुनरेत्याप उपस्पृशन्ति रुद्रियेणैव वाऽएतदचारिषुः शान्तिरापस्तद्भिः शान्त्या शमयन्ते ॥१८॥

कि वह समझते हैं कि ऐसा करने से हमारे दाहिनी ओर काम सिद्ध होगा। इसलिये वे तीन बार दाहिनी ओर से परिक्रमा देते हैं ॥१५॥

अब यजमान इन बचे हुये पुरोडाश की टिकियों को अंजलि में लेकर ऊपर को इस प्रकार फेंकता है कि गौ न छू सके, और फिर हाथ में लेता है। जो पकड़ में नहीं आते और गिर पड़ते हैं उनको केवल छू लेता है। इस प्रकार वह उनको औषध के समान बनाते हैं। इसलिये यदि वह पकड़ में नहीं आते तो छू लेता है ॥१६॥

अब इनको दो टोकरियों में रखकर और या तो बाँस के दो सिरों से या तराजू की डंडी के दो सिरों से बाँधकर उत्तर की ओर चलता है। और रास्ते में कोई वृक्ष, ठूँठ, बाँस या चिटोहर मिल जाय तो इस मंत्र से उसमें बाँध देता है—'एतत् ते रुद्रावसं तेन परो मूजवतोऽतीहि' (यजु० ३।६१)। 'हे रुद्र यह तेरा तोशा है। इसे लेकर तू मूजवत के उस पार आ'। तोशा लेकर ही लोग यात्रा को चलते हैं। इसलिये वहाँ को जहाँ जाना हो वहाँ तोशा लेकर विदा करता है। इस प्रसंग में उसकी यात्रा मूजवत के उधर है। इसलिये कहता है कि मजबूत के उधर। अब कहता है—'अवततधन्वा पिनाकावसः' (यजु० ३।६१)। 'बिना खिचे हुये धनुष और वज्र से युक्त'। इससे तात्पर्य है 'हिंसा न करते हुये, कल्याण करते हुये जाओ'। अब कहता है—'कृत्तिवासा' (यजु० ३।६१)। 'चमड़ा पहने हुये'। इससे वह उसे सुला देता है। सोते हुये कोई किसी को हानि नहीं पहुँचा सकता। इसलिये कहा 'चमड़ा पहने हुये' ॥१७॥

अब वह दक्षिण की ओर फिरते हैं, बिना पीछे देखते हुये। लौटकर जल का स्पर्श करते हैं। अब तक रुद्र यज्ञ कर रहे थे। जल शान्ति है। इसलिये शान्तिरूपी जल से अपने को पवित्र करते हैं ॥१८॥

अथ केशश्मश्रूप्त्वा। समारोहाम्नाऽउदवसायेत्य होतेन यजते न हि तदवकल्पते यदुत्तरवेदावग्निहोत्र जुहुयात्तस्मादुदवस्यति गृहानित्वा निर्मथ्याग्नी पौर्णमासेन यजतऽउत्सत्रयज्ञ इव वाऽएष यच्चातुर्मास्यान्यथैष क्लृप्त· प्रतिष्ठितो यज्ञो यत्पौर्णमास तत् क्लृप्तेनैवैतद्यज्ञेनान्तत· प्रतितिष्ठति तस्मादुदवस्यति ॥१६॥ ब्राह्मणम् ॥३॥ [६ २.] ॥

अब वह केश और डाढी मुँडवाता है, और (उत्तर वेदी की) अग्नि लेता है। क्योंकि जगह बदल कर ही तो वह (पौर्णमास) यज्ञ कर सकता है। यह ठीक नहीं है कि उत्तर वेदी पर अग्निहोत्र करे। इसलिये वह जगह बदल लेता है। घर जाकर और अग्नियों का मथन करके वह पौर्णमास यज्ञ करता है। चातुर्मास्य यज्ञ अलग होते हैं। परन्तु पौर्णमास यज्ञ नियत और प्रतिष्ठित है। इसलिये वह उस नियत यज्ञ को करके अपने को प्रतिष्ठित करता है। इसलिये जगह बदल देता है ॥१६॥

अध्याय ६—ब्राह्मण ३

अक्षय्यꣳ ह वै सुकृतं चातुर्मास्ययाजिनो भवति। सवत्सरꣳ हि जयति तेनास्याक्षय्य भवति तं वै त्रेधा विभज्य यजति त्रेधा विभज्य प्रजयति सर्वं वै सवत्सरः सर्व वाऽअक्षय्यमेतेनो हास्याक्षय्यꣳ सुकृत भवत्यृतुरु हैवैतद्भूत्वा देवानप्येत्यक्षय्यमु वै देवानामेतेनो हैवास्याक्षय्यꣳ सुकृत भवत्येतन्नु तद्यस्माच्चातुर्मास्यैर्यजते ॥१॥

जो चातुर्मास्य यज्ञ करता है उसका पुण्य कभी नाश नहीं होता। वह सवत्सर को जीत लेता है इसलिये वह नाश नहीं होता। वह इसके तीन भाग करके यज्ञ करता है। यह इसके तीन भाग करके जीतता है। 'सवत्सर' का अर्थ है 'सम्पूर्ण'। 'सम्पूर्ण' नाश नहीं होता। इसलिये उसका सुकृत भी अक्षय होता है। वह ऋतु हो जाता है और देवों को प्राप्त होता है। देवों में तो 'क्षय' है ही नहीं। इसलिये उसके लिये अक्षय सुकृत होता है। यही प्रयोजन है कि वह चातुर्मास्य यज्ञ करता है ॥१॥

अथ शुनासीरीयेण यजेत। या वै देवानाꣳ श्रीरासीत्साकमेधैरीजानानां विजिग्यानानां तद्यूनमथ यः सवत्सरस्य प्रजितस्य रस आसीत्तत्सीरꣳ सा या चैव देवानाꣳ श्रीरासीत्साकमेधैरीजानानां विजिग्यानानां य उ च सवत्सरस्य प्रजितस्य रस आसीत्तमेवै-

अब शुनासीर यज्ञ क्यों करना चाहिये? साकमेध करने वाले और (शत्रु पर) विजय पाने वाले देवों की जो 'श्री' थी वह है 'शुनम्'। और प्राप्त हुये 'सवत्सर' का जो रस था वह है 'सीर'। साकमेध करने वाले और (शत्रु पर) विजय पाने वाले देवों की जो 'श्री' थी और प्राप्त हुये सवत्सर का जो 'रस' था उन दोनों को ग्रहण करके अपना बना

तदुभयं परिगृह्यात्मन्कुरुते तस्माच्छुनासीर्येण यजते ॥२॥

तस्यावृत् । नोपकिरन्त्युत्तरवेदिं न गृह्णन्ति घृतदाज्यं न मन्थन्त्यग्निं पञ्च प्रयाजा भवन्ति त्रयोऽनुयाजा एकश्च समिष्टयजुः ॥३॥

अथैतान्येव पञ्च हवींष्यपि भवन्ति । एतैर्वै हविर्भिः प्रजापतिः प्रजा असृजतैतै-रुभयतो वरुणपाशात्प्रजाः प्रामुञ्चदेतैर्वै देवा वृत्रमघ्नन्नेतैर्वेव व्यजयन्त येयमेषां विजितिस्तां रुभयतो वरुणपाशात्प्रजाः प्रामुञ्चदेतैर्वै देवा वृत्रमघ्नन्नेतैर्वेव व्यजयन्त येयमेषां विजितिस्तां तथोऽएवैष एतैर्या चैव देवानाञ्च श्रीरासीत्साकमेधरीजानानां विजिग्यानानां य उ च संवत्स-रस्य प्रजितस्य रस आसीत्तमेवैतदुभयं परिगृह्यात्मन्कुरुते तस्माद्वाऽएतानि पञ्च हवींष्यपि भवन्ति ॥४॥

अथ शुनासीर्यो द्वादशकपालः पुरोडाशो भवति । स बन्धुः शुनासीर्यस्य यं पूर्वम-वोचाम ॥५॥

अथ वायव्यं पयो भवति । पयो ह वै प्रजा जाता अभिसंजानते विजिग्यानं मा प्रजाः श्रिये यशसेऽन्नाद्यायाभिसंजानान्ताऽइति तस्मात्पयो भवति ॥६॥

तद्वायव्यं भवति । अयं वै वायुर्योऽयं पवतऽएष वाऽइदꣳ सर्वं प्रप्याययति यदिदं किं च वर्षति वृष्टादोषधयो जायन्तऽओषधीर्जग्ध्वापः पीत्वा तत एतदद्भ्योऽधि पयः

लेता है, इसलिये 'शुनासीर यज्ञ' करता है ॥२॥

इसकी यह विधि है—'उत्तरवेदी नहीं बनाते । नौनी घी नहीं लेते । अग्नि का मंथन नहीं करते । पाँच प्रयाज होते हैं तीन अनुयाज और एक समिष्ट यजुः ॥३॥

पहले साधारण पाँच हवियाँ होती हैं । इन्हीं हवियों से प्रजापति ने प्रजा उत्पन्न की । इन्हीं के द्वारा दोनों ओर से वरुण के पाश से प्रजा को छुड़ाया । इन्हीं से देवों ने वृत्र को मारा । इन्हीं से उनको यह विजय मिली जो उनको प्राप्त है । और इन्हीं के द्वारा साकमेध यज्ञ करने वाले और (वृत्र को) जीतने वाले देवों की जो श्री थी और जो प्राप्त हुये संवत्सर का रस था, उन दोनों को ग्रहण करके अपना बना लेता है । इसीलिये इन पाँच हवियों से यज्ञ करता है ॥४॥

अब शुनासीर्य पुरोडाश बारह कपालों का होता है । शुनासीर्य यज्ञ के विषय में पहले कह ही दिया गया ॥५॥

वायु के लिये दूध की आहुति होती है । प्रजा उत्पन्न होते ही दूध पीती है । वह सोचता है कि मुझ जीते हुये को प्रजा प्राप्त होवे । श्री, यश, अन्न, भोग हो । इसलिये दूध की आहुति होती है ॥६॥

वायु के लिये क्यों आहुति होती है । यह जो चलता है यह वायु ही तो है । इसी के द्वारा तो वर्षा होती है । वर्षा से ओषध होती हैं । ओषध खाकर और जल पीकर ही तो जल में से दूध होता है । इसलिये (वायु से) ही दूध होता है, इसलिये वायु के लिये

सम्भवत्येष हि वाऽएतज्जनयति तस्माद्धायव्यं भवति ॥७॥

अथ सौर्य एककपालः पुरोडाशो भवति । एष वै सूर्यो य एष तपत्येष वाऽइदꣳ सर्वमभिगोपायति साधुना त्वदसाधुना त्वदेष इदꣳ सर्वं विदधाति साधौ त्वदसाधौ त्वेदय मा विजिग्यानं प्रीतः साधुना त्वदभिगोपायत्साधौ त्वद्विदधदिति तस्मात्सौर्य एककपालः पुरोडाशो भवति ॥८॥

तस्याश्वः श्वेतो दक्षिणा । तदेतस्य रूपं क्रियते य एष तपति यदश्वꣳ श्वेतं न विन्देदपि गौरेव श्वेतः स्यात्तदेतस्य रूपं क्रियते य एष तपति ॥९॥

स यत्रैव साकमेधैर्यजते । तद्धुनासीर्येण यजेत यद्वै त्रिः संवत्सरस्य यजते तेनैव संवत्सरमाप्नोति तस्माद्यदैव कदा चैतेन यजेत ॥१०॥

तद्धैके । रात्रीरापिपयिषन्ति स यदि रात्रीरापिपयिषेद्यददः पुरस्तात्फाल्गुन्यै पौर्णमास्याऽउदृष्टं तद्धुनासीर्येण यजेत ॥११॥

अथ दीक्षेत । तं नानीजानं पुनः फाल्गुनी पौर्णमास्यभिपर्येयात्पुनः प्रयोगरूप इव ह स यदेनमनीजानं पुनः फाल्गुनी पौर्णमास्यभिपर्येयात्तस्मादेनं नानीजानं पुनः फाल्गुनी पौर्णमास्यभिपर्येयादिति नूत्सृजमानस्य ॥१२॥

आहुति देता है ॥७॥

अब एक कपाल का पुरोडाश सूर्य के लिये । यह सूर्य ही तो है जो तपता है । यही तो सब की रक्षा करता है; कभी साधु द्वारा कभी असाधु द्वारा । यही सब को धारण करता है; कभी साधु द्वारा कभी असाधु द्वारा । यह सोचता है कि 'मैं विजयी हो गया । अब यह प्रसन्न होकर 'साधु' द्वारा मेरी रक्षा करे । साधु द्वारा धारण करे' । इसलिये सूर्य का एक कपाल का पुरोडाश होता है ॥८॥

इसकी दक्षिणा है सफेद घोड़ा । इसलिये उस तपने वाले सूर्य के रूप की होती है । यदि सफेद घोड़ा न मिले तो सफेद गौ ही होवे । इस प्रकार वह तपने वाले सूर्य के रूप की होती है ॥९॥

जब यह साकमेध यज्ञ करे तभी शुनासीर यज्ञ करे । वर्ष में तीन बार करने से सम्पूर्णता मिल जाती है । इसलिये कभी करले ॥१०॥

कुछ लोग रात्रि को लेना चाहते हैं । यदि वह रात्रियों को लेना चाहे तो जब सामने आकाश में फाल्गुनी पूर्णमासी दिखाई पड़े उस समय शुनासीर यज्ञ को करे ॥११॥

अब यह दीक्षा लेवे कि कहीं फाल्गुनी पूर्णमासी बिना यज्ञ के न रह जाय । क्योंकि यदि फाल्गुनी पूर्णमासी बिना यज्ञ के गुजर जायगी तो उसको फिर प्रयोग करना पड़ेगा । इसलिये फाल्गुनी पूर्णमासी बिना सोम यज्ञ के नहीं गुजरनी चाहिये । यह उसके लिये जो (चातुर्मास्य आहुतियों) को छोड़ बैठता है ॥१२॥

अथ पुनः प्रयुञ्जानस्य । पूर्वेद्युः फाल्गुन्यै पौर्णमास्यै शुनासीर्येण यजेताथ प्रातर्वैश्वदेवेनाथ पौर्णमासेनैतदु पुनः प्रयुञ्जानस्य ॥१३॥

अथातः । परिवर्तनस्यैव सर्वतोमुखो वाऽआसावादित्य एष वाऽइदꣳ सर्वं निर्धयति यदिद किं च शुष्यति तेनैष सर्वतोमुखस्तेनान्नादः ॥१४॥

सर्वतोमुखोऽयमग्निः । यतो ह्येव कुतश्चान्नाय्याद्यधति तत एव प्रदहति तेनैष सर्वतोमुखस्तेनान्नादः ॥१५॥

अथायमन्यतोमुखः पुरुषः । स एतत्सर्वतोमुखो भवति यत्परिवर्तयते स एवमेवान्नादो भवति यथैतावेतद्य एव विद्वान्परिवर्तयते तस्माद्वै परिवर्तयेत ॥१६॥

तदुहोवाचासुरिः । किन्नु तत्र मुखस्य यदपि सर्वाण्येव लोमानि वपेत यद्वै त्रिः संवत्सरस्य यजते तेनैव सर्वतोमुखस्तेनान्नादस्तस्मान्नाद्रियेत परिवर्तयितुमिति ॥१७॥ ब्राह्मणम् ॥४॥ [६. ३] ॥

जो (चातुर्मास्य यज्ञ) फिर करना चाहता है, उसे फाल्गुनी पूर्णमासी के पहले दिन शुनासीर यज्ञ करना चाहिये । दूसरे दिन वैश्वदेव यज्ञ, फिर पौर्णमास यज्ञ । यह उसके लिये है जो चातुर्मास्य को फिर शुरू करना चाहता है ॥१३॥

अब सिर मुँडाना । यह सूर्य तो सब ओर मुख किये रहता है । यह जो कुछ सूखता है उसे सूर्य ही तो पीता है । इसलिये यह (यजमान भी) (सर मुँडाने से) सर्वतोमुख और अन्न पचाने वाला हो जाता है ॥१४॥

यह अग्नि भी सर्वतोमुख है । क्योंकि जो कुछ अग्नि मे जिधर से भी डाला जाय भस्म हो जाता है । इसलिये यह (यजमान) भी (सर मुँडाने से) सर्वतोमुख और अन्न पचाने वाला हो जाता है ॥१५॥

यह पुरुष तो एक ही ओर मुख रखता है । परन्तु सिर जो मुँडाता है यह सर्वतोमुख हो जाता है । और जो इस रहस्य को समझकर सिर मुँडाता है यह दोनों (अग्नि और सूर्य) के समान अन्न पचाने वाला होता है । इसलिये उसको बिल्कुल सिर मुँडाना चाहिये ॥१६॥

इस विषय में आसुरि की राय थी कि 'चाहे सब लोम मुँडा लें तो भी इससे और मुख से क्या सम्बन्ध ? वर्ष में तीन बार यज्ञ करने से ही सर्वतोमुख और अन्न पचाने वाला होता है । इसलिये सिर मुँडाने की कोई आवश्यकता नहीं ॥१७॥

अध्याय ६—ब्राह्मण ४

तद्यदाहुः । साकमेधैर्वै देवा वृत्रमघ्नंस्तैर्वेव व्यजयन्त येयमेषां विजितिस्तामिति सर्वैर्ह त्वेव देवाश्चातुर्मास्यैर्वृत्रमघ्नन्त्सर्वैर्वेव व्यजयन्त येयमेषां विजितिस्ताम् ॥१॥

ते होचुः । केन राज्ञा केनानीकेन योत्स्याम इति स हाग्निरुवाच मया राज्ञा मयानीकेनेति तेऽग्निना राज्ञाग्निनानीकेन चतुरो मासः प्राजयंस्तान्ब्रह्मणा च त्रय्या च विद्यया पर्यगृह्णन् ॥२॥

ते होचुः । केनैव राज्ञा केनानीकेन योत्स्याम इति स ह वरुण उवाच मया राज्ञा मयानीकेनेति ते वरुणेनैव राज्ञा वरुणेनानीकेनापरांश्चतुरो मासः प्राजयंस्तान्ब्रह्मणा चैव त्रय्या च विद्यया पर्यगृह्णन् ॥३॥

ते होचुः । केनैव राज्ञा केनानीकेन योत्स्याम इति स हेन्द्र उवाच मया राज्ञा मयानीकेनेति तऽइन्द्रेणैव राज्ञेन्द्रणानीकेनापरांश्चतुरो मासः प्राजयंस्तान्ब्रह्मणा चैव त्रय्या विद्यया पर्यगृह्णन् ॥४॥

स यद्वैश्वदेवेन यजते । अग्निनैवैतद्राज्ञाग्निनानीकेन चतुरो मासः प्रजयति तत्स्येनी शलली भवति लोहः क्षुरः सा या स्येनी शलली सा त्रय्यै विद्यायै रूपं लोहः क्षुरो ब्रह्मणो

यह जो कहा गया है कि देवों ने साकमेध यज्ञ के द्वारा वृत्र को मारा और उस विजय को पा लिया जो उनको प्राप्त है। यह सभी चातुर्मास्य यज्ञों के द्वारा ऐसा हुआ कि देवों ने वृत्र को मारा और जो विजय उनको प्राप्त है वह सभी के द्वारा हुई है ॥१॥

उन्होंने कहा, 'किस राजा के द्वारा और किस नेता की सहायता से हम लड़ेंगे'। अग्नि ने कहा, 'मुझ राजा और मुझ नेता की सहायता से'। अग्नि राजा और अग्नि नेता की सहायता से उन्होंने चारों महीनों को जीता। और ब्रह्म और तीन विद्याओं की सहायता से उन (महीनों) को घेरा ॥२॥

उन्होंने कहा, 'किस राजा और किस नेता की सहायता से हम लड़ेंगे'। वरुण ने कहा, 'मुझ राजा और मुझ नेता की सहायता से'। उन्होंने वरुण राजा और वरुण नेता की सहायता से दूसरे चार महीनों को जीता। और ब्रह्म तथा तीन विद्याओं की सहायता से उनको घेरा ॥३॥

उन्होंने कहा, 'किस राजा और किस नेता की सहायता से हम लड़ेंगे'। इन्द्र ने कहा, 'मुझ राजा और मुझ नेता की सहायता से'। इन्द्र राजा और इन्द्र नेता की सहायता से उन्होंने शेष चार महीनों को जीता। और उनको ब्रह्म तथा तीन विद्याओं की सहायता से घेरा ॥४॥

जब यह वैश्वदेव यज्ञ करता है तो इसी अग्नि राजा और अग्नि नेता की सहायता से चारों महीनों को जीतता है। (सिर मुंडाने के लिये) श्येनी शलली (गाढ़ी का काँटा

रूपमग्निर्हि ब्रह्म लोहित इव ह्यग्निस्तस्माल्लोहः क्षुरो भवति तेन परिवर्तयते तद्ब्रह्मणा चैवैनमेतत्त्र्यया च विद्यया परिगृह्णाति ॥५॥

अथ यद्वरुणप्रघासैर्यजते । वरुणेनैवैतद्राज्ञा वरुणेनानीकेनापराश्चतुरो मासः प्रजयति तत्त्र्येनी शलली भवति लोहः क्षुरस्तेन परिवर्तयते तद्ब्रह्मणा चैवैनमेतत्त्र्यया च विद्यया परिगृह्णाति ॥६॥

अथ यत्साकमेधैर्यजते । इन्द्रेणैवैतद्राज्ञेन्द्रेणानीकेनापराश्चतुरो मासः प्रजयति तत्त्र्येनी शलली भवति लोहः क्षुरस्तेन परिवर्तयते तद्ब्रह्मणा चैवैनमेतत्त्र्यया च विद्यया परिगृह्णाति ॥७॥

स यद्वैश्वदेवेन यजते । अग्निरेव तर्हि भवत्यग्नेरेव सायुज्यꣳ सलोकतां जयत्यथ यद्वरुणप्रघासैर्यजते वरुण एव तर्हि भवति वरुणस्यैव सायुज्यꣳ सलोकता जयत्यथ यत्साकमेधैर्यजतऽइन्द्र एव तर्हि भवतीन्द्रस्यैव सायुज्यꣳ सलोकता जयति ॥८॥

स यस्मिन्हऽर्तावमु लोकमेति । स एनमृतुः परस्माऽऋतवे प्रयच्छति पर उ निसमे तीन धब्बे हो) और तावे का क्षुरा होता है । त्र्येनी शलली तीन विद्याओं का रूप है और क्षुरा ब्रह्म का रूप है । अग्नि ब्रह्म है, अग्नि लाल है इसलिये तावे का क्षुरा होता है । उससे चारों ओर मुड़वाता है । इस प्रकार वह (अध्वर्यु को) ब्रह्म और तीन विद्याओं से घेरता है ॥५॥

जब वह वरुण-प्राघास यज्ञ करता है तो वरुण राजा और वरुण नेता के द्वारा दूसरे चार महीनों को जीतता है । तब भी त्र्येनी शलली और तावे का क्षुरा काम में आता है । उसी से सिर मुड़ता है । इस प्रकार ब्रह्म तथा तीन विद्याओं की सहायता से उसको घेरता है ॥६॥

जब वह साकमेध यज्ञ करता है तो इन्द्र राजा और इन्द्र नेता की सहायता से शेष चार माहों को जीतता है । तब भी त्र्येनी शलली और तावे के क्षुरे से मुंडन होता है और ब्रह्म तथा तीन विद्याओं की सहायता से उसको घेरता है ॥७॥

जब वह वैश्वदेव यज्ञ करता है तो अग्नि ही हो जाता है और अग्नि के सायुज्य और सालोक्य को प्राप्त होता है । जब वह वरुण प्राघास यज्ञ करता है तो वरुण हो जाता है और वरुण के सायुज्य और सालोक्य को प्राप्त होता है । जब वह साकमेध यज्ञ करता है तो इन्द्र हो जाता है और इन्द्र के ही सायुज्य और सालोक्य को प्राप्त होता है ॥८॥

वह जिस ऋतु में परलोक को जाता है वह ऋतु उसको दूसरे ऋतु के हवाले करता है । और वह अपने से आगे वाले ऋतु के हवाले करता है । जो चातुर्मास्य यज्ञ करता है वह परम धाम और परम गति को प्राप्त होता है, इसीलिये कहा है कि चातुर्मास्य यज्ञ

परस्माऽऋतवे प्रयच्छति स परममेव स्थानं परमां गतिं गच्छति चातुर्मास्ययाजी तदाहुर्न चातुर्मास्ययाजिनमनुविन्दन्ति परमꣳ ह्येव सन्तु स स्थानं परमां गतिं गच्छतीति ॥६॥ ब्राह्मणम् ॥५॥ [६. ४.] ॥ पञ्चमः प्रपाठकः ॥ कण्डिका संख्या १०४ ॥ षष्ठोऽध्यायः [१५] अस्मिन्काण्डे कण्डिकासंख्या ॥५४६॥

इति माध्यन्दिनीये शतपथब्राह्मणे एकपादिकानाम द्वितीयं काण्डं समाप्तम् ॥

करने वाले को कोई नहीं पाते क्योंकि वह परम धाम और परम गति को प्राप्त हो जाता है ॥६॥

माध्यन्दिनीय शतपथब्राह्मण की श्रीमत् पण्डित गंगाप्रसाद उपाध्याय कृत 'रत्नकुमारी-दीपिका' भाषा व्याख्या का एकपादिकानाम द्वितीय काण्ड समाप्त हुआ ।

द्वितीय-काण्ड

प्रपाठक	कण्डिका-संख्या
प्रथम [२. २. २.]	११४
द्वितीय [२. ३. २.]	१०३
तृतीय [२. ४. ३.]	११३
चतुर्थ [२. ५. ३.]	११५
पञ्चम [२. ६. ४.]	१०४
योग	५४६
पूर्व के काण्ड का	८३८
पूर्णयोग	१३८७

तृतीय-काण्ड

अथाध्वर नाम तृतीयं काण्डम्

[सोमयागो दीक्षाभिषवान्तः]

अध्याय १—ब्राह्मण १

ओ३म् । देवयजनं जोपयन्ते । स यदेव वर्षिष्ठꣳ स्यात्तज्जोपयेरन्यदन्यद्भूमेर्नोगि-शयीतातो वै देवा दिवमुपोदक्रामन्देवान्वाऽएष उपोत्क्रामति यो दीक्षते स यदेवे देवयजने यजते स यद्यन्यद्ध मेरभिशयीतावरतर इव हेट्वा स्यात्तस्माद्यदेव वर्षिष्ठꣳ स्यात्तज्जोप-येरन् ॥१॥

तद्वर्ष्म सत्तमꣳ स्यात् । समꣳ सदविभ्रꣳशि स्यादविभ्रꣳशि सत्प्रावप्रवणꣳ स्यात्प्राची हि देवानां दिगथोऽउदक्प्रवणमुदीची हि मनुष्याणां दिग्दक्षिणतः प्रत्युह्यितमिव स्यादेषा वै दिक् पितॄणाꣳ स यद्दक्षिणाप्रवणꣳ स्यादक्षिप्रे ह यजमानोऽमुं लोकमियात्तथो ह यजमानो ज्योग्जीवति तस्माद्दक्षिणतः प्रत्युह्यितमिव स्यात् ॥२॥

न पुरस्ताद्देवयजमात्रमतिरिच्येत । द्विषन्तꣳ हास्य तद्भ्रातृव्यमभ्यतिरिच्यते यमꣳ ह दक्षिणतः स्योदेवमुत्तरत एतद्ध त्वेव समृद्धं देवयजनं यस्य देवयजनमात्रं पश्चात्प-रिशिष्यते क्षिप्रे हैवैनमुत्तरा देवयज्योपनमतीति नु देवयजनस्य ॥३॥

तदु होवाच याज्ञवल्क्यः । वाप्यर्याय देवयजनं जोपयितुमेम तत्सात्ययज्ञोऽब-

वे यज्ञ का स्थान तलाश करते हैं। जो सबसे ऊँचा स्थान हो उसे तलाश करें, जिसके ऊपर और कोई भूमि न हो। ऐसे ही स्थान से देवों ने द्यौलोक को प्राप्त किया था। जो दीक्षा लेता है वह देवों को प्राप्त होता है। वह देव-युक्त स्थान में यज्ञ करता है। यदि उससे अन्य भूमि ऊँची होगी तो वह यज्ञ करने में नीचा हो जायगा। इसलिये उनको ऐसा स्थान तलाश करना चाहिये जो सबसे ऊँचा हो ॥१॥

वह ऊँचा स्थान चौरस होना चाहिये, चौरस के साथ साथ स्थिर हो। स्थिर के साथ-साथ पूर्व की ओर कुछ झुका हुआ हो, क्योंकि पूर्व देवों की दिशा है। या उत्तर की ओर झुका हुआ हो क्योंकि उत्तर मनुष्यों की दिशा है। वह दक्षिण की ओर कुछ उठा हुआ हो क्योंकि यह पितरों की दिशा है। यदि दक्षिण की ओर झुका हुआ होगा तो यजमान शीघ्र ही उस लोक को चला जायगा। परन्तु इस प्रकार यजमान दीर्घजीवी होता है। इस-लिये यह दक्षिण की ओर उठा हुआ होना चाहिये ॥२॥

यज्ञ का स्थान पूर्व की ओर अधिक चौड़ा न हो। यदि अधिक होगा तो अहितकारी शत्रु के अनुकूल होगा। इसलिये दक्षिण में भी इतना ही हो और उत्तर में भी इतना ही। वह यज्ञ स्थान अच्छा होता है जो पश्चिम में अधिक होता है। क्योंकि उसके लिये देवों की पूजा प्राप्त हो जाती है। इतना यज्ञ के स्थान के विषय में हुआ ॥३॥

अब याज्ञवल्क्य का कहना है, 'हम वाप्यर्य के लिये यज्ञ का स्थान तलाश करने

वीत्सर्वा वाऽइयं पृथिवी देवी देवयजनं यत्र वाऽअस्यै क्व च यजुषैव परिगृह्य याजये-दिति ॥४॥

ऋत्विजो हैव देवयजनम् । ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचाना विद्वाꣳसो याजयन्ति सैवाह्वलैतन्नेदिष्ठमामिव मन्यामहऽइति ॥५॥

तद्बालो वा विमितं वा प्राचीनवꣳशं मिन्वन्ति । प्राची हि देवानां दिक् पुरस्ताद्वै देवाः प्रत्यञ्चो मनुष्यानुपावृत्तास्तस्मात्तेभ्यः प्राङ्तिष्ठन्जुहोति ॥६॥

तस्माद्दु ह न प्रतीचीनशिराः शयीत । नेदेवानभिप्रसार्य शयाऽइति या दक्षिणा दिक् सा पितॄणां या प्रतीची सा सर्पाणां यतो देवा उच्चक्रमुः सैषाहीना योदीची दिक् सा मनुष्याणां तस्मान्मानुषऽउदीचीनवꣳ शामेव शालां वा विमितं वा मिन्वन्त्युदीची हि मनुष्याणां दिग्दीक्षितस्यैव प्राचीनवꣳशा नादीक्षितस्य ॥७॥

तां वाऽएतां परिश्रयन्ति । नेदभिवर्षादिति न्येव वर्षा देवान्वाऽएष उपावर्तते यो दीक्षते स देवतानामेको भवति तिर इव वै देवा मनुष्येभ्यस्तिर इवैतद्यत्परिश्रितं तस्मात्परिश्रयन्ति ॥८॥

लगे।' सात्ययज्ञ बोला, 'यह सब पृथ्वी देवी यज्ञ का स्थान है। इसमें से जितने भाग को यजुः के द्वारा घेर कर यज्ञ करो वही यज्ञ स्थान है ॥४॥

ऋत्विज ही यज्ञ का स्थान (देव यजन) हैं। जो वेदपाठी विद्वान ब्राह्मण जहाँ यज्ञ करते हैं वहाँ कोई त्रुटि नहीं होती। उसको हम (देवों से) निकटतम मानते हैं ॥५॥

यहाँ वे एक दालान या मकान बनाते हैं जो प्राचीन वंश हो (अर्थात् जिसकी धन्नियाँ पश्चिम से पूर्व को जाती हों)। पूर्व देवों की दिशा है। देव पूर्व से पश्चिम को चलकर ही मनुष्यों तक पहुँचते हैं। इसीलिये पूर्व की ओर मुँह करके खड़े होकर आहुतियाँ दी जाती हैं ॥६॥

इसीलिये पश्चिम की ओर सिर करके न सोना चाहिए क्योंकि देवों की ओर टांगें करके सोवेगा। दक्षिण दिशा पितरों की है। पश्चिम दिशा सांपों की है। अहीन (जो हीन न हो अर्थात् ठीक) दिशा वह है जहाँ से देव चढ़े थे। उत्तर की दिशा मनुष्यों की है। इसीलिए मनुष्यों के मकान या दालान उदीचीन वंश (अर्थात् दक्षिण से उत्तर की ओर जाने वाली धन्नियों के) होते हैं क्योंकि उत्तर मनुष्यों की दिशा है। केवल दीक्षित के लिए प्राचीन वंश मकान होवे। अदीक्षित के लिए नहीं ॥७॥

उसको घेर देते हैं कि वहाँ वर्षा न हो। कम से कम वर्षा (में तो यह होना ही चाहिए)। जो दीक्षा लेता है वह देवों के निकट आ जाता है, वह देवों में से एक हो जाता है। देव मनुष्यों से छिपे हुए होते हैं। जो घिरा होता है वह भी छिपा हुआ होता है। इसलिए उसे घेर लेते हैं ॥८॥

तन्न सर्व इवाभिप्रपद्येत । ब्राह्मणो वैव राजन्यो वा वैश्यो वा ते हि यज्ञियाः ॥९॥

स वै न सर्वेणैव संवदेत । देवान्वाऽएष उपावर्तते यो दीक्षते स देवतानामेको भवति न वै देवाः सर्वेणैव संवदन्ते ब्राह्मणेन वैव राजन्येन वा वैश्येन वा ते हि यज्ञियास्तस्माद्यद्येनꣳ शूद्रेण संवादो विन्देदे तेषामेवैकं ब्रूयादिममिति विचक्षेममिति विचक्षेत्येष उ तत्र दीक्षितस्योपचारः ॥१०॥

अथारणी पाणौ कृत्वा । शालामभ्यवस्यति स पूर्वार्ध्यꣳ स्थूणाराजमभिपद्यैतद्यजुराहेदमगन्म देवयजनं पृथिव्या यत्र देवासोऽअजुषन्त विश्वऽइति तदस्य विश्वैश्च देवैर्जुष्टं भवति ये चेमे ब्राह्मणाः शुश्रुवाꣳसोऽनूचाना यदहास्य तेऽक्तिभ्यामीक्षन्ते ब्राह्मणाः शुश्रुवाꣳसस्तदहास्य तैर्जुष्टं भवति ॥११॥

यद्वाह । यत्र देवासोऽअजुषन्त विश्वऽइति तदस्य विश्वैर्देवैर्जुष्टं भवत्यृक्सामाभ्याꣳ संतरन्तो यजुर्भिरित्यृक्सामाभ्या वै यजुर्भिर्यज्ञस्योदृचं गच्छन्ति यज्ञस्योदृचं गच्छानीत्येवैतदाह रायस्पोषेण समिषा मदेमेति भूमा वै रायस्पोषः श्रीर्वै भूमाशिषमेवैतदाशास्ते

इसमें सब कोई न घुसे । केवल ब्राह्मण, क्षत्रिय या वैश्य ही । क्योंकि यही यज्ञ के अधिकारी हैं ॥९॥

यह सबसे बात न करे । जो दीक्षा लेता है वह देवों के समीप हो जाता है, वह देवतों में से एक हो जाता है । देवता सबसे नहीं बोलते, केवल ब्राह्मण से, क्षत्रिय से और वैश्य से । क्योंकि यही यज्ञ के अधिकारी हैं । यदि शूद्र से बोलने की आवश्यकता पड़े तो (द्विजों में से ही) एक को कहे, 'इससे ऐसा कह दो ! इससे ऐसा कह दो ।' दीक्षित पुरुष के लिए यही उपचार है ॥१०॥

अब दो अरणियों को हाथ में लेकर शाला को पसन्द करता है और पूर्व की ओर के विशेष आसन पर बैठकर यह यजुः पढ़ता है । 'एदमगन्म देवयजन पृथिव्या यत्र देवासोऽअजुषन्त विश्वे' (यजु० ४।१) । 'हम पृथिवी के उस यज्ञ-स्थान पर आये हैं जिसको सब देवताओं ने पसन्द किया' । इस प्रकार यह सब देवों तथा वेदज्ञ ब्राह्मणों द्वारा पसन्द हो जाती है । और जिसको वेदपाठी ब्राह्मण आँखों से देख लेते हैं वह उनको पसन्द हो जाती है ॥११॥

और जब वह कहता है, 'यत्र देवासोऽअजुषन्त विश्वे' । (जिसको सब देवों ने पसन्द किया) तो सब देवता उसके साथ उसको पसन्द कर लेते हैं । अब यह पढ़ता है, 'ऋक्सामाभ्याꣳ संतरन्तो यजुर्भिः' (यजु० ४।१) । 'ऋक्, साम और यजुओं द्वारा तरते हुये' । ऋक्, साम और यजु द्वारा ही यज्ञ को पूरा करते हैं, इससे उसका तात्पर्य है कि मेरा यज्ञ पूर्णता को प्राप्त हो । अब कहता है, 'रायस्पोषेण समिषा मदेम' (यजु० ४।१) । 'धन और पुष्टि को पाकर आनन्द मनायें' । 'रायस्पोष' का अर्थ है 'बहुतायत' (भूमा) । बहुतायत ही 'श्री' है । इस प्रकार वह आशीर्वाद देता है । वह कहता है, 'समिषा मदेम'

समिधा मदेमेतीषं मदतीति वै तमाहुर्यः श्रियमश्नुते यः परमता गच्छति तस्मादाह समिधा मदेमेति ॥१२॥ ब्राह्मणम् ॥१॥

(इध अर्थात् ओज के साथ) क्योंकि जो कोई श्री वाला हो जाता है या बड़प्पन को प्राप्त होता है उसको लोग कहते हैं कि यह इध अर्थात् ओज को पाकर प्रसन्न हो रहा है। इसलिये कहा, 'समिधा मदेम' ॥१२॥

अध्याय १—ब्राह्मण १

अपराह्णे दीक्षेत । पुरा केशश्मश्रोर्वपनाद्यत्कामयेत तदश्नीयाद्यद्वा सम्पद्येत मतथ्ं ह्येनास्यातोऽशनं मनति यद्यु नाशिशिषेदपि काम नाश्नीयात् ॥१॥ शतम् ॥१००॥

अथोत्तरेण शाला परिश्रयन्ति । तदुदकुम्भमुपनिदधति तत्रापित उपतिष्ठते तत्केशश्मश्रु च वपते नखानि च निकृन्ततेऽस्त वै पुरुषस्यामेध्यं यत्रास्यापो नोपतिष्ठन्ते केशश्मश्रौ च वाऽअस्य नखेषु चापो नोपतिष्ठन्ते तद्यत्केशश्मश्रु च वपते नखानि च निकृन्तते मेध्यो भूत्वा दीक्षाऽइति ॥२॥

तद्धैके । सर्वेऽएव वपन्ते सर्वेऽएव मेध्या भूत्वा दीक्षिष्यामहऽइति तदु तथा न कुर्याद्यद्वै केशश्मश्रु च वपते नखानि च निकृन्तेत तदेव मेध्यो भवति तस्मादु केशश्मश्रु चैव वपेत नखानि च निकृन्तते ॥३॥

अपराह्ण अर्थात् दोपहर के बाद दीक्षा दे। केश और डाढ़ी मुँडाने से पहले जो मन चाहे या जो मिल सके उसे खा ले। क्योंकि इसके पीछे मन ही उसका भोजन होता है (अर्थात् दूध आदि) परन्तु यदि खाना न चाहे तो न खावे ॥१॥ [१४००]

अब शाला के उत्तर में स्थान घेरते हैं। और उसमें एक जल का घड़ा रखते हैं। इसके पास नाई बैठता है। अब (यजमान) बाल और डाढ़ी मुँडवाता है और नाखून कटवाता है। क्योंकि पुरुष का वह भाग अमेध्य या अपवित्र समझा जाता है जहाँ पानी नहीं पहुँचता। उसके बाल, डाढ़ी और नाखूनों में जल नहीं पहुँच सकते। इसलिये बाल और डाढ़ी मुँडवाते हैं और नाखून कटवाते हैं कि जिससे वह शुद्ध होकर दीक्षा ले ॥२॥

कुछ लोग सब बाल मुँडवा देते हैं जिससे सम्पूर्ण शुद्ध होकर दीक्षा लें। परन्तु ऐसा न करे। क्योंकि बाल और डाढ़ी मुँडवाने और नाखून कटवाने से भी शुद्ध हो जाते हैं इसलिये केश और डाढ़ी ही मुँडवावे और नाखून कटवा ले ॥३॥

स वै नखान्येवाग्रे निकृन्तेत । दक्षिणस्येवाग्रे सव्यस्य वाऽअग्रे मानुषेऽथैवं देवत्रा-ङ्गुष्ठयोरेवाग्रे कनिष्ठिकयोर्वाऽअग्रे मानुषेऽथैवं देवत्रा ॥४॥

स दक्षिणमेवाग्रे गोदानं वितारयति । सव्यं वाऽअग्रे मानुषेऽथैवं देवत्रा ॥५॥

स दक्षिणमेवाग्रे गोदानमभ्युनत्ति । इमा आपः शमु मे सन्तु देवीरिति स यदाहेमा आपः शमु मे सन्तु देवीरिति वज्रो वाऽ आपो वज्रो हि वाऽआपस्तस्माद्येनेता यन्ति निम्नं कुर्वन्ति यत्रोपतिष्ठन्ते निर्दहन्ति तत्तदेतमेवैतद्वज्रꣳ शमयति तथो हैनमेष वज्रः शान्तो न हिनस्ति तस्मादहेमा आपः शमु मे सन्तु दवीरिति ॥६॥

अथ दर्भतरुणकमन्तर्दधाति । ओषधे त्रायस्वेति वज्रो वै क्षुरस्तथो हैनमेष वज्रः क्षुरो न हिनस्त्यथ क्षुरेणाभिनिदधाति स्वधिते मैनꣳ हिꣳसीरिति वज्रो वै क्षुरस्तथो हैन-मेष वज्रः क्षुरो न हिनस्ति ॥७॥

प्रक्षिणोदपात्रे प्राग्यति । तूष्णीमेवोत्तरं गोदानमभ्युनत्ति तूष्णीं दर्भतरुणकमन्तर्द-

पहले नाखून कतरवाता है । पहले दाहिने हाथ के । मनुष्यों में पहले बायें हाथ के नाखून कतरवाने का रिवाज है । परन्तु देवों में इस प्रकार (अर्थात् दाहिने हाथ के पहले कतरे जाते हैं)। पहले दोनों अँगूठों के । मनुष्यों में पहले कनिष्ठिका अँगुली के नाखून कतरने का रिवाज है । परन्तु देवों में इस प्रकार (अर्थात् पहले अँगूठों के नाखून काटना चाहिये) ॥४॥

पहले दाहिनी मोछों में कंघी करता है । मनुष्यों में पहले बाँये में की जाती है । देवों में इस प्रकार (अर्थात् पहले दाहिनी मोछों में) ॥५॥

पहले वह दाहिनी मोछों को भिगोता है यह मन्त्र पढ़कर—'इमा आपः शमु मे सन्तु देवीः' (यजु० ४।१) । 'यह दिव्य जल मेरी शान्ति के लिये हो' । ऐसा वह क्यों कहता है कि यह दिव्य जल मेरी शान्ति के लिये हो ? जल वज्र है । वस्तुतः जल वज्र है । इसलिये यह जल जिधर को बहते हैं उधर को गड्ढा कर देते हैं । और जहाँ पहुँचते हैं वहाँ यह भस्म अर्थात् नष्ट कर देते हैं । इसलिये इस प्रकार यह वज्र को शान्त करता है । इस प्रकार शान्त हुआ वज्र उसको हानि नहीं पहुँचाता । इसीलिये कहा कि 'यह दिव्य जल मेरी शांति के लिये हो' ॥६॥

अब दर्भ को बालों के साथ रखता है यह मंत्र पढ़कर—'ओषधे त्रायस्व' (यजु० ४।१) । 'हे ओषधि, तू रक्षा कर' । छुरा वज्र है । इस प्रकार यह छुरा रूपी वज्र उसको नहीं हानि पहुँचाता । इसलिये वह छुरे को यह पढ़कर चलाता है—'स्वधिते मैनꣳ हिꣳसीः' । 'हे छुरे इसको मत हानि पहुँचा' । क्योंकि छुरा वज्र है और इस प्रकार यह वज्र छुरा हानि नहीं पहुँचाता ॥७॥

काटकर पानी के पात्र में डालता है । बायीं तरफ के बालों को मौन होकर भिगोता है और मौन होकर ही उनपर दर्भ रखता है । और मौन होकर ही छुरा चलाता है और मौन

घाति तूष्णीं क्षुरेणाभिनिधाय प्रक्षिपोदपात्रे प्रास्यति ॥८॥

अथ नापिताय क्षुरं प्रयच्छति। स केशश्मश्रु वपति स यदा केशश्मश्रु वपति ॥९॥

अथ स्नाति। अमेध्यो वै पुरुषो यदनृतं वदति तेन पूतिरन्तरतो मेध्या वाऽआपो मेध्यो भूत्वा दीक्षाऽइति पवित्र वाऽआपः पवित्रपूतो दीक्षाऽइति तस्माद्वै स्नाति ॥१०॥

स स्नाति। आपोऽअस्मान्मातरः शुन्धयन्त्वित्येतद्वाह शुन्धयन्त्विति घृतेन नो घृतप्वः पुनन्त्विति तद्वै सुपूत य घृतेनापुनंस्तस्मादाह घृतेन नो घृतप्वः पुनन्त्विति विश्वश्ं हि रिप्रं प्रवहन्ति देवीरिति यद्वै विश्वश्ं सर्वं तद्यदमेध्यश्ं रिप्र तत्सर्वश्ं ह्यस्मादमेध्यं प्रवहन्ति तस्मादाह विश्वश्ं हि रिप्रं प्रवहन्ति देवीरिति ॥११॥

अथ प्राङिनोदङ्डुत्क्रामति। उदिदाभ्यः शुचिरा पूत एमीत्युद्धयाभ्यः शुचिः पूत एति ॥१२॥

अथ वासः परिधत्ते। सर्वत्वायैव स्वामेवास्मिन्नेतत्त्वचं दधाति या ह वाऽइयं काटकर जल के पात्र में छोड़ देता है ॥८॥

अब छुरा नाई को दे देता है। और (नाई) बाल और डाढ़ी मूँडता है। जब केश और डाढ़ी मुँड जाते हैं—॥९॥

तो स्नान करता है। पुरुष अपवित्र है। क्योंकि झूठ बोलता है। इसलिये उसका भीतरी अंश अपवित्र है। जल पवित्र है। 'पवित्र होकर दीक्षा लूँ'। जल पवित्र है। 'पवित्र होकर दीक्षा लूँ' इसलिये स्नान करता है ॥१०॥

वह यह मन्त्र पढ़कर स्नान करता है—'आपोऽअस्मान् मातरः शुन्धयन्तु' (ऋ० १०।१७।१० या यजु० ४।२)। 'जल मातायें हमको शुद्ध करें'। इससे तात्पर्य है कि वे शुद्ध करें। अब कहता है—'घृतेन नो घृतप्वः पुनन्तु' (ऋ० १०।१७।१० या यजु० ४।२)। 'घी को पवित्र करने वाले हमको घी से पवित्र करें'। जो घी से पवित्र होता है वह वस्तुतः पवित्र हो जाता है। इसलिये वह कहता है कि 'घी को पवित्र करने वाले हमको घी से पवित्र करें'। 'विश्वश्ं हि रिप्रं प्रवहन्ति देवीः' (यजु० ४।२)। 'यह दिव्य पदार्थ सब दोष को दूर कर देते हैं'। 'विश्व' का अर्थ है 'सब'। 'रिप्र' का अर्थ है 'अमेध्य या अपवित्र'। ये उसको सब अपवित्र दोषों को दूर कर देते हैं। इसीलिये कहता है कि 'यह दिव्य पदार्थ सब दोषों को दूर कर देते हैं'।

अब उत्तर-पूर्व की ओर चलता है यह मन्त्र पढ़कर—'उदिदाभ्यः शुचिरा पूतऽएमि' (यजु० ४।२)। 'मैं शुद्ध पवित्र होकर इनसे चलता हूँ'। वस्तुतः वह शुद्ध और पवित्र होकर इनसे चलता है ॥१२॥

अब वह कपड़ा पहनता है, सर्वत्व अर्थात् पूर्णता के लिये। मानों वह इस प्रकार अपनी ही त्वचा ओढ़ता है।—जो गाय के ऊपर का यह चमड़ा है वह पहले मनुष्य के

गोस्त्वक्पुरुषे हैपाग्रऽआस ॥१३॥

ते देवा अब्रुवन् । गौर्वाऽइदꣳ सर्वं बिभर्ति हन्त येयं पुरुषे त्वग्गव्येतां दधाम तयेषा वर्षन्तं तया हिमं तया घृणि तितिक्षिष्यतऽइति ॥१४॥

तेऽवह्लाय पुरुषम् । गव्येतां त्वचमदधुस्तयैषा वर्षन्तं तया हिमं तया घृणि तितिक्षते ॥१५॥

अयक्षितो हि वै पुरुषः । तस्मादस्य यत्रैव क्व च कुशो वा यद्वा विकृन्तति तत एव लोहितमुत्पतति तस्मिन्नेतां त्वचमदधुर्वास एव तस्मान्नान्यः पुरुषाद्वासो बिभर्त्येतार्ꣳ ह्यस्मिंस्त्वचमदधुस्तस्मादु सुवासा एव बुभूषेत्स्वया त्वचा समृध्याऽइति तस्मादप्यरलीलꣳ सुवाससं दिदृक्षन्ते स्वया हि त्वचा समृद्धो भवति ॥१६॥

नो हान्ते गौर्नग्नः स्यात् । वेद ह गौरहमस्य त्वचं बिभर्मीति सा बिभ्यती त्रसति त्वचं मऽआदास्यतऽ इति तस्मादु गावः सुवाससमुपैव निश्रयन्ते ॥१७॥

तस्य वाऽएतस्य वाससः । अग्नेः पर्यासो भवति वायोरनुच्छादो नीविः पितॄणाꣳ सर्पाणा प्रघातो विश्वेषां देवानां तन्तव आरोका नक्षत्राणामेवꣳ हि वाऽएतत्सर्वे देवा अन्वायत्तास्तस्माद्दीक्षितवसनं भवति ॥१८॥

ऊपर था ॥१३॥

देवों ने कहा, 'वस्तुतः गाय इस (पृथ्वी) पर सभी को धारण करती है । यह जो पुरुष के ऊपर खाल है उसे गाय पर रख दे । इससे वह वर्षा, शीत और गर्मी को सह लेगी' ॥१४॥

उन्होंने पुरुष की खाल खींचकर गाय के ऊपर रख दी । इससे वह वर्षा, शीत और गर्मी को सह लेती है ॥१५॥

पुरुष की खाल खींच ली गयी है । इसलिये जहाँ कहीं कुश या और कोई चीज छिद जाती है वहीं खून निकल आता है । इसलिये उस चमड़े को ऊपर रख दिया । इसलिये मनुष्य के सिवाय और कोई कपड़े नहीं पहनता । क्योंकि उसी के ऊपर वह चमड़े के समान रख दिया गया है इसलिये उसे वस्त्रों से विभूषित होना चाहिये, जिससे वह अपनी ही खाल से ढक जाय । इसलिये एक भद्दे आदमी को भी कपड़े में ढकना चाहते हैं क्योंकि वह अपने ही चमड़े से ढका होता है ॥१६॥

उसको गाय के सामने नंगा नहीं होना चाहिये । क्योंकि गाय जानती है कि मैं इसी का चमड़ा ओढे हूँ और वह डर कर भागती है कि यह कहीं अपना चमड़ा न ले ले । इसलिये भी जो कपड़े पहने होता है उसी के पास गायें भली भाति जाती हैं ॥१७॥

अब इस कपड़े का ताना अग्नि का होता है और बाना वायु का । पितरों की नीवि, सर्पों का प्रघात (आगे का किनारा), तन्तु विश्वेदेवों का, और छिद्र नक्षत्रों के । इसमें सभी देवगण शामिल हैं । इसलिये यह दीक्षित का कपड़ा होता है ॥१८॥

तद्धाऽअहतꣳ स्यात् । अयातयामतायै तद्वै निष्पेष्टवै ब्रूयाद्यदेवास्यानामेध्या कुर्यात्ति वा यति वा तदस्य मेध्यमसदिति यद्धाऽअहतꣳ स्यादद्भिरभ्युक्षेन्मेध्यमसदित्यथो यदिदꣳ स्नातवस्य निहितमपल्पूलनकृतं भवति तेनो हापि दीक्षेत ॥१६॥

तत्परिधत्ते । दीक्षातपसोस्तनूरसीत्यदीक्षितस्य वाऽअरयेपामे तनूर्भवत्यथात्र दीक्षा तपसोस्तरमादाह दीक्षातपसोस्तनूरसीति ता त्वा शिवाꣳ शग्मा परिदधऽइति ता त्वा शिवाꣳ साध्वीं परिदधऽइत्येवैतदाह भद्रं वर्णं पुष्यन्निति पाप वाऽएषोऽग्रे वर्णं पुष्यति यममुमदीक्षितोऽथात्र भद्र तस्मादाह भद्र वर्णं पुष्यन्निति ॥२०॥

अथैनꣳ शाला प्रणयति । स धेन्वै चानड्वाहश्च नाश्नीयाद्धेन्वनड्वाहौ वाऽइदꣳ सर्वं बिभृतस्ते देवा अब्रुवन्धेन्वनड्वाहौ वाऽइदꣳ सर्वं बिभृतो हन्त यदन्येषा वयसां वीर्यं तद्धेन्वनड्वाहयोर्दधामेति स यदन्येषां वयसा वीर्यमासीत्तद्धेन्वनड्वाहयोरदधुस्तस्माद्धेनुरन्नै-

यह वस्त्र (यथासमय) अहत (=न मारा हुआ) अर्थात् पत्थर पर न पीटा हुआ । (वे धुला हुआ) होना चाहिये, जिससे पूरा ओज प्राप्त हो । (अध्वर्यु प्रतिप्रस्थातृ को) आदेश देवे कि उस वस्त्र को पीटे जिससे यदि अपवित्र स्त्री का क॥ या बुना भाग हो तो वह निकल जाय और वस्त्र पवित्र हो जाय । यदि यह नया हो तो उस पर जल छिड़के जिससे वह पवित्र हो जाय । या ऐसे कपड़े से दीक्षा ले जो अलग रक्खा रहता हो और स्नान के पश्चात् ही पहना जाता हो । वह (किसी तीक्ष्ण खार आदि में) डुबोया हुआ न हो ॥१६॥

यह इस मन्त्र को पढ़कर पहनता है—'दीक्षातपसोस्तनूरसि' । 'दीक्षा और तप का तू शरीर या दर्शन है' । इससे पहले वह अदीक्षित का शरीर था । अब दीक्षा और तप का हुआ । इसीलिये कहा कि 'तू दीक्षा और तप का शरीर है' । अब कहता है—'ता त्वा शिवाꣳ शग्मा परिदधे' । 'मैं तुझ कल्याणकारी और शुभ (कपड़े) को धारण करता हूँ' । 'शग्मा' का अर्थ है 'साध्वी' (उत्तम को) । अब कहता है—'भद्रं वर्णं पुष्यन्' । 'भद्रवर्ण का पोषण करने वाला' । जो वर्ण अदीक्षित होने की अवस्था में धारण किया गया वह पाप-युक्त था । अब भद्र है । इसलिये कहा कि 'भद्रवर्ण का पोषण करने वाला' ॥२०॥

अब (अध्वर्यु) उसको शाला में ले जाता है । वह गाय या बैल का (मांस) न खावे । क्योंकि गाय और बैल ही इस सब विश्व को धारण करते हैं । देवों ने कहा, 'यह गाय और बैल संसार को धारण करते हैं इसलिये अन्य प्राणियों का जो वीर्य या पराक्रम है वह गाय और बैल में रख दें' । इसलिये जो पराक्रम अन्य प्राणियों में था उसे उन्होंने गाय और बैलों में रख दिया । इसलिये गाय और बैल बहुत खाते हैं । इसलिये यदि गाय या बैल का (मांस) खाया जायगा तो सब ही खा लिया जायगा और अन्त में सब का मारा ही जायगा । वह दूसरे जन्म में अद्भुत योनि को प्राप्त होगा । कहा जायगा कि इसने पत्नी व गर्भ का नाश कर दिया । मार कर दिया । इसकी योनि पापयुक्त होगी । इसलिये गाय

वानड्वाश्च भूयिष्ठं भुङ्क्तस्तद्वैतत्सर्वाश्यमिव यो धेन्वनड्वहयोरश्नीयादन्तगतिरिव तथ्सं हादसुतमगिजनितोर्जायःयै गर्भं निरवधीदिति पापमकदिति पापी कीर्तिस्तस्माद्धेन्वनड्वहयोर्नाश्नीयात्तदु होवाच याज्ञवल्क्योऽश्नाम्येवाहमथ्संसलं चेज्जवतीति ॥२१॥ ब्राह्मणम् ॥२॥

और बैल का मांस न खावे। परन्तु याज्ञवल्क्य ने कहा, 'मैं तो खाता हूँ अगर नर्म (मसल) हो ॥२१॥

अध्याय १—ब्राह्मण ३

अपः प्रणीय। आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपत्यग्निर्वै सर्वा देवता अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वत्यग्निर्वै यज्ञस्यावरार्ध्यो विष्णुः परार्ध्यस्तत्सर्वाश्चैवैतद्देवताः परिगृह्य सर्वं च यज्ञं परिगृह्य दीक्षाऽइति तस्मादाग्नावैष्णव एकादशकपालः पुरोऽशो भवति ॥१॥

तद्धैके। आदित्येभ्यश्चरुं निर्वपन्ति तदस्ति पर्युदितमिवाष्टौ पुत्रासोऽअदितेर्ये जातास्तन्वस्परि। देवाँ२॥उप प्रैत्सप्तभिः परा मार्ताण्डमास्यदिति ॥२॥

अष्टौ ह वै पुत्रा अदितेः। यांस्तेतदेवा आदित्या इत्याचक्षते सप्त हैव तेऽरिक्तथ्स हाण्डमं जनयां चकार मार्ताण्डथ्सं संदेघो हैवास यावानेवोर्ध्वेतावास्तिर्यङ् पुरुषसंमित इत्यु हैकऽआहुः ॥३॥

जलों को लाकर अग्नि और विष्णु के लिये ११ कपालों का पुरोडाश निकालता है। अग्नि ही सब देवता हैं क्योंकि अग्नि में ही सब देवताओं के लिये आहुति दी जाती है। अग्नि यज्ञ का नीचे का आधा है और विष्णु ऊपर का आधा। वह सोचता है कि 'मैं सब देवताओं का परिग्रहण करके और सब यज्ञ को घेर के दीक्षित हो जाऊँगा इसलिये वह अग्नि और विष्णु के लिये ग्यारह कपालों का पुरोडाश बनाता है ॥१॥

इस पर कुछ लोग आदित्य के लिये चरु देते हैं। इस पर एक श्रुति है—अष्टौ पुत्रासो अदितेर्ये जातास्तन्वस्परि। देवाँ उप प्रैत् सप्तभिः परा मार्ताण्डमास्यत्' ॥ (ऋ० १०।७२।८)। 'अदिति के आठ पुत्र हैं, जो उसके शरीर से उत्पन्न हुये हैं। सातों के साथ वह देवों तक पहुँची, और मार्तण्ड को उसने फेंक दिया ॥२॥

अदिति के आठ पुत्र थे। परन्तु जो आदित्य (अर्थात् अदिति के अपत्य) कहलाते हैं वह सात ही हैं। आठवें मार्तण्ड को उसने अविकृत (बिगड़े) रूप में उत्पन्न किया। वह गर्देमात्र था अर्थात् वह किसी निश्चित रूप का न था। जितना ऊँचा था उतना ही चौड़ा था। कुछ लोग कहते हैं कि वह मनुष्य के आकार का था ॥३॥

तऽउ हैतऽऊचुः । देवा आदित्या यदस्मानन्वजनिमा तदमुयैव भूद्धन्तेमं विकरवामेति तं विचक्रुर्यथायं पुरुषो विकृतस्तस्य यानि माꣳसानि संकृत्य संन्यासुस्तो हस्ती स भवत्तस्मादाहुर्न हस्तिनं प्रतिगृह्णीयात्पुरुषाजानो हि हस्तीति यमु ह तद्विचक्रुः स वियत्स्वानादित्यस्तस्येमाः प्रजाः ॥४॥

स होवाच । राध्नवान्मे स प्रजायां य एतमादित्येभ्यश्चरुं निर्वपादति राध्नोति हैव य एतमादित्येभ्यश्चरुं निर्वपत्ययं त्वेवात्मावैष्णवः प्रज्ञातः ॥५॥

तस्य सप्तदश सामिधेन्यो भवन्ति । उपांशु देवने यजत पञ्च प्रयाजा भवन्ति त्रयोऽनुयाजाः संयाजयन्ति पत्नीः सर्वत्वायैव समिष्टयजुरेव न जुहोति नेदिदं दीक्षितवसनं परिधाय पुरा यज्ञस्य सꣳस्थाया अन्तं गच्छानीत्यन्तो हि यज्ञस्य समिष्टयजुः ॥६॥

अथाग्नेण शालां तिष्ठन्नभ्यङ्क्ते । अरुर्वै पुरुषोऽयङ्तोऽनरुरेवैतद्भवति यदभ्यङ्क्ते गवि वै पुरुषस्य त्वग्गोर्वोऽएतन्नवनीतं भवति स्वयैवैनमेतत्त्वचा समर्धयति तस्माद्वाऽ अभ्यङ्क्ते ॥७॥

तद्वै नवनीतं भवति । घृतं वै देवानां फाण्टं मनुष्याणामथैतन्नाहैव घृतं

आदित्य देव अर्थात् अदिति के पुत्रों ने कहा, 'जो हमारे पीछे उत्पन्न हुआ है वह विकृत न हो जाय । लाओ इसे बनावें' । उन्होंने उसे वैसा ही बनाया जैसा मनुष्य बनाया जाता है । जो मांस काटकर डाल दिया गया उससे हाथी बन गया । इसलिये कहते हैं कि भेंट स्वरूप हाथी न लेना चाहिये क्योंकि हाथी मनुष्य से उत्पन्न हुआ है, और जिसे बनाया वह हुआ 'वियत्स्थान्' (सूर्य) या सूर्य और इसी की यह सब प्रजा है ॥४॥

उसने कहा, 'मेरी प्रजा में से वह फलीभूत होगा जो आदित्यों को चरु देता है' । इसलिये वही सफल होता है जो आदित्यों को चरु देता है । यह चरु अग्नि और विष्णु के लिये विख्यात है ॥५॥

इसकी सत्रह सामिधेनियाँ हैं । इन दोनों देवताओं के लिये धीमी आवाज में आहुति दी जाती है । पाँच प्रयाज होते हैं और तीन अनुयाज । पूर्णता के लिये पत्नी-संयाज करते हैं । *समिष्ट यजुः की आहुति नहीं देते, कि कहीं ऐसा न हो कि दीक्षित के वस्त्र पहन कर यज्ञ की पूर्ति में यज्ञ के अन्त को पहुँच जाय । क्योंकि समिष्ट यजुः यज्ञ का अन्त है* ॥६॥

अब शाला के आगे खड़े होकर अभ्यञ्जन (मक्खन शरीर पर मलना) कराता है । त्वचा से वञ्चित होकर पुरुष घाव वाला हो जाता है । जब उसका अभ्यञ्जन होता है तो घाव भर जाते हैं । क्योंकि मनुष्य की त्वचा तो गाय के ऊपर है और घी (नवनी) भी गाय की होती है । इस प्रकार (अभ्यङ्क्ते) उसको इसी की त्वचा दिला देता है । इसीलिये अभ्यञ्जन किया जाता है ॥७॥

यह नवनी है । घी देवों का है और फाण्ट (अर्थात् यह मक्खन के कण जो मट्ठा बनाने में ऊपर उतरा आते हैं) मनुष्यों का । नवनी न तो घी है, न फाण्ट है । वृद्धि के

नो फाण्टश्च स्यादेव घृतश्च स्यात्फाण्टमयातयामतायै तदेनमयातयाम्नैवायातयामान करोति ॥८॥

तमभ्यनक्ति । शीर्षतोऽग्रऽआ पादाभ्यामनुलोम महीना पयोऽसीति मह्य इति ह वाऽएतासामेक नाम यद्गवा तासा वाऽएतत्पयो भवति तस्मादाह महीना पयोऽसीति वर्चोदा असि वर्चो मे देहीति नात्र तिरोहितमिवास्ति ॥९॥

अथाक्त्यावानक्ति । अरुर्वै पुरुषस्याक्ति प्रशान्तमेति ह स्माह याज्ञवल्क्यो दुरक्त इव हास पूयो हेवास्य दूषीका तेऽएवैतदनरुष्करोति यदक्त्यावानक्ति ॥१०॥

यत्र वै देवाः । असुररक्षसानि जघ्नुस्तच्छुष्णो दानवः प्रत्यङ् पतित्वा मनुष्याणामक्षीणि प्रविवेश स एष कनीनक कुमारक इव परिभासते तस्माऽएवैतद्यत्नमुपप्रयन्त्सर्वतोऽश्मपुरा परिदधात्यश्मा ह्याञ्जनम् ॥११॥

त्रैककुद भवति । यत्र वाऽइन्द्रो वृत्रमहंस्तस्य यदक्ष्यासीत्त गिरिं त्रिककुदमवगेत्तद्यत्रैककुद भवति चक्षुष्येवैतच्चक्षुर्दधाति तस्मात्त्रैककुद भवति यदि त्रैककुद न विन्देदप्यनैककुदमेव स्यात्समानी ह्येवाञ्जनस्य बन्धुता ॥१२॥

लिये घी और फाण्ट दोनों होने चाहिये । जो वृद्धियुक्त चीज है उससे वह यजमान को वृद्धियुक्त करता है ॥८॥

वह शिर से पैर तक अनुलोम की रीति से अभ्यञ्जन (उबटन) करता है । इस मन्त्र को पढ़कर—'महीना पयोऽसि' (यजु० ४।३) । 'मही' उन गायों में से एक का नाम है और यह (नवनी) उनका 'पय' है । इसीलिये कहा, 'महीना पयोऽसि' । अब कहता है—'वर्चोदाऽअसि वर्चो मे देहि' (यजु० ४।३) । 'तू वर्चस् देने वाला है, मुझे वर्चस् दे' । यह स्पष्ट है ॥९॥

अब आँख में काजल लगाता है । याज्ञवल्क्य ने कहा कि 'मनुष्य की आँख जख्मवाली है । मेरी आँख ठीक है' । पहले उसकी आँख खराब थी । अब वह काजल लगाकर उसकी आँख को निरोग करता है ॥१०॥

जब देवों ने असुर राक्षसों को मारा तो शुष्ण दानव पीछे को लौटकर मनुष्यों की आँखों में समा गया । वही आँख की पुतली होकर छोटा बालक सा प्रतीत होता है । (कुमारक पुतली को भी कहते हैं और बालक को भी) । इस प्रकार यजमान यज्ञ में प्रवेश होते समय इस अञ्जन को लगाकर मानों उस दानव के चारों ओर पत्थर की दीवार खड़ी कर देता है । क्योंकि अञ्जन पत्थर का है । (सुरमा पत्थर का होता है) ॥११॥

यह त्रिककुद पहाड़ का सुरमा है । जब इन्द्र ने वृत्र को मारा तो उसकी आँख की जो पुतली थी उसका त्रिककुद पहाड़ बना दिया । अब त्रिककुद पहाड़ से सुरमा लाने का तात्पर्य यह है कि आँख को आँख में रख देवे । यदि त्रिककुद पर्वत का सुरमा न मिले तो त्रिककुद को छोड़कर किसी अन्य स्थान से सुरमा लावे । क्योंकि सुरमों का फल एक ही है ॥१२॥

शरेपीकयानक्ति । वज्रो वै शरो निरक्षस्तायै सतूला भवत्यमूलं वाऽइदमुभयतः परिच्छिन्नꣳ रक्षोऽन्तरिक्षमनुचरति यथायं पुरुषोऽमूल उभयतः परिच्छिन्नोऽन्तरिक्षमनुचरति तद्यत्सतूला भवति निरक्षस्तायै ॥१३॥

स दक्षिणमेनाग्रऽआनक्ति । सव्यं वाऽअन्ये मानुषेऽथैवं देवत्रा ॥१४॥

स आनक्ति । वृत्रस्यासि कनीनक इति वृत्रस्य ह्येष कनीनकश्चक्षुर्दा असि चक्षुर्मे देहीति नात्र तिरोहितमिवास्ति ॥१५॥

स दक्षिणꣳ सकृद्यजुषानक्ति । सकृत्तूष्णीमथोत्तरꣳ सकृद्यजुषानक्ति द्विस्तूष्णीं तदुत्तरमेवैतदुत्तरावत्करोति ॥१६॥

तद्यत्पञ्चकृत्व आनक्ति । संवत्सरसंमितो वै यज्ञः पञ्च वाऽऋतवः संवत्सरस्य तं पंचभिराप्नोति तस्मात्पञ्चकृत्व आनक्ति ॥१७॥

अथैनं दर्भपवित्रेण पावयति । अमेध्यो वै पुरुषो यदनृतं वदति तेन पूतिरन्तरतो मेध्या वै दर्भा मेध्यो भूत्वा दीक्षाऽइति पवित्रं वै दर्भाः पवित्रपूतो दीक्षा इति तस्मादेन

सुरमा सीक से लगाता है, क्योंकि सीक वज्र है । इसी (सीक) की नोक पर रुई लगी होती है जिससे राक्षस निकल जाय । क्योंकि राक्षस बिना मूल के और दोनों ओर से स्वतन्त्र होकर हवा में घूमता है । इसी तरह जैसे आदमी हवा में बिना मूल के और बिना रोकटोक के घूमता है । इसलिये सीक के किनारे पर रुई इसीलिये लगी होती है कि राक्षस दूर हो जाय ॥१३॥

पहले दाहिनी आँख में सुरमा या अंजन लगाया जाता है । आदमी की बाईं आँख में पहले अंजन लगाया जाता है । देवताओं की (इससे विपरीत) ऐसी ही चाल है ॥१४॥

वह इस मन्त्र को पढ़कर अंजन लगाता है—'वृत्रस्यासि कनीनकः' (यजु० ४।३) । 'तू वृत्र की आँख है' । वस्तुतः यह वृत्र की ही आँख है । अब कहता है—'चक्षुर्दा असि चक्षुर्मे देहि' (यजु० ४।३) । 'तू आँख देने वाला है, मुझे आँख दे' । यह स्पष्ट है ॥१५॥

दाहिनी आँख में एक यजु. मन्त्र पढ़कर लगाता है और एक बार चुपचाप । बाईं आँख में एक बार एक यजु मन्त्र पढ़कर लगाता है और दो बार चुपचाप । इस प्रकार बाईं आँख को बड़प्पन दे देता है ॥१६॥

यह पाँच बार क्यों लगाता है ? इसका कारण यह है कि यज्ञ और संवत्सर एक से हैं । संवत्सर में पाँच ऋतुएँ होती हैं । इस प्रकार वह पाँच बार लगाने से संवत्सर को पा लेता है । इसलिये पाँच बार लगाता है ॥१७॥

अब यह इसको दर्भ के पवित्रा से पाक करता है । मनुष्य झूठ बोलने से अपवित्र हो जाता है । पवित्रा पाक है । यह सोचता है कि 'पाक होकर दीक्षा लूँ' । दर्भ शुद्धि का साधन है । यह सोचता है कि 'पवित्र होकर दीक्षा लूँ' । इसलिये दर्भ के पवित्रा से अपने

दर्भपवित्रेण पावयति ॥१८॥

तद्धाऽएकꣳ स्यात् । एको ह्येवाय पवते तदेतस्यैव रूपेण तस्मादेकꣳ स्यात् ॥१९॥

अथोऽअपि त्रीणि स्युः । एको ह्येवायं पवते सोऽयं पुरुषेऽन्तः प्रविष्टस्त्रेधा विहितः प्राण उदानो व्यान इति तदेतस्यैवानु मात्रा तस्मात्त्रीणि स्युः ॥२०॥

अथोऽअपि सप्त स्युः सप्त वाऽइमे शीर्षन्प्राणास्तस्मात्सप्त स्युस्त्रिःसप्तान्येव स्युरेकविꣳशतिरेवैव संपत् ॥२१॥

तꣳ सप्तभिः सप्तभिः पावयति । चित्पतिर्मा पुनात्विति प्रजापतिर्वै चित्पतिः प्रजापतिर्मा पुनात्वित्येवैतदाह वाक्पतिर्मा पुनात्विति प्रजापतिर्वै वाक्पतेः प्रजापतिर्मा पुनात्वित्येवैतदाह देवो मा सविता पुनात्विति तद्वै सुपूत य देवः सवितापुनात्तस्मादाह देवो मा सविता पुनात्वित्यच्छिद्रेण पवित्रेणेति यो वाऽअय पवतऽएषोऽच्छिद्रं पवित्रमेतेनैतदाह सूर्यस्य रश्मिभिरित्येते वै पवितारो यत्सूर्यस्य रश्मयस्तस्मादाह सूर्यस्य रश्मिभिरिति ॥२२॥

तस्य ते पवित्रपतऽइति । पवित्रपतिर्हि भवति पवित्रपूतस्येति पवित्रपूतो हि भवति

को शुद्ध करता है ॥१८॥

यह (दर्भ का पवित्रा) एक ही हो । यह पवन भी तो एक ही है । और पवन के ही लक्षण का यह पवित्रा है (पवन का अर्थ भी पवित्र करने वाला है) इसलिये दर्भ एक ही होना चाहिये ॥१९॥

या तीन पवित्रा हो । यह पवन तो एक ही है । लेकिन पुरुष के शरीर में पहुँचकर प्राण, व्यान और उदान बन जाता है । पवित्रा का भी यही लक्षण है । इसलिये तीन पवित्रा हो सकते हैं ॥२०॥

यह सात भी हो सकते हैं । सिर के प्राण सात हैं । इसलिये सात हो सकते हैं । यह सात के तिगुने अर्थात् २१ भी हो सकते हैं । पूर्णता इसी में है ॥२१॥

सात पवित्रों से वह यह मन्त्र पढकर पवित्र करता है—'चित्पतिर्मा पुनातु' (यजु० ४।४) । 'चित्पति' का अर्थ है प्रजापति । अर्थात् प्रजापति मुझे शुद्ध करे । 'वाक् पतिर्मा-पुनातु' (यजु० ४।४) । 'वाक्पति भी प्रजापति है । अर्थात् प्रजापति मुझे पवित्र करे' । 'देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण' (यजु० ४।४) । 'सुपूत (अर्थात् यथार्थ शुद्ध) वह है जिसको सविता देव ने शुद्ध किया हो । 'अच्छिद्रेण पवित्रेण' (यजु० ४।४) । क्योंकि वायु ही छिद्ररहित पवित्र करने वाला है । 'सूर्यस्य रश्मिभि ' (यजु० ४।४) । क्योंकि सूर्य की किरणें सबसे अधिक पवित्र करने वाली है ॥२२॥

'तस्य ते पवित्रपते' (यजु० ४।४) । 'वह (जो दीक्षित पुरुष है) पवित्रता का पति है' । 'पवित्रपूतस्य' (यजु० ४।४) । क्योंकि वह पवित्रा से शुद्ध किया हुआ है । 'यत् काम-पुने तच्छकेयम्' (यजु० ४।१४) । अर्थात् 'जिस कामना से मैं पवित्र हुआ हूँ वह कर सकूँ'

यत्काम पुने तच्छकेयमिति यज्ञस्योद्यच्छ गच्छानीत्येवैतदाह ॥२३॥

अथाशिषामारम्भ वाचयति । आ वो देवास ईमहे वाम प्रयत्यध्वरे । आ वो देवास आशिषो यज्ञियासो हवामहऽइति तदस्मै स्वा सती ऋत्विज आशिष आशासते ॥२४॥

अथाङ्गुलीर्न्यंचति । स्वाहा यज्ञ मनसऽइति द्वे स्वाहोरोरन्तरिक्षादिति द्वे स्वाहा द्यावापृथिवीभ्यामिति द्वे स्वाहा वातादारभऽइति मुष्टीकरोति न वै यज्ञ प्रत्यक्षमिवारभे यथाय दण्डो वा वासो वा परोऽक्ष वै देवा परोऽक्ष यज्ञ ॥२५॥

स यदाह । स्वाहा यज्ञ मनसऽइति तन्मनस आरभते स्वाहोरोरन्तरिक्षादिति तदन्तरिक्षादारभते स्वाहा द्यावापृथिवीभ्यामिति तदाभ्या द्यावापृथिवीभ्यामारभते ययोरिदꣳ सर्वमधि स्वाहा वातादारभऽइति वातो वै यज्ञस्तद्यज्ञ प्रत्यक्षमारभते ॥२६॥

अथ यत्स्वाहा स्वाहेति करोति । यज्ञो वै स्वाहाकारो यज्ञमेवैतदात्मन्धत्तेऽग्नेऽएव वाच यच्छति वाग्वै यज्ञो यज्ञमेवैतदात्मन्धत्ते ॥२७॥

अथैनꣳशाला प्रपादयति । स जघनेनाहवनीयमेत्यग्नेण गार्हपत्यꣳ सोऽस्य अर्थात् यज्ञ को पा सकूँ ॥२३॥

अब आशीर्वाद का मन्त्र बोलता है, 'आ वो देवासऽईमहे वाम प्रयत्यध्वरे । आ वो देवासऽआशिषो यज्ञियासो हवामहे' (यजु० ४।५) । 'हे देवो, हम आपका यज्ञ के आरम्भ में आवाहन करते हैं' । हे देवो, हम आपका यज्ञ में आशीर्वाद के लिये आवाहन करते हैं' । इस प्रकार ऋत्विज लोग अपने आशीर्वाद को उसके लिये देते हैं ॥२४॥

अब वह अँगुलियों को यह मन्त्र पढ़कर भीतर की ओर मोड़ता है, 'स्वाहा यज्ञ मनस' (यजु० ४।६) । 'इस मन्त्र से दो छोटी अँगुलियों को' । 'स्वाहोरोरन्तरिक्षात्' (यजु० ४।६) । 'इससे दो अनामिकाओं को' । 'स्वाहा द्यावापृथिवीभ्याम्' (यजु० ४।६) । 'इससे दो बीच की अँगुलियां को' । 'स्वाहा वातादारभे' (यजु० ४।५) । 'इससे दोनों मुट्ठियाँ बाँधता है । जैसे डडा या कपड़ा पकड़ा जाता है उसी प्रकार प्रत्यक्ष रीति से यज्ञ नहीं पकड़ा जा सकता है । जैसे देव परोक्ष हैं वैसे ही यज्ञ परोक्ष है ॥२५॥

जब वह कहता है, 'स्वाहा यज्ञ मनस' तो मन से यज्ञ का आरम्भ करता है । जब कहता है, 'स्वाहोरोरन्तरिक्षात्', तब अन्तरिक्ष से आरम्भ करता है । जब कहता है, 'स्वाहा द्यावापृथिवीभ्याम्' तब द्यौ और पृथिवी से आरम्भ करता है जिनमें यह सब चीजें शामिल हैं । जब कहता है—'स्वाहा वातादारभे' तो यज्ञ को स्वयं ही ले लेता है क्योंकि 'वात' यज्ञ है ॥२६॥

जब वह कहता है, 'स्वाहा, स्वाहा' तो यज्ञ ही स्वाहा है । इसलिये यज्ञ को धारण करता है । अब वह वाणी को रोकता है । वाक् ही यज्ञ है इसलिये यज्ञ को यज्ञ की आत्मा में ही धारण करता है ॥२७॥

अब वह उसको यज्ञ में प्रवेश कराता है । वह आहवनीय के पीछे और गार्हपत्य के

संचरो भवत्या सुत्यायै तद्यदस्यैष संचरो भवत्या सुत्याया ऽग्निर्वै योनिर्यज्ञस्य गर्भो दीक्षितोऽन्तरेण वै योनिं गर्भः संचरति स यत्स तनैजति त्वत्परि त्वदावर्तते तस्मादिमे गर्भा एजन्ति त्वत्परि त्वदावर्तन्ते तस्मादस्यैष संचरो भवत्या सुत्यायै ॥२८॥ ब्राह्मणम् ॥२॥

आगे चलता है। इस प्रकार सोम निचोड़ने तक चलता है। सोम निचोड़ने तक यह इस प्रकार क्यों चलता है? इसका कारण यह है—अग्नि यज्ञ की योनि है। और दीक्षित पुरुष गर्भ है। गर्भ योनि के भीतर चलता है। और जैसे दीक्षित पुरुष यहाँ चलता और फिर मुड़कर लौट देता है उसी प्रकार योनि में गर्भ चलता है और फिर मुड़कर लौट देता है। इसलिए सोम निचोड़ने तक यही नाता रहती है ॥२८॥

अध्याय १—ब्राह्मण ४

सर्वाणि ह वै दीक्षाया यजूंष्योद्भभणानि। उद्गृभ्णीते वाऽएषोऽस्माल्लोका-देवलोकमभि यो दीक्षतऽएतैरेव तद्यजुर्भिरुद्गृभ्णीते तस्मादाहुः सर्वाणि दीक्षाया यजूंष्यौद्भभणानीति तत एतान्यवान्तरामाचक्षतऽऔद्भभणानीत्याहुतयो ह्येता आहुतिर्हि यज्ञः परोऽक्षं वै यजुर्जपत्यथैष प्रत्यक्षं यज्ञो यदाहुतिस्तदेतेन यज्ञेनाद्गृभ्णीतेऽस्माल्लोका-देवलोकमभि ॥१॥

ततो यानि त्रीणि स्रुवेण जुहोति। तान्याधीतयजूंष्याचक्षते सम्पदऽएव कामाय चतुर्थं हूयतेऽथ यत्पञ्चमꣳ स्रुचा जुहोति तदेव प्रत्यक्षमौद्भभणमनुष्टुभा हि तज्जुहोति वाग्व्यनुष्टुब्वाग्घि यज्ञः ॥२॥

दीक्षा सम्बन्धी सब यजु औद्भभण कहलाते हैं क्योंकि जो पुरुष दीक्षित होता है वह इस लोक से देवलोक को उठता है (उद् गृभ्णीते) और इन यजुओं के द्वारा उठता है इसीलिये यह औद्भभण कहलाते हैं। इन अवान्तर (बीच में होने वाले) कृत्यों को भी औद्भभण कहते हैं। क्योंकि यह आहुतियाँ हैं और आहुतियाँ यज्ञ हैं। यजु का जाप तो परोक्ष यज्ञ है और यह आहुति प्रत्यक्ष यज्ञ है। इसी यज्ञ से इस लोक से देवलोक को उठते हैं ॥१॥

स्रुवों से जो तीन आहुतियाँ दी जाती हैं उनको 'अधीत यजु' कहते हैं। चौथी आहुति कामना के लिये होती है। पाँचवीं आहुति जो स्रुक् या स्रुच से दी जाती है यह प्रत्यक्ष में औद्भभण कहलाती है। क्योंकि यह अनुष्टुप् छन्द से दी जाती है। अनुष्टुप् वाणी है। वाणी यज्ञ है ॥२॥

यज्ञेन वै देवा० । इमा जितिं जिग्युर्यैषामियं जितिस्ते होचुः कथं न इदं मनुष्यैरन भ्यारोह्यꣳ स्यादिति ते यज्ञस्य रस धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुस्ता यज्ञं यूपेन योषयित्वा तिरोऽभवन्थ यदेनेनायोषयंस्तस्माद्यूपो नाम ॥२॥

तद्वाऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथाय यज्ञः सम्भृत एवं वाऽएष यज्ञꣳ सम्भरति यदेतानि जुहोति ॥४॥

तानि वै पञ्च जुहोति । सवत्सरसमितो वै यज्ञः पञ्च वाऽऋतवः सवत्सरस्य त पञ्चभिराप्नोति तस्मात्पञ्च जुहोति ॥५॥

अथातो होमस्यैव । आकूत्यै प्रयुजेऽग्नये स्वाहेत्या वाऽअग्नेः कुरुते यजेयेति तद्यदेवात्र यज्ञस्य तदेवैतत्सम्भृत्यात्मन्कुरुते ॥६॥

मेधायै मनसेऽग्नये स्वाहेति । मेधया वै मनसाभिगच्छति यजेयेति तद्यदेवात्र यज्ञस्य तदेवैतत्सम्भृत्यात्मन्कुरुते ॥७॥

दीक्षायै तपसेऽग्नये स्वाहेति । अन्वेवैतदुच्यते नेत्त हूयते ॥८॥

सरस्वत्यै पूष्णेऽग्नये स्वाहेति । वाग्वै सरस्वती वाग्यज्ञः पशवो वै पूषा पुष्टिर्नैपूषा

यज्ञ से देवों ने वह विजय पाई जो उनको मिली हुई है। वह कहने लगे, 'यह मनुष्यों के लिये अप्राप्य कैसे हो'? उन्होंने यज्ञ के रस को चूसा जैसे शहद की मक्खी शहद को चूसती है। और यज्ञ को नीरस करने और यूप के द्वारा यज्ञ को तितर बितर करके छिप गये। चूँकि उन्होंने इससे यज्ञ को तितर बितर किया (योषयन्) इसलिये इसका यूप नाम पड़ा ॥३॥

ऋषियों ने इस बात को सुना। उन्होंने यज्ञ को इकट्ठा किया जैसे यज्ञ इकट्ठा किया जाता है। यह औदुम्बरण आहुतियों द्वारा यज्ञ को इकट्ठा करता है ॥४॥

वह पाँच आहुतियाँ देता है क्योंकि यज्ञ और संवत्सर की संगति है। साल में पाँच ऋतुयें होती हैं। इससे पाँच की प्राप्ति होती है इसलिये पाँच आहुतियाँ दी जाती हैं ॥५॥

होम की यह आहुतियाँ हैं—पहली। 'आकूत्यै प्रयुजेऽग्नये स्वाहा' (यजु० ४।७)। 'विचार, प्रयोग और अग्नि के लिये स्वाहा'। पहले यज्ञ का विचार ही करता है (कुरुते)। अब इस आहुति में जो यज्ञ का भाग शामिल है उसे अपना बना लेता है ॥६॥

दूसरी—'मेधायै मनसेऽग्नये स्वाहा' (यजु० ४।७)। 'बुद्धि, मन और अग्नि के लिये स्वाहा'। बुद्धि और मन से वह यज्ञ करना चाहता है। अब इस आहुति में जो यज्ञ का भाग है उसको अपना बना लेता है ॥७॥

'दीक्षायै तपसेऽग्नये स्वाहा' (यजु० ४।७)। 'दीक्षा, तप और अग्नि के लिये स्वाहा'। यह केवल बोला जाता है। इससे आहुति नहीं दी जाती ॥८॥

तीसरी—'सरस्वत्यै पूष्णेऽग्नये स्वाहा' (यजु० ४।७)। 'सरस्वती, पूषा और अग्नि के लिये स्वाहा'। वाणी सरस्वती है। वाणी यज्ञ है। पशु पूषा है क्योंकि पूषा का अर्थ

पुष्टिः पशवः पशवो हि यज्ञस्तद्यदेवान यज्ञस्य तदेवैतत्सम्भृत्यात्मन्कुरुते ॥६॥

तदाहुः । अनङ्वेतेता आहुतयो हूयन्तेऽप्रतिष्ठिता अदेवकास्तन नेन्द्रो न सोमो नाग्निरिति ॥१०॥

आकूत्यै प्रयुजेऽग्नये स्वाहेति । नात एकं चनाग्निर्वोऽच्यङ्गेवाग्नि॰ प्रतिष्ठित॰ स यदग्नौ जुहोति तेनैनेता अङ्गेव तेन प्रतिष्ठितास्तस्मादु सर्वास्वेवाग्नये स्वाहेति जुहोति तत एतान्याधीयत जूथ्प्रपीत्याचक्षते ॥११॥

आकूत्यै प्रयुजेऽग्नये स्वाहेति । आत्मना वाऽअमऽआकुवते यजेयेति तमात्मन्नऽएव प्रयुङ्क्ते यक्षनुते तेऽअस्यैतेऽआत्मन्देवतेऽआधीते भवन आकूतिश्च प्रयुक्च ॥१२॥

मेधायै मनसेऽग्नये स्वाहेति । मेधया वै मनसामिगच्छति यजेयेतितेऽअस्यैतेऽआत्मन्देवतेऽआधीते मनतो मेधा च मनश्च ॥१३॥

सरस्वत्यै पूष्णेऽग्नये स्वाहेति । वाग्वै सरस्वती वाग्यज्ञः सास्यैषात्मन्देवताधीता भवति वाम्पशवो वै पूषा पुष्टिर्वै पूषा पुष्टिः पशवः पशवो हि यज्ञस्तेऽस्यैतऽआत्मन्पशव आधीता भवन्ति तद्यदस्यैता आत्मन्देवता आधीता भवन्ति तस्मादाधीतयजूथ्ंषि नाम ॥१४॥

अथ चतुर्थीं जुहोति । आपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवीऽउर्वोऽअन्त-

हैं पुष्टि । पशु पुष्टि है और पशु यज्ञ हैं । इस (तीसरी) आहुति में यज्ञ का भाग है उसको वह अपना बना लेता है ॥६॥

इस पर कहा जाता है कि यह आहुतियाँ अनिश्चित हैं । यह प्रतिष्ठित नहीं हैं । इनमें किसी देवता, इन्द्र, सोम या अग्नि का नाम नहीं है ॥१०॥

'आकूत्यै प्रयुजेऽग्नये स्वाहा' में किसी देवता का निश्चय नहीं है । (इस आक्षेप का उत्तर यह है कि) अग्नि तो निश्चित है । अग्नि प्रतिष्ठित है । जब अग्नि में आहुतियाँ दी जाती हैं तो वे निश्चित हो जाती हैं । इसीलिये यह सब आहुतियाँ 'अग्नये स्वाहा' कहकर दी जाती हैं । इन आहुतियों को 'अधीत यजूंषि' कहते हैं ॥११॥

'आकूत्यै प्रयुजेऽग्नये स्वाहा' । यहाँ वह आत्मा से ही यज्ञ का विचार करता है और आत्मा से ही प्रयोग करता है । यह दोनों देवता अर्थात् आकूति (विचार) और प्रयुक् (प्रयोग) आत्मा में ही उठते हैं (अधीत) ॥१२॥

'मेधायै मनसेऽग्नये स्वाहा' । यहाँ मेधा और मन से यज्ञ की प्राप्ति करता है इसलिये मेधा और मन दोनों देवता स्थित होते हैं ॥१३॥

'सरस्वत्यै पूष्णेऽग्नये स्वाहा' । वाणी ही सरस्वती है । वाणी यज्ञ है । यह सरस्वती देवता आत्मा में स्थित होता है । पशु पूषा हैं । पूषा पुष्टि है । पशु यज्ञ हैं । आत्मा में पशु स्थित होते हैं । इसलिये 'अधीत यजूंषि' इनका नाम हुआ ॥१४॥

अब चौथी आहुति देता है—'आपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवीऽउर्वोऽअन्त-

रिक्ष । बृहस्पतये हविषा विधेम स्वाहेत्येषा ह नेदीयो यज्ञस्यापाꣳ हि कीर्तयत्यापो हि यज्ञो द्यावापृथिवी ऽउरो ऽअन्तरिक्षेति लोकानाꣳ हि कीर्तयति बृहस्पतये हविषा विधेम स्वाहेति ब्रह्म वै बृहस्पतिर्ब्रह्म यज्ञ एतेनो हैषा नेदीयो यज्ञस्य ॥१५॥

अथ यां पञ्चमीꣳ स्रुचा जुहोति । सा हैव प्रत्यक्षं यज्ञोऽनुष्टुभा हि तां जुहोति वाग्व्यनुष्टुब्व्याग्घि यज्ञः ॥१६॥

अथ यदध्रुवायामाज्यं परिशिष्टं भवति । तज्जुह्वामानयति त्रिः स्रुवेणाज्यविलापन्या ऽअधि जुहां गृह्णाति यत्तृतीयं गृह्णाति तत्स्रुवमभिपूरयति ॥१७॥

स जुहोति । विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहेति ॥१८॥

सैषा देवताभिः पङ्क्तिर्भवति । विश्वो देवस्येति वैश्वदेवं नेतुरिति सावित्रं मर्तो वुरीतेति मैत्रं द्युम्नं वृणीतीत बार्हस्पत्यं द्युम्नꣳ हि बृहस्पतिः पुष्यस ऽइति पौष्णꣳ ॥१९॥

सैषा देवताभिः पङ्क्तिर्भवति । पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चऽर्तवः संवत्सरस्यैत-

अन्तरिक्ष । बृहस्पतये हविषा विधेम स्वाहा' (यजु० ४।७) । 'हे दिव्य, बड़े, संसार के हितकारक आपो देवता, हे द्यावापृथिवी, हे विस्तृत अन्तरिक्ष ! हम हवि से बृहस्पति की पूजा करें' । यह आहुति यज्ञ के घनिष्ठ है । आपो देवता की कीर्तियाँ है । 'आप' ही यज्ञ है । 'द्यावा पृथिवी, उरोऽअन्तरिक्ष' से लोकों की कीर्ति कहता है । 'बृहस्पतये हविषा विधेम स्वाहा' । यहाँ ब्रह्म ही बृहस्पति है । ब्रह्म ही यज्ञ है । इस प्रकार यह आहुति यज्ञ से घनिष्ट सम्बन्ध रखती है ॥१५॥

अब जो स्रुक् से पाँचवी आहुति दी जाती है वह तो साक्षात् यज्ञ है । क्योंकि यह अनुष्टुभ् छन्द में दी जाती है । वाणी अनुष्टुभ् है । वाणी यज्ञ है ॥१६॥

ध्रुवा में जो आज्य बच रहता है वह जुहू में छोड़ा जाता है । अब तीन बार स्रुवा से आज्य घी पिघलने वाले पात्र से जुहू में डालते है । तीसरी बार जो लेता है उससे स्रुवा को भर लेता है ॥१७॥

अब वह इस मन्त्र से आहुति देता है—'विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् । विश्वे रायऽइषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा' (यजु० ४।८; ऋ० ५।५०।१) । 'सब आदमी दिव्य नेता की मित्रता को ग्रहण करें । सब धन को चाहते हैं । अपनी पुष्टि के लिये यश को चाहें' ॥१८॥

यह आहुति और ऋचा देवताओं की अपेक्षा से सम्बन्धित है—'विश्वो देवस्य' से तात्पर्य है 'वैश्वदेव का' । 'नेतुः' से सविता का । 'मर्तो वुरीत' से मित्र का ।' द्युम्नं वृणीत' से बृहस्पति का 'पुष्य' से पूषा का ॥१९॥

यह आहुति और ऋचा देवताओं की अपेक्षा से पाँच से सम्बन्धित है । यज्ञ के पाँच

मेवैतयाप्नोति यदेवताभिः पड्भिर्करोति ॥२०॥

ता वाऽअनुष्टुभा जुहोति । वाग्वा ऽअनुष्टुग्वाग्यशस्तद्यशं प्रत्यक्षमाप्नोति ॥२१॥

तदाहुः । एतामेवैका जुहुयाद्यस्मै कामायेतरा हूयन्तऽएतयैव त काममाप्नोतीति ता वै यद्येका जुहुयात्पूर्णा जुहुयात्सर्वं वै पूर्णꣳ सर्वमेवैनयैतदाप्नोत्यथ यत्स्रुचमभिपूरयति स्रुच तदभिपूरयति ता पूर्णा जुहोत्यन्वैवैतदुच्यते सर्वास्त्वेव हूयन्ते ॥२२॥

ता वाऽअनुष्टुभा जुहोति । सैषानुष्टुप्सत्येकत्रिꣳशदक्षरा भवति दश पाण्या अङ्गुलयो दश पाद्या दश प्राणा आत्मैकत्रिꣳशो यस्मिन्नेते प्राणाः प्रतिष्ठिता एतावान्वै पुरुषः पुरुषो यज्ञः पुरुषसम्मितो यज्ञः स यावानेव यज्ञो यावत्यस्य मात्रा तावन्तमेवैनयैतदाप्नोति यदनुष्टुभैकत्रिꣳशदक्षरया जुहोति ॥२३॥ ब्राह्मणम् ॥४॥ अध्यायः ॥१॥ [१६] ॥

भाग हैं । पशु के पाँच भाग हैं । ऋतुयें पाँच हैं । इस प्रकार पाँच देवताओं वाली आहुति के द्वारा वह सम्वत्सर की प्राप्ति कर लेता है ॥२०॥

इसको वह अनुष्टुभ् छन्द में देता है । वाणी अनुष्टुभ् है । वाणी यज्ञ है । इस प्रकार प्रत्यक्ष यश की प्राप्ति करता है ॥२१॥

इस पर कहते हैं कि बस इसी एक आहुति को देवे । अन्य आहुतियाँ जिस जिस कामना के लिये दी जाती हैं वे सब इसी से पूरी हो जाती हैं । जो इस आहुति को देता है पूर्ण आहुति को देता है । 'सर्व' का अर्थ है पूर्ण । स्रुवा को भरकर वह जुहू को भर लेता है । और जुहू को पूरा पूरा छोड़ देता है । परन्तु यह केवल कथन मात्र है । आहुतियाँ तो पाँचों ही दी जाती हैं ॥२२॥

इसको अनुष्टुभ् छन्द में देते हैं । अनुष्टुभ् में ३१ अक्षर होते हैं । दस हाथ की उँगलियाँ हैं, दस पैर की, दस प्राण हैं । ३१ वा आत्मा जिसमें यह प्राण हैं । इतना ही पुरुष है । पुरुष यज्ञ है । उतने ही यज्ञ के भाग हैं जितने पुरुष के । इसलिये जितना यज्ञ है, जितनी उसकी मात्रा है, उतनी ही वह इस ३१ अक्षर वाले अनुष्टुभ् की आहुति देकर उसको प्राप्त कर लेता है ॥२३॥

अध्याय १—ब्राह्मण १

दक्षिणेनाहवनीयं प्राचीनग्रीवे कृष्णाजिनेऽउपस्तृणाति । तयोरेनमधि दीक्षयति यदि द्वे भवतस्तदनयोर्लोकयो रूपं तदेनमनयोर्लोकयोरधि दीक्षयति ॥१॥

संवद्धान्ते भवतः । संवद्धान्ताविव ह्येतौ लोकौ तर्ह्यसमृते पश्चाद्भवतस्तदिमावेव लोकौ मिथुनीकृत्य तयोरेनमधि दीक्षयति ॥२॥

यद्युऽएकं भवति । तदेषा लोकानाꣳ रूपं तदेनमेषु लोकेष्वधि दीक्षयति यानि शुक्लानि तानि दिवो रूपं यानि कृष्णानि तान्यस्यै यदि वेतरथा यान्येव कृष्णानि तानि दिवो रूपं यानि शुक्लानि तान्यस्य यान्येव बभ्रूणीव हरीणि तान्यन्तरिक्षस्य रूपं तदेनमेषु लोकेष्वधि दीक्षयति ॥३॥

अन्तकमु तर्हि पश्चात्प्रत्यस्येत् । तदिमानेव लोकान्मिथुनीकृत्य तेष्वेनमधि दीक्षयति ॥४॥

अथ जघनेन कृष्णाजिने पश्चात् प्राङ् जान्वाक्त उपविशति स यत्र शुक्लाना च कृष्णाना च संधिर्भवति तदेवमभिमृश्य जपत्यृक्सामयोः शिल्पे स्थऽइति यद्वै प्रतिरूपं

आहवनीय के दक्षिण की ओर दो मृगचर्मों को इस प्रकार बिछाता है कि उनकी गर्दन पूर्व की ओर रहे। उनपर वह उसको दीक्षा देता है। यह जो दो होते हैं वह दोनों लोकों के रूप हैं। इस प्रकार वह उसको इन दोनों लोकों में दीक्षित करता है ॥१॥

यह दोनों सिरों पर जुड़े होते हैं। यह दोनों लोक भी सिरे पर जुड़े होते हैं। पीछे की ओर यह छिद्रों द्वारा जुड़े होते हैं। इन दोनों लोकों को जोड़कर यह उसको दीक्षा देता है ॥२॥

यदि एक ही चर्म हो तो वह इन तीनों लोकों का रूप है। इस प्रकार वह उसको इन तीनों लोकों में दीक्षित करता है। जो श्वेत बाल हैं वे द्यौ का रूप हैं। जो काले हैं वह इस पृथ्वी का। या इसके विपरीत यों भी कह सकते हैं कि जो काले बाल हैं वे द्यौ का रूप है और जो श्वेत बाल हैं वह इस पृथ्वी का। जो भूरे पीले पीले हैं वे अन्तरिक्ष का रूप हैं। इस प्रकार वह उसको इन तीनों लोकों में दीक्षित करता है ॥३॥

अन्त में उसे उस (मृगचर्म) के पीछे को मुड़ना चाहिये। इन लोकों को जोड़कर वह उसको उनमें दीक्षित करता है ॥४॥

अब वह मृगचर्मों के पीछे पूर्वाभिमुख और जानु को झुकाकर बैठ जाता है। और जहाँ सफेद और काले बाल मिलते हैं वहाँ इस प्रकार (श्वेत बाल अँगूठे से और काले

तच्छिल्पमृचा च साम्ना च प्रतिरूपे स्थ इत्येवैतदाह ॥५॥

ते यामारभऽइति । गर्भो वाऽएष भवति यो दीक्षते स छन्दाꣳसि प्रविशति तस्मान्न्यञ्चाङ्गुलिरिव भवति न्यञ्चाऽङ्गुलय इव हि गर्भा ॥६॥

स यदाह । ते यामारभऽइति ते या प्रविशामीत्येवैतदाह ते मा पातमास्य यज्ञस्योदृच इति ते मा गोपायतमास्य यज्ञस्य सꣳस्थाया इत्येवैतदाह ॥७॥

अथ दक्षिणेन जानुनारोहति । शर्मासि शर्म मे यच्छेति चर्म वाऽएतत्कृष्णस्य तदस्त तन्मानुषꣳ शर्म देवत्रा तस्मादाह शर्मासि शर्म मे यच्छेति नमस्तेऽअस्तु मा मा हिꣳसीरिति श्रेयाꣳस वाऽएष उपाधिरोहति यो यज्ञ यज्ञो हि कृष्णाजिनं तस्माऽएवैत यज्ञाय निह्नुते तथो हनमेष यज्ञो न हिनस्ति तस्मादाह नमस्तेऽअस्तु मा मा हिꣳसीरिति ॥८॥

स वै जघनार्धऽइवैवाग्रऽआसीत । अथ यदग्रऽएव मध्य उपविशेद एन तनानुष्ठषा

अगली अँगुली से एक साथ) छूकर यह मन्त्र पढ़ता है—'ऋक् सामयो शिल्प स्थ (यजु० ४।६) 'तुम ऋक् और साम के प्रतिरूप हो' । शिल्प कहते हैं प्रतिरूप को । इसका तात्पर्य यह है कि 'ऋचाओं और सामों के प्रतिरूप हो' ॥५॥

अब कहता है, 'ते यामारभे' (यजु० ४।६) । 'मैं तुमको छूता हूँ' । जो दीक्षित होता है वह गर्भ बनकर छन्दों में घुस जाता है । इसलिये उसकी अँगुलियाँ सिकुड़ जाती हैं । गर्भ बंधी हुई मुट्ठी के समान होते हैं ॥६॥

और जब वह कहते हैं, 'मैं तुमको छूता हूँ' तो इसका तात्पर्य है कि 'मैं तुम में प्रवेश करता हूँ' । अब कहता है—'ते मा पातमास्य यज्ञस्योदृच' (यजु० ४।६) । 'तुम मेरी इस यज्ञ के अन्त तक रक्षा करो' । इसका तात्पर्य है कि तुम यज्ञ के अन्त तक मेरी रक्षा करो ॥७॥

अब दाहिनी जानु से उठता है । और पढ़ता है—'शर्मासि शर्म मे यच्छ' (यजु० ४।६) । 'तू शरण (कल्याण) है, मुझे शरण दे' । 'नमस्तेऽअस्तु मा मा हिꣳसी' (यजु० ४।६) । 'तुझे नमस्कार हो । तू मुझे पीड़ा न दे' । मनुष्य के लिये तो यह काला मृग का चर्म है । देवताओं के लिये यह 'शर्म' या 'शरण' है । जो अपने को यज्ञ के तल तक वह उठाता है वह मानों अपने को उच्चतर तल तक उठाता है । यह काला मृगचर्म यज्ञ है । इस प्रकार वह उस यज्ञ को प्रसन्न करता है जिससे यह यज्ञ उसे हानि न पहुँचावे । इसीलिये कहता है—'नमस्ते अस्तु मा मा हिꣳसी' ॥८॥

पहले वह मृगचर्म के पीछे की ओर बैठे । यदि पहले ही बीच में बैठ जावे और कोई उसको शाप दे 'कि यह नष्ट हो जायगा या इसका पतन हो जायगा' तो ऐसा हो ही

---

७ सामानि यस्य लोमानि ।

हरेद्द्रप्स्यति वा प्र वा पतिष्यतीति तथा हैव स्यात्तस्माज्जघनार्धऽइवाग्रऽआसीत ॥६॥

अथ मेखलां परिहरते। अङ्गिरसो ह वै दीक्षितानबल्यमविन्दन्ते नान्यद्व्रतादरा-नमनाकल्पयंस्तऽएतामूर्जमपश्यन्त्समासि तां मध्यत आत्मन ऊर्जमदधत समासि तया समाप्नुवन्तथोऽएवैष एतां मध्यत आत्मन ऊर्जं धत्ते समासिं तया समाप्नोति ॥१०॥

सा वै शाणी भवति। मृद्व्यसदिति न्येव शाणी यत्र वै प्रजापतिरजायत गर्भो भूत्वैतस्माद्यज्ञात्तस्य यन्नेदिष्ठमुल्बमासीत्ते शणास्तस्मात्ते पूतयो यान्ति यद्वस्य जरायुरासीत्त-दीक्षितवसनमन्तरं वाऽउल्ब जरायुणो भवति तस्मादेषान्तरा वाससो भवति स यथैवातः प्रजापतिरजायत गर्भा भूत्वैतस्माद्यज्ञादेवमेवैषोऽतो जायते गर्भो भूत्वैतस्माद्यज्ञात् ॥११॥

सा वै त्रिवृद्भवति। त्रिवृद्बध्नं पशवो ह्यन्न पिता माता यज्जायते तत्तृतीय तस्मा-त्त्रिवृद्भवति ॥१२॥

मुञ्जबल्वजान्यस्ता भवति। वज्रो वै शरो विरक्षस्तायै स्तुकासर्गꣳ सृष्टा भवति सा यन्मुञ्जेषु सृष्टा स्याद्यजेदमन्या रज्जवो मानुषी स्याद्यद्बल्वजेषु सृष्टा स्यात्पितृदेवत्या स्यात्तस्मात्स्तुकासर्गꣳ सृष्टा भवति ॥१३॥

जायगा। इसलिये उसको मृगचर्म के पिछले भाग में ही बैठना चाहिये ॥९॥

अब वह मेखला को पहनता है। पहले अंगिरा लोगों को दीक्षा दी जाने लगी तो उनमें निर्बलता आ गई क्योंकि उन्होंने व्रत के दूध के सिवाय और कुछ खाना नहीं तैयार किया था। तब उन्होंने इस (मेखला सम्बन्धी) व्रत को देखा और उसको प्राप्त करके शरीर के बीच (कमर) में बाँधा। इससे इनको पूर्णता प्राप्त हो गई ॥१०॥

यह (मेखला) सन की बनाई जाती है। सन की इसलिये बनाई जाती है कि नर्म रहे। जब प्रजापति गर्भ होकर उस यज्ञ से निकला तब जो उसका उल्ब था यह सन बन गया। इसीलिये उसमें बू आती है। और जो जरायु था यह दीक्षित का वस्त्र हो गया। उल्ब जरायु के भीतर होता है। इसीलिये यह (मेखला) वस्त्र के भीतर होती है। जैसे प्रजापति गर्भ होकर उस यज्ञ से निकला इसी प्रकार यह दीक्षित पुरुष भी गर्भ होकर उस यज्ञ से उत्पन्न होता है ॥११॥

मेखला तीन लड़ी वाली होती है। क्योंकि अन्न तीन भागों वाला होता है। पशु अन्न है। माता और पिता दो होते हैं। और तीसरा वह होता है जो पैदा होता है। इसी-लिये मेखला में तीन लड़ियाँ होती हैं ॥१२॥

यह मूँज से बनी होती है। मूँज का शर वज्र है। इसलिये इससे राक्षस भाग जाते हैं। यह रस्सी के समान गूँथी जाती है। अगर यह रस्सी के समान 'प्रसव्य' अर्थात् सूर्य की चाल के समान बाईं ओर से दाहिनी ओर को गूँथी जाय तो मानुषी हो जाय। यदि 'अप्रसव्य' अर्थात् दाहिनी ओर से बाईं ओर को गूँथी जाय तो पितरों जैसी हो जाय। इसलिये रस्सी के समान गूँथी जाती है ॥१३॥

तां परिहरते । ऊर्गस्याङ्गिरसीत्यङ्गिरसो ह्येतामूर्जमपश्यन्नूर्ण्रदा ऊर्जं मयि धेहीति नात्र तिरोहितमिवास्ति ॥१४॥

अथनीविं मुद्गृह्णते । सोमस्य नीविरसीत्यदीक्षितस्य वाऽअस्यैषाग्रे नीर्विभवत्यथात्र दीक्षितस्य सोमस्य तस्मादाह सोमस्य नीविरसीति ॥१५॥

अथ प्रोर्णुते । गर्भो वाऽएष भवति यो दीक्षते प्रावृता वै गर्भा उल्वेनैव जरायुणैव तस्माद्वै प्रोर्णुते ॥१६॥

स प्रोर्णुते । विष्णोः शर्मासि शर्म यजमानस्येत्युभयं वाऽएषोऽत्र भवति यो दीक्षते विष्णुश्च यजमानश्च यदह दीक्षते तद्विष्णुर्भवति यद्यजते तद्यजमानस्तस्मादाह विष्णोः शर्मासि शर्म यजमानस्येति ॥१७॥

अथ कृष्णविषाणाञ्च सिचि वध्नीते । देवाश्च वाऽअसुराश्चोभये प्राजापत्याः प्रजापतेः पितुर्दायमुपेयुर्मन एव देवा उपायन्वाचमसुरा यज्ञमेव तद्देवा उपायन्वाचमसुरा अमूमेव देवा उपायन्नियमसुराः ॥१८॥

ते देवा यज्ञमब्रुवन् । योषा वाऽइयं वागुपमन्त्रयस्व ह्वयिष्यते वै त्वेति स्वयं वा

उसको यह मंत्र पढ़कर धारण करता है—'ऊर्गस्याङ्गिरसि' (यजु० ४।१०) । क्योंकि अंगिरों ने इस 'ऊर्ज' को देखा था । 'ऊर्ण्रदाऽऊर्जं मयि धेहि' (यजु० ४।१०) । 'तू ऊन के समान नरम है, मुझे ऊर्ज दे' । यहाँ सब स्पष्ट है ॥१४॥

अब नीचे का मंत्र पढ़कर नीवि को बाँधता है, 'सोमस्य नीविरसि (यजु० ४।१०) । 'तू सोम की नीवि है' । पहले अदीक्षित की नीवि थी । अब दीक्षित की नीवि हो गई । इसलिये कहा, 'सोम की नीवि है' । (यहाँ सोम का अर्थ 'दीक्षित' प्रतीत होता है । ऋग्वेद के ९ वें मंडल में सोम इसी अर्थ में कई जगह आया है) ॥१५॥

अब वह (सिर को) ढकता है । जो दीक्षित होता है वह गर्भ बन जाता है । गर्भ उल्व और जरायुज से ढके होते हैं । इसलिये वह (सिर को) ढकता है ॥१६॥

वह यह मंत्र पढ़ कर ढकता है—'विष्णोः शर्मासि शर्म यजमानस्य' (यजु० ४।१०) । 'तू विष्णु की शरण है, यजमान की शरण है' । जो दीक्षित होता है वह विष्णु और यजमान दोनों होता है । चूँकि यह दीक्षित होता है इसलिये विष्णु बन जाता है और चूँकि यज्ञ करता है इसलिये यजमान हो जाता है । इसलिये कहा कि 'तू विष्णु की शरण है, यजमान की शरण है' ॥१७॥

अब यह काले हिरण के सींग को (अपने यज्ञ के) सिर से बाँधता है । देव और असुर दोनों प्रजापति की संतान अपने पिता प्रजापति के दायभाग को प्राप्त हुये । देवों ने मन को पाया और असुरों ने वाणी को । देवों ने उस (द्यौ) लोक को पाया और असुरों ने इस (पृथ्वी) लोक को ॥१८॥

उन देवों ने यज्ञ से कहा—'यह वाक् स्त्री है । तू इसको संबोधन कर । यह तुझे अपने

हैवेक्षत योषा वाऽइयं वागुपमन्त्रये ह्वयिष्यते वै मेति तामुपामन्त्रयत सा हास्माऽआरकादिवेवामऽआमूयत्तस्मादु स्त्री पुथ्ंसोपमन्त्रितारकादिवैवाग्रेऽमूयति स होवाचारकादिव वै मऽआमूयीदिति ॥१६॥

ते होचुः । उपैव भगवो मन्त्रयस्व ह्वयिष्यते वै त्वेति तामुपामन्त्रयत सा हास्मै निपलाशमिवोवाद तस्मादु स्त्री पुथ्ंसोपमन्त्रिता निपलाशमिवैव वदति स होवाच निपलाशमिव वै मेऽवादीदिति ॥२०॥

ते होचुः । उपैव भगवो मन्त्रयस्व ह्वयिष्यते वै त्वेति तामुपामन्त्रयत सा हैनं जुहुवे तस्मादु स्त्री पुमाथ्ंसथ्ं ह्वयन्तऽएवोत्तमथ्ं स होवाचाह्वत वै मेति ॥२१॥

ते देवा ईक्षां चक्रिरे । योषा वाऽइयं वाग्यदेनं न युवितेहैव मा तिष्ठन्तमभ्येहीति ब्रूहि ता तु न आगतां प्रतिप्रबूतादिति सा हैनं तदेव तिष्ठन्तमभ्येयाय तस्मादु स्त्री पुमाथ्ंसथ्ं सथ्ंस्कृते तिष्ठन्तमभ्यैति ताथ्ं हैभ्य आगतां प्रतिप्रोवाचेय वाऽआगादिति ॥२२॥

तां देवाः । असुरेभ्योऽन्तरायंस्ताथ्ं स्वीकृत्यारनावेव परिगृह्य सर्वहुतमजुहवुराहुतिर्हि देवानाथ्ं स यामेवाभूमनुष्टुभाजुहवुस्तदेवैनां तद्देवाः स्वयकुर्वत तेऽसुरा आत्तवचसो

पास बुलायेगी' । या शायद उसने स्वयं ही सोचा कि 'वाक् स्त्री है । मैं इसको संकेत करूँ । यह मुझे अपने पास बुला लेगी' । उसने उसकी ओर संकेत किया । परन्तु उसने दूर से उसको तिरस्कृत कर दिया । इसीलिये स्त्री पहले पुरुष का दूर से तिरस्कार कर देती है । उसने कहा, 'इसने मुझे दूर से ही तिरस्कृत कर दिया' ॥१६॥

वे देवता बोले, 'भले आदमी, फिर संकेत कर, वह तुझे बुला लेगी' । उसने इशारा किया, लेकिन (वाक् ने) उसकी ओर सिर हिलाकर इनकार कर दिया । इसीलिये जब कोई पुरुष स्त्री को बुलाता है तो वह सिर हिलाकर इनकार कर देती है । उसने कहा, 'इसने मुझे सिर हिलाकर इनकार कर दिया' ॥२०॥

उन्होंने कहा, 'भले आदमी, फिर संकेत कर, वह तुझे बुला लेगी' । उसने उसकी ओर इशारा किया । अब उस (वाणी) ने उसको बुला लिया । इसलिये जब मनुष्य इशारा करता है तो स्त्री उसको बुला ही लेती है । उसने कहा, 'इसने मुझे बुला लिया' ॥२१॥

अब देवों ने सोचा । 'यह वाणी स्त्री है । यह कहीं इसको छिपा न ले (और कहीं यज्ञ भी इस प्रकार असुरों के पास न चला जाय) । उससे कहो कि जहाँ मैं खड़ा हूँ, वहीं आ । और जब वह आ जाय तो सूचना दे' । अब वह वहाँ चली आई जहाँ वह खड़ा था । इसलिये स्त्री उसी घर में चली जाती है जहाँ पुरुष स्थित रहता है । उस (यज्ञ) ने उन (देवताओं) को सूचना दी कि सामने से वह आ गई ॥२२॥

तब देवों ने उसे असुरों से अलग कर लिया । अब देवों ने उसे स्वीकार करके अग्नि में सर्वहुत कर उसको देवताओं के लिये आहुति दे दी । और चूँकि अनुष्टुप छन्द से

हेऽलवो हेऽलव इति वदन्तः पराबभूवुः ॥२३॥

तत्रैतामपि वाचमूदुः। उपजिज्ञास्याश्च स म्लेच्छस्तस्मान्न ब्राह्मणो म्लेच्छेदसुर्या हैषा वागेवमेवैष द्विषताश्च सपत्नानामादत्ते वाचं तेऽस्यात्तवचसः पराभवन्ति य एवमेत द्वेद ॥२४॥

सोऽयं यज्ञो वाचमभिदध्यौ। मिथुन्येनया स्यामिति ताश्च संबभूव ॥२५॥

इन्द्रो ह वाऽईक्षां चक्रे। महद्वाऽइतोऽभ्यं जनिष्यते यज्ञस्य च मिथुनाद्वाचश्च यन्मा तस्माभिभवेदिति स इन्द्र एव गर्भो भूत्वैतन्मिथुनं प्रविवेश ॥२६॥

स ह संवत्सरे जायमान ईक्षां चक्रे। महावीर्यो वाऽइयं योनिर्यो मामदीधरत यद्वै मेतो महदेवाभ्व नानुप्रजायेत यन्मा तस्माभिभवेदिति ॥२७॥

ता प्रतिपरामृश्यावेष्टयाच्छिनत्। तां यज्ञस्य शीर्षन्प्रत्यदधाद्यज्ञो हि कृष्णः स यः स यज्ञस्तत्कृष्णाजिनं यो सा योनिः सा कृष्णविषाणाथ यदेनामिन्द्र आवेष्टयाच्छिनत्तस्मादावेष्टितेन स यथैवात इन्द्रोऽजायत गर्भो भूत्वैतस्मान्मिथुनादेवमेवैषोऽतो जायते गर्भो भूत्वैतस्मान्मिथुनात् ॥२८॥

आहुति दे दी, इसलिये उसको अपनी सत्ता में शामिल कर दिया (क्योंकि अनुष्टुभ वाणी है)। जब वाणी को देवों ने स्वीकार कर लिया तो असुर लोग कुछ न कह सके और 'हे ऽलवो हे लव' कहकर पराजित हो गये। (हाय वाक्, हाय वाक्) ॥२३॥

इस प्रकार उन्होंने अर्थहीन वाणी बोली। और जो ऐसी वाणी बोलता है वह म्लेच्छ है। इसलिये कोई ब्राह्मण म्लेच्छ भाषा न बोले क्योंकि वह आसुरी भाषा है। इसी प्रकार वह शत्रु को भाषा से वंचित कर सकता है। और जो इस रहस्य को समझता है उसके शत्रु भाषा से वंचित होकर पराजित हो जाते हैं ॥२४॥

अब इस यज्ञ ने चाहा कि वाणी के साथ प्रसंग करूँ। उसने प्रसंग किया ॥२५॥

अब इन्द्र ने सोचा कि यज्ञ और वाणी के प्रसंग से एक भीषण राक्षस उत्पन्न होगा। और मुझे हरा देगा। इसलिये इन्द्र स्वयं गर्भ होकर उसमें प्रविष्ट हो गया ॥२६॥

जब वह एक साल बाद पैदा हुआ तो सोचने लगा, 'जिस योनि ने मुझे धारण किया, वह तो 'महावीर्या' है। अब मैं ऐसी तरकीब करूँ कि इसमें कोई बड़ा राक्षस न पैदा हो जाय जो मुझे हरा दे' ॥२७॥

उसको पकड़कर और अच्छी तरह खींचकर उसने तोड़ डाला और यज्ञ के सिर पर रख दिया। कृष्णमृग यज्ञ है। कृष्ण मृगचर्म भी यज्ञ ही है और कृष्णमृग का सींग योनि है। और चूँकि इन्द्र ने खूब खींचकर योनि को तोड़ा इसीलिये सींग को बड़ी मजबूती से नस से बाँधते हैं। और जैसे इन्द्र गर्भ होकर उस जोड़ से उत्पन्न हुआ इसी तरह यजमान भी गर्भ होकर उस (सींग और चर्म) के जोड़ से उत्पन्न होता है ॥२८॥

ता वाऽउत्तानामिव बध्नाति । उत्तानेव वै योनिर्गर्भं विमर्त्यथ दक्षिणां भ्रुवमुपर्युपरि ललाटमुपस्पृशतीन्द्रस्य योनिरसीतीन्द्रस्य ह्येषा योनिरतो वा ह्येनां प्रविशन्प्रविशत्यतो वा जायमानो जायते तस्मादाहेन्द्रस्य योनिरसीति ॥२९॥ शतम् १५०० ॥

अथोल्लिखति । सुसस्याः कृषीरकृषीति यज्ञमेवैतज्जनयति यदा वै सुषमं भवत्यथालं यज्ञाय भवति यदो दुःषमं भवति न तर्ह्यात्मने चनालं भवति यद्यज्ञमेवैतज्जनयति ॥३०॥

अथ न दीक्षितः । काष्ठेन वा नखेन वा कण्डूयेत गर्भो वाऽएष भवति यो दीक्षते यो वै गर्भस्य काष्ठेन वा नखेन वा कण्डूयेदपास्यन्म्रियेत्ततो दीक्षितः पामनो भवितोर्दीक्षितं वाऽअनु रेताꣳसि ततो रेताꣳसि पामनानि जनितोः स्वा वै योनी रेतो न हिनस्त्येषा वाऽएतस्य स्वा योनिर्भवति यत्कृष्णविषाणा तथो हैनमेषा न हिनस्ति तस्मादीक्षितः कृष्णविषाणयैव कण्डूयेत नान्येन कृष्णविषाणायाः ॥३१॥

अथास्मै दण्डं प्रयच्छति । वज्रो वै दण्डो विरक्षस्तायै ॥३२॥

यह इस सींग को इस प्रकार बाँधता है कि खुला भाग ऊपर को रहे । क्योंकि योनि में गर्भ इसी प्रकार रहता है । अब दाहिनी भौं के ऊपर ललाट को (इस सींग से) छुआता है । यह मन्त्र पढ़कर—'इन्द्रस्य योनिरसि' (यजु० ४।१०) । 'तू इन्द्र की योनि है' । यह इन्द्र की योनि ही तो है क्योंकि इसमें प्रवेश होकर ही वह यजमान उसमें प्रवेश करता है और यहाँ से उत्पन्न होकर ही वहाँ से उत्पन्न होता है । इसीलिये कहता है कि 'तू इन्द्र की योनि है' ॥२९॥ [शतम् १५००]

अब वह उस सींग से एक लकीर खींचता है यह मन्त्राश पढ़कर—'सुसस्याः कृषी-रकृषि' (यजु० ४।१०) । 'कृषि को धान्य-पूरित कर' । इस प्रकार वह यज्ञ को उत्पन्न करता है क्योंकि जब सुकाल होता है तो यज्ञ के लिये पुष्कल सामग्री होती है । और जब दुष्काल होता है तो अपने लिये भी काफी नहीं होता । इसलिये यज्ञ को उत्पन्न करता है ॥३०॥

दीक्षित को खुजलाना नहीं चाहिये, न लकड़ी से, न नाखून से । जो दीक्षित होता है वह गर्भ हो जाता है । गर्भ को यदि कोई नाखून से या लकड़ी से खुजलावे तो वह बाहर निकल कर मर जायगा । इससे दीक्षित पुरुष को खुजली हो जायगी और उसके बाद उसकी जो सन्तान (रेत का अर्थ यहाँ सन्तान है) होगी वह भी खुजली वाली पैदा होगी । अपनी ही योनि अपनी सन्तान को हानि नहीं पहुँचाती । और यह जो कृष्णमृग का सींग है यह उसकी योनि है । इसलिये यह उसको हानि नहीं पहुँचाता । इसलिये दीक्षित को चाहिये कि कृष्णमृग के सींग से ही खुजलावे । कृष्णमृग के सींग के सिवाय किसी अन्य चीज से न खुजलावे ॥३१॥

अब (अध्वर्यु) उसको दण्ड (डंडा) देता है । राक्षसों को दूर करने के लिये, क्योंकि डंडा वज्र है ॥३२॥

औदुम्बरो भवति । अन्नं वाऽऊर्गुदुम्बर ऊर्जोऽन्नाद्यस्यावरुद्ध्यै तस्मादौदुम्बरो भवति ॥३३॥

मुखसंमितो भवति । एतावद्वै वीर्यꣳ स यावदेव वीर्यं तावांस्तद्भवति यन्मुखसंमितः ॥३४॥

तमुन्नयति । उन्नयस्व वनस्पतऽऊर्ध्वो मा पाह्यꣳहस आस्य यज्ञस्योदृचः इत्यूर्ध्वो मा गोपायास्य यज्ञस्य सꣳस्थाया इत्येवैतदाह ॥३५॥

अत्र हैके । अङ्गुलीश्च न्यञ्चन्ति वाचं च यच्छन्त्यतो हि किं च न जघिष्यन्भवतीति वदन्तस्तदु तथा न कुर्याद्यथा पराञ्चं धावन्तमनुलिप्सेत तं नानुलभेतैवꣳ ह स यज्ञं नानुलभते तस्मादमुत्रैवाङ्गुलीर्न्यञ्चेदमुत्र वाचं यच्छेत् ॥३६॥

अथ यद्दीक्षितः । ऋचं वा यजुर्वा साम वाभिव्याहरत्यभिस्थिरमभिस्थिरमेवैतद्यज्ञमारभते तस्मादमुत्रैवाङ्गुलीर्न्यञ्चेदमुत्र वाच यच्छेत् ॥३७॥

अथ यद्वाचं यच्छति । वाग्वै यज्ञो यज्ञमेवैतदात्मन्धत्तेऽथ यद्वाचंयमो व्याहरति तस्मादु हैष विसृष्टो यज्ञः पराङावर्तते तन्नो वैष्णवीमृचं वा यजुर्वा जपेद्यज्ञो वै विष्णुस्तद्यज्ञं

यह उदुम्बर का होता है । तेज और अन्न की प्राप्ति के लिये । क्योंकि उदुम्बर अन्न और तेज है । इसलिये डंडा उदुम्बर लकड़ी का होता है ॥३३॥

यह डंडा उसके मुख तक पहुँचना चाहिये । उतना ही उसका वीर्य (बल) होता है । जो डंडा मुख तक पहुँचता है वह उसके वीर्य (पराक्रम की शक्ति) के बराबर होता है ॥३४॥

यह इस मंत्र को पढ़कर उसको खड़ा करता है—'उन्नयस्व वनस्पतऽऊर्ध्वो मा पाह्यꣳहस आस्य यज्ञस्योदृचः' (यजु० ४।१०) । 'हे डंडे, तू खड़ा हो । इस यज्ञ के अन्त तक पहुँचने के लिये मुझे पाप से बचा' । इसका तात्पर्य यह है कि यज्ञ की समाप्ति तक खड़ा होकर मेरी रक्षा कर ॥३५॥

इसी अवसर पर कुछ लोग अँगुलियों को चटखाते और वाणी को बोलते हैं । क्योंकि अब इसके पीछे कुछ भी न बोल सकेगा । परन्तु ऐसा नहीं करना चाहिये क्योंकि अगर कोई भाग जाय और दूसरा उसको पकड़ने दौड़े और न पकड़ पावे, इस प्रकार यहाँ वह यज्ञ को नहीं पकड़ पावेगा । इसलिये उसी (पहले कहे अवसर पर) अँगुलियों को चटखावे और वाणी को बोले ॥३६॥

जब दीक्षित पुरुष (वाणी को रोकने के पश्चात्) या तो कोई ऋचा बोले, या साम या यजुः, तो वह यज्ञ को स्थिर बनाता है । इसलिये उसी अवसर पर अँगुलियों को चटखाता और वाणी को रोकता है ॥३७॥

और जब वह वाणी को रोकता है तो मानो यज्ञ को उसी के आत्मा में स्थापित करता है क्योंकि वाणी यज्ञ है । परन्तु जब वाणी को रोककर उससे यज्ञ से इतर कोई बात

पुनरारभते तस्यो हैषा प्रायश्चित्तिः ॥३८॥

अथैक उद्ददति । दीक्षितोऽयं ब्राह्मणो दीक्षितोऽयं ब्राह्मण इति निवेदितमेवैनमेतत्सन्तं देवेभ्यो निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदित्ययं युष्माकैकोऽभूत्तं गोपायतेत्येवैतदाह त्रिष्कृत्व आह त्रिवृद्धि यज्ञः ॥३९॥

अथ यद्ब्राह्मण इत्याह । अनद्धेव वाऽअस्यातः पुरा जामं भवतीदꣳ ह्यग्रे रक्षाꣳसि योषितमनुसचन्ते तदुत रक्षाꣳस्येव रेत आदधतीत्यथाग्राद्धा जायते यो ब्रह्मणो यो यज्ञाज्जायते तस्मादपि राजन्यं वा वैश्यं वा ब्राह्मण इत्येव ब्रूयाद्ब्रह्मणो हि जायते यो यज्ञाज्जायते तस्मादाहुर्न सवनकृतꣳ हन्यादेनस्वी हैव सवनकृतेति ॥४०॥ ब्राह्मणम् ॥ ५ ॥ [२. १.] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या ॥१२४॥

कहता है तो यज्ञ छूट कर भाग जाता है । उस समय विष्णु सम्बन्धी ऋचा या यजुः का पाठ करना चाहिये । क्योंकि यज्ञ विष्णु हैं । इस प्रकार वह फिर यज्ञ को प्राप्त कर लेता है । यही उस भूल का प्रायश्चित्त है ॥३८॥

इस पर कोई पुकारता है, 'यह ब्राह्मण दीक्षित हो गया, यह ब्राह्मण दीक्षित हो गया' । इस प्रकार घोषित करके वह इसको देवताओं के प्रति घोषित करता है, 'यह महावीर्य है । इसने यज्ञ को पा लिया । यह तुम गे से एक हो गया । इसकी रक्षा कीजिये' । वह तीन बार कहता है क्योंकि यज्ञ तीन भागों वाला है ॥३९॥

उसे अब तक 'ब्राह्मण' कहते हैं यह उसका ब्राह्मण होना अनिश्चित है क्योंकि ऐसा कहा जाता है कि राक्षस लोग स्त्रियों के पीछे घूमा करते हैं और उनमें अपना वीर्य स्थापित कर देते हैं । इसलिये सच्चा ब्राह्मण वही है जो यज्ञ से उत्पन्न होता है । इसलिये क्षत्रिय या वैश्य को भी ब्राह्मण कहना चाहिये । क्योंकि जो यज्ञ से उत्पन्न होता है वह ब्राह्मण ही है । इसलिये कहते हैं कि यज्ञ करने वाले को कभी न मारे । ऐसा करना महापाप है ॥४०॥

अध्याय २—ब्राह्मण २

वाचं यच्छति । स वाचंयम आरतऽआरतमयात्तद्वाचं यच्छति ॥१॥

यज्ञेन वै देवाः । इमा जिति जिग्युर्यैषामियं जितिस्ते होचुः कथं न इदं मनुष्येरन्नभ्यारोहाथ स्यादिति ते यज्ञस्य रसं पीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन

वह बोलता नहीं । सूर्यास्त तक मौन रखता है । न बोलने का कारण यह है ॥१॥

देवों को जो महत्ता प्राप्त है वह उनको यज्ञ से मिली है । उन्होंने कहा, 'कौन सी विधि हो कि जो लोक हमको प्राप्त हैं उसे मनुष्य न ले सकें' । उन्होंने यज्ञ के रस को इस

योपयित्वा तिरोऽभवन्नथ यदेनानयोपयंस्तस्मादूपो नाम ॥२॥

तद्वा ऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः सम्भृत एवं वाऽएष यज्ञꣳ सम्भरति यो दीक्षते वाग्वै यज्ञः ॥३॥

तामस्तमिते वाचं विसृजते । संवत्सरो वै प्रजापतिः प्रजापतिर्यज्ञोऽहोरात्रे वै संवत्सर एते ह्येनं परिप्लवमाने कुरुतः सोऽह्नदीक्षिष्ट स रात्रिं प्रापत्स यावानेव यज्ञो यावत्यस्य मात्रा तावन्तमेवैतदाप्त्वा वाचं विसृजते ॥४॥

तद्धैके । नक्षत्रं दृष्ट्वा वाच विसर्जयन्त्यत्रानुष्ठयास्तमितो भवतीति वदन्तस्तदु तथा न कुर्यात्क्व ते स्युर्यन्मेघः स्यात्तस्माद्यत्रैवानुष्ठयास्तमितं मन्येत तदवे वाच विसर्जयेत् ॥५॥

अनेनो हैके वाचं विसर्जयन्ति । भूर्भुवः स्वरिति यज्ञमाप्याययामो यज्ञꣳ संदध्म इति वदन्तस्तदु तथा न कुर्यान्न ह्स यज्ञमाप्याययति न संदधाति य एतेन वाचं विसर्जयति ॥६॥

अनेनैव वाचं विसर्जयेत् । व्रतं कृणुत व्रतं कृणुताग्निर्वाव्राग्निर्यज्ञो वनस्पतिर्यज्ञिय इत्येष ह्यस्यान यज्ञो भवत्येतद्धविर्यथा पुराग्निहोत्रं तद्यज्ञेनैवैतद्यज्ञꣳ सम्भृत्य यज्ञे यज्ञं

प्रकार चूस लिया जैसे मधुमक्खी शहद को चूसती है। और चूसे हुये यज्ञ के फोक को यूप के पास फैलाकर छिप गये। यूप को यूप इसलिये कहते हैं कि इसके पास उन्होंने यज्ञ को बखेर दिया (अयोपयन्) ॥२॥

ऋषियों ने इस बात को सुना। उन्होंने यज्ञ को इकट्ठा किया। जैसे वह यज्ञ इकट्ठा किया गया इसी प्रकार जो पुरुष दीक्षित हो जाता है वह भी यज्ञ को इकट्ठा करता है। वाणी ही यज्ञ है ॥३॥

सूर्य के अस्त होने पर मौन तोड़ता है। प्रजापति सम्वत्सर है। प्रजापति यज्ञ है। रात-दिन सम्वत्सर हैं। क्योंकि दोनों घूम-फिर कर सम्वत्सर बनाते हैं। वह दिन में दीक्षित हुआ और अब उसने रात प्राप्त कर ली। जितना यज्ञ है, जितनी इसकी मात्रा है उतना ही प्राप्त करके वह मौन को तोड़ता है ॥४॥

कुछ लोगों की राय है कि जब तारा दीख जाय तो मौन तोड़ दे क्योंकि तभी सूर्य अस्त हुआ समझा जाता है। परन्तु ऐसा न करे क्योंकि यदि बादल हो तो कैसा होगा। इसलिये जब समझे कि सूर्य अस्त हो गया तभी मौन तोड़ दे ॥५॥

कुछ लोग 'भूर्भुवः स्वः' कहकर मौन तोड़ते हैं। क्योंकि इस प्रकार यज्ञ में बल आ जाता है, यज्ञ चंगा हो जाता है। परन्तु ऐसा न करे क्योंकि ऐसा करने से न तो यज्ञ में बल आता है न वह चंगा ही होता है ॥६॥

इस मन्त्र से मौन तोड़े—'व्रतं कृणुत व्रतं कृणुताग्निर्वाव्राग्निर्यज्ञो वनस्पतिर्यज्ञिय' (यजु० ४।११)। 'व्रत (व्रत का भोजन) करो क्योंकि अग्नि व्रत है, अग्नि यज्ञ है, वनस्पति यज्ञ के लिये है'। यही उसका इस समय का यज्ञ है। यही हवि है जैसे पहले अग्निहोत्र

प्रतिष्ठापयति यज्ञेन यज्ञꣳ संतनोति संततꣳ ह्येवास्यैतद्व्रतं भवत्या सुत्यायै त्रिष्कृत्व आह त्रिवृद्धि यज्ञः ॥७॥

अथाग्निमभ्यावृत्य वाचं विसृजते । न ह स यज्ञमाप्याययति न संदधाति योऽतोऽन्येन वाचं विसृजते स प्रथम व्याहरन्त्सत्यं वाचोऽभिव्याहरति ॥८॥

अग्निर्ब्रह्मेति । अग्निर्ह्येव ब्रह्माग्निर्यज्ञ इत्यग्निर्ह्येव यज्ञो वनस्पतिर्यज्ञिय इति वनस्पतयो हि यज्ञिया न हि मनुष्या यजेरन्यद्वनस्पतयो न स्युस्तस्मादाह वनस्पतिर्यज्ञिय इति ॥९॥

अथास्मै व्रतꣳ श्रपयन्ति । देवान्वाऽएष उपावर्तते यो दीक्षते स देवतानामेको भवति श्रृतं वै देवानाꣳ हविर्नाश्रृतं तस्माच्छ्रपयन्ति तदेष एव व्रतयति नाग्नौ जुहोति तथदेष एव व्रतयति नाग्नौ जुहोति ॥१०॥

यज्ञेन वै देवाः । इमा जिति जिग्युर्यैषामियं जितिस्ते होचुः कथं न इदं मनुष्येरन्भ्यारोहाꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुस्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तन्माद्यूपो नाम ॥११॥

था । इस प्रकार यज्ञ से यज्ञ को पुष्ट करता है, यज्ञ में यज्ञ की प्रतिष्ठा करता है । यज्ञ से यज्ञ को तानता है । क्योंकि यह व्रत का भोजन सोम खींचने तक काम देता है । वह 'व्रतकृणुत' को तीन बार दुहराता है क्योंकि यह यज्ञ तीन भागों वाला है ॥७॥

वह अग्नि की ओर घूमकर मौन तोड़ता है । जो और कुछ पढ़कर मौन तोड़ता है वह न यज्ञ को प्रबल बनाता है और न यज्ञ को चंगा करता है । पहला वाक् बोलकर वह सच बोलता है ॥८॥

वह कहता है, 'अग्निर्ब्रह्म' । क्योंकि अग्नि ही ब्रह्म है । 'अग्निर्यज्ञः' क्योंकि अग्नि ही यज्ञ है । 'वनस्पतिर्यज्ञियः' क्योंकि वनस्पतियाँ ही यज्ञ है । यदि वनस्पतियाँ न हों तो मनुष्य यज्ञ कैसे करें । इसलिये कहा, 'वनस्पतिर्यज्ञियः' ॥९॥

अब वह उसके लिये 'व्रत के भोजन' को पकाते हैं । जो दीक्षित होता है वह देवों के समीप हो जाता है । देवों में से एक हो जाता है । देवों का खाना पका होना चाहिये, न कि कच्चा । इसलिये पकाते हैं । यह इस दूध (व्रत-भोजन) को पीता है, आहुति नहीं देता । वह स्वयं खा लेता है और आहुति क्यों नहीं देता इसका कारण यह है—॥१०॥

देवों को जो विजय प्राप्त है वह उन्होंने यज्ञ के द्वारा प्राप्त की है । उन्होंने कहा कि कौन सी विधि हो कि इस को मनुष्य न पा जायें । उन्होंने यज्ञ के रस को ऐसे चूस लिया जैसे शहद की मक्खियाँ शहद को । और बचे हुये यज्ञ के पोंक को यूप के द्वारा बखेर कर छुप गये । चूँकि इसके द्वारा यज्ञ के पोंक को बखेरा (अयोपयन्) इसलिये इसका यूप नाम पड़ा ॥११॥

तद्वा ऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः सम्भृत एष वाऽअत्र यज्ञो भवति यो दीक्षतऽएष ह्येनं तनुतऽएष एनं जनयति तद्यदेवात्र यज्ञस्य निर्धीतं यद्विदुग्धं तदेवैतत्पुराप्याययति यदेष एव व्रतयति नाग्नौ जुहोति न हाप्याययेद्यदग्नौ जुहुयाज्जुह्व हैव मन्येत नाजुह्वत् ॥१२॥

इमे वै प्राणाः । मनोजाता मनोयुजो दक्षक्रतवो वाग्वेवाग्निः प्राणोदानौ मित्रावरुणौ चक्षुरादित्यः श्रोत्रं विश्वेदेवा एतासु हैवास्यैतद्देवतासु हुतं भवति ॥१३॥

तद्धैके । प्रथमे व्रतऽउभौ व्रीहियवावापन्त्युभाभ्याꣳ रसाभ्यां यदेवात्र यज्ञस्य निर्धीतं यद्विदुग्धं तत्पुनराप्याययाम इति वदन्तो यद्धु व्रतदुघा न दुहीत यस्यैवातः कामयेत तस्य व्रतं कुर्यादेतदु ह्येवास्यैताऽउभौ व्रीहियवावन्वारब्धौ भवत इति तदु तथा न कुर्याद्य ह स यज्ञमाप्याययति न संदधाति य उभौ व्रीहियवावापति तस्मादन्यतरमेवावपेद्वर्षाऽअस्यैताऽउभौ व्रीहियवौ भवतः स यदेवास्यैतौ हविर्भवतस्तदेवास्यैतावन्वारब्धौ भवतो यद्धु व्रतदुघा न दुहीत यस्यैवातः कामयेत तस्य व्रतं कुर्यात् ॥१४॥

इसको ऋषियों ने सुना । उन्होंने यज्ञ को इकट्ठा किया । जैसे वह यज्ञ इकट्ठा किया गया उसी प्रकार वह जो दीक्षित होता है यज्ञ ही हो जाता है । क्योंकि यही उसको तानता है और उत्पन्न करता है । और यज्ञ का रस चूस लिया गया था उस रस से वह फिर यज्ञ को युक्त कर देता है जब वह व्रत-भोजन (दूध) को पीता है और आहुतियाँ नहीं देता । यदि वह इसकी आहुति देवे तो यज्ञ को इससे युक्त न कर सके । परन्तु उसको सोचना चाहिये कि मैं आहुति ही दे रहा हूँ न कि आहुति नहीं दे रहा ॥१२॥

यह प्राण (मनोजाता) मन से ही उत्पन्न हुये हैं । और (मनोयुजः) मन से युक्त और (दक्ष क्रतव') ज्ञान से युक्त हैं । अग्नि वाणी है । मित्र और वरुण प्राण और उदान हैं । आदित्य चक्षु है और सब देव श्रोत्र हैं । इन्हीं देवताओं को यह आहुति देता है (दूध पान करना मानो इन देवताओं के लिये आहुति देना है) ॥१३॥

कुछ लोग पहले दिन के व्रत-भोज में चावल और जौ मिला लेते हैं । उनका कहना है कि यज्ञ का जो भाग चूस लिया गया उसको हम इन दोनों पदार्थों के द्वारा फिर प्राप्त कराते हैं । और यदि व्रत की गाय दूध न दे तो इन्हीं पदार्थों से व्रत का भोजन बना ले । इस प्रकार चावल और जौ दोनों अन्वारब्ध हो जाते हैं । लेकिन ऐसा न करना चाहिये । क्योंकि जो चावल और दोनों जौ मिलाता है वह न तो यज्ञ को रस से युक्त करता है न उसे चंगा करता है । इसलिये इनमें से एक ही मिलाना चाहिये । चावल और जौ (दर्शपूर्ण-मास में तो) दोनों के काम में आते हैं । और उस समय उनका आरब्ध हो ही जाता है । यदि व्रत की गौ दूध न दे तो इन दोनों पदार्थों में से किसी से अपनी इच्छानुसार व्रत-भोज बना ले ॥१४॥

तद्धैके। प्रथमे व्रते सर्वौषधꣳ सर्वसुरभ्यावपन्ति यदि दीक्षितमार्तिर्विन्देद्येनैवातः कामयेत तेन भिषज्येद्यथा व्रतेन भिषज्येदिति तदु तथा न कुर्यान्मानुषꣳ ह ते यज्ञे कुर्वन्ति व्यृद्धं वै तद्यज्ञस्य यन्मानुषं नेद्व्यृद्धं यज्ञे करवाणीति यदि दीक्षितमार्तिर्विन्देद्येनैवातः कामयेत तेन भिषज्येत्समाप्तिर्ह्येव पुरुषा ॥१५॥

अथास्मै व्रतं प्रयच्छति। अतिनीय मानुषं कालꣳ सायं दुग्धमपररात्रे प्रातर्दुग्धमपराह्णे व्याकृत्याऽएव दैवं चैवैतन्मानुषं च व्याकरोति ॥१६॥

अथास्मै व्रतं प्रदास्यन्नप उपस्पर्शयति। दैवी धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहसꣳ सुतीर्थां नोऽअसद्वशाऽइति मानुषाय वाऽएष पुराशनायावनेनिक्तोऽथान दैव्यै धिये तस्मादाह दैवी धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहसꣳ सुतीर्थां नोऽअसद्वशाऽइति स यावत्कियच्च व्रतं व्रतयिष्यन्नप उपस्पृशेदेतेनैवोपस्पृशेत् ॥१७॥

अथ व्रतं व्रतयति। ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते नोऽवन्तु ते नः

कुछ लोग प्रथम दिवस के व्रत-भोज में सब औषध और सब सुगन्धित पदार्थ मिला लेते हैं कि यदि दीक्षित पुरुष को कोई रोग हो जाय तो जिस पदार्थ की इच्छा हो उसके द्वारा चंगा हो जाय जैसे व्रत-भोज से चंगा हो जाता है। परन्तु ऐसा न करना चाहिये। क्योंकि यह अशुभ है। यह मानुषी प्रवृत्ति है। और जो मानुषी है वह यज्ञ के लिये अशुभ होती है। यदि दीक्षित पुरुष को रोग हो जाय तो वह जिससे चाहे उससे अपने को चंगा कर सकता है। पूर्णता होनी चाहिये। (अर्थात् रोग की अवस्था में जो उपचार हो उसको यज्ञ का अंश क्यों बनाया जाय ॥१५॥

मानुषी काल को बिताने के पश्चात् अध्वर्यु उसे व्रत-भोज देता है। शाम का दूध रात के पिछले पहर में और प्रातः का दूध दोपहर के बाद। यह व्याकृति (Distinction) के लिये। इस प्रकार वह दैवी कार्य को मानुषी कार्य से अलग करता है ॥१६॥

जब वह उसको व्रत-भोज देता है तो उससे जल छुआता है। इस मन्त्र को पढ़कर—'दैवी धिय मनामहे सुमृडीकामभिष्टये वर्चोधा यज्ञवाहसꣳ सुतीर्था नोऽअसद्वशे' (यजु०४।११)। 'अपने सुख की पूर्ति के लिये हम सुख देने वाली, ब्रह्मवर्चस को बढ़ाने वाली, यज्ञ को धारण करने वाली दैवी बुद्धि को चाहते हैं। वह हमारे लिये सुतीर्थ और वश में रहने वाली हो जाय'। इससे पहले वह मानुषी भोजन के लिये अपने आपको पवित्र बनाता था, अब दैवी भोजन के लिये। इसीलिये वह ऊपर का मंत्र पढ़ता है। जब-जब व्रत-भोज ग्रहण करने के लिये वह कोई विधि करे तो यह मन्त्र पढ़ना चाहिये ॥१७॥

अब वह व्रत-भोज को इस मन्त्र से ग्रहण करता है—'ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते नोऽवन्तु ते नः पान्तु तेभ्यः स्वाहा' (यजु० ४।११)। 'जो मनोजाता, मनोयुजः और दक्षक्रतु देव हैं, वे हमारी रक्षा करें। हमको सुरक्षित रखें। उनके लिये स्वाहा'। इस प्रकार ग्रहण किया हुआ व्रत-भोज वषट्कार की आहुति के समान हो

पान्तु तेभ्यः स्वाहेति तद्यथा वषट्कृतꣳ हुतमेवमस्यैतद्भवति ॥१८॥

अथ व्रतं व्रतयित्वा नाभिमुपस्पृशते । श्वात्राः पीता भवत यूयमापोऽअस्माकमन्तरुदरे सुशेवाः । ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदन्तु देवीरमृता ऋतावृध इति देवान्वाऽएष उपावर्तते यो दीक्षते स देवतानामेको भवत्यनुत्सिक्तं वै देवानाꣳ हविरथैतद्व्रतप्रदो मिश्याकरोति व्रतमुपोत्सिञ्चन्व्रतं प्रमीणाति तस्यो हैषा प्रायश्चित्तिस्तथो हास्यैतन्न मिश्राकृतं भवति न व्रतं प्रमीणाति तस्मादाह श्वात्राः पीता भवत यूयमापोऽअस्माकमन्तरुदरे सुशेवाः । ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदन्तु देवीरमृता ऋतावृध इति स यावत्किञ्च व्रतं व्रतयित्वा नाभिमुपस्पृशेदेतेनैवोपस्पृशेत्कस्तद्वेद यद्व्रतप्रदो व्रतमुपोत्सिञ्चेत् ॥१९॥

अथ यत्र मेक्ष्यन्भवति । तत्कृष्णविषाणया लोष्टं वा किंचिद्धोपहन्तीयं ते यशिया तनूरितीयं वै पृथिवी देवी देवयजनी सा दीक्षितेन नाभिमिक्षा तस्या एतदुद्यृह्यैव यशिया तनूमथायशियꣳ शरीरमस्मिमेहत्यपो मुञ्चामि न प्रजामित्युभयं वाऽअत एत्यापश्च रेतश्च स एतदप एव मुञ्चति न प्रजामꣳ होमुचः स्वाहाकृता इत्यथंहस इव ह्येता मुञ्चन्ति यदुदरे

जाता है ॥१८॥

व्रत भोज को ग्रहण करने के अनन्तर वह नाभि को इस मन्त्र से छूता है—'श्वात्राः पीता भवत यूयमापोऽअस्माकमन्तरुदरे सुशेवाः । ताऽअस्मभ्यमयक्ष्मा अनमीवाऽअनागसः स्वदन्तु देवीरमृताऽऋतावृधः' (यजु० ४।१२) । 'हे जलो, जो तुम पिये गये हो वह हमारे पेट में जाकर अच्छी सेवा करने वाले होओ । यह पवित्र दिव्य और अमृत रूपी जल हमको नीरोग और बलिष्ठ करें' । जो दीक्षित होता है वह देवों के समीप हो जाता है और देवों मे से एक हो जाता है । देवों की हवि किसी बाह्य वस्तु से मिली नहीं होती । अब यदि व्रत-भोज में कुछ मिल जाय तो ऐसा समझना चाहिये मानो देवों की हवि मिलावट कर दी गई । यह पाप है । इस पाप का यह प्रायश्चित है जो ऊपर का मन्त्र पढा गया (अर्थात् यजु० ४।१२) । क्योंकि सम्भव है कि व्रत भोज बनाने में कुछ मिलावट हो गई हो । जब व्रत भोज पीने के पश्चात् नाभि-स्पर्श करे तो इस मन्त्र को पढकर करना चाहिये ॥१९॥

जब पेशाब करे तो काले मृग के सींग से मिट्टी का ढेला उठाये । और पढे—'इयं ते यशिया तनूः' (यजु० ४।१३) । 'यह तेरा यश सम्बन्धी शरीर है' । क्योंकि यह पृथ्वी देवी है और यश की साधक है । दीक्षित को चाहिये कि इसे दूषित न करे । उस (पृथ्वी) के इस यश सम्बन्धी शरीर को (अर्थात् ढेले को) उठाकर इस अ-यश सम्बन्धी शरीर द्वारा लघुशंका से अपने को पवित्र करता है यह कहकर—'अपो मुञ्चामि न प्रजाम्' (यजु० ४।१३) । 'जलों को छोड़ता हूँ, न कि सन्तान को' । इस स्थान से दोनों निकलते हैं जल भी और वीर्य भी । यहाँ वह जल को छोड़ता है, न कि प्रजा को । अब कहता है, 'अꣳहो मुच स्वाहा कृता' (यजु० ४।१३) । अर्थात् '(यह जल) पाप को दूर करने वाले और स्वाहा से पवित्र

गुप्तिं भवति तस्मादाहाथ्स होमुच इति स्वाहाकृता. पृथिवीमाविशतेत्याहुतयो भूत्वा शान्ताः पृथिवीमाविशतेत्येवैतदाह ॥२०॥

अथ पुनर्लोष्टं न्यस्यति । पृथिव्या सम्भवेतीयं वै पृथिवी देवी देवयजनी सा दीक्षितेन नामिमिक्ष्या तस्या एतदुद्गृह्यैव यज्ञियां तनूमथायज्ञियꣳ शरीरमभ्यमिक्षत्तामेनाम्याभेतत्पुनर्यज्ञिया तनूं दधाति तस्मादाह पृथिव्या सम्भवेति ॥२१॥

अथाग्नये परिदाय स्वपिति । देवान्वाऽएष उपावर्तते यो दीक्षते स देवतानामेको भवति न वै देवाः स्वपन्त्यननरुद्धो वाऽएतस्याग्निर्भवत्यग्निर्वै देवानां व्रतपतिस्तस्माऽएवैतत्परिदाय स्वपित्यग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमहीत्यग्ने त्वं जागृहि वयꣳ स्वप्स्याम इत्येवैतदाह रक्षाणोऽअप्रयुच्छन्निति गोपाय नोऽप्रमत्त इत्येवैतदाह प्रबुधे नः पुनस्कृधीति यथेतः सृप्त्वा स्वस्ति प्रबुध्यामहा ऽएवं नः कुर्वित्येवैतदाह ॥२२॥

अथ यत्र सुप्त्वा पुनर्नावद्रास्यन्भवति । तद्वाचयति पुनर्मनः पुनरायुर्मऽआगन्पुनः प्राणः पुनरात्मा मऽआगन्पुनश्चक्षुः पुनः श्रोत्रं मऽआगन्निति सर्वं ह वाऽएते स्वपतोऽपक्रिये गये हैं' अर्थात् पहले दूध के रूप में पान किये गये थे । क्योंकि उदर में जो कष्ट-युक्त जल (मूत्र) होता है उसको दूर करते हैं । अब कहता है—'पृथिवीमाविशत' (यजु० ४।१३) । 'पृथिवी में प्रवेश करो' । (मूत्र को सम्बोधन करके) । अर्थात् यह कहता है कि 'आहुति बनकर शान्त होकर पृथिवी में प्रवेश करे' ॥२० ॥

अब फिर ढेले को फेंक देता है यह कहकर—'पृथिव्या सभव' (यजु० ४।१३) । 'पृथिवी से मिल जा' । यह पृथिवी देवी और यज्ञ की स्थली है । दीक्षित को चाहिये कि उसे मूत्र से अपवित्र न करे । उसके इस यज्ञ सम्बन्धी शरीर को उठाकर उस अ-यज्ञ-सम्बन्धी शरीर में मूत्र छोड़ा । अब उसको फिर यज्ञ सम्बन्धी शरीर में रख देता है । इसलिये कहता है—'पृथिव्या सभव' (यजु० ४।१३) । 'पृथिवी में मिल जा' ॥२१॥

अब अपने आप को अग्नि के सुपुर्द करके सो रहता है । जो दीक्षित होता है वह देवों के समीप खिंच आता है । वह देवों में एक हो जाता है । देव तो सोते नहीं । परन्तु वह सोये बिना रह नहीं सकता । अग्नि देवों में व्रतपति है । इसलिये वह अपने को अग्नि के समर्पण करके सोता है यह पढ़कर—'अग्ने त्वꣳ सुजागृहि वयꣳ सु मन्दिषीमहि' (यजु० ४।१३) । 'हे अग्नि ! तू जाग और हम भली भाति आराम कर लें' । अर्थात् वह अग्नि से कहता है कि तू जाग और हम सोवें । फिर वह कहता है—'रक्षाणोऽअप्रयुच्छन्' (यजु० ४।१३) । 'हमारी निरन्तर रक्षा कर' । अर्थात् प्रमादरहित होकर रक्षा कर । 'प्रबुधे नः पुनस्कृधि' (यजु० ४।१३) । 'हम अच्छी तरह जागें' । अर्थात् हमको इस योग्य बना कि हम जब जागें तो स्वस्थ हों ॥२२॥

अब सो चुकने के पश्चात् फिर उसे आलस्य न आ जाय इसलिये (अध्वर्यु) उससे यह मन्त्र बुलवाता है, 'पुनर्मनः पुनरायुर्मऽआगन्पुनः प्राणः पुनरात्मा मऽआगन्

क्रामन्ति प्राण एव न तैरेवैतत्सुप्त्वा पुनः संगच्छते तस्मादाह पुनर्मनः पुनरायुर्मऽआगन्पुनः प्राणः पुनरात्मा मऽआगन्पुनश्चक्षुः पुनः श्रोत्रं मऽआगन् । वैश्वानरोऽअदब्धस्तनूपा अग्निर्नः पातु दुरितादवद्यादिति तद्यदेवान्न स्वप्नेन वा येन वा मिथ्याकर्म तस्मान्नः सर्वस्मादग्निर्गोपायत्वित्येवैतदाह तस्मादाह वैश्वानरो अदब्धस्तनूपा अग्निर्नः पातु दुरितादवद्यादिति ॥२३॥

अथ यदीक्षितः । अव्रत्यं वा व्याहरति कुध्यति वा तन्मिथ्याकरोति व्रतं प्रमीणात्यक्रोधो खेव दीक्षितस्याग्निर्वै देवानां व्रतपतिस्तमेवैतदुपधावति त्वमग्ने व्रतपा असि देवऽआ मर्त्येष्वा । त्वं यज्ञेष्वीड्योऽइति तस्यो हैवा प्रायश्चित्तिरतथो हास्यैतन्न मिथ्याकृतं भवति न मर्त्येष्वा । त्वं यज्ञेष्वीड्य इति तस्मादाह त्वमग्ने व्रतपा असि देवऽआ मर्त्येष्वा । त्वं यज्ञेष्वीड्य इति ॥२४॥

अथ यदीक्षितायाभिहरन्ति । तस्मिन्याचयति रास्वेयत्सोमा भूयो भरेति सोमो ह वाऽअस्माऽएतद्यच्छते यदीक्षितायाभिहरन्ति स यदाह रास्वेयत्सोमेति रास्व न इयत्सोमेत्येवैतद्

पुनश्चक्षु. पुन. श्रोत्र मऽआगन्' (यजु० ४।१५) । 'मेरा मन फिर आ गया । मेरी आयु फिर आ गई । मेरे प्राण फिर आ गये । मेरा आत्मा फिर आ गया । मेरी आँख फिर आ गई । मेरे कान फिर आ गये' । सोने वाले के यह सब उससे दूर हो जाते हैं । केवल प्राण रह जाता है । इसलिये कहा—'पुनर्मनः पुनरायुर्मऽआगन् पुन. प्राणः पुनरात्मा मऽआगन् पुनश्चक्षुः पुनः श्रोत्र मऽआगन् । वैश्वानरोऽअदब्धस्तनूपाऽअग्निन. पातु दुरि. तादवद्यात्' (यजु० ४।१५) । 'वैश्वानर अर्थात् सब पुरुषों का हितकारक और 'अदब्ध' अर्थात् किसी से न सताया हुआ अग्नि हमको निन्दित (नाम न लेने योग्य) पाप से बचावे' । उसके कहने का तात्पर्य यह है कि जो सोने मे या अन्यथा पाप हो सकते हों उनसे ईश्वर हमारी रक्षा करे । इसलिये यह मन्त्र पढ़ता है, 'पुनर्मनः····· दुरितादवद्यात्' (यजु० ४।१५) ॥२३॥

जो पुरुष दीक्षित हुआ है वह यदि व्रत के विरुद्ध आचरण करता है या क्रोध करता है तो वह पाप करता है और व्रत को भग कर देता है । दीक्षित पुरुष को क्रोध नहीं करना चाहिये । अग्नि देवों का व्रतपति है । इसलिये उसी का आश्रय लेता है यह मन्त्र पढकर—'त्वमग्ने व्रतपाऽअसि देवऽआ मर्त्येष्वा । त्व यज्ञेष्वीड्य ' (यजु० ४।१६) । 'हे अग्नि देव आप व्रत के पालने वाले हैं । मनुष्यों के बीच में । आप यज्ञों मे प्रशसा के योग्य हैं' । यह उस पाप का प्रायश्चित है । ऐसा पढने से वह यह दोष नहीं करता और न उसका व्रत भग होता है । इसलिये वह कहता है 'त्वमग्ने व्रतपा''''''यज्ञेष्वीड्य ' (यजु० ४।१६) ॥२४॥

अब लोग दीक्षित पुरुष के लिये जो भेंट देते हैं उस समय (अध्वर्यु) उससे यह जाप कराता है—'रास्वेयत् सोमा भूयो भर' (यजु० ४।१६) । 'हे सोम इतने को दे । और अधिक को भरपूर कर' । जो भेंट लाई जाती है उसका सोम ही देने वाला है । इसलिये

दाहा भूयो भरेत्या नो भूयो हरेत्येवैतदाह देवो नः सविता वसोर्दाता वस्वदादिति तथो हास्माऽएतत्सवितृप्रसूतमेव दानाय भवति ॥२५॥

पुरास्तमयादाह । दीक्षित वाचं यच्छेति तामस्तमिते वाचं विसृजते पुरोदयादाह दीक्षित वाचं यच्छेति तामुदिते वाचं विसृजते संतत्याऽएवाहरेवैतद्रात्र्या संतनोत्यहा रात्रिम् ॥२६॥

नैनमन्यत्र चरन्तमभ्यस्तमियात् । न स्वपन्तमभ्युदियात्स यदेनमन्यत्र चरन्तमभ्यस्तमियाद्रात्रेरेनं तदन्तरियाद्यत्स्वपन्तमभ्युदियादहन एनं तदन्तरियान्नात्र प्रायश्चित्तिरस्ति प्रतिगुप्यमेवैतस्मात् न पुरावभृथादपोऽभ्येयान्नैनमभिवर्षेदनवक्लृप्तꣳ ह तद्यत्पुरावभृथादपोऽभ्येयाद्यद्वैनमभिवर्षेदथ परिह्वालं वाचं वदति न मानुषीं प्रसूतां तद्यत्परिह्वालं वाचं वदति न मानुषी प्रसूताम् ॥२७॥

यज्ञेन वै देवाः । इमां जिति जिग्युर्यैषामियं जितिरते होचुः कथं न इदं मनुष्यैरभ्यारोहेयꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन

कहता है 'रास्वेयत् सोमाभूयोभर' । तात्पर्य यह है कि हे सोम ! इतना हमारे लिये दे और आगे के लिये अधिक ला । अब कहता है—'देवो नः सविता वसोर्दाता वस्वदात्' (यजु० ४।१६) । 'धन के दाता सविता देव ने यह धन मुझे दिया' । इस प्रकार यह दान सविता से प्रेरित हुआ होता है ॥२५॥

सूर्य अस्त से पहले (अध्वर्यु) कहता है, 'दीक्षित पुरुष, तू वाणी को रोक' । सूर्यास्त से पीछे वह वाणी को छोड़ देता है । सूर्य उदय के पहले (अध्वर्यु) कहता है, 'दीक्षित पुरुष, तू वाणी को रोक' । सूर्योदय के पीछे वह वाणी को छोड़ देता है । यह वह सिलसिला कायम रखने के लिये करता है । दिन का रात के साथ सिलसिला कायम करता है और रात का दिन के साथ ॥२६॥

ऐसा न हो कि वह (यज्ञशाला से) बाहर हो और सूर्य अस्त हो जाय और न ऐसा हो कि वह सोता रहे और सूर्य-उदय हो जाय । यदि वह बाहर हो और सूर्यास्त हो जाय तो सूर्य उसके और रात के बीच मे अन्तर डाल देगा और अगर सूर्योदय के समय सोता रहेगा तो सूर्य उसके और दिन के बीच में अन्तर डाल देगा अर्थात् उसका सिलसिला (सन्तति) टूट जायगा । इसका कोई प्रायश्चित भी नहीं है । इसलिये इससे बचा रहे । स्नान से पहले जलों में न जावे और न वर्षा मे भीगे । क्योंकि स्नान से पहले जलों में प्रवेश करना या वर्षा में भीगना अनुचित है । रुक-रुक कर बोलता है । मनुष्य की भाँति नहीं । रुक-रुक कर क्यों बोलता है और मनुष्य की भाँति क्यों नहीं । इसका कारण नीचे दिया है ॥२७॥

देवों ने उस विजय को जो उनको प्राप्त है यज्ञ के द्वारा ही प्राप्त किया । उन्होंने कहा, 'यह जगत् ऐसा कैसे हो जिसमें मनुष्य न रह सकें' । उन्होंने यज्ञ के रस को चूस लिया जैसे मधुमक्खी शहद को । यज्ञ को दुह कर उसे यूप से तितर बितर करके छिप गये ।

योपयित्वा तिरोऽगन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम ॥२८॥

तद्धाऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः सम्भृत एवं वाऽएष यज्ञꣳ सम्भरति यो दीक्षते वाग्वै यज्ञस्तद्यदेवात्र यज्ञस्य निर्धीतं यद्दिदुग्धं तदेवैतत्पुनरा-प्याययति यत्परिहालं वाचं वदति न मानुषीं प्रसूतां न हाप्याययेद्यत्प्रसूतां मानुषीं वाचं वदेत्तस्मात्परिहालं वाचं वदति न मानुषीं प्रसूताꣳ ॥२९॥

स वै धीक्षते । वाचे हि धीक्षते यज्ञाय हि धीक्षते यज्ञो हि वाग्धीक्षितो ह वै नामै-तद्दीक्षित इति ॥३०॥ ब्राह्मणम् ॥ १ [२. २.] ॥ ॥

चूँकि यूप के द्वारा तितर बितर किया इसलिये इसका नाम यूप पड़ा ॥२८॥

ऋषियों ने इसको सुना। उन्होंने यज्ञ को इकट्ठा किया। जैसे यह यज्ञ इकट्ठा किया गया उसी प्रकार जो दीक्षित होता है वह यज्ञ को इकट्ठा करता है। क्योंकि वाणी ही यज्ञ है। और यज्ञ का जो भाग चूस लिया गया उसको रुक-रुक कर बोलकर फिर स्थापित कर देता है और मनुष्य के समान नहीं बोलता। यदि वह मनुष्य की भाँति जल्दी-जल्दी बोले तो उस भाग को स्थापित न कर सके। इसलिये वह मनुष्य की भाँति नहीं बोलता किन्तु रुक-रुक कर बोलता है ॥२९॥

अब वह 'धीक्षते' अर्थात् दीक्षा लेता है। वाणी के लिये दीक्षा लेता है। यज्ञ के लिये दीक्षा लेता है। वाणी ही यज्ञ है। 'धीक्षा' को ही 'दीक्षा' कहते हैं ॥३०॥

अध्याय १—ब्राह्मण ३

आदित्यं चरुं प्रायणीयं निर्वपति । देवा ह वाऽअस्यां यज्ञं तन्वाना इमां यज्ञा-दन्तरीयुः सा हैषामियं यज्ञं मोहयां चकार कथं नु मयि यज्ञं तन्वाना मां यज्ञादन्तरीयु-रिति तथ्ꣳ ह यज्ञं न प्रजज्ञुः ॥१॥

ते होचुः । यन्वस्यामेव यज्ञमतथ्ꣳसमहि कथं नु नोऽमुहत्कथं न प्रजानीम इति ॥२॥

अदिति के लिये प्रायणीय चरु बनाता है। (यहाँ प्रायणीय-इष्टि का वर्णन है)। जब देव इस पृथिवी पर यज्ञ रचाने लगे तो उन्होंने इस पृथिवी को ही यज्ञ से बहिष्कृत कर दिया। उस पृथिवी ने उनके इस यज्ञ को मोहित (गड़बड़) कर दिया। उसने कहा कि यह लोग मेरे ऊपर तो यज्ञ रचते हैं और मुझी को यज्ञ से बाहर निकाले देते हैं। उनको इस यज्ञ का प्रज्ञान न हुआ ॥१॥

उन्होंने कहा, 'हमने जिस यज्ञ को इस पृथिवी में रचा वह यज्ञ गड़बड़ कैसे हो गया ? हमको इसका प्रज्ञान क्यों न हो सका' ? ॥२॥

ते हाचुः । अस्यामेव यज्ञं तन्वाना इमा यज्ञादन्तरगाम सा न इयमेव यज्ञमभूदुहेदिमामेवोपधावामेति ॥३॥

ते होचुः । यन्नु त्वय्येव यज्ञमतथ्सम्हि कथं नु नोऽमुहत्कथं न प्रजानीम इति ॥४॥

सा होवाच । मय्येव यज्ञं तन्वाना मा यज्ञादन्तरगात सा वोऽहमेव यज्ञमभूमुह भाग नु मे कल्पयताथ यज्ञं द्रक्ष्यथाथ प्रज्ञास्यथेति ॥५॥

तथेति देवा अब्रुवन् । तवैव प्रायणीयस्तवोदयनीय इति तस्मादेष आदित्य एव प्रायणीया भवत्यादित्य उदयनीय इयथ्सु लोकादितिस्ततो यज्ञमपश्यस्ततमतन्वत ॥६॥

स यदादित्यं चरुं प्रायणीयं निर्वपति । यज्ञस्यैव दृष्टयै यज्ञं दृष्ट्वा कीणानि तनवाऽइति तस्मादादित्यं चरुं प्रायणीयं निर्वपति तद्वै निरुप्तथ्सं हविरासीदनिष्टा देवता ॥७॥

अथैभ्यः पथ्यां स्वस्तिं प्रारोचत । तामयजन्वाग्वै पथ्या स्वस्तिर्वाग्यज्ञस्तद्यज्ञमपश्यस्ततमतन्वत ॥८॥

अथैभ्योऽग्निं प्रारोचत । तमयजन्त स यदाग्नेयं यज्ञस्यासीत्तदपश्यन्यद्वै शुष्कं यज्ञस्य

उन्होंने कहा, 'हमने इसी पर यज्ञ रचा और इसी को यज्ञ से बाहर कर दिया। इसी ने यज्ञ को गड़बड़ा दिया। इसलिये इसी के पास चलें' ॥३॥

उन्होंने कहा, 'तब हमने तेरे ही ऊपर यज्ञ रचा तो यह यज्ञ गड़बड़ा कैसे गया? हमको इस यज्ञ का प्रज्ञान कैसे न हो सका'? ॥४॥

उन्होंने उत्तर दिया, 'तुमने मेरे ही ऊपर यज्ञ रचा, मुझी को यज्ञ से बाहर कर दिया। मैंने ही यज्ञ को गड़बड़ा दिया। मेरा भाग निकाल दो। तब तुम यज्ञ को देखोगे, तभी तुमको इसका परिज्ञान होगा' ॥५॥

देवों ने कहा, 'अच्छा ऐसा ही करेंगे। प्रायणीय और उदयनीय आहुतियाँ तेरी ही होंगी'। इसलिये प्रायणीय आहुति अदिति की होती है और उदयनीय भी अदिति की। यह पृथ्वी ही अदिति है। तब उन्होंने यज्ञ को देखा और उसको रच डाला ॥६॥

वह जो अदिति के लिये प्रायणीय चरु बनाता है वह यज्ञ के दर्शन के लिये। 'यज्ञ को देखकर मैं (सोम) को खरीदूँगा और यज्ञ को रचूँगा' ऐसा सोचकर वह अदिति के लिये प्रायणीय चरु तैयार करता है। हवि तो तैयार हो गई थी परन्तु (अदिति) देवता के लिये दी नहीं गई थी ॥७॥

अब इनको पथ्य-स्वस्ति (मार्ग का कल्याण) मिली। उसके लिये इन्होंने आहुति दी। वाणी ही पथ्य-स्वस्ति है। वाणी ही यज्ञ है। इस प्रकार उन्होंने यज्ञ को देखा और उसको रचा ॥८॥

अब उनको अग्नि मिला। उसके लिये उन्होंने आहुति दी। अब उन्होंने यज्ञ के

तदाग्नेयं तदपश्यंस्तदतन्वत ॥९॥

अथैभ्यः सोमः प्रारोचत । तमयंजन्त्स यत्सौम्यं यज्ञस्यासीत्तदपश्यन्यद्वाऽआर्द्रं यज्ञस्य तत्सौम्यं तदपश्यंस्तदतन्वत ॥१०॥

अथैभ्यः सविता प्रारोचत । तमयजन्पशवो वै सविता पशवो यज्ञस्तद्यज्ञमपश्यंस्त मतन्वताथ यस्यै देवतायै हविर्निरुप्तमासीत्तामयजन् ॥११॥

ता वाऽएताः । पञ्च देवता यजति यो वै स यज्ञो मुग्ध आसीत्पाङ्क्तो वै स आसीत्तमेताभिः पञ्चभिर्देवताभिः प्राजानन् ॥१२॥

ऋतवो मुग्धा आसन्पञ्च । तानेताभिरेव पञ्चभिर्देवताभिः प्राजानन् ॥१३॥

दिशो मुग्धा आसन्पञ्च । ता एताभिरेव पञ्चभिर्देवताभिः प्राजानन् ॥१४॥

उदीचीमेव दिशम् । पथ्यया स्वस्त्या प्राजानंस्तस्मादनोत्तराहि वाग्वदति कुरुपञ्चालवा वाग्व्येषा निदानेनोदीचीꣳ ह्येतया दिशं प्राजानन्नुदीची ह्येतस्यै दिक् ॥१५॥

प्राचीमेव दिशम् । अग्निना प्राजानंस्तस्मादग्निं पश्चात्प्राञ्चमुद्धृत्योपासते प्राचीꣳ

उस भाग को देखा जो अग्नि का भाग था । यज्ञ का जो शुष्क भाग है वह अग्नि का है । उसको उन्होंने देखा और रचा ॥९॥

अब इनको सोम मिला । उसके लिये उन्होंने आहुति दी । अब उन्होंने यज्ञ के उस भाग को देखा जो सोम का भाग था । यज्ञ का जो गीला भाग है वह सोम का भाग है । उसको उन्होंने देखा और रचा ॥१०॥

अब इनको सविता मिला । उसके लिये उन्होंने आहुति दी । पशु ही सविता है । पशु ही यज्ञ हैं । उस यज्ञ को उन्होंने देखा । उस यज्ञ को रचा । इस प्रकार जिस देवता के लिये हवि बनाई गई उसी के लिये दी गई ॥११॥

अब यह पाँच देवताओं को आहुति देता है । क्योंकि जब यह यज्ञ गड़बड़ाया गया तो इसके पाँच भाग हो गये । इन पाँच देवताओं के द्वारा उनको उनका ज्ञान हुआ ॥१२॥

ऋतुयें भी गड़बड़ाकर पाँच हो गईं । इनको भी पाँच देवताओं के द्वारा जाना गया ॥१३॥

दिशायें भी गड़बड़ा कर पाँच हो गईं । इनको भी पाँच देवताओं के द्वारा पहचाना गया ॥१४॥

पथ्य-स्वस्ति के द्वारा उन्होंने उत्तर दिशा को पहचाना । इसलिये कुरु पाचालों में वाणी ही उत्तर (उत्कृष्ट) होती है । यह (पथ्य-स्वस्ति) वाणी ही तो है । इसी के द्वारा उन्होंने उत्तर दिशा को पहचाना । इस (पथ्य-स्वस्ति) की दिशा उत्तर है ॥१५॥

पूर्व दिशा को अग्नि के द्वारा पहचाना । इसलिये अग्नि के पीछे से होकर पूर्व को ओर ले जाते हैं, और उसकी उपासना करते हैं । क्योंकि (अग्नि) के द्वारा उन्होंने पूर्व

ह्येतेन दिशं प्राजानन्प्राची ह्येतस्य दिक् ॥१६॥

दक्षिणामेव दिशꣳ । सोमेन प्राजानंस्तस्मात्सोमं क्रीतं दक्षिणा परिवहन्ति तस्मादाहुः पितृदेवत्यः सोम इति दक्षिणाꣳ ह्येतेन दिशं प्राजानन्दक्षिणा ह्येतस्य दिक् ॥१७॥

प्रतीचीमेव दिशꣳ । सवित्रा प्राजानन्नेष वै सविता य एष तपति तस्मादेष प्रत्यङ्डेति प्रतीचीꣳ ह्येतेन दिशं प्राजानन्प्रतीची ह्येतस्य दिक् ॥१८॥

ऊर्ध्वामेव दिशम् । अदित्या प्राजानन्नियं वाऽअदितिस्तस्मादस्यामूर्ध्वा ओषधयो जायन्तऽऊर्ध्वा वनस्पतय ऊर्ध्वाꣳ ह्येतया दिशं प्राजानन्नूर्ध्वा ह्येतस्यै दिक् ॥१९॥

शिरो वै यज्ञस्यातिथ्यम् । बाहू प्रायणीयोदयनीयावभितो वै शिरो बाहू भवतस्तस्मादभित आतिथ्यमेते हविषी भवतः प्रायणीयश्चोदनीयश्च ॥२०॥

तदाहुः । यदेव प्रायणीये क्रियेत तदुदयनीये क्रियेत यदेव प्रायणीयस्य बर्हिर्भवति तदुदयनीयस्य बर्हिर्भवतीति तदपोद्धृत्य निदधाति ताꣳ स्थालीꣳ सान्नाम्यकर्पौ प्रमृज्य मेक्षणं निदधाति यऽएव प्रायणीयस्यऽर्त्विजो भवन्ति तऽउदयनीयस्यऽर्त्विजो भवन्ति तद्यदेतत्समानं यज्ञे क्रियते तेन बाहू सदृशौ तेन सरूपौ ॥२१॥

दिशा को पहचाना और पूर्व दिशा उसी की है ॥१६॥

दक्षिण दिशा को सोम के द्वारा पहचाना। इसलिये सोम क्रय के पीछे उसको दक्षिण को ले जाते हैं। इसीलिये कहते हैं कि सोम पितृ-देव वाला है। उसी के द्वारा उन्होंने दक्षिण दिशा को पहचाना। दक्षिण दिशा इसी की है ॥१७॥

सविता के द्वारा उन्होंने पश्चिम दिशा को पहचाना। क्योंकि सविता तपता है। इसीलिये वह पश्चिम को जाता है। उसी के द्वारा उन्होंने पश्चिम को पहचाना। पश्चिम दिशा उसी की है ॥१८॥

अदिति के द्वारा उन्होंने ऊर्ध्व (ऊपर की) दिशा को पहचाना। यह (पृथिवी) ही अदिति है। इसलिये इस पृथिवी पर ओषधियाँ ऊपर को उगती हैं। उसी के द्वारा उन्होंने ऊपर की दिशा को पहचाना। ऊपर की दिशा उसी की है ॥१९॥

(सोम के प्रति) जो आतिथ्य किया जाता है वह यज्ञ का शिर है। प्रायणीय और उदयनीय (अर्थात् आरम्भ की और अन्त की क्रियायें) यज्ञ के बाहू हैं। बाहू शिर के दोनों ओर रहते हैं। इसलिये प्रायणीय और उदयनीय आतिथ्य के दोनों ओर होती हैं ॥२०॥

कुछ लोग कहते हैं कि जो कृत्य प्रायणीय में हो वही उदयनीय में भी हो। जो प्रायणीय की बर्हि है वही उदयनीय की भी, वह इसको वहाँ से हटाकर अलग रख देता है। थाली को भुने हुये चर्म के साथ और चमचे (मेक्षणं) को मांज कर एक ओर रख देता है। जो प्रायणीय के ऋत्विज् होते हैं वही उदयनीय के भी होते हैं। यह यज्ञ में एक से होते हैं। इसलिये एक सा स्वरूप होने के कारण यह यज्ञ के बाहू कहलाते हैं ॥२१॥

तदु तथा न कुर्यात् । काममेवैतद्बर्हिरनुप्रहरेदेवं मेक्षणं निर्णिज्य स्थालीं निदध्याद्यऽएव प्रायणीयस्यऽर्त्विजो भवन्ति तऽउदयनीयस्यऽर्त्विजो भवन्ति यदु ते विप्रेताः स्युरन्यऽएव स्युः स यद्वै समानीर्देवता यजति समानानि हवीꣳषि भवन्ति तेनैव बाहू सदृशौ तेन सरूपौ ॥२२॥

स वै पञ्च प्रायणीये देवता यजति । पञ्चोदयनीये तस्मात्पञ्चेत्थादङ्गुलयः पञ्चेत्थात्तच्छम्ब्यन्तं भवति न पत्नीः संयाजयन्ति पूर्वार्धं वाऽअन्यदात्मनो बाहू पूर्वार्धमेवैतद्यज्ञस्याभिसंस्करोति तस्माच्छम्ब्यन्तं भवति न पत्नीः संयाजयन्ति ॥२३॥ ब्राह्मणम् ॥ २ ॥ [२. ३] ॥ ॥

परन्तु ऐसा नहीं करना चाहिये। बर्हि को (आग में) डाल देना चाहिये और चमचे को भी। और थाली को मांज कर अलग रख देना चाहिये। जो प्रायणीय के ऋत्विज् हों वही उदयनीय के भी हों। यदि कोई मर जाय तो दूसरे नियत कर लिये जायँ। यह दोनों यज्ञ के बाहू इसलिये हैं कि इनके देवता एक ही हैं और आहुतियाँ एक ही। इस प्रकार इनका स्वरूप भी एक ही है ॥२२॥

प्रायणीय में पाँच देवताओं की आहुतियाँ दी जाती हैं, और उदयनीय में भी। इसलिये पाँच अँगुलियाँ यहाँ हैं और पाँच अँगुलियाँ वहाँ। प्रायणीय के अन्त में शम्यु होता है, पत्नी-संयाज नहीं होता। भुजायें शरीर का अगला भाग हैं। यह प्रायणीय भी यज्ञ का अगला भाग है। इसलिये इसके अन्त में शम्यु होता है, पत्नी-संयाज नहीं होता ॥२३॥

अध्याय १—ब्राह्मण ४

दिवि वै सोम आसीत् । अथेह देवास्ते देवा अकामयन्ता नः सोमो गच्छेत्तेनागतेन यजेमहीति तऽएते मायेऽअसृजन्त सुपर्णीं च कद्रूं च तद्दिप्यानां ब्राह्मणे व्याख्यायते सौपर्णीकाद्रवं यथा तदास ॥१॥

तेभ्यो गायत्री सोममच्छापतत् । तस्याऽअहरन्त्यै गन्धर्वो विश्वावसुः पर्यमुष्णात्ते

सोम द्यौलोक में था, और देव यहाँ (पृथ्वी पर) थे। देवों ने चाहा कि सोम हमारे समीप आ जाय। तो उसके द्वारा यज्ञ करें। उन्होंने दो माया बनाईं, सुपर्णी और कद्रू। सुपर्णी और कद्रू की कथा दिप्यों के ब्राह्मण में लिखी है ॥१॥

उनके लिये गायत्री सोम के पास उड गई। जब वह उसे ला रही थी तो गन्धर्व विश्वावसु ने उसको चुरा लिया। देवताओं ने जान लिया कि सोम अब द्यौलोक में नहीं है

देवा अविदुः प्रच्युतो वै परस्तात्सोमोऽथ नो नागच्छति गन्धर्वा वै पर्यमोषिपुरिति ॥२॥

ते होचुः । योषित्कामा वै गन्धर्वा वाचमेवैभ्यः प्रहिणवाम सा नः सह सोमेनागमिष्यतीति तेभ्यो वाचं प्राहिणवन्तैनान्त्सह सोमेनागच्छत् ॥३॥

ते गन्धर्वा अन्वागत्याब्रुवन् । सोमो युष्माकं वागेवास्माकमिति तथेति देवा अब्रुवन्विहो चेदागान्मैनामभीपहेव नेष्ट विह्वयामहाऽइति तां व्यह्वयन्त ॥४॥

तस्यै गन्धर्वाः । वेदानेव प्रोचिरऽइति वै वयं विद्मेति वयं विद्मेति ॥५॥

अथ देवाः । वीणामेव सृष्ट्वा वादयन्तो निगायन्तो निपेदुरिति वै ते वयं गारयाम इति त्वा प्रमोदयिष्यामहऽइति सा देवानुपावर्त सा वै सा तन्मोघमुपावर्त या स्तुवद्भ्यः शंसद्भ्यो नृत्तं गीतमुपावर्त तस्मादप्येतर्हि मोघरांऽहिता एव योषा एवꣳ हि वागुपावर्तत तामु ह्वन्या अनु योषास्तस्माद्य एव नृत्यति यो गायति तस्मिन्नेवैता निमिश्लतमा इव ॥६॥

तद्वा ऽएतदुभयं देवेष्वासीत् । सोमश्च वाक्च स यत्सोमं क्रीणात्यागत्याऽएवागतेन यजाऽइत्यनागतेन ह वै स सोमेन यजते योऽक्रीतेन यजते ॥७॥

गन्धर्वों ने इसे चुरा लिया है ॥२॥

उन्होंने कहा, 'गन्धर्व लोगों को स्त्रियाँ प्रिय हैं । उनके पास वाणी भेज दें । वह सोम के साथ हमारे पास चली आवेगी । उन्होंने वाणी को भेजा और वह सोम को लेकर चली आई ॥३॥

गन्धर्व उसके पीछे-पीछे आये और कहने लगे कि 'सोम तुम्हारा और वाणी हमारी' । देवों ने कहा, अच्छा । परन्तु यदि वह यहाँ आना चाहे तो उसको बलात्कार से न ले जाओ । उसको राजी करो' । इस प्रकार उन्होंने उसको राजी करना चाहा ॥४॥

गन्धर्वों ने उसके लिये वेदों का पाठ किया और कहने लगे, 'हम जानते हैं, हम जानते हैं' ॥५॥

तब देवों ने वीणा बनाई और बजा-बजाकर कहने लगे कि 'हम इस प्रकार बजायेंगे, हम इस प्रकार तुझे प्रसन्न करेंगे' । वह देवों के पास चली आई । परन्तु वह व्यर्थ ही आई क्योंकि जो लोग स्तुति और प्रार्थना करते थे (अर्थात् वेद-पाठी गन्धर्व) उनसे हटकर गाने-बजाने वालों के पास आ गई । इसीलिये स्त्रियाँ आज तक व्यर्थ बातों में फँसी रहती हैं । जैसे वाणी ने किया वैसे ही अन्य स्त्रियाँ भी करती हैं । और जो गाता-बजाता है उसी पर वे मोहित हो जाती हैं ॥६॥

इस प्रकार सोम और वाणी दोनों देवों को मिल गये । सोम को खरीदा इसलिये जाता है कि अपनी सम्पत्ति से यज्ञ किया जा सके । यदि बिना खरीदे सोम से यज्ञ किया तो मानों नाजायज़ सम्पत्ति से यज्ञ किया गया ॥७॥

अथ यदभ्रुनामाज्यं परिशिष्टं भवति । तज्जुहा चतुर्गृह्णो निगृह्णाति बर्हिषा हिरण्यं प्रतप्याधाय जुहोति कृत्स्नेन पयसा जुहवानीति समानजन्म वै पयश्च हिरण्य चोभयꣳ ह्यग्निरेतसꣳ ॥८॥

स हिरण्यमवदधाति । एषा ते शुक्र तनूरेतद्वर्च इति वर्चो वाऽएतद्धिरण्य तया सम्भर भ्राजं गच्छेति स यदाह तया सम्भरेति तया सम्पृच्यस्वेत्येवैतदाह भ्राजं गच्छेति सोमो वै भ्राट् सोमं गच्छेत्येवैतदाह ॥९॥

ता यथैवादो देवाः । प्राहिणवन्त्सोममछैवमेवैनामेष एतत्प्रहिणोति सोममछ वाग्वै सोमक्रयणी निदानेन तामेतयाहुत्या प्रीणाति प्रीतया सोम क्रीणानीति ॥१०॥

स जुहोति । जूरसीत्येतद्ध वा अस्या एक नाम यज्जूरसीति धृता मनसेति मनसा वाऽइय वाग्धृता मनो वाऽइद पुरस्ताद्वाच इत्य वद मैतद्वादीरित्यलग्लमिव ह वै वाग्वदेद्यग्नो न स्यात्तस्मादाह धृता मनसेति ॥११॥

जुष्टा विष्णवऽइति । जुष्टा सोमायेत्येवैतदाह यमछेम इति तस्यास्ते सत्यसवसः

घृत में जो घी बचा था, उसको चार भाग करके जुहू में डाल देता है। और बर्हि (कुशा) से सोने का टुकड़ा बाँधकर (जुहू में) रख देता है और आहुति देते समय कहता है कि मैं शुद्ध घी से आहुति देता हूँ क्योंकि घी और सोना दोनों समान-जन्मा हैं। दोनों की उत्पत्ति अग्नि के वीर्य से हुई ॥८॥

सोने के टुकड़े को रखने में यह मन्त्र पढ़ता है—'एषा ते शुक्र तनूरेतद् वर्च.' (यजु० ४।१७)। 'हे चमकने वाले शुक्र या अग्नि यह (घी) तेरा शरीर है यह (सोना) तेरी ज्योति है। हिरण्य यानी सोना वस्तुत. ज्योति ही है। अब कहता है—'तया सम्भर भ्राज गच्छ' (यजु० ४।१७)। 'उससे मिल और ज्योति को प्राप्त कर'। 'उससे मिल' का अर्थ है 'उसके साथ संयुक्त हो जाय'। 'ज्योति को प्राप्त कर' का अर्थ है 'सोम को प्राप्तकर'। क्योंकि 'भ्राज' या 'ज्योति' का अर्थ है 'सोम' ॥९॥

जिस प्रकार देवों ने वाणी को सोम के पास भेजा था इसी प्रकार इसको भी यह सोम के पास भेजता है। वाणी ही सोम-क्रय करने वाली है। इस आहुति से यह इसी को प्रसन्न करता है, कि इसको प्रसन्न करके ही सोम को क्रय करूँगा ॥१०॥

अब यह आहुति देता इस मन्त्र से—'जूरसि' (यजु० ४।१७)। 'तू स्तुति करने वाला है'। 'जू' वाणी का एक नाम है। अब कहता है—'धृता मनसा' (यजु० ४।१७)। 'मन से धारण की गई'। यह वाणी मन से धारण की जाती है क्योंकि पहले मन चलता है और कहता है 'यह कह, यह मत कह'। यदि मन साथ न हो तो वाणी असंगत हो जाय इसलिये वह कहता है 'मन से धारण की गई' ॥११॥

अब कहता है—'जुष्टा विष्णवे' (यजु० ४।१७)। 'विष्णु के लिये प्रिय'। इसका तात्पर्य है 'सोम के लिये, जिसको हम प्राप्त हो रहे हैं'। अब कहता है—'तस्यास्ते सत्यसवसः

प्रसवऽइति सत्यप्रसवा न एधि सोमं नोऽछेहीत्येवैतदाह तन्वो यन्त्रमशीय स्वाहेति स ह वै तन्वो यन्त्रमश्नुते यो यज्ञस्योदृचं गच्छति यज्ञस्योदृचं गच्छानीत्येवैतदाह ॥१२॥

अथ हिरण्यमपोद्धरति। तन्मनुष्येषु हिरण्यं करोति स यत्सहिरण्यं जुहुयात्सरायु हैवैतन्मनुष्येभ्यो हिरण्यं प्रवृञ्ज्यात्तन्न मनुष्येषु हिरण्यमभिगम्येत ॥१३॥

सोऽपोद्धरति। शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवमसीति कृत्स्नेन पयसा हुत्वा यदेवैतत्तदाह शुक्रमसीति शुक्रꣳ ह्येतच्चन्द्रमसीति चन्द्रꣳ ह्येतदमृतमसीत्यमृतꣳ ह्येत-द्वैश्वदेवमसीति वैश्वदेवꣳ ह्येतत्समुच्य तृणं बर्हिष्यपि सृजति सूत्रेण हिरण्यं प्रबध्नीते ॥१४॥

अथापरं चतुर्गृहीतमाज्यं गृहीत्वा। अन्वारभस्व यजमानेत्याहापोर्णुवन्ति शालायै द्वारे दक्षिणतः सोमक्रयण्युपतिष्ठते तत्प्रहितामेवैनामेतत्सती प्राहैषीद्वाग्वै सोमक्रयणी निदानेन तामेतयाहुत्या प्रैषीत्प्रीतया सोम क्रीणानीति ॥१५॥

अथोपनिष्क्रम्याभिमन्त्रयते। चिदसि मनोसीति चित्तं वाऽइदं मनो वागनुवदति

प्रसवे' (यजु० ४।१८)। 'तुझ सत्य प्रेरणा वाली की प्रेरणा के लिये'। अर्थात् तू सत्य प्रेरणा वाली है। सोम के पास जा। अब कहता है—'तन्वो यन्त्रमशीय स्वाहा' (यजु० ४।१८)। 'मैं अपने शरीर का बल प्राप्त करूँ'। जो यज्ञ की पूर्णता प्राप्त करता है वह शरीर का बल भी प्राप्त करता है। इसका तात्पर्य है कि यज्ञ की पूर्णता प्राप्त करूँ ॥१२॥

अब वह सोने को (जुहू में से) निकालता है। इससे वह मनुष्यों को सोना देता है। यदि वह घी के साथ सोने की भी आहुति दे डाले तो मानों वह मनुष्यों से सोने को छीन ले अर्थात् मनुष्यों मे सोना मिले ही नहीं ॥१३॥

वह इस मन्त्र को पढ़कर सोने को निकालता है—'शुक्रमसि चन्द्रमस्यमृतमसि वैश्व-देवमसि' (यजु० ४।१८)। 'तू शुद्ध है, तू चमकदार है, तू सब देवों को प्रिय है'। सम्पूर्ण दूध से आहुति देकर जब कहता है कि तू शुक्र है तो यह शुक्र ही है। 'तू चन्द्र है' कहता है तो यह चन्द्र ही है। 'तू अमृत है'। यह अमृत है ही, 'तू सब देवों को प्रिय है'। यह सब देवों को प्रिय है ही। अब तृण को खोलकर बर्हि के ऊपर डालता है और सूत्र के सोने को बाँधता है ॥१४॥

अब फिर घी के चार भाग करके कहता है—'यजमान, चलो'। वे शाला के (दक्षिण और पूर्व के) द्वार खोलते हैं (और बाहर आ जाते हैं)। द्वार की दाहिनी ओर सोम-क्रय करने वाली (गाय) खड़ी होती है। उसको सामने करके मानों उसने गाय को सोम प्राप्ति के लिये भेज दिया। क्योंकि सोम क्रयणी गाय ही वाणी है। इस आहुति से उसने इसी को प्रसन्न किया है इस आशा से कि जब यह प्रसन्न हो जायगी तो मैं इससे सोम खरीद सकूँगा ॥१५॥

अब उसके पास जाकर अभिवादन करता है, यह मन्त्र पढ़कर—'चिदसि मनोसि'

धीरसि दक्षिणेति धिया धिया हीतया मनुष्या जुह्वृपन्त्यनृक्तेनेव प्रस्तोद्गेनेव गाथाभिरिव तस्मादाह धीरसीति दक्षिणेति दक्षिणा होषा क्षत्रियासि यज्ञियासीति क्षत्रिया ह्येषा यज्ञिया होषादितिरस्युभयत' शीर्ष्णीति स यदेनया समानथ्स सद्विपर्यासं वदति यदपर तत्पूर्वं करोति यत्पूर्वं तदपरं तेनोभयत'शीर्ष्णी तस्मादाहादितिरस्युभयत' शीर्ष्णीति ॥१६॥

सा नः सुप्राची सुप्रतीच्येधीति । सुप्राची न एधि सोम नोऽन्वेहीत्येवैतदाह सुप्रतीची त एधि सोमेन नः सह पुनरेहोत्येवैतदाह तस्मादाह सा न' सुप्राची सुप्रतीच्येधीति ॥१७॥

मित्रस्त्वा पदि बध्नीतामिति । वरुण्या वाऽएषा यद्रज्जु. सा यद्रज्ज्वाभिहिता स्या द्वरुण्या स्याद्यद्वनाभिहिता स्यादयतेव स्यादेतद्वाऽअयरण्य यन्मैत्र सा यथा रज्ज्वाभिहिता यतैनमस्यै तद्भवति यदाह मित्रस्त्वा पदि बध्नीतामिति ॥१८॥

पूषाध्वनस्पात्विति । इय वै पृथिवी पूषा यस्य वाऽइयमध्वनोप्त्री भवति तस्य न कुतश्चन ह्वला भवति तस्मादाह पूषाध्वनस्पात्विति ॥१९॥

(यजु० ४।१६) । 'तू चित् है, तू मन है' । वाणी चित् और मन की अनुगामिनी है । अब कहता है—'धीरसि दक्षिणासि' (यजु० ४।१६) । 'तू बुद्धि है, तू दक्षिणा है' । बुद्धि से ही लोग जीविका कमाते हैं । वेद पाठ से या बातचीत करके या कथा कहकर । इसलिये कहा कि 'तू धी है' । उसको 'दक्षिणा' कहता है क्योंकि वह 'दक्षिणा' है ही । 'क्षत्रियासि यज्ञियासि' (यजु० ४।१६) । 'तू श्रेष्ठ है, तू पूज्या है' । वस्तुत वह श्रेष्ठ और पूज्या है । 'अदितिरसि उभयत शीर्ष्णी' (यजु० ४।१६) । 'तू दो सिर वाली अदिति है' । क्योंकि वाणी से ही वह ठीक को बेठीक कहता है । पीछे को पहले कहता है । इसीलिये कहा कि 'तू दो सिर वाली अदिति है' ॥१६॥

अब कहता है—'सा न सुप्राची सुप्रतीच्येधि' (यजु० ४।१६) । 'वह हमारे लिये आगे और पीछे शुभ हो' । 'आगे शुभ हो' । कहने से तात्पर्य है कि 'तू हमारे लिये सोम लाने के लिये आगे चल' । और 'पीछे शुभ हो' से तात्पर्य है कि 'सोम के साथ लौट' । इसीलिये कहा कि 'तू आगे और पीछे शुभ हो' ॥१७॥

अब कहता है—'मित्रस्त्वा पदि बध्नीताम्' (यजु० ४।१६) । 'मित्र तुझे पैर में बाँधे' । क्योंकि रस्सी वरुण की होती है । यदि वह रस्सी से बँधेगी तो वरुण की हो जायगी । और यदि बाँधी न जायगी तो वश में न रहेगी । जो मित्र की है वह वरुण की नहीं है । जैसे गाय रस्सी से बँधकर वश में रहती है इसी प्रकार यह है इसलिये कहा कि 'मित्र तुझे पैर में बाँधे' ॥१८॥

अब कहता है—'पूषाध्वनस्पातु' (यजु ४।१६) । 'पूषा तेरे मार्ग की रक्षा करे' । पूषा यह पृथ्वी है । पृथ्वी जिसकी मार्ग में रक्षा करती है वह विचलित नहीं होता । इसलिये कहा, 'पूषा तेरे मार्ग की रक्षा करे' ॥१९॥

इन्द्रायाध्यक्षायेति । स्वध्यक्षासदित्येवैतदाह यदाहेन्द्रायाध्यक्षायेत्यनु त्वा माता मन्यतामनु पितानु भ्राता सगभ्योऽनु सखा सयूथ्य इति सा यत्ते जन्म तेन नोऽनुमता सोममच्छेहीत्येवैतदाह सा देवि देवमच्छेहीति देवी ह्येषा देवमच्छेति यद्वावसोमं तस्मादाह सा देवि देवमच्छेहीतीन्द्राय सोममितीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्राय सोममिति रुद्रस्त्वावर्त्तयत्वित्यप्रणाशायैतदाह रुद्रश्छं हि नाति पशवः स्वस्ति सोमसखा पुनरेहीति स्वस्ति नः सोमेन सह पुनरेहीत्येवैतदाह ॥२०॥

ता यथैवादो देवाः । प्राहिणवन्त्सोममच्छ सेनान्त्सह सोमेनागच्छदेवमेवैनामेष एतत्प्रहिणोति सोममच्छ सेनꣳ सह सोमेनागच्छति ॥२१॥

तां यथैवादो देवाः । व्यहुयन्त गन्धर्वैः सा देवानुपावर्ततेवमेवैनामेतद्यजमानो विहुयते सा यजमानमुपावर्तते तामुदीचीमत्याकुर्वन्त्युदीची हि मनुष्याणा दिक्सोऽएव यजमानस्य तस्मादुदीचीमत्याकुर्वन्ति ॥२२॥ ब्राह्मणम् ॥ ३ [२. ४.] ॥ द्वितीयोऽध्यायः [१७] ॥ ॥

अब कहता है—'इन्द्राय अध्यक्षाय' (यजु० ४।१६)। 'अध्यक्ष इन्द्र के लिये'। इसका अर्थ यह है कि 'वह सुरक्षित रहे'। अब कहता है—'अनु त्वा माता मन्यताम्, अनुपिता, अनुभ्राता सगर्भ्योऽनु सखा सयूथ्यः' (यजु० ४।२०)। 'तुझे तेरी माता अनुमति दे, तेरा पिता, तेरा भ्राता, तेरा समूह में रहने वाला सगा'। अर्थात् तेरे जो अपने सम्बन्धी हैं उनकी अनुमति से सोम को ला। अब कहता है—'सा देवि देवमच्छेहि' (यजु० ४।२०)। 'देवि, तू देव के पास जा'। अर्थात् वाणी देवी है और सोम देव है। इसीलिये कहा कि 'देवि, तू देव के पास जा'। 'इन्द्राय सोमम्' (यजु० ४।२०)। 'इन्द्र के लिये सोम के पास जा'। इन्द्र यज्ञ का देवता है। इसलिये कहा 'इन्द्र के लिये सोम के पास जा'। 'रुद्रस्त्वावर्त्तयतु' (यजु० ४।२०)। 'रुद्र तुझे सुरक्षित लौटा लावे'। यह उसकी रक्षा के लिये कहा, क्योंकि पशु रुद्र से आगे नहीं जा सकते। 'स्वस्ति सोमसखा पुनरेहि' (यजु० ४।२०)। 'स्वस्ति हो। हे सोमसखा तू लौट आ'। इसका अर्थ है कि 'तू सोम लेकर वापिस आ' ॥२०॥

जैसे पहले देवों ने उसको सोम के पास भेजा और वह सोम को लेकर वापिस आ गई इसी प्रकार यह सोम के पास जाती है और सोम लेकर वापिस आ जाती है ॥२१॥

जैसे देवों ने गन्धर्वों के साथ उसका मोह न किया और वह देवों के पास आ गई, ऐसे ही यजमान उसको विह्वान करता है और वह यजमान के पास लौट आती है। वह उसको उत्तर की ओर ले जाते हैं। उत्तर मनुष्यों की दिशा है। इसलिये यह यजमान की भी दिशा है। इसलिये यह उसे उत्तर की दिशा में ले जाते हैं ॥२२॥

अध्याय ३—ब्राह्मण १

सप्त पदान्यनुनिक्रामति । वृष्टक्रुऽएवैनामेतत्तस्मात्सप्त पदान्यनुनिक्रामति यत्र वै वाचः प्रजातानि छन्दाꣳसि सप्तपदा वै तेषा पराऽर्ध्या शाक्करी तामेवैतत्परस्तादर्पाचीं वृष्टक्रे तस्मात्सप्त पदान्यनुनिक्रामति ॥१॥

स वै वाच एव रूपेणानुनिक्रामति । वस्व्यस्यदितिरस्यादित्यासि रुद्रासि चन्द्रासीति वस्वी ह्येषादितिर्ह्येषादित्या ह्येषा रुद्रा ह्येषा चन्द्रा ह्येषा बृहस्पतिष्ट्वा सुम्ने रम्णा-त्विति ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैनं साधुनावर्तयतीत्येवैतदाह रुद्रो वसुभिराचकऽइत्य-मणायैतदाह रुद्रꣳ हि नाति पशव· ॥२॥

अथ सप्तम पदं पर्युपविशन्ति । स हिरण्य पदे निधाय जुहोति न वाऽअनाहाबाहु-तिर्हूयतेऽग्निरेतसं वै हिरण्यं तथो हास्यैषाग्निमत्येवाहुतिर्हुता भवति वज्रो वाऽआज्यं वज्रे-णैवैतदाज्येन स्पृणुते ताꣳ स्पृत्वा स्वीकुरुते ॥३॥

उस (सोम गौ) के पीछे सात पग चलता है । सात पग चलने का तात्पर्य यह है कि वह उस पर आधिपत्य प्राप्त करता है । जब वाणी से छन्द उत्पन्न हुये तो उनमें से अन्त का सात पद वाला शक्वरी था । वह इस छन्द को ऊपर से अपनी ओर खींचता है इसलिये सात पग चलता है ॥१॥

यह वाणी के समान पग भरता है यह पढ़कर—'वस्व्यसि, अदितिरसि, आदित्यासि, रुद्रसि, चन्द्रासि' (यजु० ४।२१) । 'तू वस्वी है, तू अदिति है, तू आदित्या है, तू रुद्र है, तू चन्द्रा है' । यह वस्वी है, यह अदिति है, यह आदित्या है, यह रुद्रा है, यह चन्द्रा है । 'बृहस्पतिष्ट्वा सुम्ने रम्णातु' (यजु० ४।२१) । 'बृहस्पति तुझको आनन्द में रक्खे' । बृहस्पति ब्रह्म है । इस कथन का तात्पर्य है कि बृहस्पति अच्छे काम के द्वारा तुझे यहाँ तक लौटा लेवे' । 'रुद्रो वसुभिराचके' (यजु० ४।२१) । 'रुद्र वसुओं के सहित तुझसे प्रसन्न है' । इस कथन से यह तात्पर्य निकालता है कि वह गाय बिना किसी हानि के लौट आवे' क्योंकि पशु रुद्र के आगे नहीं जा सकते ॥२॥

यह सातवें पद में बैठ जाते हैं । और पद चिह्न पर सोना रखकर वह आहुति देता है । आहुति अग्नि के सिवाय इतर स्थान में तो हो नहीं सकती । स्वर्ण अग्नि के वीर्य से उत्पन्न हुआ है । इसलिये ऐसा करने से मानो वह अग्नि में ही आहुति देता है । घी वज्र है । इस वज्ररूपी घी के द्वारा वह उसकी रक्षा करता है और रक्षा करके उसको स्वीकार करता है ॥३॥

स जुहोति। अदित्यास्त्वा मूर्धन्नाजिघर्मीतीयं वै पृथिव्यदितिरस्यै हि मूर्धन्जुहोति देवयजने पृथिव्याऽइति देवयजने हि पृथिव्यै जुहोतीडायास्पदमसि घृतवत्स्वाहेति गौर्वाऽइडा गोहि पदे जुहोति घृतवत्स्वाहेति घृतवद्धयेतदभिहुतं भवति ॥४॥

अथ स्रुयमादाय परिलिखति। वज्रो वै स्रुयो वज्रेणैवैतत्परिलिखति त्रिःकृत्वः परिलिखति त्रिवृतैवैतद्वज्रेण समन्तं परिगृह्णात्यनतिक्रमाय ॥५॥

स परिलिखति। अस्मे रमस्वेति यजमाने रमस्वेत्येवैतदाहाथ समुल्लिख्य पदꣳ स्थाल्याꣳ संवपत्यस्मे ते बन्धुरिति यजमाने ते बन्धुरित्येवैतदाह ॥६॥

अथाप उपनिनयति। यत्र वाऽअस्यै खनन्तः करीकुर्वन्त्यपघ्नन्ति शान्तिरापस्तदद्भिः शान्त्या शमयति तदद्भिः संदधाति तस्मादप उपनिनयति ॥७॥

अथ यजमानाय पदं प्रयच्छति। त्वे राय इति पशवो वै रायस्त्वयि पशव इत्येवैतदाह तद्यजमानः प्रतिगृह्णाति मे राय इति पशवो वै रायो मयि पशव इत्येवैतदाह ॥८॥

यह इस मन्त्र से आहुति देता है—'अदित्यास्त्वा मूर्धन्नाजिघर्मि' (यजु० ४।२२)। 'मैं तुझको अदिति के सिर पर रखता हूँ'। यह पृथिवी अदिति है। उसी के सिर पर आहुति देता है। 'देवयजने पृथिव्याः' (यजु० ४।२२)। 'पृथिवी के यज्ञ-स्थल पर आहुति देता है'। 'इडायास्पदमसि घृतवत् स्वाहा' (यजु० ४।२२)। 'तू घृत-युक्त इडा का पद है'। गौ ही 'इडा' है। गौ के पद पर आहुति देता है। 'घृत-युक्त' यों कहा कि जब आहुति देता है तो वह घी से भर जाता है ॥४॥

अब स्रुवा से चारों ओर लकीर देता है। स्रुवा वज्र है। इसलिये वज्र से लकीर करता है। तीन लकीरें करता है। जिससे तिहरे वज्र से घिर जाय और कोई उसको लाँघ न सके ॥५॥

वह लकीर खींचने के समय यह मंत्र पढ़ता है—'अस्मे रमस्व' (यजु० ४।२२)। 'हम में रम' अर्थात् 'यजमान में रम'। अब जो पद के चिह्न को (स्रुवा से खुरचकर) थाली में रख देता है। 'अस्मे ते बन्धुः' (यजु० ४।२२)। 'हम में तेरा सम्बन्ध है'। अर्थात् 'यजमान में' ॥६॥

अब (उस स्थान पर) पानी छिड़कता है। जहाँ कहीं खोदते या खुरचते हैं वहाँ पाप हो जाता है। जल शान्ति देता है। जल से शान्त करता है। इसलिये जल को छिड़कता है ॥७॥

अब पैर (की रेणु) को यजमान को देता है। 'त्वे रायः (यजु० ४।२२)। 'तुझको धन मिले'। पशु ही धन है। इसको तात्पर्य है कि तुझे पशु मिले। यजमान यह कहकर लेता है। 'मे रायः' (यजु० ४।२२)। 'मेरे लिये धन हो'। पशु ही धन है। इसको तात्पर्य है कि मुझे पशु मिलें ॥८॥

अथाध्वर्युरात्मानमुपस्पृशति । मा वयꣳ रायस्पोषेण वियौष्मेति तथो हाध्वर्युः पशुभ्य आत्मानं नान्तरेति ॥६॥

अथ पत्न्यै पदं प्रतिपराहरन्ति । गृहा वै पत्न्यै प्रतिष्ठा तद्गृहेष्वेवैनामेतत्प्रतिष्ठायां प्रतिष्ठापयति तस्मात्पत्न्यै पदं प्रतिपराहरन्ति ॥१०॥

तां नेष्टा वाचयति । तोतो राय इत्ययैनाꣳ सोमक्रयण्या संख्यापयति वृषा वै सोमो योषा पत्न्येष वाऽअत्र सोमो भवति यत्सोमक्रयणी मिथुनमेवैतत्प्रजननं क्रियते तस्मादेनां सोमक्रयण्या संख्यापयति ॥११॥

स संख्यापयति । समख्ये देव्या धिया सं दक्षिणयोरुचक्षसा । मामऽआयुः प्रमोषीर्मोऽअहं तव वीरं विदेय तव देवि संदृशीत्याशिषमेवैतदाशास्ते पुत्रो वै वीरः पुत्रं विदेय तव संदृशीत्येवैतदाह ॥१२॥

सा या बभ्रुः पिङ्गाक्षी । सा सोमक्रयणी यत्र वाऽइन्द्राविष्णू त्रेधा सहस्रं व्यैरयेतां तदेकमत्यरिच्यत तां त्रेधा प्राजनयतां तस्माद्योप्येतर्हि त्रेधा सहस्रं व्याकुर्यादेकैवातिरिच्येत ॥१३॥

अब अध्वर्यु इस मन्त्राश को पढ़कर अपने (सीने) को छूता है—'मा वयं रायस्पोषेण वियौष्म' (यजु० ४।२२)। 'हम धन से रहित न हों'। इस प्रकार अध्वर्यु अपने को भी पशुओं से अलग नहीं करता ॥९॥

अब वह पद-रेणु को यजमान की पत्नी को दे देते हैं। पत्नी की प्रतिष्ठा घर है। इस प्रकार उसको घर मे स्थापित कर देते हैं। इसीलिये पद-धूलि को यजमान की पत्नी को दे देते हैं ॥१०॥

नेष्टा उससे कहता है—'तो तो रायः' (यजु० ४।२२)। 'यह धन तेरा है, तेरा है'। इस प्रकार वह सोम-गौ को उसे दिखाता है ॥११॥

इसको दिखाने मे यह मंत्र पढ़ता है—'समख्ये देव्या धिया स दक्षिणयोरुचक्षसा। मा मऽआयुः प्रमोषीर्मोऽअह तव वीर विदेय तव देवि सदृशि' (यजु० ४।२३)। 'दिव्य बुद्धि से मैंने तुझको देखा। दीर्घ दृष्टि वाली आँख से मैंने तुझको देखा। तू मेरा जीवन न ले और न मैं तेरा जीवन लूँ। हे देवी तेरे दर्शन करके मैं पुत्र को प्राप्त होऊँ'। इस प्रकार पत्नी आशीर्वाद माँगती है। वीर का अर्थ है पुत्र। अर्थात् वह कहती है कि मैं तेरे दर्शन पाकर पुत्र को प्राप्त होऊँ ॥१२॥

सोम-गौ भूरी होती है और उसकी आँखें पिंगल होती हैं। जब इन्द्र और विष्णु ने एक हजार गायों को तीन भागों मे विभक्त किया तो एक रह गई। उससे उन्होंने तीन प्रकार सन्तान बनाई। इसलिये आज भी अगर एक हजार को तीन मे बाटें तो एक बच रहता है ॥१३॥

सा या बभ्रुः पिङ्गाक्षी। सा सोमक्रयणथ या रोहिणी सा वार्त्रघ्नी यामिदꣳ राजा संग्रामं जित्वोदाकुरुतेऽथ या रोहिणी श्येताक्षी सा पितृदेवत्या यामिदं पितृभ्यो घ्नन्ति ॥१४॥ शतम् १६०० ॥

जो भूरी और पिङ्ग आँखों वाली है वह सोम-गौ है। जो रोहिणी है वह वृत्र को मारने वाली है जिसको राजा सग्राम मे विजय प्राप्त कर के लेता है। जो लाल और सफेद आँखों वाली है वह पितरों की है और पितरों के लिये मारी जाती है (घ्नन्ति) ॥१४॥ [शतम् १६००]

सा या बभ्रुः पिङ्गाक्षी। सा सोमक्रयणी स्यादथ बभ्रुं पिङ्गाक्षीं न विन्देदरुणा स्याद्यरुणां न विन्देद्रोहिणी वार्त्रघ्नी स्याद्रोहिण्यै ह त्वेव श्येताक्ष्याऽऽशां नेयात् ॥१५॥

जो भूरी और भूरी आँख वाली हो वही सोम-गौ हो। यदि भूरी और भूरी आँख वाली न मिले तो अरुण हो। यदि अरुण न मिले तो वृत्र को मारने वाली रोहिणी हो। लेकिन लाल और श्वेत नेत्र वाली कभी न हो ॥१५॥

सा स्यादप्रवीता। वाग्वाऽएषा निदानेत यत्सोमक्रयण्ययातयाम्नी याऽइयं वागयातयाम्न्य प्रवीता तस्मादप्रवीता स्यात्सा स्यादबरुडाकूटाकाणाकर्णालक्षितासक्तशफा सा ह्येकरूपैकरूपा ह्येयं वाक् ॥१६॥ ब्राह्मणम् ॥ ४ [३. १.] ॥ ॥

यह गर्भिणी न हो। क्योंकि जो सोम-गौ है वह वास्तव में वाणी है। यह जो वाणी है वह पूर्ण बल वाली है। पूर्ण बल वाली वही होती है जो गर्भिणी न हो। यह सोम-गौ गर्भिणी न हो। ऐसी हो जो पूँछ-रहित न हो, बिना सींगों की न हो। काली न हो। न बिना कान की हो, न विशेष चिह्न वाली हो, न सात खुर वाली हो। यह एक रूपा है। वाणी भी एक रूपा है ॥१६॥

अध्याय ३—ब्राह्मण १

पदꣳ समुप्य पाणीऽअवनेनिक्ते। तद्यत्पाणीऽअवनेनिक्ते वज्रो वाऽआज्यꣳ रेतः सोमो रेतसा वाज्येन रेतः सोमꣳ हिनसानीति तस्मात्पाणीऽअवनेनिक्ते ॥१॥

पद-धूलि को पैर कर हाथ धोता है। वह हाथ क्यों धोता है? घी वज्र है। सोम वीर्य है। यह हाथ इसलिये धोता है कि वीर्य सोम को वज्र घी से कोई हानि न पहुँचे ॥१॥

अथास्याꣳ हिरण्यं वध्नीते। द्वयं वाऽइदं न तृतीयमस्ति सत्यं चैवानृतं च मत्य-

इस (अनामिका अँगुली) मे सोना बाँधता है। ससार मे दो ही होते है सत्य और अनृत, तीसरा नही। देव सत्य है मनुष्य अनृत है। अँगुली मे सोना इसलिये बाँधता है कि

मेव देवा अनृत मनुष्या अग्निरेतसं वै हिरण्यꣳ सत्येनाꣳशूनुपम्मृशानि सत्येन साम पराहणानीति तस्माद्वाऽअस्याꣳ हिरण्य रघ्नीते ॥२॥

अथ सम्प्रेष्यति । सोमोपनहनमाहर सामपर्याणहनमाहरोष्णीषमाहरेति स यदेव शोभतꣳ तत्सोमोपनहनꣳ स्याद्वासो ह्यस्यैतद्भवति शोभनꣳ ह्येतस्य वास स यो हैनꣳ शोभनेनोपचरति शोभते हाय य आह यदन कि चेति यद्धैन किं च भवति तस्माद्यदेव शोभन तत्सोमोपनहनꣳ स्याद्यदेव किं च सोमपर्याणाहनम् ॥३॥

यद्युष्णीष विन्देत् । उष्णीष स्याद्यद्युष्णीष न विन्देत्सोमपर्याणहनस्यैव द्वयङ्गुल वा त्र्यङ्गुल वावकृन्तेदुष्णीषमाचनमध्वर्युर्वा यजमानो वा सोमोपन हमादत्ते य एव कश्च सोमपर्याणहनम् ॥४॥

अथामेण राजान विचिन्वन्ति । तदुदकुम्भ उपनिहितो भवति तद्ब्राह्मण उपास्ते तदभ्यायन्ति प्राञ्च ॥५॥

तदायत्तु वाचयति । एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतादेष ते जागतो भाग इति मे सोमाय ब्रूताच्छन्दोनामानाꣳ साम्राज्य गच्छेति मे सोमाय ब्रूतादित्येक वाऽएष क्रीयमाणोऽभिक्रीयते छन्दसामेव राज्याय छन्द-

अग्नि के वीर्य से सोना उत्पन्न हुआ है । मैं सत्य से सोम की डाली को छुऊँ । अर्थात् सत्य के द्वारा मैं सोम को खरीदूँ ॥२॥

अब वह आदेश देता है कि सोम वस्त्र को लाओ, सोम का अँगोछा लाओ । सोम की पगड़ी लाओ । सोम-वस्त्र शोभन (सुन्दर) हो । क्योंकि यह सोम राजा का वस्त्र है । जो शोभन वस्तु से सोम की पूजा करता है वह स्वय भी शोभन हो जाता है । और जो कहता है, 'अभी कैसा भी हो', वह कैसा भी हो जाता है । इसलिये सोम वस्त्र सुन्दर होना चाहिये । सोम का अगोछा कैसा भी क्यों न हो ॥३॥

उष्णीष (पगड़ी) हो तो हो और न हो तो अँगोछे मे से दो या तीन अँगुल फाड़ ले और उसकी उष्णीष बना ल । सोम वस्त्र को अध्वर्यु ले या यजमान । अँगोछा कोई और ले ले ॥४॥

अब सोम राजा को चुनते हैं । उसके निकट जल के घड़े को रखते हैं । और एक ब्राह्मण पास बैठता है । अब वे पूर्व की ओर जाते हैं ॥५॥

जाते हुये यह मत्र बोलते हैं—'एष ते गायत्रो भागऽइति मे सोमाय ब्रूताद, एष ते त्रैष्टुभो भागऽइति मे सोमाय ब्रूताद, एष ते जागतो भागऽइति मे सोमाय ब्रूता च्छन्दोनामानाꣳ साम्राज्य गच्छेति मे सोमाय ब्रूतात्' (यजु० ४।२४) । 'मेरे लिये सोम से कहो कि यह तुम्हारा गायत्र भाग है । मेरे लिये सोम से कहो कि यह तुम्हारा त्रैष्टुभ भाग है । मेरे लिये सोम से कहो कि यह तुम्हारा जगती का भाग है । मेरे लिये सोम से कहो कि छन्दों के साम्राज्य को प्राप्त करो' । सोम राजा को क्रय करते हैं तो एक

साश्र्ं साम्राज्याय घ्नन्ति वाऽएनमेतद्यदभिषुण्वन्ति तमेतदाह छन्दसामेव त्वा राज्याय क्रीणामि छन्दसाश्र्ं साम्राज्याय न वधायेत्यथैत्य प्राङुपविशति ॥६॥

सोऽभिमृशति। आस्माकोऽसीति स्व इव ह्यस्येतद्भवति यदागतस्तस्मादाहास्माकोऽसीति शुक्रस्ते ग्रह इति शुक्रश्र्ं ह्यस्माद्ग्रह ग्रहीष्यन्भवति विचितस्त्वा विचिन्वन्तिति सर्वत्वायैतदाह ॥७॥

अत्र हैके। तृण वा काष्ठ वा वित्त्वापास्यन्ति तदु तथा न कुर्यात्तत्र वै सोमो विड्न्या ओषधयोऽन्नं वै क्षत्रियस्य विट् स यथा असितमनुहायाङ्गिद्य परास्येदेव तत्तस्मादभ्येव मृशेद्विचितस्त्वा विचिन्वन्त्विति तद्यऽएवास्य विचेतारस्तऽएन विचिन्वन्ति ॥८॥

अथ वास'। द्विगुण वा चतुर्गुण वा आदश योदशद वोपस्तृणाति तद्राजान मिमीते स सद्राजान मिमीते तस्मान्मात्रा मनुष्येषु मात्रो यो चाप्यन्या मात्रा ॥९॥

सावित्र्या मिमीते। सविता वै देवाना प्रसविता तथो हास्माऽएष सवितृप्रसूत एव क्रयाय भवति ॥१०॥

उद्देश्य के लिये। छन्दों के राज्य के लिये, छन्दों के साम्राज्य के लिये। उसको निचोड़ते हैं तो मानो उसको मारते हैं। इसीलिये कहते हैं कि तुझे छन्दों के राज्य के लिये और छन्दों के साम्राज्य के लिये मोल लेते हैं मारने के लिये नहीं। अब चलकर वह (सोम के) पूर्व में बैठता है ॥६॥

इस मन्त्र को पढ़कर (सोम के पौधे को) छूता है—'अस्माकोऽसि' (यजु० ४।२४)। 'तू हमारा है'। जब सोम आ गया तो वह अपना ही हो गया। इसलिये कहते हैं कि तू हमारा है। 'शुक्रस्ते ग्रह' (यजु० ४।२४)। 'तेरा शुक्र (रस) ग्रहण के योग्य है' क्योंकि वह उसको ग्रहण करेगा ही। 'विचितस्त्वा विचिन्वन्तु' (यजु० ४।२४)। 'चुनने वाले तुझे चुनें'। वह सम्पूर्णता के लिये ऐसा कहता है ॥७॥

कुछ लोग (सोम के साथ) तृण या काष्ठ को देखकर उसे फेंक देते हैं। परन्तु ऐसा नहीं करना चाहिये। सोम राजा है और अन्य वृक्षादि प्रजा। प्रजा राजा का अन्न है। इसलिये (इसको फेंक देना ऐसा ही होगा) जैसा किसी के मुँह में रक्खे हुये अन्न को निकाल कर फेंक देना। इसलिये केवल उसको छूकर कहे कि 'चुनने वालो इसको चुन लो'। चुनने वाले उसको चुन लेंगे ॥८॥

अब वह कपड़े की दुल्लर या चोलर करके बिछाता है इस प्रकार कि चोलर पूर्व या उत्तर की ओर रहे। उस पर सोम राजा को तोलता (मापता, मिमीते) है। चूँकि उसमें सोम राजा को तोलता है इसलिये उसको मात्रा कहते हैं। चाहे वह मनुष्यों में प्रचलित मात्रा हो या अन्य कुछ ॥९॥

वह गायत्री मन्त्र पढ़कर तोलता है। सविता सब देवों का प्रेरक है। ऐसा करने से मानों सोम-क्रय सविता की प्रेरणा से होता है ॥१०॥

अतिछन्दसा मिमीते । एषा वै सर्वाणि छन्दाꣳसि यदतिछन्दास्तथो हास्यैष सर्वैरेव छन्दोभिर्मितो भवति तस्मादतिछन्दसा मिमीते ॥११॥

स मिमीते । अभि त्यं देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभि प्रियं मतिं कविम् । ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवी मनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वरिति ॥१२॥

एतया सर्वाभिः । एतया चतसृभिरेतया तिसृभिरेतया द्वाभ्यामेतयैकयैतयैकयैतया द्वाभ्यामेतया तिसृभिरेतया चतसृभिरेतया सर्वाभिः समम्याञ्जलिनाध्यानयति ॥१३॥

स वाऽउदाचं न्याचं मिमीते । स यदुदाचं न्याचं मिमीतऽइमा एवैतदङ्गुलीर्नानाजानाः करोति तस्मादिमा नाना जायन्तेऽथ यत्सह सर्वाभिर्मिमीते सꣳश्लिष्टाऽइव हैवेमा जायेरंस्तस्माद्वाऽउदाचं न्याचं मिमीते ॥१४॥

यद्वेवोदाचं न्याचं मिमीते । इमाऽएवैतद्वानावीर्याः करोति तस्मादिमा नानावीर्यास्तस्माद्वा ऽउदाचं न्याचं मिमीते ॥१५॥

यद्वेवोदाचं न्याचं मिमीते । विराजमेवैतदर्वाची च पराची च युनक्ति पराच्यह

अतिछन्द पढ़कर तोलता है । अतिछन्द में सब छन्द आ जाते हैं । अतिछन्द से इसलिये तोलता है कि यह सब छन्दों से तुला होने के बराबर हो जाता है ॥११॥

वह इस मंत्र को पढ़कर तोलता है, 'अभि त्यं देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभि प्रियं मतिं कविम् । ऊर्ध्वा यस्याऽमतिर्भाऽअदिद्युतत् सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः' (यजु० ४।२५) । 'मैं उस द्यावा पृथिवी के प्रेरक, कवि, क्रतु, सत्यसंध, रत्नधा, प्रिय, बुद्धिवान्, कवि की पूजा करता हूँ, जिसकी न नापी जाने वाली ज्योति ऊपर चमकती है और जिस प्रकाश-युक्त किरणों वाले यज्ञ-साधक ने संसार में शक्ति की प्रेरणा की है' ॥१२॥

इसी मंत्र को पढ़कर वह सोम को लेता है सब अँगुलियों से, फिर चार से, फिर तीन से, फिर दो से, फिर एक से, फिर एक से, फिर दो से, फिर तीन से, फिर चार से । फिर सब से ॥१३॥

वह अँगुलियों को झुकाकर और ऊपर को उठाकर सोम को तोलता है । उठाकर और झुकाकर इसीलिये तोलता है कि अँगुलियों को अलग-अलग मान लेता है । इसीलिये यह अलग-अलग उत्पन्न होती हैं । और सब अँगुलियों से इसलिये तोलता है कि वह संयुक्त उत्पन्न हों । इसीलिये वह अँगुलियों को उठाकर और झुकाकर तोलता है ॥१४॥

अँगुलियों को उठाकर और झुकाकर इसलिये लेता है कि यह भिन्न शक्ति वाली हो जायँ । इसीलिये अँगुलियाँ भिन्न-भिन्न शक्ति वाली हैं ॥१५॥

अँगुलियों को उठाने और झुकाने का प्रयोजन यह है कि विराज (विराज छन्द को जिसमें दश अक्षर के पद होते हैं) को ले जाता और ले आता है । अर्थात् यज्ञ को पहले

देवेभ्यो यज्ञं वहत्यर्वाची मनुष्यानवति तस्माद्वाऽउदाचं न्याचं मिमीते ॥१६॥

अथ यदश कृत्वो मिमीते । दशाक्षरा वै विराड्वैराजः सोमस्तस्माद्दश कृत्वो मिमीते ॥१७॥

अथ सोमोपनहनस्य समुत्पार्यान्तान् । उष्णीषेण विश्रथ्नाति प्रजाभ्यस्त्वेति प्रजाभ्यो ह्येनं क्रीणाति स यदेवेदश्ं शिरश्चाश्सौ चान्तरोपेनितमिव तदेवास्यैतत्करोति ॥१८॥

अथ मध्येऽङ्गुल्याकाशं करोति । प्रजास्त्वानुप्राणन्त्विति तमयतीव वाऽएनमेतत्समायच्छत्यप्राणमिव करोति तस्यैतदत एव मध्यतः प्राणमुत्सृजति तं ततः प्राणन्तं प्रजा अनुप्राणन्ति तस्मादाह प्रजास्त्वानुप्राणन्त्विति तथ्ं सोमविक्रयिणे प्रयच्छत्यथातः पणनस्यैव ॥१९॥ ब्राह्मणम् ॥ ५ [३. २.] ॥

देवों के लिये ले जाता है फिर मनुष्यों के लिये वापिस लाता है ॥१६॥

इस बार तोलने का तात्पर्य यह है कि विराट् छन्द में दश अक्षर होते हैं । सोम विराट् के समान है । इसलिये दश बार तोलता है ॥१७॥

सोम वस्त्र के किनारों को पकड़ कर अध्वर्यु उसको पगड़ी से बाँधता है यह पढ़कर—'प्रजाभ्यस्त्वा' (यजु० ४।२५) । 'सन्तान के लिये तुझे' । सन्तान के लिये ही सोम को मोल लिया जाता है । शिर और बन्धों के बीच में जो शकल होती है वैसी ही बना देता है (अर्थात् सोम की गठरी ऐसी बाँधी जाती है कि लड़के की आकृति हो जाय, सिर निकला रहे) ॥१८॥

अब इस मन्त्र को पढ़कर गाँठ में अँगुली जाने के लिये छेद कर देता है—'प्रजास्त्वानुप्राणन्तु' (यजु० ४।२५) । अर्थात् सन्तान तेरे समान प्राण (साँस) लें । जब गाँठ बाँधी तो मानो उसका गला घोंट दिया । वह साँस न ले सका । अब वह इस प्रकार प्राणों को छोड़ता है (साँस को लेता है) । इसी के समान सन्तान भी साँस लेगी । इसीलिये कहा 'सन्तान तेरे समान साँस लें' । अब वह उसको सोम बेचने वाले को दे देता है । अब आगे मोल चुकाने की बात आवेगी ॥१९॥

अध्याय ३—ब्राह्मण ३

स वै राजानं पणते । स यद्राजानं पणते तस्मादिदश्ं सर्वं पण्यतश्ं स आह सोमविक्रयिन्कथ्यते सोमो राजेति कथ्य इत्याह सोमविक्रयी तं वै ते क्रीणानीति

सोम राजा के लिये मोल लिया जाता है । चूँकि सोम राजा का मोल लिया जाता है इसलिये सभी चीजों का मोल करते हैं । पहले सोम बेचने वाले से पूछता है, 'क्या सोम

क्रीणीहीत्याह सोमविक्रयी कलया ते क्रीणानीति भूयो वाऽअतः सोमो राजार्हतीत्याह सोमविक्रयी भूय एवातः सोमो राजार्हति महास्त्वेव गोर्महिमेत्यध्वर्युः ॥१॥

गोर्वै प्रतिधुक् । तस्यै शृतं तस्यै शरस्तस्यै दधि तस्यै मस्तु तस्याऽआतच्चनं तस्यै नवनीत तस्यै घृत तस्याऽआमिक्षा तस्यै वाजिनꣳ ॥२॥

शफेन ते क्रीणानीति । भूयो वाऽअतः सोमो राजार्हतीत्याह सोमविक्रयी भूय एवातः सोमो राजार्हति महास्त्वेव गोर्महिमेत्यध्वर्युरेतान्येव दश वीर्याण्युदारव्यायाह पदा तेऽर्धेन ते गवा ते क्रीणामीति क्रीतः सोमो राजेत्याह सोमविक्रयी वयाꣳसि प्रबूहीति ॥३॥

स आह । चन्द्रं ते वस्त्रं ते छागा ते धेनुस्ते मिथुनौ ते गावौ तिस्रस्तेऽन्या इति स यदर्वाचपणान्ते परः सम्पादयन्ति तस्मादिदꣳ सकृत्सर्वं पण्यमर्वाक्पणान्ते परः सम्पादयन्त्यथ यदध्वर्युरेव गोर्वीर्याण्युदाचष्टे न सोमस्य सोमविक्रयी महितो वै सोमो देवो हि सोमोऽथैत-

राजा बिकाऊ है' ? वह उत्तर देता है, 'हाँ बिकाऊ है' । वह पूछता है, 'मैं तुझसे मोल लूँगा' । सोम बेचने वाला उत्तर देता है, 'ले लो' । अध्वर्यु कहता है कि, 'कला (गौ के सोलहवें भाग) के बदले सोम को लूँगा' । सोम बेचने वाला कहता है, 'सोम राजा का मोल इससे अधिक है' । अध्वर्यु कहता है कि, 'निस्सन्देह सोम राजा का मोल इससे अधिक है, परन्तु गाय की महिमा भी तो अधिक है' ॥१॥

गाय से दूध मिलता है, उसी से शृत, उसी से मलाई, उसी से दही, उसी से मस्तु, आतचन, नवनी, घी, आमिक्षा और वाजी । (यह सब दूध से बनी चीजों के नाम हैं) ॥२॥

'मैं गाय के एक शफ (खुर) के बदले इसको मोल लूँगा' । सोम बेचने वाला कहता है, 'सोम राजा इससे कहीं अधिक कीमती है' । अध्वर्यु कहता है, 'सोम राजा अवश्य कीमती है परन्तु गाय की महिमा भी तो अधिक है' । इस प्रकार दश गुण वर्णन करके अध्वर्यु कहता जाता है कि 'एक पद के बदले खरीदूँगा, आधी गाय के बदले, पूरी गाय के बदले' । यहाँ तक कि सोम बेचने वाला कह उठता है, 'बस सोम राजा खरीदा जा चुका' । क्या क्या दोगे यह बताओ (वयांसि प्रबूहि) ॥३॥

अध्वर्यु कहता है, 'चन्द्र (सोना ?) तुम्हारा हुआ, वस्त्र तुम्हारा हुआ, बकरी तुम्हारी हुई, गाय तुम्हारी हुई, एक बैल का जोड़ तुम्हारा हुआ । तीन और गायें तुम्हारी हुईं' । पहले यह मोल करते हैं और फिर मोल का निश्चय होता है । इसीलिये हर एक बिक्री की चीज में पहले मोल किया जाता है फिर निश्चय करते हैं । केवल अध्वर्यु ही गाय के गुण क्यों कहता है ? सोम वाला सोम के गुण क्यों नहीं कहता ? इसका कारण यह है कि सोम देवता है, उसकी महिमा तो प्रख्यात है । इसलिये अध्वर्यु गाय के गुण कहता है, सोम वाला सोम के नहीं । सोम वाला गाय के गुण सुन कर उसको ले लेगा ।

दध्वर्युर्गी महयति तस्मै पश्यन्नीर्याणि क्रीणादिति तस्मादध्वर्युरेव गोर्वर्याणयुदाचष्टे न सोमस्य सोमविक्रयी ॥४॥

अथ यत्पञ्च कृत्वः पणते । संवत्सरसंमितो वै यज्ञः पञ्च वाऽऋतवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्वः पणते ॥५॥

अथ हिरण्ये वाचयति । शुक्रं त्वा शुक्रेण क्रीणामीति शुक्रꣳ ह्येतच्छुक्रेण क्रीणाति यत्सोमꣳ हिरण्येन चन्द्रं चन्द्रेणेति चन्द्रꣳ ह्येतच्चन्द्रेण क्रीणाति यत्सोमꣳ हिरण्येनामृतममृतेनेत्यमृतꣳ ह्येतदमृतेन क्रीणाति यत्सोमꣳ हिरण्येन ॥६॥

अथ सोमविक्रयिणमभिप्रक्रमयति । सꣳमे ते गोरिति यजमाने ते गोरित्येवैतदाह तद्यजमानमभ्याहृत्य न्यस्यत्यꣳमे ते चन्द्राणीति स आत्मन्येव वीर्यं धत्ते शरीरमेव सोमविक्रयी हरते तत्ततः सोमविक्रय्यादत्ते ॥७॥

अथाजायाः प्रतीचीनमुरस्यां वाचयति । तपसस्तनूरसीति तपसो ह वाऽएषा प्रजापतेः सम्भृता यदजा तस्मादाह तपसस्तनूरसीति प्रजापतेर्वर्ण इति सा यत्त्रिः संवत्सरस्य विजायते

इसीलिये अध्वर्यु गाय के गुण गाता है, सोम वाला सोम के गुण नहीं कहता ॥४॥

पाँच बार क्यों मोल करता है ? यज्ञ संवत्सर के तुल्य है । संवत्सर में पाँच ऋतु होते हैं । पाँच बार मोल करने से इसको भी पाँच अंग वाला बना देता है ॥५॥

अब वह यजमान से स्वर्ण के लिये कहलवाता है—'शुक्रं त्वा शुक्रेण क्रीणामि' (यजु० ४।२६) । 'तुझ शुद्ध को शुद्ध के बदले खरीदता हूँ' । वस्तुतः जब वह स्वर्ण के बदले सोम को लेता है तो शुद्ध के बदले ही शुद्ध को खरीदता है । 'चन्द्रं चन्द्रेण' (यजु० ४।२६) । 'चन्द्र को चन्द्र के बदले' । सोम को स्वर्ण के बदले लेना मानो चमकीली चीज के बदले लेना है । 'अमृतं अमृतेन' (यजु० ४।२६) । 'अमृत को अमृत के बदले' । सोम को स्वर्ण के बदले खरीदना मानो अमृत को अमृत के बदले खरीदना ही है ॥६॥

अब सोम वाले को भगवाता है, 'सꣳमे ते गोः' (यजु० ४।२६) । 'गाय वाले अर्थात् यजमान के साथ तेरी गाय हो' । अब (स्वर्ण को) यजमान की ओर लाकर फेंक देता है—'सꣳमे ते चन्द्राणि' (यजु० ४।२६) । 'यह चमकीले सोने के टुकड़े हमारे हों' । इससे यजमान वीर्य (शक्ति) धारण करता है । और सोम विक्रेता के पास केवल शरीर रह जाता है । इसके पीछे सोम विक्रेता उस सोने को ले लेता है ॥७॥

पश्चिमाभिमुखी बकरी के प्रति यजमान से कहलवाता है—'तपसस्तनूरसि' (यजु० ४।२६) । 'तू तप का शरीर है' । यह जो बकरी है यह प्रजापति के तप से उत्पन्न हुई । इसीलिये कहता है कि 'तू तप का शरीर है' । अब कहता है—'प्रजापतेर्वर्णः' (यजु० ४।२६) । 'प्रजापति का वर्ण है' । चूँकि वर्ष में तीन बार जनती है, इसलिये प्रजापति के समान है । 'परमेण पशुना क्रीयसे' (यजु० ४।२६) । 'तू परम पशु से बदले खरीदा जाता' । बकरी तीन बार वर्ष में जनती है । इसलिये परम पशु है । 'सहस्रसां मेधसम्'

तेन प्रजापतेर्वर्णः परमेण पशुना क्रीयसऽइति सा यत्त्रिः संवत्सरस्य विजायते तेन परमः पशुः सहस्रपोषं पुपेयमित्यार्शिषमेवैतदाशास्ते भूमा वै सहस्रं भूमानं गच्छानीत्येवैतदाह ॥८॥

स वाऽअनेनैराजां प्रयच्छति । अनेन राजानमादत्तऽआजा ह वै नामैषा यदजैतया ह्येनमन्तत आजति तामेतत्परोऽक्षमजेत्याचक्षते ॥९॥

अथ राजानमादत्ते । मित्रो न एहि सुमित्रध इति शिवो नः शान्त एहीत्येवैतदाह तं यजमानस्य दक्षिणऽऊरौ प्रत्युह्य वासो निदधातीन्द्रस्योरुमाविश दक्षिणमित्येष वाऽअन्त्रेन्द्रो भवति यद्यजमानस्तस्मादाहेन्द्रस्योरुमाविश दक्षिणमित्युशन्नुशन्तमिति प्रियः प्रियमित्येवैतदाह स्योनः स्योनमिति शिवः शिवमित्येवैतदाह ॥१०॥

अथ सोमक्रयणाननुदिशति । स्वान भ्राजाऽधरे वभ्मारे हस्त सहस्त कृशानवेते यः सोमक्रयणास्तान्रक्षध्वं मा वो दभन्निति धिष्ण्याना वाऽएते भाजनेनैतानि वै धिष्ण्यानां

(यजु० ४।२६) । 'मैं सहस्रों वस्तुओं से पुष्ट हो जाऊँ' । यह आशीर्वाद है । सहस्र का अर्थ है भूमा या बहुत । तात्पर्य यह है कि मुझे बहुत सी चीजें मिल जायँ ॥८॥

इस (बायें हाथ) से बकरी को देता है और इस (दाहिने हाथ) से सोम को लेता है । यह जो 'अजा' है वह 'आजा' । इसी बकरी के द्वारा वह अन्त में सोम को ले जाता है (आजाति) इसलिये उसका परोक्ष नाम 'आजा' या 'अजा' हुआ ॥९॥

इस मन्त्र को पढ़कर सोम राजा को लेता है, 'मित्रो नऽएहि सुमित्रध' (यजु० ४।२७) । 'तू मित्र बनकर हमारे पास आ, अच्छे मित्रों का देने वाला' । इसका अर्थ यह हुआ कि तू कल्याणकारी है हमारे लिये कल्याण कर । उसको यजमान की दाहिनी जाँघ पर रखकर वस्त्र से ढाँककर कहता है, 'इन्द्रस्योरुमाविश दक्षिणम्' (यजु० ४।२७) । 'इन्द्र की दाहिनी जंघा पर बैठ' । यहाँ यजमान इन्द्र है । इसलिये कहता है कि इन्द्र की जाँघ पर बैठ । 'उशन्नुशन्तम्' (यजु० ४।२७) । 'प्यारा प्यारे के पास' । 'स्योन स्योनम्' (यजु० ४।२७) । 'कोमल कोमल के पास' । अर्थात् कल्याणकारक कल्याणकारक के पास ॥१०॥

अब सोम के मोल को सुपिर्द करता है यह कहकर कि—हे स्वान, हे भ्राज, हे अधारि, हे वभारि, हे हस्त, हे सुहस्त, हे कृशानु यह वह चीजें तुम्हारे सोम का मोल है । इनकी रक्षा करो । यह तुमको प्रतिकूल सिद्ध न हों (यजु० ४।२७) । स्वान = उपदेश देने वाला । भ्राज = चमकने वाला । अधार = अघ अर्थात् पाप का शत्रु । वभारि = विश्व का धारण करने वाला । हस्त = जिसके द्वारा हँसते या प्रसन्न होते हैं वह । सुहस्त = जिनके द्वारा हाथ की क्रियायें ठीक होती हैं । कृशानु = जो कृश अर्थात् दुर्बलों को जिलाता है (कृश अनीति इति) या जो दुष्टों को दुबला करता है (दुष्टान् कृशति इति) । यह सात नाम धिष्ण्या अर्थात् यज्ञ की वेदी के हैं । और इसलिये वेदी के अधिष्ठाताओं के भी

नामानि तान्येवैभ्य एतदन्वदिक्षत् ॥११॥

अथात्रापोर्णुते। गर्भो वाऽएष भवति यो दीक्षते प्रावृता वै गर्भा उल्बेनैव जरायुणैव तमत्राजीजनत तस्मादपोर्णुतऽएष वा ऽअत्र गर्भो भवति तस्मात्परिवृतो भवति परिवृता इव हि गर्भा उल्बेनैव जरायुणैव ॥१२॥

अथ वाचयति। परि माग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भजेत्यासीनं वाऽएनमेष आगच्छति स आगतऽउत्तिष्ठति तन्मिथ्याकरोति व्रतं प्रमीणाति तस्यो हैषा प्रायश्चित्तिस्तथो हास्यैतन्न मिथ्याकृतं भवति न व्रतं प्रमीणाति तस्मादाह परि माग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भजेति ॥१३॥

अथ राजानमादायोत्तिष्ठति। उदायुषा स्वायुषोदस्थाममृतो २॥ऽअन्वित्यमृतं वाऽएषोऽनूत्तिष्ठति यः सोमं क्रीतं तस्मादाहोदायुषा स्वायुषोदस्थाममृतां२॥ऽअन्विति ॥१४॥

अथ राजानमादायारोहणमभिप्रैति। प्रति पन्थामपद्महि स्वस्ति गामनेहसम्। येन विश्वाः परि द्विषो वृणक्ति विन्दते वसविति ॥१५॥

यह नाम हैं। अतः इन्हीं के लिये यह अनुदेश हैं ॥११॥

अब वह अपने सिर को खोलता है। जो दीक्षा लेता है वह गर्भ के तुल्य होता है। गर्भ उल्ब और जरायु से लिपटा होता है। उसी गर्भ का अब जन्म हुआ। इसलिये वह सिर को खोल लेता है। अब यह सोम गर्भ का रूप धारण करता है। इसलिये ढका हुआ होता है क्योंकि गर्भ उल्ब और जरायु से ढका होता है ॥१२॥

अब वह इस वेद मन्त्र को पढ़वाता है—'परि माग्ने दुश्चरिताद् बाधस्वा मा सुचरिते भज' (यजु० ४।२८)। 'हे अग्नि! तू मुझे दुश्चरित से हटा और अच्छे चरित में ले जा'। जब सोम राजा आया था तब यह यजमान बैठा था। उसके आने पर यह यजमान खड़ा हो जाता है। यही मिथ्या आचरण है। इससे व्रत भंग होता है (क्योंकि उसने व्रत किया था कि सोमरस निकालने तक गर्भ की अवस्था में ही बैठा रहूँगा)। यह मन्त्र पढ़ना मानो इस दोष का प्रायश्चित्त है। इस पाठ से मिथ्या आचरण नहीं होता और न व्रत भंग होता है इसलिये 'परि माग्ने' मन्त्र का पाठ किया जाता है ॥१३॥

अब सोम राजा को लेकर उठता है यह मन्त्र पढ़कर—'उदायुषा स्वायुषोदस्थाममृतोऽ अन्वि' (यजु० ४।२८)। 'उत्कृष्ट और अच्छी आयु के द्वारा मैं अमृत का अनुसरण करके उठूँ (उन्नत होऊँ)'। वस्तुतः सोम लिये हुये सोम के पीछे उठता है वह मानो अमृत के पीछे उठता है। इसलिये इस 'उदायुषा' मन्त्र का पाठ करता है ॥१४॥

अब सोम राजा को लेकर गाड़ी तक आता है इस मन्त्र को पढ़कर—'प्रति पन्थामपद्महि स्वस्तिगामनेहसम्। येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु' (यजु० ४।२९)। 'हमने कल्याणकारक और पापरहित मार्ग का अवलम्बन किया है जिससे मनुष्य सब दुःखदायी (शत्रुओं) को छोड़ता और धन को प्राप्त करता है' ॥१५॥

देवा ह वै यज्ञं तन्वानाः । तेऽतेन सुरक्षसेभ्य आसङ्काद्भिभया चक्रुरतऽएतद्यजुः स्वस्त्ययनं ददृशुस्तऽएतेन यजुषा नाष्ट्रा रक्षाꣳस्यपहत्यैतस्य यजुषोऽभयेऽनाष्टे निर्वाते स्वस्ति समाश्नुवत तथोऽएवैष एतेन यजुषा नाष्ट्रा रक्षाꣳस्यपहत्यैतस्यऽएजुषोऽभयेऽनाष्टे निर्वाते स्वस्ति समश्नुते तस्मादाह प्रति पन्थामपद्महि स्वस्ति गामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वसविति ॥१६॥

तं वाऽइति हरन्ति । अनसा परिवहन्ति महयन्त्येवैनमेतत्तस्माच्छीर्ष्णा बीजꣳ हरन्त्यनसोदावहन्ति ॥१७॥

अथ यदपागन्ते क्रीणाति । रसो वाऽआपः सरसमेवैतत्क्रीणात्यथ यद्धिरण्यं भवति सयुक्तमेवैतत्क्रीणात्यथ यद्वासो भवति सत्वचसमेवैतत्क्रीणात्यथ यदजा भवति सतपसमेवैतत्क्रीणात्यथ यद्धेनुर्भवति साशिरमेवैतत्क्रीणात्यथ यन्मिथुनौ गावतः समिथुनमेवैतत्क्रीणाति तं वै दशभिरेव क्रीणीयाद्दशाक्षरा वै विराडवैराजः सोमस्तस्माद्दशभिरेव क्रीणीयाद्दशभिः ॥१८॥ ब्राह्मणम् ॥ ६ [३. ३.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिका-संख्या ॥१२८॥

एक बार देवों ने यज्ञ ताना । वे असुर राक्षसों के आक्रमण से भयभीत हुये । तब उन्होंने इस यजुः (प्रार्थना) को कल्याण गृह के रूप में देखा और इस यजुः के द्वारा राक्षस दुष्टों को मारकर इस यजुः के अभय और क्लेशरहित घर में शान्ति प्राप्त की । इसी प्रकार इस यजुः की सहायता से दुष्ट राक्षसों को मारकर इस यजुः के अभय और क्लेशरहित घर में शान्ति प्राप्त करता है । इसीलिये 'प्रति पन्थाम्' मन्त्र का पाठ करता है ॥१६॥

इस सोम को पहले इस प्रकार (हाथ में सिर पर रखकर) ले जाते हैं और फिर गाड़ी में ले जाते हैं । इससे वे उसकी महत्ता बढ़ाते हैं । इसीलिये यह बीज को सिर पर रखकर (खेत में) ले जाते हैं ॥१७॥

सोम को जल के समीप मोल लेता है । जल ही रस है । इस प्रकार वह उसको रस-युक्त करता है । सोने के होने का तात्पर्य यह है कि वह उसको शुक्र (तेज) सहित मोल लेता है । वस्त्र के होने का तात्पर्य यह है कि वह उसको चमड़े सहित मोल लेता है । बकरी के होने का तात्पर्य यह है कि वह उसको तप के साथ मोल लेता है । गाय के होने का तात्पर्य यह है कि वह उसको दूध सहित मोल लेता है जिससे सोमरस में मिलाया जा सके । गायों के जोड़े का अर्थ यह है कि वह सोम को जोड़े के साथ मोल लेता है । सोम को दश चीजों के बदले मोल ले । दश से कम या ज्यादा नहीं । क्योंकि विराट् छन्द में दश अक्षर होते हैं । सोम विराट् है इसलिये दश के बदले खरीदे, न्यूनाधिक के बदले नहीं ॥१८॥

अध्याय ३—ब्राह्मण ४

नीडे कृष्णाजिनमास्तृणाति । अदित्यास्त्वगसीति सोऽसावेव बन्धुरथैनमासादयत्यदित्ये सद आसीदेतीयं वै पृथिव्यदितिः सेयं प्रतिष्ठा तदस्यामेवैनमेतत्प्रतिष्ठायां प्रतिष्ठापयति तस्मादाहादित्ये सद आसीदेति ॥१॥

अथैवमभिपद्य वाचयति । अस्तभ्नाद्द्यां वृषभोऽअन्तरिक्षमिति देवा ह वै यज्ञं तन्वानास्तेऽसुररक्षसेभ्य आसङ्गाद्भिया चक्रुस्तऽएनमेतज्ज्यायाꣳसमेव वधाच्चक्रुर्यदाहास्तभ्नाद्द्यां वृषभोऽअन्तरिक्षमिति ॥२॥

अमिमीत वरिमाणं पृथिव्या इति । तदेनेनेमा लोकानास्तृणोति तस्य हि न हन्तास्ति न वधो येनेमे लोका आस्तृतास्तस्मादाहामिमीत वरिमाणं पृथिव्या इति ॥३॥

आसीदद्विश्वा भुवनानि सम्राडिति । तदेनेनेदꣳ सर्वमास्तृणोति तस्य हि न हन्तास्ति न वधो येनेदꣳ सर्वमास्तृतं तस्मादाहासीदद्विश्वा भुवनानि सम्राडिति ॥४॥

विश्वेत्तानि वरुणस्य व्रतानीति । तदस्माऽइदꣳ सर्वमनुवर्त्मं करोति यदिदं किं च

गाड़ी के नीड अर्थात् बन्द स्थान में काले हिरन के चर्म को रखता है यह कहकर—'अदित्यास्त्वगसि' (यजु० ४।३०)। 'तू अदिति की त्वचा है'। अब वह सोम को रख देता है यह कहकर—'अदित्यै सदऽआसीद' (यजु० ४।३०)। 'तू अदिति के स्थान पर बैठ'। यह पृथिवी ही अदिति है और यही प्रतिष्ठा है। इस प्रकार वह उसको इस प्रतिष्ठा में स्थापित करता है। इसीलिये कहा, 'तू अदिति के स्थान पर बैठ' ॥१॥

अब वह सोम को छूकर पढ़ता है—'अस्तभ्नाद् द्यां वृषभोऽअन्तरिक्षम्' (यजु० ४।३०)। 'इस वृषभ ने द्यौ और अन्तरिक्ष को उभारा'। देवों ने यज्ञ तानां और वे असुर राक्षसों के आक्रमण से डरे। उन्होंने इस सोम को वध की अपेक्षा बड़ा कर दिया। इसीलिये कहा, 'अस्तभ्नाद्' इति ॥२॥

'अमिमीत वरिमाणं पृथिव्याः' (यजु० ४।३०)। 'उसने पृथिवी के विस्तार को मापा। इस प्रकार इस सोम की सहायता से इन लोकों को प्राप्त करता है। जिसने इन लोकों को प्राप्त कर लिया उनके लिये न कोई वध है, न मारने वाला। इसीलिये कहता है, 'अमिमीत वरिमाणं पृथिव्याः' ॥३॥

'आसीदद् विश्वा भुवनानि सम्राट्' (यजु० ४।३०)। 'सब भुवनों में वह सम्राट के रूप में बैठा'। इसकी सहायता से यह 'सर्व' की प्राप्ति करता है। जिसको इस 'सर्व' की प्राप्ति हो गई उसके लिये कोई पामर या वध करने वाला नहीं रहता। इसीलिये 'आसीदद्' मन्त्र पढ़ा ॥४॥

'विश्वेत् तानि वरुणस्य व्रतानि' (यजु० ४।३०)। 'वस्तुतः यह वरुण के व्रत हैं'।

न कं चन प्रत्युद्यामिनं तस्मादाह विश्वेत्तानि वरुणस्य व्रतानीति ॥५॥

अथ सोमपर्याणहनेन पर्याणह्यति । नेदेनं नाष्ट्रा रक्षाꣳसि प्रमृशानिति गर्भो वाऽएष भवति तिर इव वै गर्भास्तिर इवैतत्पर्याणद्धं तिर इव वै देवा मनुष्येभ्यस्तिर इवैतद्यत्पर्याणद्ध तस्माद्वै पर्याणह्यति ॥६॥

स पर्याणह्यति । वनेषु व्यन्तरिक्षं ततानेति वनेषु हीदमन्तरिक्षं विततं वृक्षाग्रेषु वाजमर्वत्सु पय उस्रियास्विति वीर्यं वै वाजः पुमाꣳसोऽर्वन्तः पुꣳस्वेवैतद्वीर्यं दधाति पय उस्रियास्विति पयो हीदमुस्रियासु हितꣳ हृत्सु क्रतुं वरुणो विक्ष्वग्निमिति हृत्सु ह्येष क्रतुर्मनोजवः प्रविष्टो विक्ष्वग्निमिति विक्षु ह्येष प्रजास्वग्निर्दिवि सूर्यमदधात्सोममद्राविति दिवि ह्येसौ सूर्यो हितः सोममद्राविति गिरिषु हि सोमस्तस्मादाह दिवि सूर्यमदधात्सोममद्राविति ॥७॥

अथ यदि द्वे कृष्णाजिने भवतः । तयोरन्यतरत्प्रत्यानह्यति प्रतीनाहभाजनं यद्युऽएकं भवति कृष्णाजिनग्रीवा एवावकृत्य प्रत्यानह्यति प्रतीनाहभाजनꣳ सूर्यस्य चक्षुरारोहाभेरक्ष्णः

इसके द्वारा वह सब को उसका अनुयायी करता है अर्थात् जो कुछ यहाँ है अथवा जो कोई प्रतिकूल है उस सब को । इसीलिये 'विश्वेत् तानि' मन्त्र पढ़ा गया ॥५॥

अब सोम पर्याणहन अर्थात् सोम वस्त्र से सोम को लपेटता है कि दुष्ट राक्षस उसको छू न ले । वस्तुतः यह गर्भ है । गर्भ छिपा रहता है और यह जो ढका हुआ है वह भी छिपा रहता है । देव मनुष्यों से छिपे रहते हैं । जो ढका हुआ है वह भी छिपा रहता है अतः सोम को कपड़े में लपेटता है ॥६॥

इस मन्त्र को पढ़कर लपेटता है—'वनेषु व्यन्तरिक्षं ततान' (यजु० ४।२१) । 'वनों के ऊपर अन्तरिक्ष ताना गया' । वनों अर्थात् वृक्षों के शिरों पर तो अन्तरिक्ष तना हुआ है ही । 'वाजमर्वत्सु पयऽउस्रियासु' (यजु० ४।२१) । 'मनुष्यों में वीर्य और गायों में दूध' यहाँ 'वाज' का अर्थ है वीर्य और 'अर्वन्त' का अर्थ है मनुष्य । इस प्रकार मनुष्यों में वीर्य धारण करता है । गायों में तो दूध होता ही है । [मेरी धारणा है कि पुमान् का अर्थ है 'नर' और 'उस्रियासु' का मादा । नरों में वीर्य होता है और नारियों में दूध'] । 'हृत्सु क्रतु वरुणो विक्ष्वग्निम्' (यजु० ४।२१) । 'मनों में बुद्धि और घरों में अग्नि वरुण ने (स्थापित की)' । मनों में बुद्धि स्थापित है ही और घरों में या प्रजाओं में अग्नि । 'दिवि सूर्यमदधात्सोममद्रौ' (यजु० ४।२१) 'सूर्य को द्युलोक में स्थापित किया और सोम को पहाड़ पर' [यहाँ सोम का अर्थ 'चन्द्र' ठीक नहीं है । सोमलता ही पहाड़ पर होती है और द्युलोक का सूर्य उसको प्रभावित करता है ?] द्युलोक में सूर्य है ही और सोम पहाड़ों में होता ही है । इसलिये पढ़ा 'दिवि सूर्यं' इत्यादि ॥७॥

यदि दो मृगचर्म हों तो उनमें से एक को ध्वजा बनाकर लटकाता है । यदि एक हो तो गर्दन के ऊपर से काटकर ध्वजा के रूप में लटकाता है यह मन्त्र पढ़कर—'सूर्यस्य चक्षु-

कनीनकम्। यत्नैतशभिरीयसे भ्राजमानो विपश्चितेति सूर्यमेवैतत्पुरस्तात्करोति सूर्यं पुरस्ता दाधा रक्षाश्यपघ्नन्नित्यथाग्नेयेनानाष्ट्रेण परिवहन्ति ॥८॥

उद्धते प्रऽउग्ये फलके भवत। तदन्तरेण तिष्ठन्मनसागय प्राजति श्रेयान्वाऽएषोऽभ्यारोहाद्भवति का होतमर्हत्यभ्यारोढ़ तस्मादन्तरेण तिष्ठन्प्राजति ॥९॥

पलाशशाखया प्राजति। यत्र वै गायत्री सोममच्छापतत्तदस्याऽआहरन्त्याऽअपादस्ताभ्यामस्य पर्णं प्रचिच्छेद गायत्र्यै वा सोमस्य वा राजन्तरमिति वा पर्णोऽभवत्तस्मात्पर्णो नाम तद्यदेवात्र सोमस्य न्यक्त तदिहाप्यसदिति तस्मात्पलाशशाखया प्राजति ॥१०॥

अथानड्वाहावाजति। तौ यदि कृष्णौ स्यातामन्यतरो वा कृष्णस्तत्र विद्याद्वर्षिष्यत्येवम पर्जन्यो वृष्टिमान्भविष्यतीत्येतदु विज्ञानम् ॥११॥

अथ युनक्ति। उस्रावेत धूर्षाहावित्युस्रौ हि भवतो धूर्षाहाविति धूर्वाहौ हि भवतो युज्यथामनश्रूऽइति युज्यते ह्यनश्रूऽइत्यनार्ताविति तदवीरहणाविति यपापकृतावितिं तद्ब्रह्मचोदनाविति ब्रह्मचोदनौ हि भवत स्वस्ति यजमानस्य गृहान्गच्छतमिति यथैनावन्तरा नाष्ट्रा रारोहाऽग्ने रक्षण कनीनकम्। यत्नैतशभिरीयसे भ्राजमानो विपश्चित' । 'हे मृगचर्म तू सूर्य की आँख के ऊपर चढ़ और अग्नि की आँख के तारे के ऊपर चढ़। जहा सूर्य और अग्नि के साथ चमकता हुआ तू चढ़ता है'। इस प्रकार वह सूर्य को आगे करता है। सूर्य के सामने दुष्ट राक्षस नहीं आने पाते। अब वह सोम को निर्विघ्न गाड़ी मे ले जाते हैं ॥८॥

गाड़ी की बल्लियों के आगे के भाग मे प्रउग या त्रिभुजाकार दो तख्ते होते हैं। उन दोनों के बीच मे सुब्रह्मण्य (उद्गाता का सहायक) खड़ा होकर गाड़ी को चलाता है। सोम राजा उससे बहुत ऊचा होता है। ऐसा कौन है जो सोम राजा के बराबर बैठ सके। इसलिये वह खड़ा होकर गाड़ी को चलाता है ॥९॥

पलाश की शाखा से हाँकता है। जब गायत्री सोम की ओर उड़ी और उसको लिये जा रही थी तो एक बिना पैर के मनुष्य ने निशाना लगा कर गायत्री का या सोम राजा का एक पर गिरा दिया। वह गिरकर पर्ण हो गया। इसीलिये उस पर्ण कहते हैं। वह सोचता है कि जो बात उस सोम के साथ हुई वह यहाँ भी हो। इसलिये वह पलाश से हाँकता है ॥१०॥

दो बैल जुतते हैं। यदि दोनों काले हों या एक काला हो तो जानना चाहिये कि वर्षा बहुत अच्छी होगी। यही विज्ञान है ॥११॥

बैलों को जोतता है यह मन्त्र पढ़कर—'उस्रावेत धूर्षाहौ' (यजु० ४।३३)। 'हे धुरे को सहन करने वाले दो बैलो तुम आओ'। क्योंकि यह दो बैल हैं और धुरे को सह सकते हैं। 'युञ्जथामनश्रू' (यजु० ४।३३)। 'आँसू रहित तुम जुतो'। 'आँसू रहित' का अर्थ है दुःख रहित'। 'अवीरहणौ' (यजु० ४।३३)। 'पाप रहित'। 'ब्रह्मचोदनौ' (यजु० ४।३३)। 'ब्रह्म के प्रेरक'। 'स्वस्ति यजमानस्य गृहान्गच्छतम् (यजु० ४।३३)। 'यजमान

रक्ताꣳसि न हिꣳस्युरेवमेतदाह ॥१२॥

अथ पश्चात्परिक्रम्य अपालम्बमभिपद्याह सोमाय क्रीतायानुब्रूहीति सोमाय पर्युह्यमाणायेति वातो यतरया कामयेत ॥१३॥

अथ वाचयति । भद्रो मेऽसि प्रच्यवस्व भुवस्पतऽइति भद्रो ह्यस्यैष भवति तस्माद्वान्यमाद्रियतेऽप्यस्य राजानः सभागा आगच्छन्ति पूर्वो राज्ञोऽभिवदति भद्रो हि भवति तस्मादाह भद्रो मेऽसीति प्रच्यवस्व भुवस्पतऽइति भुवनानाꣳ ह्येष पतिर्विश्वान्यभि धामानीत्यङ्गानि वै विश्वानि धामान्यङ्गान्येवैतदभ्याह मा त्वा परिपरिणो विदन्मा त्वा परिपन्थिनो विदन्मा त्वा वृका अघायवो विदन्निति यथैनमन्तरा नाष्ट्रा रक्ताꣳसि न विन्देयुरेवमेतदाह ॥१४॥

श्येनो भूत्वा परापतेति । वय एवैनमेतद्भूतं प्रपातयति यद्वाऽउग्रं तन्नाष्ट्रा रक्ताꣳसि नान्ववयन्त्येतद्वै वयसामोजिष्ठं बलिष्ठं यद्यथैनस्तमेवैतद्भूतं प्रपातयति यदाह श्येनो भूत्वा परापतेति ॥१५॥

के घर में कल्याणकारक होकर आओ'। इसके कहने का प्रयोजन यह है कि मार्ग में दुष्ट राक्षस उसको न सतावें ॥१२॥

मुड़कर गाड़ी के पीछे जाता है और अपालम्ब (गाड़ी के पीछे एक लकड़ी का टुकड़ा लगा रहता है जिसे अपालम्ब कहते हैं) को पकड़कर (होता से) कहता है, 'खरीदे हुये सोम के लिये पढ़ो' या 'गाड़ी में लाये हुये सोम के लिये पढ़ो' इन दोनों वाक्यों में से जिस वाक्य को चाहे कहे ॥१३॥

अब यह मंत्र पढ़वाता है—'भद्रो मेऽसि प्रच्यवस्व भुवस्पते' (यजु० ४।३४)। 'हे संसार के पति ! तू मेरे लिये कल्याणकारी है, चल'। सोम वस्तुतः उसके लिये कल्याणकारी है। अतः वह सोम के सिवाय और किसी का आदर नहीं करता। जिस प्रकार महाराजा के आधीन राजा लोग आते हैं और वह पहले उनका अभिवादन करता है और कल्याणकारी होता है, इसीलिये कहा, 'भद्रो मेऽसि' इत्यादि। यह भुवनों का पति है। इसलिये कहा है 'चल'। 'विश्वान्यभि धामानि' (यजु० ४।३४)। 'सब धामों के लिये'। 'विश्वानि धामानि' से तात्पर्य है अंगों से। 'मा त्वा परिपरिणो विदन् मा त्वा परिपन्थिनो विदन् मा त्वा वृकाऽअघायवो विदन्' (यजु० ४।३४)। 'तुझे लुटेरे न मिलें, तुझे डाकू न मिलें, तुझे व्याघ्र भेड़िये न मिलें'। यह इसलिये कहता है कि दुष्ट राक्षस उसको किसी प्रकार से न सतावें ॥१४॥

'श्येनो भूत्वा परापत' (यजु० ४।३४)। 'बाज होकर उड़ जा'। उसको पक्षी बनाकर उड़ाता है। जो बलवान होता है दुष्ट राक्षस उसको पीड़ा नहीं करते। श्येन या बाज सब पक्षियों में बलवान होता है। उसको बाज बनाकर उड़ाता है। इसलिये कहा, 'श्येनो भूत्वा' आदि ॥१५॥

अथ शरीरमेवान्ववहन्ति । य जमानस्य गृहान्गच्छ तन्नौ सꣳस्कृतमिति नात्र तिरोहितमिवास्ति ॥१६॥

अथ सुब्रह्मण्यामाह्वयति । यथा येभ्यः पक्त्वान्नमाहरिष्यन्स्यात्तान्ब्रूयादित्यहे वः पक्तास्मीत्येवमेवैतदेवेभ्यो यज्ञं निवेदयति सुब्रह्मण्योऽꣳ सुब्रह्मण्योऽꣳमिति वै ह देवान्प्रच्यावयति त्रिष्कृत्व आह त्रिरृद्धि यज्ञः ॥१७॥

इन्द्रागच्छेति । इन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्रागच्छेति हरिव आगच्छ मेधातिथेर्मेष वृषणश्वस्य मेने । गौरावस्कन्दिन्नहल्यायै जारेति तद्यान्येवास्य चरणानि तैरेवैनमेतत्समुमोदयिषति ॥१८॥

कौशिक ब्राह्मण गौतम ब्रुवाणेति । साक्षादेतदारुणिनाधुनोपज्ञातं यद्गौतम ब्रुवाणेति स यदि कामयेत ब्रूयादेतद्यदु कामयेतापि नाद्रियेतेत्यहे सुत्यामिति यावदहे सुत्या भवति ॥१९॥

देवा ब्रह्माण आगच्छतेति । तद्देवांश्च ब्राह्मणांश्चाहैतैर्ह्येनमेवैरर्थो भवति यद्देवैश्च ब्राह्मणैश्च ॥२०॥

अब वे उसके शरीर को लाते हैं । 'यजमानस्य गृहान् गच्छ तन्नौ संस्कृतम्' (यजु० ४।३४) । 'यजमान के घरों को जा जो हमारे लिये तैयार किया हुआ है' । यह बहुत स्पष्ट है ॥१६॥

अब सुब्रह्मण्य सम्बन्धी जाप करता है—जैसे जिन लोगों के लिये खाना पकाना हो उनसे कहे कि मैं आपके लिये अमुक दिन भोजन बनाऊँगा । इसी प्रकार देवताओं के लिये यज्ञ का निवेदन करता है । 'सुब्रह्मण्यमोऽम्' ऐसा तीन बार कहता है । क्योंकि ब्रह्म ही देवताओं को प्रेरणा करता है । तीन बार कहने का प्रयोजन यह है कि यज्ञ के तीन भाग हैं ॥१७॥

'इन्द्र आ' । इन्द्र यज्ञ का देवता है । इसलिये कहा कि इन्द्र आ । 'आ जा, घोड़ों वाले मेधातिथि के मेढे आ, वृषणश्व की स्त्री (या वाणी) आ । भैंस के सवार आ । अहल्या के जार या उपपति आ' । इस प्रकार वह उसको उसके व्यवहार में प्रसन्न करता है । (पता नहीं कि इन्द्र के यह नाम क्यों हैं ? या इनका वास्तविक अर्थ क्या है) ॥१८॥

'कौशिक, ब्राह्मण, गौतम कहलाने वाले' (यह भी इन्द्र के ही नाम मालूम होते हैं) । आजकल आरुणि ने यह वाक्य निकाला है अर्थात् 'कौशिक, ब्राह्मण, गौतम कहलाने वाले' । यदि जी चाहे तो इस वाक्य को कहे, जी चाहे न कहे । 'इतने दिनों में सोम यज्ञ होगा' । यहाँ जितने दिनों में होने वाला हो उनके नाम ले दे ॥१९॥

'देव और ब्राह्मण आओ' । यह वह देवों और ब्राह्मणों से कहता है । क्योंकि इन्हीं देवों और ब्राह्मणों की उसको आवश्यकता है ॥२०॥

अथ प्रतिप्रस्थाता। अग्नेय शालामग्नीषोमीयेण पशुना प्रत्युपष्ठितेऽग्नीषोमौ वाऽएतमन्तर्जम्मऽआदधाते यो दीक्षत ऽआत्मानेप्सन्थ्स्रदो दीक्षणीयथ्स हविर्भवति यो वै विष्णु सोम स हविर्वाऽएष भवति यो दीक्षते तदेनमन्तर्जम्मऽआदधाते तत्पशुनात्मान निष्क्रीणीते ॥२१॥

तदेके। आहवनीयादुल्मुकमाहरन्त्ययमग्निरयथ्स सोमस्ताभ्याथ्स सह सन्नपा निष्फेप्यामहऽइति वदन्तस्तदु तथा न कुर्याद्यत्र वाऽएतौ क च तत्सहैव ॥२२॥

स वै द्विरूपो भवति। द्विदेवत्यो हि भवति देवतयोरसमदे कृष्णसारग स्यादित्याहुरेतद्वयेनयो रूपतममिवेति यदि कृष्णसारग न विन्देदथोऽअपि लोहितसारग स्यात् ॥२३॥

तस्मिन्वाचयति। नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतथ्स सपर्यत। दूरे दृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शथ्सतेति नम एतास्माऽएतत्करोति मित्रधे यमेवैनेनैतत्कुरुते ॥२४॥

अथाध्वर्युरारोहण विमुञ्चति। वरुणस्योत्तम्भनमसीत्युपस्तम्भनेनोपस्तम्भनाति वरुण-

अब प्रतिप्रस्थाता शाला के आगे अग्नि और सोम के पशु को लाता है। जो दीक्षा लेता है वह अपने आपको अग्नि और सोम को डाढों में रख देता है। दीक्षा की हवि वस्तुत अग्नि और विष्णु की होती है। जो विष्णु है वही सोम है। हवि वही है जो दीक्षा लेता है। इस प्रकार उन्होंने उसको डाढों में दबा लिया है और इस पशु के द्वारा ही उसका छुटकारा होता है ॥२१॥

कुछ लोग आहवनीय में से जलती लकड़ी निकाल लाते हैं यह कहते हुये, 'यह अग्नि है, यह सोम है। इन्हीं दोनों के सहारे हमारा उद्धार होगा'। परन्तु ऐसा नहीं करना चाहिये। जहाँ कहीं वे हों वे साथ ही होते हैं ॥२२॥

पशु दो रूप का होता है। क्योंकि दो देवताओं का होता है। कुछ का कथन है कि इन दोनों का मेल करने के लिये कृष्ण सारग होना चाहिये। क्योंकि यही उन दोनों देवताओं के समानरूप हैं। यदि कृष्ण सारग न मिले तो लोहित सारग (लाल धब्बे वाला) होना चाहिये ॥२३॥

अब यह मन्त्र पढ़वाता है—'नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतथ्स सपर्यत। दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शथ्सत' (यजु० ८।२५)। 'मित्र और वरुण की आँख के लिये नमस्कार। बड़े देव के लिये इस पूजा को करो। इस दूरदर्शी देवोत्पन्न, ऋतु, द्यौ के पुत्र, सूर्य के लिये प्रशंसा करो' इस प्रकार पशु की अर्चना करता है और उसको मित्रता का चिह्न बनाता है ॥२४॥

अब अध्वर्यु कपड़े को हटाता है। 'वरुणस्योत्तम्भनमसि' (यजु० ४।३६)। 'वरुण का खम्भा है तू'। इससे गाड़ी में खम्भा लगाता है। 'वरुणस्य स्कम्भसर्जनीस्थ' (यजु०

स्थ स्कम्भसर्जनी स्थ इति शम्येऽउद्गृहति स यदाह वरुणस्य स्कम्भसर्जनी स्थ इति वरुणयो ह्येष एतर्हि भवति यत्सोमः क्रीतः ॥२५॥

अथ चत्वारो राजासन्दीमाददते । द्वौ वाऽअस्मै मानुषाय राज्ञऽआददातेऽअथैतां चत्वारो योऽस्य सकृत्सर्वस्येष्टे ॥२६॥

औदुम्बरी भवति । अन्नं वाऽऊर्गुदुम्बर ऊर्जोऽन्नाद्यस्यावरुद्ध्यै तस्मादौदुम्बरी भवति ॥२७॥

नाभिदघ्ना भवति । अन्न वाऽअन्नं प्रतितिष्ठत्यन्नꣳ सोमस्तस्मान्नाभिदघ्ना यावत्यो ऽएव रेतस आशयो रेतः सोमस्तस्मादवदघ्ना भवति ॥२८॥

तामभिमृशति । वरुणस्यऽऋतसदन्यसीत्यथ कृष्णाजिनमास्तृणाति वरुणस्यऽऋतसदनमसीत्यथैनमासादयति वरुणस्यऽऋतसदनमासीदेति स यदाह वरुणस्यऽऋतसदनमासीदेति वरुणयो ह्येष एतर्हि भवति ॥२९॥

अथैनꣳ शालां प्रपादयति । स प्रपादयन्वाचयति या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् । गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यानिति ४।३६) । 'तुम दोनों वरुण की खूँटी हो' । इससे खूँटियाँ निकालता है । 'वरुण की तुम दोनों खूँटियाँ हो' इसलिये कहता है कि सोम ही अब वरुण है ॥२५॥

अब चार आदमी सोम राजा के तख्त को उठाते हैं । मनुष्य राजा के तख्त को दो आदमी उठाते हैं । सोम राजा के तख्त को चार उठाते हैं क्योंकि यह सब के ऊपर है ॥२६॥

यह तख्त उदुम्बर की लकड़ी का होता है । उदुम्बर रस और अन्न है । रस और अन्न के लिये । इसलिये यह उदुम्बर की लकड़ी का होता है ॥२७॥

यह नाभि के बराबर ऊँचा होता है । क्योंकि नाभि तक ही अन्न पहुँचता है । सोम अन्न है । इसलिये यह नाभि के बराबर ऊँचा होता है । यहीं वीर्य रहता है । सोम वीर्य है । इस लिये नाभि के बराबर होता है ॥२८॥

अब वह तख्त को छूता है यह पढ़कर—'वरुणस्यऽऋत सदन्यसि' (यजु० ४।३६) । 'तू वरुण की उचित बैठक है' । अब वह उस पर काला मृग चर्म बिछाता है यह पढ़ कर—'वरुणस्य ऋतसदनमासीद' (४।३६) । 'वरुण के उचित स्थान पर बैठ' । सोम अब वरुण जैसा हो गया । इसलिये कहा 'वरुण के उचित स्थान पर बैठ' ॥२९॥

अब सोम को शाला में ले जाता है । और ले जाते हुये यजमान से यह कहलवाता है—'या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् । गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यान्' (यजु० ४।३७) । हवि से जो लोग तेरे जिन धामों की अर्चना करें वे सब धाम यज्ञ को चारों ओर से घेर लें । हे सोम हमारे घरों में आओ, यज्ञ की सम्पत्ति को देने वाला, आपत्तियों का भगाने वाला, वीर और वीरों का हनन न

गृहा वै दुर्या गृहाव्रः शिवः शान्तोऽपापकृत्मचरेत्येतदाह ॥३०॥

अत्र हैके । उदपात्रमुपनिनयन्ति यथा राज्ञऽआगतायोदकमाहरेदेवमेतदिति यदन्तस्तदु तथा न कुर्यान्मानुषꣳ ह ते यज्ञे कुर्वन्ति व्युद्ध वै तद्यज्ञस्य यन्मानुषं नेद्वषट्कृतं यज्ञे करवाणीति तस्मान्नोपनिनयेत् ॥३१॥ ब्राह्मणम् ॥ १ [३. ४] ॥ तृतीयोऽध्यायः ॥ [१८] ॥

करने वाला, (यह चार विशेषण सोम के हैं) 'दुर्यान' का अर्थ है घर। इसके कहने का तात्पर्य यह है कि हमारे घर शुभ और शान्त तथा पाप रहित होवें ॥३०॥

कुछ लोग जल के पात्र से जल उँडेलते हैं और कहते हैं कि जब राजा आता है तो उसके लिये भी जल सिंचन किया जाता है परन्तु ऐसा न करे। यह तो मानुषी क्रिया है। यज्ञ में मानुषी क्रिया करना ठीक नहीं। इसलिये जल सिंचन न करे। क्योंकि ऐसा करना अनुचित है ॥३१॥

अध्याय ४—ब्राह्मण १

शिरो वै यज्ञस्यातिथ्यं बाहू प्रायणीयोदयनीयौ । अभितो वै शिरो बाहू भवतस्तस्मादभित आतिथ्यमेने हविषी भवतः प्रायणीयश्चोदनीयश्च ॥१॥

अथ यस्मादातिथ्यं नाम । अतिथिर्वाऽएष एतस्यागच्छति यत्सोमः क्रीतस्तस्माऽएतद्यथा राज्ञे वा ब्राह्मणाय वा महोक्षं वा महाजं वा पचेत्तादृङ् मानुषश्ं हविर्देवानामेवमस्माऽएतदातिथ्यं करोति ॥२॥

तदाहुः । पूर्वोऽतीत्य गृह्णीयादिति यत्र वाऽअर्हन्तमागतं नापचायन्ति कुप्यति वै स तत्र तथा ह्यपचितो भवति ॥३॥

तद्वाऽअन्यतर एव विमुक्तः स्यात् । अन्यतरोऽविमुक्तोऽथ गृह्णीयात्स यदन्यतरो विमुक्तस्तेनागतो यद्वन्यतरोऽविमुक्तस्तेनापचितः ॥४॥

तदु तथा न कुर्यात् । विमुच्यैव प्रपद्य गृह्णीयाद्यथा वै देवाना चरणं तद्वाऽअनु मनुष्याणा तस्मान्मानुषे यावच्च विमुच्यते नैवास्मै तावदुदकश्ं हरन्ति नापचितिं कुर्वन्त्य-

आतिथ्य (मेहमान का सत्कार) यज्ञ का सिर है । प्रायणीय और उदयनीय बाहू हैं । सिर के दोनों ओर बाहू होते हैं । इसलिये प्रायणीय और उदयनीय आहुतियाँ आतिथ्य के दोनों ओर होती हैं ॥१॥

यह आतिथ्य नाम यों पड़ा । यह जो खरीदा गया सोम है वह यजमान के पास अतिथि के रूप में आता है । जैसे राजा या ब्राह्मण के लिये महोक्ष (बड़े बैल ?) या महाज (बड़े बकरे ?) को पकाते हैं यह मानुषी सत्कार होता है । इसी प्रकार देवताओं के लिये हवि दी जाती है, इसलिये आतिथ्य सत्कार किया जाता है । (सम्भव है महोक्ष और महाज किसी भोजन विशेष के नाम हों) ॥२॥

इस पर कहते हैं कि पहले सोम के पास जाकर तब आतिथ्य की सामग्री निकाले । जब कोई अर्हन्त आता है और उसका कोई आदर नहीं करते तो वह क्रुद्ध हो जाता है । इस प्रकार सोम का सत्कार किया जाता है ॥३॥

उन (गाड़ी के बैलों) से एक को मुक्त कर दे (जुआ खोल दे) और दूसरे को नहीं । एक को विमुक्त करने का अर्थ यह हुआ कि सोम आ गया और दूसरे को न छोड़ने का अर्थ यह हुआ कि उसका सत्कार किया गया । (युक्ति हमारी समझ में नहीं आई— अनुवादक) ॥४॥

परन्तु ऐसा न करना चाहिये । दोनों बैलों को खोलने और शाला में सोम के आने के पश्चात् सामग्री निकाले । जैसा देवों का चलन होता है वैसा ही मनुष्यों का । मनुष्यों

नामतो हि स तावद्भवत्यथ यदैव विमुञ्चतेऽथास्माऽउदकꣳ हरन्त्यथापचितिं कुर्वन्ति तर्हि हि स आगतो भवति तस्माद्विमुच्यैव प्रपद्य गृह्णीयात् ॥५॥

स वै संत्वरमाण इव गृह्णीयात् । तथा हापचितो भवति तत्पत्न्यन्वारभते पर्युह्यमाणं वै यजमानोऽन्वारभतेऽथात्र पत्न्युभयत एवैतन्मिथुनेनान्वारभेते यत्र वाऽअर्हन्नागच्छति सर्वगृह्या इव वै तत्र चेष्टन्ति तथा हापचितो भवति ॥६॥

स वाऽअन्येनैव ततो यजुषा गृह्णीयात् । येनो चान्यानि हवीꣳष्येकं वाऽएष भागं क्रीयमाणोऽभिक्रीयते छन्दसामेव राज्याय छन्दसाꣳ साम्राज्याय तस्य छन्दाꣳस्यभितः साचयानि यथा राज्ञोऽराजानो राजकृतः सूतग्रामण्य एवमस्य छन्दाꣳस्यभितः साचयानि ॥७॥

न वै तदवकल्पते । यच्छन्दोभ्य इति केवलं गृह्णीयाद्यत्र वाऽअर्हते पचन्ति तदभितः साचयोऽन्वाभक्ता भवन्त्यराजानो राजकृतः सूतग्रामण्यस्तस्माद्यत्रैवैतस्यै गृह्णीयात्तदेव छन्दाꣳस्यन्वाभजेत् ॥८॥

स गृह्णाति । अग्नेस्तनूरसि विष्णवे त्वेत्यग्निर्वै गायत्री तद्गायत्रीमन्वाभजति ॥९॥

में चलन यह होती है जब आगन्तुक बैल खोल देता है और भीतर आ जाता है तभी पानी लाते हैं और सत्कार करते हैं, क्योंकि तभी वह 'आया हुआ' समझा जाता है। इसी प्रकार बैल खोलकर और सोम को भीतर लाकर ही सामग्री इकट्ठी करे ॥५॥

इसमें शीघ्रता करनी चाहिये। सत्कार की यही रीति है। एक ओर से पत्नी आरम्भ करती है और दूसरी ओर से यजमान। इस प्रकार सोम के दोनों ओर पति और पत्नी लगते हैं। जब कोई अर्हन्त आता है तो सभी मिलकर सत्कार करते हैं। इसी प्रकार चेष्टा करते हैं और इसी प्रकार सत्कार किया जाता है ॥६॥

इस सामग्री को भिन्न यजुः से ग्रहण करे। उसी से नहीं जिससे अन्य हवियाँ ग्रहण की जाती हैं। क्योंकि जब सोम खरीदा जाता है तो विशेष कार्य के लिये खरीदा जाता है अर्थात् छन्दों के राज्य के लिये, छन्दों के साम्राज्य के लिये। छन्द सोम के परिचारक (सेवक) होते हैं। जैसे सूत या ग्रामीण लोग जो राजा नहीं हैं राजा के सेवक होते हैं, इसी प्रकार छन्द भी सोम के परिचारक होते हैं ॥७॥

ऐसा न चाहिये कि केवल छन्दों के लिये ही सामग्री ग्रहण करे। जब किसी अर्हन्त के लिये भोजन बनाते हैं तो जो उसके साथी सूत या ग्रामीण मनुष्य हैं, उनको भी राजा के साथ-साथ खाना देते हैं। इसी प्रकार जब सोम के सत्कार की सामग्री इकट्ठी करे तो छन्दों के लिये भी भाग निकाले ॥८॥

इस मन्त्र से ग्रहण करे—'अग्नेस्तनूरसि विष्णवे त्वा' (यजु० ५।१)। 'तू अग्नि का शरीर है। विष्णु के लिये तुझको'। अग्नि गायत्री है। इस प्रकार गायत्री को उसका भाग मिलता है ॥९॥

सोमस्य तनूरसि विष्णवे त्वेति । क्षत्रं वै सोमः क्षत्रं त्रिष्टुप्तत्त्रिष्टुभमन्वाभजति ॥१०॥

अतिथेरातिथ्यमसि विष्णवे त्वेति । सोऽस्योद्भागो यथा श्रेष्ठमोद्भाग एवमस्यैषऽऋते छन्दोभ्यः ॥११॥

श्येनाय त्वा सोमभृते विष्णवे त्वेति । तद्गायत्रीमन्वाभजति सा यद्गायत्री श्येनो भूत्वा दिवः सोममाहरत्तेन सा श्येनः सोमभृत्तेनैवैनामेतद्वीर्येण द्वितीयमन्वाभजति ॥१२॥

अग्नये त्वा रायस्पोषदे विष्णवे त्वेति । पशवो वै रायस्पोषः पशवो जगती तज्जगतीमन्वाभजति ॥१३॥

अथ यत्पञ्च कृत्वो गृह्णाति । संवत्सरसमितो वै यज्ञः पञ्च वाऽऋतवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्वो गृह्णात्यथ यद्विष्णवे त्वा विष्णवे त्वेति गृह्णाति विष्णवे हि गृह्णाति यो यज्ञाय गृह्णाति ॥१४॥

नवकपालः पुरोडाशो भवति । शिरो वै यज्ञस्यातिथ्यं नवाक्षरा वै गायत्र्यष्टौ तानि यान्यन्वाह प्रणवो नवमः पूर्णार्धो वै यज्ञस्य गायत्री पूर्णार्ध एष यज्ञस्य तस्मान्नवकपालः

'सोमस्य तनूरसि विष्णवे त्वा' (यजु० ५।१)। 'सोम का तू शरीर है। विष्णु के लिये तुझको'। सोम क्षत्र है। क्षत्र त्रिष्टुभ् है। इसलिये त्रिष्टुभ् का सत्कार किया जाता है ॥१०॥

'अतिथेरातिथ्यमसि विष्णवे त्वा' (यजु० ५।१)। 'अतिथि का आतिथ्य है तू। तुझको विष्णु के लिये'। यह उस (सोम) का भाग है। जैसे राजा का भाग अलग होता है, इसी प्रकार छन्दों से अतिरिक्त यह सोम का भाग है ॥११॥

'श्येनाय त्वा सोमभृते विष्णवे त्वा' (यजु० ५।१)। 'तुझे सोम लाने वाले श्येन के लिये। तुझे विष्णु के लिये'। इस प्रकार गायत्री का भाग देता है। क्योंकि गायत्री श्येन होकर द्यौलोक से सोम लाई। इसलिये गायत्री को सोम लाने वाला 'श्येन' कहते हैं। इस पराक्रम के लिये उसको दूसरा भाग देता है ॥१२॥

'अग्नये त्वा रायस्पोषदे विष्णवे त्वा' (यजु० ५।१)। 'अग्नि के लिये तुझको, धन और पुष्टि के देने वाले के लिये तुझको, विष्णु के लिये तुझको'। 'रायस्पोष' से यहाँ पशु से तात्पर्य है। पशु जगती है। इस प्रकार जगती का भाग देता है ॥१३॥

पञ्चगृहीत इसलिये लेता है कि यज्ञ संवत्सर के तुल्य है। संवत्सर में ऋतुयें पाँच होती हैं। संवत्सर के पाँच भाग हैं। इसलिये वह पञ्चगृहीत लेता है। 'विष्णु के लिये तुझको, विष्णु के लिये तुझको' यह कहकर वह सामग्री इसलिये लेता है कि जो चीज यज्ञ के लिये ली जाती है वह विष्णु के लिये ही ली जाती है ॥१४॥

पुरोडाश के नौ कपाल होते हैं। आतिथ्य यज्ञ का शिर है। गायत्री में नौ अक्षर होते हैं। आठ तो वह हैं जो पढ़े जाते हैं और नवाँ प्रणव (ओ३म्) है। गायत्री यज्ञ का

पुरोडाशो भवति ॥१५॥

कार्ष्मर्यमयाः परिधयः । देवा ह वाऽएतं वनस्पतिषु रात्तोमं ददृशुर्यत्कार्ष्मर्यश्ं शिरो वै यज्ञस्यातिथ्यं नेद्धिरो यज्ञस्य नाष्ट्रा रक्षाꣳसि हिनसन्निति तस्मात्कार्ष्मर्यमयाः परिधयो भवन्ति ॥१६॥

आश्वबालः प्रस्तरः । यज्ञो ह देवेभ्योऽपचक्राम सोऽश्वो भूत्वा पराङावर्त्त तस्य देवा अनुहाय बालानभिपेदुस्तानालुलुपुस्तानालुप्य सार्धꣳ संन्यासुस्तत एता ओषधयः समभवन्यदश्वबालाः शिरो वै यज्ञस्यातिथ्य जघनार्धा बाला उभयत एवैतद्यज्ञं परिगृह्णाति यदाश्वबालः प्रस्तरो भवति ॥१७॥

ऐक्षव्यौ विधृती । नेद्वर्हिश्च प्रस्तरश्च सलुभ्यात इत्यथोत्पूयाज्ञꣳ सर्वाएवेव चतुर्गृहीताभ्याज्यानि गृह्णाति न ह्यत्रानुयाजा भवन्ति ॥१८॥

आसाद्य हवीꣳष्यग्निं मन्थति । शिरो वै यज्ञस्यातिथ्य जनयन्ति वाऽएनमेतद्यन्मन्थन्ति शीर्षतो वाऽअग्रे जायमानो जायते शीर्षत एवैतदग्रे यज्ञ जनयत्यग्निर्वै सर्वा देवता अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वति शिरो वै यज्ञस्यातिथ्यꣳ शीर्षत एवैतद्यज्ञꣳ सर्वाभिर्देवताभिः समर्धयति तस्मादग्नि मन्थति ॥१९॥

पूर्वार्ध है । पुरोडाश भी यज्ञ का पूर्वार्ध है । इसलिये उसमें नौ कपाल होते हैं ॥१५॥

परिधि की समिधायें कार्ष्मर्य लकड़ी की होती हैं । देवताओं ने अनुभव किया कि वृक्षों में यह वृक्ष राक्षसों का घातक है । आतिथ्य यज्ञ का शिर है । परिधियाँ कार्ष्मर्य की इसलिये होती हैं कि राक्षस यज्ञ के सिर को हानि न पहुँचा सकें ॥१६॥

प्रस्तर आश्वबाल घास का होता है । एक बार यज्ञ देवताओं के पास से भाग गया । वह घोड़ा बनकर भाग गया । देवों ने उस का पीछा किया और पूँछ के बाल तोड़ डाले । और उनको तोड़कर एक जगह फेंक दिया । उसकी अश्वबाल घास उग खड़ी हुई । आतिथ्य यज्ञ का सिर है और पूँछ के बाल पिछला भाग होते हैं । इस प्रकार अश्वबाल का प्रस्तर होने से वह यज्ञ को दोनों ओर से घेर लेता है ॥१७॥

विधृतियाँ (बर्हि के ऊपर रखने के डंडल) गन्ने की होती हैं जिससे बर्हि और प्रस्तर मिल न जायें । घी को शुद्ध करने मन्त्र का सब चार भागों में ले लेवे क्योंकि इसमें अनुयाज नहीं होते ॥१८॥

हवियों को रखकर अग्नि का मथन करता है, आतिथ्य यज्ञ का शिर है । अग्नि के मथन का अर्थ यह है कि यज्ञ को उत्पन्न किया जाय । जब बच्चा उत्पन्न होता है तो सिर की ओर से उत्पन्न होता है, इस प्रकार वह यज्ञ को सिर की ओर से उत्पन्न करता है । इसके अतिरिक्त अग्नि 'सब देवता' के अर्थ में आता है, अग्नि में सब देवताओं के लिये आहुति दी जाती है । 'आतिथ्य यज्ञ का सिर है' इस प्रकार सब देवताओं के द्वारा वह यज्ञ को सिर अर्थात् आरम्भ से ही बढ़ाता है । इसलिये अग्नि का मथन करता है ॥१९॥

सोऽधिमन्थनꣳ शकलमादत्ते। अग्नेर्जनित्रमसीत्यत्र ह्यग्निर्जायते तस्मादाहाग्नेर्जनित्रमसीति ॥२०॥

अथ दर्भतरुणके निदधाति। वृषणौ स्थ इति तद्यावेवेमौ स्त्रियै साकं जावेतावेवैतौ ॥२१॥

अथाधरारणिं निदधाति उर्वश्यसीत्यथोत्तरारण्याज्यविलापनीमुपस्पृशत्यायुरसीति तामभिनिदधाति पुरूरवा असीत्युर्वशी वाऽअप्सराः पुरूरवाः पतिरथ यत्तस्मान्मिथुनादजायत तदायुरेवमेवैष एतस्मान्मिथुनाद्यज्ञं जनयत्यथाहाग्नये मथ्यमानायानुब्रूहीति ॥२२॥

स मन्थति। गायत्रेण त्वा छन्दसा मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि जागतेन त्वा छन्दसा मन्थामीति तं वै छन्दोभिरेव मन्थति छन्दाꣳसि मथ्यमानायान्वाह छन्दाꣳस्येवैतद्यज्ञमन्वायातयति यथामुमादित्यꣳ रश्मयो जातायानुब्रूहीत्याह यदा जायते प्रह्रियमाणायेत्यनुप्रहरन् ॥२३॥

अब अधिमंथन शकल को लेता है। (अधिमंथन शकल एक लकड़ी का टुकड़ा होता है। जो अधरारणी के ऊपर रक्खा जाता है।) इस मन्त्र से—'अग्नेर्जनित्रमसि' (यजु० ५।२)। 'तू अग्नि का जन्म स्थान है'। क्योंकि यहीं तो अग्नि उत्पन्न की जाती है। इसलिये कहा कि 'तू अग्नि का जन्म-स्थान है' ॥२०॥

अब यह दो दर्भ के डंठल रखता है। यह मंत्र पढ़कर—'वृषणौ स्थ' (यजु० ५।२)। 'तुम नर हो'। यहाँ यह इसी प्रकार है जैसे किसी स्त्री के दो बच्चे एक साथ उत्पन्न हुये हों ॥२१॥

अब वह अधरारणी (नीचे की लकड़ी) को रखता है यह मंत्र पढ़कर—'उर्वश्यसि' (यजु० ५।२)। 'तू उर्वशी है'। अब यह घी की थाली को उत्तरारणी (ऊपर की लकड़ी) से छूता है। यह मंत्र कहकर—'आयुरसि' (यजु० ५।२)। 'तू आयु है'। और उसको (अधरारणी के ऊपर) रख देता है यह कहकर—'पुरूरवाऽअसि' (यजु० ५।२)। 'तू पुरूरवा है'। उर्वशी अप्सरा थी और 'पुरूरवा' उसका पति था। और उनके जोड़े से जो लड़का उत्पन्न हुआ वह 'आयु' था। इसी प्रकार वह यज्ञ को जोड़े से उत्पन्न करता है। अब वह (होता से) कहता है कि मथी जाने वाली आग से प्रार्थना कर ॥२२॥

अब वह आग का मथन करता है यह पढ़कर—'गायत्रेण त्वा छन्दसा मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि जागतेन त्वा छन्दसा मन्थामि' (यजु० ५।२)। 'तुझे गायत्री छन्द से मथता हूँ, त्रिष्टुभ् छन्द से मथता हूँ। जगती छन्द से मथता हूँ'। अग्नि को छन्दों से मथता है। या मथ जाती हुई अग्नि के लिये मंत्र पढ़ता है। इस प्रकार वह छन्दों को यज्ञ से संयुक्त कर देता है जैसे किरणें उस सूर्य से संयुक्त होती हैं। फिर कहता है 'इस उत्पन्न हुये के लिये मंत्र पढ़ो'। जब उसको 'आग्नेयी' पर डालता है तो कहता है, 'डाले हुये के लिये मंत्र पढ़ो' ॥२३॥

सोऽनुप्रहरति । भवतं नः समनसौ सचेतसावरेपसौ । मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य न इति शातिमेवाभ्यामेतद्ददति यथा नान्योऽन्यꣳ हिꣳस्याताम् ॥२४॥

अथ स्रुवेणोपहत्याज्यम् । अग्निमभिजुहोत्यग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रोऽभिशस्तिपावा । स नः स्योनः सुयजा यजेह देवेभ्यो हव्यꣳ सदमप्रयुच्छन्त्स्वाहेत्याहुत्यै वाऽएतमजीजनत तमेतयाहुत्याप्रैषीत्तस्मादेवमभिजुहोति ॥२५॥

तदिडान्तं भवति । नानुयाजान्यजन्ति शिरो वै यज्ञस्यातिथ्यं पूर्वार्धो वै शिरः पूर्वार्धमेवैतद्यज्ञस्याभिसꣳस्करोति स यद्यानुयाजान्यजेद्यथा शीर्षतः पर्याहृत्य पादौ प्रतिदध्यादेवं तत्तस्मादिडान्तं भवति नानुयाजान्यजन्ति ॥२६॥ ब्राह्मणम् ॥ २ [४. १.] ॥

वह अग्नि को इस मन्त्र से (वेदी में) डालता है—'भवत नः समनसौ सचेतसावरेपसौ । मा यज्ञꣳहिꣳसिष्ट मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य न' (यजु० ५।३) । 'हमारे लिये तुम एक मन वाली, एक बुद्धि वाली और पापरहित हो जाओ । यज्ञ को हानि न पहुँचाओ । यज्ञपति को हानि न पहुँचाओ । हे दोनों जातवेद अग्नियो ! आज हमारे लिये कल्याणकारी हो जाओ' । दोनों की शान्ति के लिये वह ऐसा कहता है जिससे एक दूसरे को हानि न पहुँचा सके ॥२४॥

अब स्रुवा से घी लेकर इस मन्त्र से अग्नि में छोड़ता है—'अग्नावग्निश्चरति प्रविष्टऽऋषीणा पुत्रोऽअभिशस्तिपावा । स नः स्योन. सुयजा यजेह देवेभ्यो हव्यꣳ सदमप्रयुच्छन्त्स्वाहा' (यजु० ५।४) । 'ऋषियों का पुत्र पाप से बचाने वाले अग्नि (आहवनीय अग्नि) में प्रविष्ट होकर चलता है । वह अग्नि हमारे लिये सुखकर होकर अच्छे प्रकार यज्ञ करे । देवताओं के लिये हवि को कभी वंचित न करते हुये' । आहुति के लिये अग्नि को उत्पन्न किया । और आहुति से ही उसको प्रसन्न किया । इसलिये उसमें यह आहुति देता है ॥२५॥

अन्त में इसमें इडा आती है । इसके पीछे अनुयाज नहीं होते । आतिथ्य यज्ञ का सिर है । सिर पूर्वार्ध होता है । उसको यज्ञ का पूर्वार्द्ध करके संस्कृत करता है । यदि यह अनुयाज को करता तो सिर की जगह पैर कर देता । इसलिये अन्त में इडा आती है और अनुयाज नहीं होता ॥२६॥

अध्याय ४—ब्राह्मण २

आतिथ्येन वै देवा इष्ट्वा । तान्त्समदविन्दते चतुर्धा व्यद्रवन्न्योऽन्यस्य श्रिया

जब देवताओं ने आतिथ्य कर लिया तो उनमें झगड़ा हो गया । वे चार भागों में

ऽअतिष्ठमाना अग्निर्वसुभिः सोमो रुद्रैर्वरुण आदित्यैरिन्द्रो मरुद्भिर्बृहस्पतिर्विश्वैर्देवैरित्यु हैकऽआहुरेते ह स्मेव ते विश्वे देवा ये ते चतुर्धा व्यद्रवंस्तान्यिद्धतानसुररक्षसान्यनुव्यचेयुः ॥१॥

तेऽविदुः। पापीयाꣳसो वै भवामोऽसुररक्षसानि वै नोऽनुव्यचुरिद्धि वै रध्यामो हन्त संजानामहाऽएकस्य श्रियै तिष्ठामहाऽइति तऽइन्द्रस्य श्रियाऽअतिष्ठन्त तस्मादाहुरिन्द्रः सर्वा देवता इन्द्रश्रेष्ठा देवा इति ॥२॥

तस्मादु ह न स्वा ऋतीयेरन्। य एषां पररतरामिव भवति स एनाननुव्यचैति ते प्रियं द्विषतां कुर्वन्ति द्विषद्धि रध्यन्ति तस्मान्नऽर्तीयेरन्त्स हेवं विद्वान्नऽर्तीयतेऽप्रियं द्विषतां कुरुते न द्विषद्धि रध्यति तस्मान्नऽर्तीयेत ॥३॥

ते होचुः। हन्तेदं तथा करवामहै यथा न इदमाप्रदिवमेवाजर्यमसदिति ॥४॥ शतम् १७०० ॥

ते देवाः। जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवददिरे ते होचुरेतेन नः स नानासदेतेन विष्वङ्यो न एतदतिक्रामादिति कम्योपद्रष्टुरिति तनूनप्त्रेव शाकरस्येति यो

बट गये और एक दूसरे की महत्ता को स्वीकार नहीं करते थे। कहते हैं कि अग्नि वसुओं के साथ हुआ, सोम रुद्रों के, वरुण आदित्यों के, इन्द्र मरुतों के और बृहस्पति विश्वेदेवों के, परन्तु ये जो चार भागों में बटे वे 'विश्वेदेव' ही थे। जब वह अलग-अलग हो गये तो असुर राक्षस उनके बीच में आ घुसे ॥१॥

उनको मालूम हो गया, अरे हम पापी हो गये, असुर राक्षस हमारे बीच में आ घुसे हैं, शत्रु अवश्य हमको विध्वंस कर देंगे; आओ, हम अपने में से एक की महत्ता स्वीकार करलें। तब उन्होंने इन्द्र की श्रेष्ठता मान ली इसलिये इन्द्र ही सर्व-देवता है। इन्द्र ही को देवों ने श्रेष्ठ माना है ॥२॥

इस लिये आपस में झगड़ना नहीं चाहिये। क्योंकि इनका कोई (शत्रु) दूर भी होता है तो इनमें घुस आता है, और शत्रु को जो प्रिय होता है वे उसी को करने लगते हैं, और शत्रु उनका विध्वंस कर देता है। इसलिये झगड़ा नहीं करना चाहिये। जिसको इसका ज्ञान है वह झगड़ता नहीं और वही करता है जो शत्रु को अप्रिय होता है और शत्रु उसका नाश नहीं कर सकता इसलिये झगड़ा नहीं करना चाहिये ॥३॥

जब उन्होंने कहा कि ऐसी बात करनी चाहिये कि यह हमारी मैत्री अजर-अमर हो जाय और कभी नष्ट न हो ॥४॥ [शतम १७००]

इन दोनों ने अपने प्रिय शरीरों और धामों को एकत्र कर लिया अर्थात् अपनी-अपनी शक्तियों को संयुक्त किया और कहने लगे कि हमारी इस मैत्री का हमारे में जो कोई उल्लङ्घन करेगा वही नाश को प्राप्त हो जायेगा। इसका उपद्रष्टा (गवाह) कौन है? 'कम्यान नप्त्रापाम्' यह भी कहता है अर्थात् वायु नहीं कम्यान नप्त्रापाम है। यही प्रजाओं

वाऽअयं पवतऽएव तनूनपाच्छाकरः सोऽयं प्रजानामुपद्रष्टा प्रविष्टस्तावियौ प्राणादानौ ॥५॥

तस्मादाहुः । मनो देवा मन्युर्यन्मा जानन्तीति मनसा संकल्पयति तत्प्राणमपिपद्यते प्राणो वातं वातो देवेभ्य आचष्टे यथा पुरुषस्य मनः ॥६॥

तस्मादेतदृषिणाभ्यनूक्तम् । मनसा सकल्पयति तद्वातमपिगच्छति । वातो देवेभ्य आचष्टे यथा पुरुष ते मन इति ॥७॥

ते देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवदिरे ते होचुरेतेन नः स नानासदेतेन विपड्यो न एतदतिक्रामादिति तदेवा अप्येतर्हि नातिक्रामन्ति के हि स्युर्यदतिक्रामेयुरनृतꣳ हि वदेयुरेकꣳ ह वै देवा व्रत चरन्ति सत्यमेव तस्मादेषा जितमनपजय्य तस्माद्यश एवꣳ ह वाऽअस्य जितमनाजय्यमेव यशो भवति य एव विद्वान्सत्य वदति तदेतत्तानूनप्त्रं निदानेन ॥८॥

ते देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवदिरेऽथैतऽआज्यान्येव गृह्णाना जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवद्यन्ते तस्माद्धु ह न सर्वेणेव समभ्यवेया-

का उपद्रष्टा (गवाह) है क्योंकि यह प्राण और उदान होकर घुमता है ॥५॥

इसीलिये कहा है—'देव मनुष्यो की मन की बात जानते हैं' । जो सकल्प मन म उठता है वह प्राण तक आता है । प्राण से वायु तक । वायु देवताओं को बता देता है कि मनुष्य के मन मे क्या है ॥६॥

यही बात है जो ऋषि ने कही थी 'जो मन मे सकल्प होता है वह वायु को पहुँच जाता है । वायु देवताओ से कह देता है कि इस पुरुष के मन मे यह है । (प्रतीत होता है कि यहाँ वायु का अर्थ है वात-सस्थान या Norvous System और देवों का इन्द्रियाँ। मन के सकल्प Nervous System के द्वारा इन्द्रियों तक आते हैं यह एक स्पष्ट बात है) ॥७॥

देवो ने अपने प्यारे शरीरो और धामों को (शक्तियों को) एकत्र कर लिया और उन्होंने कहा कि हममे से जो इस सन्धि का उल्लङ्घन करेगा वह हममे से निकल जायगा और उसका नाश हो जायगा । और अब भी देव इसका उल्लङ्घन नहीं करते । क्योंकि अगर वे उसका उल्लङ्घन करे तो उनकी क्या दशा हो । वे झूठे पड़ जायँ । देव एक ही व्रत पर चलते हैं, वह है सत्य । इसी से उनकी विजय होती है और कोई उनको जीत नहीं सकता । जो इस रहस्य को जानकर सत्य बोलता है उसकी जीत होती है, उसको कोई पराजित नहीं कर सकता । अत तनूनप्त्र यही व्रत है ॥८॥

देवो ने अपने प्यारे शरीर और धामों (शक्तियों) को सयुक्त कर लिया । घी की आहुतियों को ग्रहण करके ही वह अपने शरीरों और धामों को सयुक्त करते हैं । ऐसा न चाहिये कि हर किसी के साथ अपनी शक्तियाँ जोड़ दी जायँ क्योंकि दूसरे का उन पर साझा

न्नेन्मे जुष्टास्तन्वः प्रियाणि धामानि सार्धꣳ समभ्यवायानिति येनो ह समभ्यवेयाद्यास्मै द्रुह्येदिदꣳ ह्याहुर्न सतानुनप्त्रिणे द्रोग्धव्यमिति ॥९॥

अथातो गृह्णात्येव । आपतये त्वा परिपतये गृह्णामीति यो वाऽअयं पवतऽएष आ च पतति परि च पतत्येतस्माऽउ हि गृह्णाति तस्मादाहापतये त्वा परिपतये गृह्णामीति ॥१०॥

तनूनप्त्रे शाक्करायेति । यो वाऽअयं पवतऽएष तनूनप्ता शाक्कर एतस्माऽउ हि गृह्णाति तस्मादाह तनूनप्त्रे शाक्करायेति ॥११॥

शकनऽओजिष्ठायेति । एष वै शकौजिष्ठ एतस्माऽउ हि गृह्णाति तस्मादाह शकनऽओजिष्ठायेति ॥१२॥

अथातः समवमृशन्त्येव । एतद्ध देवा भूयः समासिरऽइत्थं नः सोऽमुथासद्यो न एतदतिक्रामादिति तथोऽएवैतऽएतत्सममन्तऽइत्थं नः सोऽमुथासद्यो न एतदतिक्रामादिति ॥१३॥

ते समवमृशन्ति । अनाधृष्टमस्यनाधृष्यं देवानामोज इत्यनाधृष्टा हि देवा आसन्ना

हो जाता है । परन्तु जिसके साथ सन्धि करे उसका उल्लङ्घन न करे, क्योंकि कहा है कि जिसके साथ तनूनप्तृ सन्धि हो जाय उसके साथ द्रोह न करना चाहिये' ॥९॥

अब पहले इस मन्त्र को आज्य ग्रहण करता है—'आपतये त्वा परिपतये गृह्णामि' (यजु० ५।५) । 'मैं तुझको उसके लिये लेता हूँ जो जो आगे को बहता है, जो चारों ओर बहता है (अर्थात् वायु)' । यह जो बहने वाला वायु है वही 'आपतति' और 'परिपतित' अर्थात् आगे को चलता है, चारो ओर चलता है । इसीलिये कहा कि 'आपतये त्वा' आदि ॥१०॥

'तनूनप्त्रे शाक्वराय' (यजु० ५।५) । 'बलवान तनूनप्तृ के लिये' । 'तनूनप्तृ शाक्वर' से वायु से तात्पर्य है । यह आज्य उसी के लिये ग्रहण करता है इसलिये कहा 'तनूनप्त्रे' इति ॥११॥

'शक्वनऽओजिष्ठाय' (यजु० ५।५) । 'शक्ति वाले और ओज के लिये' । वस्तुतः यही (वायु) शक्ति वाला और ओज वाला है । उसी के लिये वह ग्रहण करता है, इसलिये कहता है, 'शक्वने' इति ॥१२॥

अब वे इसको छूते हैं । देवतागण इस बात पर एकमत हो गये थे कि जो हम में से इसका उल्लङ्घन करेगा उसकी यह गति होगी । इसी प्रकार यह होता और यजमान भी इस बात पर एकमत हो जाते हैं कि जो कोई हममे से इसका उल्लङ्घन करेगा उसकी ऐसी गति होगी ॥१३॥

वे इस मन्त्र को बोलकर छूते हैं—'अनाधृष्ट मस्यनाधृष्य देवानामोजः' (यजु० ५।५) । 'तू अजेय है (कोई तुझको जीत नहीं सका) क्योंकि देवताओं का ओज अजेय

धृष्याः सह सन्तः समानं वदन्तः समानं दभ्राणा देवानामोज इति देवानां वै जुष्टास्तन्वः प्रियाणि धामान्यनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यमिति सर्वाश्ं हि देवा अभिशस्ति तीर्णा अञ्जसा सत्यमुपगेपमिति सत्यं वदानि मेदमतिक्रमिपमित्येवैतदाह स्थिते मा धा इति स्थिते हि तदेवा आत्मानमदधत यत्सत्यमवदन्यत्सत्यमकुर्वंस्तस्मादाह स्थिते मा धा इति ॥१४॥

अथ यास्तदेवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धश्ं समवददिरे तदिन्द्रे संन्यदधतैप वाऽइन्द्रो य एप तपति न ह वाऽएपोऽग्रे तताप यथा हैवेदमन्तःकृष्णमेवश्ं हैवास तेनैवैतद्वीर्येण तपति तस्माद्यदि बहवो दीक्षेरन्गृहपतयऽएव व्रतमभ्युत्सिच्य प्रयच्छेयुः । स हि तेषामिन्द्रमाजनं भवति यद्यु दक्षिणावता दीक्षेत यजमानायैव व्रतमभ्युत्सिच्य प्रयच्छेयुरिदश्ं ह्याहुरिन्द्रो यजमान इति ॥१५॥

अथ यास्तदेवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धश्ं समवददिरे तत्सार्धश्ं संजघ्ने तत्सामाभवत्तस्मादाहुः सत्यश्ं साम देवजश्ं सामेति ॥१६॥ ब्राह्मणम् ॥ २ [४. २.] ॥

होता है' । क्योंकि देवता-गण जब एक मिलकर बोलते और एक साथ रहते हैं तो अजेय होते हैं, कोई उनपर आक्रमण नहीं कर सकता । 'देवों के ओज' का अर्थ है उनके प्यारे शरीर और धाम अर्थात् शक्तियाँ । अब कहा, 'अनभिशस्त्यभिशस्तिपाऽअनभिशस्तेन्यम्' (यजु० ५।५) । 'जिन पर शाप नहीं लगा, जो शाप से रक्षा करते हैं और जिन पर शाप नहीं लग सकता' । क्योंकि सब देव शाप को पार कर जाते हैं । 'अञ्जसा सत्यमुपगेपम्' (यजु० ५।५) । 'सीधा सच को प्राप्त हो जाऊँ' । इसका तात्पर्य है कि सत्य ही बोलूँ और व्रत का उल्लङ्घन न करूँ । अब कहा, 'स्थिते मा धाः' (यजु० ५।५) । 'मुझे कल्याण में स्थापित कर' । क्योंकि निश्चय ही देवों ने अपने को कल्याण में स्थापित किया जब उन्होंने सत्य बोला और जो सत्य था उसी को किया । इसीलिये कहा 'स्थिते मा धाः' ॥१४॥

देवों ने जिन प्यारे शरीरों और धामों को इकट्ठा किया था उनको उन्होंने इन्द्र में स्थापित कर दिया । निश्चय करके इन्द्र वही है जो यह तपता है (अर्थात् सूर्य) । यह पहले तपता (चमकता) नहीं था । यह ऐसा ही काला (अन्धकारमय) था जैसे अन्य सब । यह वही (देवों का दिया हुआ) पराक्रम है जिससे वह चमकता है । इसलिये यदि बहुत से दीक्षित होते हों तो इस (तानूनप्त्र आज्य) को दूध मिलाकर गृहपति को ही देना चाहिये क्योंकि गृहपति ही इन्द्र के तुल्य है । और यदि दक्षिणा के साथ दीक्षा हो तो इस (आज्य) को दूध मिलाकर गृहपति को ही देना चाहिये क्योंकि कहा भी है कि 'यजमान ही इन्द्र है' ॥१५॥

देवों ने जिन प्यारे शरीरों और धामों (शक्तियों) को इकट्ठा किया वह सब मिलाया गया और वह साम हो गया । इसीलिये कहा है 'साम सत्य है, साम देवज (देवों से उत्पन्न हुआ) है' ॥१६॥

अध्याय ४—ब्राह्मण ३

आतिथ्येन वै देवा इष्ट्वा । तान्त्समदमिन्दत्ते तानूनप्त्रैः समशाम्यंस्त उएतस्य प्रायश्चित्तिमैच्छन्यदन्योऽन्यं पापमवदध्याह पुरा वसृधारपुनर्दीक्षामवाकल्पयंस्त उएतामवान्तरा दीक्षामपश्यन् ॥१॥

तेऽग्निनैव त्वच विपल्याङ्क्षयन्त । तपो वाऽअग्निस्तपो दीक्षा तदवान्तरा दीक्षामुपायस्तदवान्तरा दीक्षामुपायंस्तस्मादवान्तरदीक्षा सन्तरामङ्गुलीराञ्चन्त संतरा मेखला पर्यस्तावेमेनामेतत्सतीं पर्यस्यन्त तथोऽएवैष एतद्यदतः प्राचीनमव्रत्यं वा करोत्यव्रत्यं वा वदति तस्यैवैतत्प्रायश्चित्ति कुरुते ॥२॥

सोऽग्निनैव त्वचं विपल्याङ्क्षते । तपो वाऽअग्निस्तपो दीक्षा तदवान्तरा दीक्षामुपैति सतरामङ्गुलीरचते संतरा मेखला पर्यस्तामेवैनामेतत्सतीं पर्यस्यते प्रजासु हैव तदेवा उपायन् ॥३॥

तेऽग्निनैव त्वचं विपल्याङ्क्षयन्त । अग्निर्वै मिथुनस्य कर्ता प्रजनयिता तत्प्रजा मुपायन्त्संतरामङ्गुलीराञ्चन्त । संतरां मेखला तत्प्रजामात्मन्कुर्वत तथोऽएवैष एतत्प्रजा-

जब देव आतिथ्य इष्टि कर चुके तो उनमें झगड़ा हो गया । इसको उन्होंने वानूनप्त्र द्वारा शान्त किया और इच्छा करने लगे कि यह जो हमने एक दूसरे की बुराई की है । उसका प्रायश्चित होना चाहिये । अवभृथ स्नान से पहले उन्होंने कोई और प्रायश्चित्त रचना नहीं था । इसलिये उन्होंने अवान्तरा-दीक्षा निकाली ॥१॥

अग्नि के द्वारा उन्होंने त्वचा से शरीर को ढक लिया । अग्नि का अर्थ है 'तप' । और दीक्षा 'तप' है । इस प्रकार उन्होंने अवान्तरा-दीक्षा को प्राप्त किया । और चूँकि अवान्तरा दीक्षा को प्राप्त किया इसलिये अवान्तरा-दीक्षा की जाती है । उन्होंने अँगुलियों को बड़ा करके मोड़ लिया (मुट्ठी बाँध ली) और मेखला को कस लिया जैसा कि पहले था । इसी प्रकार वह भी प्रायश्चित्त करता है, उस सब के लिये जो व्रत के विरुद्ध उसने किया हो या कहा हो ॥२॥

उन्होंने अग्नि के द्वारा त्वचा को शरीर के चारों ओर लपेटा । अग्नि तप है । दीक्षा तप है । इस प्रकार वह अवान्तरा-दीक्षा को प्राप्त करता है । अँगुलियों को भीतर की ओर मोड़ता है और मेखला को कसता है जैसे पहले था । देवों ने इसके द्वारा प्रजा की प्राप्ति की थी ॥३॥

अग्नि के द्वारा उन्होंने शरीर पर त्वचा लपेटी । अग्नि मिथुन (जोड़े) का कर्त्ता या जनक है । इससे उनको सन्तान की प्राप्ति हुई । उन्होंने अपनी मुट्ठी बाँध ली और मेखला कस ली और अपने लिये सन्तान उत्पन्न की । इसी प्रकार यजमान भी सन्तान की प्राप्ति

मेवोपैति ॥४॥

सोऽग्निनैव त्वच निपल्यङ्क्यते । अग्निर्वै मिथुनस्य कर्ता प्रजनयिता तत्प्रजामुपैति संतरामङ्गुलीरचते संतरा मेखला तत्प्रजामात्मन्कुरुते ॥५॥

देवानामु हस्म दीक्षितानाम् । यः समिद्धारो वा स्वाध्यायं वा विसृजते तꣳ ह स्मेतरयैवेतरꣳ रूपेणेतरस्येतरमसुररक्षसानि जिघाꣳसन्ति ते ह पापं वदन्त उपसमेयुरिति वै मा त्वमचिकीर्षीरिति माजिघाꣳसीरित्यग्निर्हैव तथा नान्यमुवादाग्नि तथा नान्यः ॥६॥

ते होचुः । अपीत्थं त्वामग्नेऽवादिषूरिति नैवाहमन्यं न मामन्य इति ॥७॥

तेऽविदुः । अयं वै नो विरक्षस्तमोऽस्यैव रूपमसाम तेन रक्षाꣳस्यतिमोक्ष्यामहे तेन स्वर्गं लोकꣳ समश्नुविष्यामहऽइति तेऽग्नेरेव रूपममꣳसंस्तेन रक्षाꣳस्यत्यमुच्यन्त तेन स्वर्गं लोकꣳ समाश्नुवत तथोऽएवैष एतदग्नेरेव रूपं भवति तेन रक्षाꣳस्यतिमुच्यते तेन स्वर्गं लोकꣳ समश्नुते स वै समिधमेवाभ्यादधदवान्तरदीक्षामुपैति ॥८॥

स समिधमभ्यादधाति । अग्ने व्रतपास्त्वे व्रतपा इत्यग्निर्हि देवाना व्रतपतिस्तस्मादाहाग्ने व्रतपास्त्वे व्रतपा इति या तव तनूरियꣳ सा मयि यो मम तनूरेषा सा त्वयि । सह

करता है ॥४॥

अग्नि के द्वारा वह त्वचा को शरीर पर लपेटता है । अग्नि मिथुन (स्त्री-पुरुष के प्रसग) का कर्त्ता और जानने वाला है । वह मुट्ठी को बाँधता और मेखला को कसता है । इस प्रकार सन्तान को प्राप्त करता है ॥५॥

जब देव दीक्षित हो गये तो उनमें जो कोई समिधा लाता या स्वाध्याय का मत्र पढ़ता उसका ही वह वह रूप धारण करके असुर राक्षस उसको मारते । और देवता-गण आपस मे कहते कि तुमने मेरा अहित किया, तुमने मुझे मारा । केवल अग्नि ने किसी से ऐसा नहीं कहा, न किसी ने अग्नि से कहा ॥६॥

उन्होंने पूछा, 'हे अग्नि, क्या तुमसे भी उन्होंने ऐसा कहा' । उसने उत्तर दिया कि 'न मैंने किसी से ऐसा कहा, न किसी ने मुझसे ऐसा कहा' ॥७॥

उन्होंने जान लिया कि यही हमारे बीच मे ऐसा है जो राक्षसो को मार सकता है । हमको इसी का रूप धारण करना चाहिये । इससे हम राक्षसों से बच सकेंगे और स्वर्ग को प्राप्त कर सकेंगे । उन्होंने अग्नि का रूप धारण कर लिया और राक्षसों से बच गये और स्वर्ग प्राप्त कर लिया । इसी प्रकार यह भी अग्नि का रूप धारण करता, राक्षसों से बचता और स्वर्ग की प्राप्ति करता है । वह समिधा को (आहवनीय अग्नि पर) रखकर अवान्तरा-दीक्षा को प्राप्त करता है ॥८॥

वह यह मत्र पढ़कर समिधा रखता है—'अग्ने व्रतपास्त्वे व्रतपाः (यजु० ५।६) । 'हे अग्नि, व्रत के पालने वाले, तुझ पर, हे व्रत के पालने वाले' । अग्नि देवों का व्रतपति

शतꣳशतꣳ ह स्म वाऽएष देवान्प्रत्येकैक एवाꣳशुरेकधनानाप्यायते दश दश वा तुभ्यमिन्द्र॰ प्यायतामा त्वमिन्द्राय प्यायस्वेतीन्द्रो वै यज्ञस्य देवता सा यैव यज्ञस्य देवता तामेवैतदाप्याययत्या त्वमिन्द्राय प्यायस्वेति तदेतस्मिन्नाप्यायन दधात्याप्याययास्मान्त्सखी-न्त्सन्या मेधयेति स यत्सनोति तत्तदाह यत्सन्येत्यथ यदनुब्रूते तदु तदाह यन्मेधयेति स्वस्ति ते देव सोम सुत्यामशीयेत्येका वाऽएतेषामाशीर्भवत्यृत्विजा च यजमानस्य च यज्ञस्योहच गच्छेमेति यज्ञस्योहच गच्छानीत्येवैतदाह ॥१८॥

अथ प्रस्तरे निन्हुवते । उत्तरत उपचारो वै यज्ञोऽथैतद्दक्षिणेवान्वित्याप्याययन्त्य-ग्निर्वै यज्ञस्तद्यज्ञ पृष्ठत कुर्वन्ति तन्मिथ्याकुर्वन्ति देवेभ्य आवृश्च्यन्ते यज्ञो वै प्रस्तरस्तद्यज्ञं पुनरारभन्ते तस्यो हैषा प्रायश्चित्तिस्तथो हैषामेतन्न मिथ्याकृत भवति न देवेभ्य आवृश्च्यन्ते तस्मात्प्रस्तरे निन्हुवते ॥१९॥

तदाहु । अक्ते निन्हुवीरन्ननक्तेऽइत्यनक्ते हैव निन्हुवीरन्ननुप्रहरणꣳ ह्येवा-

धन प्राप्त करने वाले इन्द्र के लिये' । (या तो इसका अर्थ यह है कि सोम मात्र जो धन है उसको लेने वाला । या उस घड़े का नाम भी 'एक धन' है जिसमें सोम मिलाने के लिये जल होता है, उसका प्राप्त करने वाला) । इन्द्र ही यज्ञ का देवता है । इसलिये कहा 'एक धन इन्द्र के लिये' । क्योंकि देवों के प्रति एक एक ऊठल सौ सौ या दस दस 'एक धन' घड़ों को भर देता है । 'आ तुभ्यमिन्द्र प्यायतामा त्वमिन्द्राय प्यायस्व' (यजु० ५।७) । 'इन्द्र तेरे लिये पुष्ट हो और तू इन्द्र के लिये पुष्ट हो' । इन्द्र यज्ञ का देवता है । इस प्रकार वह इस यज्ञ के देवता की पुष्टि करता है । 'इन्द्र के लिये तू पुष्ट हो' ऐसा कहकर वह उसमें पुष्टि का निर्धारण करता है । 'आप्याययास्मान् सखीन् सन्यामेधया' (यजु० ५।७) । 'इन मित्रों को लाभ और बुद्धि से भरपूर कर' । जो उसको लाभ मिलता है उसके लिये वह कहता है 'सन्या' (लाभ से) और जो वह पाठ करता है उसके लिये कहता है 'मेधया' (बुद्धि से) । 'स्वस्ति ते देव सोम सुत्यामशीय' (यजु० ५।७) । 'हे देव सोम, तेरे लिये स्वस्ति हो और मैं सोम भोग को पाऊँ' । यजमान और ऋत्विज का एक ही आशीर्वाद होता है अर्थात् यज्ञ के अन्त को पा जावें । इसके कहने का तात्पर्य यह है कि मैं यज्ञ के अन्त को प्राप्त कर लूँ ॥१८॥

अब वह प्रस्तर पर प्रायश्चित्त करते हैं । यज्ञ में उत्तर की ओर उपस्थित रहना चाहिये था । परन्तु सोम की पुष्टि करने के लिये दक्षिण की ओर जाना पड़ा । अग्नि ही यज्ञ है । और यज्ञ की ओर पीठ कर लेनी पड़ी । यह मिथ्याचार हो गया और देवों से वियोग हो गया । प्रस्तर भी यज्ञ का ही भाग है । इसलिये प्रस्तर को छूकर फिर यज्ञ की प्राप्ति होती है । यही उस मिथ्याचार का प्रायश्चित्त है । इस प्रकार मिथ्याचार का निवारण हो जाता है और देवों से वियोग नहीं होता । इसलिये प्रस्तर पर प्रायश्चित्त किया जाता है ॥१९॥

इस पर प्रश्न उठता है 'अक्त (घृत-युक्त) प्रस्तर पर या अनक्त (जिस पर घृत न

क्तस्य ॥२०॥

ते निन्हुवते । एष्टा रायः प्रेपे भगायऽऋतमृतवादिभ्य इति सत्यꣳ सत्यवादिभ्य इत्येवैतदाह नमो द्यावापृथिवीभ्यामिति तदाभ्या द्यावापृथिवीभ्या निन्हुवते ययोरिदꣳ सर्वमधि ॥२१॥

अथा ह समुल्लुप्य प्रस्तरम् । अग्नीन्मदन्त्यापऽइति मदन्तीत्यग्नीदाह तागिरेहीत्युपर्युपर्यग्निमतिहरति स यन्नानुप्रहरत्येतेन ह्यत ऊर्ध्वान्यहानि प्रचरिष्यन्भवत्यथ यदुपर्युपर्यग्निमतिहरति तदेवास्यानुप्रहृतभाजनं भवति तमग्नीधे प्रयच्छति तमग्नीन्निदधाति ॥२२॥ ब्राह्मणम् ॥ ४ [४. ३.] ॥

लगा हो) प्रस्तर पर' । उत्तर यह है कि अनक्त पर ही । क्योंकि अक्त को तो आग्न के समर्पित किया जाता है ॥२०॥

वे इस मन्त्र को पढ़कर प्रायश्चित्त करते हैं—'एष्टा रायः प्रेपे भगायऽऋतमृतवादिभ्यः' (यजु० ५।७) । 'इच्छित धन शक्ति के लिये मिले, ऋतवादियों के लिये ऋत' । इसका अर्थ यह है कि सत्यवादियों के लिये सत्य । 'नमो द्यावापृथिवीभ्याम्' (यजु० ५।७) । 'द्यौ और पृथिवी के लिये नमस्कार' । इस प्रकार वे द्यौ और पृथिवी के लिये प्रायश्चित्त करते हैं जिन पर सब की स्थिति है ॥२१॥

अब प्रस्तर को उठाकर वह कहता है, 'अग्नीध्, क्या जल खौल गया' । अग्नीध् कहता है, 'हाँ खौल गया' । 'इसको यहाँ ले आओ' । वह (प्रस्तर को) अग्नि के पास ले आता है । वह प्रस्तर को आग में इसलिये नहीं डालता कि अगले दिनों में उससे काम लेना है । और आग के ऊपर इसलिये ले आता है कि वह अग्नि में डालने के लगभग बराबर हो जाय । वह इस अग्नीध् को दे देता है और अग्नीध् इसको (सुरक्षित) रख देता है ॥२२॥

अध्याय ४—ब्राह्मण ४

ग्रीवा वै यज्ञस्योपसदः शिरः प्रवर्ग्यः । तस्माद्यदि प्रवर्ग्यवान्भवति प्रवर्ग्येण प्रचर्यार्थोपसद्भिः प्रचरन्ति तद्ग्रीवाः प्रतिदधति ॥१॥

तद्याः पूर्वाह्णेऽनुवाक्या भवन्ति । ता अपराह्णे याज्या या याज्यास्ता अनुवाक्यास्त-

उपसद यज्ञ की गर्दन है । प्रवर्ग्य सिर है । इसलिये यदि यज्ञ प्रवर्ग्य के साथ किया जाता है तो प्रवर्ग्य के पीछे उपसद करते हैं । इससे गर्दन अपने स्थान पर आ जाती है ॥१॥

पूर्वाह्ण में अनुवाक्य होते हैं वह अपराह्ण में याज्य । जो याज्य हैं वही अनुवाक्य

नौ व्रतपते व्रतानीति तदग्निना त्वचं विपल्यङ्क्तेऽनु मे दीक्षा दीक्षापतिर्मन्यतामनु तपस्तपस्पतिरिति तदवान्तरा दीक्षामुपैति सतरामङ्गुलीरचते सतरा मेखला पर्यस्तामेवैत त्सतीं पर्यस्यते ॥९॥

अथैनमतो मदन्तीभिरुपचरन्ति। तपो वाऽअग्निस्तपो मदन्त्यस्तस्मादेनं मदन्तीभिरुपचरन्ति ॥१०॥

अथ मदन्तीभिरुपस्पृश्य। राजानमाप्याययन्ति तद्यन्मदन्तीरुपस्पृश्य राजानमाप्याययन्ति। वज्रो वाऽआज्यꣳ रेतः सोमो नेद्वज्रेणाज्येन रेतः सोमꣳ हिनसामेति तस्मान्मदन्तीरुपस्पृश्य राजानमाप्याययन्ति ॥११॥

तदाहुः। यस्माऽएतदाप्यायन क्रियतऽआतिथ्यꣳ सोमाय तमेवाग्रऽआप्याययेयुरथावान्तरदीक्षामथ तानूनप्त्राणीति तदु तथा न कुर्याद्यज्ञस्य वाऽएवं कर्मान्न वाऽएनान्तसमदविन्दत्ते सꣳशममेव पूर्वमुपायन्नथावान्तरदीक्षामथाप्यायनम् ॥१२॥

तद्यदाप्याययन्ति। देवो वै सोमो दिवि हि सोमो वृत्रो वै सोम आसीत्तस्यैतच्छरीरं यद्गिरयो यदश्मानस्तदेषोशानानामौषधिर्जायतऽइति ह स्माह श्वेतकेतुरौद्दालकिस्तामेत-

है। इसलिये कहा, 'अग्ने व्रतपा' इत्यादि। 'या तव तनूरिमꣳसा मयि यो मम तनूरेषा सा त्वयि। सह नौ व्रतपते व्रतानि' (यजु० ५।६)। 'जो तेरा शरीर है, वह मेरा हो। जो मेरा शरीर है, वह तेरा हो। हे व्रतपते! हम दोनों के व्रत एक से हों'। इस प्रकार वह अग्नि के द्वारा अपने को त्वचा से ढकता है। 'अनु मे दीक्षा दीक्षापतिर्मन्यतामनु तपस्तपस्पतिः' (यजु० ५।६)। 'दीक्षा-पति मेरी दीक्षा को स्वीकार करे और तप का पति मेरे तप को स्वीकार करे'। इस प्रकार वह अवान्तरा-दीक्षा को करता है। मुट्ठी को कड़ा बाँधता है और मेखला को कसता है जैसा वह पहले था ॥९॥

अब वे उसका मदन्ती जल (गरम-जलों) से सत्कार करते हैं। अग्नि तप है, मदन्ती जल तप है। इसलिये मदन्ती जलों से सत्कार करता है ॥१०॥

मदन्ती जलों को छूकर वह सोम राजा को सपुष्ट करते हैं। वे मदन्ती जलों को छूकर सोम राजा को क्यों सपुष्ट करते हैं इसलिये कि घी वज्र है और सोम वीर्य। मदन्ती जलों को छूकर वह सोम राजा को इसलिये सम्पुष्ट करते हैं कि कहीं वज्ररूपी घी से वीर्य रूपी सोम को हानि न पहुंचे ॥११॥

कुछ लोग कहते हैं कि पहले सोम को सम्पुष्ट करना चाहिये जिसके लिये आतिथ्य किया जाता है, फिर अवान्तर दीक्षा, फिर तानूनप्त्र'। परन्तु ऐसा न करना चाहिये। यज्ञ का कर्म ऐसा ही था। उसमें झगड़ा हो गया। पहले पुरानी शान्ति मिली। फिर अवान्तरा दीक्षा। फिर सपुष्टि ॥१२॥

ये उसकी सपुष्टि क्यों करते हैं? सोम देव है। सोम द्यौलोक में है। सोम वृत्र था। जो पहाड़ और पत्थर थे, वे उसके शरीर थे क्योंकि उसपर उद्यान औषध उगती है।

दाहृत्याभिपुण्वन्ति तां दीक्षोपसद्भिस्तानूनप्त्रैराप्यायनेन सोमं कुर्वन्तीति तथोऽएवैनामेष एतद्दीक्षोपसद्भिस्तनूनप्त्रैराप्यायनेन सोमं करोति ॥१३॥

मधु सारघमिति वाऽआहुः । यज्ञो ह वै मधु सरघमथैतऽएव सरघो मधुकृतो यद्ऋत्विजस्तद्यथा मधु मधुकृत आप्याययेयुरेवमेवैतद्यज्ञमाप्याययन्ति ॥१४॥

यज्ञेन वै देवाः । इमां जिति जिग्युर्यैषामियं जितिस्ते होचुः कथं न इदं मनुष्यैरन्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम ॥१५॥

तद्वाऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः स्तसम्भृत एवं वाऽएष यज्ञꣳ सम्भरति यो दीक्षते वाग्वै यज्ञस्तद्यदेवात्र यज्ञस्य निर्धीतं यद्विदुग्धं तदेवैतत्पुनराप्याययति ॥१६॥

ते वै षड्भूत्वाप्याययन्ति । षड्वाऽऋतव ऋतव एवैतद्भूत्वाप्याययन्ति ॥१७॥

तऽआप्याययन्ति । अꣳशुरꣳशुष्टे देव सोमाप्यायतामिति तदस्याꣳशुमꣳशुमेवाप्याययन्तीन्द्रायैकधनविदऽइतीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्रायेत्येकधनविदऽइति

उद्दालक के पुत्र श्वेतकेतु ने कहा, 'वे इसको लाते और निचोड़ते हैं और दीक्षा, उपसद, तनूनप्त्र और सपुष्टि के द्वारा इसका सोम बनाते हैं। इसी प्रकार दीक्षा, उपसद, तानूनप्त्र और सपुष्टि द्वारा वह इसका सोम बनाते हैं ॥१३॥

कहते हैं कि यह मक्खियों का शहद है। यज्ञ ही मक्खियों का शहद है बनाने वाली मक्खियाँ ऋत्विज हैं। जैसे मक्खियाँ मधु की पुष्टि करती हैं उसी प्रकार ऋत्विज यज्ञ की पुष्टि करते हैं ॥१४॥

यज्ञ के द्वारा ही देवों ने वह विजय पाई जो उनको प्राप्त है। उन्होंने सोचा कि यह कैसे हो कि मनुष्य हमारे इस स्थान तक न चढ़ सकें। उन्होंने यज्ञ के रस को इस प्रकार चूस लिया जैसे शहद की मक्खियाँ शहद को चूस लेती हैं और यज्ञ को यूप के द्वारा बखेर कर अन्तर्धान हो गये। यूप को यूप इसलिये कहते हैं कि इसने द्वारा यज्ञ को बखेरा गया ॥१५॥

ऋषियों ने इसको सुन लिया। उन्होंने यज्ञ को इकट्ठा किया। इसी प्रकार वह भी यज्ञ को इकट्ठा करता है जो दीक्षित होता है। वाणी ही यज्ञ है। इस प्रकार यज्ञ का जो भाग चूस लिया गया था उसकी पूर्ति कर देता है ॥१६॥

वे छः होकर (अर्थात् ब्रह्मा, उद्गाता, होता, अध्वर्यु, आग्नीध्र और यजमान) (सोम की) पुष्टि करते हैं। छः ऋतुयें बनकर वे इसकी पुष्टि करते हैं ॥१७॥

वे इस मन्त्र को पढ़कर पुनेष्टि करते हैं—'अꣳशुरꣳशुष्टे देव सोमाप्यायताम्' (यजु० ५।७)। 'हे देव सोम, तेरा अंशु अंशु (प्रत्येक डण्ठल) पुष्ट हो'। ऐसा कहकर वह सोम या प्रत्येक डण्ठल पुष्ट करते हैं'। 'इन्द्रायैकधनविदे' (यजु० ५।७)। 'एक-

द्वयतिपद्यति तस्मादिमानि ग्रीवाणा पर्वाणि व्यतिपक्तानीमान्यस्थीनि ॥२॥

देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततोऽसुरा एषु लोकेषु पुरश्चक्रिरेऽयस्मयीमेवास्मिल्लोके रजतामन्तरिक्षे हरिणीं दिवि ॥३॥

तद्वै देवा अस्पृण्वत । तऽएताभिरुपसद्भिरुपासीदंस्तद्यदुपासीदंस्तस्मादुपसदो नाम ते पुरः प्राभिन्दन्निमाल्लोकान्प्राजयंस्तस्मादाहुरुपसदा पुरं जयन्तीति यदहोपासते तेनेमा मानुषीः पुरं जयन्ति ॥४॥

एताभिर्वै देवा उपसद्भिः । पुरः प्राभिन्दन्निमाल्लोकान्प्राजयंस्तथोऽएवैष एतन्नाहैवाम्माऽअस्मिंल्लोके कश्चन पुरः कुरुतऽइमानेवैतल्लोकान्प्रभिनत्तीमाल्लोकान्प्रजयति तस्मादुपसद्भिर्यजते ॥५॥

ता वाऽआज्यहविषो भवन्ति । वज्रो वाऽआज्यमेतेन वै देवा वज्रेणाज्येन पुरः प्राभिन्दन्निमाल्लोकान्प्राजयंस्तथोऽएवैष एतेन वज्रेणाज्येनेमाल्लोकान्प्रभिनत्तीमाल्लोकान्प्रजयति तस्मादाज्यहविषो भवन्ति ॥६॥

स वाऽअष्टौ कृत्वो जुहोति गृह्णाति । चतुरुपभृत्यथोऽइतरथाहुश्चतुरेव कृत्वो जुहोति गृह्णीयादष्टौ कृत्व उपभृतीति ॥७॥

है । इस प्रकार यह जोड़ों को मिला देता है जैसे गर्दन की हड्डियाँ और जोड़ मिले होते हैं ॥२॥

देव और असुर दोनों प्रजापति की सन्तान लड़ पड़े । तब असुरों ने इन तीनों लोकों में अपने लिये किले (पुर) बनाये । लोहे का इस लोक में चाँदी का अन्तरिक्ष में और सोने का द्युलोक में ॥३॥

अब देवों की जीत हुई । देवों ने इन किलों को उपसदों के द्वारा घेरा (उपासीदन्) उपासीदन् से 'उपसद' नाम पड़ा । उन्होंने किलों को तोड़ डाला और लोकों को जीत लिया । इसलिये कहते हैं कि 'उपसदों के द्वारा किले जीते जाते हैं' । वस्तुतः घेरा डालकर ही मनुष्य के किले जीते जाते हैं ॥४॥

देवों ने इन उपसदों के द्वारा ही किलों को तोड़ा और लोकों को जीत लिया । (यजमान भी) वैसा ही करता है । यह सच है कि कोई उसके विरुद्ध अपने किले नहीं बनाता । यह इन्हीं लोकों को भेद देता है । यह इनको जीत लेता है । इसीलिये उपसदों के द्वारा यज्ञ करता है ॥५॥

यह आहुतियाँ घृत की होती हैं । घी यज्ञ है । इस यज्ञ घी से देवों ने किलों को तोड़कर इन लोकों पर विजय पाई । इसी प्रकार यह यजमान यज्ञ घी द्वारा इन लोकों का भेदन करता है । इन लोकों को जीतता है । इसलिये यह घी की आहुतियाँ दी जाती हैं ॥६॥

यह आठ बार स्रुच् में भरता है और चार बार उपभृत में । स्रुक् उलटा भी करते हैं अर्थात् चार बार स्रुक् में और आठ बार उपभृत में ॥७॥

स वाऽअष्टगृहीत जुहू गृह्णाति । चतुरुपभृति तद्वज्रमभिभारं करोति तेन वज्रेणाभिभारेणेमाल्लोकान्प्रमिनतीमाल्लोकान्त्रजयति ॥८॥

अग्नीषोमौ वै देवानाꣳ सयुजौ । ताभ्याꣳ सार्धं गृह्णाति विष्णव ऽएकाकिनेऽन्यतरमेवाऽग्रमाचारयति यꣳ स्रुवेण प्रतिक्रामति वाऽउत्तरमाचारमाचार्योऽभिजित्याऽआभजयानीति तस्मादन्यतरमेवाचारमाचारयति यꣳ स्रुवेण ॥९॥

अथाऽआह्व न होतार प्रवृणीते । सीद होतरित्येवाऽहोपविशति हाता होतृषदनऽउपविश्य प्रसौति प्रसृतोऽध्वर्युः स्रुचावादत्ते ॥१०॥

स आहातिक्रामन्नग्नयेऽनुब्रूहीति । आश्राव्याऽहाग्निं यजेति वषट्कृते जुहोति ॥११॥

अथाह सोमायानुब्रूहीति । आश्राव्याह सोम यजेति वषट्कृते जुहोति ॥१२॥

अथ यदुहभृत्याज्य भवति । तत्समानयमान आह विष्णवेऽनुब्रूहीत्याश्राव्याह विष्णुं यजेति वषट्कृते जुहोति ॥१३॥

स यत्समानन्न तिष्ठन्जुहोति । न यथेदं प्रचरन्त्संचरत्यभिजित्याऽअभिनयानीत्यथ

वह आठ बार जुहू में भरता है और चार बार उपभृत में । इससे वह वज्र के आगे के भाग को भारी कर देता है । वज्र के इस भारी भाग से इन लोकों को तोड़ देता और इन पर विजय प्राप्त कर लेता है ॥८॥

देवताओं में अग्नि और सोम का जोड़ा है । इनके लिये एक साथ लेता है । विष्णु के लिये अकेली । एक ही आचार देता है जो स्रुवा में भरी जाती है । क्योंकि जब पीछे की आचार दे देता है तो चल देता है यह कहकर कि 'जीत कर विजयी बनूँ' । इसलिये स्रुवा से एक ही आचार देता है ॥९॥

औषट् कहने के पीछे होता का वरण नहीं करता । इतना ही कहता है कि 'हे होता, बैठ' । होता अपने स्थान पर बैठ जाता है । अब वह अध्वर्यु को प्रेरणा करता है और अध्वर्यु दो चमचे भर लेता है ॥१०॥

(वेदी के दक्षिण की ओर) जाते हुये वह (होता से) कहता है 'अग्नि को आवाहन कर' । और औषट् कहकर कहता है 'अग्नि की स्तुति कर' । और वषट्कार के पीछे आहुति दे देता है ॥११॥

अब कहता है, 'सोम का आवाहन कर' । फिर औषट् कहकर कहता है, 'सोम की स्तुति कर' । फिर वषट्कार के पीछे आहुति दे देता है ॥१२॥

अब उपभृत में जो घी होता है उसको (जुहू के बचे घी में) मिलाकर कहता है, 'विष्णु का आवाहन कर' । फिर औषट् कहकर कहता है 'विष्णु की स्तुति कर' । फिर वषट्कार के पीछे आहुति दे देता है ॥१३॥

वह एक ही स्थान पर खड़ा रहता है । और जैसा चलना फिरना चाहिये चलता

यदेता देवता यजति वज्रमेवैतत्सꣳस्करोत्यग्निमनीकꣳ सोमꣳ शल्यं विष्णुं कुल्मलꣳ ॥१४॥

संवत्सरो हि वज्रः। अग्निर्वाऽअहः सोमो रात्रिरथ यदन्तरेण तद्विष्णुरेतद्वै परिलवमानꣳसवत्सर करोति ॥१५॥

संवत्सरो वज्रः। एतेन वै देवाः संवत्सरेण वज्रेण पुरः प्राभिन्दन्निमाल्लोकान्प्राजयंस्तथोऽएवैषऽएतेन संवत्सरेण वज्रेणेमाल्लोकान्प्रभिनत्तीमाल्लोकान्प्रजयति तस्मादेता देवता यजति ॥१६॥

स वै तिस्रऽउपसदऽउपेयात्। त्रयो वाऽऋतवः सवत्सरस्य संवत्सरस्यैवैतद्रूपं क्रियते संवत्सरमेवैतत्सꣳस्करोति द्विरेकया प्रचरति द्विरेकया ॥१७॥

ताः षट् सम्पद्यन्ते। षड्वाऽऋतवः सवत्सरस्य संवत्सरस्यैवैतद्रूपं क्रियते संवत्सरमेवैतत्सꣳस्करोति ॥१८॥

यद्वु द्वादशोपसदऽउपेयात्। द्वादश वै मासाः संवत्सरस्य संवत्सरस्यैवैतद्रूपं क्रियते सवत्सरमेवैतत्सꣳस्करोति द्विरेकया प्रचरति द्विरेकया ॥१९॥

ताश्चतुर्विꣳशतिः सम्पद्यन्ते। चतुर्विꣳशतिर्वै संवत्सरस्यार्धमासाः संवत्सरस्यै-

फिरता नहीं। इसका कारण यह है कि वह सोचता है कि 'जीतकर विजयी बनूँ'। इन देवताओं के लिये आहुति इसलिये देता है कि वज्र बना सकूँ। अग्नि को वज्र का 'अनीक' या सिरा बनाता है, सोम को शल्य और विष्णु को कुल्मल (यह वज्र के भाग हैं) ॥१४॥

सवत्सर ही वज्र है। अग्नि दिन है और सोम रात और बीच का भाग विष्णु। इस प्रकार वह वर्ष के चक्र को बनाता है ॥१५॥

सवत्सर वज्र है। इसी सवत्सर वज्र के द्वारा दोनों देवों ने किलों को तोड़ा और इन लोकों को जीता। इसी प्रकार यह भी इसी सवत्सर वज्र की सहायता से इन लोकों को तोड़ता और इन लोकों को जीतता है। इसीलिये वह इन देवतों का यजन करता है ॥१६॥

तीन उपसदों को करे। सवत्सर में तीन ऋतुयें होती हैं। इस प्रकार सवत्सर का तद्रूप आ जाता है। इस प्रकार वह सवत्सर को बनाता है। वह प्रत्येक क्रिया को दो बार करता है ॥१७॥

यह छः के बराबर हो जाते हैं। वर्ष में छः ऋतुयें होती है। इस प्रकार वर्ष का तद्रूप हो जाता है। वह इस प्रकार वर्ष को बनाता है ॥१८॥

या बारह उपसदों को करे। वर्ष मे बारह मास होते हैं। इस प्रकार वर्ष का तद्रूप हो जाता है। वह इस प्रकार वर्ष बनाता है। वह प्रत्येक क्रिया को दो बार करता है ॥१९॥

इस प्रकार चौबीस हो जाते हैं। वर्ष मे चौबीस अर्द्धमास होते हैं। यह सवत्सर

वैतद्रूपं क्रियते संवत्सरमेवैतत्संस्कुरुते ॥२०॥

स यत्सायम्प्रातः प्रचरति । तथा ह्येव सम्पत्तस्मद्यते स यत्पूर्वाह्णे प्रचरित तज्जयत्यथ यदपराह्णे प्रचरति सुजितमसदित्यथ यज्जुहोतीद वै पुर युध्यन्ति ता जित्वा स्वाश्ं सतीं प्रपद्यन्ते ॥२१॥

स यत्प्रचरति । तद्युध्यत्यथ यत्संतिष्ठते तज्जयत्यथ यज्जुहोति स्वामेवैतत्सतीं प्रपद्यते ॥२२॥

स जुहोति । यया द्विरेकस्यान्हः प्रचरिष्यन्भवति या तेऽग्नेऽयःशया तनूर्वर्पिष्ठा गह्वरेष्ठा । उग्रं वचोऽअपावधीत्त्वेष वचोऽअपावधीत्स्वाहेत्येवश्रूपा हि साऽसीदयस्मयी हि साऽसीत् ॥२३॥

अथ जुहोति । यया द्विरेकस्यान्हः प्रचरिष्यन्भवति या तेऽग्नेऽयःशया तनूर्वर्पिष्ठा गह्वरेष्ठा । उग्रं वचोऽअपावधीत्त्वेषं वचोऽअपावधीत्स्वाहेत्येवश्रूपा हि साऽसीद्रजता हि साऽसीत् ॥२४॥

अथ जुहोति । ययाद्विरेकस्यान्हः प्रचरिष्यन्भवति या तेऽग्नेऽयःशया तनूर्वर्पिष्ठा का रूप हो जाता है । इस प्रकार वह सवत्सर को बनाता है ॥२०॥

वह साय-प्रातः इसलिये करता है कि इसी से सम्पूर्णता आती है । प्रातःकाल की क्रिया का अर्थ है जय, सायकाल की क्रिया का 'सुजय' और आहुति का अर्थ है कि जीत कर किले को अपना समझकर भीतर घुस जाना ॥२१॥

उपसदों के करने का अर्थ है युद्ध करना, क्रिया के पूर्ण होने का अर्थ है विजय पाना । और आहुति देने का अर्थ है किले को अपना करके उस में घुस जाना ॥२२॥

वह दिन में दो बार इस मन्त्र से आहुति देता है—'या तेऽग्नेऽयःशया तनूर्वर्पिष्ठा गह्वरेष्ठा । उग्रं वचोऽअपावधीत् त्वेष वचोऽअपावधीत् स्वाहा' । (यजु० ५।८) । 'हे अग्नि, यह जो तेरा लोहे का शरीर है । गहरे में बैठा हुआ । इसने (शत्रु की) उग्र वाणी को मार डाला । तीक्ष्ण वाणी को मार डाला' । वह ऐसी ही थी । वह लोहे के समान थी ॥२३॥

अन्य दिन में दो बार इस मन्त्र से आहुति देता है—'या तेऽग्नेऽयःशया तनूर्वर्पिष्ठा गह्वरेष्ठा । उग्रं वचोऽअपावधीत् त्वेष वचोऽअपावधीत् स्वाहा' (यजु० ५।८) । 'हे अग्नि, यह जो तेरा चाँदी का शरीर है, गहरे में बैठा हुआ, इसने उग्र वाणी को मार डाला, तीक्ष्ण वाणी को मार डाला' । इसका ऐसा ही रूप था । चाँदी का रूप था ॥२४॥

अन्य दिन में दो बार इस मन्त्र से आहुति देता है—'या तेऽग्ने हरिशया तनूर्वर्पिष्ठा गह्वरेष्ठा । उग्रं वचो अपावधीत् त्वेष वचो अपावधीत् स्वाहा' (यजु० ५।८) । 'हे अग्नि यह जो तेरा सोने का शरीर है, गहरे में बैठा हुआ, इसने उग्र वाणी को मार डाला

गह्वरेष्ठा । उग्रं वचोऽअपावधीत्वेषं वचोऽअपावधीत्स्वाहेत्येवश्छंरूपा हि साऽसीदरिणी हि साऽसीद्यद्यु द्वादशोपसद उपेयाच्चतुरहमेकया प्रचरेच्चतुरहमेकया ॥२५॥

अथातो व्रतोपसदामेव । पर उर्वीर्वाऽअन्या उपसदः परोऽह्वीरन्याः स यासामेकं प्रथमाहं दोग्ध्यथ द्वावथ त्रींस्ताः पर उर्वरिथ यासां त्रीन्प्रथमाहं दोग्ध्यथ द्वावथैकं ताः परोऽह्वीर्या वै परोऽह्वीस्ताः पर उर्वार्यः पर उर्वीस्ताः परोऽह्वीः ॥२३॥

तपसा वै लोकं जयन्ति । तदस्यैतत्परः—परऽएव वरीयस्तपो भवति परः-परः श्रेयाꣳसं लोकं जयति वसीयानु हैवास्मिंल्लोके भवति य एवं विद्वान्परोऽह्वीरुपसद उपैति तस्मादु परोऽह्वीरेवोपसद उपेयाद्यद्यु द्वादशोपसद उपेयात्त्रीꣳश्चतुरहं दोहयेद् द्वौ चतुरहमेकं चतुरहम् ॥२७॥ ब्राह्मणम् ॥ ५ [४. ४.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या ॥ १२१ ॥ चतुर्थोऽध्यायः [१६] ॥

तीक्ष्ण वाणों को मार जला' । इसका ऐसा ही रूप था । सोने का रूप था । अगर वह बारह उपसदों को करे तो हर एक को चार दिन करना चाहिये ॥२५॥

अब व्रत-उपसदों को लीजिये । कुछ उपसद चौड़े होते जाते हैं और कुछ तंग । जिन में पहले दिन एक थन दूहता है, दूसरे दिन दो, तीसरे दिन तीन, वे चौड़े होते जाते हैं । और जिनमें पहले दिन तीन थन दूहता है, दूसरे दिन दो, तीसरे दिन एक, वे तंग होते जाते हैं । जो तंग होते जाते हैं वह ऐसे ही हैं जैसे चौड़े । और जो चौड़े होते जाते हैं ऐसे ही हैं जैसे तंग ॥२७॥

लोगों को तप से जीतते हैं । जो इस रहस्य को समझकर उन उपसदों को लेता है जो तंग होते जाते हैं उसका तप बढ़ता जाता है और उसका श्रेय बढ़ता है और वह लोक में अच्छा हो जाता है । इसलिये उन उपसदों को लेना चाहिये जो तंग होते जाते हैं । अगर बारह उपसदों को लेवे तो चार दिन तक तीन थन दूहने चाहिये । चार दिन तक फिर दो थन, और फिर चार दिन तक एक थन ॥२७॥

अध्याय ५—ब्राह्मण १

तद्य एष पूर्वार्ध्यो वर्षिष्ठ स्थूणाराजो भवति। तस्मात्प्राङ् प्रक्रामति त्रीन्विक्रमां स्तच्छङ्कुं निहन्ति सोऽन्तःपातः ॥१॥

तस्मान्मध्यमाच्छङ्कोः। दक्षिणा पञ्चदश विक्रमान्प्रक्रामति तच्छङ्कुं निहन्ति सा दक्षिणा श्रोणिः ॥२॥

तस्मान्मध्यमाच्छङ्कोः। उदङ् पञ्चदश विक्रमान्प्रक्रामति तच्छङ्कुं निहन्ति सोत्तरा श्रोणिः ॥३॥

तस्मान्मध्यमाच्छङ्कोः। प्राङ् षट्त्रिंशतं विक्रमान्प्रक्रामति तच्छङ्कुं निहन्ति स पूर्वार्धः। ४॥

तस्मान्मध्यमाच्छङ्कोः। दक्षिणा द्वादश विक्रमान्प्रक्रामति तच्छङ्कुं निहन्ति स दक्षिणोऽश्रसः ॥५॥

तस्मान्मध्यमाच्छङ्कोः। उदङ् द्वादश विक्रमान्प्रक्रामति तच्छङ्कुं निहन्ति स उत्तरोऽश्रस एषा मात्रा वेदेः ॥६॥

अथ तत्त्रिंशद्विक्रमा पश्चाद्भवति। त्रिंशदक्षरा वै विराड्विराजा वै देवा-

शाला के पूर्व की ओर का जो सबसे बड़ा खम्भा होता है, उससे पूर्व की ओर तीन पग चलता है। और वहाँ एक कील गाड़ देता है जिसको 'अन्तः पात' कहते हैं ॥१॥

इस बीच की कील से दक्षिण की ओर पन्द्रह पग चलता है और वहाँ एक कील गाड़ता है उसको 'दक्षिणा श्रोणि' (दाहिना कूल्हा) कहते हैं ॥२॥

इस बीच की कीली से उत्तर की ओर पन्द्रह पग चलता है और वहाँ एक कील गाड़ता है। उसको 'उत्तरा श्रोणि' (बायाँ कूल्हा) कहते हैं ॥३॥

इस बीच की कील से पूर्व की ओर छत्तीस पग चलता है और वहाँ एक कील गाड़ता है। उसको 'पूर्वार्ध' कहते हैं ॥४॥

इस बीच की कील से दक्षिण की ओर बारह पग चलता है और वहाँ एक कील गाड़ता है। उसको 'दक्षिणोश्रंसः' (दायाँ कधा) हैं ॥५॥

इस बीच की कील से बारह पग उत्तर की ओर चलता है और वहाँ एक कील गाड़ता है। उसको 'उत्तरोश्रंसः' (बायाँ कधा) कहते हैं। यही वेदी की मात्रा (प्रमाण) है ॥६॥

यह पीछे तीस पग इसलिये होती है कि विराट् छन्द में तीस अक्षर होते हैं। और विराट् छन्द के द्वारा ही देवों ने इस लोक में प्रतिष्ठा पाई। इसी प्रकार यह भी विराट

अस्मिल्लोके प्रत्यतिष्ठंस्तथोऽएवैष एतद्विराजैवास्मिल्लोके प्रतितिष्ठति ॥७॥

अथोऽअपि त्रयस्त्रिꣳशदक्षरा वै विराट् तद्विराजैवास्मिल्लोके प्रतितिष्ठति ॥८॥

अथ यत्षट्त्रिꣳशद्विकमा प्राची भवति। षट्त्रिꣳशदक्षरा वै बृहती बृहत्या वै देवाः स्वर्गं लोकꣳ समाश्नुवत तथोऽएवैष एतद्बृहत्यैव स्वर्गं लोकꣳ समश्नुते सोऽस्य दिव्याऽहवनीयो भवति ॥९॥

अथ यच्चतुर्विꣳशतिविकमा पुरस्ताद्भवति। चतुर्विꣳशत्यक्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्धे एष यज्ञस्य तस्माच्चतुर्विꣳशतिविकमा पुरस्ताद्भवत्येषा मात्रा वेदेः ॥१०॥

अथ यत्पश्चाद्वरीयसी भवति। पश्चाद्वरीयसी पृथुश्रोणिरिति वै योषां प्रशंसन्ति यद्वेव पश्चाद्वरीयसी भवति पश्चादेवैतद्वरीयः प्रजननं करोति तस्मात्पश्चाद्वरीयसः प्रजननादिमाः प्रजाः प्रजायन्ते ॥११॥

नासिका ह वाऽएषा यज्ञस्य यदुत्तरवेदिः। अथ यदेनामुत्तरां वेदेरुपकिरति तस्मादुत्तरवेदिर्नाम ॥१२॥

द्वय्यो ह वाऽइदमग्रे प्रजा आसुः। आदित्याश्चैवाङ्गिरसश्च ततोऽङ्गिरसः पूर्वे यज्ञꣳ समभरंस्ते यज्ञꣳ सम्भृत्योचुरग्निमिमा नः स्वःसुत्यामादित्येभ्यः प्रब्रूह्यनेन नो

छन्द द्वारा इस लोक मे प्रतिष्ठा प्राप्त कर लेता है ॥७॥

तैंतीस पग भी हो सकते हैं। क्योंकि विराट् मे तैंतीस अक्षर भी होते है और विराट् के द्वारा ही वह इस लोक मे प्रतिष्ठा प्राप्त करता है ॥८॥

पूर्व मे छत्तीस पग क्यों होते हैं? बृहती छन्द छत्तीस अक्षर का होता है। बृहती के द्वारा ही देव लोग स्वर्ग लोक को प्राप्त हुये। इसी प्रकार यह भी बृहती छन्द द्वारा स्वर्ग लोक को प्राप्त करता है। उसकी आहवनीय अग्नि द्यौलोक में होती है ॥९॥

वेदी आगे की ओर २४ पग की क्यो होती है? गायत्री चौबीस अक्षर की होती है। गायत्री यज्ञ का पूर्वार्ध है। इसलिये वह आगे को चौबीस पग चौडी होती है। वेदी की यही मात्रा है ॥१०॥

यह पीछे चौडी क्यो होती है? स्त्रियो की प्रशसा करते है कि इनकी श्रोणी (पिछला भाग) चौडी है। पिछले भाग के चौडे होने से लोग बडी हो जाती है। वीस से ही यह सब प्रजा उत्पन्न होती है ॥११॥

उत्तर वेदी यज्ञ की नाक है। यह ऊपर को उठी होती है इसीलिये इसका नाम 'उत्तर वेदी' है ॥१२॥

पहले दो प्रकार की प्रजा थी। आदित्य और अगिरा। सबसे पहले अगिरो ने यज्ञ का आरम्भ किया और अग्नि से बोले 'आदित्यो से कह दो कि वह हमारे सोम-भाग मे

यज्ञेन याजयतेति ॥१३॥

ते हाऽदित्याऽऊचुः । उपजानीत यथाऽस्मानेवाङ्गिरसो जयान्व वयमङ्गिरस इति ॥१४॥

ते होचुः । वाऽअन्येन यज्ञादपक्रमणमस्त्यन्तरामेव मृत्यां म्रियामहाऽइति ते यज्ञꣳसंजह्रुस्ते यज्ञꣳ सम्भृत्योचुः श्वःसुत्यां वै त्वमस्मभ्यमग्ने प्रावोचोऽथ वयमद्यसुत्यामेव तुभ्यं प्रब्रूमोऽङ्गिरोभ्यश्च तेषां नस्त्वꣳ होतासीति ॥१५॥

तेऽन्यमेवप्रतिप्रजिघ्युः । अङ्गिरसोऽब्रुवन्ते हाप्यङ्गिरसोऽग्नयेऽन्वागत्य चुक्रुधुरिव कथं नु नो दूतश्चरन्न प्रत्याहथा इति ॥१६॥

स होवाच । अनिन्द्या वै मावृषत सोऽनिन्द्यैर्वृतो नाशकमपक्रमितुमिति तस्माद्धानिन्द्यस्य वृतो नापक्रामेत्तऽएतेन सद्यःक्रियाङ्गिरस आदित्यानयाजयन्त्स सद्यःक्रीः ॥१७॥

तेभ्यो वाचं दक्षिणामनयन् । ता न प्रत्यगृह्णन्हास्यामहे यदि प्रतिग्रहीष्याम इति तदु तद्यज्ञस्य कर्म न व्यमुच्यत यद्दक्षिणमासीत् ॥१८॥

अथैभ्यः सूर्यं दक्षिणामानयन् । तं प्रत्यगृह्णंस्तस्माद्धु ह स्माहुराङ्गिरसो वयं याजिमत हो' ॥१३॥

आदित्य बोले, 'ऐसी तरकीब करो कि अंगिरा लोग हमारे यज्ञ में आवें, न कि हम उनके में' ॥१४॥

उन्होंने कहा, 'इसकी तरकीब केवल यज्ञ ही है । हम दूसरा सोम-यज्ञ करें' । उन्होंने यज्ञ की सामग्री इकट्ठी की 'हे अग्नि, तूने तो हमको कल के सोम-याग का बुलावा दिया है । हम तो तुझको और अंगिरों को आज के ही सोम-याग का न्योता देते हैं । तू हमारे लिये होता बन' ॥१५॥

उन्होंने किसी को अंगिरों के पास भेजा । परन्तु अंगिरों ने अग्नि का पीछा किया और इस पर क्रुद्ध होकर बोले कि जब तू हमारा दूत थी तो तूने हमारा आदर क्यों नहीं किया ॥१६॥

उसने कहा, 'अनिन्द्य' अर्थात् निर्दोष लोगों ने मेरा वरण किया । निर्दोषों से वरी जाकर मैं उनका कहना टाल न सकी' । इसलिये अगर कोई निर्दोष मनुष्य किसी (होता) का वरण कर ले तो उसको इनकार नहीं करना चाहिये । तब अंगिरों ने आदित्यों के सोम-याग को उसी दिन कराया । उसका नाम है 'सद्यः-क्री' ॥१७॥

उन्होंने उनको वाणी की दक्षिणा दी । उन्होंने उस (वाणी) को स्वीकार नहीं किया क्योंकि यदि इसे स्वीकार करेंगे तो हमको हानि होगी । इसलिये यज्ञ पूर्ण नहीं हुआ क्योंकि उसमें दक्षिणा की कमी रह गई ॥१८॥

इस पर वे दक्षिणा के लिये उनके पास सूर्य को लाये । उन्होंने सूर्य को स्वीकार कर लिया । इसीलिये अंगिरा लोग कहते हैं कि हम याज्ञिक होने के योग्य हैं । हम दक्षिणा

वाऽआत्विजीना.स्मो वयं दक्षिणीया अपि वाऽअस्माभिरेष प्रतिगृहीतो य एष तपतीति तस्मात्सद्यःक्रियोऽश्वः श्वेतो दक्षिणा ॥१६॥

तस्य रुक्मः पुरस्ताद्भवति। तदेतस्य रूपं क्रियते य एष तपति यद्यश्वं श्वेतं न विन्देदपि गौरेव श्वेतः स्यात्तस्य रुक्मः पुरस्ताद्भवति तदेतस्य रूपं क्रियते य एष तपति ॥२०॥

तेभ्यो ह वाक्चुकोप। केन मदेष श्रेयान्बन्धुनाऽकेनाऽरे यदेतं प्रत्यग्रहीष्ट न मामिति सा हैभ्योऽपचक्राम सोभयानन्तरेण देवासुरान्त्संयत्तान्त्सिश्रीही भूत्वाऽददाना चचार तामुपैत देवा अमन्त्रयन्तोपामुरा अग्निरेव देवानां दूत आस सहरक्षा इत्यसुररक्षसमसुराणाञ्च ॥२१॥

सा देवानुपावर्त्स्यन्त्युवाच। यद्व उपावर्तेय किं मे ततः स्यादिति पूर्वामेव त्वाग्नेराहुतिः प्राप्स्यसीत्यथ हैषा देवानुवाच यां मया को चाशिषमाशासिष्यध्वे सा वः सर्वा समर्धिष्यतऽइति सैनं देवानुपाऽवर्त ॥२२॥

स यद्वार्यमाणेऽग्नौ। उत्तरवेदिं व्याधारयति यदेवै नामदो देवा अब्रुवन्पूर्वा त्वाग्नेराहुतिः प्राप्स्यतीति तदेवैनामेतत्पूर्वामग्नेराहुतिः प्राप्नोति वाग्ध्येषा निदानेनाथ यदुत्तरवेदिं व्याधारयति यजमानायैव तद्यजमानो वै वार्यः ॥२३॥

लेने के योग्य है। यह जो तपता है अर्थात् सूर्य, उसका हमने ग्रहण किया है'। इसलिये 'सद्यःक्री' यज्ञ की दक्षिणा सफेद घोड़ा होता है ॥१६॥

इस घोड़े के आगे एक सोने का आभूषण होता है। इस प्रकार वह उसका प्रतिरूप हो जाता है। जो ऊपर तपता है (अर्थात् सूर्य) ॥२०॥

अब वाणी उनसे नाराज हो गई। 'यह मुझसे किस बात में अच्छा है? उन्होंने उसको क्यों स्वीकार किया, मुझे क्यों न स्वीकार किया'? ऐसा कहकर वह वहाँ से चली गई। और भिक्षिणी बनकर उन दोनों देव और असुरों के बीच में जो कुछ मिला उसको खाने लगी। देवों ने उसको बुलाया और असुरों ने भी। देवों का दूत 'अग्नि' था और असुर-राक्षसों का 'सहरक्षा' ॥२१॥

देवों के पास आने की इच्छा करती हुई वह बोली, 'यदि मैं तुम्हारी ओर आ जाऊँ तो मुझे क्या मिलेगा'? 'तेरे लिये अग्नि में भी पूर्ण आहुति मिलेगी'। तब उसने देवों से कहा, 'तुम मेरे द्वारा आशीर्वाद जो चाहोगे वह तुमको प्राप्त होगा'। अतः वह देवों के पास चली गई ॥२२॥

इसलिये उत्तर वेदी में अग्नि का आधान करते जब यह आहुति देता है तो यह आहुति वाणी को अग्नि में भी पूर्ण पहुँच जाती है क्योंकि देवों ने कहा था कि तुझे अग्नि में पहले ही आहुति पहुँच जाया करेगी। क्योंकि जो उत्तर वेदी है वह वस्तुतः वाणी ही है। पर जो उत्तर वेदी को बनाता है वह यज्ञ की वृद्धि के लिये ही बनाता है। वाणी ही यज्ञ

रवेदिमुपक्रिति यज्ञस्यैव सर्वत्वाय वाग्वि यज्ञो वागु खेपा ॥२३॥

ता वै युगशम्येन विमिमीते । युगेन यत्र हरन्ति शम्यया यतो हरन्ति युगशम्येन वै योग्यं युञ्जन्ति सा यदेनाऽदः सिꣳही भूत्वाशन्तेवाचरत्तदेवैनामे तद्यज्ञे युनक्ति ॥२४॥

तस्मान्निवृत्तदक्षिणा न प्रतिगृह्णीयात् । सिꣳही हैनं भूत्वा क्षिणोति नो हास्मा कुर्वीत सिꣳही हैवैनं भूत्वा क्षिणोति नो हान्यस्मै दद्याद्यज्ञं तदन्यत्रात्मनः कुर्वीत तस्माद्यो ऽस्यापि पाप इव समानबन्धुः स्यात्तस्माऽएनां दद्यात्स यद्दाति तदेनꣳ सिꣳही भूत्वा न क्षिणोति यदुसमानबन्धवे ददाति तदु नान्यत्रात्मनः कुरुतऽएषो निवृत्तदक्षिणायै प्रतिष्ठा ॥२५॥

अथ शम्या च स्रुचा चादत्ते । तद्य एष पूर्वार्ध्यः उत्तरार्ध्यः शङ्कुर्भवति तस्मात्प्रत्यङ् प्रक्रामति त्रीन्विक्रमान्तच्चात्वाल परिलिखति सा चात्वालस्य मात्रा नात्रमात्राऽस्ति यत्रैव स्वयं मनसा मन्येताग्रेणोत्करं तच्चात्वालं परिलिखेत् ॥२६॥

स वेद्यन्तात् । उदीचीꣳ शम्यां निदधाति स परिलिखति ततायनी मे ऽसीतीमा-हे । वाणी ही यह उत्तर वेदी है ॥२३॥

वह उस वेदी को युग और शम्या से नापता है । युग से उस स्थान को जहाँ मिट्टी लाते हैं । और शम्या से उस स्थान को जहाँ मिट्टी लाते हैं । (शायद युग का अर्थ है डण्डा या जुआ और शम्या का कील ?) क्योंकि बैलों को जुये और कील से जोता जाता है । चूँकि वह सिंहनी बनकर अशान्ति से विचरती रही इसलिये वह उसको यज्ञ में जोतता (बाँधता) है ॥२४॥

इसलिये निरस्कृत दक्षिणा को न ग्रहण करना चाहिये (अर्थात् यदि एक ऋत्विज दक्षिणा न ले तो उस दक्षिणा को दूसरा ऋत्विज न ले), नहीं वह सिंहनी बनकर हानि पहुँचाती है । और न (यजमान) उसे घर वापिस ले जाये क्योंकि सिंहिनी होकर वह उसे हानि पहुँचाती है । और न किसी दूसरे को दे, नहीं तो अपने यज्ञ को दूसरे का बना देगा । यदि उसका कोई पापी रिश्तेदार हो उसे दे दे । तब वह सिंहिनी होकर हानि न पहुँचायेगी । और चूँकि वह अपने ही रिश्तेदार को देता है इसलिये यज्ञ को अपने से अलग नहीं करना । तिरस्कृत दक्षिणा का यही निर्णय है ॥२५॥

अब वह शम्या और स्रुवा को लेता है । जहाँ पूर्वार्ध की उत्तरी कील (शङ्कु) होती है वहाँ से तीन पग, पीछे की ओर भरता है और वहाँ 'चात्वाल' का चिह्न बना देता है । चात्वाल की मात्रा वही होती है जो उत्तर वेदी की । और कोई मात्रा नहीं है । जहाँ उसका मन चाहे उत्कर अर्थात् कूड़े का चात्वाल बना दे ॥२६॥

वह वेदी के अन्त से उत्तर की ओर शम्या को रखता है और रेखा खींच देता है इस मन्त्र को पढ़कर—'ततायनी मेऽसि' (यजु० ५।६) । 'मेरे लिये तू वह स्थान है जहाँ पीड़ित लोग सहारा पाते हैं' । इससे तात्पर्य इस भूमि से है जिस पर वह पीड़ित होकर

मवैतदाहास्या ँ हि तत्र एति ॥२७॥

अथ पुरस्तात् । उदीचीꣳ शम्या निदधाति स परिलिखति वित्तायनी मे ऽसीतीमामेवैतदाहास्याꣳ हि वित्तमेति ॥२८॥

अथानुरेयन्तम् । प्राचीꣳशम्या निदधाति स परिलिखत्यघतान्मा नाथितादितीमामेवैतदाह यत्र नाथैतन्मावतादिति ॥२९॥

अथोत्तरतः । प्राचीꣳशम्या निदधाति स परिलिखत्यघतान्मा व्यथितादिती मामेवैतदाह यत्र व्यथैतन्मावतादिति ॥३०॥

अथ हरति । यत्र हरति तदग्नी दुपसीदति स वा अग्नीनामेव नामानि गृह्णन्हरति यान्वाऽअमून्देवा अग्नेऽग्नीन्होत्राय प्रावृणत ते प्राधन्वंस्त ऽइमा एव पृथिवीरुपासर्पन्निमामहैव द्वेऽअस्याः परे तेनैवैतन्निदानेन हरति ॥३१॥

स प्रहरति । निदेदग्निर्नभो नामाग्नेऽअङ्गिर आयुना नाम्नेहीति स यत्प्राधन्वंस्तदायुर्दधाति तत्समीरयति याऽस्या पृथिव्यामसीति योऽस्या पृथिव्यामसीति हत्वा निदधाति यत्तेऽनाधृष्टनाम यज्ञिय तेन त्वादधऽ इति यत्तेऽनाधृष्टꣳ रक्षोभिर्नाम यज्ञियं तेन त्वादधनलता है ॥२७॥

अब यह आगे की ओर उत्तर को शम्या रखता है और रेखा खींचता है, यह पढ़कर—'वित्तायनी मेऽसि' (यजु० ५।६) । 'तू मेरा धन का स्थान है' । इससे तात्पर्य इस भूमि से है क्योंकि यहीं वह धन प्राप्त करके चलता है ॥२८॥

अब वह वेदी के किनारे पर पूर्व की ओर शम्या रखता और रेखा खींचता है, यह पढ़कर—'अरातान् मा नाथितात्' (यजु० ५।६) । 'मुझे दरिद्रता से बचा' । इससे भूमि से तात्पर्य है अर्थात् जहाँ-जहाँ दरिद्रता हो वहाँ से मुझे बचा ॥२९॥

अब यह उत्तर की ओर पूर्व को शम्या रखता है और रेखा खींचता है यह मंत्र पढ़कर—'अरातान् मा व्यथितात्' (यजु० ५।६) । 'मुझे व्यथा से बचा' । इससे भी भूमि से तात्पर्य है अर्थात् 'जहाँ कहीं व्यथा हो वहाँ से बचा' ॥३०॥

अब यह स्रुवा को फेंकता है । जहाँ स्रुवा को फेंकता है वहाँ आग्नीध्र बैठता है । जब यह फेंकता है तो अग्नियों के नाम लेता जाता है । देवों ने जिन अग्नियों को पहले होम के लिये चुना था वे चली गईं और पृथिवी में घुस गईं । एक इस पृथिवी में और दो उनमें जो इससे परे हैं । यह उस अग्नि के साथ फेंकता है जो इस (पृथ्वी) में घुसी थी ॥३१॥

यह इस मंत्र को पढ़कर फेंकता है—'निदेदग्निर्नभो नामाग्नेऽअङ्गिरऽआयुना नाम्नेहि' (यजु० ५।६) । 'नभ नाम वाली अग्नि तुझे जाने, हे अङ्गिरा अग्नि, आयु नाम के साथ आ' । जिस आयु से ये गुजर गये उस आयु को दिलाता है । फिर प्रार्थना में संलग्न करता है । नीचे लिखे मंत्रांश से मिट्टी उठाता है—'योऽस्यां पृथिव्यामसि' (यजु० ५।६) ।

ऽइत्येवैतदाहानु त्वा देवगीतयऽइति चतुर्थꣳ हरति देवेभ्यस्त्वा जुष्टाꣳ हरामीत्येवैतदाह तां वै चतु सक्तेश्वात्मालङ्करति चतस्रो वै दिश सर्वाभ्य एवैनामेतद्दिग्भ्यो हरति ॥३२॥

अथानुव्यूहति । सिꣳहसि सपत्नसाही देवेभ्य कल्पस्वेति सा यदेवाद सिꣳही भूत्वाशान्तेवाचरत्तदेवैनामेतदाह सिꣳहसीति सपत्नसाहीति त्वया वयꣳ, सपत्नान्त्वापीयस' क्रियास्मेत्येवैतदाह देवभ्य कल्पस्वति योषा वाऽउत्तरवेदिस्तामेवैतद्देवेभ्य कल्पयति ॥३३॥

ता वै युगमात्रों वा सर्वत करोति । यजमानस्य वा दश दश पदानि दशाक्षरा वै विराड्वाग्वै विराड्वाग्यज्ञा मध्ये नाभिकामिव करोति समानत्रासीनो व्यावारयाणीति ॥३४॥

तामद्भिरभ्युक्षति । सा यदेवाद सिꣳही भूत्वाशान्ते वाचरच्छान्तिरापस्तामद्भि शमयति योषा वाऽउत्तरवेदिस्तामेवैतद्देवेभ्यो हिन्वति तस्मादद्भिरभ्युक्षति ॥३५॥

सोऽभ्युक्षति । सिꣳहसि सपत्नसाही देवेभ्य शुन्धस्वेत्यथ सिक्तामिरनुविकल्य

और नीचे के मन्त्राश से उस मिट्टी को उत्तर वेदी म रखता है—'यत्तेऽनाधृष्ट नाम यज्ञिय तेन त्वा दधे' (यजु० ५।६) । 'जो तेरा आदर का नाम हो उससे तुझको रखता हूँ' । इससे उसका तात्पर्य यह है कि मै तुझको उस नाम से रखता हूँ जिसे राक्षसों ने अपमानित नहीं किया । इस मन्त्राश से चौथी बार लेता है—'अनु त्वा देव वीतये' (यजु० ५।६) । 'देवो की प्रसन्नता के लिये तुझको' । इससे तात्पर्य है कि तुझसे देव प्रसन्न हैं । इसको वह चौकोर चत्वाल से लेता है । चार दिशाये हैं । अर्थात् वह चारो दिशाओं से लेता है ॥३२॥

अब वह मिट्टी को इस मन्त्राश से अलग करता है—'सिꣳहसि सपत्नसाही देवेभ्य कल्पस्व' (यजु० ५।६) । 'तू सिंहिनी है । शत्रुओं पर विजयिनी । देवा क योग्य बन' । चूँकि वह पहले सिंहिनी बन गई और अशान्त विचरती रही इसलिये वह उसको कहता है 'तू सिंहिनी है' । 'शत्रुओ पर विजयिनी' से तात्पर्य है कि तेरे द्वारा हम अपने शत्रुओं पर विजय पावें' । 'देवों क योग्य बन' । अर्थात् उत्तर वेदी स्त्री है । उसको देवा के योग्य बनाता है ॥३३॥

वे इसको चारो ओर से या तो 'युग' क बराबर बनाता है या यजमान क दस दस पद क बराबर । विराट् छन्द दश अक्षर का होता है । विराट् वाणी है और वाणी यज्ञ है । बीच म नाभि क समान है कि एक ही स्थान पर बैठा बैठा आहुति दे सकें ॥३४॥

खदिरेण ह सोममाजहार । तस्मात् खदिरो यदेनेन सिक्तस्तस्मात्खादिरो यूपो भवति खादिरस्योऽच्छावाकस्य हैनं गोपनायां जहार सोऽच्छावाकोऽहीयत ॥१२॥

हुई' । कद्रू ने कहा, 'तुम्हीं जाओ और बता देना कि हममें से किसकी विजय हुई' ॥६॥

सुपर्णी वहाँ तक उड़ी और कद्रू ने जो कहा था वही ठीक निकला । जब वह वापिस आई तो कद्रू ने उससे पूछा, 'तुम जीतीं या मैं' । उसने कहा 'तुम' । इसको 'सौपर्णी काद्रव' व्याख्यान कहते हैं ॥७॥ [शतम् १६००]

तब कद्रू ने कहा, 'अच्छा मैंने तुमको जीत लिया । द्यौलोक में सोम है, उसको देवों के लिये ले आओ । और देवों के ऋण से मुक्त हो' । यथास्तु । वह छन्दों को लाई । वह गायत्री द्यौलोक में सोम को ले आई ॥८॥

वह (सोम) दो सोने के प्यालों के बीच में था । आँख मारते में ही वे प्याले तेज किरणों द्वारा बन्द हो जाते थे । यह थे दीक्षा और तप । उन पर सोमरक्षक गन्धर्व देखभाल रखते थे । यही विष्यियाँ हैं, यही होत्रा ॥९॥

उसने इनमें से एक प्याले को खोला और देवों को दे दिया । यह दीक्षा थी । इसी से देवों ने अपने को दीक्षित किया ॥१०॥

अब उसने दूसरे प्याले को खोला और देवों को दिया । यही 'तप' था । इससे देवों ने तप किया अर्थात् उपसद क्योंकि उपसद ही तप है ॥११॥

उसने खदिर की लकड़ी से सोम को लिया (आजहार), इसलिये उसका खदिर नाम पड़ा । और चूँकि उसी के द्वारा उसने सोम को लिया इसलिये यूप और स्रुवा खदिर की लकड़ी के होते हैं । जब वह अच्छावाक के सुपुर्द था तब वह उससे ले गई । इसीलिये 'अच्छावाक' को सोमरक्षा का अधिकार नहीं ॥१२॥

तमिन्द्राग्नीऽअनुसमतनुताम् । प्रजानां प्रजात्यैतस्मादैन्द्राग्नोऽच्छावाकः ॥१३॥

तस्माद्दीक्षिता राजानं गोपायन्ति । नेनोऽपहरानिति तस्मात्तत्र सुगुप्तं चिकीर्षंघस्य ह गोपनायामपहरन्ति हीयते ह ॥१४॥

तस्माद्ब्रह्मचारिण आचार्यं गोपायन्ति । गृहान्पशून्नेनोऽ पहरानिति तस्मात्तत्र सुगुप्तं चिकीर्षंघस्य ह गोपनायामपहरन्ति हीयते ह तेनैतेन सुपर्णी देवेभ्य आत्मानं निरक्रीणीत तस्मादाहुः पुण्यलोक ईजान इति ॥१५॥

ऋणथ्ं ह वै पुरुषो जायमान एव । मृत्योरात्मना जायते स यद्यजते यथैव तत्सुपर्णी देवेभ्य आत्मानं निरक्रीणीतैवमेवैष एतन्मृत्यो रात्मानं निष्क्रीणीते ॥१६॥

तेन देवाऽअयजन्त । तमेते गंधर्वाः सोमरक्षा अन्वाजग्मुस्तेऽन्वागत्याब्रुवन्नु नो यज्ञऽआभजत मा नो यज्ञादन्तर्गातास्त्वेव नोऽपि यज्ञे भाग इति ॥१७॥

ते होचुः । किं नस्ततः स्यादिति यथैवास्यामुत्र गोप्तारोऽभूमैव मेवाम्यापीह गोप्तारो भविष्याम इति ॥१८॥

तथेति देवा अब्रुवन् । सोमक्रयणा व इति तानेभ्य एतत्सोमक्रयणा ननु दिशत्यथै-

इन्द्र और अग्नि ने प्रजाओं की उत्पत्ति के लिये उसको स्थित रक्खा इसलिये अच्छावाक इन्द्र और अग्नि का होता है ॥१३॥

इसीलिये दीक्षित पुरुष ही सोम राजा की रक्षा करते हैं कि गन्धर्व कहीं इसको ले न जायँ। इसलिये उचित है कि उसकी भलीभाँति रक्षा की जाय। क्योंकि जिस किसी की सुपिंदगी में से वे सोम को ले जायेंगे वही (सोमपान से) बहिष्कृत कर दिया जायगा ॥१४॥

इसीलिये ब्रह्मचारी लोग अपने आचार्य, उसके घर तथा पशुओं की रक्षा करते हैं कि कहीं वे उसको ले न जायँ। इसलिये उस (सोम) की बड़ी रक्षा करनी चाहिये क्योंकि जिस किसी की सुपुर्दिगी में से वह ले जायेंगे उसी को (सोमपान से) बहिष्कृत कर दिया जायगा। इसी के द्वारा सुपर्णी ने देवों के ऋण से छुटकारा पाया इसलिये कहते हैं कि यज्ञ करने वाले पुण्यलोक को प्राप्त होते हैं ॥१५॥

पुरुष जब पैदा होता है तभी मृत्यु का ऋणी होता है। और जब वह यज्ञ करता है तो मृत्यु के ऋण से छूटता है। जैसे सुपर्णी देवताओं के ऋण से छूट गई ॥१६॥

देवों ने (सोम) के साथ यज्ञ किया। सोमरक्षक गन्धर्वों ने उसका अनुसरण किया और आकर कहने लगे, 'हमको यज्ञ में भाग दो। हमको यज्ञ से बाहर मत करो। यज्ञ में हमारा भी भाग होना चाहिये' ॥१७॥

उन्होंने कहा, 'हमको इससे क्या लाभ होगा'? उन्होंने उत्तर दिया कि 'जैसे उस लोक में हम उसके रक्षक रहे उसी प्रकार इस भूमि पर भी रक्षक रहेंगे' ॥१८॥

देवों ने कहा, 'अच्छा'। जब यह कहना है, 'यह है सोम की मजदूरी'। तो इससे

नानम्बुर्वृतीयसवने यो घृत्याहुतिः प्राप्स्यति न सौम्यापहृतो हि युष्मत्सोमपीथस्तेन सोमाहुतिं नार्हथेति तेनानेषा तृतीयसवनऽएव घृत्याहुतिः प्राप्नोति न सौम्या यच्छालाङ्गैर्धिष्ण्या न्व्याघारयति ॥१६॥

अथ यदग्नौ होष्यन्ति। तद्वोऽविष्यतीति स यदग्नौ जुह्वति तदेनानवत्यथ यद्वः सोमं बिभ्रत उपर्युपरि चरिष्यन्ति तद्वोऽविष्यतीति स यदेनान्त्सोमे बिभ्रत उपर्युपरि चरन्ति तदेनानवति तस्मादध्वर्युः समया धिष्ण्यान्नातीयादध्वर्युर्हि सोम बिभर्ति तमेते व्यात्तेन प्रत्यासते स एतेषा व्यात्तमापद्येत तमग्निर्वाभिदहेद्यो वा यं देवः पशूनामीष्टे स वा हैनमभिमन्येत तस्माद्यद्ध्वर्यो. शालायामर्थः स्यादुत्तरेणाग्नीध्रीयꣳ सञ्चरेत् ॥२०॥

तेवाऽएते। सोमस्यैव गुप्त्यैन्युप्यन्तऽआहवनीयः पुरस्तान्मार्जालीयो दक्षिणत आग्नीध्रीय उत्तरतोऽथ ये मदसि ते पश्चात् ॥२१॥

तेषा वाऽअर्धानुपकिरन्ति। अर्धाननु दिशन्त्येतऽउ हैवैतद्ऋषेऽर्धाञ्च उपकिरन्त्वर्धाननुदिशन्तु तथा यस्मान्लोकादागताः स्मो दिवन्तथा तं लोकं प्रतिप्रज्ञास्यामस्तथा जिज्ञास्याम इति ॥२२॥

सोम के मोल से तात्पर्य है। फिर उन्होंने कहा, 'तीसरे सवन में जो घी की आहुति दी जायगी वह तुम्हारी होगी। सोम का पान तुमसे छीन लिया गया है। इसलिये तुम सोम की आहुति के अधिकारी नहीं रहे। इसलिये सायंकाल के तीसरे सवन में कुण्ड में लकड़ियों पर जो घी की आहुति दी जाती है वही इनकी होती है, सोम की आहुति नहीं ॥१६॥

'और जो आहुति घी में दी जायगी वह तुमको तृप्त कर देगी'। इसलिये जो घी में आहुति दी जाती है वह उनको तृप्त कर देती है। 'और वह जो सोम को चमचों के लिये ऊपर ऊपर फिरायेंगे उनसे तुम्हारी तृप्ति होगी'। इसलिये यह जो सोम को चमचे में भरकर ऊपर ऊपर फिराते हैं उनसे इसकी तृप्ति होती है। इसलिये अध्वर्यु को चाहिये कि कुण्डों के बीच से न गुजरे क्योंकि यह सोम के लिये होता है और वे (कुण्ड) सोम के लिये मुँह खोले बैठे होते हैं। और यह उनके मुँह में घुस जायेगा। इसलिये या तो उसको अग्नि जला देगा या जो देव पशुओं का अधिष्ठाता है (पशुपति, रुद्र) वह उसको पकड़ लेगा। इसलिये जब कभी अध्वर्यु का शाला में कुछ काम हो तो वह आग्नीध्रीय अग्नि के उत्तर की ओर होकर जाये ॥२०॥

ये कुण्ड सोम की रक्षा के लिये बनाये जाते हैं। आगे आहवनीय, दाईं ओर मार्जालीय, बाईं ओर आग्नीध्रीय और पीछे की ओर सदस् ॥२१॥

इनमें से आधे वौषट् डालकर ऊँचा करते हैं और आधे की ओर केवल संकेत करते हैं। उन्हीं का यह आशय था कि हम में से आधों को ऊँचा करो, आधों की ओर संकेत करो। (यहाँ 'अनुदिशन्तु' का अर्थ समझ में नहीं आया) इस प्रकार हम उस लोक को जान लेंगे जहाँ से हम आये हैं। और हम वहाँ न मरेंगे' ॥२२॥

स यानुपक्रिरन्ति । तेनास्मिंलोके प्रत्यक्षं भवन्त्यथ याननुदिशन्ति तेनामुष्मिंलोके प्रत्यक्ष भवन्ति ॥२३॥

ते वै द्विनामानो भवन्ति । एतऽउ हैवै तद्भिरे न वाऽएभिर्नोमागिरतस्म यथा नः सोममपाहार्युर्हन्त द्वितीयानि नामानि करवामहाऽइति ते द्वितीयानि नामान्यकुर्वत तेग्रभ्युन्यानपहृतसोमपीथान्ततोऽथ यत्तऽआभजंस्तस्माद्द्विनामानन्तस्माद्ब्राह्मणोऽनूच्यमाने द्वितीयं नाम कुर्यात राध्नोति हैव य एवं विद्वान्द्वितीयं नाम कुरुते ॥२४॥

स यदग्नौ जुहोति । तद्देवेषु जुहोति तस्माद्देवाः सन्त्यथ यत्सदसि भक्षयन्ति तन्मनुष्येषु जुहोति तस्मान्मनुष्याः सन्त्यथ यदविर्धानयोर्नाराशꣳसाः सीदन्ति तत्पितृषु जुहोति तस्मात्पितरः सन्ति ॥२५॥

या वै प्रजा यज्ञेऽनन्वामक्ताः । पराभूता वै ता एवमेतद्या इमाः प्रजा अपराभूतास्ता यत्तऽआभजति मनुष्याननु पशवो देवाननु वयाꣳस्योषधयो वनस्पतयो यदिदं किं चैवमु तत्सर्वं यत्तऽआगक्तं ते ह स्मैतऽउभये देवमनुष्याः पितरः सम्पिबन्ते सैषा सम्पातेह स्म दृश्यमाना एव पुरा सम्पिबन्तऽउतैतर्हीदृश्यमानाः ॥२६॥ ब्राह्मणम् ॥ १ [६. २.] ॥

जो ऊँचे किये गये वह इस लोक में प्रत्यक्ष होते हैं, और जिनकी ओर संकेत करते हैं वह उस लोक में प्रत्यक्ष होते हैं ॥२३॥

उनके दो नाम होते हैं। वस्तुतः यह उन्हीं का आग्रह था कि 'हम इन नामों से फलीभूत नहीं हुये क्योंकि हमसे सोम ले लिया गया। अब हम दूसरे नाम रख लें'। उन्होंने दूसरा नाम रख लिया। इससे वह सफल हो गये क्योंकि जो सोम से वंचित हो चुके थे उनको यज्ञ में भाग मिल गया। इसलिये दो नाम होते हैं। इसलिये यदि कोई ब्राह्मण सफल न होना हो तो दूसरा नाम रख ले। जो इस रहस्य को समझकर दूसरा नाम रख लेता है वह फलीभूत हो जाता है ॥२४॥

यह अग्नि में जो आहुतियाँ देता है वह देवों के प्रति देता है। इसी से देव स्थित रहते हैं। और जो सदस् में खाते हैं वह मनुष्यों के प्रति देते हैं। उससे मनुष्यों की स्थिति है। हविर्धानों में जो नाराशस बैठते हैं वह पितरों के प्रति होते हैं। उनसे पितरों की स्थिति है ॥२५॥

अब जो ऐसी प्रजा बच रही जिसका यज्ञ [illegible] भाग ही नहीं है वह तो कहीं की नहीं रही। इसलिये वह इनको यहाँ यज्ञ में भाग [illegible] देता है जिससे वह फलीभूत हो जायँ। पशु मनुष्यों के पीछे हैं, चिड़ियाँ, ओषधियाँ और वनस्पतियाँ देवों के पीछे हैं। इस प्रकार यहाँ जो कुछ है, सभी को यज्ञ में भाग मिलता [illegible]। देव और मनुष्य दोनों पितरों के साथ पीते हैं। पहले यह प्रत्यक्ष रूप से पीते थे अब परोक्ष रूप से पीते हैं ॥२६॥

अध्याय ६—ब्राह्मण ३

सर्वं वाऽएषोऽभिदीक्षते । यो दीक्षते यज्ञꣳ ह्यभिदीक्षते यज्ञꣳ ह्येवेदꣳ सर्वमनु तं यज्ञꣳ सम्भृत्य यमिममभिदीक्षते सर्वमिदं विसृजते ॥१॥

यद्वैसर्जनानि जुहोति । स यदिदꣳ सर्वं विसृजते तस्माद्वैसर्जनानि नाम तस्माद्यो-ऽपिनतः स्यात्सोऽन्यारभेत नद्यऽअन्यत्र चरेन्नादियेत यद्वै जुहोति तदेवेदꣳ सर्वं विसृजते ॥२॥

यद्वेव वैसर्जनानि जुहोति । यज्ञो वै विष्णुः स देवेभ्य इमां विक्रान्तिं विचक्रमे येषामियं विक्रान्तिरिदमेव प्रथमेन पदेन पस्पाराथेदमन्तरिक्षं द्वितीयेन दिवमुत्तमेनैतान्वेवैष एतस्मै विष्णुर्यज्ञो विक्रान्तिं विक्रमते यज्जुहोति तस्माद्वैसर्जनानि जुहोति ॥३॥

सोऽपराह्णे वेदिꣳस्तीर्त्वा । अर्धव्रतं प्रदाय सम्प्रपद्यन्तऽइध्ममभ्यादधत्युपयमनीरुप-कल्पयन्त्याज्यमधिश्रयति स्रुचः संमार्ष्टुपरथे राजानं यजमानः कुरुतेऽथ सोमक्रयणे पदं जघनेन गार्हपत्यं परिक्रामति पदा वै प्रतितिष्ठति प्रतिष्ठित्याऽएव ॥४॥

जो दीक्षा लेता है वह सब को दीक्षित करता है। क्योंकि वह यज्ञ को दीक्षित करता है। यह यज्ञ ही सब कुछ है। जिस यज्ञ के लिये उसने दीक्षा ली थी उसको समाप्त करके मानों वह सबको मुक्त कर देता है ॥१॥

वैसर्जन आहुति इसलिये दी जाती है। चूँकि वह इस सब का विसर्जन करता है इसलिये इसका नाम वैसर्जन है। इसलिये जिस किसी ने व्रत लिया हो वह पीछे से (यजमान को) हुये। यदि कहीं जाना हो तो न रहो। जब वह आहुति देता है तो सब का विसर्जन करता है ॥२॥

वैसर्जन आहुतियाँ क्यों दी जाती हैं? यज्ञ विष्णु है। उस (विष्णु) ने देवों के लिये इस विक्रान्ति (शक्ति) को विचक्रमे अर्थात् प्राप्त किया, जो इस समय उनको प्राप्त है। पहले पद से इस (भूलोक) को, दूसरे से अन्तरिक्ष को, अन्तिम से द्यौलोक को। इसी विक्रान्ति को यज्ञ यजमान के लिये प्राप्त कराता है जब यजमान यज्ञ करता है। इसीलिये वैसर्जन आहुतियाँ दी जाती हैं ॥३॥

तीसरे पहर वेदी में कुश रखकर, व्रत के दूध का आधा भाग यजमान और उसकी स्त्री को देकर शाला में आते हैं, समिधा को रखते हैं और उपयमनी को बनाते हैं। (अध्वर्यु) घी को (गार्हपत्य की) आँच पर रखता है। स्रुच् को मांजता है। यजमान सोम राजा को अपनी गोद में लेता है। अध्वर्यु सोम-क्रय के पद की रेणु को गार्हपत्य के पीछे फेंकता है जिससे उसकी प्रतिष्ठा हो। क्योंकि पैरों में ही तो प्रतिष्ठा होती है (आदमी पैरों के बल ही खड़ा होता है) ॥४॥

तदेके । चतुर्धा कुर्वन्ति यत्राहवनीयमुद्धरन्ति तामुपयमनीषु चतुर्भागमन्तं चतुर्भागेणोपाजन्येतासूपयमनीषु चतुर्भागं जघनेन गार्हपत्यं चतुर्भागं परिशिरति ॥५॥

तदुतया न कुर्यात् । सार्धमेव परिशिरेज्जघनेन गार्हपत्यमथोत्पूयाज्यं चतुर्गृहीते जुहूा चोपभृति च गृह्णाति पञ्चगृहीतं पृषदाज्यं ज्योतिरसि विश्वरूपं विश्वेषा देवानाꣳ समिदिति वैश्वदेवꣳ हि पृषदाज्यं धारयन्ति स्रुचो यदा प्रदीप्त इध्मो भवति ॥६॥

अथ जुहोति । त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्य उरु यन्तासि वरूथꣳ स्वाहेति तदेतेनैवास्या पृथिव्या प्रतिष्ठायां प्रतितिष्ठत्येतेनेमं लोकꣳ स्पृणुते ॥७॥

अथाप्तये द्वितीयामाहुतिं जुहोति । जुषाणोऽअप्तुराज्यस्य वेतु स्वाहेत्येष उ हैवैतदुवाच रक्षोभ्यो वै बिभेमि यथा मान्तरानाट्ट्रा रक्षाꣳसि न हिनसन्नेवं मा कनीयाꣳ समेव बधात्कृत्वातिनयत स्तोकमेव स्तोको ह्यप्तुरिति तमेत्कनीयाꣳसमेव बधात्कृत्वात्यनयन्स्तोक-

कुछ लोग (इस रेणु के) चार भाग करते हैं। चौथाई भाग को उस उपयमनी में रखते हैं जहाँ से आहवनीय लेते हैं। चौथाई भाग अन्न में लगाते हैं। चौथाई भाग को (आग्नीध्रीय अग्नि की) उपयमनी पर रखते हैं और एक चौथाई को गार्हपत्य के पीछे फेंकते हैं ॥५॥

परन्तु ऐसा नहीं करना चाहिये। उसको बिल्कुल गार्हपत्य के पीछे ही फेंकना चाहिये। घी को साफ करके जुहू और उपभृत में चार चमचे लेता है। पृषदाज्य (जमे हुये घी) को पाँच चमचे इस मन्त्र से—'ज्योतिरसि विश्वरूप विश्वेषा देवानाꣳ समित्' (यजु० ५।३५)। 'तू विश्वरूप ज्योति है, सब देवताओं की समिधा या ज्वाला'। क्योंकि पृषदाज्य सब देवों का है। जब ईंधन प्रदीप्त हो जाता है तो स्रुचों को रखते हैं ॥६॥

अब वह आहुति देता है—'त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यऽउरुयन्तासि वरूथꣳ स्वाहा' (यजु० ५।३५)। 'हे सोम, तू शरीरों को कष्ट देने वाले दूसरों द्वारा किये हुये द्वेषों से बचाने वाला है। बहुत प्रकार से नियन्ता है। तू हमारे यज्ञ रूपी घर की रक्षा कर'। इस प्रकार वह इस पृथ्वी पर प्रतिष्ठा लाभ करता है और इस लोक को प्राप्त करता है ॥७॥

अब वह आप्तु (अर्थात् तीव्रगामी सोम) के लिये दूसरी आहुति देता है—'जुषाणोऽअप्तुराज्यस्य वेतु स्वाहा' (यजु० ५।३५)। 'तेज सोम हमारे घी को स्वीकार करे'। उस (सोम) ने ही तो कहा था कि 'मुझे राक्षसों से भय लगता है कि दुष्ट राक्षस मुझे मार्ग में हानि न पहुँचावें। इसलिये मुझे छोटा करके ले चलो कि मैं उनके वध के लिये अति सूक्ष्म हो जाऊँ। मुझे बूँद के रूप में ले चलो। क्योंकि बूँद आप्तु अर्थात् तेज होती है। इसलिये वध के लिये अति सूक्ष्म करके वह राक्षसों के डर से उसको बूँद के रूप में लेते हैं क्योंकि बूँद तेज होती है। इसीलिये यह तेज सोम के लिये दूसरी आहुति

मेव स्तोको ह्यप्तू रक्षोभ्यो भीषा तस्मादक्षरे द्वितीयामाहुतिं जुहोति ॥८॥

उद्यच्छन्तीध्मम् । उद्यच्छन्त्युपयमनीरथाहाग्नये प्रह्रियमाणायानुब्रूहि सोमाय प्रणीयमानायेति वाग्नये प्रह्रियमाणायानुब्रूहीति त्वेव ब्रूयात् ॥९॥

आददते ग्रावाणः । द्रोणकलशं वायव्यानीध्मं कार्ष्मर्यमयान्परिधीनाश्वत्थाल प्रस्तरमेक्षव्यौ विधृती तद्बर्हिरुपसंनद्धं भवति षपाश्चपरयौ रशनेऽअरणीऽअधिमन्थनः शकलो वृषणौ तत्समादाय प्राञ्च आयन्ति स एष ऊर्ध्वो यज्ञ एति ॥१०॥

तदाहस्तु वाचयति । अग्ने नय सुपथा रायेऽअस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठा ते नम उक्तिं विधेमेत्यग्निमेवैतत्पुरस्तात्कृत्वेत्यग्निः पुरस्तादाद्रारक्षाꣳस्यपघ्नन्नेत्यथा श्येनानाष्ट्रेणे हरन्ति तऽआयन्त्यागच्छन्त्याग्नीध्रे सिदन्ति ॥११॥

स निहिते जुहोति । अयं नोऽअग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् ।

देता है ॥८॥

यह जलती हुई समिधा को उठाते हैं और उपयमनी पर रखते हैं । तब यह होता से कहता है, 'लिये जाती हुई अग्नि के लिये मन्त्र बोल' । या 'लिये जाते हुये सोम के लिये' । परन्तु ऐसा कहना चाहिये कि 'लिये जाती हुई अग्नि के लिये' ॥९॥

अब वह (सोम कुचलने के) पत्थरों को, द्रोण कलश को, वायव्यों को (लकड़ी की कूँड़ियों को 'वायव्य' कहते हैं) । (बीस) समिधाओं को, कार्ष्मर्य लकड़ी की परिधियों को, अश्वत्थ धाम के प्रस्तरों को, ईख की विधृतियों को लेता है । कुश को उसमें बाँधते हैं । दो षपाश्चपरणी (कार्ष्मर्य लकड़ी की शलाकायें जिन पर भूनते हैं), दो रश्मियाँ, दो अरणी, अधिमथन लकड़ी, दो वृषण इन सब को लेकर वह आगे (आग्नीध्र तक) जाते हैं । इस प्रकार यज्ञ ऊँचा उठता है ॥१०॥

जब वे आगे चलते हैं तो वह (यजमान से) यह बचवाता है—'अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठा ते नमऽउक्तिं विधेम' (यजु० ५।३६, ऋ० १।१८९।१) । 'हे अग्नि देव, जो तू सब कर्मों को जानता है, हमको धन के लिये ठीक मार्ग पर चला । हमको बहकाने वाले पाप से बचा । हम तेरी बहुत प्रार्थना करते हैं' । इस प्रकार यह अग्नि को आगे करना है । अग्नि ही दुष्ट राक्षसों को मारता चलता है । वे उसको भय-रहित और हानि-रहित मार्ग से ले जाते हैं । वे चलते हैं और आग्नीध्र तक पहुँचते हैं, और अध्वर्यु आग्नीध्र कुण्ड में अग्नि रख देता है ॥११॥

अब यह रखकर आहुति देता है इस मंत्र से—'अयं नोऽअग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् । अयं वाजान् जयतु शत्रु सातावयꣳ शत्रून् जयतु जर्हृषाणः स्वाहा' (यजु० ५।३०) । 'यह अग्नि हमारे लिये चौड़ा मार्ग बनावे । शत्रुओं को भेदता

अयं वाजान्जयतु वाजसातायꣳ शत्रून्जयतु जहँषाए॰ स्वाहेति तदेतेनैवैतस्मिन्नन्तरिक्षे प्रतिष्ठाया प्रतितिष्ठत्यतेनैत लोकꣳ स्पृणुते ॥१२॥

तदेव निदधति ग्राव्ण॰ । द्रोणकलशं वायव्यान्यथेतरमादायायन्ति तदुत्तरेणाहवनीयमुपसादयन्ति ॥१३॥

प्रोक्षणीरध्वर्युरादत्ते । स इध्ममेवाग्रे प्रोक्षत्यथ वेदिमथास्मै बर्हि॰ प्रयच्छन्ति तत्परस्तादग्न॰ध्यासादयति तत्प्रोक्षोपनिनीय विस्रꣳस्य ग्रन्थिमाश्वत्थवालः प्रस्तर उपसन्नो भवति त गृह्णाति गृहीत्वा प्रस्तरमेव बृद्बर्हिस्तृणाति स्तीर्त्वा बर्हि॰ कार्ष्मर्यमय्यान्परिदधाति परिधाय परिधीन्त्समिधावभ्यादधात्यभ्याधाय समिधौ ॥१४॥

अथ जुहोति । उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर स्वाहेति तदेतेनैवैतस्या दिवि प्रतिष्ठायां प्रतितिष्ठत्येतेनैतं लोकꣳ स्पृणुते यदेतया जुहोति ॥१५॥

यद्वेव वैष्णव्यऽर्चा जुहोति । कनीयाꣳसं वाऽग्नमेतद्घात्कृत्वात्यनैषु स्तोकमेव हुआ आगे चले । अन्न-सेवन में यह अन्नों को जीते, वेग से आगे बढ़कर वह शत्रुओं को जीते । इसके द्वारा वह अन्तरिक्ष में प्रतिष्ठा को प्राप्त करता है और उस लोक को प्राप्त करता है ॥१२॥

वह सोम कुचलने के पत्थरों, द्रोण कलश और वायव्यों को उसी स्थान पर रख देते हैं, और चीजों को लेकर वे आगे चलते हैं और आहवनीय के उत्तर में रख देते हैं ॥१३॥

अध्वर्यु प्रोक्षणी को लेता है । पहले समिधा पर जल छिड़कता है, फिर वेदी पर । तब वे उसको कुश दे देते हैं । वह (इस कुश) को इस प्रकार रखता है कि गाँठ पूर्व की ओर रहे । तब उस पर जल छिड़कता है । जो जल बचा उसे कुशों की जड़ पर छिड़क कर और गाँठ को खोलकर अश्वत्थ वास के प्रस्तर को कुश से बाँध कर वह उसको लेता है और प्रस्तर को लेकर कुशा की एक तह बिछा देता है । कुश को बिछाने के पश्चात् कार्ष्मर्य की परिधियाँ को आग पर रखता है । परिधियों को रखकर दो समिधाओं को रखता है और दो समिधाओं को रखकर—॥१४॥

इस मन्त्र से आहुति देता है—'उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृत घृत योने पिब प्र प्र यज्ञपतिं तिर स्वाहा' (यजु० ५।३८) । 'हे विष्णु पैर फैलाकर कदम भर । हमारे घर के लिये पैर रखकर स्थान दे । तू घृत की योनि है, घृत पी । और यज्ञपति को आगे बढ़ा' । इस प्रकार वह द्यौलोक में प्रतिष्ठा प्राप्त कर लेता है और इस आहुति को देकर द्यौलोक की प्राप्ति कर लेता है ॥१५॥

विष्णु सम्बन्धी मन्त्र से आहुति देने का अर्थ यह है कि इस प्रकार उन्होंने (सोम को) इतना सूक्ष्म कर लिया कि आक्रमणों से बच सके और बूँद के रूप में ले गये क्योंकि

अथोपनिष्क्रामति । स्वाहा निर्वरुणस्य पाशान्मुच्य इति वरुणपाशो वाऽएषोऽन्तर्भवति योऽन्यस्यासंस्तप्रत्यक्तं वरुणनिर्मुच्यते यदाह स्वाहा निर्वरुणस्य पाशान्मुच्यऽइति ॥२०॥

अथेत्याहवनीये समिधमभ्यादधाति । अग्ने व्रतपास्त्वे व्रतपा इत्यग्निर्हि देवानां व्रतपतिस्तस्मादाहाग्ने व्रतपास्त्वे व्रतपा इति या तव तनूर्मय्यभूदेषा सा त्वयि यो मम तनूस्त्वय्यभूदियꣳ सा मयि । यथायथं नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिरमꣳस्तानु तपस्तपस्पतिरिति तत्प्रत्यक्तमग्नेर्निमुच्यते स स्वेन सतात्मना यजते तस्मादस्यान्नाश्नन्ति मानुषो हि भवति तस्मादस्यान्न नाम गृह्णन्ति मानुषो हि भवत्यथ यत्पुरा नाश्नन्ति यथा हविषोऽहुतस्य नाश्नीयादेवं तत्तस्माद्दीक्षितस्य नाश्नीयादथान्नाङ्गुलीर्विसृजते ॥२१॥ ब्राह्मणम् ॥ २ [६ ३.] ॥

अब वह यह मन्त्र पढ़कर हविर्धान से निकल आता है—'स्वाहा निर्वरुणस्य पाशान् मुच्ये' (यजु० ५।३६) । 'मैं वरुण के फन्दों से छूटता हूँ' । जो दूसरे के मुँह में है वह मानो वरुण के फन्दे में है । इसलिये जब वह कहता है 'स्वाहा निर्वरुणस्य' इति तब मानों वह वरुण के फन्दे से छूटता है ॥२०॥

अब इस प्रकार आहवनीय में समिधा को रखता है—'अग्ने व्रतपास्त्वे व्रतपाः' (यजु० ५।४०) । 'हे व्रत के पालने वाले अग्नि, तुझ पर, हे व्रत के पालने वाले' । अग्नि देवों का व्रतपति है । इसलिये कहा 'अग्ने व्रतपा.' आदि । अब कहता है—'या तव तनूर्मय्यभूदेषा सा त्वयि यो मम तनूस्त्वय्यभूदियꣳ सा मयि । यथायथं नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिरमꣳस्तानु तपस्तपस्पतिः' (यजु० ५।४०) । 'जो तेरी सत्ता मुझमें थी वह तुझमें हो । जो मेरी सत्ता तुझमें थी वह मुझमें हो । हे व्रतपते, हम दोनों के व्रत ठीक ठीक हो गये । दीक्षा के पति ने मेरी दीक्षा स्वीकार कर ली । तप के पति ने मेरा तप स्वीकार कर लिया' । इस प्रकार यह अग्नि से मुक्त हो जाता है और अपनी ही सत्ता से यज्ञ करता है । अब वह उसका अन्न खाते हैं क्योंकि अब वह मनुष्य है । अब वह उसका नाम लेते हैं क्योंकि अब वह मनुष्य है । पहले वह इसका अन्न नहीं खाते क्योंकि जब तक आहुति न पड़ जाय, हवि का भाग न खाना चाहिये । इसलिये दीक्षित का अन्न नहीं खाना चाहिये । अब वह अँगुलियों को ढीला कर लेता है ॥२१॥

अध्याय ६—ब्राह्मण ४

यूपं तक्षन्नैष्णव्यऽर्चा जुहोति। वैष्णवो हि भूपस्तस्माद्वैष्णव्यऽर्चा जुहोति ॥१॥ यद्वै वैष्णव्या जुहोति यज्ञो वै विष्णुर्यज्ञेनैवैतद्यूपमच्छैति तस्माद्वैष्णव्यऽर्चा जुहोति ॥२॥

स यदि स्रुचा जुहोति। चतुर्गृहीतमाज्यं गृहीत्वा जुहोति यद्यु स्रुवेण स्रुवेणैवोपहत्य जुहोत्युरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि। घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर स्वाहेति ॥३॥

यदाज्यं परिशिष्टं भवति। तदादत्ते यत्तक्ष्णः शस्त्रं भवति तत्तदादत्ते तऽआयन्ति स यं यूपं जोषयन्ते ॥४॥

तमेवमभिमृश्य जपति। पश्चाद्वैव प्राङ् तिष्ठन्नभिमन्त्रयतेऽत्यन्यां२॥ ऽअगां नान्यां २॥ ऽउपागामित्यतिह्यन्यानेति नान्यानुपैति तस्मादाहात्यन्या२॥ ऽअगां नान्यो २॥ ऽउपागामिति ॥५॥

अर्वाक् त्वा परेभ्योऽविदं परोऽरेभ्य इति। अर्वाञ्चमेनं परेभ्यो भृश्चति यऽएतस्मा-

यूप को काटते हुये विष्णु-सम्बन्धी ऋचा से आहुति देता है। यूप विष्णु का है। इसलिये विष्णु की ऋचा से आहुति देता है ॥१॥

या विष्णु की ऋचा से क्यों आहुति देता है? यज्ञ ही विष्णु है। इस प्रकार यज्ञ के द्वारा ही यूप तक पहुँचता है। इसलिये विष्णु की ऋचा से आहुति देता है ॥२॥

यदि स्रुच से आहुति देता है तो चार चमचे घी लेकर आहुति देता है। और यदि स्रुवा से आहुति देता है तो स्रुवा से ही घी में से थोड़ा भाग लेकर आहुति देता है। इस मंत्र से—'ऊरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि। घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर स्वाहा' (यजु० ४।४१)। 'हे यज्ञ तुम फूलो-फलो। तुम हमारे लिये विस्तृत घर बनाओ। हे घृत के घर, घृत पियो और यजमान को तारो' ॥३॥

जो घी बच रहता है उसे ले लेता है। जो औजार बढ़ई का है उसे बढ़ई ले लेता है। अब वह चलते हैं। और जो लकड़ी यूप के लिये निश्चित की जाती है—॥४॥

उसको इस मंत्र का जाप करते हुये छूते हैं। यह पीछे खड़े होकर और पूर्व की ओर मुँह करके उसको नमस्कार करते हैं—'अत्यन्यां २ऽ अगां नान्यां २ऽउपागाम्' (यजु० ५।४२)। 'मैं दूसरों को छोड़ आया। मैं दूसरों के पास तक नहीं गया'। वस्तुतः यह दूसरों को छोड़ आता है और उनके पास तक नहीं जाता। इसलिये यह कहता है कि 'अन्यन्यां' इत्यादि ॥५॥

'अर्वाक् त्वा परेभ्योऽविदं परोऽरेभ्यः' (यजु० ५।४२)। 'तुमको मैंने दूर चीजों

एगञ्चो भवन्ति परोऽवरेभ्य इति परो ह्येनमवरेभ्यो वृश्चति यऽएतस्मादर्वाञ्चो गमन्ति तस्मादाहार्वाक्त्वा परेभ्योऽविद परोऽवरेभ्य इति ॥६॥

त त्वा जुषामहे देव वनस्पते देवयज्यायाऽइति । तद्यथा बहूना मध्यात्साधवे कर्मणे जुषेत स एतमनास्तस्मै कर्मणे स्यादेवमेवैनमेतद्बहूना मध्यात्साधवे कर्मणे जुषते स एतमना ब्रश्चनाय भवति ॥७॥

देवास्त्वा देवयज्यायै जुषन्तामिति । तद्वै समृद्ध य देवा साधवे कर्मणे जुषन्तेत स्मादाह देवास्त्वा देवयज्यायै जुषन्तामिति ॥८॥

अथ स्रुवेणोपस्पृशति । विष्णवे त्वेति वैष्णवो हि यूपो यज्ञो वै विष्णुर्यज्ञाय ह्येन वृश्चति तस्मादाह विष्णो त्वेति ॥९॥

अथ दर्भतरुणकमन्तर्दधाति । ओषधे त्रायस्वेति वज्रो वै परशुस्तथो हैनमेष वज्र परशुर्न हिनस्त्यथ परशुना प्रहरति स्वधिते मैनꣳ हिꣳसीरिति वज्रो वै परशुस्तथा हैनमेष वज्र परशुर्न हिनस्ति ॥१०॥

स य प्रथमꣳ शकलमपच्छिनत्ति । तस्मादपो त वाऽअनक्तस्तम्भ वृश्चेदुत ह्येनम-

से निकट और निकटों से दूर पाया' । वस्तुत जब वह इसको काटकर गिराता है तो जो दूर हैं उनकी अपेक्षा निकट गिराता है और जो निकट हैं उनकी अपेक्षा दूर गिराता है । इस-लिये कहता है 'अर्वाक् त्वा' इत्यादि ॥६॥

'त त्वा जुषामहे देव वनस्पते देवयज्यायै' (यजु० ५।४२) । 'हे वनस्पत, देवों क यज्ञ क लिये हम तुझको पसन्द करते हैं' । जैसे किसी अच्छे काया क लिय कइ पदार्थों म से एक को छाट लेते हैं और वह छटा हुआ पदार्थ उत्तमता से उस कार्य को सम्पादित करता है इसी प्रकार इस वृक्ष को कई वृक्षा म स शुभ कर्म क लिय छाँटते हैं । और यह वृक्ष काटने क लिये उपयुक्त होता है ॥७॥

'देवास्त्वा देवयज्यायै जुषन्ताम्' (यजु० ५।४२) । 'तुझको देव देवताओं क यज्ञ क लिय पसन्द करें' । जिसको देवतागण किसी साधु कर्म क लिय पसन्द कर लते हैं वह अवश्य ही सफल होता है इसलिय कहा 'देवास्त्वा' इत्यादि ॥८॥

अब वह स्रुवा से उसको छूता है—'विष्णवे त्वा' (यजु० ५।४२) । 'विष्णु के लिय तुझको' । विष्णु का यूप है । विष्णु यज्ञ है । यज्ञ के लिय ही उसको काटता है, इसलिये कहता है 'विष्णवे' ॥९॥

अब वह बीच म एक दर्भ रख देता है—'ओषधे त्रायस्व' (यजु० ५।४२) । 'हे ओषध, तू बचा' । परशु वज्र है । इस प्रकार यह वज्र परशु उसको हानि नहीं पहुँचाता । अब परशु से मारता है 'स्वधिते मैनꣳहिꣳसीः' (यजु० ५।४२) । 'हे परशु इसको न मार' । परशु वज्र है । परन्तु यह परशु वज्र इस प्रकार उसे हानि नहीं पहुँचाता ॥१०॥

पहला गोदुग्ध जो काटता है उसे अलग रख देता है । उसको इस प्रकार

नसा वहन्ति तथानो न प्रति बाधते ॥११॥

त प्राञ्चं पातयेत् । प्राची हि देवाना दिगथोऽउदञ्चमुदीची हि मनुष्याणा दिगथो प्रत्यञ्चं दक्षिणार्य त्वेवैन दिशः परिविवाधिषेतैषा वै दिक् पितॄणा तस्मादेनं दक्षिणायै दिशः परिविवाधिषेत ॥१२॥

त प्रच्यवमानमनुमन्त्रयते । द्यां मा लेसीरन्तरिक्षं मा हिथ्ससीः पृथिव्या सम्भवेति वज्रो वाऽएष भवति य यूपाय वृश्चन्ति तस्माद्वज्रात्प्रच्यवमानादिमे लोकाः सथ्सरेजन्ते तदेभ्य एवैनमेतल्लोकेभ्यः शमयति तथेमा लोकाञ्छान्तो न हिनस्ति ॥१३॥

स यदाह । द्यां मा लेसीरिति दिव मा हिथ्ससीरित्येवैतदाहान्तरिक्षं मा हिथ्ससीरिति नात्र तिरोहितमिवास्ति पृथिव्यासम्भवेति पृथिव्या संजानीष्वेत्येवैतदाहायथ्स हि त्वा स्वधितिस्तेतिजान॰ प्रणिनाय महते सौभगायेत्येष होनथ्स स्वधितिरेतेभ्यमानः प्रणयति ॥१४॥

अथाग्नअनमभिजुहोति । नेदतो नाष्ट्रारक्षाथ्स्यनूत्तिष्ठानिति वज्रो वाऽआज्य काटना चाहिये कि धुरे को हानि न पहुँचे । चूँकि यह गाड़ी में ले जाते हैं । इसलिये ऐसा करने से गाड़ी में कोई रुकावट नहीं होती । (अर्थात् वृक्ष को काटते समय नीचे से काटना चाहिये जिससे गाड़ी उस ठूँठ के ऊपर से निकल सके और गाड़ी का धुरा अटक न जाय) ॥११॥

उसको पूर्व की ओर गिरावे क्योंकि पूर्व देवों की दिशा है । या उत्तर की ओर क्योंकि उत्तर मनुष्यों की दिशा है । या पश्चिम की ओर । परन्तु दक्षिण की ओर गिरने से बचाना चाहिये क्योंकि दक्षिण पितरों की दिशा है । इसलिये दक्षिण की ओर गिराना नहीं चाहिये ॥१२॥

उस गिरते हुये वृक्ष को मन्त्र पढ़ कर प्रेरणा करे यह मन्त्र पढ़े—'द्यां मा लेसीरन्तरिक्षं मा हिथ्ससीः पृथिव्या सम्भव' (यजु० ५।४३) । 'द्युलोक को मत छील, अन्तरिक्ष को हानि मत पहुँचा । पृथ्वी के मिल' । जो वृक्ष यूप के लिये काटा जाता है वह वज्र हो जाता है । इस वज्र से यह लोक काँप जाते हैं । इसलिये यह इस प्रकार इन लोकों के लिये उसको शान्त करता है । इस प्रकार शान्त हुआ यह इनको हानि नहीं पहुँचाता ॥१३॥

'द्यां मा लेसीः' का तात्पर्य है कि द्युलोक को हानि न पहुँचा । 'अन्तरिक्षं मा हिथ्ससीः' तो स्पष्ट है । 'पृथिव्या सम्भव' से तात्पर्य है कि तू पृथिवी के अनुकूल हो जा । अथ्स हि त्वा स्वधितिस्तेतिजान॰ प्रणिनाय महते सौभगाय' (यजु० ५।४३) । 'इस तेज परशु ने तुझको बड़े सौभाग्य के लिये आगे बढ़ाया है' । क्योंकि यह तेज कुल्हाड़ी ही तो इसको आगे को बढ़ाती है ॥१४॥

अब ठूँठ पर आहुति देता है कि कहीं वहाँ से दुष्ट राक्षस न निकल पड़ें । घी वज्र है । इस वज्र अग्नि घी से दुष्ट राक्षसों को रोकता है । इस प्रकार दुष्ट राक्षस उससे से उत्पन्न

तद्वज्रेणैवैतन्नाष्ट्रा रक्ताꣳस्यवबाधते तथातो नाष्ट्रा रक्ताꣳसि नानूत्तिष्ठन्त्यथो रेतो वाऽआज्यं तद्वनस्पतिष्वेवैतद्रेतो दधाति तस्माद्रेतस आवश्चनाद्वनस्पतयोऽनु प्रजायन्ते ॥१५॥

स जुहोति । अतस्त्वं देव वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयꣳ रुहेमेति नात्र तिरोहितमिवास्ति ॥१६॥

तं परिवासयति । स यावन्तमेवाग्रे परिवासयेत्तावान्त्स्यात् ॥१७॥

पञ्चारत्नि परिवासयेत् । पाड्क्तो यज्ञः पाड्क्तः पशुः पञ्चऽर्तवः सम्वत्सरस्य तस्मात्पञ्चारत्निं परिवासयेत् ॥१८॥

षडरत्निं परिवासयेत् । षड्वाऽऋतवः संवत्सरस्य संवत्सरो वज्रो वज्रो यूपस्तस्मात्षडरत्निं परिवसायेत् ॥१९॥

अष्टारत्नि परिवासयेत् । अष्टाक्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्ध एव यज्ञस्य तस्मादष्टारत्नि परिवासयेत् ॥२०॥

नवारत्नि परिवासयेत् । त्रिवृद्वै यज्ञो नव वै त्रिवृत्तस्मान्नवारत्नि परिवासयेत् ॥२१॥

एकादशरत्नि परिवासयेत् । एकादशाक्षरा वै त्रिष्टुब्वज्रस्त्रिष्टुब्वज्रो यूपस्तस्मादेकादशारत्नि परिवासयेत् ॥२२॥

नहीं होते । या घी वीर्य है । वह इस प्रकार वृक्ष को वीर्य-युक्त करता है, और उस ठूँठ के वीर्य में से वृक्ष उत्पन्न होते हैं ॥१५॥

इस मंत्र से आहुति देता है—'अतस्त्वं देव वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयꣳ रुहेम' (यजु० ५।४३) । 'हे वनस्पते, तू इसमें से सौ कुल्हों वाला होकर उग, और हम हजार कुल्हे वाले होकर उगें । यह स्पष्ट है ॥१६॥

अब वह उसे काटता है । जितना पहले काटा जाय उतना ही रहने देना चाहिये ॥१७॥

पाँच हाथ (अरलि) भरके काटना चाहिये । यज्ञ पाँच अंगों वाला है । पशु भी पाँच अंगों वाला है । साल में ऋतुयें भी पाँच होती हैं । इसलिये पाँच हाथ का काटना चाहिये ॥१८॥

या छः हाथ भर काटे । वर्ष में छः ऋतुयें होती हैं । वर्ष वज्र है । यूप वज्र है । इसलिये छः हाथ का काटना चाहिये ॥१९॥

या आठ हाथ भर काटे । आठ अक्षर की गायत्री होती है । गायत्री यज्ञ का पूर्वार्ध है । इसलिये आठ हाथ भर काटे ॥२०॥

या नौ हाथ का काटे । यज्ञ तीन-अंग वाला होता है । और नौ तीन-अंगों वाला है । इसलिये नौ हाथ का काटे ॥२१॥

या ग्यारह हाथ का काटे । त्रिष्टुप् में ११ अक्षर होते हैं । त्रिष्टुप् वज्र है । यूप भी वज्र है । इसलिये ११ हाथ का काटे ॥२२॥

द्वादशारत्नि परिवासयेत् । द्वादश वै मासाः संवत्सरस्य संवत्सरो वज्रो वज्रो यूपस्तस्माद्द्वादशारत्नि परिवासयेत् ॥२३॥

त्रयोदशारत्नि परिवासयेत् । त्रयोदश वै मासाः संवत्सरस्य संवत्सरो वज्रो वज्रो यूपस्तस्मात्त्रयोदशारत्नि परिवासयेत् ॥२४॥

पञ्चदशारत्नि परिवासयेत् । पञ्चदशो वै वज्रो वज्रो यूपस्तस्मात्पञ्चदशारत्नि परिवासयेत् ॥२५॥

सप्तादशरत्निर्वाजपेययूपः । अपरिमित एव स्यादपरिमितेन वाऽएनेन वज्रेण देवा अपरिमितमजयंस्तथोऽ एवैष एतेन वज्रेणापरिमितेनैवापरिमितं जयति तस्मादपरिमित एव स्यात् ॥२६॥

स वा अष्टाश्रिर्भवति । अष्टाक्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्धं एष यज्ञस्य तस्मादष्टाश्रिर्भवति ॥२७॥ ब्राह्मणम् ॥ ३ [६. ४.] षष्ठोऽध्यायः ॥ [२१] ॥

या बारह हाथ भर काटे । साल मे बारह माग होते हैं । वर्ष वज्र है । यूप भी वज्र है । इसलिये बारह हाथ का काटे ॥२३॥

या तेरह हाथ का काटे । वर्ष मे तेरह मास होते हैं । वर्ष वज्र है । यह यूप वज्र है । इसलिये तेरह हाथ भर का काटे ॥२४॥

या पन्द्रह हाथ का काटे । पन्द्रह वज्र है । यूप भी वज्र है । इसलिये पन्द्रह हाथ का काटे ॥२५॥

वाजपेय यज्ञ का यूप १७ हाथ का होता है । या यह अपरिमित या बे-नपा हो । बेनपे वज्र से ही देवों ने बेनपे (अपरिमित) को जीता । इसी प्रकार अपरिमित वज्र के द्वारा यह अपरिमित को जीतता है । इसलिये यह अपरिमित भी हो सकता है ॥२६॥

यह आठ-कोण का होता है । गायत्री मे आठ अक्षर होते हैं । गायत्री यज्ञ का पूर्वार्ध है । यह यूप यज्ञ का पूर्वार्ध है । इसलिये इसको आठ-कोण का होना चाहिये ॥२७॥

अध्याय ७—ब्राह्मण १

अग्निमादत्ते। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे नार्यसीति सामान एतस्य यजुषो बन्धुर्योषो वाऽग्ना यदग्निस्तस्मादाह नार्यसीति ॥१॥

अथावट परिलिखति। इदमहꣳ रक्षसा ग्रीवा अपिकृन्तामीति वज्रो वाऽअग्निर्वज्रेणैवैतद्रक्षाꣳसि ग्रीवा अपिकृन्तति ॥२॥

अथ खनति। प्राञ्चमुत्कूलमुत्किरत्युपरेण समायावट खनति तदग्रेण प्राञ्चं यूपं निदधात्येतावन्मात्राणि वहींष्यभ्युपरिष्टादधिनिदधाति तदेवोपरिष्टाद्यूपस्य क्लमधिनिदधाति पुरस्तात्पार्श्वतश्चपालमुपनिदधात्यथ यवमत्य प्रोक्षण्यो भवन्ति सोऽसावेव बन्धुः ॥३॥

स यवानावपति। यवोऽसि यास्मद्द्वेषो यवयारातीरिति नात्र तिरोहितमिवास्ति न प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मेध्यमेवैतत्करोति ॥४॥

स प्रोक्षति। दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वेति वज्रो वै यूप एषां लोकानामन्तर्दधाति वज्रेणैवैतल्लोकान्त्सं दधाति ॥५॥

इस मन्त्राश को पढ़कर खुरपी (अग्नि) लेता है—'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे नार्यसि' (यजु० ६।१)। 'देव सविता की प्रेरणा से अश्विनो की बाहुओं से, पूषा के दोनों हाथों से तुझको लेता हूँ। तू नारी है'। इस यजु का वही तात्पर्य है जो पहले का। 'अग्नि' स्त्रीलिङ्ग है। इसलिये कहता है कि तू नारी है ॥१॥

इस प्रकार (यूप के गाड़ने के लिये) सूराख खोदता है, इस मन्त्राश से—'इदमहꣳ रक्षसा ग्रीवाऽअपिकृन्तामि' (यजु० ६।१)। 'इससे मैं राक्षसों की गर्दनें काटता हूँ'। अग्नि या खुरपी वज्र है। इसी खुरपी रूपी वज्र से राक्षसों की गर्दनें काटता है ॥२॥

अब खोदता है और मिट्टी को पूर्व की ओर फेंक देता है। अब इतना सूराख खोदता है जिसमें यूप का नीचे का भाग समा सके। आगे की ओर वह यूप को इस प्रकार रखता है कि पूर्व की ओर सिरा रहे। उतने ही बड़े कुशों को उसके ऊपर रखता है। उसके ऊपर यूप के शकल को रखता है। आगे बगल को चषाल रखता है। (चषाल यूप के ऊपर सिर के समान रक्खा जाता है)। प्रोक्षणी में जौ होते हैं। इसका भी वही तात्पर्य है ॥३॥

अब वह जौ को बोता है इस मन्त्राश को पढ़कर—'यवोऽसि यवयास्मद् द्वेषो यवयारातीः' (यजु० ६।१)। 'तू यव है। हमसे द्वेष और शत्रुओं को दूर कर (यवय)'। यह स्पष्ट है। अब वह जल छिड़कता है। जल छिड़कने का एक ही तात्पर्य है। अर्थात् वह उसको यज्ञ के लिये पवित्र करता है ॥४॥

वह इस मन्त्र से जल सिंचन करता है—'दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा' (यजु०

मिगुप्याऽएषा त्वा लोकानामिगुप्त्यै प्रोक्षामीत्येवैतदाह ॥५॥

अथ याः प्रोक्षण्यः परिशिष्यन्ते। ता अवटेऽवनयति शुन्धन्ता लोकाः पितृषदना इति पितृदेवत्यो वै कूपः स्यात्तमवैतन्मेध्यं करोति ॥६॥

अथ पर्य्यूहति। प्राचीनाग्राणि चोदीचीनाग्राणि चावस्तृणाति पितृषदनमसीति पितृदेवत्यं वाऽअग्न्यैतद्भवति यन्निसातश्च स यथानिसात आपधिषु मितः स्यादेवमेतान्योपधिषु मितो भवति ॥७॥

अथ यूपशकलं प्रास्यति। तेजो ह वाऽएतद्वनस्पतीनां यद्बाह्याराकलस्तस्माद्यदा बाह्याराकलमपतदगुप्यन्त्यथ शुष्यन्ति तेजो ह्येषामेतत्तद्यद्यूपशकलं प्रास्यति सतेजसं मिनवानीति तद्यदेष एव भवति नान्य एष हि यजुष्कृतो मेध्यस्तस्माद्यूपशकलं प्रास्यति ॥८॥

स प्रास्यति। अग्नेर्णीरसि स्वारेश उन्नेतृणामिति पुरस्ताद्वाऽअस्मादेषोऽपक्रियते तस्मादाहाग्नेर्णीरसि स्वारेश उन्नेतृणामित्येतस्य मित्रादधि त्वा स्थास्यतीत्यधि ह्येन तिष्ठति

६।१)। 'द्यौलोक के लिये तुझको, अन्तरिक्ष के लिये तुझको, पृथ्वी के लिये तुझको'। यूप वज्र है। इस काम को वह इन लोकों की रक्षा के लिये करता है। इसमें इसका तात्पर्य यह है कि मैं इन लोकों की रक्षा के लिये तुझको जल से सींचता हूँ ॥५॥

प्रोक्षणी पात्र में जो जल बच रहता है उसको खुरपे में डाल देता है, इस मन्त्र को पढ़कर—'शुन्धन्तां लोकाः पितृषदनाः' (यजु० ६।१)। 'पितरों के रहने के लोक शुद्ध हों'। यह जो गड्ढा खोदा गया वह पितरों के लिये था। इसलिये वह उसे पवित्र करता है ॥६॥

अब यह पूर्व की ओर, उत्तर की ओर सिरा करके कुश रखता है, इस मन्त्र को पढ़कर—'पितृषदनमसि' (यजु० ६।१)। 'तू पितरों के रहने का स्थान है'। यह जो खोदा गया वह पितरों का था। मानों वह कब्रों की भाँति गाड़ दिया गया। खोदा नहीं गया। इस प्रकार वह मृतों के समान स्थापित हो जाता है। (तात्पर्य यह है कि यूप जब गाड़ दिया गया तो मृतों के समान हो गया) ॥७॥

अब यह यूप शकल को भीतर डालता है। यह जो बाहरी छाल होती है यह वृक्ष का तेज होता है। इसलिये यह जो बाहर की छाल को छील देते हैं मानों उसके तेज को सुखा देते हैं। क्योंकि यह उनका तेज है। यूप शकल को भीतर डालने का तात्पर्य यह है कि यूप को तेज के साथ गाड़ते हैं। इसी को क्यों डालता है अन्य को क्यों नहीं? इसका कारण यह है कि इसको यजु मन्त्र पढ़कर शुद्ध किया गया है। इसलिये यह यूप शकल को डालता है ॥८॥

यह इस मन्त्र को पढ़कर डालता है—'अग्नेर्णीरसि स्वारेश उन्नेतृणाम्' (यजु० ६।१)। 'तू अग्नि का है। उन्नेताओं के लिये सुगमता से मिलने योग्य'। यह यूप शकल अग्नि के नाम से डाला जाता है, इसलिये यह कहता है, 'अग्नेर्णीरसि' इत्यादि। अब

तस्मादाहैतस्य वित्तादधि त्वा स्थास्यतीति ॥६॥

अथ स्रुवेणोपहत्याज्यम् । अवटमभिजुहोति नेदधस्ताद्रक्षाꣳस्युपोत्तिष्ठानिति वज्रो वाऽआज्यं तद्वज्रेणैवैतद्रक्षाꣳस्यवबाधते तथाधस्ताद्रक्षाꣳसि नोपोत्तिष्ठन्त्यथ पुरस्तात्परीत्योदङ्ङासीनो यूपमनक्ति स आह यूपायाज्यमानायानु त्वेति ॥१०॥

सोऽनक्ति । देवस्त्वा सविता मध्वानक्त्विति सविता वै देवाना प्रसविता यजमानो वाऽएष निदानेन यद्यपः सर्वं वाऽइद मधु यदिदं कि च तदेनमनेन सर्वेण सꣳस्पर्शयति तदस्मै सविता प्रसविता प्रसौतीति तस्मादाह देवस्त्वा सविता मध्वानक्त्विति ॥११॥

अथ चषालमुभयत· प्रत्यञ्च प्रतिमुञ्चति । सुपिप्पलाभ्यस्त्वौषधीभ्य इति पिप्पलꣳ हैवास्यैतद्यन्मध्ये सगृहीतमिव भवति तिर्यग्वाऽइद वृन्ते पिप्पलामाहतꣳ सा यदेदꣳ सम्बन्धन चान्तरोपेनितमिव तदेवैतत्करोति तस्मान्मध्ये संगृहीतमिव भवति ॥१२॥

आन्तमग्निष्ठामनक्ति । यजमानो वाऽअग्नि'टा रस आज्यꣳ रसेनैवैतद्यजमानमनक्ति

कहता है—'एतस्य वित्तादधि त्वा स्थास्यति' (यजु० ६।२)। 'सावधान हो। यह तुझ पर खड़ा होगा'। वस्तुत' यह उसी पर खड़ा होगा। इसलिये यह कहता है, 'एतस्य' इत्यादि ॥६॥

अब स्रुवा से घी लेकर गड्ढे मे आहुति देते हैं कि कहीं दुष्ट राक्षस उसको न सतावें। घी वज्र होता है। इस प्रकार वह वज्र से दुष्ट राक्षसों को भगाता है। इस प्रकार दुष्ट राक्षस नीचे से नहीं उठते। अब वह परिक्रमा करके आगे की ओर उत्तराभिमुख बैठता है और यूप पर घी लगाता है। अब वह होता से कहता है, 'घी युक्त-यूप के लिये मन्त्र पढ़' ॥१०॥

वह इस मन्त्राश से घी लगाता है—'देवस्त्वा सविता मध्वानक्तु' (यजु० ६।२)। 'सविता देव तुझको मधु से युक्त करे'। सविता देवों का प्रेरक है, और यह यूप यजमान ही है। और यहाँ की यह सब चीजें मधु हैं। इस मन्त्र के साथ इस प्रकार से इसको सम्बन्धित करता है, और प्रेरक सविता प्रेरणा करता है। इसलिये कहता है, 'देवस्त्वा सविता' इत्यादि ॥११॥

अब वह चषाल को दोनों ओर से घी लाकर यूप के ऊपर रखता है यह पढ़कर—'सुपिप्पलाभ्यस्त्वौषधीभ्य' (यजु० ६।२)। 'अच्छे फलों युक्त ओषधियों के लिये'। क्योंकि यह (चषाल) उसका फल ही है यह जो बीच म सिकुड़ा होता है। इसका कारण यह है कि वृक्ष पर फल दोनों ओर से जुड़ा होता है और डठल और फल के बीच का भाग सिकुड़ा होता है। इसलिये बीच म सुकड़ा होता है ॥१२॥

जो आग के सामने का भाग है उसम ऊपर से नीचे तक घी लगाता है। क्योंकि आग के सामने का भाग यजमान होता है और घी रस है। रस से वह यजमान को युक्त करता है। इसलिये वह आग के सामने के भाग पर ऊपर से नीचे तक घी लगाता है।

तस्मादान्तमग्निप्रामनक्षथ परिव्ययणं प्रतिसमन्तं परिमृशत्यथाहोच्छ्रीयमाणायानु-ब्रूहीति ॥१३॥

स उच्छ्रयति । धामग्रेणास्पृक्ष आन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृंहीरिति यज्ञो वै यूप एषां लोकानामभिजित्यै तेन वज्रेणेमाल्लोकान्त्स्पृणुतऽएभ्यो लोकेभ्यः सपत्ना-न्निर्भजति ॥१४॥

अथ मिनोति । या ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः । अत्राह तदुरुगायस्य विष्णोः परमं पदमवभारि भूरीत्येतया त्रिष्टुभा मिनोति वज्रस्त्रिष्टुब्यज्ञो यूपस्तस्मात्त्रिष्टुभा मिनोति ॥१५॥

सम्प्रत्यग्निमग्निष्टा मिनोति । यजमानो वाऽअग्निष्टाग्निरु वै यज्ञः स यदग्नेरग्नि-ष्टाथ्श्वलयेद्वलेद्य यजाद्यजमानस्तस्मात्सम्प्रत्यग्निमग्निष्टां मिनोत्यथ पर्यूहत्यथ पर्यूपत्य-थाप उपनिनयति ॥१६॥

अथैनमभिपद्य वाचयति । विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखेति वज्रं वाऽएष आहार्षीद्यो यूपमुदशिश्रियद्विष्णोर्निजिति पश्यतेत्येवैतदाह यदाह

अब वह यूप की पिंडी को उठाता है, यह कहकर, 'यूप के गाड़ने के लिये मन्त्र पढ़' ॥१३॥

यह इस मन्त्र को पढ़ कर उठाता है—'धामग्रेणास्पृक्षऽआन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृंहीः' । (यजु० ६।२) । 'तूने अग्र भाग से द्यौलोक को छुआ, बीच के से अन्तरिक्ष को । पैरों से तूने पृथ्वी को सुदृढ़ कर दिया' ॥१४॥

अब वह गाड़ता है इस मन्त्रांश को पढ़कर—'या ते धामान्युश्मसि गमध्यै यत्र गावो भूरि शृङ्गाऽअयासः । अत्राह तदुरुगायस्य विष्णोः परमं पदमवभारि भूरि' (यजु० ६।३) । 'हम तेरे उन धामों में जाना चाहते हैं जिनमें तेज और बहुत से सींगों वाली गायें (सूर्य की किरणें) रहती हैं । वहाँ वस्तुतः विशाल विष्णु के परम पद की ज्योति अनेक प्रकार से चमकती है' । (यहाँ 'गावो' का अर्थ गाय नहीं किन्तु सूर्य की किरणें और ईश्वर की भक्ति है । अर्थात् एक से भौतिक प्रकाश और दूसरे से आत्मिक प्रकाश का तात्पर्य है) । इस त्रिष्टुप् छन्द के द्वारा वह गाड़ता है । त्रिष्टुप् वज्र है और यूप यज्ञ है इसलिये त्रिष्टुप् से गाड़ता है ॥१५॥

जो सिरा अग्नि के सामने था उसको अग्नि की ओर कर देता है । क्योंकि यजमान अग्नि के सम्मुख होता है और यज्ञ अग्नि है । यदि उस सिरे का मुँह फेर दिया जाय तो यजमान का मुँह यज्ञ से फिर जाय इसलिये उसका मुँह अग्नि की ओर कर देता है । अब वह उसके चारों ओर मिट्टी डालता है और चारों ओर दबा दबाकर पानी को उस पर डाल देता है ॥१६॥

अब इसको छूकर यजमान से कहलवाता है—'विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा' (यजु० ६।४, ऋ० १।२२।१६) । 'विष्णु के कर्मों को

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्य· सखेतीन्द्रो वै यज्ञस्य देवता विष्णो यूपस्त श्रयेन्द्र करोति तस्मादाहेन्द्रस्य युज्यः सखेति ॥१७॥

अथ चषालमुदीक्षते । तद्विष्णोः परम पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततमिति वज्रं वाऽएष प्राहरायो यूपमुदशिश्रियत्ता विष्णोर्विजिति पश्यतेत्येवैतदाह यदाह तद्विष्णोः परम पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततमिति ॥१८॥

अथ परिव्ययति । अनमित्राये न्येव परिव्ययति तस्मादत्रैव परिव्ययति ॥१९॥

त्रिवृता परिव्ययति । त्रिवृदन्न पशवो अन्नं पिता माता यज्जायते तृतीय तस्मात्त्रिवृता परिव्ययति ॥२०॥

स परिव्ययति । परिवीरसि परि त्वा देवीर्विशो व्ययन्ता परीम यजमानꣳ रायो मनुष्याणामिति तद्यजमानायाशिषमाशास्ते यदाह परीम यजमानꣳ रायो मनुष्याणामिति ॥२१॥

अथ यूपशकलमवगूहति । दिवः सूनुरसीति यत्ता हैवास्यैषा तस्माद्यदि यूपैकादेशो विसस्रसे मत वधे हुये हैं । जो इन्द्र का उचित सखा है' । इन्द्र यज्ञ का देवता है । यूप विष्णु का है । उसको इन्द्र से युक्त करता है इसलिये कहा 'इन्द्रस्य' इत्यादि ॥१७॥

अब इस मन्त्र को पढ़कर चषाल को देखता है—'तद् विष्णोः परम पदꣳ सदा पश्यन्ति सूरय. दिवीव चक्षुराततम्' (यजु० ६।५, ऋ० १।२२।२०) । 'विष्णु के उस परम पद को बुद्धिमान लोग सदा देखते हैं जैसे विकसित आँख सूर्य को' । क्योंकि जिसने यूप लगाया उसने यज्ञ छोड़ दिया । जब वह कहता है 'तद् विष्णो' इत्यादि तब मानों वह कहता है कि विष्णु की विजय की ओर देखो ॥१८॥

अब वह कुश की रस्सी को (यूप के चारों ओर) बाँधता है, नगाफन दबाने के लिये ऐसा करता है । इसीलिये धोती को कमर मे बाँधते हैं । इससे वह उसमे अन्न रखता है । क्योंकि अन्न भी तो वहीं (पेट मे) रहता है । इसलिये वह (यूप की कमर मे) रस्सी बाँधता है ॥१९॥

वह तीन लपेट लगाता है । अन्न तीन भागों वाला है । पशु अन्न है । (पहला) माता, (दूसरा) पिता और (बच्चा) जो पैदा होता है तीसरा है । इसलिये वह तीन लपेट लगाता है ॥२०॥

वह इस मन्त्र को पढ़कर तीन लपेट लगाता है—'परिवीरसि परि त्वा देवीर्विशो व्ययन्ता परीम यजमानꣳ रायो मनुष्याणाम्' (यजु० ६।६) । 'तू लिपटा हुआ है । दिव्य लोक के लोग तुझे लपेटें । मनुष्यों मे यजमान धन से लिपटा होवे' । जब वह कहता है, 'परीम यजमान' आदि तो मानों वह यजमान को आशीर्वाद देता है ॥२१॥

अब वह यूप शकल को प्रवेश कराता है, इस मन्त्र से—'दिव सूनुरसि' (यजु० ६।६) । 'तू द्यौलोक का पुत्र है' । वस्तुत यह उसी की सन्तान है । इसलिये यदि ग्यारह

शिनी स्यात्स्वध्रं स्वमेवावगूहेदविपर्यासं तस्य हैषामुग्धानुव्रताप्रजा जायतेऽथ यो विपर्यासमवगूहति न स्वध्रं स्वं तस्य हैषा मुग्धाननुव्रता प्रजा जायते तस्मादु स्वध्रं स्वमेवावगूहेदविपर्यासंश्रं ॥२२॥

स्वर्गस्यो हैष लोकस्य समारोहणः क्रियते । यद्यूपशकल इयश्रं रशना रशनायै यूपशकलो यूपशकलाच्चषालं चषालात्स्वर्गं लोकश्रं समश्नुते ॥२३॥

अथ यस्मात्स्वरुर्नाम । एतस्माद्वाऽएषोऽपच्छिद्यते तस्यैतत्स्वमेवारुर्भवति तस्मात्स्वरुर्नाम ॥२४॥

तस्य यन्निखातम् । तेन पितृलोकं जयत्यथ यदूर्ध्वं निखातादा रशनायै तेन मनुष्यलोकं जयत्यथ यदूर्ध्वश्रं रशनाया आ चषालात्तेन देवलोकं जयत्यथ यदूर्ध्वं चषालाद्द्व्यङ्गुलं वा त्र्यङ्गुलं वा साध्या इति देवास्तेन तेषां लोकं जयति सलोकतां वै साध्यैर्देवैर्भवति य एवमेतद्वेद ॥२५॥

तं वै पूर्वार्धे मिनोति । वज्रो वै यूपो वज्रो दण्डः पूर्वार्धे वै दण्डस्याभिपद्य प्रहरति पूर्वार्ध एष यज्ञस्य तस्मात्पूर्वार्धे मिनोति ॥२६॥

यूप हों तो हर एक में उसी का यूप-शकल (चीपुटी) लगाना चाहिये। ऐसा करने से उसकी सन्तान मूर्ख (मुग्धा) या अननुव्रता (न मत पालने वाली) न होगी। जो यूपों में यूप शकल लगाने के समय उसी-उसी यूप की चीपुटी नहीं लगाता और गड़बड़ कर देता है, उस उसकी सन्तान मूर्ख और अननुव्रत होती है। इसलिये उस उस यूप में उसी उसी की चिपुटी लगानी चाहिये ॥२२॥

जो यूप-शकल है वह स्वर्ग की सीढ़ी है। वह इस प्रकार कि पहले तो रसना हुई। फिर यूप शकल, फिर चषाल। फिर चषाल से चढ़कर स्वर्ग लोक को प्राप्त हो जाता है ॥२३॥

इसका 'स्वरु' नाम इसलिये है कि वह उसी में से काटी जाती है। 'स्व' का अर्थ है 'अपना' और 'अरु' का अर्थ है 'घाव'। इनसे मिलकर 'स्वरु' हुआ ॥२४॥

जो नीचे गड़ा हुआ भाग है उससे स्वर्ग लोक की प्राप्ति करता है और जो ऊपर का भाग है उससे रसना सहित मनुष्य लोक की प्राप्ति करता है। और जो रसना से ऊपर चषाल है उससे देवलोक को प्राप्त करता है। और चषाल से ऊपर जो दो-तीन अँगुल लम्बी होती है उससे जो 'साध्य देव' हैं उनके लोक को प्राप्त करता है। जो इस रहस्य को समझता है वह साध्य देवों का सलोक बन जाता है ॥२५॥

वह यूप को वेदी के पूर्वार्ध में लगाता है। यूप वज्र है। दण्ड वज्र है। जब कोई यज्ञ को मारता है तो अग्रभाग को पकड़ कर मारता है। यह यज्ञ का पूर्वार्ध है। इसीलिये पूर्वार्ध में यूप को लगाता है ॥२६॥

यज्ञेन वै देवाः । इमां जिति जिग्युर्येषामियं जितिस्ते होचुः कथं न इदं मनुष्यैरन-भ्यारोहꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्थ यदेनेनोपापयंस्तस्माद्यूपो नाम पुरस्ताद्वै प्रज्ञा पुरस्तान्मनोजवस्त-स्मात्पूर्वार्धे मिनोति ॥२७॥

स वाऽअष्टाश्रिर्भवति । अष्टाक्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्ध एव यज्ञस्य तस्मादष्टाश्रिर्भवति ॥२८॥

तꣳह स्मैतं देवा अनुप्रहरन्ति । यथेदमप्येतर्ह्येकेऽनुप्रहरन्तीति देवा अकुर्वन्निति ततो रक्षाꣳसि यज्ञमनूदपिबन्त ॥२९॥

ते देवा अध्वर्युमब्रुवन् । यूपशकलमेव जुहुधि तदहैष स्वगाकृतो भविष्यति तथो रक्षाꣳसि यज्ञं नानूत्पास्यन्तेऽयं वै वज्र उद्यत इति ॥३०॥

सोऽध्वर्युः । यूपशकलमेवाजुहोत्तदहैष स्वगाकृत आसीत्तथो रक्षाꣳसि यज्ञं नानू-दपिबन्तायं वै वज्र उद्यत इति ॥३१॥

तथोऽएवैष एतत् । यूपशकलमेव जुहोति तदहैष स्वगाकृतो भवति तथोरक्षाꣳसि

यज्ञ के द्वारा देवों ने विजय प्राप्त की जो इनको प्राप्त है। उन्होंने कहा कि इस अपने लोक को किस प्रकार ऐसा बनायें कि मनुष्य न आ सकें। उन्होंने यज्ञ का रस चूस लिया जैसे मधु-मक्खियाँ मधु को चूसती हैं। और यज्ञ को यूप के चारों ओर बखेर कर (योपयित्वा) छिप गये। चूँकि उन्होंने इसको यूप द्वारा (उपापयन) बखेरा इसलिये इसका नाम यूप पड़ा। बुद्धि अग्रभाग में होती है। मन का वेग भी अग्र भाग में होता होता है। इसलिये वह उसको 'अग्र भाग' में लगाता है ॥२७॥

वह अष्ट-कोण वाला होता है। गायत्री छन्द के आठ अक्षर होते हैं और गायत्री यज्ञ का पूर्वार्ध होती है। यह भी चूँकि यज्ञ का पूर्वार्ध है इसलिये वह उसको अष्ट-कोण वाला बनाता है ॥२८॥

एक बार देवों ने इसको (प्रस्तर को आग में) पीछे से फेंका था, इसका अनुसरण करके यह भी पीछे से फेंक देते हैं, क्योंकि देवों ने ऐसा किया था। इसलिये राक्षसों ने यज्ञ को देवों के पीछे पिया ॥२९॥

देवों ने अध्वर्यु से कहा, 'केवल यूप-शकल की आहुति दे'। इससे यज्ञ सफल हो जायगा। और राक्षस उसमें न आवेंगे यह सोचकर कि यह यूप रूपी वज्र खड़ा हो गया है ॥३०॥

तब अध्वर्यु ने यूप-शकल की आहुति दी, और यजमान सफल हो गया। इसके पीछे राक्षस यज्ञ को न पी सके। यह सोचकर कि यह एक वज्र खड़ा हो गया है ॥३१॥

इसी प्रकार वह यूप-शकल की आहुति ही देता है। यजमान इससे सफल हो जाता है। राक्षस यज्ञ को नहीं पीने पाते, यह सोचकर कि यह तो वज्र खड़ा हो गया है।

यज्ञ नानृतिपन्नोऽयं वै वज्र उद्यत इति स जुहोति दिवं ते धूमो गच्छतु स्वज्योतिः पृथिवीं भस्मनापृण स्वाहेति ॥३२॥ ॥ ४ [७ १] ॥

यह इस मन्त्र से आहुति देता है—'दिवं ते धूमो गच्छतु स्वज्योतिः पृथिवीं भस्मनापृण स्वाहा' (यजु० ६।२१)। 'द्यौलोक तक तेरा धुआँ जाय, स्वर्लोक तक ज्योति और पृथ्वी तेरी भस्म से भर जाय' ॥३२॥

अध्याय ७—ब्राह्मण १

यावतो वै वेदिस्तावती पृथिवी। वज्रो वै यूपस्तद्दिग्गमेवैतत्पृथिवीमेतेवज्रेण स्तृणुते उर्ध्वं यूपमुच्छ्रयति तस्मादूर्ध्वमादृशिनी भवति द्वादश उपरायो भवति वितष्टस्तं दक्षिणत उपनिदधाति तद्द्वादश उपरायो भवति ॥१॥ शतम् २०००॥

देवा ह वै यज्ञं तन्वाना। तेऽसुररक्षसेभ्य आत्मन्नादिभयमचकुरवऽएतऽउच्छ्रिता यथेषुरभ्वा तया वै स्तृणुते वा न वा स्तृणुते यथा दण्डः प्रहृतस्तेन वै स्तृणुते वा न वा स्तृणुतेऽथ य एष द्वादश उपरायो भवति यथेषुरायतास्ता यथोद्यतमप्रहृतमेवमेष यज्ञ उद्यतो दक्षिणतो गार्हपत्याद् रक्षसामपहत्यै तस्माद्द्वादश उपरायो भवति ॥२॥

तं निदधाति। एष ते पृथिव्यै लोक आरण्यस्ते पशुरिति पशुभ्य वै यूपभ तद्यज्ञा-

स्थिरता यही यदि होती है उतनी यही पृथ्वी। यूप वज्र होते हैं। इन्हीं वज्रों के द्वारा यह पृथ्वी पर स्तरण कर लेता है और शत्रुओं को जीत लेता है। इसलिये ११ यूप होते हैं और बारहवाँ खिला खिलाया अलग पड़ा रहता है। यह उसको वेदी के दक्षिण को जानता है। यह बारहवाँ अलग क्यों रहता है इसका कारण आगे दिया है—॥२॥ [शतम् २०००]

यज्ञ करने वाले देवताओं को असुर राक्षसों से आक्रमण का भय हुआ। यह जो बारह यूप खड़े किये गये यह उन लोगों के लगाने में जो खोद दिये गये हों, चाहे किसी (शत्रु) के लगे हों या न लगे हों। या ये उस लाठी के समान हैं जो मार दी गई, चाहे वह लगी या न लगी। और जो यह बारहवाँ यूप खड़ा हुआ है यह उस तीर के समान है जो चला दिया गया है परन्तु अभी छोड़ा नहीं गया। यह उस यज्ञ के समान है जो उठा तो लिया गया परन्तु अभी छोड़ा नहीं गया। यह यूप यज्ञ या दक्षिण की ओर शत्रु राक्षसों को मारने के लिये रक्खा गया था। इसलिये बारहवाँ यूप खड़ा रहता है ॥२॥

यह इस यूप को इस मंत्र से लगाता है—'इमं ते पृथिव्या लोकमारण्यस्ते पशुः' (यजु० ६।२१)। 'पृथ्वी में तेरा यह स्थान है। जंगली पशु तेरे हैं'। पशु भी है और यह

ऽआरण्यमेव पशूनामनुदिशति तेनोऽएष पशुमान्भवति तद्द्वयं यूपैकादशिन्यै संमयनमाहुः
श्वः सुत्याये ह न्वेवैके संमिन्वन्ति प्रकुर्वतायै चैव श्वः सुत्यायै यूपं मिन्वन्तीत्यु च ॥३॥

तदु तथा न कुर्यात् । अग्निष्ठमेवोच्छ्रयेदिदं वै यूपमुच्छ्रित्याध्वर्युरा परिव्ययणाऽन्य-
र्जेत्यपरिवीता वाऽएतऽएताश्चं रात्रिं वसन्ति सा न्वेव परिचित्ता पशवे वै यूपमुच्छ्रयन्ति
प्रातर्वै पशूनालभन्ते तस्मादु प्रातरेवोच्छ्रयेत् ॥४॥

स य उत्तरोऽग्निष्ठात्स्यात् । तमेवाग्रऽउच्छ्रयेदथ दक्षिणमथोत्तरं दक्षिणार्ध्यमुत्तमं
तथोदीची भवति ॥५॥

अथोऽउत्तरथाहुः । दक्षिणमेवाग्रेऽग्निष्ठादुच्छ्रयेदथोत्तरमथ दक्षिणमुत्तरार्ध्यमुत्तमं
तथो हास्योदगेव कर्मानुसंतिष्ठतऽइति ॥६॥

स यो वर्षिष्ठः स दक्षिणार्ध्यः स्यात् । अथ ह्रसीयानथ ह्रसीयानुत्तरार्ध्यो ह्रसिष्ठ-
स्तथोदीची भवति ॥७॥

अथ पत्नीभ्यः पत्नीयूपमुच्छ्रयन्ति । सर्वत्वाय न्वेव पत्नीयूप उच्छ्रीयते तत्त्वाष्टं
पशुमालभते त्वष्टा वै सिक्तश्चं रेतो विकरोति तदेष एवैतत्सिक्तश्चं रेतो विकरोति मुष्करो

भी । इसलिये जंगली के पशुओं का इसकी ओर निर्देश करता है । इसलिये यह भी पशुवाला
कहा जाता है । यह ग्यारह यूप दो तरह के होते हैं । कुछ लोग तो सब यूपों को एक साथ
लगाते हैं । दूसरे दिन के सोम-याग के लिये । कुछ दूसरे दिन के सोमयाग के लिये एक ही
यूप लगाते हैं । (अर्थात् कुछ तो एक साथ लगाते हैं और कुछ एक-एक करके) ॥३॥

परन्तु ऐसा न करना चाहिये । केवल अग्नि के सम्मुख एक लगाना चाहिये ।
क्योंकि इसको लगाकर अध्वर्यु इसको नहीं छोड़ता जब तक कि वह इसको घेरता नहीं
(परिव्ययण) । और दूसरे यूप रात भर अपरिवीत रहते हैं । यह दोष होगा क्योंकि
यूप पशु के लिये हैं । पशु की बलि दूसरे दिन प्रातःकाल के समय होगी । इसलिये और
यूपों को दूसरे दिन प्रातःकाल ही लगाना चाहिये ॥४॥

अब उसको यह यूप लगाना चाहिये जो अग्नि के सामने वाले यूप के ठीक उत्तर में
है । फिर दक्षिण को, फिर उत्तर की, अन्तिम दक्षिण की ओर । इस प्रकार यूपों की पंक्ति
उत्तर की ओर होती है ॥५॥

कुछ इसके विरुद्ध भी कहते हैं । अर्थात् पहले अग्नि के सामने वाले यूप के दक्षिण
की ओर लगाये, फिर उत्तर की ओर, फिर दक्षिण की ओर । अन्तिम उत्तर की ओर । इस
प्रकार उसका उत्तर का काम समाप्त हो जाता है ॥६॥

दक्षिण की ओर सबसे बड़ा होना चाहिये । फिर उससे छोटा, फिर उससे छोटा,
जो सबसे उत्तर में हो वह सबसे छोटा । इस प्रकार पंक्ति उत्तर की ओर हो जाती है ॥७॥

तत्पश्चात् पत्नियों के लिये पत्नी-यूप गाड़ते हैं । पत्नी यूप सम्पूर्णता के लिये गाड़ा
जाता है । यहाँ त्वष्टा के पशु को पकड़ते हैं । क्योंकि त्वष्टा वीर्य का पोषक है । इस प्रकार

भवत्येष वै प्रजनयिता यन्मुष्करस्तस्मान्मुष्करो भवति तं न सथ्ंस्थापयेत्पर्यग्निकृतमेवोत्सृजेत्स यत्सथ्स्थापयेत्प्रजायै हान्तमियात्तत्प्रजामुत्सृजति तस्माद्व सथ्स्थापयेत्पर्यग्निकृतमेवोत्सृजेत् ॥८॥ ब्राह्मणम् ॥५॥ [७ २.] ॥

यह सींचे हुये वीर्य को बनाता है। यदि यह पशु अण्डकोषों वाला है तो उत्पादक है। इसकी बलि न दे। इसको अग्नि के चारों ओर फिरा कर छोड़ दे। यदि बलि देगा तो प्रजा का अन्त हो जायगा। परन्तु इस प्रकार यह सन्तान को स्वतन्त्र कर देता है। इसलिये इसकी बलि न दे। इसको अग्नि के चारों ओर फिराकर ही छोड़ दे ॥८॥

अध्याय ७—ब्राह्मण ३

पशुश्च वै यूपश्च। नाऽऋते यूपात्पशुमालभन्ते कदा चन यद्यत्तथा न ह वाऽएतस्माऽ अग्रे पशवश्चक्रमिरे यदक्रमभविष्यन्यथेदमन्नं भूत यथा हेदं द्विपात्पुरुष उच्छ्रित एवꣳ हैव द्विपाद उच्छ्रिताश्चेरुः ॥१॥

ततो देवा एतं वज्रं ददृशुः। यद्यूपं तमुच्छ्रिश्रियुस्तस्माद्वीप प्राव्लीयन्त ततश्चतुष्पादा अभवंस्ततोऽक्रमभवन्यथेदमन्नं भूता एतस्मै हि नाऽतिष्ठन्त तस्माद्यूपऽएव पशुमालभन्ते नऽतं यूपात्कदाचन ॥२॥

अथोपाकृत्य पशुम्। अग्निं मथित्वा नियुनक्ति तद्यत्तथा न ह वाऽएतस्माऽअग्रे पशवश्चक्रमिरे यद्धविरभविष्यन्यथैनानिदꣳ हविर्भूतानग्नौ जुह्वति तान्देवा उपनिरुरुधुरतऽउपनिरुद्धा नोपावेयुः ॥३॥

पशु भी और यूप भी। बिना यूप के पशु कभी नहीं मारा जाता। ऐसा इसलिये होता है कि पहले पशुओं ने अन्न अर्थात् खाद्य-पदार्थ बनना स्वीकार नहीं किया। जैसा अब कर लिया। क्योंकि जैसा आजकल मनुष्य दो पैरों पर और खड़ा चलता है उसी प्रकार पशु भी दो पैरों पर और खड़े-खड़े चलते थे ॥१॥

तब देवों ने उस वज्र को देखा जिसका नाम यूप है। उन्होंने उस यूप को स्थापित किया। और उसके डर से पशु मुकुड़ गये और अन्न बन गये। जैसा कि अब हो गये हैं क्योंकि उन्होंने मान लिया है। इसीलिये पशु को यूप पर ही मारते हैं बिना यूप के कभी नहीं मारते ॥२॥

पशु को लाकर, अग्नि को मथ कर पशु को यूप से बाँधते हैं। ऐसा क्यों करते हैं? पहले पशुओं ने यह बात स्वीकार नहीं की कि वे हवि बन जायें। जैसे वे अब हवि बन गये हैं और अग्नि में बलि दिये जाते हैं। उनको देवों ने वश में किया। इस प्रकार वश में होकर भी वे न माने ॥३॥

ते होचुः । न वा ऽइमेऽस्य यामं विदुर्यदग्नौ हविर्जुह्वति नैतां प्रतिष्ठामुपरुध्यैव पशूनाग्निं मथित्वाग्नावग्निं जुह्वाम ते वेदिष्यन्त्येष वै किल हविषो यामः एषा प्रतिष्ठाग्नौ वै किल हविर्जुह्वतीति ततोऽभ्यवैष्यन्ति ततो रातमनस आलम्भाय भविष्यन्तीति ॥४॥

त ऽउपरुध्यैव पशून् । अग्निं मथित्वाग्नावग्निमजुहुवुस्तेऽविदुरेष वै किल हविषो यामः एषा प्रतिष्ठाग्नौ वै किल हविर्जुह्वतीति ततोऽभ्यवायंस्ततो रातमनस आलम्भायाभवन् ॥५॥

तथोऽएवैष एतत् । उपरुध्यैव पशुमग्निं मथित्वाग्नावग्निं जुहोति स वेदैष वै किल हविषो यामः एषा प्रतिष्ठाग्नौ वै किल हविर्जुह्वतीति ततोऽभ्यैति ततो रातमना आलम्भाय भवति तस्मादुपाकृत्य पशुमग्निं मथित्वा नियुनक्ति ॥६॥

तदाहुः । नोपाकुर्यात्त्वाग्निं मन्थेद्रशनामे वादायाऽसोपपरेत्याभिधाय नियुञ्ज्यादिति तदु तथा न कुर्याद्यथाधर्मं तिरश्चथा चिकीर्षेदेवं तत्तस्मादेतदेवानुपरीयात् ॥७॥

अथ तृणमादायोपाकरोति । द्वितीयवान्निरुणद्धाऽइति द्वितीयवान्हि वीर्य-

उन्होंने कहा, 'यह पशु इस नियम (याम) को नहीं जानते कि अग्नि में आहुति दी जाती है और न इस (अग्नि रूपी) प्रतिष्ठा को मानते हैं। पशुओं को लाकर और आग को मथकर अग्नि में अग्नि की आहुति दें। तब यह जान लेंगे कि हवि का नियम यह है और अग्नि की यह प्रतिष्ठा है। अग्नि में ही आहुति दी जाती है। तब यह मान जायँगे और मारे जाने के लिये तैयार हो जायँगे ॥४॥

स ह त्वेव पशुमालभेत । य एनं मेधमुपनयेद्यदि कृशः स्याद्यदुदर्यस्य मेदसः परिशिष्येत तद्गुदे न्युपेत्प्राणो वै गुदः सोऽयं प्राङ्ततस्तमयं प्राणोऽनुसंचरति प्राणो वै पशुर्यावद्धयेव प्राणेन प्राणिति तावत्पशुरथ यदास्मात्प्राणोऽपक्रामति दार्वेव तर्हि भूतोऽनर्ध्यः शेते ॥५॥

गुदो वै पशुः । मेदो वै मेधस्तदेनं मेधमुपनयति यद्युऽन्नश्लसलो भवति स्वयमुपेत एव तर्हि मेधं भवति ॥६॥

अथ पृषदाज्यं गृह्णाति । द्वय वाऽइदꣳ सर्पिश्चैव दधि च द्वन्द्वं वै मिथुन प्रजननं मिथुनमेवैतत्प्रजननं क्रियते ॥७॥

तेनानुयाजेषु चरति । पशवो वाऽअनुयाजाः पयः पृषदाज्यं तत्पशष्वेवैतत्पयो दधाति तदिदं पशुषु पयो हितं प्राणो हि पृषदाज्यमन्नꣳ हि पृषदाज्यमन्नꣳ हि प्राणः ॥८॥

तेन पुरस्तादनुयाजेषु चरति । स योऽयं पुरस्तात्प्राणस्तमेवैतद्दधाति तेन पश्चादुपयजति स योऽयं पश्चात्प्राणस्तमेवैतद्दधाति ताविमा ऽउभयतः प्राणौ हितौ यश्चायमुपरिष्टाद्यश्चाधस्तात् ॥९॥

तद्वा ऽएतदेको द्वाभ्यां वषट् करोति । अध्वर्यवे च यश्चैप उपयजत्यथ यद्यजन्त-

केवल वही पशु का आलभन करे जो उसे मेध युक्त कर सकता हो । यदि दुबला हो तो जो कुछ चर्बी बची वह गुदा में भर दे । गुदा प्राण है । वहाँ से यह (पशु) फैलता है और यह प्राण उसका सचार करता है । प्राण ही पशु है । जब तक प्राण रहता है तब तक वह पशु है । जब उससे प्राण निकल जाता है तो लकडी के समान वह व्यर्थ पड़ा रहता है ॥५॥

गुदा पशु है । चर्बी मेध है । इसमें मेध देता है । यदि यह पतली हो तो स्वयं ही मेध हो जाता है ॥६॥

अब पृषदाज्य को लेता है । यह दो प्रकार का है घी भी और दही भी । द्वन्द्व का नाम है जोडा । प्रजनन का नाम भी जोड़ा है । इस प्रकार प्रजनन करता है ॥७॥

उससे अनुयाज मे काम लेता है । पशु अनुयाज हैं । पृषदाज्य दूध है । इस प्रकार वह पशुओं मे दूध धारण कराता है और इस प्रकार पशुओं में दूध रक्खा जाता है । प्राण पृषदाज्य है । अन्न पृषदाज्य है । अन्न प्राण है ॥८॥

इनको अनुयाजो म आहवनीय के सम्मुख काम में लाता है । इस प्रकार यह जो आगे प्राण है उसको (पशु मे) रखता है । (प्रतिप्रस्थाता) इसी से पीछे की ओर उपयाज करता है । इसके द्वारा यह जो पीछे प्राण है उसको (पशु में) धारण कराता है । इस प्रकार दो प्राणों की प्रतिष्ठा होती है, एक ऊपर, दूसरी नीचे ॥९॥

यह एक (होता) दो के लिये वषट्कार करता है । एक तो अध्वर्यु के लिये और

मुपयजति तस्मादुपयजो नामाथ यदुपयजति प्रैवैतज्जनयति पश्चाद्वपुपयजति पश्चादि योपायै प्रजाः प्रजायन्ते ॥१०॥

स उपयजति । समुद्रं गच्छ स्वाहेत्यापो वै समुद्र आपो रेतोरतऐवैतत्सिञ्चति ॥११॥

अन्तरिक्षं गच्छ स्वाहेति । अन्तरिक्षं वाऽअनुप्रजाः प्रजायन्तेऽन्तरिक्षमेवैतदनुप्रजनयति ॥१२॥

देवꣳ सवितारं गच्छ स्वाहेति सविता वै देवाना प्रसविता सवितृप्रसूत एवैतत्प्रजनयति ॥१३॥

मित्रावरुणौ गच्छ स्वाहेति । प्राणोदानौ वै मित्रावरुणौ प्राणोदानावेवैतत्प्रजासु दधाति ॥१४॥

अहोरात्रे गच्छ स्वाहेति । अहोरात्रे वाऽअनु प्रजाः प्रजायन्तेऽहोरात्रऽएवैतदनुप्रजनयति ॥१५॥

छन्दाꣳसि गच्छ स्वाहेति । सप्त वै छन्दासि सप्त ग्राम्याः पशवः सप्तारण्यास्तानेवैतदुभयान्प्रजनयति ॥१६॥

द्यावापृथिवी गच्छ स्वाहेति । प्रजापतिर्वै प्रजाः सृष्ट्वा ता द्यावापृथिवीभ्या पर्यगृह्णात्ता

दूसरे उसके लिये जो उपयाज करता है (अर्थात् प्रतिप्रस्याता के लिये)। और चूँकि यजन के बाद दी जाती है इसलिये इसका नाम उपयाज है। उपयाज करने में पीछे से उत्पत्ति होती है। स्त्रियों के भी सन्तान पीछे से ही उत्पन्न होती है ॥१०॥

वह उपयाज को इस मन्त्र से देता है—'समुद्रगच्छ स्वाहा' (यजु० ६।२१)। 'जल समुद्र है'। जल वीर्य है। यह वीर्य ही है जिसको सींचते हैं ॥११॥

'अन्तरिक्ष गच्छ स्वाहा' (यजु० ६।२१)। 'अन्तरिक्ष में ही सन्तान उत्पन्न होती है'। अन्तरिक्ष में ही वह उत्पत्ति करता है ॥१२॥

'देव सवितार गच्छ स्वाहा' (यजु० ६।२१)। 'देवों का प्रेरक सविता है'। सविता से प्रेरित होकर वह जीवों को प्रेरित कर रहा है ॥१३॥

'मित्रावरुणौ गच्छ स्वाहा' (यजु० ६।२१)। 'प्राण और उदान मित्र और वरुण है'। इस प्रकार प्रजाओं में प्राण और उदान धारण करता है ॥१४॥

'अहोरात्रे गच्छ स्वाहा' (यजु० ६।२१)। 'दिन रात में ही सन्तान उत्पन्न होती है'। दिन रात में ही वह जीवों को उत्पन्न कराता है ॥१५॥

'छन्दाꣳसि गच्छ स्वाहा' (यजु० ६।२१)। 'सात छन्द है। सात घर के (ग्राम्य) और सात वन के (आरण्य) पशु हैं'। इन दोनो को वह उत्पन्न कराता है ॥१६॥

'द्यावापृथिवी गच्छ स्वाहा' (यजु० ६।२१)। 'प्रजापति ने प्रजा को रचकर द्यौ और पृथिवी के बीच में भर दिया। इसलिये वह द्यौ और पृथ्वी के बीच में है'। इसी

इमा द्यावापृथिवीभ्यां परिगृहीतास्तथोऽएवैष एतत्प्रजाः सृष्ट्वा ता द्यावापृथिवीभ्यां परि-गृह्णाति ॥१७॥

अथात्युपयजति । स यन्नात्युपयजेद्यावत्यो हैवाग्रे प्रजाः सृष्टास्तावत्यो हैव स्युर्न प्रजायेरन्नथ यदत्युपयजति प्रैवैतज्जनयति तस्मादिमाः प्रजाः पुनरुत्यावर्तं प्रजा-यन्ते ॥१८॥ ब्राह्मणम् ॥ ५ [८. ४.] ॥ षष्ठः प्रपाठकः ॥ कण्डिका संख्या ११२ ॥

प्रकार यह देने आहुति वाला भी प्राणियों को उत्पन्न करके उनको द्यौ और पृथ्वी के बीच में रख देता है ॥१७॥

अब वह अन्य उपयाज करता है । यदि इन अन्य उपयाजों को न करे तो उतने ही पशु रहें जितने आरम्भ में उत्पन्न हुये थे । और न उत्पन्न हों । परन्तु अधिक उपयाजों को करके यह सन्तान को बढ़ाता है, जिससे इस पृथ्वी पर फिर-फिर उत्पन्न हो ॥१८॥

अध्याय ८—ब्राह्मण ५

सोऽयुपयजति । यज्ञं गच्छ स्वाहेत्यापो वै यज्ञ आपो रेतो रेत एवैतत्सिञ्चति ॥१॥

सोमं गच्छ स्वाहेति । रेतो वै सोमो रेत एवैतत्सिञ्चति ॥२॥

दिव्यं नभो गच्छ स्वाहेति आपो वै दिव्यं नभ आपो रेतो रेत एवैतत्सिञ्चति ॥३॥

अग्निं वैश्वानरं गच्छ स्वाहेति। इयं वै पृथिव्यग्निर्वैश्वानरः सेयं प्रतिष्ठेमामेवैतत्प्रतिष्ठा-मभिप्रजनयति ॥४॥

अथ मुखं विमृष्टे । मनो मे हार्दि यच्छेति तथा होपयष्टात्मानं नानुप्रवृणक्ति ॥५॥

यह उपयाज करता है, 'यज्ञ गच्छ स्वाहा' (यजु० ६।२१) । 'जल यज्ञ है', जल वीर्य है । इसके द्वारा वीर्य को सींचता है ॥१॥

'सोम गच्छ स्वाहा' (यजु० ६।२१) । 'वीर्य सोम है' । वीर्य को इससे सींचता है ॥२॥

'दिव्य नभो गच्छ स्वाहा' (यजु० ६।२१) । 'जल 'दिव्य नभ' है' । जल वीर्य है । वीर्य को इससे सींचता है ॥३॥

'अग्नि वैश्वानर गच्छ स्वाहा' (यजु० ६।२१) । 'यह पृथिवी अग्नि वैश्वानर है' । यही प्रतिष्ठा है । इस प्रकार इस प्रतिष्ठा को उत्पन्न करता है ॥४॥

अब इस मन्त्र से मुख का स्पर्श करता है—'मनो मे हार्दि यच्छ' (यजु० ६।२१) । 'मुझे मन और हृदय दे' । इस प्रकार उपयाज करने वाला अपने को नहीं आहुति देता ॥५॥

अथ जाघन्या पत्नीः संयाजयन्ति । जघनार्धो वै जाघनी जाघनार्धाद्वै योषायै प्रजाः प्रजायन्ते तत्प्रैवैतज्जनयति यज्जाघन्या पत्नीः संयाजयन्ति ॥६॥

अन्तरतो देवानां पत्नीभ्योऽवद्यति । अन्तरतो वै योषायै प्रजाः प्रजायन्तऽउपरिष्टादग्नये गृहपतयऽउपरिष्टाद्वै वृषा योषामधिद्रवति ॥७॥

अथ हृदयशूलेनावभृथं यन्ति । पशोर्हृ याऽआलभ्यमानस्य हृदयꣳ शुक्समभ्यवैति हृदयाद्धृदयशूलमथ यच्छृतस्य परितृन्दन्ति तदलं जुषं तस्मादु परितृधैव शूलाकुर्यात्त्रिः-प्रच्युते पशौ हृदयं प्रवृह्योत्तमं प्रत्यवदधाति ॥८॥

अथ हृदयशूलं प्रयच्छति । तन्न पृथिव्यां परास्येन्नाप्सु स यत्पृथिव्यां परास्येदोषधीश्च वनस्पतींश्चैषा शुक्प्रविशेद्यदप्सु परास्येदप एषा शुक्प्रविशेत्तस्मान्न पृथिव्यां नाप्सु ॥९॥

अप एवाभ्यवेत्य । यत्र शुष्कस्य चार्द्रस्य च संधिः स्यात्तदुपगूहेद्यदु ऽअभ्यवायनाय श्लायेद्रमेण यूपमुदपात्रं निनीय यत्र शुष्कस्य चार्द्रस्य च संधिर्भवति तदुपगूहति मापो मौषधीर्हिꣳसीरिति तथा नापो नौषधीर्हिनस्ति धाम्नो धाम्नो राजंस्ततो वरुण नो मुञ्च ।

अब (पशु की) पूँछ से 'पत्नीः-संयाज' करते हैं । पूँछ पिछला भाग है । स्त्रियो के पिछले भाग से ही सन्तान की उत्पत्ति होती है । इसलिये पूँछ से 'पत्नी-संयाज' करके सन्तान की उत्पत्ति करता है ॥६॥

देवों की पत्नियों के लिये भीतर से भाग काटता है । स्त्रियों के अन्दर से ही सन्तान उत्पन्न होती है । ऊपर से गृहपति अग्नि के लिये । क्योंकि ऊपर से ही नर स्त्री में वीर्य धारण कराता है ॥७॥

इस पर वे हृदय-शूल के साथ 'अवभृथ' स्नान को जाते हैं । जब पशु को मारते हैं तो उसका शोक हृदय में ही इकट्ठा होता है । हृदय से हृदयशूल में । पकाये हुये मांस का जो भाग छिदा होता है वह स्वादिष्ट होता है । इसलिये उसे छेद कर काँटे पर पकाना चाहिये । पशु के तीन बार हिलाये हुये भाग पर काँटे से निकाल कर हृदय को रखता है ॥८॥

अब (शमिता अध्वर्यु को) हृदय शूल देता है । उसे पृथिवी पर न फेंके, न जल में । यदि पृथिवी पर फेंकेगा तो शोक ओषधि और वनस्पतियों में घुस जायगा । यदि जल में फेंकेगा तो शोक जल में घुस जायगा । इसलिये न पृथिवी पर फेंके, न जल में ॥९॥

किन्तु जल में जाकर ऐसे स्थान पर गाड़ दे जहाँ नमी और खुश्की का मेल हो । परन्तु जल में जाने की इच्छा न हो तो यूप के सामने जल का पात्र लाकर जहाँ नमी और खुश्की का मेल हो वहाँ गाड़ दे । इस मंत्र से—'मापो मौषधीर्हिꣳसीः' (यजु० ६।२२) । 'जल और ओषधि न सतावें' । इस पर जल और ओषधि हानि नहीं पहुँचाते । 'धाम्नो धाम्नो राजँस्ततो वरुण नो मुञ्च । यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च' (यजु० ६।२२) । 'हे राजा वरुण, हर (धान) जाल से हमको छुड़ा । हे वरुण हमको छुड़ा जिससे यह कहें कि न हने जाने वाली और वरुण की हम शपथ खाते हैं' । इस

यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्चेति तदेनꣳ सर्वस्माद्वरुणपाशात्सर्वस्माद्वरुण्यात्प्रमुञ्चति ॥१०॥

अथाभिमन्त्रयते । सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति यत्र वाऽएतेन प्रचरन्त्यापश्च ह वाऽअस्मात्तावदोषधयश्चापक्रम्येव तिष्ठन्ति तदु ताभिर्मित्रधेयं कुरुते तथो हैनं ताः पुनः प्रविशन्त्येषो तत्र प्रायश्चित्तिः क्रियते स वै नाग्नीषोमीयस्य पशोः करोति नाग्नेयस्य वशायाऽएवानूबन्ध्यायै तावꣳहि सर्वोऽनु यज्ञः संतिष्ठतऽएतदु हास्याग्नीषोमीयस्य च पशोराग्नेयस्य च हृदयशूलेन चरितं भवति यद्वशायाश्चरन्ति ॥११॥ ब्राह्मणम् ॥ १ [८. ५.] ॥ अष्टमोऽध्यायः [२३.] ॥

प्रकार वह सब वरुण के जालों से या वरुण सम्बन्धी पापों से उसको छुड़ा देता है ॥१०॥

'अब वह जलों को कहता है—'सुमित्रिया नऽआपऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः' (यजु० ६।२२) । 'जल और ओषधियाँ हमको लाभ पहुँचावें और हानि उनको जो हमको द्वेष करते हैं या जिनसे हम द्वेष करते हैं' । क्योंकि जब वे शूल के साथ जाते हैं तो जल और ओषधियाँ मानो उनसे पीछे हटती है । परन्तु इस प्रकार वह उनसे मित्रता करता है । इस प्रकार वे फिर उसके पास आते हैं । अब वह वहाँ प्रायश्चित करता है । वह यह (अवभृथ) अग्नि-सोम के पशु-याग में नहीं करता, न अग्नि के । किन्तु अनुबन्धी-गौ के सम्बन्ध में करता है । इस प्रकार सब यज्ञ पूर्ण हो जाता है । यह जो वशा-गौ के साथ अवभृथ किया जाता है उससे अग्नि-सोम या अग्नि के भी पशु-याग की पूर्ति हो जाती है ॥११॥

ब्रह्मैनमुपसमावर्तत ब्रह्मानुकमात्मनोऽकुरुत ब्रह्मणोऽएवैष एतदाप्यायते ब्रह्मैनमुपसमावर्तते ब्रह्मानुकमात्मनः कुरुते ॥११॥

तद्यत्सौष्णमनु भवति । पशवो वै पूषा ब्रह्म बृहस्पतिस्तस्माद्ब्राह्मणः पशूनभिधृष्णुतमः पुराहिता ह्यस्य भवन्ति मुखऽआहितास्तस्माद्वु तत्सर्वं दत्त्वाजिनवासी चरति ॥१२॥

अथ वैश्वदेवꣳ । सर्वं वै विश्वे देवाः सर्वेणैव तत्प्रजापतिः पुनरात्मानमाप्याययत सर्वमेनमुपसमावर्तत सर्वमनुकमात्मनोऽकुरुत सर्वेणोऽएवैष एतदाप्यायते सर्वमेनमुपसमावर्तते सर्वमनुकमात्मनः कुरुते ॥१३॥

तद्यद्बार्हस्पत्यमनु भवति । ब्रह्म वै बृहस्पतिः सर्वमिदं विश्वे देवा अस्यैवैतत्सर्वस्य ब्रह्म मुखं करोति तस्मादस्य सर्वस्य ब्राह्मणो मुखम् ॥१४॥

अथैन्द्रम् । इन्द्रिय वै वीर्यमिन्द्र इन्द्रियेणैव तद्वीर्येण प्रजापतिः पुनरात्मानमाप्याययतेन्द्रियमेन वीर्यमुपसमावर्ततेन्द्रिय वीर्यमनुकमात्मनोऽकुरुतेन्द्रियेणोऽएवैष एतद्वीर्येणाप्यायतऽइन्द्रियमेन वीर्यमुपसमावर्ततऽइन्द्रिय वीर्यमनुकमात्मनः कुरुते ॥१५॥

यद्यद्वैश्वदेवमनु भवति । क्षत्रं वाऽइन्द्रो विशो विश्वे देवा अन्नाद्यमेवास्माऽएतत्पुर-

पूर्ण किया। ब्रह्म उसके पास लौट आया। ब्रह्म को वह अपने अनुकूल करता है। यह भी ब्रह्म के द्वारा अपने को पुष्ट करता है। ब्रह्म उसके पास लौट आता है। ब्रह्म को वह अपने अनुकूल करता है ॥११॥

बृहस्पति पूषा के पीछे क्यों होता है? पशु ही पूषा है। ब्रह्म बृहस्पति है। इसलिये पशु ब्रह्म के हैं। उसी ने उनको आगे रक्खा है, मुख के स्थान में रक्खा है। इसलिये इन सब को देकर वह मेढ़ के चमड़े को पहन कर चलता है ॥१२॥

अब विश्वेदेवों के लिये। विश्वेदेव 'सर्व या सब' हैं। सब के द्वारा ही प्रजापति ने अपने को पूर्ण किया। 'सब' उसके पास लौट आये। 'सबको' उसने अपने अनुकूल बनाया। यह भी 'सब' के द्वारा अपने को पूर्ण करता है। सब उसके पास लौट आते हैं और सबको वह अपने अनुकूल कर लेता है ॥१३॥

यह बृहस्पति के पीछे क्यों होता है? बृहस्पति ब्रह्म है। यह सब विश्वेदेव है। वह ब्रह्म को इन सब का मुख बनाता है। इसी से ब्राह्मण सबका मुख है ॥१४॥

अब इन्द्र के लिये। इन्द्र का अर्थ है शक्ति, वीर्य। इसी शक्ति, तथा वीर्य के द्वारा प्रजापति ने अपने को पूर्ण किया। यही शक्ति या वीर्य उसके पास लौट आया। इसी शक्ति या वीर्य को उसने अपने अनुकूल बनाया। यह भी शक्ति या वीर्य के द्वारा अपने को पूर्ण करता है। यह शक्ति या वीर्य उसके पास लौट आता है और वह उसको अपने अनुकूल बना लेता है ॥१५॥

स्तात्करोति ॥१६॥

अथ मारुतम् । विशो वै मरुतो भूमो वै विड्भूम्नैव तत्प्रजापतिः पुनरात्मानमाप्या-यत भूमैनमुपसमावर्तत भूमानमनुकमात्मनोऽकुरुत भूम्नोऽएवैप एतदाप्यायते भूमैनमुपस-मावर्तते भूमानमनुकमात्मनः कुरुते ॥१७॥

तद्यदैन्द्रमनु भवति । क्षत्रं वाऽइन्द्रो विशो विश्वे देवा विशो वै मरुतो विशैवैतत्क्षत्रं परिवृथ्ऽहति तदिदं क्षत्रमुभयतो विशा परिवृढम् ॥१८॥

अथैन्द्राग्नम् । तेजो वाऽअग्निरिन्द्रियं वीर्यमिन्द्र उभाभ्यामेव तद्वीर्याभ्यां प्रजापतिः पुनरात्मानमाप्यायतोभेऽएनं वीर्येऽउपसमावर्तेतामुभे वीर्येऽअनुकेऽआत्मनोऽकुरुतोभाभ्या-म्वेवैप एतद्वीर्याभ्यामाप्यायतऽउभेऽएनं वीर्येऽउपसमावर्तेतेऽउभे वीर्येऽअनुकेऽआत्मनः कुरुते ॥१९॥

अथ सावित्रम्ऽ । सविता वै देवानां प्रसविता तथो हारमाऽएते सवितृप्रसूता एव सर्वे कामाः समृध्यन्ते ॥२०॥

अथ वारुणमन्तत आलभते । तदेनम्ऽ सर्वस्माद्वरुणपाशात्सर्वस्माद्वरुण्यात्मु-ञ्चति ॥२१॥

प्रकार वह अन्न को सामने रखता है ॥१६॥

अब मरुत् के लिये । मरुत् वैश्य है । वैश्य का अर्थ है भूमः या बहुतायत । बहुतायत (भूमः) से ही प्रजापति ने तब अपने आप को पूर्ण किया । बहुतायत उसके पास लौट आई । बहुतायत को उसने अपने अनुकूल बना लिया । इसी प्रकार वह भी बहुतायत से अपने को पूर्ण करता है । बहुतायत उसके पास लौट आती है । बहुतायत को अपने अनुकूल बना लेता है ॥१७॥

यह इन्द्र के पीछे क्यों होता है ? इन्द्र क्षत्रिय है, विश्वेदेव वैश्य हैं । मरुत् वैश्य हैं । इस प्रकार वैश्यों से क्षत्रिय की रक्षा होती है । यह क्षत्रिय दोनों ओर से वैश्यों के द्वारा सुरक्षित है ॥१८॥

अब इन्द्राग्नी के लिये । अग्नि तेज है । इन्द्र वीर्य है । इन दोनों शक्तियों के द्वारा प्रजापति ने अपने को पूर्ण किया । दोनों शक्तियाँ उसके पास आईं । उन दोनों शक्तियों को उसने अपने अनुकूल बनाया । यह भी इन दोनों शक्तियों द्वारा अपने को पूर्ण करता है । यह दोनों शक्तियाँ उसके पास लौट आती हैं और वह इन दोनों को अपने अनुकूल कर लेता है ॥१९॥

अब सविता के लिये । सविता देवों का प्रेरक है । इस प्रकार सविता से प्रसवित होकर उसकी सब कामनायें पूर्ण हो जाती हैं ॥२०॥

अन्त में वह वरुण के लिये (पशु का) आलभन करता है । यह इसको वरुण के सब पाशों से और सब पापों से मुक्त कर देता है ॥२१॥

अध्याय ९—ब्राह्मण १

प्रजापतिर्वै प्रजाः ससृजानो रिरिचान इवामन्यत । तस्मात्पराच्यः प्रजा आसुर्नास्य प्रजाः श्रियेऽन्नाद्याय तस्थिरे ॥१॥

स ऐक्षतारिक्ष्यहम् । अस्माऽउ कामायासृक्षि न मे स कामः समर्धि पराच्यो मत्प्रजा अभूवन्न मे प्रजाः श्रियेऽन्नाद्यायास्थिषतेति ॥२॥

स ऐक्षत प्रजागतिः । कथं नु पुनरात्मानमाप्याययेयोप मा प्रजाः समावर्तेरंस्तिष्ठेरन्मे प्रजाः श्रियेऽन्नाद्यायेति ॥३॥

सोऽर्चन्छ्राम्यंश्चचार प्रजाकामः । स एतामेकादशिनीमपश्यत्स एकादशिन्येष्ट्वा प्रजापतिः पुनरात्मानमाप्याययतोपैनं प्रजाः समवर्त-तातिष्ठन्तास्य प्रजाः श्रियेऽन्नाद्याय स वसीयानेवेष्ट्वाभवत् ॥४॥

तस्मै कमेकादशिन्या यजेत । एवꣳ हैव प्रजया पशुभिराप्यायतऽउपैनं प्रजा-समावर्तन्ते तिष्ठन्तेऽस्य प्रजाः श्रियेऽन्नाद्याय स वसीयानेवेष्ट्वा भवत्येतस्मै कमेकादशिन्या यजते ॥५॥

प्रजापति प्रजा को उत्पन्न करके थक सा गया। प्रजा उसके पास से हट गई। उसकी श्री और भोजन के लिये वह उसके पास न ठहरी ॥१॥

उसने सोचा 'मैं थक गया और जिस कामना के लिये मैंने सृष्टि की रचना की वह भी पूरी न हुई। मेरी प्रजा मेरे पास से चली गई। मेरी श्री और भोजन के लिये मेरे पास ठहरी नहीं' ॥२॥

प्रजापति ने सोचा कि 'मैं फिर अपने को कैसे पुष्ट करूँ। कैसे मेरी प्रजा लौटे और मेरी श्री और भोजन के लिये ठहरे' ॥३॥

वह सन्तान की इच्छा से पूजा और श्रम करता रहा। उसने तब इस एकादशिनी (ग्यारह का समूह) को देखा। उस एकादशिनी की इष्टि करके उसने अपने को पुष्ट किया। प्रजा उसके पास लौट आई और उसकी श्री और भोजन के लिये उसके पास ठहरी। इस इष्टि से वह वस्तुतः अच्छा हो गया ॥४॥

इसलिये ग्यारह इष्टि करनी चाहिये। इस प्रकार प्रजा और पशुओं के द्वारा पुष्टि हो जाती है। प्रजा उसके पास लौट आती है। उसकी प्रजा श्री और भोजन के लिये ठहरती है। वह इष्टि करके अच्छा हो जाता है। इसलिये ग्यारह की इष्टि करनी चाहिये ॥५॥

स आग्नेयं प्रथमं पशुमालभते । अग्निर्वै देवतानां मुखं प्रजनयिता स प्रजापतिः स उऽएव यजमानस्तस्मादाग्नेयो भवति ॥६॥

अथ सारस्वतम् । वाग्वै सरस्वती वाचैव तत्प्रजापतिः पुनरात्मानमाप्याययत वागेनमुपसमावर्तत वाचमनुकामात्मनोऽकुरुत वाचोऽएवैष एतदाप्यायते वागेनमुपसमावर्तते वाचमनुकामात्मनः कुरुते ॥७॥

अथ सौम्यम् । अन्नं वै सोमोऽन्नेनैव तत्प्रजापतिः पुनरात्मानमाप्याययतान्नमेनमुपसमावर्ततान्नमनुकमात्मनोऽकुरुतान्नेनोऽ एवैष एतदाप्यायतेऽन्नमेनमुपसमावर्ततेऽन्नमनुकमात्मनः कुरुते ॥८॥

तदत्सारस्वतमनु भवति । वाग्वै सरस्वत्यन्नꣳ सोमस्तस्माद्यो वाचा प्रसाम्यन्नादो हैव भवति ॥९॥

अथ पौष्णम् । पशवो वै पूषा पशुभिरेव तत्प्रजापतिः पुनरात्मानमाप्याययत पशव एनमुपसमावर्तन्त पशूननुकानात्मनोऽकुरुत पशुभिर्वैवैष एतदाप्यायते पशव एनमुपसमावर्तन्ते पशूननुकानात्मनः कुरुते ॥१०॥

अथ बार्हस्पत्यम् । ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैतत्प्रजापतिः पुनरात्मानमाप्याययत

पहले वह अग्नि देवता सम्बन्धी पशु का आलभन करता है । अग्नि देवताओं का मुख और उत्पन्न करने वाला है । वह प्रजापति है । इस प्रकार यजमान अग्नि का हो जाता है ॥६॥

फिर सरस्वती के लिये । वाणी सरस्वती है । वाणी से ही प्रजापति ने फिर अपने को पुष्ट किया । वाणी फिर उसके पास वापिस आई । वाणी को उसने अपने अनुकूल किया । वाणी से यह भी अपने को पुष्ट करता है, वाणी उसके पास लौट आती है और वह वाणी को अपने अनुकूल बनाता है ॥७॥

फिर सोम के लिये । सोम अन्न है । अन्न से ही तब प्रजापति ने अपने को पुष्ट किया । अन्न उसके पास लौटकर आया । अन्न को ही उसने अपने अनुकूल बनाया । अन्न से यह भी अपने को पुष्ट करता है । अन्न उसके पास लौटकर आता है और अन्न को वह अपने अनुकूल बनाता है ॥८॥

सरस्वती के पीछे सोम क्यों आता है ? सरस्वती वाणी है, सोम अन्न है इसलिये जो वाणी के द्वारा अधूरा रहता अन्न का खाने वाला होता है ॥९॥

अब पूषा के लिये । पशु पूषा है । पशुओं से ही तब प्रजापति ने अपने को पुष्ट किया । पशु उसके पास लौट आये । पशुओं को उसने अपने अनुकूल बनाया । इसी प्रकार यह भी पशुओं के द्वारा अपने को पुष्ट करता है । पशु उसके पास लौट आते हैं और वह पशुओं को अपने अनुकूल बनाता है ॥१०॥

अब बृहस्पति के लिये । ब्रह्म बृहस्पति है । ब्रह्म के द्वारा ही प्रजापति ने अपने को

तस्माद्यदि यूपैकादशिनी स्यात् । आग्नेयमेवाग्निष्ठे नियुञ्ज्यादथेतरान्व्युपनयेयुर्यथा पूर्वम् ॥२२॥

यद्यु पश्वेकादशिनी स्यात् । आग्नेयमेव यूपऽआलभेरन्नथेतरान्यथापूर्वम् ॥२३॥

तान्यत्रोदीचो नयन्ति । आग्नेयमेव प्रथमं नयन्त्यथेतरान्यथापूर्वम् ॥२४॥

तान्यत्र निविध्यन्ति । आग्नेयमेव प्रथमं दक्षिणार्ध्यं निविध्यन्त्यथेतरानुदीचोऽतिनीय यथापूर्वम् ॥२५॥

तेषा यत्र वपाभिः प्रचरन्ति । आग्नेयस्यैव प्रथमस्य वपया प्रचरन्त्यथेतरेषां यथापूर्वम् ॥२६॥

तैर्यत्र प्रचरन्ति । आग्नेयेनैव प्रथमेन प्रचरन्त्यथेतरैर्यथापूर्वम् ॥२७॥ब्राह्मणम् ॥ २ [६. १.] ॥

इसलिये यदि ग्यारह यूप हों तो अग्नि वाले पशु को अग्नि के सामने वाले यूप से बाँधे । अन्य सब को इसी प्रकार क्रमशः ॥२२॥

यदि ग्यारह पशु हों तो अग्नि वाले पशु को यूप में आलभन करे । अन्यों को इसी प्रकार क्रमशः ॥२३॥

जब उनको उत्तर की ओर ले जाते हैं तो अग्नि वाले को पहले ले जाते हैं, फिर औरों को इसी क्रम से ॥२४॥

जब उनको पहले गिराते हैं, तो अग्नि वाले को पहले दक्षिण की ओर गिराते हैं । औरों को उत्तर की ओर ले जाते हुये उसी क्रम से ॥२५॥

जब उनकी वपा की आहुति देते हैं तो पहले अग्नि की, फिर औरों की उसी क्रम से ॥२६॥

जब उनसे अन्य आहुतियाँ देते हैं तो पहले अग्नि वाले से । फिर औरों से उसी क्रम से ॥२७॥

अध्याय ६—ब्राह्मण १

यत्र वै यज्ञस्य शिरोऽछिद्यत । तस्य रसो द्रत्वापः प्रविवेश तेनैतद्रसेनापः स्यन्दन्ते तमेवैतद्रसꣳ स्यन्दमानं मन्यन्ते ॥१॥

जब यज्ञ का शिर काट दिया गया तो उसका रस बहकर जलों में मिल गया । इसी रस के कारण ये जल बहते हैं । यह माना जाता है कि वही रस बहता है ॥१॥

स यद्वसतीवरीरछैति । तमेवैतद्रसमाहृत्य यज्ञे दधाति रसवन्तं यज्ञं करोति तस्माद्वसतीवरीरछैति ॥२॥

ता वै सर्वेषु सवनेषु विभजति । सर्वेष्वेवैतत्सवनेषु रसं दधाति सर्वाणि सवनानि रसवन्ति करोति तस्मात्सर्वेषु सवनेषु विभजति ॥३॥

ता वै स्यन्दमानाना गृह्णीयात् । ऐद्धि स यज्ञस्य रसस्तस्मात्स्यन्दमानानां गृह्णीयात् ॥४॥

गोपीथाय वाऽएता गृह्यन्ते । सर्वं वाऽइदमन्यदिलयति यदिदं किं चापि योऽयं पवतेऽथैता एव नेलयन्ति तस्मात्स्यन्दमानानां गृह्णीयात् ॥५॥

दिवा गृह्णीयात् । पश्यन्यज्ञस्य रसं गृह्णानीति तस्माद्दिवा गृह्णीयादेतस्मै वै गृह्णाति य एष तपति विश्वेभ्यो ह्येना देवेभ्यो गृह्णाति रश्मयो ह्यस्य विश्वे देवास्तस्माद्दिवा गृह्णीयादिवेव वाऽएष तस्माद्वेव दिवा गृह्णीयात् ॥६॥

एतद्ध वै विश्वे देवाः । यजमानस्य गृहानागच्छन्ति स यः पुरादित्यस्यास्तमयाद्वसतीवरीर्गृह्णाति यथा श्रेयस्यागमिष्यत्यावसथेनोपकल्पतेनोपासीतैवं तत्तऽएतद्धविः प्रविशन्ति तऽएतासु वसतीवरीषु वसन्ति स उपवसथः ॥७॥

जब यह वसतीवरी जल के पास जाता है तो इसी रस को लाकर यज्ञ में रखता है। और यज्ञ को रस युक्त करता है। इसीलिये वह वसतीवरी जल के पास जाता है ॥२॥

उनको वह सब सवनों में बाँट देता है। इससे वह सब सवनों में रस को धारण करता है। सब सवनों को रस युक्त करता है। इसलिये सब सवनों में उसे बाँटता है ॥३॥

उसको वह बहते हुये में से लेवे। चूँकि यज्ञ का रस बह रहा था, इसलिये उसे बहते हुये जलों में से लेना चाहिये ॥४॥

इनको रक्षा के लिये लेते हैं। इस संसार में जो कुछ है वह सब आराम लेते हैं, यहाँ तक कि यह वायु भी जो चलता है। परन्तु जल आराम नहीं लेते इसलिये इन बहते हुये जलों में से ही लेवे ॥५॥

इन (जलों) को दिन में लेना चाहिये यह सोचकर कि यज्ञ के रस को देखकर ग्रहण करूँ। इसलिये इनको दिन में लेना चाहिये। यह जो तपता है (अर्थात् सूर्य) उसी के लिये इनका ग्रहण करता है क्योंकि विश्वे देवों के लिये ग्रहण करता है। उसकी किरणें ही विश्वे-देव हैं। इसलिये दिन में ग्रहण करना चाहिये। वह (सूर्य) केवल दिन में ही (उदय होता है) इसलिये दिन में ही ग्रहण करना चाहिये ॥६॥

विश्वे-देव यजमान के घर आते हैं। यदि वसतीवरी जलों को सूर्यास्त से पहले ग्रहण करता है तो यह सर्वथा ऐसा ही है कि जैसे कोई बड़ा (मान्य) आवे तो वह उसे अपने घर को शुद्ध करके स्वागत करे। ऐसा ही यह है। यह देव हवि के पास आते हैं और उन वसतीवरी जलों में प्रविष्ट हो जाते हैं। यही उपवसथ कहलाता है ॥७॥

स यस्या गृहीता अभ्यस्तमियात् । तत्र प्रायश्चित्तिः क्रियते यदि पुरेजानः स्यान्निनाद्यादृहीयादिति हि तस्य ताः पुरा गृहीता भवन्ति यद्युऽअनीजानः स्याद्य एनमीजान उपावसितो वा पर्यवसितो वा स्यात्तस्य निनाद्यादृहीयादिति हि तस्य ताः पुरा गृहीता भवन्ति ॥८॥

यद्यऽएतदुभयं न विन्देत् । उल्कुपीमेवादायोपपरेयात्तामुपर्युपरि धारयन् गृह्णीयादिरण्यं वोपर्युपरि धारयन् गृह्णीयात्तदेतस्य रूपं क्रियते य एष तपति ॥९॥

अथातो गृह्णात्येव । हविष्मतीरिमा आप इति यज्ञस्य ह्यासु रसः प्राविशत्तस्मादाह हविष्मतीरिमा आप इति हविष्मां२॥ ऽआविवासतीति हविष्मान्ह्येना यजमान आविवासति तस्मादाह हविष्मां२॥ ऽआविवासतीति ॥१०॥

हविष्मान्देवो ऽअध्वर इति । अध्वरो वै यज्ञस्तद्यस्मै यज्ञाय गृह्णाति तꣳ हविष्मन्तं करोति तस्मादाह हविष्मान्देवो ऽअध्वर इति ॥११॥

हविष्मां२॥ ऽअस्तु सूर्य इति । एतस्मै वै गृह्णाति य एष तपति विश्वेभ्यो ह्येना

यदि कोई इन जलों को लेने में सूर्यास्त कर दे तो प्रायश्चित्त किया जाता है । यदि उस पुरुष ने पहले (सोम) यज्ञ किया हो तो उसी के घड़े (निनाद्य) से ले लेना चाहिये । क्योंकि उसके जल सूर्यास्त से पहले ही के लिये होते हैं । यदि उसने पहले सोम-यज्ञ न किया हो तो यदि उसके पास या पड़ोस में कोई और पुरुष हो जिसने यज्ञ किया हो तो उसी के घड़े से लेवे क्योंकि उसके जल भी सूर्यास्त से पहले ही ग्रहण किये हुये होते हैं ॥८॥

अगर यह दोनों न मिलें तो एक जलती लकड़ी लेकर उन जलों के ऊपर दिखाकर ग्रहण करे । वह स्वर्ण को ऊपर दिखाकर ग्रहण करे । इससे उसी का रूप हो जाता है जो ऊपर तपता है । (अर्थात् जलती लकड़ी या सोने का टुकड़ा सूर्य के बराबर हो जाता है) ॥९॥

इन जलों को इस मंत्र से लेता है—'हविष्मतीरिमा आपः' (यजु० ६।२३) । 'यह जल हवि-युक्त हैं' । यज्ञ का रस इनमें मिला है । इसलिये कहा 'हविष्मती' । 'हविष्मां २ऽआविवासति' (यजु० ६।२३) । 'हवि युक्त पुरुष इनको काम में लावे' । हवि-युक्त यजमान इनको काम में लाता है । इसलिये कहा 'हविष्मान् आविवासति' ॥१०॥

'हविष्मान्देवोऽअध्वरः' (यजु० ६।२३) । 'देव अध्वर हवि युक्त है' । अध्वर कहते हैं यज्ञ को । इस प्रकार जिस यज्ञ के लिये वह इन जलों को लेता है उसको वह हवि-र्युक्त कर देता है । इसलिये कहा कि 'हविष्मान्देवोऽअध्वरः' ॥११॥

'हविष्माऽअस्तु सूर्यः' (यजु० ६।२३) । 'सूर्य हवि-युक्त हो' । यह जो सूर्य तपता है उसी के लिये इनको ग्रहण करता है । यह विश्वे-देवों के लिये ग्रहण करता है । विश्वे-देव

देवेभ्यो गृह्णाति रश्मयो ह्यस्य विश्वे देवास्तस्मादाह हविष्मां२॥ ऽअस्तु सूर्य इति ॥१२॥

ता आहृत्य जघनेन गार्हपत्यꣳ सादयति । अग्नेर्वोऽपवृतस्य सदसि सादयामीत्येवैतदाहाथ यदाग्नीषोमीयः पशुः सतिष्ठतेऽथ परिहरति च्युत्क्रामतेत्याहाग्रेण हविर्धाने यजमान आस्ते ता आदत्ते ॥१३॥

स दक्षिणेन निष्क्रामति । ता दक्षिणायाꣳ श्रोणौ सादयतीन्द्राग्न्योर्भागधेयी स्थेति विश्वेभ्यो ह्येना देवेभ्यो गृह्णातीन्द्राग्नी हि विश्वे देवास्ताः पुनराहृत्याग्रेण पत्नीꣳ सादयति स जघनेन पत्नीं पर्येत्य ता आदत्ते ॥१४॥

स उत्तरेण निष्क्रामति । ता उत्तरायाꣳ श्रोणौ सादयति मित्रावरुणयोर्भागधेयी स्थेत्येव ब्रूयात्तस्येति नैरर्थꣳ सादयेदतिरिक्तमेतन्नैवꣳ सम्पत्सम्पद्यतऽइन्द्राग्न्योर्भागधेयी स्थेत्येव ब्रूयात्तदेवानतिरिक्तं तथा सम्पत्सम्पद्यते ॥१५॥

गुप्त्यै वाऽएताः परिह्रियन्ते । अग्निः पुरस्तादधेताः समन्तं पल्यड्नयन्ते नाप्ट्रा रक्षाꣳस्यपनुत्यस्ता आग्नीध्रे सादयति विश्वेषां देवानां भागधेयी स्थेति तदासु विश्वान्देवान्त्सवेशयत्येते वै वसतां वरं तस्माद्वसतीवर्यो नाम वसताꣳ ह वै वरं भवति य

दस किरणें हैं । इसलिये कहा कि 'सूर्य हवि-युक्त हो' ॥१२॥

इनको लाकर वह गार्हपत्य के पीछे देता है—'अग्नेर्वोऽपवृतस्य सदसि सादयामि' (यजु० ६।२४) । 'अर्थात् सुरक्षित गृह-वाले अग्नि के घर में तुमको रखता हूँ' । जब अग्नि-सोम वाला पशु निकट आवे तो वह (वसतीवरी जलों को) उसके पास ले जाता है । और कहता है 'उत्क्राम (चले जाओ)' । यजमान हविर्धान के सामने बैठता है और (अध्वर्यु जलों को) वहीं लेकर खड़ा होता है ॥१३॥

वह दक्षिण द्वार से निकलता है और दक्षिणी श्रोणि में रख देता है । 'इन्द्राग्न्योर्भागधेयी स्थ' (यजु० ६।२३) । 'तुम इन्द्र अग्नि के भाग हो' । क्योंकि यह विश्वे-देवों के लिये ग्रहण करता है । इन्द्र-अग्नि विश्वे-देव है । वह इन जलों को लेकर पत्नी के आगे रख देता है । और पत्नी के पीछे से घूमकर उनको उठा लेता है ॥१४॥

वह उत्तर द्वार से निकलता है । उन जलों को उत्तरी श्रोणि में रख देता है । 'मित्रावरुणयोर्भागधेयी स्थ' (यजु० ६।२४) । 'तुम मित्र-वरुण के भाग हो । उसी प्रकार न रक्खे । यह व्यर्थ है । इससे काम भी सिद्ध नहीं होता । ऐसा कहे कि तू इन्द्र-अग्नि के भाग धेय हो । इसमें कोई अनर्थकता नहीं है और काम भी सिद्ध हो जाता है ॥१५॥

इन जलों को रक्षा के लिये लाते हैं । अग्नि आगे है । और जल चारों-ओर घूम कर दुष्ट राक्षसों को हटाते हैं । इनको वह आग्नीध्र (के स्थान) में रख देता है । 'विश्वेषां देवाना भागधेयी स्थ' (यजु० ६।२४) । 'तुम विश्वे-देवों के भाग हो' । इस प्रकार वह विश्वे देवों को इनमें प्रवेश कराता है । यह 'वसतां' अर्थात् रहने वालों के लिये 'वरं' शुभ होते हैं । इसलिये इनका नाम 'वसतीवरी' है । जो इस रहस्य को समझता है वह

एवमेतद्वेद ॥१६॥

तानि वाऽएतानि सप्त यजूंष्यृषि भवन्ति। चतुर्भिर्गृह्त्येकेन जघनेन गार्हपत्यꣳ सादयत्येकेन परिहरत्येकेनाग्नीध्रे तानि सप्त यत्र वै वाचः प्रजातानि छन्दाꣳसि सप्तपदा वै तेषां परार्ध्या शक्वर्येतामभिसम्पदं तस्मात्सप्त यजूंष्यृषि भवन्ति ॥१७॥ ब्राह्मणम् ॥ ३ [६. २.] ॥

निवासियों के लिये श्रेष्ठ हो जाता है ॥१६॥

यह सात यजुः हैं। चार यजुओं से ग्रहण करता है। एक से गार्हपत्य के पीछे ले जाता है। एक से चारों ओर फिराता है। एक से आग्नीध्र के स्थान में रखता है। यह सात हुये। जब वाणी से सात छन्द उत्पन्न हुये तो उनमें से अन्तिम शक्वरी था। इससे सम्पूर्ति हुई। इसलिये सात यजुः होते हैं ॥१७॥

अध्याय ६—ब्राह्मण ३

तान्त्सम्प्रबोधयन्ति। तेऽप उपस्पृश्याग्नीध्रमुपसमायन्ति तऽआज्यानि गृह्णते गृहीत्वाज्यान्यायन्त्यासाद्याज्यानि ॥१॥

अथ राजानमुपावहरति। इयं वै प्रतिष्ठा जनूरासां प्रजानामिमामेवैतत्प्रतिष्ठामभ्युपावहरति तमस्यै तनु ते तमस्यै जनयति ॥२॥

अन्तरेणेपेऽउपावहरति। यज्ञो वाऽअनस्तन्त्वेव यज्ञान्न बहिर्धा करोति प्रावसु संमृखेष्वधिनिदधाति क्षत्रं वै सोमो विशो प्रावाणः क्षत्रमवैतद्विश्यध्यूहति तद्यत्समृद्ध्या

उन (ऋत्विजों) को जगाते हैं। वे जलों को छूकर आग्नीध्र में जाते हैं और आज्यों को ग्रहण करते हैं। आज्यों को लेकर वह (वेदि पर) जाते हैं। आज्यों को रखकर—॥१॥

सोम राजा को उतारता है। यह पृथ्वी इन प्रजाओं की प्रतिष्ठा और जन्म स्थान है। यह राजा (सोम) को इसी प्रतिष्ठा में उतारता है। उसी पर फैलाता है। उसी में उत्पन्न करता है ॥२॥

वह गाड़ी के जुओं के बीच में उसको उतारता है। गाड़ी यज्ञ (का साधन) है। इस प्रकार वह उसको यज्ञ से बाहर नहीं करता। वह उस (सोम) को उन पत्थरों पर रखता है जो एक दूसरे के सम्मुख होते हैं। सोम क्षत्रिय है, पत्थर वैश्य है। इस प्रकार वह क्षत्रिय को वैश्य के ऊपर रखता है। पत्थर एक दूसरे के सम्मुख क्यों होते हैं? इसलिये कि वह वैश्यों को एक-मुख होकर क्षत्रियों के सामने विषाद-रहित करता है। इसलिये

भवन्ति विशमेवैतत्संमुखां क्षत्रियमभ्यविवादिनीं करोति तस्मात्संमुखा भवन्ति ॥३॥

स उपावहरति । हृदे त्वा मनसे त्वेति यजमानस्यैतत्कामायाह हृदयेन हि मनसा यजमानस्त काम कामयते यत्काम्या यजते तस्मादाह हृदे त्वा मनसे त्वेति ॥४॥

दिवे त्वा सूर्याय त्वेति । देवलोकाय त्वेत्येवैतदाह यदाह दिवे त्वेति सूर्याय त्वेति देवेभ्यस्त्वेत्येवैतदाहोर्ध्वमिममध्वरं दिवि देवेषु होत्रा यच्छेत्यध्वरो वै यज्ञ ऊर्ध्वमेम यज्ञं दिवि देवेषु धेहीत्येवैतदाह ॥५॥

सोम राजन्विश्वास्त्वं प्रजा उपावरोहेति । तदेनमासां प्रजानामाधिपत्याय राज्यायोपावहरति ॥६॥

अथानुसृज्योपतिष्ठते । विश्वास्त्वा प्रजा उपावरोहन्त्वित्य यथायथमिव वाऽएतत्करोति यदाह विश्वास्त्व प्रजा उपावराहेति क्षत्रं वै सामस्तत्सापवस्यसं करोति तद्वेदमनु पावस्यसं क्रियतेऽथात्र यथायथं करोति यथापूर्वं यदाह विश्वास्त्वा प्रजा उपावरोहन्त्विति तदेनमाभिः प्रजाभिः प्रत्यवरोहयति तस्मादु क्षत्रियमायन्तमिमाः प्रजा विशः प्रत्यवरोहन्ति तमधस्तादुपासतऽउपसन्नो होता प्रातरनुवाकमनुवक्ष्यन्भवति ॥७॥

पत्थर एक दूसरे के सम्मुख होते हैं ॥३॥

वह (सोम को) इस मन्त्र से उतारता है—'हृदे त्वा मनसे त्वा' (यजु० ६।२५)। 'हृदय के लिये तुझको, मन के लिये तुझको'। अर्थात् यजमान की कामना के लिये। यजमान हृदय और मन से कामना करता है। कामना करके ही यज्ञ करता है इसलिये कि 'हृदय के लिये तुझको, मन के लिये तुझको' ॥४॥

'दिवे त्वा सूर्याय त्वा' (यजु० ६।२५)। 'अर्थात् तुझको देवलोक के लिये, तुझको सूर्यलोक के लिये। जब वह कहता 'दिवे त्वा सूर्याय त्वा' तो आशय होता है 'देवों के लिये'। 'ऊर्ध्वमिममध्वर दिवि देवेषु होत्रा यच्छ' (यजु० ६।२५)। 'अध्वर' कहते हैं यज्ञ को। इसका तात्पर्य यह है कि 'तू इस यज्ञ को और हवन को द्यौलोक में ऊपर देवों के लिये ले जा' ॥५॥

'सोम राजन् विश्वास्त्व प्रजाऽउपावरोह' (यजु० ६।२५)। 'हे सोम राजा, तू इस सब प्रजा पर उतर'। वह इस राजा को प्रजाओं के आधिपत्य और राज्य के लिये नीचे उतारता है ॥६॥

उसको रखकर उसके पास बैठ जाता है—'विश्वास्त्वा प्रजाऽउपावरोहन्तु' (यजु० ६।२५)। 'सब प्रजायें तुझ तक उतरें'। यह जो उसने कहा कि 'तू सब प्रजा तक उतर' यह अनुचित था क्योंकि सोम क्षत्रिय है। इस प्रकार बुरे-भले मिल गये। इसीलिये तो आज भी बुरे-भले मिल जाते हैं। यह जो कहा कि 'प्रजायें तुझ तक उतरें' यह ठीक है क्योंकि वैश्य लोग क्षत्रिय के सामने आकर झुकते हैं, अर्थात् सिर झुकाते हैं। पास बैठकर होता प्रातःकालीन अनुवाक पढ़ना आरम्भ करता है ॥७॥

अथ समिधमभ्यादधदाह । देवेभ्यः प्रातर्यावभ्योऽनुब्रूहीति छन्दाꣳसि वै देवाः प्रातर्यावाणश्छन्दाꣳस्यनुयाजा देवेभ्यः प्रेष्य देवान्यजेति वाऽअनुयाजैश्चरन्ति ॥८॥

तदु हैकऽआहुः । देवेभ्योऽनुब्रूहीति तदु तथा न ब्रूयाच्छन्दाꣳसि वै देवाः प्रातर्यावाणश्छन्दाꣳस्यनुयाजा देवेभ्यः प्रेष्य देवान्यजेति वाऽअनुयाजैश्चरन्ति तस्मादु ब्रूयाद्देवेभ्यः प्रातर्यावभ्याऽनुब्रूहीत्येव ॥९॥

अथ यत्समिधमभ्यादधाति । छन्दाꣳस्येवैतत्समिन्धेऽथ यद्धोता प्रातरनुवाकमन्वाह छन्दाꣳस्येवैतत्पुनराप्याययत्ययातयामानि करोति यातयामानि वै देवैश्छन्दाꣳस छन्दोभिर्हि देवाः स्वर्गं लोकꣳ समाश्नुवत न वाऽअत्र स्तुवते न शꣳसन्ति तच्छन्दाꣳस्येवैतत्पुनराप्याययत्ययातयामानि करोति तैरयातयामैर्यज्ञ तन्वते तस्माद्धोता प्रातरनुवाकमन्वाह ॥१०॥

तदाहुः । कः प्रातरनुवाकस्य प्रतिगर इति जाग्रद्वैवाध्वर्युरुपासीत स यन्निमिषति स हैनास्य प्रतिगरस्तदु तथा न कुर्याद्यदि निद्रायादपि कामꣳ स्वप्यात्स यत्र होता प्रातरनुवाकं परिदधाति तत्प्रचरणीति स्रुग्वात तस्या चतुर्गृहीतमाज्यं गृहीत्वा जुहोति ॥११॥

अब समिधा को चढ़ाकर वह कहता है, 'प्रातःकाल आने वाले देवों के लिये अनुवाक कह' । प्रातः आने वाले देव छन्द हैं, जैसे कि अनुयाज भी छन्द हैं । अनुयाज यह कहकर किये जाते हैं—'देवों के लिये भेजो, देवों के लिये यजन करो' ॥८॥

कुछ लोग कहते हैं 'देवों के लिये अनुवाक कहो' । ऐसा न कहना चाहिये । प्रातः आने वाले देव छन्द हैं । और अनुयाज किये जाते हैं यह कहकर कि देवों के लिये भेजो, देवों के लिये यजन करो' । इसलिये कहना चाहिये कि 'प्रातःकाल आने वाले देवों के लिये अनुवाक कह' ॥९॥

जब यह समिधा रखता है तो इससे छन्दों को उत्तेजित करता है । और जब होता प्रातः अनुवाक को कहता है उससे भी वह छन्दों को ही पुष्ट और पूर्ण करता है । देव छन्दों के द्वारा ही स्वर्ग लोक को गये । इसलिये छन्द अपूर्ण हो गये । क्योंकि अब न तो स्तुति होती है न प्रशंसा । इसलिये अब वह छन्दों को पूर्ण करता है । और इन्हीं पूर्ण छन्दों से यज्ञ को करता है और होता अनुवाक पढ़ता है ॥१०॥

इस पर कुछ लोगों का कहना है कि 'प्रातरनुवाक का प्रतिगर या फल क्या है' । अध्वर्यु को जागते हुये उपासना करनी चाहिये और जब वह निमेष ले वही उसका प्रतिगर है । परन्तु ऐसा न करना चाहिये । यदि नींद आ जाय तो सो जाय । जब होता प्रातः अनुवाक को समाप्त करता है तब प्रचरणी आहुति दी जाती है । स्रुक में चार बार आज्य लेकर आहुति देता है ॥११॥

यत्र वै यज्ञस्य शिरोऽच्छिद्यत । तस्य रसो द्रुत्वापः प्रविवेश तमदः पूर्वेद्युर्वसतीवरी-गिराहरत्यथ योऽत्र यज्ञस्य रसः परिशिष्टस्तमेवैतदच्छैति ॥१२॥

यद्धैवैतामाहुतिं जुहोति । एतमेवैतद्यज्ञस्य रसमभिप्रस्तृणीते तमारुन्धे याभ्य उ चैवैतां देवताभ्य आहुतिं जुहोति ता एवैतत्प्रीणाति ता अस्मै तृप्ताः प्रीता एतं यज्ञस्य रसꣳ संनमन्ति ॥१३॥ शतम् २२०० ॥ ॥

स जुहोति । शृणोत्वग्निः समिधा हवं मऽइति शृणोतु मऽइदमग्निरनु मे जाना-त्वित्येवैतदाह शृण्वन्त्वापो धिषणाश्च देवीरिति शृण्वन्तु मऽइदमापोऽनु मे जानन्त्वित्ये-वैतदाह श्रोता ग्रावाणो विदुषो न यज्ञमिति शृण्वन्तु मऽइदं ग्रावाणोऽनु मे जानन्त्वित्ये-वैतदाह श्रोता ग्रावाणो विदुषो न यज्ञमिति शृण्वन्तु मऽइद ग्रावाणोऽनु मे जानन्त्वित्ये-वैतदाह विदुषा न यज्ञमिति विद्वाꣳसा हि ग्रावाणः शृणोतु देवः सविता हव मे स्वाहेति शृणातु मऽइदं देवः सवितानु मे जानात्वित्येवैतदाह सविता वै देवानां प्रसविता तत्सवितृ-प्रसूत एवैतद्यतस्य रसमिच्छैति ॥१४॥

अथापरं चतुर्गृहीतमाज्यं गृहीत्वा । उदङ् प्रयन्नाहाप इष्य होतरित्यप इच्छ होतरि-त्येवैतदाह तद्यदतो होतान्वाहैतमेवैतद्यज्ञस्य रसमभिप्रस्तृणीते तमारुन्धऽएतानु चैवैतदनु-

जब यज्ञ का सिर काटा गया तो रस जलों में मिल गया । उसको गत दिवस वसती-वरी जलों के द्वारा लाये थे । अब जो कुछ रस बच गया उसको इसके द्वारा लाते हैं ॥१२॥

जब वह उस आहुति को देता है तो इसको यज्ञ के रस के लिये देता है । उस रस को अपनी ओर खींचता है । जिन देवताओं के लिये आहुति देता है उन्हीं को प्रसन्न करता है । इस प्रकार तुष्ट होकर यह देवते यज्ञ के रस को इसके लिये दिलाते हैं ॥१३॥

वह इस मंत्र से आहुति देता है—'शृणोत्वग्निः समिधा हवं मे' (यजु० ६।२५) । 'इसका अर्थ है कि 'अग्नि समिधा द्वारा मेरी स्तुति सुने या स्वीकार करे' । 'शृण्वन्त्वापो धिषणाश्च देवीः । अर्थात् 'दिव्य गुण युक्त जल और धिष्ण हमारी स्तुति सुनें' । श्रोता ग्रावाणो विदुषो न यज्ञम्' (यजु० ६।२६) । 'अर्थात् 'यज्ञ को जानने वाले ग्रावा (पत्थर के तुल्य दृढ़ गुरुजन) इस मेरी स्तुति को सुनें या स्वीकार करें' । 'विदुषः' इसलिये कहा कि यह ग्रावा विद्वान् है । 'शृणोतु देवः सविता हवं मे स्वाहा' (यजु० ६।२५) । अर्थात् 'सविता देव मेरी इस स्तुति को स्वीकार करे' । सविता देवों का प्रेरक है । सविता की ही प्रेरणा से वह यज्ञ के रस की इच्छा करता है ॥१४॥

फिर चार चमसों में घी को लेकर उत्तर की ओर जाकर कहता है 'हे होता, जलों को बुलाओ' । या जलों की इच्छा करो । होता ऐसा क्यों कहता है । इसका कारण यह है कि इसी आहुति के द्वारा अध्वर्यु घी को यज्ञ के रस में डालता है और अपनी ओर खींचता है । और होता (एकधन) ग्रहों के पास खड़ा रहता है कि दुष्ट राक्षस उसको सता

तिष्ठते नेदेनानन्तरा नाप्ट्रा रक्षाꣳसि हिनसन्निति ॥१५॥

अथ सम्प्रेष्यति । मैत्रावरुणस्य चमसाध्वर्यवेहि नेष्टः पत्नीरुदानयैकधनिन एताग्नी-ध्चात्वाले वसतीवरीभिः प्रत्युपतिष्ठासै होतृचमसेन चेति सम्प्रेष एवैषः ॥१६॥

तऽउदञ्चो निष्क्रामन्ति । जघनेन चात्वालमग्नेराग्नीध्रꣳ स यस्यां ततो दिश्यापो भवन्ति तद्यन्ति ते वै सह पत्नीभिर्यन्ति तद्यत्सह पत्नीभिर्यन्ति ॥१७॥

यत्र वै यज्ञस्य शिरोऽछिद्यत । तस्य रसो द्रत्वापः प्रविवेश तमेते गन्धर्वाः सोम-रक्षा जुगुपुः ॥१८॥

ते ह देवा ऊचुः । इयमु न्वेवेह नाप्ट्रा यदिमे गन्धर्वाः कथं न्वममयेऽनाप्टे यज्ञस्य रसमाहरेमेति ॥१९॥

ते होचुः । योषित्कामा वै गन्धर्वाः सह पत्नीभिरयाम ते पत्नीष्वेव गन्धर्वा गर्धि-ष्यन्त्यथैतममयेऽनाप्टे यज्ञस्य रसमाहरिष्याम इति ॥२०॥

ते सह पत्नीभिरीयुः । ते पत्नीष्वेव गन्धर्वा जगृधुरथैतममयेऽनाप्टे यज्ञस्य रसमाजहृः ॥२१॥

तथोऽएवैष एतत् । सहैव पत्नीभिरेति ते पत्नीष्वेव गन्धर्वा गृध्यन्त्यथैतममयेऽनाप्टे न सकें ॥१५॥

अब अध्वर्यु आदेश देता है, 'हे मित्रावरुण के चमसा रखने वाले, आओ। नेष्टा, पत्नियों को लाओ। एकधन वाले आओ। आग्नीध्र वसतीवरी और होता के चमसों के साथ चत्वाल पर खड़े हो'। यह मिश्रित संदेश है ॥१६॥

वे चत्वाल के पीछे और आग्नीध्र के आगे उत्तर की ओर बढ़ते हैं। अब जिधर को जल होते हैं उधर को चलते हैं। वे यहाँ पत्नियों सहित जाते हैं। पत्नियों के साथ यहाँ क्यों जाते हैं इसका कारण यह है ॥१७॥

जब यज्ञ का सिर काटा गया तो उसका रस बहकर जलों में मिल गया। उसकी गन्धर्व सोम रक्षकों ने रक्षा की ॥१८॥

तब देवता बोले—'यह गन्धर्व जो हैं ये हमारे लिये भयङ्कर हैं। हम इस यज्ञ के रस को कहाँ ले जावें कि भय से मुक्त हो जायँ' ॥१९॥

उन्होंने कहा, 'यह गन्धर्व स्त्रियों के अभिलाषी हैं। पत्नियों के साथ चलना चाहिये। गन्धर्व अवश्य ही स्त्रियों के पीछे फिरेंगे और हम यज्ञ के रस को ऐसे स्थान में ले जायेंगे जो भय से मुक्त हो' ॥२०॥

वे पत्नियों के साथ चले। गन्धर्व उनकी स्त्रियों के पीछे चले। और वे यज्ञ के रस को ऐसे स्थान में ले गये जहाँ भय न था ॥२१॥

उसी प्रकार यह अध्वर्यु भी पत्नियों के साथ आता है। गन्धर्व स्त्रियों के पीछे

यज्ञस्य रसमाहरति ॥२२॥

सोऽपोऽभिजुहोति । एताश्ं ह वाऽआहुतिश्ं हुतामेष यज्ञस्य रस उपसमेति तां प्रत्युत्तिष्ठति तमेवैतदाविष्कृत्य गृह्णाति ॥२३॥

यद्वैवैतामाहुतिं जुहोति । एतमेवैतद्यज्ञस्य रसमभिप्रस्तृणीते तमारुन्धे तमपो याचति याभ्य उ चैवैतां देवताभ्य आहुतिं जुहोति ता एवैतत्प्रीणाति ता अस्मै तृप्ताः प्रीता एतं यज्ञस्य रसश्ं संनमन्ति ॥२४॥

स जुहोति । देवीरापोऽअपां न पादिति देव्यो ह्यापस्तस्मादाह देवीरापोऽअपां न पादिति यो व ऊर्मिर्हविष्य इति यो व ऊर्मिर्यज्ञिय इत्येवैतदाहेन्द्रियावान्मदिन्तम इति वीर्यवानित्येवैतदाह यदाहेन्द्रियावानिति मदिन्तम इति स्वादिष्ठ इत्येवैतदाह तं देवेभ्यो देवत्रा दत्तेत्येतदेना अयाचिष्ट यदाह तं देवेभ्यो देवत्रा दत्तेति शुक्रपेभ्य इति सत्यं वै शुक्रश्ं सत्यस्येत्येवैतदाह येषां भाग स्थ स्वाहेति तेषा मु ह्येष भागः ॥२५॥

अथ मैत्रावरुणचमसेनैतामाहुतिमपप्लावयति । कार्पिरसीति यथा वाऽअङ्गारोऽग्निना प्लातः स्यादेवमेषाहुतिरेतया देवतया प्लाता भवति राजानं वाऽएताभिरद्भिरुपसमयन्ति भवति या एता मैत्रावरुणचमसे वज्रो वाऽआज्यश्ं रेतः सोमो नेद्वज्रेणाज्येन रेतः

दौड़ते हैं और वह यज्ञ के रस को सुरक्षित स्थान में ले जाता है ॥२२॥

वह जलों पर आहुति देता है । जब यह आहुति दी जाती है तो यज्ञ का रस उसको खींच लेता है । वह उस तक उठता है और उसको पाकर पकड़ लेता है ॥२३॥

वह इस आहुति को क्यों देता है ? वह यज्ञ के रस पर घी की आहुति देता है । और अपनी ओर उसको खींचता है । उसकी जलों से याचना करता है । जिन देवताओं के लिये वह आहुति देता है उन्हीं को वह प्रसन्न करता है । इस प्रकार तृप्त होकर वह यज्ञ के रस को प्राप्त करते हैं ॥२४॥

वह इस मंत्र से आहुति देता है—'देवीरापोऽअपां न पात्' (यजु० ६।२७) । 'हे दिव्य जलो, जलों की सन्तान' । जल दिव्य है अतः कहा 'देवीरापोऽअपां न पात्' । 'यो व ऽऊर्मिर्हविष्यः' (यजु० ६।२७) । अर्थात् 'आपकी तरंग हवि या यज्ञ के लिये उपयुक्त है' । 'इन्द्रियावान् मदिन्तमः' (यजु० ६।२७) । 'अर्थात् 'बलवान्, और स्वादिष्ट' । 'तं देवेभ्यो देवत्रा दत्त' (यजु० ६।२७) । 'उसको देवों के देव को दो' । अर्थात् वह उसको उनसे माँगता है । 'शुक्रपेभ्यः' (यजु० ६।२७) । 'शुक्र नाम है सत्य का' । अर्थात् सत्य के पालन करने वाले के लिये । 'येषां भाग स्थ स्वाहा' (यजु० ६।२७) । 'जिनके तुम भाग हो' । क्योंकि वस्तुतः यह उनका ही भाग है ॥२५॥

अब मैत्रावरुण चमस् के द्वारा उस आहुति को तैराता है । 'कार्पिरसि' (यजु० ६।२८) । 'तू कार्पि अर्थात् वृषि-सम्बन्धी है' । जैसे आग के कोयले को खा जाती है, वैसे ही इस आहुति को देवता खा जाता है । चूँकि सोम राजा का उस जल से अभिषेक

सोमꣳ हिनसानीति तस्माद्वाऽअपप्लावयति ॥२६॥

अथ गृह्णाति समुद्रस्य त्वाक्षित्याऽउन्नयामीत्यापो वै समुद्रोऽप्स्वेवैतदक्षितिं दधाति तस्मादाप एतावति भोगे सुज्यमाने न क्षीयन्ते तदन्वेकधनानुन्नयन्ति तदनु पान्नेजनान् ॥२७॥

तद्यन्मैत्रावरुणचमसेन गृह्णाति । यत्र वै देवेभ्यो यज्ञोऽपक्रामत्तमेतद्देवाः प्रैषैरेव प्रैषमैच्छन्पुरोरुग्भिः प्रारोचयन्निविद्भिर्न्यवेदयस्तस्मान्मैत्रावरुणचमसेन गृह्णाति ॥२८॥

तऽआयन्ति । प्रत्युपतिष्ठतेऽग्नीध्चात्वाले वसतीवरीभिश्च होतृचमसेन च स उपर्युपरि चात्वालꣳ सꣳस्पर्शयति वसतीवरीश्च मैत्रावरुणचमसं च समापोऽअद्भिरगमत समोषधीभिरोषधीरिति यश्चासौ पूर्वेद्युराहृतो यज्ञस्य रसो यश्चाद्याहृतस्तमेवैतदुभयꣳ सꣳसृजति ॥२९॥

तद्धैके । ऐवमैत्रावरुणचमसे वसतीवरीर्नयन्त्या मैत्रवरुणचमसाद्वसतीवरीषु यश्चासौ पूर्वेद्युराहृतो यज्ञस्य रसो यश्चाद्याहृतस्तमेवैतदुभयꣳ सꣳसृजाम इति वदन्तस्तदु तथा न कुर्याद्यद्वाऽआधवनीये समवनयति तदेवैष उभयो यज्ञस्य रसः सꣳसृज्यतेऽथ होतृच-

होना है जो मैत्रावरुण ग्रह में है और घी वज्र है तथा सोम वीर्य है, ऐसा न हो कि वज्र रूपी घृत से सोम रूपी वीर्य नष्ट हो जाय इसलिये उसको उस पर तैराता है ॥२६॥

अब वह इस मन्त्र से ग्रहण करता है—'समुद्रस्य त्वा क्षित्याऽउन्नयामि' । तुझको समुद्र के अक्षय होने के लिये उठाता हूँ' । जल समुद्र है । जलों में ही वह अक्षयपन को रखता है । इसीलिये जल इतना खाना खाये जाने पर भी क्षीण नहीं होते । इसके पीछे वे एकधन ग्रहों को लेते हैं । इसके पीछे पैर धोने के जल को ॥२७॥

मैत्रावरुण चमसे से वह क्यों लेता है ? इसलिये कि जब यज्ञ देवों से भाग गया तब उसको देवों ने 'प्रैष' (यज्ञ सम्बन्धी निमन्त्रणों) द्वारा बुलाया । 'पुरोरुक' मन्त्रों से उसको प्रसन्न किया । निविद् मन्त्रों से निवेदन किया । इसलिये मैत्रावरुण चमस् से ग्रहण करता है ॥२८॥

अब वे लौट आते हैं । अग्नीध वसतीवरी जलों और मैत्रावरुण चमस् के साथ चात्वाल में खड़ा होता है । चात्वाल के ऊपर वह वसतीवरी जलों और मैत्रावरुण चमसे को स्पर्श कराता है । 'समापोऽअद्भिरगमत समोषधीभिरोषधीः' (यजु० ६।२८) । 'जल जल से मिले और ओषधि ओषधि से' । इस प्रकार वह उन जलों को जो कल लाये गये थे और उनको जो आज लाये गये हैं मिला देता है ॥२९॥

कुछ लोग ऐसा करते हैं कि मैत्रावरुण चमसे में कुछ वसतीवरी जल को और कुछ मैत्रावरुण चमसे के जल को वसतीवरी में डालते हैं । इस प्रकार यज्ञ का जो रस कल लाया गया और जो आज लाया गया उन दोनों को मिला देते हैं । परन्तु ऐसा न करना चाहिये । क्योंकि जब आधवनीय में जल छोड़ता है तब भी तो दोनों रस मिल जाते हैं ।

से वसतीवरीर्गृह्णाति निग्राभ्यास्तद्यदुपर्युपरि चात्वालꣳ सꣳस्पर्शयत्यतो वै देवा दिवमुपोदक्रामंस्तद्यजमानमेवैतत्स्वर्ग्यं पन्थानमनुसंख्यापयति ॥३०॥

तऽआयन्ति । तꣳ होता पृच्छत्यध्वर्योऽवेरपा३ऽइत्यविदोऽपा३ऽइत्येवैतदाह तं प्रत्याहोतेव नंनमुरित्यविदमथो मेऽनꣳसतेत्येवैतदाह ॥३१॥

स यद्यग्निष्टोमः स्यात् । यदि प्रचरण्याꣳ सꣳस्रवः परिशिष्टोऽलꣳ होमाय स्यात्तं जुहुयाद्यद्यु नालꣳ होमाय स्यादपरं चतुर्गृहीतमाज्यं गृहीत्वा जुहोति यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः स्वाहेत्याग्नेय्या जुहोत्यग्निर्वाऽअग्निष्टोमस्तदग्नावग्निष्टोमं प्रतिष्ठापयति मर्तपत्या पुरुषसंमितो वाऽअग्निष्टोम एवं जुहुयाद्यद्यग्निष्टामः स्यात् ॥३२॥

यद्युक्थ्यः स्यात् । मध्यमं परिधिमुपस्पृशेत्त्रयः परिधयस्तीरयुक्थान्येतैरु हि तर्हि यज्ञः प्रतितिष्ठति यद्युऽअतिरात्रो वा षोडशी वा स्यान्नैवजुहुयान्न मध्यमं परिधिमुपस्पृशेत्सुवैव तूष्णीमत्य प्रपद्यत तद्यथायथं यज्ञक्रतून्व्यावर्तयात ॥३३॥

अयुजा—अयुजा एकधना भवन्ति । त्रयो वा पञ्च वा पञ्च वा सप्त वा सप्त वा

अब होता के चमसे में वसतीवरी को निग्राभ्य के लिये छोड़ता है । चात्वाल के ऊपर क्यों स्पर्श कराता है ? इसलिये कि वहीं से तो देव द्यौलोक को गये थे । इस प्रकार वह यजमान को स्वर्ग का मार्ग दिखा देता है ॥३०॥

अब वे (हविर्धान में) लौट आते हैं । होता उससे पूँछता है, 'हे अध्वर्यु, तुमको जल मिल गया' । वह उत्तर देता है कि हाँ या जलों ने अपने को मेरे हवाले कर दिया अर्थात् जल मिल गया ॥३१॥

और यदि अग्निष्टोम होवे, और प्रचारणी में कुछ (घी का) शेष होम के लिये पर्याप्त रह जाय तो उससे आहुति दे दे । और यदि होम के लिये पर्याप्त न हो चारों चमसों में आज्य को लेकर आहुति दे । इस मंत्र से—'यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः स्वाहा' (यजु० ६।२६) । 'हे अग्नि, जिस मनुष्य को तुम युद्ध में या दौड़ में सहायता देते हो वह निश्चयात्मक जीत को प्राप्त हो जाता है' । वह अग्नि-सम्बन्धी मन्त्र से आहुति देता है क्योंकि अग्निष्टोम का अर्थ है अग्नि । इस प्रकार अग्नि में अग्निष्टोम की स्थापना करता है । यदि अग्निष्टोम हो तो इस प्रकार आहुति दे ॥३२॥

और यदि उक्थ्य हो तो बीच की समिधा को छुए । तीन परिधियाँ हैं और तीन उक्थ्य । इन्हीं के द्वारा यज्ञ की स्थापना होती है । यदि अतिरात्र या षोडशी हो तो न आहुति दे और न बीच की परिधि को छुये । चुपके से वहाँ जावे । इस प्रकार वह यज्ञ के क्रतुओं में भेद कर सकता है ॥३३॥

एकधन विषम संख्या में (अयुज्ञ) होते हैं, तीन या पाँच, पाँच या सात, सात या नौ, नौ या ग्यारह, ग्यारह या तेरह, तेरह या पन्द्रह । जोड़े से सन्तति होती है । यह यो

नव वा नव वैकादश वा वैकादश वा त्रयोदश वा त्रयोदश वा पञ्चदश वा द्वन्द्वमहं मिथुनं प्रजननमथ य एष एकोऽतिरिच्यते स यजमानस्य श्रियमभ्यतिरिच्यते स वाऽएषाꣳ सधनं यो यजमानस्य श्रियमभ्यतिरिच्यते तद्यदेषाꣳ सधनं तस्मादेकधना नाम ॥३४॥ ब्राह्मणम् ॥ ४ [६.२] ॥

एक बच रहता है वह यजमान की श्री के लिये होता है। और जो यह यजमान की श्री के लिये बच रहा है वह सबका घन अर्थात् सधन होता है और चूँकि सब का धन होता है इसलिये उसका नाम 'एकधन' है ॥३४॥

अध्याय ६—ब्राह्मण ४

अथाधिषवणे पर्युपविशन्ति। अथास्याꣳ हिरण्यं बध्नीते द्वयं वाऽइदं न तृतीयमस्ति सत्यं चैवानृतं च सत्यमेव देवा अनृतं मनुष्या अग्निरेतस वै हिरण्यꣳ सत्येनाꣳशूनुपस्पृशानि सत्येन सोमं पराहरणानीति तस्माद्वा अस्याꣳ हिरण्यं बध्नीते ॥१॥

अथ पाषाणमादत्ते। ते वाऽएतेऽश्ममया पाषाणो भवन्ति देवो वै सोमो दिवि हि सोमो वृत्रो वै सोम आसीत्तस्यैतच्छरीरं यद्गिरयो यदश्मानस्तच्छरीरैरेवैनमेतत्समर्धयति कृत्स्नं करोति तस्मादश्ममया भवन्ति घ्नन्ति वाऽएनमेतद्यदाभिषुण्वन्ति तमेतेन घ्नन्ति तथात उदेति तथा संजीवात तस्मादश्ममया पाषाणो भवन्ति ॥२॥

तमादत्ते। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्या पूष्णो हस्ताभ्यामाददे

अब वे अधिषवण के पास बैठते हैं। अब वह इस (अनामिका उँगली) में सुवर्ण का टुकड़ा बाँधता है। दो ही होते हैं, तीसरा नहीं अर्थात् सत्य और अनृत। देव सत्य है और मनुष्य अनृत। सुवर्ण अग्नि के बीज से उत्पन्न है। 'सत्य से अंशों को छुऊँ। सत्य से सोम को लूँ' वह ऐसा विचारता है इसलिये अनामिका अँगुली में सुवर्ण को बाँधता है ॥१॥

अब वह पाषा (पत्थर) को लेता है। यह जो पाषा हैं वह अश्ममय अर्थात् पत्थर के हैं। सोम देव है। सोम द्यौलोक में था। सोम वृत्र था। यह जो पहाड़ हैं वे इसके शरीर हैं। उसके ही शरीर से उसको पुष्ट करता है, पूर्ण करता है। इसीलिये पाषा (पट्टे) पत्थर के होते हैं। यह जो सोम को निचोड़ते हैं तो मानों उसका हनन करते हैं। उसको उसी से मारते हैं। वहीं से वह उठता है और जीवित है इसलिये भी पट्टे पत्थर के होते हैं ॥२॥

वह पट्टे को इस मंत्र से लेता है—'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्या पूष्णो

रावासीति सविता वै देवानां प्रसविता तत्सवितृप्रसूत 'एवैनमेतदादत्तेऽश्विनोर्बाहुभ्यामित्य-श्विनावध्वर्यू तत्तयोरेव बाहुभ्यामादत्ते न स्वाभ्यां पूष्णो हस्ताभ्यामिति पूषा भागदुघस्त-त्तस्यैव हस्ताभ्यामादत्ते न स्वाभ्यां वज्रो वाऽएष तस्य न मनुष्यो भर्ता तमेतामिर्देवताभि-रादत्ते ॥३॥

आददे रावासीति । यदा वाऽएनमेतेनाभिपुण्वन्त्यथाहुतिर्भवति यदाहुतिं जुहोत्यथ दक्षिणा ददात्येतद्वयेव द्वयꣳ रासतऽआहुतीश्च दक्षिणाश्च तस्मादाह रावा-सीति ॥४॥

गभीरमिममध्वरं कृधीति । अध्वरो वै यज्ञो महान्तमिमं यज्ञं कृधीत्येवैतदाहेन्द्राय सुपूतममितीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्रायेति सुपूतमामति सुसुतमामेत्येवैतदाहो-त्तमेन पविनेत्येष वाऽउत्तमः पवित्र्यस्सोमस्तस्मादाहोत्तमेन पविनेत्यूर्जस्वन्त मधुमन्तं पयस्व-न्तामिति रसवन्तमित्येवैतदाह यदाहोर्जस्वन्तं मधुमन्तं पयस्वन्तामाते ॥५॥

अथ वाचं यच्छते देवा ह वै यज्ञ तन्वानास्तेऽसुररक्षसेभ्य आसन्नाद्भिभयां-चक्रुस्ते होचुरुपाꣳशु यजाम वाजं यच्छामोते तेऽउपाꣳश्वयजन्वाचमयच्छन् ॥६॥

हस्ताभ्याम् । आददे रावासि' । 'तुझको सविता देव की प्रेरणा से, अश्विन के बाहुओं से, पूषा के हाथों से लेता हूँ । तू दानी है' । सविता देवों का प्रेरक है । इस प्रकार सविता से प्रेरित करके उसे लेता है । 'अश्विनों के बाहुओं से' इसलिये कि अश्विन देवों के अध्वर्यु हैं । वह अपने बाहुओं से नहीं किन्तु उनके बाहुओं से लेता है । 'पूषा के हाथों से' । पूषा भागों का बाँटने वाला है । इसलिये पूषा के हाथों से लेता है, अपने हाथों से नहीं । इसके अतिरिक्त वह (पत्थर का पट्टा) वज्र है, कोई उसे उठा नहीं सकता । उन्हीं देवताओं की सहायता से वह उसे उठाता है ॥३॥

वह कहता है 'मैं तुझे लेता हूँ, तू दाता है' । जब वे उसको इस पत्थर से कुचलते हैं, तब आहुति होती है । जब आहुति देता है तो दक्षिणा देता है । इस प्रकार वह पट्टा दो चीजें देता है, आहुति भी और दक्षिणा भी । इसलिये कहा 'तू दाता है' ॥४॥

'गभीराममममध्वरं कृधि' (यजु० ६।३०) । 'अध्वर नाम है यज्ञ का । अर्थात् इस इस गभीर यज्ञ को कर' । 'इन्द्राय सुपूतमम्' (यजु० ६।३०) । अर्थात् 'इन्द्र के लिये उत्तम रीति बनाया गया' । यज्ञ का देवता इन्द्र है इसलिये कहा 'इन्द्र के लिये' । 'उत्तमेन पविना' (यजु० ६।३०) । 'सोम सबसे अच्छा वज्र (पवि) है' । इसलिये कहा 'उत्तम वज्र से' । 'ऊर्जस्वन्त मधुमन्तं पयस्वन्तम्' (यजु० ६।३०) । 'इसके कहने का तात्पर्य कि 'रस वाला' ॥५॥

अब वाणी को रोक लेता है (चुप हो जाता है) । यज्ञ को करते हुये देव लोग राक्षसों के आक्रमण से भयभीत हो गये । उन्होंने कहा, 'चुपके-चुपके यज्ञ करें । वाणी को रोक लें' । उन्होंने चुपके-चुपके आहुति दी और वाणी को रोक लिया ॥६॥

अथ निम्राभ्या आहरति । तास्वेनं वाचयति निम्राभ्या स्थ देवश्रुतस्तर्पयत मा मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयतात्मानं मे तर्पयत प्रजां मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन्निति रसो वाऽआपस्तास्वेवैतामाशिषमाशास्ते सर्वं च मऽआत्मानं तर्पयत प्रजां मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन्निति स य एष उपाꣳशुसवनः स विवस्वाना-ऽदित्यो निदानेन सोऽस्यैष व्यान ॥७॥

तमभिमिमीते । घ्नन्ति वाऽएनमेतद्यदभिपुण्वन्ति तमेतेन घ्नन्ति तथात उदेति तथा संजीवति यद्वेव मिमीते तस्मान्मात्रा मनुष्येषु मात्रो यो चाप्यन्या मात्रा ॥८॥

स मिमीते । इन्द्राय त्वा वसुमते रुद्रवतऽइतीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्राय त्वेति वसुमते रुद्रवतऽइति तदिन्द्रमेवानु वसूꣳश्च रुद्राꣳश्चाभजतीन्द्राय त्वादित्यवतऽइति तदिन्द्रमेवान्वादित्यानाभजतीन्द्राय त्वाभिमातिघ्नऽइति सपत्नो वाऽअभिमातिरिन्द्राय त्वा सपत्नघ्न ऽइत्येवैतदाह सास्याद्वारो यथा श्रेष्ठस्याद्वार एवमस्यैषऽऋते देवेभ्यः ॥९॥

। अब निम्राभ्य जलों को लेता और उन पर यह जपता है—'निम्राभ्या स्थ देवश्रुतस्तर्पयत मा । मनो मे तर्पयत, वाच मे तर्पयत, प्राण मे तर्पयत, चक्षुर्मे तर्पयत, श्रोत्र मे तर्पयतात्मान मे तर्पयत प्रजा मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन्' (यजु० ६।३१) । 'हे जलो तुम देवश्रुत निम्राभ्य हो । मुझे तृप्त करो, मेरे मन को तृप्त करो । मेरी वाणी को तृप्त करो, मेरे प्राण को तृप्त करो, मेरी आँख को तृप्त करो, मेरे कान को तृप्त करो । मेरे आत्मा को तृप्त करो, मेरी प्रजा को तृप्त करो । मेरे पशुओं को तृप्त करो । मेरे गणों को तृप्त करो । मेरे गण प्यास से न मरें' । जल रस है । उन पर आशीर्वाद कहता है कि मुझ सम्पूर्ण को तृप्त करो । प्रजा को, पशु को, गणों को, मेरे गण प्यासे न मरें । यह उपांशुसवन ही आदित्य विवस्वान् है । यह वस्तुतः इस यज्ञ का व्यान है ॥७॥

अब वह उसको नापता है । यह जो उसको कुचलते हैं तो मानों उसका हनन करते हैं । वहीं से यह उठता है, जीता है । चूँकि उससे नापते हैं इसलिये नाप होती है । जो मनुष्यों में प्रचलित है वह भी और अन्य नाप (गाना) भी ॥८॥

वह इस मन्त्र से नापता है—'इन्द्राय त्वा वसुमते रुद्रवते' (यजु० ६।३२) 'वह वसुवाले और रुद्र वाले इन्द्र के लिये' । यज्ञ का देवता इन्द्र है । इसलिये कहा 'इन्द्र के लिये' । 'वसु वाले और रुद्र वाले' कहकर वह इन्द्र के साथ वसु और रुद्रों का भी भाग स्थापित कर देता है । 'इन्द्राय त्वादित्यवते' (यजु० ६।३२) । इससे इन्द्र के साथ आदित्यों का भाग भी स्थापित कर देता है । 'इन्द्राय त्वाभिमातिघ्ने' (यजु० ६।३२) । 'अभिमाति' का अर्थ है शत्रु । अर्थात् शत्रु के मारने वाले इन्द्र के लिये । यह उस (इन्द्र) का विशेष भाग है जैसे किसी श्रेष्ठ (नेता) का होता है,—अन्य देवों से अलग ॥९॥

श्येनाय त्वा सोमभृतऽइति । तद्गायत्र्यै मिमीतेऽग्नये त्वा रायस्पोषदऽइत्यग्निर्वै गायत्री तद्गायत्र्यै मिमीते स यद्गायत्री श्येनो भूत्वा दिवः सोममाहरत्तेन सा श्येनः सोमभृत्तेनैवास्या एतद्वीर्येण द्वितीयं मिमीते ॥१०॥

अथ यत्पञ्चकृत्वो मिमीते । संवत्सरसम्मितो वै यज्ञः पञ्च वाऽऋतवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्चकृत्वो मिमीते ॥११॥

तमभिमृशति । यत्ते सोम दिवि ज्योतिर्यत्पृथिव्या यदुरावन्तरिक्षे । तेनास्मै यजमानायोरु रायेऽकृध्यधि दात्रे वोचऽइति यत्र वाऽएषोऽग्रे देवानाꣳ हविर्भूत्वा तद्देवा चक्रे मैव सर्वेणेवात्मना देवानाꣳ हविर्भूवमिति स एतास्तिस्रस्तनूरेषु लोकेषु विन्यधत्त ॥१२॥

तद्वै देवा अभ्यजयन् । तेऽस्यैतेनैवैतास्तनूराप्नुवन्त्स कृत्स्न एव देवानाꣳ हविरभवत्योऽएवास्यैष एतेनैवैतास्तनूरामोति स कृत्स्न एव देवानाꣳ हविर्भवति तस्मादेवमभिमृशति ॥१३॥

अथ निमाभ्यामिरुपसृजति । आपो ह वै वृत्रं जघ्नुस्तेनैवैतद्वीर्येणापः स्यन्दन्ते

उसने शर्यात वालों पर क्रोध किया और उनमें उसने विद्रोह उत्पन्न कर दिया। बाप बेटे से और भाई भाई से लड़ने लगा ॥३॥

शर्यात ने सोचा कि मैंने कुछ किया है। जिससे ऐसी आपत्ति आई है। उसने ग्वालों और गड़ेरियों को बुलाकर कहा—॥४॥

उसने कहा 'अरे तुमने आज कोई नई बात देखी है'? उन्होंने उत्तर दिया कि एक जीर्ण और दीन पुरुष लेटा हुआ है उसको नाचीज समझकर कुमारों ने उस पर ढेले फेंके थे'। वह समझ गया कि यह च्यवन है ॥५॥

उसने रथ जोतकर उसमें अपनी सुकन्या नामक लड़की को बिठाया और वहाँ आया जहाँ यह ऋषि था ॥६॥

और कहा, 'ऋषि, नमस्ते, मैंने जाना नहीं इसलिये आप को दुःख दिया। यह सुकन्या है इससे मैं उसका प्रतीकार करता हूँ। अब मेरे लोग ठीक रहें। तब से वे लोग ठीक रहे। लेकिन मनुवंशी शर्यात वहाँ से चलता बना कि कहीं मैं इसे फिर अप्रसन्न न कर दूँ ॥७॥

उसी समय चिकित्सा करते करते अश्विन आ निकले। उन्होंने सुकन्या को ग्रहण करना चाहा परन्तु वह राजी न हुई ॥८॥

तौ होचतु । सुकन्ये कमिम जीर्णि कृत्यारूपमुपशेषऽ आवामनुप्रेहीति सा होवाच यस्मै मां पितादाग्नै वाह तं जीवन्तथ्स हास्यामीति तदायमृषिराजज्ञौ ॥९॥

स होवाच । सुकन्ये किं त्वैतदवोचतामिति तस्माऽएतद्व्याचचक्षे स ह व्याख्यात उवाच यदि त्वैतत्पुनर्ब्रूयत सा त्व ब्रूतान्न वै सुसर्वाविव स्थो न सुसमृद्धाविवाथ मे पतिं निन्दथ इति तौ यदि त्वाब्रूत केनावमसर्वौ स्व केनासमृद्धाविति सा त्व ब्रूतात्पतिं नु मे पुनर्युवाणं कुरुतमथ वां वक्ष्यामीति ता पुनरुपेयतुस्ताथ्स हैतदवोचतु ॥१०॥

सा होवाच । न वै सुसर्वाविव स्थो न सुसमृद्धाविवाथ मे पतिं निन्दथ इति तौ होचतु केनावमसर्वौ स्व केनासमृद्धाविति सा होवाच पतिं नु मे पुनर्युवाणं कुरुतमथ वा वक्ष्यामीति ॥११॥

तौ होचतु । एतथ्स ह्रदमभ्यवहर स येन वयसा कामिष्यते तेनोदेष्यतीति तथ्स ह्रदमभ्यवजहार स येन वयसा चकमे तेनोदयातेय ॥१२॥

तौ होचतु । सुकन्ये केनावमसर्वौ स्व केनासमृद्धाविति तौ हऽपिरेव प्रत्युवाच कुरुक्षेत्रेऽग्नी देवा यज्ञं तन्वते ते वां यज्ञादन्तर्यन्ति तेनासर्वौ स्थस्तेनासमृद्धाविति तौ ह तत एवाश्विनौ प्रेयतुस्तावाजग्मतुर्देवान्यज्ञं तन्वानान्स्तुते बर्हिष्यमाने ॥१३॥

वे दोनों बोले, 'सुकन्या, तू किस जीर्ण नाचीज पुरुष के पास रहती है। हमारे पास आ'। वह बोली 'मेरे पिता ने मुझे जिसके साथ ब्याहा है उसी के पास रहूँगी, जब तक यह जीवित है'। ऋषि को यह बात मालूम हो गई ॥९॥

वह बोला 'सुकन्या, इन दोनों ने तुझसे क्या कहा'? उसने उससे सब कुछ कह दिया। यह सुनकर उसने कहा, 'अगर तुझसे यह फिर कहें तो उनसे कहना कि तुम दोनों पूर्ण तो हो नहीं फिर मेरे पति की क्यों निन्दा करते हो। यदि वे पूछें कि किस बात में हम कम हैं या निर्बल हैं तो कहना कि पहले मेरे पति को युवा कर दो तब कहूँगी। वे फिर उसके पास आये और उससे वही बात कही ॥१०॥

वह बोली, 'तुम न तो पूर्ण हो, न समृद्धवान्। फिर मेरे पति की क्यों निन्दा करते हो'। वे दोनों बोले, 'हम किस बात में कम हैं? किस बात में निर्बल हैं'! वह बोली, 'मेरे पति को युवा कर दो तब मैं बताऊँ' ॥११॥

वे बोले, 'उस तालाब में इसको ले जा, यह जिस अवस्था की कामना करेगा उसी अवस्था का होकर निकलेगा'। वह उसको तालाब पर ले गई। उसने जिस आयु की कामना की, उसी आयु का होकर निकला ॥१२॥

वे बोले, 'सुकन्या, हम किस बात में—अधूरे हैं, किस में कम हैं'। तब ऋषि ने स्वयं उत्तर दिया, 'कुरुक्षेत्र में देव यज्ञ करते हैं और तुमको बाहर निकाल दिया है। यही तुममें अधूरापन है, यही कमी है'। यह सुनकर यह दोनों अश्विन लौट गये। वह वहाँ पहुँचे जहाँ देवों ने बर्हिष्यमान स्तुति करने के पश्चात् यज्ञ रच रक्खा था ॥१३॥

तौ होचतुः । उप नौ ह्वयध्वमिति ते ह देवा ऊचुर्न. वामुपह्वयिष्यामहे, बहुमनुष्येषु सञ्छ्रुष्टमचारिष्टं भिषज्यन्ताविति ॥१४॥

तौ होचतुः । विशीर्ष्णो वै यज्ञेन यजध्वऽइति कथं विशीर्ष्णेत्युप नु नौ ह्वयध्वमथ वो वक्ष्याव इति तथेति तांऽउपाह्वयन्त ताभ्यामेतमाश्विनं ग्रहमगृह्णंस्तावध्वर्यू यज्ञस्याभवतां तावेतद्यज्ञस्य शिरः प्रत्यधत्तां तददस्तद्दिवाकीर्त्यानां ब्राह्मणे व्याख्यायते यथा तद्यज्ञस्य शिरः प्रतिदधतुस्तस्मादेष स्तुते बर्हिष्यवमाने ग्रहो गृह्यते स्तुते हि बर्हिष्यवमानऽआगच्छताम् ॥१५॥

तौ होचतुः । मुख्यौ वाऽआवां यज्ञस्य स्वो यावध्वर्यूऽइह नाविमे पुरस्ताद्ग्रहं पर्याहरतामि द्विदेवत्यानिति ताभ्यामेतं पुरस्ताद्ग्रहं पर्याजह्रुरमि द्विदेवत्यास्तस्मादेष दशमो ग्रहो गृह्यते तृतीय एव वषट्क्रियतेऽथ यदश्विनावेतीम ह वै द्यावापृथिवी प्रत्यक्षमश्विनाविमे हीदꣳ सर्वमाप्नुवातां पुष्करस्रजावित्यग्निरेवास्य पुष्करमादित्योऽमुष्य ॥१६॥

अथातो गृह्णात्येव । या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् । उपयामगृहीतोऽस्यश्विभ्यां त्वैषते योनिर्माध्वीभ्यां त्वेति सादयति तं वै मधुमत्यऽर्चा

ये बोले, 'हमको भी यज्ञ में बुलाओ' । देव बोले, 'हम नहीं बुलाते । तुम तो चिकित्सा करते-करते सब प्रकार मनुष्यों में फिरते रहे हो' ॥१४॥

वे बोले, 'अरे तुम तो बे-सिर के यज्ञ को करते हो' ! 'बे-सिर का कैसे' ? 'हमको बुलाओ तब हम बतायेंगे' । 'अच्छा' । उन्होंने उन अश्विनों का आवाहन कर लिया । और उनके लिये इस आश्विन-ग्रह को लिया । यह दोनों यज्ञ के अध्वर्यु हो गये । उन्होंने यज्ञ को सिर-वाला बना दिया । 'दिवाकीर्त्य' ने ब्राह्मण में लिखा है कि उन्होंने यज्ञ के सिर को किस प्रकार सम्पादित किया । इसलिये बर्हिष्यवमान की स्तुति के पश्चात् यह ग्रह लिया जाता है । क्योंकि बर्हिष्यवमान की स्तुति के पश्चात् ही वे आये थे ॥१५॥

वे बोले हम अध्वर्यु हैं । हमी यज्ञ में मुख्य हैं । हमारे इस पहले ग्रह को द्विदेवत्यों के लिये दे दो । उन्होंने उस पहले ग्रह को द्विदेवत्यों को दे दिया । इसलिये यह दसवाँ ग्रह है और तीसरा वषट्कार होता है । यह अश्विन् कौन हैं, द्यौ और पृथिवी । यही दो तो हैं जो सब को अश्नुवातां या प्राप्त करते हैं । यह पुष्कर स्रज अर्थात् पुष्कर की माला वाले हैं । क्योंकि पृथिवी का पुष्कर अग्नि है और द्यौ का सूर्य ॥१६॥

यह अश्विन् ग्रह को इस मंत्र से लेता है, 'या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम्' (यजु० ७।११, ऋ० १।२२।३) । 'हे अश्विन, यह जो तुम्हारी मीठी और प्रसन्न करने वाली कशा या वाणी है उससे यज्ञ को मिलाओ' । 'उपयामगृहीतोऽस्यश्विभ्यां त्वा' (यजु० ७।११) । 'तुझे आश्रय के लिये ग्रहण किया है । दोनों अश्विनों के लिये तुझको' । इस मंत्रांश से उसको रख देता है, 'एष ते योनिर्माध्वीभ्यां त्वा' (यजु० ७।११) । 'यह तेरी योनि है, मधु-प्रियों के लिये तुझे' । 'मधु'

गृह्णाति माध्वीभ्यां त्वेति सादयति तद्यन्मधुमत्यऽर्चा गृह्णाति माध्वीभ्यां त्वेति सादयति ॥१७॥

दध्यङ्ह वाऽआभ्यामाथर्वणः । मधु नाम ब्राह्मणमुवाच तदेनयोः प्रियं धाम तदेवैनयोरेतेनोपगच्छति तस्मान्मधुमत्यऽर्चा गृह्णाति माध्वीभ्यां त्वेति सादयति ॥१८॥

तानि वाऽएतानि । श्लक्ष्णानि पात्राणि भवन्ति रास्नावमैन्द्रवायवपात्रं तत्तस्य द्वितीयꣳ रूपं तेन तद्द्विदेवत्यमजक्षीरं मैत्रावरुणपात्रं तत्तस्य द्वितीयꣳ रूप तेन तदद्विदेवत्यमौष्ठमाश्विनपात्रं तत्तस्य द्वितीय रूपं तेन तदद्विदेवत्यमथ यदश्विनाविति मुख्यौ वाऽअश्विनावौष्ठमिव वाऽइदं मुखं तस्मादौष्ठमाश्विनपात्रं भवति ॥१९॥ ब्राह्मणम् ॥५॥ प्रथमोऽध्यायः [२५] ॥

शब्द वाली ऋचा के साथ क्यों उठाता है और 'मधु प्रियों के लिये तुझे', ऐसा कहकर क्यों रख देता है ! ॥१७॥

दध्यङ् अथर्वा ने 'मधु ब्राह्मण' को अश्विनों को बताया था । यह इनका प्रिय धाम है । उनके इसी प्रिय से वह उनके पास जाता है । इसलिये मधु शब्द वाली ऋचा से उठाता है और 'मधुप्रियों के लिये तुझको' यह कहकर रखता है ॥१८॥

यह पात्र चिकने होते हैं । इन्द्र और वायु के पात्र के बीच में मेखला होती है । यह इसका दूसरा रूप है । इसलिये यह दो देवों का होता है । मित्र-वरुण का पात्र बकरी की आकृति का होता है । यह इसका दूसरा रूप है । इसलिये यह दो देवताओं का है । अश्विनों का यह होंठ की आकृति का होता है । यह उसका दूसरा रूप है इसलिये यह दो देवताओं का है । यह पात्र अश्विनों का इसलिये होता है कि अश्विन यज्ञ का मुख (मुख्य) हैं और मुख में होंठ होते हैं । इसलिये आश्विन यह होंठ की आकृति का होता है ॥१९॥

अध्याय २—ब्राह्मण १

चक्षुषी ह वाऽअस्य शुक्रामान्थिनौ । तद्वाऽएष एव शुक्रो य एष तपति तद्यदेष एतत्तपति तेनैव शुक्रश्चन्द्रमा एव मन्थी ॥१॥

तथ्स सम्तृणि श्रीणाति । तदन मन्थ करोति तनोऽएष मन्थ्येतौ ह वाऽआसा प्रजानां चक्षुषी स यदेतौ नोदियाता न हैवेह स्वो चन पाणी निर्जानीयु॰ ॥२॥

तयोरत्तैवान्यतर । आद्योऽन्यतरोऽत्तैव शुक्र आद्या मन्थी ॥३॥

तयोरत्तैवान्यतरमनु । आद्योऽन्यतरमन्वत्तैव शुक्रमन्वाद्यो मन्थिनमनु तौ वाऽअन्यस्मै गृह्येतेऽअन्यस्मै हूयेते शण्डामर्कौवित्यसुररक्षसे ताभ्या गृह्येते देवताभ्या हूयेते तद्यत्तथा ॥४॥

यत्र वै देवा । असुररक्षसान्यपजघ्निरे तदेतावेव न शेकुरपहन्तु यद्ध स्म देवाः किं च कर्म कुर्वते तद्ध स्म मोहयित्वा क्षिप्रऽएव पुनरपद्रवत॰ ॥५॥

ते ह देवा ऊचु । उपजानीत यथेमावपहनामहाऽइति ते होचुर्महावेवाभ्या गृह्याम

शुक्र और मन्थिन् यह उसकी आँख है । यह जो तपता है अर्थात् सूर्य यह शुक्र है । चूँकि तपता है इसलिये इसका नाम सूर्य है । चन्द्रमा मन्थी है ॥१॥

उसमे सत्तू मिलाता है । यह जो मथता है इसलिये इसका नाम मन्थी है । यह दोनों सूर्य और चाँद इन प्रजाओं की आँख है । क्योंकि यदि दोनों उदय न हों तो लोगों को अपने दोनों हाथ भी न देखें ॥२॥

इनमें एक खाने वाला है और एक खाद्य । शुक्र खाने वाला है और मन्थी खाद्य ॥३॥

एक इनमें से खाने वाले के अनुकूल है, दूसरा खाद्य के । शुक्र खाने वाले के, मन्थिन् खाद्य के । यह ग्रह एक के लिये लिये जाते हैं और दूसरे के लिये इनकी आहुति दी जाती है । शंड और मर्क दो असुर राक्षस हैं । इनके लिये ग्रह लिये जाते हैं । और देवों के लिये इनकी आहुति दी जाती है । यह इस प्रकार से—॥४॥

जब देवों ने असुर राक्षसों को मार भगा दिया तो वे इन दोनों को न भगा सके । देवता जो कुछ करते, यह दोनों उनमें विघ्न डालते और फिर झट से भाग जाते ॥५॥

तब देवों ने कहा 'क्या तुम कोई उपाय कर सकते हो कि इन दोनों को भगा

तावभ्यवैष्यतस्तौ स्वीकृत्यापहनिष्यामहऽइति ताभ्या ग्रहौ जगृह, स्तावभ्यैता तौ स्वीकृत्या पाघ्नत तस्माच्छण्डामर्काभ्यामिति गृह्येते देवताभ्यो हूयेते ॥६॥

अपि होवाच याज्ञवल्क्य । नो एवैवैताभ्य एव गृह्णीयामारे विजितरूपमिव हीद-मिति तद्वै स तन्मीमाꣳसामेव चक्रे नेत्तु चकार ॥७॥

इमामु हैके शुक्रस्य पुरोरुच कुर्वन्ति । अय वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमानऽइति तदेतस्य रूप कुर्मो य एष तपतीति यदाह ज्योतिर्जरायुरिति ॥८॥

। इमा त्वेव शुक्रस्य पुरोरुच कुर्यात् । त प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदꣳ स्वर्विदमित्यत्ता ह्येतमन्वत्ता हि ज्येष्ठस्तस्मादाह ज्येष्ठतातिं बर्हिषदꣳ स्वर्विदम् प्रतीचीन वृजन दोहसे धुनिमाशु जयन्तमनु यासु वर्धसे । उपयामगृहीतोऽसि शण्डाय त्वैष ते योनिर्वीरता पाहीति सादयत्यत्ता ह्येतमन्वत्ता हि वीरस्तस्मादाहैष ते योनिर्वीरता

सकें' । वे कहने लगे' इन दोनों के लिये दो ग्रह लें । वे इन दोनों को लेने के लिये आवेंगे । हम इनको पकाकर मार भगायेंगे' । उन दोनों के लिये ग्रह लिये और जब वे आये तो उनको पकड़कर मार भगाया । इसलिये शड और मर्क के लिये ये दो ग्रह लिये जावे हैं और देवताओं के लिये इनकी आहुति दी जाती है ॥६॥

याज्ञवल्क्य ने यह भी कहा है कि हम इनको देवताओ के लिये ही क्यों न लें । यह तो जीत का चिह्न है । परन्तु उन्होंने इतनी मीमासा मात्र की है । व्यवहार में इसको कभी नहीं लाये ॥७॥

कुछ लोग इस ऋचा को शुक्र की पुरोरुक् या स्तुति में लाते हैं, 'अय वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने' (यजु० ७।१६) । यहाँ 'ज्योतिर्जरायु' (प्रकाश है जरायु जिसका) कहा इससे तात्पर्य यह है कि वह इसको तपने वाले सूर्य के समान करता है ॥८॥

परन्तु शुक्र की पुरोरुक् या स्तुति इस मत्र से होनी चाहिये, 'त प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदꣳस्वर्विदम्' (यजु० ७।१२, ऋ० ५।४४।१) । 'पुरानी रीति से, पहली रीति से, सब रीति से, आजकल की रीति से बड़े, यज्ञधारी, स्वर्ग विद्या के जानने वाले यजमान को' । यह शुक्र खाने वाला है । और खाने वाला ही बड़ा है । इसलिये कहा कि बड़े, यज्ञधारी, स्वर्ग विद्या के जानने वाले को' । 'प्रतीचीन वृजन दोहसे धुनिमाशु जयन्तमनु यासु वर्धसे । उपयामगृहीतोऽसि शण्डाय त्वैष ते योनिर्वीरता पाहि' (यजु० ७।१२) । 'जो उपस्थित है, बलवान है, शत्रुओं को जीतने वाला और शीघ्रगामी है ऐसे यजमान को तू दूहता है उन यज्ञ क्रियाओं में जिनमें तू बढ़ता है । तुझे रक्षा के लिये ग्रहण किया गया है । शण्ड के लिये तुझे । यह तेरी योनि है । तू वीरता की रक्षा कर' । यह पढ़कर यह रख देता है । यह खाने वाला है । खाने वाला वीर होता है । इसलिये कहा कि 'यह तेरी योनि है, तू वीरता की रक्षा कर' । दक्षिण के कौने में इसको रखता है ।

पाहीति । दक्षिणार्धं सादयत्येताश्च ह्येष दिशमनु सचरति ॥९॥

अथ मन्थिनं गृह्णाति । अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने । इममपाश्च संगमे सूर्यस्य शिशुं न विप्रा मतिभीरिहन्ति । उपयामगृहीतोऽस मर्काय त्वेति ॥१०॥

तच्च सक्तुभिः श्रीणाति तद्यत्सक्तुभिः श्रीणाति वरुणो ह वै सोमस्य राज्ञोऽक्षीवाक्षि प्रतिपिपेष तदश्वयत्ततोऽश्वः समभवत्तद्यच्छ्वयथात्समभवत्तस्मादश्वो नाम तस्याश्रु प्रास्कन्दत्ततो यवः समभवत्तस्मादाहुर्वरुणो यव इति तद्यदेवास्यान्न चक्षुषोऽमीयत तेनैवैनमेतत्समर्धयति कृत्स्नं करोति तस्मात्सक्तुभिः श्रीणाति ॥११॥

स श्रीणाति । मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता । आ यः शर्याभिस्तुविनृम्णोऽअस्या श्रीणीतादिशं गमस्तावेष ते योनिः प्रजाः पाहीति सादयत्याघो ह्येतमन्वाद्या हीमाः प्रजाः विशस्तस्मादाहैष ते योनिः प्रजाः पाहीति ॥१२॥

क्योंकि इसी दिशा में सूर्य चलता है । ९॥

अब इस मंत्र से मन्थी को लेता है, 'अयं वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने । इममपाश्च संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ।' उपयामगृहीतोऽसि मर्काय त्वा' (यजु० ७।१६) । 'यह वेनः (चन्द्र) पृश्निगर्भा (द्यौलोक या सूर्य के सहारे स्थित) ज्योतिर्जरायु (ज्योति से लिपटा हुआ), (विमाने) (अन्तरिक्ष में) (रजसः) जलों को (चोदयत्) प्रेरणा करता है । विद्वान् लोग शिशु के समान इसकी सूर्य के जलों के साथ संगम के समय में बुद्धियुक्त वाणियों से स्तुति करते हैं । रसार्थ लिया गया है । मर्क के लिये तुझको' ॥१०॥

उसमें सत्तू मिलाता है । सत्तू इसलिये मिलाता है कि वरुण ने सोम राजा की आँख में मारा और वह सूज गई (अश्वयत्) उसमें से अश्व (घोड़ा) निकला । चूँकि यह सूजन में से निकला इसलिये इसका 'अश्व' नाम पड़ा । उसका एक आँसू गिरा । उसमें से जौ उत्पन्न हुये । इसलिये जौ (वरुण) वरुण का समझा जाता है । इस प्रकार आँख का जितना भाग उस समय दुख गया था उसी की पूर्ति करता है । उसे चंगा करता है । इसलिये सत्तुओं को मिलाता है ॥११॥

वह इस मंत्र से मिलाता है, 'मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता । आ यः शर्याभिस्तुविनृम्णोऽअस्याश्रीणीतादिशं गमस्तौ' (यजु० ७।१७, ऋ० १।६१।३) 'जिन हवनों में विचार के समान तेज तुम दोनों अध्वर्यु कर्म के द्वारा जाते हो । जिस बहुत धन वाले अध्वर्यु ने अँगुलियों से हाथ में लिये हुये (मन्थि) में सत्तू मिलाये हैं' । इस मंत्र से रख देता है, 'एष ते योनिः प्रजाः पाहि (यजु० ७।१७) । 'यह तेरी योनि है । प्रजा को पाल' । यह अन्न खाद्य है । यह प्रजा भी खाद्य है । इसलिये कहा कि यह योनि है, तू प्रजा को पाल ॥१२॥

द्वौ प्रोक्षितौ यूपशकलौ भवतः । द्वावप्रोक्षितौ प्रोक्षितं चैवाध्वर्युरादत्तेऽप्रोक्षितं चैवमेव प्रतिप्रस्थाता प्रोक्षितं चैवादत्तेऽप्रोक्षितं च शुक्रमेवाध्वर्युरादत्ते मन्थिनं प्रतिप्रस्थाता ॥१३॥

सोऽध्वर्युः । अप्रोक्षितेन यूपशकलेनापमार्ष्टर्यपमृष्टः शण्ड इत्येवमेव प्रतिप्रस्थातापमृष्टो मर्क इति तदाददानावेवासुर रक्षसेऽअपहतो देवास्त्वा शुक्रपाः प्रणयन्त्वित्येवाध्वर्युर्निष्क्रामति देवास्त्वा मन्थिपाः प्रणयन्त्विति प्रतिप्रस्थाता तदेतौ देवताभ्य एव प्रणयतः ॥१४॥

तौ जघनेनाहवनीयमरत्नी संधत्तः । ताऽउत्तरवेदौ सादयतो दक्षिणायामेव श्रोणावध्वर्युः सादयत्युत्तरायां प्रतिप्रस्थातानुसृजन्तावेवानाधृष्टासीति तद्रक्षोभिरेवैतदुत्तरवेदिमनाधृष्टां कुरुतो विपर्येष्यन्तौ वाऽएतावग्निं भवतोऽत्येष्यन्तौ तस्माऽएवैतन्निह्नुवाते तथो हैनो विपरियन्तावग्निर्न हिनस्ति ॥१५॥

सोऽध्वर्युः पर्येति । सुवीरो वीरान्प्रजनयन्परीहीत्यक्षा ह्येतमन्वक्षा हि वीरस्तस्मादाह

यूप के दो टुकड़े प्रोक्षित (जल छिड़के) होते हैं और दो अप्रोक्षित (विना जल छिड़के) । अध्वर्यु एक प्रोक्षित और एक अप्रोक्षित लेता है । इसी प्रकार प्रतिप्रस्थाता भी एक प्रोक्षित और अप्रोक्षित लेता है । अध्वर्यु शुक्र को लेता है और प्रतिप्रस्थाता मन्थि को ॥१३॥

अध्वर्यु और प्रतिप्रस्थाता दोनों राक्षसों को इस प्रकार निकालते हैं कि अध्वर्यु अप्रोक्षित यूप शकल से उस ग्रह को मांजता है और कहता है 'अपमृष्टः शंडः' । (शंड भगा दिया गया) और इसी प्रकार प्रतिप्रस्थाता कहता है 'मर्क भगा दिया गया' । अध्वर्यु यह कहकर बाहर जाता है, 'देवास्त्वा शुक्रपाः प्रणयन्तु' । 'शुक्र पीने वाले देव तुझे ले जावें' । प्रतिप्रस्थाता यह कहकर बाहर जाता है, 'देवास्त्वा मन्थिपाः प्रणयन्तु' । 'मन्थि पीने वाले देव तुझे ले जावें' । इस प्रकार यह दोनों देवताओं के निमित्त हवियों को ले जाते हैं ॥१४॥

वे दोनों आहवनीय के पीछे उत्तर वेदी पर (दाहिनी हाथ की) कुहनी मिलाकर उन ग्रहों को रखते हैं । दक्षिण श्रोणी में अध्वर्यु रखता है और उत्तर में प्रतिप्रस्थाता विना छोड़े हुये । यह कर, 'अनाधृष्टाऽसि' (यजु० ७।१७) । 'तू आक्रमण से सुरक्षित है' । इस प्रकार यह दोनों वेदी को राक्षसों से सुरक्षित करते हैं । यह अग्नि की परिक्रमा करने वाले हैं । इसलिये इनको प्रसन्न करता है । इस प्रकार जब वे परिक्रमा करते हैं तो अग्नि इनको नहीं सताती ॥१५॥

अध्वर्यु इस मंत्र से परिक्रमा करता है, 'सुवीरो वीरान् प्रजनयन्' (यजु० ७।११) । 'वीर वीरों को उत्पन्न करता हुआ' यह हवि खाने वाले की स्थानी है और खाने वाला वीर है । इसलिये कहा कि वीरों को उत्पन्न करता हुआ । 'परीहमि यजमानम्'

सुवीरो वीरान्प्रजनयन्परीहीत्यभि रायस्पोषेण यजमानमिति तद्यजमानायाशिषमाशास्ते यदाहाभि रायस्पोषेण यजमानमिति ॥१६॥

अथ प्रतिप्रस्थाता पर्येति । सुप्रजाः प्रजाः प्रजनयन्परीहीत्याद्यो ह्येतमन्वाद्या हीमाः प्रजा विशस्तस्मादाह सुप्रजा. प्रजाः प्रजनयन्परीहीत्यभि रायस्पोषेण यजमानमिति तद्यजमानायाशिषमाशास्ते यदाहाभि रायस्पोषेण यजमानमिति ॥१७॥

तावपिधाय निष्क्रामतः । तिर एवैनावेतत्कुरुतस्तस्मादिमौ सूर्याचन्द्रमसौ प्राञ्चौ यन्तौ न कश्चन पश्यति तौ पुरस्तात्परीत्यापोर्णुतः पुरस्तात्तिष्ठन्तौ जुहत आविरेवैनावेतत्कुरुतस्तस्मादिमौ सूर्याचन्द्रमसौ प्रत्यञ्चौ यन्तौ सर्व एव पश्यति तस्मात्परामेतः सिच्यमानं न कश्चन पश्यति तदु पश्चात्प्रजायमानꣳ सर्व एव पश्यति ॥१८॥

तौ अधनेन यूपमरत्नी सधत्तः । यद्यग्निर्नोद्धाधेत यद्धु ऽअग्निरुद्धाधेताप्येषैव यूपमरत्नी सदध्याताꣳ सजग्मानो दिवा पृथिव्या शुकः शुक्रशोचिषेत्येवाध्वर्युः संजग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषेति प्रतिप्रस्थाता चक्षुषोरेवैतेऽआरम्भणे कुरुतश्चक्षुषीऽए-

(यजु० ७।१३)। 'यजमान को धन से युक्त कर'। यह जो कहा कि यजमान को धन से युक्त कर, इससे यजमान को आशीर्वाद देता है ॥१६॥

प्रतिप्रस्थाता इस मन्त्र से परिक्रमा करता है, 'सुप्रजा प्रजाः प्रजनयन्' (यजु० ७।१८)। 'अच्छी प्रजा वाले, प्रजाओं को उत्पन्न करते हुये'। यह हवि साध्य का स्थानी है, और ये प्रजा के लोग साध्य हैं। इसलिये कहा कि प्रजा को उत्पन्न करते हुये। परीह्यभि रायस्पोषेण यजमानम्' (यजु० ७।१८)। 'यजमान को धन से युक्त कर'। यह जो कहा कि यजमान को धन से युक्त कर' इससे यजमान को आशीर्वाद देता है ॥१७॥

वे दोनों ग्रहों को (हाथ से) ढककर ले जाते हैं। वह इनको छिपा लेता है। इसीलिये जब सूर्य और चन्द्र आगे की ओर चले जाते हैं तो छिप जाते हैं। (यूप के) सामने जाकर वे (ग्रहों को) खोल देते हैं और सम्मुख खड़े होकर आहुति देते हैं। इससे वह उनको 'दृष्ट' बनाते हैं इसीलिये जब सूर्य और चन्द्र पीछे लौटते हैं तो उसको सब कोई देखता है। इसीलिये जब वीर्य सींचा जाता है तो कोई नहीं देखता जब परन्तु जब उत्पत्ति होती है तो सब देखते हैं ॥१८॥

वे यूप के पीछे अपनी कुहनियाँ रखते हैं कि कहीं आग भड़क न उठे। लेकिन अगर आग भड़क उठे तो यूप के सामने कुहनी कर लें। अध्वर्यु इस मन्त्र से, 'सजग्मानो दिवा पृथिव्या शुकः शुक्रशोचिषा' (यजु० ७।१३)। 'शुक्र प्रकाशस्वरूप द्यौ और पृथिवी के साथ संयुक्त होकर'। और प्रतिप्रस्थाता इस मन्त्र से, 'सजग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषा' (यजु० ७।१८)। 'मन्थी मन्थी के समान दीप्ति वाले द्यौ और पृथिवी के साथ संयुक्त होकर'। इस प्रकार यह इन ग्रहों को आँखों के ठहरने का स्थान बनाते हैं। इनको आँखों के समान पास-पास जोड़कर रखते हैं। इसीलिये आँखें पास-पास हड्डियों

वैतत्संधत्तस्तस्मादिमे ऽअमितोऽस्थिनी चक्षुषी सम्भृते ॥१६॥

सोऽध्वर्युः । अप्रोक्षितं यूपशकलं निरस्यति निरस्तः शण्ड इत्येवमेव प्रतिप्रस्थाता निरस्तो मर्क इति तत्पुराहुतिभ्योऽमुररक्षसे ऽअपहतः ॥२०॥

अथाध्वर्युः । प्रोक्षितं यूपशकलमाहवनीये प्रास्यति शुक्रस्याधिष्ठानमसीत्येवमेव प्रतिप्रस्थाता मन्थिनोऽधिष्ठानमसीति चक्षुषोरेवैते समिधौ चक्षुषीऽएवैतत्समिन्धे तस्मादिमे समिद्धे चक्षुषी ॥२१॥

तत्र जपति । अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्यामेत्याशिरेवैतस्य कर्मण आशिषमेतदाशास्ते ॥२२॥

अथाश्राव्याह । प्रातः प्रातः सवनस्य शुक्रपो मधुश्चुत इन्द्राय सोमान्प्रस्थितान्प्रेष्येति वषट्कृते ऽध्वर्युर्जुहोति तदनु प्रतिप्रस्थाता तदनु चमसाध्वर्यवः ॥२३॥

तौ वै पुरस्तात्तिष्ठन्तौ जुहुतः । चक्षुषी वाऽएतौ तत्पुरस्तादेवैतच्चक्षुषी धत्तस्तस्मादिमे पुरस्ताच्चक्षुषी ॥२४॥

अमितो यूपं तिष्ठन्तौ जुहुतः । यथा वै नासिकैवं यूपस्तस्मादिमेऽअमितो नासिके

द्वारा मिली होती है ॥१६॥

अध्वर्यु अप्रोक्षित यूप-शकल को यह कहकर फेंक देता है, 'निरस्तः शण्डः' (यजु० ७।१३) । 'शण्ड भगा दिया गया' । प्रतिप्रस्थाता यह कहकर फेंकता है, 'निरस्तो मर्कः' (यजु० ७।१८) । 'मर्क भगा दिया गया' । इस प्रकार आहुतियों के पहले इन दोनों राक्षसों को भगा देते हैं ॥२०॥

अध्वर्यु प्रोक्षित यूप-शकल को यह कहकर आहवनीय अग्नि में छोड़ता है, 'शुक्रस्याधिष्ठानमसि' (यजु० ७।१३) । 'तू शुक्र का अधिष्ठान है' । इसी प्रकार प्रतिप्रस्थाता यह कहकर 'मन्थिनोऽधिष्ठानमसि' (यजु० ७।१८) । 'मन्थि का अधिष्ठान है तू' । यह दोनों आँखों को प्रकाश देने वाले हैं । इनसे यह आँखों को प्रकाश देता है । इसीलिये आँखों में प्रकाश है ॥२१॥

अब जाप करता है, 'अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम' (यजु० ७।१४) । 'हे सोम देव, तेरे न नष्ट होने वाले, वीर्यवान् धन के हम दाता होवें' । इस कर्म का यह आशीर्वाद है । इस आशीर्वाद को देता है ॥२२॥

श्रौषट् कहकर कहता है—'प्रातः सवन के चमकीले, मीठे सोमों को इन्द्र के लिये प्रेरित करो' । वषट्कार होने पर अध्वर्यु आहुति देता है । उसके पीछे चमसाध्वर्यु ॥२३॥

यह आगे खड़े होकर आहुति देते हैं । यह दोनों आहुतियाँ यज्ञ की आँखें हैं । इस प्रकार आँखों को आगे रखता है । इसीलिये ये आँखें आगे होती हैं ॥२४॥

यः यूप के दोनों ओर खड़े होकर आहुति देते हैं । यूप नासिका के समान है ।

चक्षुषी ॥२५॥

तौ वै वषट्कृतौ सन्तौ मन्त्रेण हूयेते । एतेनौ हैतौ तदुदश्नुवाते यदेनौ सर्वꣳ सवनमनुहूयते यद्वेवैतौ सर्वꣳ सवनमनुहूयतऽएतौ वै प्रजापतेः प्रत्यक्षतमौ चक्षुषी ह्येतौ सत्य वै चक्षुः सत्यꣳ हि प्रजापतिस्तस्मादेनौ सर्वꣳ सवनमनुहूयते ॥२६॥

स जुहोति । सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रोऽअग्निः । स प्रथमो बृहस्पतिश्चिकित्वांस्तस्माऽइन्द्राय सुतमाजुहोत स्वाहेति ॥२७॥

स यज्जुहोति सा प्रथमा स प्रथम इति शश्वद्ध वै रेतसः सिक्तस्य चक्षुषीऽएव प्रथमे सम्भवतस्तस्माज्जुहोति सा प्रथमा स प्रथम इति ॥२८॥

अथ सम्प्रेष्यति । प्रैतु हातुश्चमस प्र ब्रह्मणः प्रादृगातृणा प्र यजमानस्य प्रयन्तु सदस्यानाꣳ होत्राणां चमसाध्वर्यव उपावर्तध्वꣳ शुक्रस्याभ्युब्धध्वमिति सम्प्रेष एवैष पर्येत्य प्रतिप्रस्थाताध्वर्यां पात्रे सꣳस्रवमवनयत्तत्त्रऽएवैतदाद्य बलिꣳ हारयति तमध्वर्युर्होतृचमसेऽवनयति भक्षाय वषट्कर्तुर्हि भक्षः प्राणो वै वषट्कारः सोऽस्मादेतद्वषट्कु-

नासिका के दोनों ओर आँखें होती हैं ॥२५॥

वषट्कार कहकर के यह दोनों आहुतियाँ मन्त्र पढकर दी जाती हैं । इनमें यह विशेषता है कि इनके पश्चात् पूरे सवन की आहुतियाँ दी जाती हैं । इनके पीछे पूरे सवन की आहुतियाँ इसलिये दी जाती हैं कि यह आहुतियाँ प्रजापति की प्रत्यक्षतम आँखें हैं । सत्य चक्षु है, सत्य प्रजापति है । इसलिये इनके पीछे पूरे सवन की आहुतियाँ दी जाती हैं ॥२६॥

वह इस मन्त्र से आहुति देता है, 'सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रोऽअग्नि । स प्रथमो बृहस्पतिश्चिकित्वाँस्तस्माऽइन्द्राय सुतमाजुहुता स्वाहा' (यजु० ७।१४,१५) । सब के ग्रहण करने योग्य यह पहली संस्कृति है । वह पहला वरुण, मित्र और अग्नि है । वह पहला चेतनावा बृहस्पति है । उस इन्द्र के लिये निचोड़े हुये सोम की आहुति दो' ॥२७॥

'सा प्रथमा, स प्रथम' यह कहकर वह जो आहुति देता है वह सदा सींचे हुये वीर्य के समान है । आँखें पहले होती हैं इसलिये वह 'स प्रथमा, स प्रथम' ऐसा कहकर आहुति देता है ॥२८॥

अब वह आदेश देता है, 'होता का चमसा आवे, ब्राह्मण का, उद्गाता का, यजमान का, सदस्यों के, होताओं के, अध्वर्युओं के । इन चमसों को शुद्ध सोम रस से भरो' । यह सब मिला जुला आदेश है । प्रतिप्रस्थाता घूम कर अध्वर्युओं के पात्र में बचा कुचा सोम डाल देता है । मानो खाने वाले के लिये खाद्य पदार्थ में से बलि दिलवाता है । अध्वर्यु उसको होता के चमसे में डाल देता है पीने के लिये । वषट्कार पढने वाले का यह भक्ष्य है । वषट्कार प्राण है । यह प्राण वषट् करने के समय निकल सा गया । प्राण

र्वतः पराङित्वामूत्वाणो वै मक्षस्तत्प्राणं पुनरात्मन्धत्ते ॥२९॥

अथ यदेते प्रतीची पात्रे न हरन्ति । हरन्त्यन्यान्महांश्चक्षुषी होते सश्रुस्रवमेव होतृचमसेऽवनयति ॥३०॥

अथ होत्राणां चमसानभ्युषयन्ति । हुतोच्छिष्टा वाऽएते सश्रुस्रवा भवन्ति नालमाहुत्यै तानेवैतत्पुनराप्याय"न्ति तथालमाहुत्यै भवन्ति तस्माद्धोत्राणां चमसानभ्युषयन्ति ॥३१॥

अथ होत्राः संयाजयन्ति । होत्रा ह वै युक्ता देवेभ्यो यज्ञं वहन्ति ता एवैतत्संतर्पयन्ति तृप्ताः प्रीता देवेभ्यो यज्ञं वहानिति तस्माद्धोत्राः संयाजयन्ति ॥३२॥

स प्रथमायां वा होत्रायां । इष्टायामुत्तमायां वानुमन्त्रयते तृप्यन्तु होत्रा मध्वो याः स्विष्टायाः सुप्रीताः सुहुता यत्स्वाहेति होत्राणामेवैषा तृप्तिरथैत्य प्रत्यङ्ङपविशत्यथाऽग्नीदित्यग्नीद्धयत्र यजतामुत्तमः संयजति तस्मादाहायाऽग्नीदिति ॥३३॥ ब्राह्मणम् ॥ ६ [२. १.] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या १३६ ॥ ॥

भक्ष है । अर्थात् प्राण को फिर उसमें धारण करता है ॥२९॥

इन पात्रों को वह पीछे क्यों नहीं ले जाते और दूसरे ग्रहों को क्यों पीछे ले जाते हैं ? इसलिये कि यह दोनों आँखें हैं । वह बचे-कुचे को होता के चमसे में डाल देता है ॥३०॥

अब होताओं के चमसों को भरते हैं । यह बचे-कुचे भाग जो आहुतियों के अवशिष्ट हैं आहुतियों के लिये काफी नहीं हैं । इनको भर देता है तो यह आहुतियों के लिये काफी हो जाते हैं इसलिये वह होताओं के चमसों को भर देता है ॥३१॥

अब होता लोग मिलकर ही देवों के लिये यज्ञ को ले जाते हैं । इन सब को यह एक साथ संतुष्ट करता है कि तृप्त होकर वे देवों के लिये यज्ञ को ले जावें । इसलिये होता लोग एक साथ आहुति देते हैं ॥३२॥

पहले या पिछले होता की आहुति हो चुकने पर उनसे वह कहता है, 'तृप्यन्तु होत्रा मध्वो याः स्विष्टा याः सुप्रीता. सुहुता यत्स्वाहा' । 'मीठे सोम को पीने वाले, भलीभाँति प्रसन्न होने वाले होता लोग सन्तुष्ट होवें' । यह होताओं की संतुष्टि है । अब यह आता है और पश्चिमाभिमुख बैठ जाता है । 'याडग्नीत्' (यजु० ७।१५) । 'अग्नीध्र ने आहुति दी' । अग्नीध्र सबसे पीछे आहुति देता है । इसलिये कहा, 'याड् अग्नीत्' अर्थात् अग्नीध्र ने आहुति दी ॥३३॥

आग्रयणग्रहः

अध्याय २—ब्राह्मण २

आत्माहवाऽअस्याग्रयणः । सोऽस्येष सर्वमेव सर्वꣳ ह्ययमात्मा तस्मादनया गृह्णात्यस्यै हि स्थाली भवति स्थाल्या ह्येनं गृह्णाति सर्वं वाऽइयꣳसर्वमेष ग्रहस्तस्मादनया-गृह्णाति ॥१॥

पूर्णं गृह्णाति । सर्वं वै पूर्णꣳ सर्वमेष ग्रहस्तस्मात्पूर्णं गृह्णाति ॥२॥

विश्वेभ्यो देवेभ्यो गृह्णाति । सर्वे वै विश्वे देवाः सर्वमेष ग्रहस्तस्माद्विश्वेभ्यो देवेभ्यो गृह्णाति ॥३॥

सर्वेषु सवनेषु गृह्णाति । सर्वे वै सवनानि सर्वमेष ग्रहस्तस्मात्सर्वेषु सवनेषु गृह्णाति ॥४॥

स यदि राजोपदस्येत् । तमत एव तन्वीरन्नतः प्रभावयेयुरात्मा वाऽआग्रयण आत्मनो वाऽइमानि सर्वाण्यङ्गानि प्रभवन्त्येतस्मादन्ततो हारियोजनं ग्रहं गृह्णाति तदात्मन्येवास्यां प्रतिष्ठायामन्ततो यज्ञः प्रतितिष्ठति ॥५॥

अथ यस्मादाग्रयणो नाम । यां वाऽअमूं ग्रावाणमाददानो वाचं यच्छत्यत्र वै साम्ने-

आग्रयण ग्रह इसका आत्मा है । इस प्रकार यह उसका सर्वस्व है । आत्मा सर्वस्व होता है । इसलिये वह इस (पृथ्वी) के द्वारा लेता है । स्थाली इसी (मिट्टी) की होती है । स्थाली में ही इस आहुति को निकालता है । यह पृथ्वी सब कुछ है । इसलिये यह ग्रह सब कुछ है । इसलिये वह इसको इस पृथ्वी के द्वारा लेता है ॥१॥

वह इसको पूरा भर कर लेता है । पूर्ण का अर्थ है सब । यह ग्रह 'सब' है । इसलिये पूरा भरता है ॥२॥

विश्वेदेवों के लिये लेता है । 'विश्वेदेवा' सब हैं । यह ग्रह भी सब है । इसलिये सब देवों के लिये ग्रहण करता है ॥३॥

सब सवनों में लेता है । सवन 'सब' हैं । यह ग्रह भी 'सब' है । इसलिये सब सवनों में लेता है ॥४॥

यदि सोम राजा चुक जावे, तो उसे इसी ग्रह में से भर देते हैं । इसी में से निकालते हैं । यह आग्रायण ग्रह आत्मा (शरीर) है । आत्मा (शरीर) से ही यह सब अंग निकलते हैं । इसलिये अन्त में हारियोजन ग्रह को लेते हैं । इस प्रकार अन्त में यज्ञ इसी प्रतिष्ठा में प्रतिष्ठित हो जाता है ॥५॥

इसका आग्रयण नाम यों पड़ा । यह जो पत्थर (सोम निचोड़ने का) को लेते

ऽवदत्तद्यत्सात्राग्रेऽवदत्तस्मादाग्रयणो नाम ॥६॥

रक्षोभ्यो वै ता भीषा वाचमयच्छन् । षड्भाऽऋतः प्राचो महान्गृह्णात्यथैष सप्तमः षड्वाऽऋतवः संवत्सरस्य सर्व वै संवत्सरः ॥७॥

तां देवाः । सर्वस्मिन्विजितेऽभयेऽनाप्ते ऽन्नाग्रे वाचमवदंस्तथोऽएवैष एतार्थ्ं सर्वस्मिन्विजितेऽभयेऽनाप्ते ऽन्नाग्रे वाचं वदति ॥८॥

अथातो गृह्णात्येव । ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ । अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् । उपयाम गृहीतोऽस्याग्रयणोऽसि स्वाग्रयण इति वाचमेवैतदयातयाम्नीं करोति तस्मादनया समानꣳ सद्विपर्यासं वदत्यजामितायै जामिं ह कुर्याद्यदाग्रयणोऽस्याग्रयणोऽसीति गृह्णीयात्तस्मादाहाग्रयणोऽसि स्वाग्रयण इति ॥९॥

पाहि यज्ञं पाहि यज्ञपतिमिति । वाचमेवैतदुत्सृष्टामाह गोपाय यज्ञमिति पाहि यज्ञपतिमिति वाचमेवैतदुत्सृष्टामाह गोपाय यजमानमिति यजमानो हि यज्ञपतिर्विष्णुस्त्वागिन्द्रियेण पातु विष्णुं त्वं पाहीति वाचमेवैतदुत्सृष्टामाह यज्ञो वै विष्णुर्यज्ञस्त्वां वीर्येण

समय मौन धारण किया था इसके बाद अभी मुँह खोला गया । और चूँकि सबसे आगे वचन बोला इसलिये आग्रयण नाम हुआ ॥६॥

राक्षसों के डर से मौन साधन किया था । इसके पहले वह छः ग्रह लेता है । यह सातवाँ है । वर्ष में छः ऋतुयें होती है । वर्ष सब है ॥७॥

सब के जीतने और भयरहित तथा हानिरहित होने पर पहले देवों ने वाणी बोली थी । यह भी सब के जीतने पर और भयरहित तथा हानि रहित होने पर वाणी को बोलता है ॥८॥

इसको वह इस मन्त्र से ग्रहण करता है, 'ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादशस्थ । अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिम जुषध्वम् । उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणः' (यजु० ७।१९,२०, ऋ० १।१३९।११) । 'जो आप देव लोग, द्यौलोक में ११ हैं, पृथिवी में ११ और जलों में (अन्तरिक्ष में) प्रकाश युक्त ११ हैं । यह तैंतीसों देव मेरे यज्ञ को ग्रहण करें । त्, रक्षा के लिये लिया गया है तो आग्रयण है । अच्छा आग्रयण है' । इस प्रकार वाणी जोरदार कर देता है कि एकार्थ होते हुये भी कुछ भेद कर देता है । यदि 'आग्रयणोऽसि' 'आग्रयणोऽसि' दो बार कहेगा तो एक ही बात को दुहराने का दोष आ जायगा इसलिये पहले 'आग्रयणोऽसि' कहता है फिर 'स्वाग्रयणोऽसि' ॥९॥

'पाहि यज्ञं पाहि यज्ञपतिम् (यजु० ७।२०) । अर्थात् यज्ञ की रक्षा कर, यज्ञपति की रक्षा कर । यज्ञपति से यजमान का तात्पर्य है । क्योंकि यजमान ही यज्ञपति है । विष्णुस्त्वागिन्द्रियेण पातु विष्णुं त्वं पाहि' (यजु० ७।२०) । 'विष्णु नाम है यज्ञ का' । अर्थात् यज्ञ

गोपायत्विति विष्णुं त्वं पाहीति वाचमेवैतदुत्सृष्टामाह यज्ञं त्वं गोपायेत्यमि सवनानि पाहीति तदेतं ग्रहमाह सर्वाणि ह्येष सवनानि प्रति ॥१०॥

अथ दशापवित्रमुपगृह्य हिङ्करोति । सा हैषा वागनुद्यमाना ततान तस्यां देवा वाचि तान्तायाꣳ हिङ्कारेणैव प्राणमदधुः प्राणो वै हिङ्कारः प्राणो हि वै हिङ्कारस्तस्मादपि गृह्य नासिके न हिङ्कर्तुꣳ शक्नोति सैतेन प्राणेन समजिहीत यदा वै तान्तः प्राणं लभतेऽथ स सजिहीते तथोऽएवैष एतद्वाचि तान्तायाꣳ हिङ्कारेणैव प्राणं दधाति सैतेन प्राणेन संजिहीते त्रिःकृत्वो हिङ्करोति त्रिवृद्धि यज्ञः ॥११॥

अथाह सोमः पवतऽइति । सयामेवामूं भीषासुररक्षसेभ्यो न निरब्रुवस्तामेवैतत्सर्वस्मिन्विजितेऽभयेऽनाष्ट्रेऽत्र निराह तामाविष्करोति तस्मादाह सोमः पवतऽ इति ॥१२॥

अस्मै ब्रह्मणेऽस्मै क्षत्रायेति । तद्ब्रह्मणे च क्षत्राय चाहास्मै सुन्वते यजमानाय पवतऽइति तद्यजमानायाह ॥१३॥

तदाहुः । एतावदेवोक्त्वा सादयेदेतावद्वाऽइदꣳ सर्वं यावद्ब्रह्म क्षत्रं विडिन्द्राग्नी

अपनी शक्ति द्वारा तेरी रक्षा करे । तू यज्ञ की रक्षा कर । 'अग्ने सवनानि पाहि' (यजु० ७।२०) । इससे तात्पर्य ग्रह का है क्योंकि यह (आग्रयण ग्रह) सभी सवनों में आता है ॥१०॥

(ग्रह को) छन्ने में लपेट कर हिङ्कार बोलता है । यह वाणी बिना आश्रय के थक गई थी । देवों ने उस थकी हुई वाणी में हिंकार के द्वारा प्राण स्थापित किये । प्राण हिंकार है । प्राण ही हिंकार है । इसीलिये तो नाक बन्द करके हिंकार नहीं बोल सके । वह इस प्राण के द्वारा फिर ताजा हो गई । जब थका आदमी प्राण को पाता है तो प्राण के कारण ताजा हो जाता है । इसी प्रकार यह उस वाणी में हिंकार से प्राण को धारण कराता है । वह उस प्राण के द्वारा ताजा होती है । हिंकार तीन बार करता है क्योंकि यज्ञ त्रिवृत् (तीन लड़ी वाला) है ॥११॥

अब कहता है, 'सोमः पवते' (यजु० २१) । 'सोम पवित्र करता है' । असुर राक्षसों से डरकर उन्होंने अब तक यह वाणी न बोली थी । जब सबको जीत लिया और भय रहित तथा हानि-रहित हो गये तब इस वाणी को स्पष्ट किया और कहा । इसलिये कहता है कि 'सोम पवित्र करता है' ॥१२॥

'अस्मै ब्रह्मणे अस्मै क्षत्राय' (यजु० ७।२१) । 'इस ब्राह्मण के लिये, इस क्षत्रिय के लिये' । क्योंकि ब्राह्मण और क्षत्रिय के लिये यह यज्ञ किया गया । 'यजमानाय पवते' (यजु० ७।२१) । 'यजमान के लिये पवित्र करता है' । यह यजमान के लिये कहा ॥१३॥

इस पर कुछ लोग कहते हैं कि इतना ही कहकर ग्रह को रख दे, जितना ब्राह्मण

वाऽइदꣳ सर्वं तस्मादेतावदेवोक्त्वा सादयेदिति ॥१४॥

तदु वयादेव भूयः । इषऽऊर्ज पवतऽइति वृष्टयै तदाह यदाहेषऽइत्यूर्जऽइति यो वृष्टादूर्मसो जायते तस्मै तदाहाद्भ्य ओषधीभ्यः पवतऽइति तद्भ्यश्चौषधिभ्यश्चाह द्यावा पृथिवीभ्यां पवतऽ इति तदाभ्यां द्यावापृथिवीभ्यामाह ययोरिदꣳ सर्वमधि सुभूताय पवतऽ इति साधवे पवतऽइत्येवैतदाह ॥१५॥

तदु हैकऽ आहुः । ब्रह्मवर्चसाय पवतऽ इति तदु तथा न वयाद्यद्वाऽ आहास्मै ब्रह्मणऽइति तदेव ब्रह्मवर्चसायाह विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति सादयति विश्वेभ्यो ह्येवं देवेभ्यो गृह्णाति तं वै मध्ये सादयत्यात्मा ह्यस्यैष मध्यऽइव ह्ययमात्मा दक्षिणोक्थ्यस्थाली भवत्युत्तरादित्यस्थाली ॥१६॥ ब्राह्मणम् ॥ १ [२. २] ॥ ॥

क्षत्रिय और वैश्य है वह सब इतना ही तो है। इन्द्र और अग्नि यह सब है। इसलिये इतना ही कहकर रस दे ॥१४॥

परन्तु इतना और कहना चाहिये 'इषऽऊर्जे पवते'। 'इषे' कहा वृष्टि के लिये। 'ऊर्जे' कहा रस के लिये क्योंकि वृष्टि से रस उत्पन्न होता है। 'अद्भ्यः ओषधीभ्यः पवते' (यजु० ७।२१)। 'यह जलों और ओषधियों के लिये कहा'। 'द्यावापृथिवीभ्यां पवते' (यजु० ७।२१)। 'यह द्यौ और पृथिवी के लिये कहा जिसके आश्रित सभी है'। 'सुभूताय पवते' (यजु० ७।२१)। अर्थात् 'साधु या भलाई के लिये' ॥१५॥

कुछ कहते हैं कि 'ब्रह्मवर्चसाय पवते' परन्तु ऐसा न कहना चाहिये। क्योंकि ऊपर 'अस्मै ब्रह्मणे' कहा जा चुका है। इसका अर्थ 'ब्रह्मवर्चस्' है। 'विश्वेभ्यस्त्वा देवेभ्यऽएष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः' (यजु० ७।२१)। 'तुझको विश्वेदेवों के लिये। यह तेरी योनि है। तुझको विश्वेदेवों के लिये'। उस ग्रह को रख देता है कि इसको विश्वेदेवों के लिये भरा था। उसको मध्य मे रखता है, क्योंकि यह इसका आत्मा है। आत्मा मध्य में है। दाहिनी ओर उक्थ्य थाली को रखते हैं, बाईं ओर आदित्य थाली को ॥१६॥

उक्थ्यग्रहः

अध्याय ४—ब्राह्मण ३

अयश्च ह वाऽ अस्यैषोऽनिरुक्त आत्मा यदुक्थ्यः । सोऽस्यैष आत्मैवात्मा ह्यय-मनिरुक्तः प्राणः सोऽस्यैष आयुरेव तस्मादनया गृह्णात्यस्यै हि स्थाली भवति स्थाल्या-ह्येन गृह्णात्यजराह्यीयममृताजरश्च ह्यमृतमायुस्तस्मादनया गृह्णाति ॥१॥

त वै पूर्णं गृह्णाति । सर्वं वै तद्यत्पूर्णश्च सर्वं तद्यदायुस्तस्मात्पूर्णं गृह्णाति ॥२॥ शतम् ॥२४००॥

तस्यासावेव ध्रुव आयुः । आत्मैवास्यैतेन सश्च्रहितः पर्वाणि संततानि तद्वाऽअगृ-हीत एवैतस्मादच्छावाकायोत्तमो ग्रहो भवति ॥३॥

अथ राजानमुपावहरति । तृतीय वसतीवरीणामवनयति तत्पर्व समेति प्रथममहोत्त-रस्य सवनस्य करोत्युत्तम पूर्वस्य स यदुत्तरस्य सवनस्य तत्पूर्वं करोति यत्पूर्वस्य तदुत्तमं तद्व्यतिषजति तस्मादिमानि पर्वाणि व्यतिषक्तानीदमित्थमतिहानमिदमित्थम् ॥४॥

यह जो उक्थ्य ग्रह है वह इसका अनिरुक्त (अस्पष्ट) आत्मा है । यह उसका आत्मा है । यह इसका जो अनिरुक्त प्राण है वह इसका आत्मा है । यह इसकी आयु है । इसलिये वह इसको इस (पृथिवी) के द्वारा ग्रहण करता है । इसी की थाली होती है (अर्थात् थाली मिट्टी की ही तो बनती है) और थाली में ही इसको निकालता है । यह पृथ्वी अजर अमर है । अजर अमर ही आयु है । इसलिये इस पृथ्वी के द्वारा इसको ग्रहण करता है ॥१॥

उसको पूरा-पूरा भरता है । यह जो आयु है वह 'सब' है । इसलिये पूरा-पूरा भरता है ॥२॥

ध्रुव ग्रह उसकी आयु है । इसी से उसका आत्मा सुगठित रहता है । पर्व अर्थात् जोड़ इसी के द्वारा सयन्त्रित रहते हैं । अभी अच्छावाक (ऋत्विज विशेष) के लिये पिछला ग्रह भरा नहीं जा चुका ॥३॥

तभी सोम राजा को (गाड़ी से) उतारता है और वसतीवरीयों का तीसरा भाग (आधवनीय स्थाली में) छोड़ता है, इस प्रकार पर्व जुड़ता है अर्थात् इस उक्थ्य ग्रह को पिछले सवन का पहला और पहले सवन का पिछला ग्रह बना देता है (इस प्रकार दोनों सवन जुड़ गये), जो पिछले सवन का है उसे पहले करता है । जो पहले का है उसे पीछे । इस प्रकार यह एक का दूसरे में जोड़ मिला देता है इसीलिये तो शरीर के जोड़ एक दूसरे में मिले हुये हैं (व्यतिषक्तानि—interlocked), यह इस प्रकार, यह इस प्रकार (हाथ के इशारे से बताकर) ॥४॥

एवमेव माध्यन्दिने सवने । अगृहीत एवैतस्मादच्छावाकायोत्तमो ग्रहो भवत्यथ तृतीयं वसतीवरीणामवनयति तत्पर्व समेति प्रथममहोत्तरस्य सवनस्य करोत्युत्तमं पूर्वस्य स यदुत्तरस्य सवनस्य तत्पूर्व करोति यत्पूर्वस्य तदुत्तमं तद्व्यतिपद्यति तस्मादिमानि पर्वाणि व्यतिपक्तानीदमित्थमतिहानमिदमित्थ तद्यदस्यैतेनात्मा राध्र हितस्तेनास्यैष आयुः ॥५॥

सैषा कामदुघैवेन्द्रस्योद्धारः । त्रिभ्य एवैनं प्रातःसवनऽउक्थेभ्यो विगृह्णाति त्रिभ्यो माध्यन्दिने सवने तत्षट्कृत्वः षड्वाऽऋतवऋतवो वाऽइमान्तसर्वान्कामान्पचन्त्येतेनो हैषा कामदुघैवेन्द्रस्योद्धारः ॥६॥

तं वाऽअपुरोरुक्कं गृह्णाति । उक्थध्र हि पुरोरुग्घि पुरोरुग्घ्युक्थध्र साम महोऽथ यदन्यज्जपति तद्यजुस्ता हैता अभ्यर्धएवाग्रऽऋग्भ्य आसुरभ्यर्धो यजुर्भ्योऽभ्यर्धः सामभ्यः ॥७॥

ते देवा अब्रुवन् । हन्तेमा यजुःषु दधाम तथेयं बहुलतरेव विद्या भविष्यतीति ता यजुःष्वदधुस्तत एषा बहुलतरेव विद्याभवत् ॥८॥

तं यदपुरोरुक्कं गृह्णाति । उक्थध्र्हि पुरोरुग्घि पुरोरुग्घ्युक्थध्र्ष स यदेवैनमुक्थे-

इसी प्रकार दोपहर के सवन में, चूँकि अभी इसमे से अच्छावाक के लिये पिछला ग्रह भरा नहीं जाता । इसलिये वसतीवरीओं का तीसरा भाग (आधवनीय में) छोड़ता है । इस प्रकार जोड़ मिल जाता है । पहले को वह पिछले सवन का बनाता है और पिछले को पहले सवन का । जो पिछले सवन का है उसे पहले करता है जो पहले का है उसे पीछे । इस प्रकार दोनों को मिला देता है । इसीलिये यह शरीर के जोड़ भी मिले हुये हैं । यह इस प्रकार और यह इस प्रकार (हाथ के इशारे से बता कर) । चूँकि इस ग्रह से उसका आत्मा सुघटित है इसलिये यह इस की आयु है ॥५॥

यह (उक्थ्य ग्रह) इन्द्र का विशेष भाग या कामधेनु है । प्रातः सवन में तीन उक्थ्यों के लिये (विशेष मन्त्रों के लिये) इसके तीन भाग करता है । दोपहर के सवन में तीन को । यह छः हुये । छः ही ऋतुयें हैं । यह ऋतुयें ही पृथ्वी पर सब कामनाओं को पकाती हैं । इसलिये यह कामधेनु या इन्द्र का विशेष भाग है ॥६॥

इसको पुरोरुक् के बिना ही लेता है । उक्थ्य पुरोरुक् है । पुरोरुक् ऋक् है । उक्थ्य ऋक् है । साम ग्रह है । यह जो जपा जाता है वह यजुः है । यह पुरोरुक् ऋचायें पहले ऋक् से अलग थीं, यजुः से अलग थीं, साम से अलग थीं ॥७॥

ये देव बोले, इनको यजुओं में मिला दें । इस प्रकार यह बहुत बड़ी विद्या हो जायगी । तब उन्होंने इनको यजुओं में मिला दिया और यह बहुत बड़ी विद्या हो गई ॥८॥

इसको बिना पुरोरुक् के क्यों लेता है ? उक्थ्य पुरोरुक् है । ऋक् पुरोरुक् है, ऋक्

भ्यो विगृह्णाति तेनो हास्यैष पुरोरुङ्मान्भवति तस्मादपुरोरुङ्कं गृह्णाति ॥९॥

अथातो गृह्णात्येव । उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वतेवयस्वतऽइतीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्रायत्वेति बृहद्वतेवयस्वतऽइति वीर्यवतऽइत्येवैतदाह यदाह बृहद्वते वयस्वतऽइत्युक्थाव्यं गृह्णामीत्युक्थेभ्यो ह्येनं गृह्णाति यत्तऽइन्द्र बृहद्वय इति यत्तऽइन्द्र वीर्यमित्येवैतदाह तस्मै त्वा विष्णवे त्वेति यज्ञस्य ह्येनमायुषे गृह्णाति तस्मादाह तस्मै त्वा विष्णवे त्वेत्येष ते योनिरुक्थेभ्यस्त्वेति सादयत्युक्थेभ्यो ह्येनं गृह्णाति ॥१०॥

तं विगृह्णाति । देवेभ्यस्त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीति प्रशासनꣳ स कुर्याद्य एवं कुर्याद्यथादेवतं त्वेव विगृह्णीयात् ॥११॥

मित्रावरुणाभ्यां त्वा । देवाव्यं यज्ञस्यायुषे गृह्णामीत्येव मैत्रावरुणाय मैत्रावरुणीषु हि तस्मै स्तुवते मैत्रावरुणीरनुशꣳसति मैत्रावरुण्या यजति ॥१२॥

इन्द्राय त्वा । देवाव्यं यज्ञस्यायुषे गृह्णामीत्येव ब्राह्मणाच्छꣳसिनऽऐन्द्रीषु हि

उक्थ्य है । चूँकि इसको उक्थ्यों में से लेता है इसलिये यह पुरोरुक् वाला हो जाता है । इसलिये इसको बिना पुरोरुक् के लेता है ॥९॥

इसको इस मंत्र से लेता है, 'उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वते' (यजु० ७।२२) । 'तुझको आश्रय के लिये लिया गया है, बड़े और आयु वाले इन्द्र के लिये' । इन्द्र यज्ञ का देवता है । इसलिये कहा कि बड़े और आयु वाले इन्द्र के लिये । 'बड़े और आयु वाले' का अर्थ है वीर्य वाले, पराक्रम वाले । 'उक्थाव्य गृह्णामि' (यजु० ७।२२) । उक्थ्यों से इसे लेता है । यत्तऽइन्द्र बृहद्वयः (यजु० ७।२२), अर्थात् हे इन्द्र जो तेरा पराक्रम है । तस्मै त्वा विष्णवे त्वा (यजु० ७।२२) । यज्ञ की आयु के लिये इसको ग्रहण करता है । इसलिये कहा 'उसके लिये तुझको, विष्णु के लिये तुझको' । 'एष ते योनि रुक्थेभ्यस्त्वा' (यजु० ७।२२) । 'यह तेरी योनि है, उक्थों के लिये तुझे' । ऐसा कहकर उसको रख देता है, उक्थों के लिये उसे लेता है ॥१०॥

इस मंत्रांश से बाँटता है, 'देवेभ्यस्त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि' (यजु० ७।२२) । 'तुझे देवों के लिये तथा यज्ञ की आयु के लिये लेता हूँ' जो इस प्रकार करेगा वह शासन करने वाला होगा । अब उसे प्रत्येक देवता के लिये बाँट देना चाहिये ॥११॥

'मित्रावरुणाभ्यां त्वा देवाव्यां यज्ञस्यायुषे गृह्णामि' (यजु० ७।२३) । यह मित्रावरुण के लिये । क्योंकि मित्रावरुणी मन्त्रों में (उद्गाता लोग) उसी की स्तुति करते हैं और मैत्रावरुणी शस्त्र को होता पढ़ता है । और मैत्रावरुण के लिये ही आहुति दी जाती है ॥१२॥

'इन्द्राय त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि' (यजु० ७।२३) । 'देव के अर्पण तुझको इन्द्र के लिये, यज्ञ की आयु के लिये लेता हूँ' । यह भाग ब्राह्मणाच्छंसी के लिये होता है । इन्द्र सम्बन्धी मन्त्रों के साथ इसके लिये स्तुति की जाती है । शस्त्र भी ऐसे ही मन्त्रों

तस्मै स्तुवतऽऐन्द्रीरनुशꣳ सत्यैन्द्रया यजति ॥१३॥

इन्द्राग्निभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीत्येवाच्छावाकवैन्द्राग्नीपु हि तस्मै स्तुवतऽऐन्द्राग्नीरनुशꣳ सत्यैन्द्र ग्न्या यजतीन्द्राय त्वेत्येव माध्यन्दिने सवनऽऐन्द्रꣳ हि माध्यन्दिनꣳ सवनम् ॥१४॥

तदु ह चरकाध्वर्यवो विगृह्णन्ति । उपयाम गृहीतोऽसि देवेभ्यस्त्वा देवाव्यमुक्थेभ्य उक्थाव्यं मित्रावरुणाभ्यां जुष्ट गृह्णाम्येष ते योनिर्मित्रावरुणाभ्या त्वेति सादयति पुनर्ह-विरसीति स्थालीमभिमृशति ॥१५॥

उपयामगृहीतोऽसि । देवेभ्यस्त्वा देवाव्यमुक्थेभ्य उक्थाव्यमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वेति सादयति पुनर्हविरसीति स्थालीमभिमृशति ॥१६॥

उपयाम गृहीतोऽसि । देवेभ्यस्त्वा देवाव्यमुक्थेभ्य उक्थाव्यमिन्द्राग्निभ्यां जुष्टं गृह्णाम्येष ते योनिरिन्द्राग्निभ्यां त्वेति सादयति नात्र पुनर्हविरसीति स्थालीमभिमृशतीन्द्राय त्वेन्द्राय त्वेत्येव माध्यन्दिने सवनऽऐन्द्रꣳहि माध्यन्दिनꣳ सवनं द्विर्हि पुनर्हविरसीति स्थालीमभिमृशति तूष्णीं तृतीयं निदधाति ॥१७॥

से पढ़ा जाता है जिनमें इन्द्र शब्द आया हो और इन्द्र वाले मन्त्र से ही आहुति दी जाती है ॥१३॥

'इन्द्राग्निभ्यां त्वा देवाव्य यज्ञस्यायुषे गृह्णामि' (यजु० ७।२३) । यह भाग आच्छावाक का है । इसकी स्तुति के मन्त्रों में इन्द्र-अग्नि आता है, इन्द्र-अग्नि वाले मंत्र ही शस्त्र में पढे जाते हैं और इन्द्र-अग्नि के मन्त्रों से ही आहुति दी जाती है । 'इन्द्राय त्वा' से दोपहर के सवन को करता है क्योंकि दोपहर का सवन इन्द्र का होता है ॥१४॥

चरकाध्वर्यु इसको इस प्रकार बाँटते हैं, 'उपयामगृहीतोऽसि देवेभ्यस्त्वा देवाव्यमुक्थेभ्य उक्थाव्य मित्रावरुणाभ्यां जुष्ट गृह्णामि' । 'तू आश्रय के लिये है । तुझ देव के अर्पण को देवों के लिये जिनको स्तुति प्रिय है, मित्र वरुण के लिये लेता हूँ' । अब वह इस मन्त्र से ग्रह को रखता है, 'एष ते योनिर्मित्रावरुणाभ्या त्वा' । यह कहकर थाली को छूता है, 'हविरसि' । 'तू हवि है' ॥१५॥

इस मन्त्र से रखता है, 'उपयामगृहीतोऽसि देवेभ्यस्त्वा देवाव्यमुक्थेभ्य उक्थाव्यमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा' । यह कहकर थाली को छूता है, पुनर्हविरसि' । 'तू फिर हवि है' ॥१६॥

'उपयामगृहीतोऽसि । देवेभ्यस्त्वा देवाव्यमुक्थेभ्य उक्थाव्यमिन्द्राग्निभ्यां जुष्टं गृह्णाम्येष ते योनिरिन्द्राग्निभ्यां त्वा' । इससे रखता है । परन्तु 'पुनर्हविरसि' कहकर इस बार थाली को नहीं छूता । 'इन्द्राय' 'इन्द्राय त्वा' कहकर दोपहर के सवन को करता है क्योंकि दोपहर का सवन 'इन्द्र' का है । 'तू हवि है' ऐसा कहकर थाली को दो बार छूता है, तीसरी बार चुपके से रख देता है ॥१७॥

तं वै नोपयामेन गृह्णीयात् । न योनौ सादयेदग्ने ह्येवैष उपयामेन गृहीतो भवस्यग्ने योनौ सन्नोऽजामितायै जामि ह कुर्याद्यदेनमत्राप्युपयामेन गृह्णीयाद्यद्योनौ सादयेदथ यत्पुनर्हविरसीति स्थालीमभिमृशति पुनर्ह्यस्य ग्रहं ग्रहीष्यन्भवति न तदाद्रियेत तूष्णीमेव निदध्यात् ॥१८॥ ब्राह्मणम् ॥ २ [२. ३.] ॥

इसको 'उपयाम.....इति' कहकर न ले और न 'योनि' में रक्खे । यह तो पहले ही 'उपयाम.....' से ली जा चुकी है और पहले ही 'योनि' में रक्खी जा चुकी है । यदि अब भी 'उपयाम.....' से लेगा और 'योनि' में रक्खेगा तो एक ही चीज को दुहराने का दोषी होगा । 'पुनर्हविरसि' कहकर थाली को छूने से इस ग्रह को दुबारा ग्रहण करना पड़ेगा । इसलिये इसको न करे । चुपके से रख दे ॥१८॥

ध्रुवग्रहः

अध्याय १—ब्राह्मण ४

अयश्च ह वाऽअस्यैष प्राणः । योऽयं पुरस्तात्स वै वैश्वानर एवाथ योऽयं पश्चात्स ध्रुवस्तौ ह स्मैतौ द्वावेवाग्रे ग्रहौ गृह्णन्ति ध्रुववैश्वानराविति तयोरयमप्येतर्ह्यन्यतर एव गृह्यते ध्रुव एव स यदि तं चरकेभ्यो वा यतो वानुनुदीत यजमानस्य तं चमसेऽवनयेदथैतमेव होतृचमसे ॥१॥

यद्वाऽअस्यावाचीनं नाभेः । तदस्यैष आत्मनः सोऽस्यैष आयुरेव तस्मादनया गृह्णात्यस्यै हि स्थाली भवति स्थाल्या ह्येनं गृह्णात्यजरा ह्यियमृताजरश्च ह्यमृतमायुस्तस्मादनया गृह्णाति ॥२॥

यह जो आगे का प्राण है वह वैश्वानर ग्रह है । और यह जो पीछे का प्राण है वह ध्रुव ग्रह है । पहले यह दोनों ग्रह लिये जाया करते थे । ध्रुव भी और वैश्वानर भी । इनमें से एक अब भी निकाला जाता है अर्थात् ध्रुव । उस अर्थात् वैश्वानर ग्रह को यदि चरकों की रीति के अनुसार लिया जाय तो उसको यजमान के चमसे में डालना चाहिये । 'ध्रुव' को होता के चमसे में ॥१॥

यह जो नाभि से नीचे का स्थान है उसी का आत्मा, उसी की आयु यह ध्रुव ग्रह है । इसलिये उसको इसे भूमि द्वारा ही लेना है क्योंकि थाली इसी की मिट्टी की होती है । थाली में ही इसे लेना है । यह अजर अमर है । आयु भी अजर अमर है । इसलिये इसके द्वारा लेता है ॥२॥

तं वै पूर्णं गृह्णाति । सर्वं वै तद्यत्पूर्णꣳ सर्वं तद्यदायुस्तस्मात्पूर्णं गृह्णाति ॥३॥

वैश्वानराय गृह्णाति । सवत्सरा वै वैश्वानरः सवत्सर आयुस्तस्माद्वैश्वानराय गृह्णाति ॥४॥

स प्रातःसवने गृहीतः । एतस्मात्कालादुपशेते तदेनꣳ सर्वाणि सवनान्यतिनयति ॥५॥

तं न स्तूयमानेऽवनयेत् । न ह संवत्सरं यजमानोऽतिजीवेद्यत्स्तूयमानेऽवनयेत् ॥६॥

तꣳ शस्यमानेऽवनयति । तदेन द्वादशꣳ स्तोत्रमतिनयति तथा परम्परमायुः समश्नुते तथो ह यजमानो ज्योग्जीवति तस्माद्ब्राह्मणोऽग्निष्टोमसत्स्यादैतस्य होमान्न सर्पेन्न प्रस्रावयेत तथा सर्वमायु· समश्नुतऽआयुर्वाऽअस्यैष तथा सर्वमायुरेति ॥७॥

यद्वाऽअस्यावाचीन नाभेः । तदस्यैष आत्मनः स यत्पुरैतस्य होमात्सर्पेद्वा म वा स्रावयेत ध्रुवꣳ हावमेहेन्नेद्ध्रुवमवमेहानीति तस्माद्वाऽअग्निष्टोमसद्भवति तद्वै तद्यजमान एव यजमानस्य होप तदात्मनः ॥८॥

स वाऽअग्निष्टोमसद्भवति । यशो वै सोमस्तस्माद्यश्चसोमे लभते यश्च नोभावेवा-

उसको पूरा पूरा भरता है । 'सव' पूर्ण है । यह जो आयु है वह पूर्ण है । इसलिये पूरा पूरा भरता है ॥३॥

वैश्वानर के लिये लेता है । सवत्सर वैश्वानर है । सवत्सर आयु है इसलिये वैश्वानर के लिये लेता है ॥४॥

इसको प्रात. सवन के लिये लिया गया था । इसके बाद यह वैसे ही रखा रहा । इस प्रकार यह इसको सब सवनों में होकर ले जाता है ॥५॥

स्तुति के समय इसको (होता के चमसे में) न डाले । क्योंकि यदि स्तुति के बीच में डाल देगा तो यजमान साल भर न जियेगा ॥६॥

जिस समय शस्त्र पढा जाता है उस समय इसको लेता है । इस प्रकार यह इसको बारह स्तोत्रों से ऊपर कर देता है । इस प्रकार उसका जीवन परम्पर (बिना सिलसिला टूटे) रहता है । यजमान दीर्घायु होता है । इसलिये ब्राह्मण अग्निष्टोम में बराबर बैठा रहे । होम से हट न जाय । न पेशाब करे । इस प्रकार पूर्ण आयु को प्राप्त करे । यह जो आहुति है वह इसकी आयु है । इस प्रकार सब आयु को प्राप्त करता है ॥७॥

यह जो इसकी नाभि के नीचे है उसके आत्मा का उतना भाग यह (ध्रुव ग्रह) है । इसलिये यदि हट कर जायगा या पेशाब करेगा तो जो चीज ध्रुव (दृढ) है उसको विचल कर देगा । वह ध्रुव को विचल नहीं करता इसलिये अग्निष्टोम में बराबर बैठा रहता है । यह आदेश यजमान के लिये है क्योंकि यह यजमान का ही आत्मा है ॥८॥

यह अग्निष्टोम सद् इसलिये भी होता है कि सोम यश है, इसलिये जो इसका लाभ

गच्छतो यश एवैतद्द्रष्टुमागच्छन्ति तद्वाऽएतद्यशो ब्राह्मणाः सम्प्रसृप्यात्मन्दधते यद्भक्षयन्ति स ह यश एव भवति य एवं विद्वान्भक्षयति ॥९॥

ते वाऽएते । सर्पन्त एवाग्निष्टोमसद्मेतद्यशः सनिधाय सर्पन्ति ते पराञ्चो यशसो भवन्ति तदप पोऽगृहीत्वा पुनरात्मन्यशो धत्ते तेषाꣳ हैष एव यशस्वितमो भूत्वा प्रेति य एवं विद्वानग्निष्टोमसद्मेति ॥१०॥

देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरेऽएतस्मिन्यज्ञे प्रजापतौ पितरि संवत्सरेऽस्माकमयं भविष्यत्यस्माकमय भविष्यतीति ॥११॥

ततो देवाः । अर्चन्तः श्राम्यन्तश्चेरुस्तऽ एतदग्निष्टोमसद्यं ददृशुस्तऽ एतेनाग्निष्टोमसद्मेन सर्वं यज्ञꣳ सगृह्यान्तरायन्नसुरान्यज्ञात्तयोऽ एवैष एतेनाग्निष्टोमसद्मेन सर्वं यज्ञꣳ सगृह्यैऽन्तरेति सपत्नान्यज्ञात्तस्माद्वाऽ अग्निष्टोमसद्मेति ॥१२॥

तं गृहीत्वोत्तरे हविर्धाने सादयति प्राणा वै महा नेत्प्राणान्मोहयानीत्युपरीवाँ वाऽइतरान्महान्सादयत्यधरेतं व्युह्य न तृणं च नान्तर्धाय ॥१३॥

करता है और जो इसका लाभ नहीं करता दोनों ही इस यश को देखने आते हैं । ब्राह्मण लोग जब (इस सोम को) पीते हैं तो वे अपने आत्मा में इस यश को धारण करते हैं । जो इस रहस्य को समझकर इसका पान करता है वह अवश्य ही यशस्वी हो जाता है ॥९॥

यह (ब्राह्मण लोग) अग्निष्टोम में रहने हुये इस यश को इस (यजमान) में स्थापन करते हैं और इस प्रकार यश से विमुक्त हो जाते हैं । और यह यजमान चारों ओर से घेर कर ही यश को अपने में धारण करता है इसलिये यह मनुष्य इस यज्ञ में यशस्वी होकर मरता है जो इस रहस्य को जान कर अग्निष्टोम में सवार होता है ॥१०॥

देव और असुर दोनों प्रजापति की सन्तान इस लिये प्राजापत्य संवत्सर रूपी यज्ञ में इस बात पर लड़ पड़े कि 'यह हमारा होगा' 'यह हमारा होगा' ॥११॥

इस पर देव तो अर्चना और श्रम करते रहे । उन्होंने इस अग्निष्टोम को देखा (विचारा) । इस अग्निष्टोम के द्वारा उन्होंने पूरे यज्ञ पर स्वत्व कर लिया और असुरों को यज्ञ से बाहर कर दिया । इस प्रकार यह यजमान भी अग्निष्टोम के द्वारा इस सम्पूर्ण यज्ञ पर स्वत्व कर लेता है, यज्ञ से अपने शत्रुओं को बाहर कर देता है । इसलिये यह अग्निष्टोम से सवार होता है ॥१२॥

इस यह को नीचे यह उत्तरी हविर्धान में रख देता है । यह प्राण है । ऐसा न हो कि प्राण विमोहित हो जायें । अतः इसी को उत्तरोत्तर (ऊँचे उठते हुये भाग में) रखता है । लेकिन इसको पूरा हटा कर इस प्रकार रखता है कि एक तिनका भी बीच में न रहने पाये ॥१३॥

यद्वाऽअस्योर्ध्वं नाभेः । तदस्यैतऽआत्मन उपरीव वै तद्यदूर्ध्वं नाभे रूपरीतेवदुप-कीर्णं तस्मादुपकीर्णं सादयत्यथैतं व्युह्य न तृणं च नान्तर्धाय ॥१४॥

यद्वाऽ अस्यावाचीनं नाभेः । तदस्येव आत्मनोऽध इवैतद्यदवाचीनं नाभेरध इवै-तद्ध्रुव न तृणं च नान्तर्धाय तस्मादेतं व्युह्य न तृणं च नान्तर्धाय सादयति ॥१५॥

एष वै प्रजापतिः । य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतमेवाप्ये-तर्ह्यनु प्रजायन्ते स यानुपकीर्णं सादयति तस्माद्यास्ता ननु प्रजाः प्रजायन्ते ता अन्येना-त्मनोऽन्यां प्रतितिष्ठन्ति या वै शफैः प्रतितिष्ठन्ति ता अन्येनात्मनोऽस्या प्रतितिष्ठन्त्यथ यदेत व्युह्य न तृणं च नान्तर्धाय सादयति तस्माद्या एतमनु प्रजाः प्रजायन्ते ता आत्म-नैवास्या प्रतितिष्ठन्ति मनुष्याश्च श्वापदाश्च ॥१६॥

तद्वा ऽएतत् । अस्या एवान्यदुत्तरं करोति यदुपकिरति स यानुपकीर्णं सादयति तस्माद्यास्ता ननु प्रजाः प्रजायन्ते ता अन्येनैवात्मनोऽस्या प्रतितिष्ठन्ति शफैः ॥१७॥

तद्वाऽएतत् । आहवनीये जुह्वति पुरोडाशं धानाः करम्भ दध्यामिक्षामिति तद्यथा-

यह जो नाभि से ऊपर का भाग है वही शरीर का ऊपरी भाग कहलाता है । यह जो अन्य ग्रह हैं वह ऊपरी भाग के तुल्य हैं । और जो उपकीर्ण या उदा हुआ भाग है वह भी ऊपरी भाग कहलाता है । इसलिये वह और ग्रहों को उपकीर्ण में रखता है और इसको धूल हटाकर ऐसी जगह जहाँ तिनका भी न छूट गया हो ॥१४॥

यह जो नाभि से नीचे है वह इस शरीर का निचला भाग है । और यह ग्रह भी यज्ञ का निचला भाग है । और जहाँ से धूल हटाकर तिनका तक नहीं छोड़ा वह जगह भी निचला भाग है । इसलिये वह इस ध्रुव ग्रह को इस स्थान में रखता है ॥१५॥

यह जो यज्ञ किया जा रहा है वह प्रजापति है, उसी से प्रजायें उत्पन्न हुई हैं और अब भी इसी से उत्पन्न होती हैं । जिन ग्रहों को उपकीर्ण पर रक्खा था उनकी आहुति के बाद जो प्रजा उत्पन्न होती है वह इस पृथ्वी पर अपने स्वरूप से भिन्न रीति से खड़ी होती हैं । जो शफ या खुर वाले प्राणी हैं वह अपने स्वरूप से भिन्न रूप से खड़े होते हैं । जब वह इस ध्रुव ग्रह को धूल हटाकर ऐसी जगह रखता है जहाँ तिनका तक न रहा हो तो इस आहुति देने के पश्चात् जो प्राणी उत्पन्न होते हैं अर्थात् मनुष्य, जंगली जानवर (श्वापद) वे अपने स्वरूप के अनुकूल खड़े होते हैं ॥१६॥

एक बात यह भी है । पृथ्वी पर जो ऊँचा स्थान (उपकीर्ण) बनाया जाता है वह मानो पृथ्वी के स्वरूप के भिन्न होता है । इसलिये जिन ग्रहों को उपकीर्ण पर रखता है उनकी आहुति देने के बाद जो प्राणी पैदा होते हैं वह अपने स्वरूप से विरुद्ध खड़े होते हैं अर्थात् खुरों पर ॥१७॥

दूसरी बात यह है कि आहवनीय में जो डाला जाता है अर्थात् पुरोडाश, धान, करम्भ, दही, अमिक्षा, यह सब एक प्रकार से मुख में रखने के तुल्य है । यह ग्रह जल के

मुखऽआसिञ्चेदेवं तदथैष एकरूप उपशेतऽआप इवैव तस्माद्यदनेन मुखेन नानारूपमशनमश्नात्यथैतेन प्राणेनैकरूपणेव प्रस्तावयतेऽप इवैवाथ यस्माद्ध्रुवो नाम ॥१८॥

देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्विमयां चक्रुस्तान्दक्षिणतोऽसुररक्षसान्यासेजुस्तेषामेतान्दक्षिणान्यहानूज्जघ्नुरप्येतद्दक्षिणꣳ हविर्धानमुज्जघ्नुरथैतमेव न शेकुरुद्धन्तुं तदुत्तरमेव हविर्धानं दक्षिणꣳ हविर्धानमहꣳहत्तद्यदेतं न शेकुरुद्धन्तुं तस्माद्ध्रुवो नाम ॥१९॥

तं वै गोपायन्ति । शिरो वाऽएष एतस्यै गायत्र्यै यज्ञो वै गायत्री द्वादश स्तोत्राणि द्वादश शस्त्राणि तच्चतुर्विꣳशतिश्चतुर्विꣳशत्यक्षरा वै गायत्री तस्याऽएष शिरः श्रीर्वै शिरः श्रीर्हि वै शिरस्तस्माद्योऽर्धस्य श्रेष्ठो भवत्यसावमुष्यार्धस्य शिर इत्याहुः श्रेष्ठो ह व्यथेत यदेष व्यथेत यजमानो वै श्रेष्ठो नेद्यजमानो व्यथाताऽइति तस्माद्वै गोपायन्ति ॥२०॥

वत्सो वाऽएष । एतस्यै गायत्र्यै यज्ञो वै गायत्री द्वादश स्तोत्राणि द्वादश शस्त्राणि तच्चतुर्विꣳशतिश्चतुर्विꣳशत्यक्षरा वै गायत्री तस्या एष वत्सस्तं यद्गोपायन्ति गोपायन्ति वाऽइमान्वत्सान्दोहाय यदिदं पयोदुहऽएवमियं गायत्री यजमानाय सर्वान्कामान्दो-

समान अलग रक्खा रहता है । जैसे मुख में भिन्न भिन्न प्रकार की वस्तुयें खाते हैं तो प्राण के रूप में एक ही होकर निकलता है । अब इसका ध्रुव नाम क्यों पड़ा ? ॥१८॥

जब देव यज्ञ करने लगे तो उनको असुर राक्षसों से भय लगा । असुर राक्षसों ने दक्षिण दिशा से आक्रमण किया और दक्षिण ओर के ग्रहों को गिरा दिया । दक्षिण के हविर्धान को उलट दिया । यह जो उत्तरी हविर्धान था उसको न गिरा सके । ऐसे समय में उत्तरी हविर्धान ने दक्षिणी हविर्धान को ठीक रक्खा । और चूँकि यह उसको न हिला सके इसलिये इसका नाम ध्रुव हुआ ॥१९॥

इसकी रक्षा करते हैं । यह इस गायत्री का शिर है । यज्ञ गायत्री है । बारह स्तोत्र और बारह शस्त्र यह सब मिलकर चौबीस होते हैं । चौबीस अक्षर की गायत्री होती है । यह ग्रह उसका सिर है । श्री सिर है । श्री ही सिर है । इसीलिये जो पुरुष यज्ञ से श्रेष्ठ होता है उसको कहते हैं कि यह यहाँ का सिर (मुखिया) है । यदि इस ग्रह को हानि पहुँचे तो मानो सिर को हानि पहुँची । यजमान श्रेष्ठ है । इसलिये यहाँ श्रेष्ठ को हानि न पहुँच जाय इसलिये इसकी रक्षा करते हैं ॥२०॥

यह ग्रह गायत्री का बछड़ा भी है । गायत्री यज्ञ है । बारह स्तोत्र और बारह शस्त्र मिलकर चौबीस होते हैं । चौबीस अक्षर की गायत्री होती है । यह उसका बछड़ा है । यह जो बछड़ों की रक्षा किया करते हैं ये दूध दुहने के लिये । इसकी रक्षा वे इसलिये करते हैं कि जैसे ये बछड़े दूध से सम्पन्न करते हैं इसी प्रकार यह गायत्री भी यजमान को सब कामनाओं

हाताऽइति तस्माद्वै गोपायन्ति ॥२१॥

अथ यदध्वर्युश्च प्रतिप्रस्थाता च । निश्चक्रामतः प्र च पद्येते यथा बद्धवत्सोपाचरदेवमेतं ग्रहमुपाचरतस्तमवनयति गायत्रीमेवैतत्प्रसावयति प्रत्तेयं गायत्री यजमानाय सर्वकामान्दोहाताऽइति तस्माद्वाऽअवनयति ॥२२॥

सोऽवनयति । ध्रुवं ध्रुवेण मनसा वाचा सोममवनयामीति गृह्णामीति वाथा न इन्द्र इद्विशोऽसपत्नाः समनसस्करदिति यथा न इन्द्र इमाः प्रजा विशः श्रिये यशसेऽन्वाद्याया सपत्नाः सपत्नः संमनसः करवदित्येवैतदाह ॥२३॥

अथातो गृह्णात्येव । मूर्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआ जातमग्निम् । कविꣳ सम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः । उपयाम गृहीतोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोच्युतानामच्युतक्षित्तम एष ते योनिर्वैश्वानराय त्वेति सादयति च्युह्य न तृणं च नान्तर्धाय वैश्वानराय ह्येनं गृह्णाति ॥२४॥ ब्राह्मणम् ॥ ३ [२. ४.] ॥

को पूरा करे ॥२१॥

और जब अध्वर्यु और प्रतिप्रस्थाता (हविर्धान के बाहर) जाते हैं और फिर लौटते हैं तो मानो गाय अपने बछड़े के साथ लौट आई इस प्रकार यह उस ग्रह के पास लौटते हैं । अध्वर्यु ग्रह को उँडेलता है । इस प्रकार वह गायत्री को छोड़ देता है । यह इस ग्रह को इसलिये उँडेलता है कि यह गायत्री यजमान के हवाले होकर उसकी सब कामनाओं की पूर्ति करे ॥२२॥

यह इस मंत्र से उँडेलता है, 'ध्रुवं ध्रुवेण मनसा वाचा सोममवनयामि' (यजु० ७।२५) । अर्थात् 'ध्रुव ग्रह को दृढ मन और वाणी से सोम को उँडेलता हूँ' अर्थात् ग्रहण करता हूँ । 'अथा नऽइन्द्रऽइद् विशोऽसपत्नाः समनसस्करत्' (यजु० ७।२५) । 'अब इन्द्र हमारे स्वजनों को शत्रु-रहित और एक मन वाला करे' ॥२३॥

अब इस (सोम में) से यह लेता है इस मंत्र से, 'मूर्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआ जातमग्निम् । कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः' (यजु० ७।२४) । उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तमऽएष ते योनिर्वैश्वानराय त्वा' (यजु० ७।२५) । द्यौलोक का मूर्धा, पृथिवी के पोषक, वैश्वानर अग्नि को जो कवि, सम्राट्, लोगों का अतिथि है और जो ऋत अर्थात् यज्ञ में पैदा हुआ है मुँह के पात्र के समान देवों ने उत्पन्न किया । तू आश्रय के लिये लिया गया है । तू दृढ़ है, दृढ़ घर वाला है, सब से दृढ़ है । ठोसों में ठोस है । यह तेरी योनि है । वैश्वानर के लिये 'तुझको' । धूल को अलग करके और इस प्रकार कि तिनका भी न रहे यह इसको रख देता है । क्योंकि यह इसको वैश्वानर अग्नि के लिये लेता है ॥२४॥

विप्रुड्होमः

अध्याय २—ब्राह्मण ५

ग्रहान्गृहीत्वा । उपनिष्क्रम्य विप्रषाश्च होमं जुहोति तद्यद्विप्रुषाश्च होमं जुहोति या एवास्यात्र विप्रुष स्कन्दन्ति ता एवैतदाहवनीये स्वगाकरोत्याहवनीयो ह्याहुतीना प्रतिष्ठा तस्माद्विप्रुषाश्च होम जुहोति ॥१॥

स जुहोति । यस्ते द्रप्स स्कन्दति यस्तेऽअꣳशुरिति यो वै स्तोक स्कन्दति । स द्रप्सस्तत्तमाह यस्तेऽअꣳशुरिति तदꣳशुमाह ग्रावच्युतो धिषणयोरुपरस्थादिति ग्राव्णा हि च्युतोऽधिषवणाभ्याञ्छ स्कन्दत्यध्वर्योर्वा परिवायः पवित्रादित्यध्वर्योर्वा हि पाणिभ्याꣳ स्कन्दति पवित्राद्वा त ते जुहोमि मनसा वषट्कृतꣳस्वाहेति तद्यथा वषटकृतꣳ हतमेवमस्यैतद्भवति ॥२॥

अथस्तीर्णायै वेदेः । द्वे 'तृणेऽअध्वर्युरादत्ते तावध्वर्यू प्रथमौ प्रतिपद्येते प्राणोदानौ यज्ञस्याथ प्रस्तोता वागेव यज्ञस्याथोद्गातात्मैव प्रजापतिर्यज्ञस्याथ प्रतिहर्ता चिकित्वा

ग्रहों को लेकर और (हविर्धान से) बाहर निकल कर (वेदि में पहुँच कर) विप्रुषों अर्थात् बूँदों का होम करता है । यह विप्रुषों का होम इसलिये करता है कि इस सोम की जो बूँदें गिर पड़ती हैं उनको वह आहवनीय में पहुँचा देता है क्योंकि आहवनीय ही आहुतियों की प्रतिष्ठा है इसलिये बूँदों की आहुति करता है ॥१॥

वह इस मन्त्र से आहुति देता है,'यस्ते द्रप्स स्कन्दति यस्तेऽअꣳशु.' (यजु० ७।२६, ऋ० १०।१७।२) । 'यह जो तेरा रस गिर पड़ता है, और यह जो तेरा खण्ड' । यह जो थोड़ा से खिंड जाता है उसको द्रप्स कहा और खण्ड कहा उसके डठल आदि टुकड़ों को । 'ग्रावच्युतो धिषणयोरुपरस्थात्' (यजु० ७।२६) । 'पत्थर से कुचला हुआ और प्यालों में से निकला हुआ' । जब पत्थर पर पीसा जाता है तो वह प्यालों में से निकल भागता है अर्थात् खिंड जाता है । 'अध्वर्योर्वा परि वा य पवित्रात्' । (यजु० ७।२१) । 'या तो अध्वर्यु के हाथ से या पवित्रे अर्थात् छन्ने से' । क्योंकि या तो अध्वर्यु के हाथ से या छन्ने से गिर पड़ता है । 'त ते जुहोमि मनसा वषट् कृतꣳस्वाहा' (यजु० ७।२६) । 'उसकी मैं मनसे वषट्कार के साथ आहुति देता हूँ' । इस प्रकार यह उसकी वषट्कार युक्त आहुति हो जाती है ॥२॥

अब अध्वर्यु छपी हुई वेदी से दो तिनके निकाल लेता है । दोनों अध्वर्यु यज्ञ के प्राण और उदान के स्वरूप में पहले जाते हैं । फिर प्रस्तोता यज्ञ की वाणी के रूप में । फिर उद्गाता यज्ञ के आत्मा या प्रजापति के रूप में, फिर प्रतिहर्ता चिकित्सक या व्यान

व्यानो वा ॥३॥

ताभ्वाऽएतान् । पञ्चऽर्त्विजो यजमानोऽन्वारभतऽएतावान्वै सर्वो यज्ञो यावन्त एते पञ्चऽर्त्विजो भवन्ति पाङ्क्तो वै यज्ञस्तद्यज्ञमेवैतद्यजमानोऽन्वारभते ॥४॥

अथान्यतरत्तृणम् । चात्वालमभिप्रास्यति देवानामुत्क्रमणमसीति यत्र वै देवा यज्ञेन स्वर्गं लोकꣳ समाश्नुवत तऽएतस्माच्चात्वालादूर्ध्वाः स्वर्गं लोकमुपोदक्रामंस्तद्यजमानमेवैतत्स्वर्ग्यं पन्थानमनुसंख्यापयति ॥५॥

अथान्यतरत्तृणम् । पुरस्तादुद्गातृणामुपास्यति तूष्णीमेव स्तोमो वाऽएष प्रजापतिर्यदुद्गातारः स इदꣳ सर्वं युतऽइदꣳ सर्वꣳ सम्भवति तस्माऽएवैतत्तृणमपि दधाति तथो हाध्वर्युं न युते नैनꣳ सम्भवत्यथ यदा जपन्ति जपन्ति ह्येवोद्गातारः ॥६॥

अथ स्तोत्रमुपाकरोति । सोमः पवतऽइति स वै परागेव स्तोत्रमुपाकरोति पराञ्च स्तुवते देवान्वाऽएतानि स्तोत्राण्यभ्युपावहन्ति यत्पवमानाः पराञ्चो ह्येतैर्देवाः स्वर्गं लोकꣳ समाश्नुवत तस्मात्परागेव स्तोत्रमुपाकरोति पराञ्च स्तुवते ॥७॥

उपावर्तध्वमिति वाऽअन्यानि स्तोत्राणि । अभ्यावर्तं धुर्यं स्तुवतऽइमा वै प्रजा

के रूप में ॥३॥

इन पाँचों को यजमान पीछे से साधता है । इतना ही तो सब यज्ञ है जितने यह पाँच ऋत्विज हैं । यज्ञ पाँच भाग वाला है । इसलिये यजमान इस प्रकार इस यज्ञ को साधता है ॥४॥

अब अध्वर्यु एक तिनके को चात्वाल पर फेंक देता है । यह कहकर—'देवानामुल्कमणमसि' (यजु० ७।२६) । 'तू देवताओं की सीढ़ी है' (स्वर्ग जाने के लिये) । जब देव यज्ञ से स्वर्ग लोक को गये तो इस चात्वाल से ऊपर उठकर स्वर्ग लोक को गये । इस प्रकार वह यजमान को भी स्वर्ग का रास्ता बताता है ॥५॥

दूसरे तिनके को वह उद्गाताओं के आगे चुपके से फेंक देता है । यह जो उद्गाता हैं वे स्तोम प्रजापति हैं । यह (प्रजापति) इस सब को अपने में खींच लेता है । इस सब को अपना कर लेता है । इसी को यह तिनका दिया जाता है । इस प्रकार वह अध्वर्यु को नहीं खींचता और न उसको अपना बनाता है । और जब वे जाप करते हैं—क्योंकि उद्गाता लोग अब जाप करते हैं—॥६॥

तो वह स्तोत्र पढ़ता है यह कहकर कि 'सोम पवते' या सोम शुद्ध हो रहा है । वह स्तोत्र को सीधा (पराग एव—बिना अन्य किसी कृत्य के) पढ़ता है । वे सब भी सीधा ही पढ़ते हैं । यह स्तोत्र जिनको 'पवमान' कहते हैं सीधे देवों को पहुँचाये जाते हैं । देव इन्हीं के द्वारा तो स्वर्गलोक को पहुँचे थे । इसीलिये वह सीधा इस स्तोत्र को पढ़ता है और वे भी सीधे इस स्तोत्र को पढ़ते हैं ॥७॥

'पीछे लौटिये' यह कहकर वह और स्तोत्रों (धुर्यों को) पढ़ता है और पीछे लौट-

एतानि स्तोत्राण्यभ्युपावृत्तास्तस्मादिमाः प्रजाः पुनरभ्यावर्त्तं प्रजायन्ते ॥८॥

अथ यदत्र बहिष्पवमानेन स्तुवते । अत्र हवाऽअसावग्रेऽआदित्य आस तमृतवः परिगृह्यैवात ऊर्ध्वाः स्वर्गं लोकमुपोदक्रामन्तस एष ऋतुषु प्रतिष्ठितस्तपति तथो एवैतद्-ऋत्विजो यजमानं परिगृह्यैवाद ऊर्ध्वाः स्वर्गं लोकमुपोत्क्रामन्ति तस्मादत्र बहिष्पवमानेन स्तुवते ॥९॥

नौर्ह वाऽएषा स्वर्ग्या । यद्बाहिष्पवमानं तस्या ऋत्विज एव स्फयाश्चारित्राश्च स्वर्गस्य लोकस्य सम्पारणास्तस्या एक एव मज्जयिता य एव निन्द्यः स यथा पूर्णमभ्या-रुह्य मज्जयेदेवꣳ हैनाꣳ स मज्जयति तद्वै सर्व एव यज्ञो नौः स्वर्ग्या तस्मादु सर्वस्मादेव यज्ञान्निन्द्यं परिविवाधिषेत ॥१०॥

अथ स्रुतऽएतो वाचं वदति । अग्नीदग्नीन्विहर बर्हिस्तृणीहि पुरोऽडाशाँ२॥ अलंकुरु पशूनेहीति विहरत्यग्नीदग्नीन्त्समिन्द्धऽएवैनानेतत्स्तृणाति बर्हिस्तीर्णं बर्हिषि समिद्धे देवेभ्यो जुहवानीति पुरोडाशाँ२॥ऽअलंकुर्वंति पुरोडाशैर्हि प्रचरिष्यन्भवति पशु-नेहीति पशुꣳ हयुपाकरिष्यन्भवति ॥११॥

अथ पुनः प्रपद्य । आश्विनं ग्रहं गृह्णात्याश्विनं ग्रहं गृहीत्वोपनिष्क्रम्य यूपं परि-

घर वह घुरों को पढते हैं । क्योंकि यह स्तोत्र इन प्रजाओं के लिये पढे जाते हैं । इनसे ही यह प्रजा बार-बार उत्पन्न होती है ॥८॥

यहाँ (चात्वाल के पास) बहिष्पवमान स्तोत्रों को क्यों पढते हैं ? आरम्भ में यह सूर्य यहीं था । अतः इसको लेकर स्वर्ग को गये । वहाँ वह ऋतुओं में स्थापित होकर तपता है । इसी प्रकार ऋत्विज लोग यजमान को लेकर स्वर्ग को ले जाते हैं । इसलिये यहाँ बहिष्पवमान स्तोत्र पढे जाते हैं ॥९॥

बहिष्पवमान स्वर्ग की नौका है । ऋत्विज लोग इस नौका के स्फय और चारित्र अर्थात् डांड आदि हैं । यह स्वर्ग पहुँचाने के सम्पारण (साधक) है । (नौका में) यदि एक भी बुरा आदमी होता है तो वह नौका को डुबो देता है । उसी प्रकार जैसे ऊपर तक भारी नौका में यदि एक भी आ जाय तो वह डूब जाती है । हर एक यज्ञ स्वर्ग की नौका है इसलिये सब यज्ञों से बुरे आदमियों को अलग रखना चाहिये ॥१०॥

स्तोत्र पढे जाने के बाद यह बात बोलता है 'अग्नीध् अग्नियों को फैला' । कुशों को फैला, पुरोडाश बना । पशु को ला' । अग्नीध् अग्नियों को फैलाता अर्थात् प्रज्वलित करता है । कुशों को फैलाता है यह सोचकर कि कुशों को फैलाकर प्रज्वलित अग्नि में देवों के लिये आहुति दूँगा । 'पुरोडाश बना' यह इसलिये कहता है कि पुरोडाशों का प्रयोग करने वाला है । 'पशु को ला' क्योंकि पशु को तैयार करने वाला होता है ॥११॥

(हविर्धान में) फिर आकर आश्विन ग्रह को निकालता है । आश्विन ग्रह को निकाल

व्ययति परिवीय यूपं पशुमुपाकरोति रसमेवास्मिन्नेतद्दधाति ॥१२॥

स प्रातः सवनऽआलब्धः । आ तृतीयसवनाच्छृप्यमाण उपशेते सर्वस्मिन्नेवैतद्यज्ञे रसं दधाति सर्वं यज्ञꣳ रसेन समर्धयति ॥१३॥

तस्मादाग्नेयमग्निष्टोमऽआलभेत । तद्धि सलोम यदाग्नेयमग्निष्टोमऽआलभेत यदुक्थ्यः स्यादैन्द्राग्न द्वितीयमालभेतैन्द्राग्नानि ह्युक्थानि यदि षोडशी स्यादैन्द्र तृतीयमालभेतेन्द्रो हि षोडशी यद्यतिरात्रः स्यात्सारस्वतं चतुर्थमालभेत वाग्वै सरस्वती योषा वै वाग्योषा रात्रिस्तद्यथायथं यज्ञक्रतून् व्यावर्तयति ॥१४॥

अथ सवनीयैः पुरोडाशैः प्रचरति । देवो वै सोमो दिवि हि सोमो वृत्रो वै सोम आसीत्तस्यैतच्छरीरं यद्गिरयो यदश्मानस्तदेषोशना नामौषधिर्जायतऽइति ह स्माह श्वेतकेतुरौद्दालकिस्तामेतदाहृत्याभिषुण्वन्तीति ॥१५॥

स यत्पशुमालभते । रसमेवास्मिन्नेतद्दधात्यथ यत्सवनीयैः पुरोडाशैः प्रचरति मेधमेवास्मिन्नेतद्दधाति तथो हास्यैष सोम एव भवति ॥१६॥

सर्वऽऐन्द्रा भवन्ति । इन्द्रो वै यज्ञस्य देवता तस्मात्सर्वऽऐन्द्रा भवन्ति ॥१७॥

कर बाहर आकर यूप के चारों ओर रस्सी बाँधता है और यूप में रस्सी बाँधकर पशु को तैयार करता है । इस प्रकार वह उस (सोम) में रस धारण कराता है ॥१२॥

यह (पशु) प्रातः सवन में मारा जाकर तीसरे सवन पकता रहता है । इस सम्पूर्ण यज्ञ में रस धारण करता है । सब यज्ञ को रस से युक्त करता है ॥१३॥

इसलिये अग्निष्टोम में आग्नेय पशु का आलभन करे । अग्निष्टोम में आग्नेय पशु का आलभन सलोम अर्थात् उपयुक्त है । यदि उक्थ्य यज्ञ हो तो दूसरे स्थान पर इन्द्र-अग्नि सम्बन्धी पशु का आलभन करे । क्योंकि उक्थ इन्द्र-अग्नि के हैं । यदि षोडशी हो तो तीसरे स्थान में इन्द्र सम्बन्धी पशु का आलभन करे । क्योंकि षोडशी इन्द्र का है । यदि अतिरात्र हो तो सरस्वती सम्बन्धी पशु का चौथे स्थान में आलभन करे । वाणी सरस्वती है । वाणी स्त्री है । रात्रि स्त्री है । इस प्रकार वह क्रमशः यज्ञों को अलग-अलग कर देता है ॥१४॥

अब सवन सम्बन्धी पुरोडाशों की आहुति देता है । सोम देव है । सोम द्यौलोक में था । सोम वृत्र था । जो पहाड़ और पत्थर हैं वे इसके शरीर हैं । श्वेतकेतु औद्दालकि ने कहा कि वहीं 'उशाना' नाम की ओषधि उत्पन्न होती है जिसको लाकर निचोड़ते हैं ॥१५॥

जब पशु का आलभन करता है तो उसमें रस डालता है । सवनीय पुरोडाश की आहुति देता तो उसमें मेध डालता है । इस प्रकार यह सोम ही हो जाता है ॥१६॥

यह सब इन्द्र के होते हैं । इन्द्र यज्ञ का देवता है । इसलिये यह सब इन्द्र का होता है ॥१७॥

अथ यत्पुरोडाशः धानाः करम्भोदध्यामिक्षेति भवति या यज्ञस्य देवतास्ताः सुप्रीता असन्निति ॥१८॥

इदं वाऽअपूपमशित्वा कामयते । धानाः सादेयं करम्भमश्नीयां दध्यक्षीयामामिक्षामक्षीयामिति ते सर्वे कामा या यज्ञस्य देवतास्ताः सुप्रीता असन्नित्यथ यदेषा प्रातःसवनऽएव मैत्रावरुणी पयस्यावद्कृप्ता भवति नेतरयोः सवनयोः ॥१९॥

गायत्री वै प्रात सवन वहति । त्रिष्टुम्माध्यन्दिनꣳ सवन जगती तृतीयसवनं तद्वाऽअनेकाकिन्येव त्रिष्टुम्माध्यन्दिनꣳ सवन वहति गायत्र्या च बृहत्या चानेकाकिनी जगती तृतीयसवनं गायत्र्योष्णिहककुब्भ्यामनुष्टुभा ॥२०॥

गायत्र्येवैकाकिनी प्रात सवनं वहति । सैताभ्या पङ्क्तभ्याꣳ स्तोत्रपङ्क्तया च हविष्पङ्क्तया च चत्वार्याज्यानि वहिष्पवमान पञ्चम पञ्चपरापङ्क्तिः सैतया स्तोत्रपङ्क्तयानेकाकिनी गायत्री प्रातःसवन वहति ॥२१॥

इन्द्रस्य पुरोडाशः । हर्योर्धानः पूष्णः करम्भः सरस्वत्यै दधि मित्रावरुणयोः पयस्या पञ्चपदा पङ्क्तिः सैतया हविष्पङ्क्तयानेकाकिनी गायत्री प्रातःसवनं वहत्येतस्या एव पङ्क्तेः सम्पदः कामाय प्रात सवनऽएवैषा मैत्रावरुणी पयस्यावद्कृप्ता भवति नेतरयोः सवनयोः ॥२२॥ ब्राह्मणम् ॥ ४ ॥ [२, ५] ॥ द्वितीयोऽध्यायः ॥ [२६] ॥

पुरोडाश, धान, करम्भ, दही, आमिक्षा इसलिये होते हैं कि यज्ञ के देवता इनसे प्रसन्न हो जायँ ॥१८॥

रोटी खाकर मनुष्य की इच्छा होती है कि मैं धान खाऊँ, करम्भ खाऊँ, दही खाऊँ, आमिक्षा खाऊँ । यह सब कामनायें हैं कि जो यज्ञ के देवता हों वे सब प्रसन्न हों । मैत्रावरुणी पयस्या प्रात सवन में ही क्यों की जाती है, अन्य सवनों में क्यों नहीं ? ॥१९॥

इसलिये कि गायत्री प्रातः सवन को (देवों तक) ले जाती है । त्रिष्टुप् दोपहर के सवन को और जगती तीसरे सवन को । दोपहर के सवन को त्रिष्टुप् अकेली नहीं ले जाती किन्तु गायत्री और बृहती की सहायता से । जगती भी तृतीय सवन को अकेली नहीं ले जाती किन्तु गायत्री, उष्णिक , ककुभ् और अनुष्टुभ् के साथ ॥२०॥

गायत्री ही अकेली प्रात. सवन को ले जाती है । दो पङ्क्तियों के साथ अर्थात् स्तोत्रपङ्क्ति और हविष्पङ्क्ति के साथ । आज्यस्तोत्र चार होते हैं और हविष्पवमान पाँचवाँ है । पङ्क्ति छन्द में पाँच पाद होते हैं । इस पङ्क्ति के साथ, न कि अकेली गायत्री प्रातः सवन को ले जाती है ॥२१॥

पुरोडाश इन्द्र का होता है । धान दो घोड़ों का, करम्भ पूषा का, दही सरस्वती का, पयस्या मित्र वरुण की । पङ्क्ति में पाँच पद होते हैं । हवियों की इस पङ्क्ति के साथ, न कि अकेली, गायत्री प्रातः सवन को ले जाती है । इस पङ्क्ति को पूरा करने के लिये ही मैत्रावरुणी पयस्या प्रात' सवन में ही की जाती है, अन्य सवनों में नहीं ॥२२॥

अध्याय ३—ब्राह्मण १

मन्त्रयित्वा समुपहूता स्म इत्युक्तोत्तिष्ठति । पुरोडाशवृगलमादाय तद्यत्रैतदुपसन्नोऽच्छावाकोऽन्वाह तदस्मै पुरोडाशवृगल पाणावादधदाहाच्छावाक वदस्व यत्ते वाद्यमित्यहीयत वाऽअच्छावाकः ॥१॥

तमिन्द्राग्नीऽअनुसमतनुताम् । प्रजाना प्रजात्यै तस्मादैन्द्राग्नोऽच्छावाकः स एतेन च हविषा यदस्माऽएतत्पुरोडाशवृगल पाणावादधात्येतेन चार्षेयेण यदेतदन्वाह तेनानुसमश्नुते ॥२॥

स वै सन्नेऽच्छावाके । ऋतुग्रहैश्चरति तद्यत्सन्नेऽच्छावाकऽ ऋतुग्रहैश्चरति मिथुन वा अच्छावाक ऐन्द्राग्नो ह्यच्छावाको द्वौ हीन्द्राग्नी द्वन्द्वꣳ हि मिथुन प्रजननꣳ स एतस्मान्मिथुनात्प्रजननाद्ऋतून्त्संवत्सरं प्रजनयति ॥३॥

यद्वेव सन्नेऽच्छावाके । ऋतुग्रहैश्चरति सर्वे वाऽऋतवः संवत्सरः सर्वमेवैतत्प्रजनयति तस्मात्सन्नेऽच्छावाकऽऋतुग्रहैश्चरति ॥४॥

(सोम) पान करके और यह कहकर कि 'हम सब को साथ निमन्त्रण दिया गया था', अध्वर्यु उठ खड़ा होता है। जहाँ अच्छावाक अनुवाक पढ़ने को है वहाँ पुरोडाश के टुकड़े को ले जाकर और उसके हाथ में देकर कहता है, 'अच्छावाक, यह जो तुझको कहना है'। अच्छावाक का सोम से बहिष्कार हो चुका था ॥१॥

इन्द्र और अग्नि ने उसको प्रजा की उत्पत्ति के लिये बनाये रक्खा। इसलिये अच्छावाक इन्द्र-अग्नि का होता है। इस हवि के द्वारा, इस पुरोडाश के टुकड़े के द्वारा जिसको उसने हाथ में रक्खा है और उस ऋषि-वाणी के द्वारा (वेद मन्त्रों द्वारा) जिसको वह जपता है यह इन्द्र और अग्नि उसको बचाते हैं ॥२॥

अच्छावाक के बैठ जाने पर ऋतु ग्रहों की आहुति देता है। अच्छावाक के बैठ जाने पर ऋतु ग्रहों की आहुति इसलिये देता है कि अच्छावाक जोड़ा है अच्छावाक इन्द्र और अग्नि का है। इन्द्र और अग्नि दो हैं। जोड़े का अर्थ है उत्पत्ति। वह इस उत्पत्ति करने वाले जोड़े से ऋतुओं और संवत्सर को उत्पन्न करता है ॥३॥

अच्छावाक के बैठ चुकने पर ऋतु-ग्रहों की आहुति इसलिये भी देता है कि ऋतु 'सब' हैं, संवत्सर 'सब' है। इस प्रकार वह सब की उत्पत्ति करता है। इसलिये वह अच्छावाक के बैठ चुकने पर ऋतु ग्रहों की आहुति देता है ॥४॥

तान्वै द्वादश गृह्णीयात् । द्वादश वै मासाः संवत्सरस्य तस्माद्द्वादश गृह्णीयादथो ऽअपि त्रयोदश गृह्णीयादस्ति त्रयोदशो मास इति द्वादश रेव गृह्णीयादिषैव सम्पत् ॥५॥

द्रोणकलशाद्गृह्णाति । प्रजापतिर्वै द्रोणकलशः स एतस्मात्प्रजापतेर्ऋतूंस्च संवत्सरं प्रजनयति ॥६॥

उभयतो मुखाभ्यां पात्राभ्यां गृह्णाति । कुतस्तयोरन्तो ये ऽउभयतो मुखे तस्मादयमनन्तः संवत्सरः परिप्लवते त गृहीत्वा न रादयति तस्मादयमसन्न संवत्सरः ॥७॥

नानुवाक्यामन्वाह । ह्वयति वा ऽअनुवाक्ययागतो ह्येनायमृतुर्यदि दिवा यदि नक्तं नानुवषट्करोति नेहतूनपवृणजाऽइति सहैव प्रथमो ग्रहो गृह्णीतः सहोक्तमाविदिमेवैतत्सर्वꣳ संवत्सरेण परिगृह्णीतस्तदिदꣳ सर्वं संवत्सरेण परिगृहीतम् ॥८॥

निरेवान्यतरः क्रामति । प्रान्यतरः पद्यते तस्मादिमेऽन्वञ्चो मासा यन्त्यथ यदुभौ वा सह निष्क्रामेतामुभौ वा सह प्रपद्येयाता पृथगुहैवेमे मासा ईयुस्तस्मान्निरेवान्यतर क्रामति प्रान्यतरः पद्यते ॥९॥

तौ वाऽ ऋतुने षट् प्रचरतः । तद्देवा ऋहरसृजन्नऽर्तुमिरिति चतुस्तद्रात्रिमसृ-

उसको बारह (ग्रह) लेने चाहिये । सवत्सर के १२ महीने होते हैं । इसलिये बारह ग्रह लेने चाहिये । तेरह भी ले सकता है । क्योंकि तेरहवाँ महीना भी होता है । परन्तु बारह ही लेने चाहिये । यही पूर्ण है ॥५॥

यह ग्रह द्रोण कलश से लिये जाते हैं । द्रोण कलश प्रजापति है । वह इसी प्रजापति से ऋतुओं और सवत्सर को उत्पन्न करता है ॥६॥

दो मुख वाले पात्रों से लेता है । दो मुख वाले पात्रों का अन्त कहाँ ? इसलिये यह अनन्त सवत्सर घूमा करता है । इसको लेकर रखता नहीं । इसलिये यह सवत्सर निरन्तर है ॥७॥

न अनुवाक कहता है । अनुवाक से तो निमन्त्रण दिया जाता है । यह ऋतु तो पहले से ही आई हुई है दिन हो या रात हो । दुबारा वषट्कार भी नहीं कहता कि कहीं ऋतुओं को वापिस न कर दे । (अध्वर्यु और प्रतिप्रस्थाता) पहले ग्रहों को साथ-साथ लेते हैं । और पिछलों को भी साथ साथ । यह 'सव' सवत्सर द्वारा ग्रहण हो जाता है । यह 'सव' सवत्सर में शामिल है ॥८॥

एक (हविर्धान से) बाहर जाता है दूसरा भीतर आता है । इसलिये एक मास के बाद दूसरा आता है (एक जाता, दूसरा आता है) । यदि दोनों साथ निकलें और साथ घुसें तो यह महीने अलग-अलग गुजरा करें । इसलिये एक बाहर जाता है और दूसरा भीतर आता है ॥९॥

वे दोनों 'ऋतु के लिये' छः बार आहुति देते हैं । इसी से देवों ने दिन बनाया ।

जन्त स यद्धैतावदेवाभविष्यद्रात्रिर्हैवाभविष्यन्न व्यरंस्यत् ॥१०॥

तौ वाऽऋतुनेत्युपरिष्टाद्विद्वश्चरतः । तद्देवा परस्तादहरददुस्तस्मादिदस्तमद्याहरथ रात्रिरथ श्वोऽहर्भविता ॥११॥

ऋतुनेति वै देवाः । मनुष्यानसृजन्तर्तुभिरिति पशून्त्स यत्तन्मध्ये येन पशूनसृजन्त तस्मादिमे पशव उभयतः परिगृहीता वशमुपेता मनुष्याणाम् ॥१२॥

तौ वाऽऋतुनेति षट् प्रचर्य । इतरथा पात्रे विपर्यस्येते ऽऋतुभिरिति चतुश्चरित्वेतरथा पात्रे विपर्यस्येतेऽऋन्यतरत एव तद्देवा अहरसृजन्तान्यतरतो रात्रिमन्यतरत एव तद्देवा मनुष्यानसृजन्तान्यतरत पशून् ॥१३॥

अथातो गृह्णात्येव । उपयामगृहीतोऽसि मधवे त्वेत्येताध्वर्युर्गृह्णात्युपयामगृहीतोऽसि माधवाय त्वेति प्रतिप्रस्थातैतावेव वासन्तिकौ स यद्वसन्तऽओषधयो जायन्ते वनस्पतय. पच्यन्ते तेनो हैतौ मधुश्च माधवश्च ॥१४॥

उपयामगृहीतोऽसि । शुक्राय त्वेत्येताध्वर्युर्गृह्णात्युपयामगृहीतोऽसि शुचये त्वेति प्रतिप्रस्थातैतावेव ग्रैष्मौ स यदेतयोर्बलिष्ठं तपति तेनो हैतौ शुक्रश्च शुचिश्च ॥१५॥

'ऋतुओं के लिये इससे चार बार । इससे उन्होंने रात बनाई । यदि इतना ही होता तो रात ही होती, यह कमी समाप्त न होती ॥१०॥

'ऋतुना' इससे दो बार और आहुति देता है । इससे देवों ने फिर दिन दिया । इसलिये अब दिन है, फिर रात होगी । फिर कल ॥११॥

'ऋतुना' (ऋतु से) देवों ने मनुष्यों को उत्पन्न किया । 'ऋतुभि.' (ऋतु से) पशुओं को । पशुओं को मनुष्यों के बीच में बनाया इसलिये पशु दोनों ओर से घिर कर मनुष्यों के वश में हो गये ॥१२॥

'ऋतुना' इससे छ बार आहुति देकर पात्रों को दूसरी ओर लौट देते हैं । 'ऋतुभि ' इससे चार बार आहुति देकर पात्रों को दूसरी ओर लौट देते हैं । एक ओर से देवों ने दिन बनाया, दूसरी से रात । एक ओर से देवों ने मनुष्य बनाया, दूसरी ओर से पशु ॥१३॥

वह इन (ऋतु ग्रहों को द्रोण कलश से) लेता है । 'उपयामगृहीतोऽसि मधवे त्वा' (यजु० ७।३०) । इससे अध्वर्यु लेता है । 'उपयामगृहीतोऽसि माधवाय त्वा' (यजु० ७।३०) । इससे प्रतिप्रस्थाता । 'मधु और माधव' यह दो वसन्त के महीने हैं क्योंकि वसन्त में ही ओषधियाँ उत्पन्न होती हैं और वनस्पति पकती हैं । इसलिये यह मधु और माधव हैं ॥१४॥

'उपयामगृहीतोऽसि शुक्राय त्वा' (यजु० ७।३०) । इससे अध्वर्यु लेता है । 'उपयामगृहीतोऽसि शुचये त्वा' (यजु० ७।३०) । इससे प्रतिप्रस्थाता । यह दोनों ग्रीष्म के महीने हैं इनमें धूप बड़ी होती है । इसलिये यह शुक्र और शुचि दो महीने हुये ॥१५॥

उपयामगृहीतोऽसि नभसे त्वेत्येवाध्वर्य्युर्गृह्णात्युपयामगृहीतोऽसि नभस्याय त्वेति प्रतिप्रस्थातैतावेव वार्षिकावमुतो वै दिवो वर्षति तेनो हैतौ नभश्च नभस्यश्च ॥१६॥

उपयामगृहीतोऽसि । इषे त्वेत्येवाध्वर्युर्गृह्णात्युपयामगृहीतोऽस्यूर्जे त्वेति प्रतिप्रस्थातैतावेव शारदौ स यच्छरद्यन्नस ओषधयः पच्यन्ते तेनो हैताविषश्चोर्जश्च ॥१७॥

उपयामगृहीतोऽसि सहसे त्वेत्येवाध्वर्युर्गृह्णात्युपयामगृहीतोऽसि सहस्याय त्वेति प्रतिप्रस्थातैतावेव हैमन्तिकौ स यद्धेमन्त इमाः प्रजाः सहसैव स्वं वशमुपनयते तेनो हैतौ सहश्च सहस्यश्च ॥१८॥

उपयामगृहीतोऽसि तपसे त्वेत्येवाध्वर्युर्गृह्णात्युपयामगृहीतोऽसि तपस्याय त्वेति प्रतिप्रस्थातैतावेव शैशिरौ स यदेतयोर्मलिम्लुचं श्रयति तेनो हैतौ तपश्च तपस्यश्च ॥१९॥

उपयामगृहीतोऽसि । अꣳहसस्पतये त्वेति त्रयोदशं ग्रहं गृह्णाति यदि त्रयोदशं गृह्णीयादथ प्रतिप्रस्थाताध्वर्योः पात्रे सꣳस्रवमवनयत्याध्वर्युर्वा प्रतिप्रस्थातुः पात्रे

'उपयामगृहीतोऽसि नभसे त्वा' (यजु० ७।३०)। 'इससे अध्वर्यु लेता है'। 'उपयामगृहीतोऽसि नभस्याय त्वा' (यजु० ७।३०)। 'इससे प्रतिप्रस्थाता'। यह दोनों वर्षा के महीने हैं। इनमें वर्षा बहुत होती है। 'नभ' और 'नभस्य' यह दो वर्षा ऋतु के महीने हुये ॥१६॥

'उपयामगृहीतोऽसि इषे त्वा' (यजु० ७।३०)। 'इससे अध्वर्यु लेता है'। 'उपयामगृहीतोऽस्यूर्जे त्वा' (यजु० ७।३०)। 'इससे प्रतिप्रस्थाता'। यह दोनों शरद ऋतु के महीने हैं। क्योंकि शरद ऋतुओं में अन्न और रस पकता है। इसलिये शरद के इन महीनों का नाम इष और ऊर्ज है ॥१७॥

'उपयामगृहीतोऽसि सहसे त्वा' (यजु० ७।३०)। 'इससे अध्वर्यु लेता है'। 'उपयामगृहीतोऽसि सहस्याय त्वा' (यजु० ७।३०)। 'इससे प्रतिप्रस्थाता'। यह दोनों हेमन्त के महीने हैं क्योंकि हेमन्त इन प्रजाओं को साहस के साथ वश में लाता है। इसलिये सहस और साहस्य यह दो हेमन्त के महीने हुये ॥१८॥

'उपयामगृहीतोऽसि तपसे त्वा' (यजु० ७।३०)। 'इससे अध्वर्यु लेता है'। 'उपयामगृहीतोऽसि तपस्याय त्वा' (यजु० ७।३०)। 'इससे प्रतिप्रस्थाता'। यह दोनों शिशिर ऋतु के महीने हैं। क्योंकि इनमें पाला बहुत पड़ता है। इसलिये तप और तपस्य यह शिशिर के महीने हैं ॥१९॥

'उपयामगृहीतोऽसि अꣳहसस्पतये त्वा' (यजु० ७।३१)। 'इससे तेरहवाँ ग्रह (अध्वर्यु) लेता है'। यदि तेरहवाँ लेना हो तो प्रतिप्रस्थाता अध्वर्यु के पात्र में बचा कुचा

सꣳस्रवमवनयन्त्याहृति भक्षम् ॥२०॥

अथ प्रतिप्रस्थातामक्षितेन पात्रेण । ऐन्द्राग्नं गृहणाति तद्यदभक्षितेन पात्रेणैन्द्राग्नं ग्रहं गृह्णाति न वाऽऋतुग्रहाणामनुवषट्कुर्वन्त्येतेभ्यो वाऽऐन्द्राग्नं ग्रहं ग्रहीष्यन्भवति तदस्यैन्द्राग्नेनैवानुवषट्कृता भवन्ति ॥२१॥

यद्वैवैन्द्राग्नं ग्रहं गृह्णाति । सर्वं वाऽइदं प्राजीजनद्य ऋतुग्रहानग्रहीत्स इदꣳ सर्वं प्रजनय्येदमेवैतत्सर्वं प्राणोदानयोः प्रतिष्ठापयति तदिदꣳ सर्वं प्राणोदानयोः प्रतिष्ठितमिन्द्राग्नी हि प्राणोदानाविमे हि द्यावापृथिवी प्राणोदानावनयोर्हीदꣳ सर्वं प्रतिष्ठितम् ॥२२॥

यद्वैवैन्द्राग्नं ग्रहं गृह्णाति । सर्वं वाऽइदं प्राजीजनद्य ऋतुग्रहानग्रहीत्स इदꣳ सर्वं प्रजनय्यास्मिन्नेवैतत्सर्वंस्मिन्प्राणोदानौ दधाति तावेमावस्मिन्तत्सर्वंस्मिन्प्राणोदानौ हिनौ ॥२३॥

अथातो गृह्णात्येव । इन्द्राग्नीऽआगतꣳ सुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता । उपयामगृहीतोसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वेति सादयतीन्द्राग्नि-

छोड़ देता है या अध्वर्यु प्रतिप्रस्थाता के पात्र में बचा-कुचा छोड देता है। (अध्वर्यु) अब पान करने के लिये (सदस् में) ले जाता है ॥२०॥

अब प्रतिप्रस्थाता उस पात्र से जिसमें से पिया नहीं गया इन्द्र-अग्नि के ग्रह को लेता है। ऐसे पात्र से इन्द्र-अग्नि के ग्रह को क्यों लेता है, जिसमें पिया न गया हो ? इसलिये कि ऋतु-ग्रहों पर तो दुबारा वषट्कार हुआ नहीं। और उन्हीं के लिये इन्द्र-अग्नि ग्रह लेता है। इस प्रकार इन्द्र-अग्नि के द्वारा इनका वषट्कार हो जाता है ॥२१॥

इन्द्र-अग्नि ग्रह को इसलिये भी लेता है कि ऋतु ग्रहों को लेकर ही इसने इन 'सब' को उत्पन्न किया। वह इन 'सब' को उत्पन्न करके प्राण और उदान में इनकी प्रतिष्ठा करता है। इसीलिये यह 'सब' प्राण और उदान में प्रतिष्ठित हैं। इन्द्र-अग्नि प्राण और उदान हैं। इन्हीं में यह सब प्रतिष्ठित हैं ॥२२॥

इन्द्र-अग्नि ग्रह को लेने का यह भी प्रयोजन है कि ऋतु ग्रहों से उसने इस 'सब' को उत्पन्न किया और इस 'सब' को उत्पन्न करके 'प्राण और उदान' की इस 'सब' में प्रतिष्ठा करता है इसलिये प्राण और उदान इस सब में प्रतिष्ठित हैं ॥२३॥

वह इसको (द्रोण कलश से) इस मन्त्र से लेता है, 'इन्द्राग्नीऽआगतꣳसुत गीर्भिर्नभो वरेण्यम् अस्य पात धियेषिता । उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वा' (यजु० ७।३१, ऋ० ३।१२।१)। 'हे इन्द्र-अग्नि हमारी वाणियों द्वारा तुम दोनों आओ इस निचोड़े हुये और आदित्य के समान वरने योग्य सोम के पास। बुद्धि के द्वारा प्रेरित हुये तुम दोनों इसको पियो। आश्रय के लिये लिया गया है तू इन्द्र और अग्नि के लिये तुझको' । 'एष ते

म्यथ्सं ह्येनं गृह्णाति ॥२४॥

अथ वैश्वदेवं ग्रहं गृह्णाति । सर्वं वाऽइदं प्राजीजनद्य ऋतुग्रहानग्रहीत्स यद्वैतावदेवाभविष्यद्यावत्यो हैवाग्रे प्रजाः सृष्टास्तावत्यो हैवाभविष्यन्न प्राजनिष्यन्त ॥२५॥

अथ यद्वैश्वदेवं ग्रहं गृह्णाति । इदमेवैतत्सर्वमिमाः प्रजा यथायथं व्यवसृजति तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्ते शुक्रपात्रेण गृह्णात्येष वै शुक्रो य एष तपति तस्य ये रश्मयस्ते विश्वे देवास्तस्माच्छुक्रपात्रेण गृह्णाति ॥२६॥

अथातो गृह्णात्येव । ओमासश्चर्षणीधृतो विश्वे देवास आगत । दाश्वांसो दाशुषः सुतम् । उपयामगृहीतोसिविश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति सादयति विश्वेभ्यो ह्येनं देवेभ्यो गृह्णाति ॥२७॥ ब्राह्मणम् ॥ ५ [३. १.]

योनिरिन्द्राग्निभ्यां त्वा' (यजु० ७।३१) । 'यह तेरी योनि है । इन्द्र और अग्नि के लिये तुझको' । यह कहकर वह रख देता है क्योंकि इन्द्र और अग्नि के लिये उसने लिया था ॥२४॥

अब 'वैश्वदेव' ग्रह को लेता है । ऋतु-ग्रहों को लेकर ही उसने इस 'सब' को उत्पन्न किया । यदि इतना ही होता तो जितनी प्रजा पहले उत्पन्न हो गई उतनी ही रह जाती, आगे उत्पन्न न होती ॥२५॥

वैश्वदेव ग्रह को इसलिये भी लेता है कि यह इन सब प्रजाओं को क्रमशः कर देता है । इससे यह प्रजा बार-बार उत्पन्न होती रहती है । इसको शुक्र-पात्र से लेता है । यह जो सूर्य तपता है शुक्र (तेजों से) तपता है जिसकी यह सब किरणें हैं । यही विश्वेदेव हैं इसलिये शुक्र-ग्रह से लेता है ॥२६॥

यह (द्रोण कलश से सोम) इस मन्त्र से निकलता है, 'ओमासश्चर्षणीधृतो विश्वे देवासऽआगत । दाश्वांसो दाशुषः सुतम् । उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्यः (यजु० ७।३२, ऋ० १।३।७) । 'हे रक्षक और मनुष्यों के पोषक विश्वेदेव, आओ । आप कामनाओं के देने वाले हैं । देने वाले के निचोड़े हुये सोम को (पीने के लिये) तुझको आश्रय के लिये लिया गया है । विश्वेदेवों के लिये तुझको' । 'एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः' (यजु० ७।३२) । 'यह तेरी योनि है । विश्वेदेवों के लिये तुझको' ऐसा कहकर यह उसको रख देता है । क्योंकि विश्वेदेवों के लिये इसको लेता है ॥२७॥

अध्याय ३—ब्राह्मण २

गृणाति ह वाऽएतद्धोता यच्छꣳसति । तस्मा एतद्गृणते प्रत्याहाध्वर्युरागृणाति तस्मात्प्रतिगरो नाम ॥१॥

तं वै प्राञ्चमासीनमाह्वयते । सर्वे वाऽअन्यऽउद्गातुः प्राञ्च आर्त्विज्यं कुर्वन्ति तथो हास्यैतत्प्रागेवार्त्विज्यं कृतं भवति ॥२॥

प्रजापतिर्वाऽउद्गाता । योषाऽग्र्योता स एतत्प्रजापतिरुद्गाता योषायामृचि होतरि रेतः सिञ्चति यत्स्तुते तद्धोता शस्त्रेण प्रजनयति तच्छꣳसति यथायं पुरुषः शितस्तद्वदेतच्छꣳसति तस्माच्छस्त्रं नाम ॥३॥

तदुपपल्ययाय प्रतिगृणाति । इदमेवैतद्रेतः सिक्तमुपनिमदयथ यत्परा ङ् तिष्ठन्प्रतिगृणीयात्परागु हैवैतद्रेतः सिक्तं प्रणश्येत्तन्न प्रजायेत सम्यञ्चा ऽउचैवैतद्भूत्वैयद्रेतः सिक्तं प्रजनयतः ॥४॥

यातयामानि वै देवैश्छन्दाꣳसि । छन्दोभिर्हि देवाः स्वर्गं लोकꣳ समाश्नुवत

जब होता शस्त्र पढ़ता है तो गाता है । और जब वह गाता है तो अध्वर्यु उसके प्रत्युत्तर में गाता है । इसलिये उसको 'प्रतिगर' (प्रति + आ + गृणाति) कहते हैं ॥१॥

होता पूर्वाभिमुख बैठे हुये अध्वर्यु का आह्वान करता है । उद्गाता को छोड़कर और सब पूर्वाभिमुख होकर ऋत्विज का कार्य करते हैं । इसलिये इसका ऋत्विक का कार्य भी पूर्वाभिमुख ही होता है ॥२॥

उद्गाता प्रजापति है । ऋचा होता रूपी स्त्री है । यह प्रजापति रूप उद्गाता पुरुष ऋचारूपी होता स्त्री में वीर्य का सिंचन करता है जब कि वह स्तुति करता है । होता शस्त्र के रूप में जनता है (जैसे मा बच्चे को जनती है) । यह पैना करता है जैसे यह पुरुष पैना किया जाता है (चाकू पैना करने के लिये सान पर रखते हैं । इस प्रकार 'शो' का अर्थ है पैना करना, बनाना) चूँकि पैना करते हैं इसलिये 'शो' से 'शस्त्र' शब्द बना । ('शो तनूकरणे' धातु के रूप 'श्यति' आदि होते हैं) ॥३॥

(अध्वर्यु) घूमकर (होता की ओर मुँह करके) प्रत्युत्तर में गाता है । इस प्रकार यह सींचे हुये वीर्य को तेज कर देता है । यदि मुँह फेर कर गावे तो सींचा हुआ वीर्य नष्ट हो जाय, और उत्पत्ति न हो । (स्त्री और पुरुष) एक दूसरे की ओर मुख करके सींचे हुये वीर्य से उत्पत्ति करते हैं ॥४॥

देवों द्वारा छन्द यज्ञ दिये गये । क्योंकि छन्दों द्वारा ही देव स्वर्गलोक को गये ।

मदो वै प्रतिगरो यो वाऽऋचि मदो यः सामन्रसो वै स तच्छन्दःस्वेवैतद्रसं दधात्ययातयामानि करोति तैरयातयामैर्यज्ञं तन्वते ॥५॥

तस्माद्यद्यर्धर्चेशः शथ्सेत् । अर्धर्चेऽर्धर्चं प्रतिगृणीयाद्यदि पद्यःशथ्सेत्पदे पदे प्रतिगृणीयाद्यत्र वै शथ्स सन्नवानिति तदसुररक्षसानि यज्ञमन्वचरन्ति तत्प्रतिगरेण संदधाति नाप्द्राणाथ्स रक्षसामनन्ववचाराय यजमानस्यो चैवैतद्भ्रातृव्यलोकं छिनत्ति ॥६॥

चतुरक्षराणि हवाऽग्रे छन्दाथ्स स्यासुः । ततो जगती सोममच्छापतत्सा त्रीण्यक्षराणि हित्वाजगाम ततस्त्रिष्टुप्सो ममच्छापतत्सैकमक्षरथ्हि त्वाजगाम ततो गायत्री सोममच्छापतत्सैतानि चाक्षराणि हरन्त्यागच्छत्सोमं च ततोऽष्टाक्षरा गायत्र्यभवत्तस्मादाहुरष्टाक्षरा गायत्रीति ॥७॥

तया प्रातः सवनमतन्वत । तस्माद्गायत्र प्रातः सवनं तयैव माध्यन्दिनथ्स सवनमतन्वत ता थ्स ह त्रिष्टुबुवाचोप त्वाहमायानि त्रिभिरक्षरैरुप माह्वयस्व मा मा यज्ञादन्तर्गा इति तथेति तामुपाह्वयत तत एकादशाक्षरा त्रिष्टुबभवत्तस्मादाहुस्त्रैष्टुभं माध्यन्दिनथ्स सवनमिति ॥८॥

प्रतिगर (प्रत्युत्तर का गाना) यह है । यह जो ऋग् में मद है और यह जो साम में, वही रस है । यह रस वह छन्दों में रख देता है । अर्थात् छन्दों की थकावट दूर कर देता है । इन फिर से पुष्ट छन्दों से यज्ञ करता है ॥५॥

इसलिये यदि (होता) आधी ऋचाओं से शस्त्र पढ़े तो अवश्यु आधी ऋचाओं के द्वारा प्रत्युत्तर भी दे । यदि पाद पाद करके तो प्रतिगर भी पद पद से हो । क्योंकि शस्त्र पढ़ने में ज्योंही साँस टूटता है त्यों ही असुर राक्षस दौड़ पड़ते हैं । इसको अध्वर्यु प्रतिगर द्वारा बन्द कर देता है । इससे दुष्ट राक्षस आने नहीं पावे । इस प्रकार वह यजमान के शत्रु-लोक का नाश कर देता है ॥६॥

पहले छन्दों में चार अक्षर होते थे । उनमें से जगती सोम को लेने उड़ गई । और तीन अक्षर पीछे छोड़कर लौट आई । अब त्रिष्टुप् सोम को लेने उड़ गया और एक अक्षर छोड़ कर घर लौट आया । फिर गायत्री सोम को लेने उड़ी और इन सब अक्षरों को और सोम को भी लेकर वापिस आ गई । इसलिये आठ अक्षर की गायत्री हो गई । इसलिये कहते हैं कि आठ अक्षर की गायत्री होती है ॥७॥

उस (गायत्री) से प्रातः सवन किया गया । इसलिये प्रातः सवन का नाम गायत्र है । उसी से दोपहर का सवन किया गया । उससे त्रिष्टुप् ने कहा । मैं अपने तीन अक्षरों के साथ आता हूँ । मुझे बुला । मुझे यज्ञ से बाहर न निकाल । 'अच्छा' ऐसा कहकर (गायत्री ने त्रिष्टुप् को) बुला लिया । इस प्रकार त्रिष्टुप् में ग्यारह अक्षर हो गये । इसलिये कहते हैं कि दोपहर का सवन त्रैष्टुभ होता है ॥८॥

तयैव तृतीयसवनमतन्वत । ताश्च ह जगत्युवाचोप त्वाहमायान्येकेनाक्षरेणोप साह्वयस्व मा मा यज्ञादन्तर्गा इति तथेति तामुपाह्वयत ततो द्वादशाक्षरा जगत्यभवत्तस्मादाहुर्जागत तृतीयसवनमिति ॥९॥

तदाहु । गायत्राणि वै सर्वाणि सवनानि गायत्री ह्येवैतदुपसृजमानैदिति तस्मात्तत्प्रतिसिद्ध प्रात सवने प्रतिगृणीयात्तत्प्रतिसिद्धा हि गायत्र्यागच्छत्सकृन्मद्वन्माध्यन्दिने सवनऽग्नक्ष्च हि साक्षरश्च हित्वागच्छत्तेनैवैनामेतत्समर्धयति कृत्स्ना करोति ॥१०॥

यत्र त्रिष्टुभ शस्यन्ते । त्रिमद्वत्तृतीयसवने त्रीणि हि साक्षराणि हित्वागच्छत्तैरेनामेतत्समर्धयति कृत्स्ना करोति ॥११॥ शतम् ॥ २५०० ॥

यत्र द्यावापृथिव्यश्च शस्यते । इमे ह वे द्यावापृथिवीऽइमा प्रजा उपजीवन्ति तदनयारेवैतद्द्यावापृथिव्यो रस दधाति ते रसवत्याऽउपजीवनीयेऽइमा प्रजा उपजीवति स वाऽओ३मित्येव प्रतिगृणीयात्तद्धि सत्य तद्देवा विदु ॥१२॥

तद्धैके । ओथामो दैवबागिति प्रतिगृणन्ति वाग्व्रतिगर एतद्वाचमुपाप्नुम इति वदन्तस्तदु तथा न कुर्याद्यथा वै कथा च प्रतिगृणात्युपाप्तैवास्य वाग्भवति वाचा हि प्रति

उसी गायत्री से तीसरा सवन किया । उससे जगती ने कहा 'मैं अपने एक अक्षर के साथ तेरे पास आती हूँ, तू मुझे बुला, यज्ञ से बाहर मत निकाल' । उसने कहा 'अच्छा' और बुला लिया । तब से जगती बारह अक्षर की हो गई । इसलिये कहते हैं कि तीसरा सवन 'जागत' है ॥९॥

इस पर कुछ लोग कहते हैं कि सभी सवन 'गायत्र' हैं क्योंकि गायत्री ही तो बढ़ती गई । इसलिये प्रात सवन म पूरा 'प्रतिगर' कह क्योंकि गायत्री पूरी होकर लौटी थी । दोपहर के सवन में एक बार 'मद्' शब्द कहकर प्रतिगर पढे क्योंकि त्रिष्टुप् एक अक्षर छोड़कर लौटा था । उसी से वह उसको समृद्ध करता है अर्थात् उसको पूरा कर देता है जब कि— ॥१०॥

त्रिष्टुप् से शस्त्र पढता है । तीसरे सवन में तीन बार 'मद् शब्द से प्रतिगर कहे क्योंकि जब जगती लौटी तो तीन अक्षर पीछे छोड़ आई । इससे वह इसकी समृद्धि करता है, उसको पूरा करता है जब कि ॥११॥

द्यौ और पृथिवी के लिये शस्त्र पढता है । यह प्रजा इन्हीं दोनों अर्थात् द्यौ और पृथिवी के सहारे रहते हैं इसके द्वारा इन्हीं द्यौ और पृथिवी में वह रस रखता है । इन्हीं रस वाले द्यौ और पृथिवी के सहारे प्रजा उत्पन्न होती है । 'ओ३म्' ऐसा कह कर 'प्रतिगर' करे क्यों कि सत्य है जिसको देव जानते हैं ॥१२॥

कुछ इस प्रकार प्रतिगर करते हैं 'ओथाम दैववाक्' अर्थात् वाणी प्रतिगर है, उसी को लेते हैं । परन्तु ऐसा न करे । क्योंकि चाहे जैसा प्रतिगर कर, वाणी ही हो जाती है

गृणाति तस्मादोरेमित्येव प्रतिगृणीयात्तद्धि सत्यं तद्देवाः विदुः ॥१३॥ ब्राह्मणम् ॥६॥ [३२] ॥

क्योंकि प्रतिगर वाणी द्वारा ही हो सकता है। इसलिये 'ओ३म्' कहकर ही प्रतिगर करे। यही सत्य है जिसको देव जानते थे ॥१३॥

माध्यन्दिनसवनम्—मरुत्वतीयग्रहादि

अध्याय ३—ब्राह्मण ३

इहा ३ उइहा ३ उइत्यभिपुणोति। इन्द्रमेवैतदाभ्यावयति बृहद्बृहदितीन्द्रमेवैतदाभ्यावयति ॥१॥

स शुक्रामन्थिनौ प्रथमौ गृह्णाति। शुक्रवद्धयेतत्सवनमथामयणश्च सर्वेषु ह्येष सवनेषु गृह्यतेऽथ मरुत्वतीयमथोक्थ्यमुक्थानि ह्यन्नापि भवन्ति ॥२॥

तर्द्धेके। उक्थ्यं गृहीत्वाथ मरुत्वतीय गृह्णन्ति तदु तथा न कुर्यान्मरुत्वतीयमेव गृहीत्वाथोक्थ्य गृह्णीयात् ॥३॥

तान्वाऽएतान्। पञ्च महान् गृह्णात्येष वै वज्रो यन्माध्यन्दिनः पवमानस्तस्मात्पञ्चदशः पञ्चसामा भवति पञ्चदशो हि वज्रः स एतैः पञ्चभिर्ग्रहैः पञ्च वाऽइमा अङ्गुल-

'इ०' 'इहा' कहकर (सोमरस) निकालता है। ('इह' का अर्थ है 'यहाँ'। इसी का अन्त का अक्षर प्लुत करके 'इहा' हो गया। बुलाने में प्लुत हो ही जाता है)। इस प्रकार इन्द्र को निकट बुलावा है। 'बृहद् बृहद्' भी कहता है, इससे भी इन्द्र को निकट बुलाता है ॥१॥

पहले शुक्र और मन्थी ग्रहों को लेता है। इससे (सोम यज्ञ) 'शुक्र युक्त' हो जाता है। अब आग्रायण ग्रह को लेता है। यह ग्रह तो सभी सवनों में लिया जाता है। फिर मरुतीय ग्रह लेता है। फिर उक्थ्य ग्रह को। क्योंकि यहाँ भी उक्थ्य मन्त्र होते हैं ॥२॥

कुछ लोग उक्थ्य ग्रह को लेकर मरुत्वतीय को लेते हैं। परन्तु ऐसा न करना चाहिये। मरुत्वतीय को लेकर उक्थ्य को ले ॥३॥

इस प्रकार यह इन पाँच ग्रहों को लेता है (शुक्र, मन्थी, आग्रायण, मरुत्वतीय और उक्थ्य)। यह जो दोपहर का पवमान है, यह वज्र है। इसमें पाँच साम होते हैं, १५ मन्त्र वाले। वज्र पन्द्रह वाला होता है। पाँच ग्रहों के द्वारा। यह अँगुलियाँ भी पाँच हैं। इन

योऽङ्गुलिभिर्वै ग्रहरति ॥४॥

इन्द्रो वृत्राय वज्रं प्रजहार । स वृत्रं पाप्मानꣳ हत्वा विजितेऽभयेऽनाष्ट्रे दक्षिणा निनाय तस्मा दप्येतर्हि यदैवैतेन माध्यन्दिनेन पवमानेन स्तुवतेऽथ विजितेऽभयेऽनाष्ट्रे दक्षिणा नीयन्ते तथोऽएवैष एतैः पञ्चभिर्ग्रहैः पाप्मने द्विषते भ्रातृव्याय वज्रं प्रहरति स वृत्रं पाप्मानꣳ हत्वा विजितेऽभयेऽनाष्ट्रे दक्षिणा नयति तस्माद्वाऽएतान्पञ्च महान्यृह्णाति ॥५॥

तद्यन्मरुत्वतीयान्यृह्णाति । एतद्वा ऽइन्द्रस्य निष्केवल्यꣳ सवनं यन्माध्यन्दिनꣳ सवनं तेन वृत्रमाजिघाꣳसत्तेन व्यजिगीषत मरुतो वाऽइत्यश्वत्थेऽपक्रम्य तस्थुः क्षत्रं वाऽइन्द्रो विशो मरुतो विशा वै क्षत्रियो बलवान्भवति तस्मादाश्वत्थेऽक्षतुपात्रे स्यातां काष्मर्यमये त्वेव भवतः ॥६॥

तानिन्द्र उपमन्त्रयांचक्रे । उपमावर्तध्वं युष्माभिर्बलेन वृत्रꣳ हनानीति ते होचुः किं नस्ततः स्यादिति तेभ्य एतौ मरुत्वतीयौ ग्रहावगृह्णात् ॥७॥

ते होचुः । अपनिधायैनमोज उपावर्तामहाऽइति तऽएनमपनिधायैवोज उपावृतु-

अँगुलियों से ही तो वज्र फेंका जाता है ॥४॥

इन्द्र ने वृत्र पर वज्र फेंका । पापी वृत्र को मार कर और विजय तथा अभय प्राप्त करके दक्षिणा लाया । इसलिये यह उद्गाता लोग भी जब दोपहर के सवन में पवमान पढ़ते हैं और अभय तथा विजय प्राप्त करते हैं तो दक्षिणा को लाते हैं, इसी प्रकार यह भी इन पाँच ग्रहो द्वारा दुष्ट पापी शत्रु पर वज्र फेंकता है और पापी वृत्र को मार कर अभय तथा विजय प्राप्त होने पर दक्षिणा को ले जाता है । इसलिये इन पाँच ग्रहों को लेते हैं ॥५॥

मरुत्वतीय ग्रहों को इसलिये लेता है कि यह जो दोपहर का सवन है वह इन्द्र का निज का सवन (निष्केवल्य) है । उसी से उसने वृत्र को मारने और जीतने की इच्छा की । इस समय मरुत अश्वत्थ कक्षा पर घूम कर जा खड़े हुये । इन्द्र क्षत्रिय है । मरुत वैश्य हैं । क्षत्रिय बलवान् होता है । इसलिये दो पात्र अश्वत्थ लकड़ी के हो सकते हैं । (ऐसी लोगों की राय है) परन्तु काष्मर्य लकड़ी के तो होते ही हैं ॥६॥

उनको इन्द्र ने बुलाया, 'मेरे पास आइये कि आपकी सहायता से मैं वृत्र को मार डालूँ ?' उन्होंने कहा, 'हमको क्या मिलेगा ?' उसने इन दो मरुत्वतीय ग्रहो को उनके लिये निकाला ॥७॥

वे बोले, 'इस एक ग्रह अर्थात् ओज को अलग रखकर हम आ रहे हैं' । यह सुन ओज को अलग रखकर आये । परन्तु इन्द्र ने इस (ग्रह अर्थात् ओज) को भी लेना चाहा । यह सोचकर कि यह तो ओज को अलग रखकर आ रहे हैं । (ओज के बिना तो

स्तद्वाऽइन्द्रोऽस्पृणुतापनिधाय वै मौज उपावृताभिति ॥८॥

स होवाच । सहैव मौजसोपावर्तध्वमिति तेभ्यो वै नस्तृतीयं महं गृहाणेति तेभ्य एतं तृतीयं महमगृह्णादुपयामगृहीतोऽसि मरुतां त्वौजसऽइति तऽएनꣳ सहैवौजसोपावर्तन्त तैर्व्यजयत तैर्वृत्रमहन्त्स्वं वाऽइन्द्रो विशो मरुतो विशा वै क्षत्रियो बलवान् भवति तत्क्षत्रऽएवैतद्बलं दधाति तस्मान्मरुत्वतीयान्गृह्णाति ॥९॥

स वाऽइद्रायैव मरुत्वते गृह्णीयात् । नापि मरुद्भयः स यद्यपि मरुद्भयो गृह्णीयात्प्रत्युद्यामिनीꣳ ह क्षत्राय विशं कुर्यादथैतदिन्द्रमेवानु मरुत आभजति तत्क्षत्रायैवैतद्विशं कृतानुकरामनु वर्त्मानं करोति तस्मादिन्द्रायैव मरुत्वते गृह्णीयान्नपि मरुद्भयः ॥१०॥

अपक्रमाद्ध हैवेभ्यमेतद्बिभयाचकार । यदिमे मन्नापक्रामेयुर्यन्नान्यद्धियेरन्निति तानेवैतदनपक्रमिणोऽकुरुत तस्मादिन्द्रायैव मरुत्वते गृह्णीयान्नापि मरुद्भय ॥११॥

ऋतुपात्राभ्यां गृह्णाति । ऋतवो वै संवत्सरो यज्ञस्तेऽदः प्रातःसवने प्रत्यक्षमवकल्प्यन्ते यद्ऋतुग्रहान्गृह्णात्यथैतत्परोऽक्षं माध्यन्दिने सवनेऽवकल्प्यन्ते यद्ऋतुपात्राभ्यां मरुत्वतीयान्गृह्णाति विशो वै मरुतोऽन्नं वै विश ऋतवो वाऽइदꣳ सर्वमन्नाद्य पचन्ति तस्माद्ऋतु

कुछ सफलता होती नहीं) ॥८॥

उसने कहा, 'ओज के साथ आइये'। उन्होंने उत्तर दिया, 'तो हमारे लिये एक तीसरा ग्रह और लो'। तब उनके लिये उसने एक तीसरा ग्रह निकाला, इस मन्त्र से 'उपयामगृहीतोऽसि मरुता त्वौजसे—' (यजु० ७।३६)। तब वे ओज के साथ (इन्द्र की सहायता को) गये। उनकी सहायता से विजय पाई, उसकी सहायता से वृत्र को मारा। इन्द्र क्षत्रिय है। मरुत वैश्य है। क्षत्रिय वैश्य की सहायता से ही बलवान् होता है। इसलिये वह क्षत्रिय में बल को रखता है। इसलिये मरुत्वतीय ग्रहों को लेता है ॥९॥

उन ग्रहों को वह 'मरुत युक्त इन्द्र' के लिये निकाले, अकेले इन्द्र के लिये नहीं। यदि वह केवल मरुतों के लिये निकालेगा तो वैश्यों को क्षत्रियों के विरुद्ध कर देगा। इसलिये वह इन्द्र के पीछे मरुत का भी भाग रख देता है। इस प्रकार वह वैश्य को क्षत्रिय के अधीन और उसका आज्ञाकारी बना देता है। इसलिये मरुत युक्त इन्द्र के लिये निकाले, न कि 'मरुतों' के लिये ॥१०॥

उस (इन्द्र) को उनके छोड़ने का भय था, 'कहीं वह मुझे छोड़ आयें और दूसरे दल में मिल जायें'। इस प्रकार वह इस भाग के द्वारा उनको ऐसा बना देता है कि वह उसे छोड़ने न पावें। इसलिये भी 'मरुत-युक्त इन्द्र' के लिये निकाले, मरुतों के लिये नहीं ॥११॥

दो ऋतु पात्रों से निकालता है। ऋतु संवत्सर यज्ञ है। प्रातः सवन में तो प्रत्यक्ष ही लिये जाते हैं। जब ऋतु ग्रह निकाले जाते हैं। परन्तु दोपहर के सवन में परोक्ष रूप से निकालता है जब दो मरुत्वतीय ऋतुपात्रों को निकालता है इसलिये दो मरुत्वतीय ऋतु-

पात्राभ्यां मरुत्वतीयान्गृह्णाति ॥१२॥

अथातो गृह्णात्येव । इन्द्र मरुत्वऽइह पाहि सोमं यथा शार्यातेऽअपिबः सुतस्य । तव प्रणीती तव शूर शर्मन्नाविवासन्ति कवयः सुयज्ञाः । उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते ॥१३॥

मरुत्वन्त वृषभम् । वावृधानमकवारिं दिव्यꣳ शासमिन्द्रम् । विश्वासाहमवसे नूतनायोग्रꣳ सहोदामिह तꣳहुवेम । उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते । उपयामगृहीतोऽसि मरुता त्वौजसऽइति तृतीयं ग्रहं गृह्णाति ॥१४॥

अथ माहेन्द्रं ग्रहं गृह्णाति । पाप्मना वाऽएतदिन्द्रः सꣳसृष्टोऽभूद्वैश्या मरुद्भिः स यथा विजयस्य कामाय विशा समाने पात्रेऽश्नीयादेवं तद्यदस्माऽएत मरुद्भिः समानं ग्रहमगृह्णन् ॥१५॥

त देवाः । सर्वस्मिन्विजितेऽभयेऽनाद्रे यथेषीका मुञ्जाद्विवृहेदेवꣳ सर्वस्मात्पाप्मनो

पात्रों में निकालता है ॥१२॥

वह इस मन्त्र से निकालता है, 'इन्द्र मरुत्वऽइह पाहि सोम यथा शार्यातेऽअपिब. सुतस्य । तव प्रणीती तव शूर शर्मन्नाविवासन्ति कवय. सुयज्ञा. । उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते' (यजु० ७।३५, ऋ० ३।५१।७) । 'हे मरुतों से युक्त इन्द्र ! यहाँ सोम को पी, जैसे शार्यात के सोम को पिया था । सुयज्ञ कवि लोग तेरी प्रसन्नता और तेरी शरण की सहायता से ही यज्ञ में तेरी सेवा करते हैं । तुझे आश्रय के लिये लिया है । इन्द्र मरुत युक्त के लिये तुझको ! यह तेरी योनि है । मरुत युक्त इन्द्र के लिये तुझको' ॥१३॥

दूसरे ग्रह को इस मन्त्र से निकालता है, 'मरुत्वन्त वृषभ वावृधान मकवारिं दिव्यꣳ शासमिन्द्रम् । विश्वासाहमवसे नूतनायोग्रꣳ सहोदामिह तꣳ हुवेम । उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते' (यजु० ७।३६, ऋ० ३।४७।५) । 'मरुत वाले, बलवान, वृद्धि शील, दोष रहित, दिव्य, शासक, सबके पालक इन्द्र को हम इस यज्ञ में नई रक्षा के लिये बुलाते हैं । आश्रय के लिये तुझे लिये जाता है । इन्द्र मरुत वाले के लिये तुझको । यह तेरी योनि है । इन्द्र मरुतवाले के लिये तुझको । इस मन्त्र से तीसरा ग्रह निकालता है, 'उपयामगृहीतोऽस मरुता त्वौजसे' (यजु० ७।३६) । 'तुझे आश्रय के लिये लिया गया है । मरुतों के ओज के लिये तुझको' ॥१४॥

अब यह माहेन्द्र ग्रह को लेता है । जैसे विजय की कामना के लिये वैश्यों के साथ एक ही पात्र में खा लेवे, इसी प्रकार इन्द्र भी वैश्य मरुतों के साथ मिलकर पाप-युक्त हो गया । क्योंकि मरुतों के साथ २ इन्द्र के लिये भी एक ही ग्रह निकाला गया ॥१५॥

तब देवों ने जीत हो जाने और अभय और शान्ति प्राप्त हो जाने पर इन्द्र को उस

व्यगृह्णन्यन्माहेन्द्रं ग्रहमगृह्णंस्तथोऽएवैष एतद्यथेषीका विमुञ्चा स्यादेवꣳ सर्वस्मात्पाप्मनो निर्मुच्यते यन्माहेन्द्रं ग्रहं गृह्णाति ॥१६॥

यद्वै माहेन्द्रं ग्रहं गृह्णाति। इन्द्रो वाऽएष पुरा वृत्रस्य वधादथ वृत्रꣳ हत्वा यथा महाराजो विजिग्यान एवं महेन्द्रोऽभवत्तस्मान्माहेन्द्रं ग्रह गृह्णाति महान्तमु चैवैनमेतत्सन्तु करोति वृत्रस्य वधाय तस्माद्वेव माहेन्द्रं ग्रहं गृह्णाति शुक्रपात्रेण गृह्णात्येष वै शुक्रो य एष तपत्येष उऽएव महोस्तस्माच्छुक्रपात्रेण गृह्णाति ॥१७॥

अथतो गृह्णात्येव। महां २॥ऽइन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोमि'। अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत्। उपयामगृहीतोऽसि महेन्द्राय त्वैषते योनिर्महेन्द्राय त्वेति सादयति महेन्द्राय ह्येनं गृह्णाति ॥१८॥

अथो पाकृत्यैता वाचं वदति। अभिषोतारोऽभिषुणुतोलूखलानुद्वादयताग्नीदाशिरं विनय सौम्यस्य वित्तादिति ते वै तृतीयसवनायैवाभिषोतारोऽभिषुण्वन्ति तृतीयसवनायोलूखलानुद्वादयन्ति तृतीयसवनायाग्नीदाशिरं विनयति तृतीयसवनाय सौम्य चरुꣳ श्रपयत्येते वै शुक्रवती रसवती सवने यत्प्रातः सवन च माध्यन्दिनं च सवनमथैतन्निर्घीत शुक्रं

पाप से मुक्त किया जैसे सिरकी में मूँज निकाल लेते हैं। इस माहेन्द्र ग्रह को लेकर। जैसे सिरकी बिना मूँज के (साफ) हो जाती है इसी प्रकार माहेन्द्र ग्रह को निकालकर वह सब दोषों से दूर हो जाता है ॥१६॥

माहेन्द्र ग्रह को इसलिये भी निकालता है, वृत्र के वध से पहले यह इन्द्र था। अब किसी बड़े विजयी राजा के समान, वृत्र को मारकर महेन्द्र बन गया। इसलिये माहेन्द्र ग्रह को लेता है। वृत्र के वध के लिये उसको बड़ा बनाता है इसलिये भी माहेन्द्र ग्रह को लेता है। शुक्र पात्र से लेता है। यह जो तपता है अर्थात् सूर्य, वह शुक्र है। शुक्र महान् है इसलिये शुक्र पात्र से निकालता है ॥१७॥

इस मन्त्र से निकालता है, 'महाँ २ऽइन्द्रो नृवदा चर्षणिप्राऽउत द्विबर्हाऽअमिनः सहोमि'। अस्मद्र्यग्वावृधे वीर्यायोरु. पृथु सुकृत कर्तृभिर्भूत्। उपयामगृहीतोऽसि महेन्द्राय त्वा' (यजु० ७।३६, ऋ० ६।१६।१)। 'बड़ा इन्द्र। नेता के समान, मनुष्यों की कामनाओं की पूर्ति करने वाला, दुहरे यज्ञों वाला, अपार बलों के साथ, हमारे सामने बढ़ा वीर्य अर्थात् पराक्रम से, उस (यश वाला), पृथु' (विस्तृत) यजमानों द्वारा पूज्य हुआ'। यह पढ़कर नीचे रख देता है, 'एष ते योनिर्महेन्द्राय त्वा' (यजु० ७।३६)। 'यह तेरा घर है। महेन्द्र के लिये तुझको' ॥१८॥

उपाकरण करके यह वचन बोलता है, 'निचोड़ने वाला, निचोड़ो। मूसलों को जोर से चलाओ (सोम पीसने के लिये) आग्नीध्र, दही को देख, सोम को अच्छा कर। यह निचोड़ने वाले तीसरे सवन के लिये निचोड़ते हैं। तीसरे सवन के लिये ही मूसली चलाते हैं। तीसरे सवन के लिये ही आग्नीध्र दही को बिलोता है। तीसरे सवन के लिये ही सोम के

यत्तृतीयसवनं तदेवैतस्मान्माध्यन्दिनात्सवनान्निर्मिमीते तथो हास्यैतच्छुक्रवद्रसवत्तृतीयसवन भवति तस्मादेतामत्र वाचं वदति ॥१६॥ ब्राह्मणम् ॥७ [३. ३.] द्वितीयः प्रपाठकः ॥ करिडकासंरया ॥१३६॥

चरु को पकाता है। यह जो दो सवन थे अर्थात् प्रातः और दोपहर के वह तो शुक्र और रस वाले थे। परन्तु तीसरा सवन शुक्र-रहित हो जाता है। इसलिये दोपहर के सवन से इसको बनाता है। इस प्रकार यह तीसरा सवन शुक्र और रस वाला हो जाता है। इसी-लिये इस वाणी को इस समय बोलता है ॥१६॥

दाक्षिणहोमो दक्षिणादानञ्च

अध्याय ३—ब्राह्मण ४

घ्नन्ति वाऽएतद्यज्ञम्। यदेनं तन्वते यन्त्येव राजानमभिपुण्वन्ति तत्तं घ्नन्ति यत्पशुꣳ संज्ञपयन्ति विशासति तत्तं घ्नन्त्युलूखलमुसलाभ्यां दृषदुपलाभ्याꣳ हविर्यज्ञं घ्नन्ति ॥१॥

स एष यज्ञो हतो न ददक्षे। तं देवा दक्षिणाभिरक्षय स्तद्यदेनं दक्षिणाभिरदक्षयं-स्तस्माद्दक्षिणा नाम तद्यदेवात्र यज्ञस्य हतस्य व्यथते तदवोरयैतद्दक्षिणाभिर्दक्षयत्यथ समृद्ध एव यज्ञो भवति तस्माद्दक्षिणा ददाति ॥२॥

तद्वै षड्ढादशेत्येव हविर्यज्ञे ददाति। न ह स्वेशतदक्षिणः सौम्योऽध्वरः स्या-

अब इस यज्ञ का वध करते हैं। जब यज्ञ में सोम राजा को कुचलते हैं तो मानों उसका वध करते हैं। जैसे पशु को काटते हैं तो उसका वध करते हैं। इसी प्रकार ओखली और मूसल से या दो पाटों से यज्ञ की हवि का वध किया जाता है ॥१॥

जब इस यज्ञ का वध हो गया तो उसकी शक्ति जाती रही, तब देवों ने दक्षिणाओं द्वारा पूरा किया। यह यज्ञ दक्षिणाओं द्वारा दक्ष हो गया। इसलिये इसका नाम दक्षिणा पड़ा (दक्ष बनाने वाली)। यहाँ यज्ञ के वध होने से जो कुछ कमी आ जाती है उसको वह दक्षिणाओं से पूर्ति कर देता है। यज्ञ पूर्ण हो जाता है। इसलिये वह दक्षिणा देता है ॥२॥

हविर्यज्ञ में छः या बारह गायें दक्षिणा में दी जाती हैं। परन्तु सोम यज्ञ में सौ से कम नहीं। यह जो प्रजापति है वह प्रत्यक्ष यज्ञ है। पुरुष प्रजापति का निकटतम है। इसकी

देव ये प्रायश्चित्तयो यज्ञस्यातिरिक्तं पुरुषं ये यज्ञमभितो विततमायन्ति तानृषयः श्रुतधरा एतेन दक्षिणाभिर्यज्ञमात्मसात्कुरुते यज्ञो देवेभ्यो हव्यवाहनो भवति यज्ञमनुष्येभ्यः कव्यवाहनः पितृभ्यो यदग्नौ प्रास्यति तेन दक्षिणाः प्रीणाति ॥३॥

द्वया वै देवा देवाः । आहैव देवा अथ ये ब्राह्मणाः शुश्रुवांसोऽनूचानास्ते मनुष्यदेवा द्वेधा विहितः पुरा वाव पुरुष पुरु देवानां दधिरे ते ब्राह्मणेभ्यो मनुष्यदेवेभ्यो दक्षिणाभिरेव देवान्प्रीणाति दक्षिणाभिर्मनुष्यदेवान् ब्राह्मणान्श्रुतोऽनूचानान्प्रीणाति देवाः प्रीताः स्वर्गं लोकमभिवहन्ति ॥४॥

या वाऋत्वाः । ऋत्विग्भ्य एव दक्षिणा अन्ये वाऋत्वा यज्ञमात्मानं कुर्वन्ति ते यज्ञमृत्विग्भ्य एव दक्षिणाभिरात्मसात्कुरुते ऋत्विग्भ्यो दक्षिणा दातव्या नर्त्विजेभ्यो ह्यन्ये यज्ञमात्मानं कुर्वन्ति ॥५॥

अथ प्रतिपरेत्य गार्हपत्यम् । दक्षिणामिति जुहोति य एवमेतद्विद्वान्यज्ञमभिहिरण्यं प्रत्यवभाय जुहोति देवलोकं मे यज्ञमभिवहेति वै यजते यो यज्ञो देवलोकं यो वै यज्ञं देवलोकं वहति दक्षिणा वै दक्षिणा हि यज्ञं देवलोकं वहति दक्षिणा वहति दक्षिणा वहति

मेवाभिप्रैति तदनूची दक्षिणा या ददाति सैति दक्षिणामन्वारभ्य यजमान. ॥६॥

चतस्रो वै दक्षिणा । हिरण्य गौरश्वो न वै तदवकल्पते यदश्वस्य पादमवद-ध्याद्वा गोः पादमवध्यात्तस्माद्दशाहोमीये वाससि हिरण्य प्रवध्यावधाय जुहोति ॥७॥

सौरीभ्यामृग्भ्या जुहोति । तमसा वाऽयमसौ लोकोऽन्तर्हितः स एतेन ज्योतिषा तमोऽपहत्य स्वर्गं लोकमुपरुत्क्रामति तस्मात्सौरीभ्यामृग्भ्या जुहोति ॥८॥

स जुहोति । उदुत्य जातवदसं देवं वहन्ति केतव. । दृशे विश्वाय सूर्यꣳ स्वाहेत्येतया गायत्र्या गायत्रो वाऽयं पृथिवी सेयं प्रतिष्ठा तदस्यामेवैतत्प्रतिष्ठाया प्रतितिष्ठति ॥९॥

अथ द्वितीया जुहोति । चित्र देवानामुदगादनीक चक्षुर्मित्रस्य वरुणस्याग्ने । आप्रा द्यावापृथिवीऽअन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च स्वाहेत्येतया त्रिष्टुभालोकमेवैतयो-पप्रैति ॥१०॥

अथाग्नीध्रे । द्वे वेका वा जुहोति तदग्नावाग्नीध्रे द्वे वेका वा जुहोत्यग्निवै पशूना-

हुआ यजमान भी जाता है ॥६॥

चार प्रकार की दक्षिणा होती है—सोना, गौ, कपड़ा और घोड़ा। यह उचित नहीं है कि घोड़े के पैर को चमस म रख दे या गौ के पैर को। इसलिये झालरदार कपड़े में सोना बाँध कर रखता है और उसकी आहुति देता है ॥७॥

सूर्य्य की दो ऋचाओं से आहुति करता है। सूर्य्य की दो ऋचाओं से आहुति इस-लिये देता है कि वह (पर) लोक अन्धकार से छिप गया है। वह ज्योति से अन्धकार को हटाकर स्वर्ग लोक को जाता है ॥८॥

वह आहुति का मन्त्र यह है, 'उदुत्य जातवेदस देव वहन्ति केतव । दृशे विश्वाय सूर्य्यꣳ स्वाहा' (यजु० ७।४१, ऋ० १।५०।१)। 'यह प्रकाश की किरणें उस सूर्य्य जात-वेद देव सूर्य्य तक ले जाती हैं, सर्वत्र विश्व को दिखाने के लिये'। इस गायत्री से। यह पृथिवी गायत्री है। यह पृथिवी प्रतिष्ठा है। इसी प्रतिष्ठा में वह प्रतिष्ठित होता है ॥९॥

दूसरी आहुति का मन्त्र यह है, चित्र देवानामुदगादनीक चक्षुर्मित्रस्य वरुणस्याग्ने । आप्रा द्यावापृथिवीऽअन्तरिक्षꣳ सूर्यऽआत्मा जगतस्तस्थुषश्च स्वाहा' (यजु० ७।४२)। 'विचित्र (आश्चर्य युक्त) देवों अर्थात् प्रकाशों का अनीक अर्थात् समूह उदय होता है। यह मित्र, वरुण और अग्नि की आँख है अर्थात् इसी से सब प्रकाश को लेते हैं। यह सूर्य द्यौ, पृथिवी और अन्तरिक्ष म फैल जाता है। यह जगम और स्थावर जगत् का आत्मा है। यह त्रिष्टुभ है। इसके द्वारा स्वर्ग लोक को प्राप्त करता है ॥१०॥

अब अग्नीध्र म एक या दो आहुति देता है। अग्नीध्र में एक या दो आहुतियाँ इसलिये देता है कि अग्नि पशुओं पर राज करता है। यह पशु उसको चारों ओर से घेर लेते

गीष्टे तऽएनमभितः परिणिविशन्ते तमेतयाहुत्या प्रीणाति सोऽस्मै प्रीतोऽनुमन्यते तेनानुमता ददाति ॥११॥

स जुहोति । अग्ने नय सुपथा रायेऽअस्मान्विश्वानि देव वयुनानि विद्वान् युयोध्यस्मज्जुहुराणमेनो भूयिष्ठा ते नमऽउक्तिं विधेम स्वाहेत्यथ यद्यश्व युक्त वायुक्त वा दास्यन्त्स्यादथ द्वितीयां जुहुयाद्यद्धु न नाद्रियेत ॥१२॥

स जुहोति । अयं नोऽअग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् । अयं वाजान्जयतु वाजसातावयꣳ शत्रून्जयतु जर्हृषाणः स्वाहेति वाजसा ह्यश्वः ॥१३॥

उनको आग में न डालना चाहिये। ऐसा न हो कि अग्नि में उच्छिष्ट (झूठा) वस्तु पड़ जाय। उनको उत्तर वेदी में रख देते हैं। इस प्रकार यह यज्ञ से बहिष्कृत नहीं होते ॥१२॥

अब वे भरे हुये पात्रों को छूते हैं जिनको कुछ लोग 'अप्सु पोमा' (जलों में सोम) करते हैं। जैसे जुता हुआ घोड़ा ले जाता है इसी प्रकार यह भी ऋत्विज का काम करते

देवात्र क्षएते वा विलिशन्ते शान्तिरापस्तद्भिः शान्त्या शमयन्ते तद्भिः संदधते तस्मात्पूर्णपात्रान्तसमवमृशन्ति ॥१३॥

ते समवमृशन्ति सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳशिवेन । त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टमिति यद्विरिष्टं तत्सदधते ॥१४॥

अथ मुखान्युपस्पृशन्ते । द्वयं तद्यस्मान्मुखान्युपस्पृशन्तेऽमृतं वाऽआपोऽमृतेनैवैतत्सꣳस्पृशन्तऽएतदु चैवैतत्कर्मात्मन्कुर्वते तस्मान्मुखान्युपस्पृशन्ते ॥१५॥ ब्राह्मणम् ॥ ५ [४. ३.] ॥

हैं । परन्तु जुते हुए घोड़े के घाव हो जाता है या वह खुजलाता है । जल शान्ति और ओषधि है । यहाँ यज्ञ में भी जब कभी घाव हो जाय या खुजलावें तो जल शान्तिदायक होने के कारण जलों से ही शान्ति लेते हैं; जलों को ही धारण करते हैं इसीलिये वह भरे हुये पात्रों को छूते हैं ॥१३॥

वह इस मन्त्र से छूते हैं 'स वर्चसा पयसा स तनूभिरगन्महि मनसा सꣳशिवेन । त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद् विलिष्टम्' (यजु० ८।१४) । 'तेज, रस और शरीरों से तथा कल्याणकारी मन से हम मिलें । अच्छा दानी त्वष्टा हमको धन दे । और हमारे शरीर में जो घाव (त्रुटियाँ) हों उसको चंगा कर दे' । इस प्रकार जो घाव है उसको चंगा करता है ॥१४॥

अब वे अपने मुँह को छूते हैं । दो कारण हैं जिनसे मुख को छूते हैं । जल अमृत है । अमृत से ही वे छूते हैं । इसके अतिरिक्त वे इस कर्म (यज्ञ) को अपने में धारण करते हैं इसलिये मुखों को छूते हैं ॥१५॥

समिष्टयजुर्होमः

अध्याय ४—ब्राह्मण ४

तानि वाऽएतानि । नव समिष्टयजूꣳषि जुहोति तयैव समिष्टयजूꣳषि जुहोति नव वाऽअमूर्महिष्यमाने स्तोत्रिया भवन्ति सैषोभयतोन्यूना विराट् प्रजननायैतस्माद्वाऽउ-

इस अवसर पर वह नौ समिष्ट यजुओं से आहुति देता है । नौ समिष्ट यजुओं से आहुति देने का तात्पर्य यह है कि वह महिष्यमाने स्तोत्र नौ होते हैं । इस प्रकार दोनों ओर विराट् न्यून रहता है उत्पत्ति के लिये । (विराट् में १० अक्षर चाहिये) । इसी दो

मयतो न्यूनात्प्रजननात्प्रजापतिः प्रजाः ससृजऽइतश्चोर्ध्वा इतश्चावाचीस्तथोऽएवैष एतस्मादुभयत एव न्यूनात्प्रजननात्प्रजाः सृजत इतश्चोर्ध्वा इत श्चावाचीः ॥१॥

हिङ्कारस्तोत्रियाणां दशमः । स्वाहाकार एतेषां तथो हास्यैषा न्यूना विराड्दंशदशिनी भवति ॥२॥

अथ यस्मात्समिष्टयजूंष्यपि नाम । या वाऽएतेन यज्ञेन देवता ह्वयति याभ्य एष यज्ञस्तायते सर्वा वै तत्ताः समिष्टा भवन्ति तद्यत्तासु सर्वासु समिष्टास्वथैतानि जुहोति तस्मात्समिष्टयजूंष्यपि नाम ॥३॥

अथ यस्मात्समिष्टयजूंष्यपि जुहोति । रिरिचानऽइव वाऽएतदीजानस्यात्मा भवति यद्धयस्य भवति तस्य हि ददाति तमेवातस्त्रिभिः पुनराप्याययति ॥४॥

अथ यान्युत्तराणि त्रीणि जुहोति । या वाऽएतेन यज्ञेन देवता ह्वयति याभ्य एष यज्ञस्तायतऽउप हैव ता आसते यावच्च समिष्टयजूंष्यपि जुह्वतीमानि नुनो जुह्वत्विति ता एवैतद्यथायथं व्यवसृजति यत्र यत्रासां चरणं तदनु ॥५॥

अथ यान्युत्तमानि त्रीणि जुहोति । यज्ञं वाऽएतदजीजनत यदेनमतत तं जनयित्वा यत्रास्य प्रतिष्ठा तत्प्रतिष्ठापयति तस्मात्समिष्टयजूंष्यपि जुहोति ॥६॥

और की न्यूनता से प्रजापति ने प्रजा को उत्पन्न किया। एक से ऊर्ध्व (ऊपर को चढ़ने वाले) और दूसरे से नीचे जाने वाले ॥१॥

स्तोत्रों में हिङ्कार दसवाँ है। इन समिष्ट-यजुओं में स्वाहा दसवाँ है। इस प्रकार यह न्यून विराट् रस वाला हो जाता है ॥२॥

समिष्ट यजु नाम इसलिये पड़ा कि इस यज्ञ से जिस देवता को बुलाते हैं या जिन देवताओं के लिये यज्ञ रचाते हैं ये सब समिष्ट (चाहे हुये) हो जाते हैं। उन सब समिष्टों में इनकी आहुति दी जाती है इसलिये इनको समिष्ट-यजु कहते हैं ॥३॥

समिष्ट यजुओं की आहुति इसलिये दी जाती है कि यज्ञ करने वाले का आत्मा तो खाली हो जाता है क्योंकि जो कुछ उसका होता है उसको वह दे चुकता है। इनमें से तीन आहुतियों से उसी की पूर्ति की जाती है ॥४॥

और जो और तीन आहुतियाँ दी जाती हैं। इस यज्ञ से जिस देवता को बुलाता है, या जिन देवताओं के लिये यज्ञ रचता है ये सब देवता प्रतीक्षा करते रहते हैं जब तक कि समिष्ट-यजुओं की आहुति नहीं पड़ती कि यह हमारे लिये आहुतियाँ देगा। इन्हीं देवताओं का यह यथाविधि विसर्जन कर देता है। जहाँ-जहाँ यह जाना चाहें क्रम से ॥५॥

और जो तीन अन्तिम आहुतियाँ हैं—उसने यज्ञ की उत्पत्ति की। और उत्पत्ति करके उसने यहाँ उसकी प्रतिष्ठा की। चूँकि यह उसकी प्रतिष्ठा करता है इसलिये यह समिष्ट-यजुओं से आहुति देता है ॥६॥

स जुहोति । समिन्द्र णो मनसा नेपि गामिरिति मनसेति तन्मनसा रिरिचानमाप्या ययति गामिरिति तद्गोभी रिरचानमाप्ययति सꣳसूरिभिर्मघवन्त्सꣳ स्वस्त्या । स ब्रह्मणा देवकृत यदस्तीति ब्रह्मणेति तद्ब्रह्मणा रिरिचानमाप्याययति स देवानाꣳ सुमतौ यजियानाꣳ स्वाहा ॥७॥

स वर्चसा । पयसा स तनूभिरिति वर्चसेति तद्वर्चसा रिरिचानमाप्याययति पयसेति रसो वै पयस्तत्पयसा रिरिचानमाप्याययत्यगन्महि मनसा सꣳशिवेन । त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टमिति विदृढ तत्सदधाति ॥८॥

धाता राति । सवितेद जुषतां प्रजापतिर्निधिपा देवोऽग्नि । त्वष्टा विष्णु प्रजया सꣳरराणो यजमानाय द्रविण दधात स्वाहेति तद्व रिरिचान पुनराप्याययति यदाह यजमानाय द्रविण दधात स्वाहेति ॥९॥

सुगावो देवा । सदना अकर्म यऽआजग्मेदꣳ सवन जुषाणा इति सुगानि वा

यह इस मन्त्र से आहुति देता है — समिन्द्र णो मनसा नेपि गोभि' (यजु० ८।१५, ऋ० ५।४२।४) । हे इन्द्र, तू हमको मन से और गौओं से प्राप्त होता है' । जो मन (विचार) से खाली था उसको मन से और जो गौओं से खाली था उसको गौओं से भरता है । 'स सूरिभिर्मघवन्त्सꣳ स्वस्त्या स ब्रह्मणा देवकृत यदस्ति' (यजु० ८।१५) । 'हे इन्द्र, विद्वानों से, कल्याण से और देवकृत स्तुति से । जो स्तुति से खाली था उसकी स्तुति द्वारा पूर्ति करता है । 'स देवानाꣳ सुमतौ यज्ञियानाꣳ स्वाहा' (यजु० ८।१५) । 'यज्ञ करने वाले देवों की सुमति से' ॥७॥

'स वर्चसा पयसा स तनूभि' (यजु० ८।१६) । तेज से खाली को तेज से, रस से खाली को रस से भरता है क्योंकि 'पय' नाम है रस का । 'अगन्महि मनसा सꣳशिवेन । त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यविलिष्टम्' (यजु० ८।१६) । (यह वही है जो ८।१४ है । इसका अर्थ ऊपर आ चुका) इस प्रकार जो क्षण था उसको चंगा करता है ॥८॥

तीसरी आहुति इस मन्त्र से — धाता राति सवितेद जुषतां प्रजापतिर्निधिपा देवोऽग्नि । त्वष्टा विष्णु प्रजया सꣳरराणो यजमानाय द्रविण दधात स्वाहा' (यजु० ८।१७, अथर्व ७।१७।४) । कृपालु धाता, सविता, कोष की रक्षा करने वाला प्रजापति, अग्नि देव इस आहुति को लेवें । त्वष्टा विष्णु यजमान के लिये धन और सन्तान दे' । 'यजमान को धन दे' ऐसा कहने से प्रयोजन यह है कि यह जो खाली हो गया था उसको भरता है ॥९॥

चौथी आहुति इससे — 'सुगा वो देवा सदनाऽअकर्म यऽआजग्मेदꣳ सवनं जुषाणा' (यजु० ८।१८) । 'अर्थात् हे देवो ! जो इस सोम भाग में आये हुये हो, तुम्हारे

देवाः सदनान्यकर्मं यऽआगन्तेदꣳ सवनं जुषाणा इत्येवैतदाह भरमाणा वहमाना हवीꣳषीति तद्देवता व्यवसृजति भरमाणा अह ते यन्तु येऽवाहना वहमाना उ ते यन्तु ये वाहनवन्त इत्येवैतदाह तस्मादाह भरमाणा वहमाना हवीꣳष्यस्मे धत्त वसवो वसूनि स्वाहा ॥१०॥

यो२॥ऽआवहः । उशतो देव देवांस्तान्प्रेरय स्वेऽअग्ने सधस्थऽइत्यग्नि वाऽआहामून्देवानावहामून्देवानावहेति तमेवैतदाह यान्देवानावाक्षीस्तान्गमय यत्र यत्रैषां चरणं तदन्विति जक्षिवाꣳसः पपिवाꣳसश्च विश्वऽइति जक्षिवाꣳसो हि पशुं पुरोडाशं भवन्ति पपिवाꣳस इति पपिवाꣳसो हि सोमꣳ राजानं भवन्ति तस्मादाह जक्षिवाꣳसः पपिवाꣳसश्च विश्वेऽमुं घर्मꣳस्वरातिष्ठतानु स्वाहेति तद्देव देवता व्यवसृजति ॥११॥

वयꣳहित्वा । प्रयात यज्ञेऽअस्मिन्नग्ने होतारमवृणीमहीह । ऋधगया ऋधगुताशमिष्ठाः प्रजानन्यज्ञमुपयाहि विद्वान्त्स्वाहेत्यग्निमेवैतया विमुञ्चत्यग्नि व्यवसृजति ॥१२॥

लिये हमने ऐसे घर बनाये हुये हैं जिनमें तुम सुगमता से जा सको' । 'भरमाणा वहमाना हवीꣳषि' (यजु० ८।१८) । 'हवियों को दौते हुये या गाड़ियों मे ले जाते हुये' । ऐसा कह कर वह कतिपय देवों का विसर्जन करता है । जिनके पास सवारियाँ नहीं हैं वे स्वय हवियों को दौते हैं और जिनके पास सवारियाँ हैं वे सवारी में ले जाते हैं । इसलिये कहा 'भरमाणा' अर्थात् दौते हुये और 'वहमाना' अर्थात् गाड़ियों में ले जाते हुये । 'अस्मे धत्त वसवो वसूनि स्वाहा' (यजु० ८।१८) । 'हे वसुओ, हमारे लिये धन दो' ॥१०॥

पाँचवीं इस मंत्र से :—'यांऽआवहः उशतो देव देवांस्तान् प्रेरय स्वेऽअग्ने सधस्थे' (यजु० ८।१६) । 'हे देव जिन इच्छुक देवों को तुम यहाँ लाये हो, हे अग्नि, तुम उनको अपने अपने घर पहुँचा दो' । पहले तो अग्नि से कहा था कि इन देवों को लाओ, इन देवों को लाओ । अब अग्नि से कहता है कि जिन-जिन देवों को तुम लाये हो उन उनको अपने-अपने घर पहुँचा दो । 'जक्षिवाꣳसः पपिवाꣳसश्च विश्वे' (यजु० ८।१६) । 'तुम सबने खा भी लिया और पी भी लिया' । अर्थात् पशु पुरोडाश को खा लिया और सोम राजा को पी लिया । 'अमुं घर्मꣳस्वरतिष्ठतानु स्वाहा' (यजु० ८।१६) । 'प्राण या वायु को, घर्म या आदित्य लोक को, स्व अर्थात् द्यौलोक को जाओ' ऐसा कह कर उन देवों को विदा करता है ॥११॥

इससे छुटी :—'वयꣳ हि त्वा प्रयति यज्ञेऽअस्मिन्नग्ने होतारमवृणीमहीह । ऋधगयाऽऋधगुताशमिष्ठाः प्रजानन् यज्ञमुपयाहि विद्वान्त्स्वाहा' (यजु० ८।२०) । 'हे अग्नि इस यज्ञ से आरम्भ में हमने तुमको होता बनाया है । तू समृद्धि के साथ आया और तूने समृद्धि के साथ शयन किया । तू अपने अधिकार को जानते हुये यज्ञ में आ' । इससे वह अग्नि को छोड़ देता है, उसका विसर्जन कर देता है ॥१२॥

देवा गातुविद इति । गातुविदो हि देवा गातु वित्त्वेति यज्ञं वित्त्वेत्येवैतदाह गातुमितेन तदेतेन यथायथ व्यनसृजति मनसस्पतऽइमं देव यज्ञꣳ स्वाहा वाते धा इत्ययं वै यज्ञो योऽयं पवते तदिमं यज्ञꣳ सम्भृत्यैतस्मिन्यज्ञ प्रतिष्ठापयति यज्ञेन यज्ञꣳ संदधाति तस्मादाह स्वाहा वाते धा इति ॥१३॥

यज्ञ यज्ञं गच्छ । यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहेति तत्प्रतिष्ठितमेवैतद्यज्ञꣳ सन्तꣳ स्वायां योनौ प्रतिष्ठापयत्येष ते यज्ञो यज्ञपते सह सूक्तवाक· सर्ववीरस्तं जुषस्व स्वाहेति तत्प्रतिष्ठितमेवैतद्यज्ञꣳ सन्तꣳ सह सूक्तवाकꣳ सर्ववीरं यजमानेन्ततः प्रतिष्ठापयति ॥१४॥ ब्राह्मणम् ॥ ६ [४ ४] ॥ तृतीयः प्रपाठक· ॥ कंडिकासंख्या १२२ ॥

सातवीं इस मन्त्र मे —'देवा गातुविद' (यजु० ८।२१) । 'मार्ग जानने वाले देवो' । क्योंकि देव मार्ग को जानते हैं । 'गातु वित्त्वा' (यजु० ८।२१) । मार्ग अर्थात् यज्ञ को मालूम करके । 'गातुमित (यजु० ८।२१) । 'जाइये' । इससे वह उनको उचित रीति से विदा कर देता है । 'मनसस्पाऽ इम देव यज्ञꣳस्वाहा वाते धाः (८।२१) । 'हे मन के पति देव, इस यज्ञ को वायु में रख' । यह जो वायु है वही यज्ञ है । यज्ञ को समाप्त करके वह इसको इस प्रकार यज्ञ में ही स्थापित करता है । यज्ञ को यज्ञ से मिला देता है इसलिये कहता है यज्ञ को वायु में रख ॥१३॥

आठवीं इस मन्त्र से :—'यज्ञ यज्ञ गच्छ । यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा' (यजु० ८।२२) । 'हे यज्ञ, यज्ञ को प्राप्त हो, यज्ञपति को प्राप्त हो, अपनी योनि को प्राप्त हो' । जब यज्ञ प्रतिष्ठित हो गया तो फिर उसको उसी की योनि में प्रतिष्ठित करता है । 'एष ते यज्ञो यज्ञपते सह सूक्तवाक' सर्ववीरस्त जुषस्व स्वाहा' (यजु० ८।२२) । 'हे यज्ञपति, यह तेरा यज्ञ है, स्तोत्रों सहित, 'सब वीरों से युक्त, इसको स्वीकार कर' । इस स्तोत्र तथा वीर युक्त यज्ञ को यजमान मे स्थापित करता है ॥१४॥

अवभृथः

अध्याय ४—ब्राह्मण ५

स वाऽअवभृथमभ्यवैति । तद्यदवभृथमभ्यवैति यो वाऽस्य रसोऽभूदाहुतिभ्यो वाऽस्य तमजीजनदथैतच्छरीरं तस्मिन्न रसोऽस्ति तन्न परास्यं तदपोभ्यवहरन्ति रसो वाऽआपस्तदस्मिन्नेतꣳ रसं दधाति तदेनमेतेन रसेन संगमयति तदेनमतो जनयति स एनं जात एव सन्जनयति तद्यदपोऽभ्यवहरन्ति तस्मादवभृथः ॥१॥

अथ समिष्ट यजूꣳषि जुहोति । समिष्ट यजूꣳषि ह्येषान्तो यज्ञस्य स हुत्वैव समिष्ट यजूꣳषि यदेतमभितो भवति तेन चात्वालमुपसमायन्ति स कृष्णविषाणाञ्च मेखलां च चात्वाले प्रास्यति ॥२॥

माहिर्भूर्मा पृदाकुरिति । असौ वाऽअजीयस्य स्वगाकारो यदेनदयोऽभ्यवहरन्त्यथैष एवैतस्य स्वगाकारो रज्जुरिव हि सर्पाः कूपा इव हि सर्पाणामायतनान्यस्ति वै मनुष्याणां च सर्पाणां च विभ्रातृव्यमिव नेत्तदतः संभवदिति तस्मादाह माहिर्भूर्मा पृदाकुरिति ॥३॥

अब अवभृथ स्नान के लिये जाता है । अवभृथ स्नान के लिये इसलिये जाता है कि जो इस (सोम) का रस था, वह इसकी आहुतियों के लिये उत्पन्न हुआ था । रहा उस (सोम) का शरीर । उसमें तो रस नहीं है । उसे फेंकना तो चाहिये नहीं । अब उसको जलों के पास ले जाता है । इस प्रकार वह उसको रस से युक्त करता है और उस (सोम) को रस में से ही उत्पन्न करता है । इस प्रकार उत्पन्न हुआ सोम यजमान को उत्पन्न करता है । चूँकि सोम को जलों के पास ले जाते हैं (अभि अव हरन्ति) इसलिये इसका नाम अवभृथ है ॥१॥

इसके पश्चात् समिष्टः यजुओं की आहुति देता है । समिष्ट-यजुः यज्ञ का अन्त है । समिष्ट-यजुओं की आहुतियाँ देने के पश्चात् जो कुछ उसके पास होता है उसको लेकर चात्याल में जाते हैं । वह कृष्ण विषाण (हरिण के सींगों) और मेखला को चात्याल में फेंक देता है इस मंत्र से ॥२॥

'माहिर्भूर्मा पृदाकुः' (यजु० ८।२३) । 'न सर्पो हो न पृदाकू' । जब इस (सोम के पोक) को अवभृथ के लिये ले जाते हैं तो यह उनका स्वगाकार (farewell or विदाई) है । यह यजमान के लिये भी स्वगाकार है । सर्प रस्सी के समान होते हैं । सर्पों के घर कुयें के समान हैं । मनुष्य सर्पों की लड़ाई है । वह ऐसा सोचता है कि 'कहीं यह उससे उत्पन्न न हो जावे', और इसलिये वह कहता है, कि 'तू न तो अहि (adder सर्प विशेष) बन, और न पृदाकू (viper)' ॥३॥

अथ वाचयति । उरुꣳ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवाऽउऽइति यथायमुरुरभयोऽनाबाधः सूर्याय पन्था एवं मेऽयमुरुरभयाऽनाबाधः पन्था अस्त्वित्येवैतदाह ॥४॥

अपदे पादा प्रतिधातवेऽकरिति । यदिहाऽऽ अप्यपादभरत्यलमेव प्रतिक्रमणाय भवन्युतापवक्ता हृदयाविधश्चिदिति तदेनꣳ सर्वस्माद्धृदयादेनस' पाप्मनः प्रमुञ्चति ॥५॥

अथाह साम गायेति । साम बृहीति वा गायेति त्वेव ब्रूयाद्गायन्ति हि साम तद्यत्साम गायति नादिदं बहिर्धा यज्ञाच्छरीरं नाबाधा रक्षाꣳसि हिनसन्निति साम हि नाबाधानाꣳ रक्षसामपहन्ता ॥६॥

आग्नेय्यां गायति । अग्निर्हि रक्षसामपहन्तातिच्छन्दसि गायत्येषा वै सर्वाणि छन्दाꣳसि यदतिच्छन्दास्तस्मादति च्छन्दसि गायति ॥७॥

स गायति । अभिष्टपति प्रतिदहत्यहावोऽहावऽइति तन्नाबाधा एवैतद्रक्षाꣳस्यतोऽपहन्ति ॥८॥

तऽउदञ्चो निष्कामन्ति । जघनेन चात्वालमग्नेरग्नीध्रꣳ स यस्यां ततो दिशापो भवन्ति तद्यन्ति ॥९॥

अब यह यजमान से कहलवाता है, 'उरुꣳहि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवाऽउ (यजु० ८।२३; ऋ० १।२४।८) । 'राजावरुण के सूर्य के लिये बड़ा चौड़ा मार्ग बनाया है' । इसका तात्पर्य यह है कि जैसे सूर्य के लिये भयरहित चौड़ा चकला मार्ग है इसी प्रकार मेरे लिये भयरहित चौड़ा चकला मार्ग हो ॥४॥

'अपदे पादा प्रतिधातवेऽकः (यजु० ८।२३; ऋ० १।२४।८) । 'पैर-रहित लोगों के पैर दिये हैं' । सूर्य यद्यपि पैर रहित है तो भी यह चल सकता है । 'उतापवक्ता हृदयाविधश्चित्' (यजु० ८।२३; ऋ० १।२४।८) । 'जो चीज हृदय को वेधने वाली है उसका अपवाद करने वाला (निषेध करने वाला) है' । इस प्रकार इसको सब हृदय के पाप से छुड़ा देता है ॥५॥

अब वह कहता है 'साम गाओ' या 'साम बोलो' । 'साम गाओ' ऐसा कहना चाहिये क्योंकि साम को गाते हैं । साम को गाने का तात्पर्य यह है कि यज्ञ से बाहर शरीर को दुष्ट राक्षस न सतावें । क्योंकि साम दुष्ट राक्षसों का नाशक है ॥६॥

प्रस्तोता अग्नि वाला मन्त्र बोलता है । क्योंकि अग्नि राक्षसों का नाशक है । वह अतिछन्द में गाता है । यह अतिछन्द सब छन्द हैं । इसलिये अतिछन्द में गाता है ॥७॥

वह इस मन्त्र को गाता है, 'अभिष्टपति प्रतिदहत्यहावोऽहावः' (१) 'अग्नि तपता है, अग्नि जलाता है—अहवः, आहावः' । इस प्रकार दुष्ट राक्षसों को भगाता है ॥८॥

अब वह (वेदी से) उत्तर की ओर निकलते हैं । चात्वाल के पीछे और आग्नीध्र के आगे । और जिस दिशा में जल होता है उसी दिशा में जाते हैं ॥९॥

स यः स्यन्दमानानाञ्छ्रेयसो ह्रदः स्यात् । तमपोऽभ्यवेयादेता वाऽआपो वरुण गृहीता या स्यन्दमानानां न स्यन्दन्ते वरुण्योवाऽअमृथो निर्वरुणतायै यद्यु ता न विन्देदपि या एव काश्चापोऽभ्यवेयात् ॥१०॥

तमपोवक्रमयन्वाचयति । नमो वरुणायाभिष्ठितो वरुणस्य पाश इति तदेनꣳ सर्वस्माद्वरुणपाशात्सर्वस्माद्वरुण्यात्प्रमुञ्चति ॥११॥

अथ चतुर्गृहीतमाज्य गृहीत्वा । समिधं प्रास्याभिजुहोत्यग्नेरनीकमप आविवेशापा नपात्प्रतिरक्षन्नसुर्यम् । दमे दमे समिधं यक्ष्यग्ने प्रति ते जिह्वा घृतमुच्चरण्यत्स्वा हेति ॥१२॥

अग्नेर्ह वै देवा । यावद्वा यावद्वाप्सु प्रवेशया चक्रुर्नेदतो नाष्ट्रा रक्षाꣳस्युपोत्तिष्ठानित्यग्निर्हि रक्षसामपहन्ता तमेतया च समिधैतया चाहुत्या समिन्धे समिद्धे देवेभ्यो जुहवानीति ॥१३॥

अथापरं चतुर्गृहीतमाज्य गृहीत्वा । आश्राव्याह समिधो यजेति सोऽपर्हिषद्यतुरः प्रयाजान्यजति प्रजा वै बर्हिर्वरुण्यो वाऽअमृथो नेत्प्रजावरुणो गृह्णादिति तस्मादपर्हिषद्य

उस यजमान को चाहिये कि जिधर बहते हुये जल का ठहरा हुआ तालाब हो उसके जल में प्रवेश करे । बहते हुये जल के जो भाग स्थिर हैं वह वरुण-गृहीत (वरुण से पकड़े) हुये हैं) अवभृथ वरुण है—वरुण से छुटकारा पाने के लिये । परन्तु यदि ऐसा जल न मिले तो किसी जल में सही ॥१०॥

जब वह उसे जल मे प्रवेश कराता है तो यह मन्त्र कहलवाता है 'नमो वरुणायाभिष्ठितो वरुणस्य पाशः' । 'वरुण के लिये नमस्कार हो । वरुण का पाश तोड़ डाला गया' । इस प्रकार वरुण के सब पाश से अर्थात् प्रत्येक वरुण्य (अपराध guilt against Varuna —Eggeling, foot note) से छुड़ा देता है ॥११॥

अब चार भाग मे घी लेकर और समिधा को डालकर इस मन्त्र से आहुति देता है, 'अग्नेरनीकमपऽआविवेशापा नपात् प्रतिरक्षन्नसुर्यम् । दमेदमे समिधं यक्ष्यग्ने प्रति ते जिह्वा घृतमुच्चरण्यत् स्वाहा' (यजु० ८।२४) । 'मैं अग्नि के मुख अर्थात् जलों मे घुसा हूँ । हे अपां नपात् (जलों की सन्तान) ! राक्षसों से बचने के लिये । प्रत्येक घर में हे अग्नि ! समिधा जला । तेरी जीभ घी की ओर लपके' ॥१२॥

एक बार देवों ने जितना जितना सभव हो सका अग्नि को जलों में प्रवेश करा दिया जिससे राक्षस उनमें से उठने न पावें । अग्नि राक्षसों का विनाशक है । समिधा से और आहुति से यह इसी अग्नि को प्रज्वलित करता है इसलिये कि 'मैं देवों के लिये आहुति दूँ' ॥१३॥

अब फिर चार भागों में घी लेकर और (आग्नीध्र से) ओगट् कहलवाकर कहता है, 'समिधाओं की स्तुति कर' । अब यह बर्हि की आहुति को छोड़कर शेष चारों आहुतियों

तुरः प्रयाजान्यजति ॥१४॥

अथ वारुण एककपालः पुरोडाशो भवति । यो वाऽस्य रसोऽमूदाहुतिभ्यो वाऽस्य तमजीजनदथैतच्छरीरं तस्मिन्नरसोऽस्ति रसो वै पुरोडाशस्तदस्मिन्नेतꣳ रसं दधाति तदेनमेतेन रसेन संगमयति तदेनमतो जनयति स एनं जात एव सञ्जनयति तस्माद्वारुण एककपालः पुरोडाशो भवति ॥१५॥

स आज्यस्योपस्तीर्य । पुरोडाशस्यावद्यन्नाह वरुणायानुब्रूहीत्यत्र हैकऽऋजीषस्य द्विरवद्यन्ति तदु तथा न कुर्याच्छरीरं वाऽएतद्भवति नालमाहुत्यै द्विरवद्यति सकृदभिघारयति प्रत्यनक्त्यवदानेऽआश्राव्याह वरुणं यजेति वषट्कृते जुहोति ॥१६॥

अथाज्यस्योपस्तीर्य । पुरोडाशमवदधदाहाग्नीवरुणाभ्यामनुब्रूहीति तत्स्विष्टकृते स यद्वारुणयऽइत्याह नेदग्निं वरुणो गृह्णादिति स यद्यमुनऽऋजीषस्य द्विरवदेदयात्र सकृद्यद्यु न नाद्रियेताधोपरिष्टाद्विराज्यस्याभिघारयत्याश्राव्याहाग्नीवरुणौ यजेति वषट्कृते जुहोति ॥१७॥

दे डालता है, वर्हि प्रजा है । अवभृथ वरुण का है । ऐसा न हो कि सन्तान वरुण-गृहीत हो जाय । इसीलिये वर्हि को छोड़कर शेष चार आहुतियाँ दे डालता है ॥१४॥

वरुण का एक कपाल का पुरोडाश बनता है । क्योंकि (सोम में) जो कुछ रस था वह तो आहुतियों के लिये निकाला जा चुका । अब जो शरीर (भाग) बच रहा उसमें रस है ही नहीं ! पुरोडाश रस है । इस प्रकार उसमें रस डालता है । इस प्रकार वह उसको रस से युक्त कर देता है । इस प्रकार वह उसको रस में से उत्पन्न करता है । यह सोम उत्पन्न होकर यजमान को उत्पन्न करता है । इसलिये वरुण के लिये एक कपाल का पुरोडाश होता है ॥१५॥

वह घी चुपड़ कर पुरोडाश को काटते समय कहता है, 'वरुण के लिये अनुवाक पढ़' । कुछ लोग इस अवसर पर सोम के फोक के दो भाग करते हैं । परन्तु ऐसा न करे । क्योंकि यह तो खाली शरीर है । आहुतियों के लिये काफी नहीं है । यह दो टुकड़े करता है । वह उसमें चुपड़ता है । अर्थात् जहाँ-जहाँ काटा था वहाँ घी लगा देता है । ओपट् कहलवा कर वह कहता है, 'वरुण के लिये अनुवाक पढ़' । और वषट्कार के साथ आहुति दे देता है ॥१६॥

अब घी की एक तह लगा कर और (चमचे में) पुरोडाश के टुकड़े को रख कर कहता है कि 'अग्नि और वरुण के लिये अनुवाक कह' । यह अग्नि स्विष्टकृत के लिये है । केवल अग्नि के लिये यों नहीं कहता कि कहीं वरुण पकड़ ले । यदि सोम के फोक के दो भाग किये हों तो एक भाग करे । न किये हों तो न सही । अब वह ऊपर की ओर दो बार घी लगाता है और ओपट् कहलाकर कहता है 'अग्नि और वरुण के लिये अनुवाक पढ़' और वषट्कार से आहुति दे देता है ॥१७॥

ता वाऽएताः। षडाहुतयो भवन्ति। षड्वाऽऋतवः संवत्सरस्य संवत्सरो वरुणस्तस्मात्षडाहुतयो भवन्ति ॥१८॥

एतदादित्यानामयनम्। आदित्यानीमानि यजूंष्यसीत्याहुः स यावदस्य वशः स्यादेमेव चिकीर्षेद्यद्ऽएनमितरथा यजमानः कर्त्तवै ब्रूयादितरथो तर्हि कुर्यादेतानेव चतुरः प्रयाजानपबर्हिषो यजेद्वावाज्यभागौ वरुणमग्नीवरुणौ द्वावनुयाजावपबर्हिषौ तदश दशाक्षरा वै विराड्विराड्वै यज्ञस्तद्विराजमेवैतद्यज्ञमभिसम्पादयति ॥१९॥

एतदङ्गिरसामयनम्। अतोऽन्यतरत्कृत्वा यस्मिन्कुम्भऽआहितो भवति तं प्रलावयति समुद्रे ते हृदयमप्स्वन्तरित्यापो वै समुद्रो रसो वाऽआपस्तस्मिन्नेतꣳ रसं दधाति तदेनमेतेन रसेन समभयति तदेनमतो जनयति स एनं जातं एव स सञ्जनयति स त्वा विशन्त्वोषधीरुताप इति तदस्मिन्नुभयꣳ रसं दधाति यश्चौषधिषु यश्चाप्सु यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके विधेम यत्स्वाहेति तद्यदेव यज्ञस्य साधु तदवास्मिन्नेतद्दधाति ॥२०॥

यह छः आहुतियाँ होती हैं। संवत्सर में छ ऋतुयें होती हैं। संवत्सर वरुण है। इसलिये छः आहुतियाँ होती हैं ॥१८॥

यह आदित्यों का अयन है। और यजु आदित्य के हैं ऐसा कहा जाता है। (अध्वर्यु को चाहिये) कि जितना (यजमान) कहे उतना करे। यजमान अन्यथा करे तो अन्यथा करे। बर्हि की आहुति को छोड़कर शेष चारों आहुतियाँ दे देवे। दो आज्य भाग अग्नि और अग्नि-वरुण के लिये और दो अनुयाज। बर्हि को छोड़ कर। यह दस हो गये। विराट् में दस अक्षर होते हैं। यज्ञ विराट है। इस प्रकार यज्ञ को विराट् के समान कर देता है ॥१९॥

यह अयन अङ्गिराओं का है। (ऊपर कही हुई दोनों विधियों में से) किसी प्रकार (आहुति देकर) जिस पात्र में पोक होता है उसको (अध्वर्यु) इस मन्त्र से पानी पर फैलाता है, 'समुद्रे ते हृदयमप्स्वन्तः' (यजु० ८।२५)। 'तेरा हृदय समुद्र में जलों के भीतर है'। जल समुद्र है। जल रस है। इस (पोक) में इस प्रकार रस रखता है। इसको इस रस से युक्त करता है। इसमें इस रस को उत्पन्न करता है। वह (सोम) पैदा होकर इस (यजमान) को पैदा करता है। 'स त्वा विशन्त्वोषधीरुतापः' (यजु० ८।२५)। 'ओषधियाँ और जल मुझ से मिलें'। इस प्रकार इसमें दोनों रसों को युक्त करता है। यह रस जो ओषधि में है और वह जो जलों में है। 'यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके विधेम यत् स्वाहा' (यजु० ८।२५)। 'हे यज्ञपति सूक्त पढ़ने और नमस्कार में मुझ यज्ञ की आराधना करें'। यज्ञ में जो कुछ भली बात है उसको यह उस (यजमान) में रखता है ॥२०॥

अथानुसृज्योपतिष्ठते । देवीराप एष वो गर्भ इत्याह्य ह्येष गर्भस्तꣳ सुप्रीतꣳ सुभृतं बिभृतेति तदेनमद्भ्यः परिददाति गुप्त्यै देव सोमैष ते लोक इत्याप्यो ह्येतस्य लोकस्तस्मिन्छं च वह परि च वहेति तस्मिन्नः शं चैधि सर्वाभ्यश्च न आतिभ्यो गोपायेत्येवैतदाह ॥२१॥

अथैनमा रयति । अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनो यासिषमवमर्त्यैर्मर्त्यकृतमित्यव ह्येतद्देवैर्देवकृतमेनोऽयासीत्सोमेन राज्ञाव मर्त्यैर्मर्त्यकृतमित्यव ह्येतन्मर्त्यैर्मर्त्यकृतमेनोऽयासीत्पशुना पुरोडाशेन पुरुराव्णो देव रिषस्पाहीति सर्वाभ्यो मातिभ्यो गोपायेत्येवैतदाह ॥२२॥

अथाभ्येत्य स्नातः । अन्योऽन्यस्य पृष्ठे प्रधावतस्तावन्ये वाससी परिधायोदेतः स यथाहिस्त्वचो निर्मुच्येतैवꣳ सर्वस्मात्पाप्मनो निर्मुच्यते तस्मिन्न तावच्च नैनो भवति यावत्कृपाऽरे दति स येनैव निष्क्रामन्ति तेन पुनरायन्ति पुनरेत्याहवनीये समिधमभ्यादधाति

अब उस (सोम के फोक) को छोड़कर यह मंत्र पढ़कर खड़ा होता है, 'देवीरापऽएष वो गर्भः (यजु० ८।२६) । 'हे प्रकाशयुक्त जल, यह तेरा गर्भ (बच्चा) है' । यह जलों का ही तो गर्भ है । तꣳ सुप्रीतꣳ सुभृतं बिभृत' (यजु० ८।२६) । 'इसको प्रीति के साथ और अच्छी तरह उठाकर ले जाओ' । इस प्रकार यह रक्षा के लिये उसको जल के सुपुर्द कर देता है । 'देव सोमैष ते लोकः' (यजु० ८।२६) । 'हे सोम देव, यह तुम्हारा घर है' । जल ही तो इसका घर है । 'तस्मिञ्छं च वह्व परि च वह्व' (यजु० ८।२६) । अर्थात् इसमें तू हमको कल्याण दे और सब कष्टों से बचा ॥२१॥

अब वह रस को इस मंत्र से हुवी देता है—'अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनोऽयासिषमवमर्त्यैर्मर्त्यकृतम्' (यजु० ८।२७) । 'हे अवभृथ, मंद गति से जा । यद्यपि तू तेज चलने वाला है तो भी मन्द गति से जा । मैंने देवों की सहायता से देवों के प्रति किये हुये पाप को और मनुष्यों की सहायता से मनुष्यों के प्रति किये पाप को दूर कर दिया' । इसने वस्तुतः देवों की सहायता से अर्थात् सोम राजा के द्वारा देवकृत पाप को दूर कर दिया और मनुष्यों की सहायता से अर्थात् पशु तथा पुरोडाश के द्वारा मनुष्यकृत पाप को दूर कर दिया । 'पुरुराव्णो देव रिषस्पाहि' (यजु० ८।२७) । 'हे देव विरुद्धफलदायी वध से तू हमको बचा' । अर्थात् सब कष्टों से हमको बचा ॥२२॥

अब यजमान और उसकी पत्नी जलों में उतर कर नहाते हैं और एक दूसरे की पीठ मलते हैं । दूसरे कपड़े पहन कर वे बाहर आते हैं । जिस प्रकार साँप केंचुल छोड़ देता है उसी प्रकार यह सब पापों से मुक्त हो जाता है । उसमें इतना पाप भी नहीं रहता जितना दाँत-शून्य बच्चे में । जिस मार्ग से यह बाहर आये थे उसी से जाते हैं । लौट कर आहव-

देवानाꣳ समिदसीति यजमानमेवैतया समिन्द्धे देवानाꣳ हि समिद्धिमनु यजमानः समिध्यते ॥२३॥ ब्राह्मणम् ॥ १ [४. ५.] ॥ चतुर्थोऽध्यायः ॥२८॥

नीय में समिधा रखता है (इस मन्त्र से) 'देवानाꣳ समिदसि' (यजु० ८।२७) । 'तू देवों की समिधा है' । इस प्रकार यजमान को प्रकाश-युक्त करता है । क्योंकि देवों के प्रज्वलित होने से यजमान भी प्रज्वलित होता है ॥२३॥

अध्याय ५—ब्राह्मण १

आदित्येन चरुणोदयनीयेन प्रचरति। तद्यदादित्यश्चरुर्भवति यदेवैनामदोदेवा अब्रुवंस्तवैव प्रायणीयस्तवोदनीय इति तमेवास्याऽएतदुभयत्र भागं करोति ॥१॥

स यदमुत्र राजानं क्रेष्यन्नुपप्रैष्यन्यजते। तस्मात्तत्प्रायणीयं नामाथ यदत्रावभृथादुदेत्य यजते तस्मादेतदुदयनीयं नाम तद्वाऽएतत्समानमेव हविरदित्या ऽएव प्रायणीयमदित्याऽउदयनीयमियꣳ ह्येवादितिः ॥२॥

स वै पथ्यामेवाये स्वस्तिं यजति। तद्देवा अप्रज्ञायमाने वाचैव प्रत्यपद्यन्त वाचा हि मुग्धं प्रज्ञायतेऽथात्र प्रज्ञाते यथापूर्वं करोति ॥३॥

सोऽग्निमेव प्रथमं यजति। अथ सोममथ सवितारमथ पथ्याꣳ स्वस्तिमथादितिं वाग्वै पथ्या स्वस्तिरियमदितिरस्यामेव तद्देवा वाचं प्रत्यष्ठापयन्तस्येयं वागस्यां प्रतिष्ठिता वदति ॥४॥

अब अन्तिम अदिति सम्बन्धी चरु बनाता है—अदिति का चरु इसलिये बनाता है कि पहले कभी देवों ने उससे कहा था कि तेरी ही प्रायणीय अर्थात् पहली (Opening) आहुति होगी और तेरी ही उदनीय अर्थात् पिछली (Concluding)। इसलिये पहले और पीछे दोनों भाग उसी के होते हैं ॥१॥

उस समय सोम राजा को मोल लेने की इच्छा से जाते हुये (उपप्रैष्यन्) आहुति देता है, इसलिये इसका नाम 'प्रायणीय' पड़ा और इस समय अवभृथ से लौटकर आहुति देता है, इसलिये इसका 'उदनीय' नाम हुआ। यह आहुति तो समान ही है। प्रायणीय भी अदिति की और उदयनीय भी अदिति की। यह पृथिवी ही अदिति है ॥२॥

पहले यह 'पथ्या-स्वस्ति' (कल्याणकारी मार्ग हो) इसकी इच्छा के लिये आहुति देता है। पहले देवों ने न जानने की दशा में वाणी से ही मार्ग को पाया था। वाणी से ही अज्ञान को दूर किया जाता है। अब यहाँ ज्ञान होने पर क्रमशः ठीक-ठीक कार्य करता है ॥३॥

यह पहले अग्नि के लिये आहुति देता है, फिर सोम के लिये, फिर सविता के लिये, फिर पथ्या के लिये, फिर अदिति के लिये। वाणी ही पथ्यास्वस्ति है और पृथिवी अदिति है। इसी पृथ्वी पर देवों ने वाणी को स्थापित किया और उसी पर स्थापित होकर वाणी बोलती है ॥४॥

अथ मैत्रावरुणीं वशामनू बन्ध्यामालभते । स एषोऽन्य एव यज्ञस्तायते पशुबन्ध एव समष्टियजुश्चपि ह्येवान्तो यज्ञस्य ॥५॥

तद्यन्मैत्रावरुणी वशा भवति । यद्वाऽईजानस्य स्विष्टं भवति मित्रोऽस्य तद्गृह्णाति यद्वस्य दुरिष्टं भवति वरुणोऽन्य तद्गृह्णाति ॥६॥

तदाहुः । क्वेजानोऽभूदिति तद्यदेवास्यात्र मित्रः स्विष्टं गृह्णाति तदेवास्माऽएतया प्रीतः प्रत्यनसृजति यदु चास्य वरुणो दुरिष्टं गृह्णाति तच्चैवास्माऽएतया प्रीतः स्विष्टं करोति तदु चास्मै प्रत्यनमजति सोऽयमेष स्व एव यज्ञो भवति स्वꣳ सुकृतम् ॥७॥

तद्यन्मैत्रावरुणी वशा भवति । यत्र वै देवा रेतः सिक्तꣳ प्राजनयंस्तदाग्निमारुतमित्युक्थं तस्मिंस्तद्व्यारयायते । यथा नदेवा रेतः प्राजनयंस्ततोऽङ्गाराः समभवन्नङ्गारेभ्योऽङ्गिरसस्तदन्वये पशवः ॥८॥

अथ यदासा॰ पाꣳसव पर्यशिष्यन्त । ततो गर्दभः समभवत्तस्माद्यत्र पाꣳसुलं भवति गर्दभस्थानमिव वतेत्याहुरथ यदा न कश्चन रस॰ पर्यशिष्यत तत एषा मैत्रावरुणी वशा समभवत्तस्मादेषा न प्रजायते रसाद्धि रेतः सम्भवति रेतसः पशवस्तद्यदन्ततः

अब मित्र और वरुण के लिये अनुबन्ध्या गाय को मारते हैं। यह पशुबन्ध एक दूसरा ही यज्ञ है। यज्ञ का अन्त समष्टि यजु' है ॥४॥

मित्र और वरुण के लिये गाय इसलिये होती है कि यज्ञ का जो स्विष्ट भाग (अच्छा, हितकर) है उसे मित्र लेता है और जो दुरिष्ट भाग है उसे वरुण लेता है ॥६॥

इस पर कुछ लोग कहते हैं कि यजमान का क्या हुआ? उसके लिये स्विष्ट भाग को मित्र लेता है उसको वह इस गाय के द्वारा प्रसन्न होकर उसी को लौटा देता है। और इसके दुरिष्ट भाग को वरुण लेता है उसको वह इस गाय के द्वारा प्रसन्न होकर स्विष्ट बना देता है और उसी के लिये छोड़ देता है। इस प्रकार यह यज्ञ उसका अपना ही हो जाता है अपना ही और भली भाँति किया हुआ (सुकृत) ॥७॥

यह गौ मित्र वरुण की इसलिये होती है कि जब देवों ने सींचे हुये वीर्य को उगाया, उसे अग्नि मारुत उक्थ कहते हैं। उसकी व्याख्या है कि देवों ने वीर्य को कैसे उगाया। उसने अंगारे हुये। अंगारों से अंगिरस, उसके पीछे दूसरे पशु ॥८॥

अब जो राख की धूलि रह गई उससे गधा उत्पन्न हुआ। इसीलिये जब कोई धूल का स्थान (बुरा स्थान) होता है तो कहते हैं कि यह तो गधे का स्थान (गर्दभ स्थान) है। जब कुछ भी रस शेष न रहा तो उससे मित्र और वरुण की गौ उत्पन्न हुई। इसलिये यह वशा (बन्ध्या गौ) बच्चा नहीं देती। क्योंकि रस से वीर्य होता है और वीर्य से सन्तान। चूँकि यह सब से पीछे उत्पन्न हुई, इसलिये यह यज्ञ के अन्त में लाई जाती है। इसीलिये

समभवत्तस्माद्न्त यज्ञस्यानुवर्त्ते तस्माद्वाऽएतान मैत्रावरुणी वशावक्रुप्तमा भवति यदि वशा न विन्देदप्युक्षतश एव स्यात् ॥९॥

अथेतर विश्वे देवा अमरीमृत्स्यन्त । ततो वैश्वदेवीसमभवदथ बार्हस्त्या सोऽन्तो-ऽन्तो हि बृहस्पति ॥१०॥

स य सहस्र वा भूयो वा ददात् । स एना॰ सर्वा आलभेत सर्वे वै तस्याप्त भवति सर्व जित यः साहस्र वा भूयो वा ददाति सर्वमता एवमेव यथापूर्व मैत्रावरुणीमेवाग्रेऽथ वैश्वदवीमथ बार्हस्त्यम् ॥११॥

अथो ये दीर्घसत्रमासीरन् । सवत्सर वा भूयो वा तऽएनाः सर्वा आलभेरन्तसर्वे वै तेषामाप्त॰ भवति सर्व जित ये ॰दीर्घसत्रमासते सवत्सर वा भूयो वा सर्वमेता एवमेव यथापूर्वम् ॥१२॥

अथोदवसानीयेष्ट्या यजते । स आग्नेय पञ्चकपाल पुरोडाश निर्वपति तस्य पञ्चपदा॰ षड्क्तयो याज्यानुवाक्या भवन्ति यातयामेव वाऽएतदीजानस्य यज्ञो भवति सो ऽस्मात्पराडिव भवत्यग्निर्वै सर्वे यज्ञा अग्नौ हि सर्वान्यज्ञास्तन्वते ये च पाकयज्ञा ये चेतरे तद्यज्ञमेवैतत्पुनरारभते तथास्यायातयामा यज्ञो भवति तथोऽअस्मान्न पराड् भवति ॥१३॥

तद्यत्पञ्चकपालः पुरोडाशो भवति । पञ्चपदाः षड्क्तयो याज्यानुवाक्याः षाड्क्तो

मित्र वरुण के लिये वशा (वन्ध्या गाय) ही ठीक है । यदि वन्ध्या गाय न मिले तो बैल ही सही ॥९॥

अब विश्वेदेवों ने यत्न किया उससे वैश्वदेवी गाय हुई । फिर बृहस्पति सम्बन्धी गाय । बृहस्पति अन्त है, बृहस्पति ही अन्त है ॥१०॥

यह जो हजार गायें देता है वह इन सब का आलभन करता है । जो हजार या बहुत सी गाये दान करता है उसे सब प्रकार की कि जय प्राप्त हो जाती है । यह सब यथानुसार इस प्रकार है—पहले मित्र-वरुण की, फिर वैश्वदेव की, फिर बृहस्पति की ॥११॥

जो दीर्घ सत्र करते हैं, वर्ष भर का या अधिक काल का, वह इन सब का आलभन करते हैं । उनकी सब इच्छायें पूरी हो जाती हैं, सब विजय मिल जाती है, जो दीर्घ सत्र को करते हैं, वर्ष भर के लिये या अधिक काल के लिये ॥१२॥

अब वह उदवसानीय इष्टि करता है । वह अग्नि के लिये पाँच कपालों का पुरोडाश बनाता है । उसके याज्य और अनुवाक पाँच पद की पंक्ति वाले होते हैं । इस समय यज्ञ करने वाले का यज्ञ थक सा जाता है वह उससे विमुख सा हो जाता है । अग्नि 'सर्व यज्ञ' है । क्योंकि अग्नि में ही सब यज्ञ किये जाते हैं चाहे पाक यज्ञ हो या अन्य । वह इसी यज्ञ को फिर लेता है । इस प्रकार यह यज्ञ थकने नहीं पाता, वह उससे विमुख नहीं होने पाता ॥१३॥

पाँच कपालों का पुरोडाश इसलिये होता है कि याज्य और अनुवाक्य में पाँच पद

वै यज्ञस्तद्यज्ञमेवैतत्पुनरारभते तथास्यायातयामा यज्ञो भवति तथोऽअस्मान्न पराङ् भवति ॥१४॥

तस्य हिरण्यं दक्षिणा । आग्नेयो वाऽएष यज्ञो भवत्यग्नेरेतो हिरण्य दक्षिणा-नड्वान्वा स हि वहेनाग्नेयोऽग्निदग्धमिव ह्यस्य वह भवति ॥१५॥

अथो चतुर्गृहीतमेवाज्यं गृहीत्वा । वैष्णव्यर्चा जुहोत्युरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृत घृतयोने पिब प्र प्र यज्ञपतिं तिर स्वाहेति यज्ञो वै विष्णुस्तद्यज्ञमे-वैतत्पुनरारभते तथास्यायातयामा यज्ञो भवति तथोऽअस्मान्न पराङ् भवति तन्नो यच्छक्नु-यात्तद्दानादक्षिणꣳ हविः स्यादिति ह्याहुरथ यदेवैषोदवसानीयेष्टिः संतिष्ठतेऽथ सायमा-हुतिं जुहोति कालऽएव प्रातराहुतिम् ॥१६॥ ब्राह्मणम् ॥ २ [५. १.] ॥

की पंक्तियाँ होती है और यज्ञ भी पाँच वाला है । इस प्रकार यह फिर यज्ञ को ही आरम्भ करता है । इस प्रकार यज्ञ थकता नहीं और इससे विमुख हो जाता है ॥१४॥

उसकी दक्षिणा सोना है । यह यज्ञ अग्नि का है । सोना अग्नि का वीर्य है । इसलिये सोना दक्षिणा है । या बैल । यह दोनों के कारण अग्नि का है । क्योंकि इसका कथा ऐसा हो जाता है मानो अग्नि में जला दिया गया ॥१५॥

अब चार भाग घी लेकर विष्णु की ऋचा द्वारा आहुति देता है, 'उरु विष्णो विक्रमस्वोरु क्षयाय नमस्कृधि । घृत घृतयोने पिब प्र प्र यज्ञपतिं तिर स्वाहा' (यजु० ५ ३८) । 'हे विष्णु चौड़ी टाँगें बढ़ाओ । हमारे लिये खुले मकान बनाओ । हे घृतयोनि, घृत पियो और यज्ञपति की उन्नति करो' । यज्ञ विष्णु है । इस प्रकार यह यज्ञ को फिर आरम्भ करता है । इस प्रकार यज्ञ थकता नहीं और वह उससे विमुख नहीं होता । इस समय जितनी शक्ति हो उतनी दक्षिणा दे क्योंकि यज्ञ बिना दक्षिणा के नहीं होना चाहिये ऐसा कहते हैं । जब यह उदवसानीय इष्टि समाप्त हो जाय तो सायंकाल की आहुति देता है । परन्तु प्रातःकाल की आहुति प्रातः काल ही दी जाती है ॥१६॥

आनुवन्ध्य-यागः

अध्याय ५—ब्राह्मण १

पशमालभन्ते । तमालभ्य संज्ञपयन्ति संज्ञप्याह पशमुत्तिरादेग्युत्तिराय पशमनु-मतीं गर्भमेष्ट्वै मृयास्त यदि न विन्दन्ति किमाद्रियेरन्यद्यु विन्दन्ति तत्र प्रायश्चित्तिः

ये पशु का आलभन करते हैं और उसका आलभन करके उसे मारते हैं । मारने के बाद कहते हैं 'पशु को निकालो' । जब पशु निकल चुके तो मारने वाले से कहना

क्रियते ॥१॥

न वै तदवकल्पते। यदेकां मन्यमाना एकयैनया चरेयुर्यद्वे मन्यमाना द्वाभ्यामिन चरेयुः स्थाली चैनमुष्णीषं चोपकल्पयतै ब्रूयात् ॥२॥

अथा वपया चरन्ति। यथैव तस्यै चरणं वपया चरित्वाध्वर्युश्च यजमानश्च पुनरेतः स आहाध्वर्युर्निरूहेत गर्भमिति तथ्स ह नोदरतो निरूहेदार्तायां वै मृतायां उदरतो निरूहन्ति यदा वै गर्भः समृद्धो भवति प्रजननेन वै स तर्हि प्रत्यङ्ङेति तमपि विरुज्य श्रोणी प्रत्यञ्चं निरूहितवै ब्रूयात् ॥३॥

तं निरुह्यमाणमभिमन्त्रयते। एजतु दशमास्यो गर्भो इति जरायुणा सहेति स यदाहैजत्विति प्राणमेवास्मिन्नेतद्दधाति दशमास्य इति यदा वै गर्भः समृद्धो भवत्यथ दशमास्यस्तमेतदप्यदशमास्यथ्स न्तं ब्रह्मणैव यजुषा दशमास्यं करोति ॥४॥

जरायुणा सहेति। तद्यथा दशमास्यो जरायुणा सहेयादेवमेतदाह यथाय वायु-

चाहिये कि गर्भ को खोजे (अर्थात् यह देखने का यत्न करे कि गाय कहीं गर्भिणी तो नहीं थी।) यदि गर्भ न मिले तो अच्छा ही है। यदि मिल जाय तो इसका प्रायश्चित्त करना चाहिये ॥१॥

यह तो ठीक है नहीं कि उसको एक (अकेली गाय) मानकर ही कार्य कर डालें या उसको दो मानकर (अर्थात् गाय और उसका पेट का बच्चा) ही कार्य करें। तात्पर्य यह है कि देख भाल कर जाँच कर लेनी चाहिये और उसी के अनुसार बरतना चाहिये)। अब कहे कि थाली और उष्णीष (अँगोछा या कपड़े का छोटा सा टुकड़ा) लाओ ॥२॥

अब वपा से जैसा नियम है उसी के अनुसार कृत्य करते हैं। वपा के कृत्य के पश्चात् अध्वर्यु और यजमान दोनों लौट आते हैं। अध्वर्यु कहता है कि 'गर्भ को निकाल'। क्योंकि बिना कहे तो कोई गर्भ को निकालता नहीं। जब तक कि माता रोगी न हो या मर न गई हो। या जब गर्भ पूरा हो जाता है तो जनने के समय स्वयं ही बाहर निकल आता है। उससे कहना चाहे कि चाहे जाँघें चीरना ही क्यों न पड़े इस गर्भ को निकाल ले ॥३॥

जब वह (गर्भ) निकल आवे तो इस मन्त्र को पढ़े। 'एजतु दशमास्यो गर्भः' (यजु० ८।२८)। 'जरायुणा सह' (यजु० ८।२८)। 'दश मास का गर्भ जरायु के साथ स्पन्दन करे'। स्पन्दन करें यह कहकर कि वह उसमें प्राणों की स्थापना करता है। दश मास का इसलिये कहा कि दश मास में गर्भ पूर्णतया बढ़ पाता है। यहाँ यह दस मास का नहीं भी हो तो भी यजु० के मन्त्र पढ़कर वह उसे दस मास का कर देता है ॥४॥

'जरायुणा सह' (यजु० ८।२८)। दस मास का बच्चा जरायु के साथ निकलता है। इसी प्रकार यह भी निकले। 'यथाय वायुरेजति यथा समुद्रऽएजति' (यजु० ८।२८)। 'जैसे यह वायु चलता है या जैसे यह समुद्र चलता है'। इससे वह उसमें प्राणों की स्थापना

रेजति यथा समुद्र एजतीति प्राणमेवास्मिन्नेतद्दधात्येवायं दशमास्योऽअस्त्रज्जरायुणा सहेति तद्यथा दशमास्यो जरायुणा सहस्त्र२ सेतैवमेतदाह ॥५॥

तदाहुः। कथमेतं गर्भं कुर्यादित्यङ्गादङ्गादेवास्यावद्येयुर्यथेवेतरेषामवदानानामवदानं तदु तथा न कुर्यादुत ह्येषोऽविकृताङ्गो भवत्यधस्तादेव ग्रीवा अपिकृत्यैतस्यार्थ२ स्थाल्यामेतं मेधं२ श्चोतयेयुः सर्वेभ्यो वाऽअस्यैषोऽङ्गेभ्यो मेधश्चोतति तदस्य सर्वेषामेवाङ्गानामवत्तं भवत्यवद्यन्ति पशोया अवदानानि यथैव तेषामवदानम् ॥६॥

तानि पशुश्रपणे श्रपयन्ति तदेवैतं मेधं२ श्रपयन्त्युल्मीषेणावेष्टय गर्भं पार्श्वतः पशुश्रपणस्योपनिदधाति यदा श्रृतो भवत्यथ समुद्यावदानान्येवाभिजुहोति नैतं मेधमुद्वासयन्ति पशुं तदेवैतं मेधमुद्वासयन्ति ॥७॥

तं जघनेन चात्वालमन्तरेण यूपं चाग्निं च हरन्ति। दक्षिणतो निधाय प्रतिप्रस्थातावद्यत्यथ स्रुचोरुपस्तृणीतेऽथ मनोतायै हविषोऽनुब्रूहीत्याहावद्यन्ति पशोया अवदानानां यथैव तेषामवदानम् ॥८॥

अथ प्रचरणीति स्रुग्भवति। तस्यां प्रतिप्रस्थाता मेधायोपस्तृणीते द्विरवद्यति

करता है ? एवाय दशमास्योऽअस्त्रज्जरायुणा सह' (यजु० ८।२८)। 'इसी प्रकार यह दस मास का जरायु के साथ बाहर निकल आया'। अर्थात्—जैसे दश मास का गर्भ जरायु के साथ निकलता है उसी प्रकार यह भी निकले ॥५॥

अब कुछ लोग पूछते हैं कि इस गर्भ का करना क्या चाहिये। क्या इसके अंग-अंग काट डालने चाहियें, जैसे अन्यों के टुकड़े टुकड़े किये जाते हैं। नहीं। ऐसा नहीं करना चाहिये। इसके अंग तो अभी बन नहीं पाये। गर्दन के नीचे काटकर उसका मेध थाली में टपका देवे। यह मेध सभी अंगों से टपकता है, इसलिये सभी अंगों का भाग समझा जाता है। अब वह पशु (गाय) के इसी प्रकार भाग करते हैं जैसे किये जाते हैं ॥६॥

पशुश्रपण (पशु को पकाने की अग्नि) पर उन भागों को पकाते हैं। वहीं उस मेध को भी पकाते हैं। गर्भ को अँगोछे में चारों ओर लपेटकर पशुश्रपण के पास रख देते हैं। जब पक जाता है तो उन भागों को इकट्ठा करके आहुति देते हैं (अभिजुहोति) परन्तु मेध की नहीं। अब वह पशु को निकालते हैं और मेध को भी ॥७॥

इसको चात्वाल के पीछे अग्नि और यूप के बीच में होकर ले जाते हैं। दक्षिण की ओर रखकर प्रतिप्रस्थाता (यज्ञ के भागों को) काटता है। अब दोनों स्रुचों में घी लगाता है और (होता से) कहता है कि मनोता के लिये हवि के अवसर पर अनुवाक पढ़। अब वह पशु (गाय) के टुकड़े-टुकड़े करते हैं उसी प्रकार जैसे करने चाहियें ॥८॥

प्रचरणी नाम की एक स्रुक् होती है। उसमें प्रतिप्रस्थाता मेध की एक तह लगा देता है, दो भाग काटता है। एक बार घी डालता है और उन दोनों भागों को पूरा करता

सकृदभिघारयति प्रत्यनक्तपदानेऽथानुब्रूच आहाश्राव्याह प्रेष्येति वषट्कृतेऽध्वर्युर्जुहोत्यध्वर्योरनुहोमं जुहोति प्रतिप्रस्थाता ॥९॥

यस्यै ते यज्ञियो गर्भ इति । अयज्ञिया वै गर्भास्तमेतद्वक्षणैव यजुषा यज्ञियं करोति यस्यै योनिर्हिरण्ययीत्यदो वाऽएतस्यै योनिं विच्छिन्दन्ति यददो निष्कर्षन्त्यमृतमायुर्हिरण्यं तामेवास्या एतदमृतां योनिं करोत्याक्षान्यद्भुता यस्य त मात्रा समजीगमथ्स्वाहेति यदि पुमान्त्स्याद्यद्यु स्त्री स्यादक्षान्यद्भुता यस्यै तां मात्रा समजीगमथ्स्वाहेति यद्ऽअविज्ञातो गर्भो भवति पृथक्कृत्यैव जुहुयात्पृथग्धि गर्भा अक्षान्यद्भुता यस्य तं मात्रा समजीगमथ्स्वाहेत्यदो वाऽएतं मात्रा विष्वञ्चं कुर्वन्ति यतदो निष्कर्षन्ति तमेतद्वक्षणैव यजुषा समर्ध्य मध्यतो यज्ञस्य पुनर्गोत्रा सङ्गमयति ॥१०॥

अथाध्वर्युर्वनस्पतिना चरति । वनस्पतिनाध्वर्युश्चरित्वा यान्युपभृत्यवदानानि भवन्ति तानि समानयमान आहाग्नये स्विष्टकृतेऽनुब्रूहीत्यत्साकामति प्रतिप्रस्थाता स एतथ्सर्वमेव मेध गृह्णीतेऽथोपरिष्टाद्घिराज्यस्याभिघारयत्याश्राव्याह प्रेष्येति वषट्कृतेऽध्व

है । अब अनुवाक के लिये कहता है । और औपट् कहलवाकर (मैत्रावरुण से) कहता है कि अनुवाक कहलवा । वषट्कार के बाद अध्वर्यु आहुति देता है । अध्वर्यु के होम के पीछे प्रतिप्रस्थाता आहुति देता है । इस मन्त्र से—॥९॥

'यस्यै ते यज्ञियो गर्भः' (यजु० ८।२९) । 'तू जिसका गर्भ यज्ञ के योग्य हो गया है' । गर्भ यज्ञ के योग्य नहीं था । इसको वह मन्त्र पढ़कर यज्ञ के योग्य बनाता है । 'यस्यै योनिर्हिरण्ययी' (यजु० ८।२९) । 'जिसकी सोने की योनि है' । पहले योनि को फाड़ा था जब उसमें से गर्भ निकाला था । सोना अमर आयु है । इस प्रकार वह इसकी योनि को अमर बना देता है । 'अक्षान्यद्भुता यस्य त मात्रा समजीगमथ्स्वाहा' (यजु० ८।२९) । 'जिसके अङ्ग टूटे नहीं हैं उसको मैंने माता के साथ जोड़ा है' । यदि गर्भ नर हो तो ऐसा कहे और यदि गर्भ मादा हो तो 'यस्य' के स्थान में 'यस्यै' और 'त' के स्थान में 'ता' कह दे अर्थात् 'अक्षान्यद्भुता यस्यै ता मात्रा समजीगमथ्स्वाहा' (यजु० ८।२९) । यदि गर्भ में (नर मादा का भेद) ज्ञात न हो सके तो नर मानकर ही कार्य करे क्योंकि 'गर्भ' पुल्लिङ्ग है । अर्थात् 'अक्षान्यद्भुता यस्य त मात्रा समजीगमथ्स्वाहा' (यजु० ८।२९) । 'पहले इसको इसकी माता से अलग किया था जब इसे मा के गर्भ से निकाला था । अब इसको मन्त्रपाठ के द्वारा पूर्ण करके इसकी मा से मिला देता है ॥१०॥

अब अध्वर्यु वनस्पति के लिये आहुति देता है । अध्वर्यु वनस्पति के लिये आहुति देने के पश्चात् उपभृत में जो भाग हैं उनको मिलाकर कहता है, 'अग्नि स्विष्टकृत् के लिये अनुवाक पढ़' । अब प्रतिप्रस्थाता आता है और सम्पूर्ण मेध को लेता है । उसके ऊपर दो बार घी छोड़ता है । औपट् कहलवा कर अध्वर्यु कहता है 'प्रेष्य' (अर्थात् आरम्भ करो । वषट्कार के पीछे अध्वर्यु आहुति देता है । अध्वर्यु के पीछे प्रतिप्रस्थाता होम

र्युर्जुहोत्यध्वर्योरन् होमं जुहोति प्रतिप्रस्थाता ॥११॥

पुरुदस्मो विषुरूप इन्दुरिति। बहुदान इति हैतदाह पुरुदस्म इति विषुरूप इति विषरूपा—इव हि गर्भा इन्दुरन्तर्महिमानमानञ्ज धीर इत्यन्तर्ह्येषे मातर्युह्यो भवत्येकपदी द्विपदी त्रिपदी चतुष्पदीमष्टापदी भुवनानुप्रथन्ताꣳ स्वाहेति प्रथयत्येवैनामेतत्सुभूयो ह जगत्यष्टापद्येष्ट्वा यदु चानष्टापद्या ॥१२॥

तदाहुः। क्वैतं गर्भं कुर्यादिति वृक्षऽएवैनमुद्ध्युरन्तरिक्षायतना वै गर्भा अन्तरिक्षमिवैतद्यद्वृक्षस्तदेनꣳ स्वऽएवायतने प्रतिष्ठापयति तदु वाऽआहुर्य एनं तत्रानुव्याहरेद्वृक्षऽएनं मृतमुद्धास्यन्तीति तथा हैव स्यात् ॥१३॥

अप एवैनमभ्यवहरेयुः। आपो वाऽअस्य सर्वस्य प्रतिष्ठा तदेनमप्स्वेव प्रतिष्ठापयति तदु वाऽआहुर्य एनं तत्रानुव्याहरदेप्स्वे मरिष्यतीति तथा हैव स्यात् ॥१४॥

आसूत्कर ऽएवैनमुपकिरेयुः। इयं वाऽअस्य सर्वस्य प्रतिष्ठा तदेनमस्यामेव प्रतिष्ठापयति तदु वा ऽआहुर्य एनं तत्रानुव्याहरेत्तिमेऽरमै मृताय श्मशानं करिष्यन्तीति तथा हैव स्यात् ॥१५॥

करता है ॥११॥

इस मंत्र से—'पुरुदस्मो विषुरूपऽइन्दुः' (यजु० ८।३०)। 'पुरुदस्म' का अर्थ है है बहुदान (बहुत दान करने वाला)। विषुरूप का अर्थ है बहु रूप वाला। क्योंकि गर्भ कई रूपों के होते हैं। 'इन्दुरन्तर्महिमानमानञ्ज धीरः' (यजु० ८।३०)। 'मेधावी रस ने अपने भीतर महत्ता को धारण किया'। वस्तुतः यह गर्भ माता मे स्थित हुआ। 'एकपदी द्विपदी त्रिपदी चतुष्पदीमष्टापदी भुवनानु प्रथन्ताꣳस्वाहा' (यजु० ८।३०)। 'एक पैर वाली, दो पैर वाली, तीन पैर वाली, चार पैर वाली, आठ पैर वाली गें यह भुवन प्रसरित हों'। यह गाय की बड़ाई है। अष्टापदी न होने के स्थान में यदि अष्टापदी से आहुति दी जाय तो अधिक फल होगा ॥१२॥

इस पर कुछ लोग पूछते हैं कि गर्भ का क्या किया जाय। उसको वृक्ष पर फैला दें। गर्भ अन्तरिक्ष में स्थित रहते हैं। वृक्ष भी अन्तरिक्ष है। इस प्रकार इसकी इसी में प्रतिष्ठा हो जायगी परन्तु इस पर लोग कहते हैं कि यदि कोई गाली दे कि वह 'इसको काटकर वृक्ष पर लटका देंगे' तो उसी के समान यह भी है ॥१३॥

इसको जल में छोड़ दें। क्योंकि जल तो इस सब की प्रतिष्ठा है। इस प्रकार जल में इसकी स्थापना हो जायगी। परन्तु इस पर भी लोग कहते हैं कि जैसे कोई गाली दे कि वह जल में डूब कर मर जाय' यह भी वैसा ही है ॥१४॥

उसको घूरे में गाड़ दें। यह पृथ्वी तो सभी की प्रतिष्ठा है। इस प्रकार वह इसकी पृथ्वी में स्थापना करता है। इस पर भी लोगों का कहना है कि यह भी वैसा ही होगा जैसे कोई गाली दे कि यह मर गया। इसके लिये श्मशान तैयार है ॥१५॥

पशुश्रपण ऽग्वैन मरुद्भ्यो जुहुयात् । अहुतादो वै देवानां मरतो विडहुतमिवैत घदमृतो गर्भ आहवनीयाद्वा ऽग्व अहुतो भवति पशुश्रपणस्तथाह न बहिर्धा यज्ञाद्भवति न प्रत्यक्षमिवाहवनीये देवानां वै मरुतस्तदेन मरुत्स्वेव प्रतिष्ठापयति ॥१६॥

स हुतैव समिष्टयजूꣳषि । अथागारेष्वेतꣳ सोष्णीष गर्भमादत्ते तं प्राङ् तिष्ठञ्जुहोति मारुत्यऽर्चो मरुतो यस्य हि क्षये पाथा दिवो विमहस स सुगोपातमो जन इति न स्वाहाकरोत्यहुतादो वै देवानां मरुतो विडहुतमिवैतघदस्वाहा कृत देवानां वै मरुतस्तदेन मरुत्स्वेव प्रतिष्ठापयति ॥१७॥

अथाङ्गारैरभिसमूहति । मही द्यौ पृथिवी च न इम यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिरिति ॥१८॥ ब्राह्मणम् ॥३॥ [५ २] शतम् २७०० ॥

पशुश्रपण में इसकी मरुतों के लिये आहुति दे देते । देवों में मरुत या साधारण पुरुष तो आहुति को खाते नहीं । वे पका गर्भ तो आहुति में गिना नहीं जाता (अहुत है) । पशुश्रपण तो आहवनीय में से लिया जाता है । इस प्रकार इसका यज्ञ से बहिष्कार नहीं होगा । और न यह प्रत्यक्ष रूप में आहवनीय में डाला जाता है । मरुत देवों के ही हैं । इस प्रकार वह इसकी मरुतों में स्थापना कर देता है ॥१६॥

समिष्ट यजुओं की आहुति के पीछे जब अगारे कुछ शान्त हो रहे हों तो अगोछे में गर्भ को लेकर पूर्वाभिमुख होकर मरुतों के लिये इस मन्त्र से आहुति देता है, 'मरुतो यस्य हि क्षये पाथा दिवो विमहस । स सुगोपातमो जन' (यजु० ८।३१) । 'हे द्यौलोक के वीर मरुतो ! जिसके घर में तुम पीते हो वह सबसे अधिक सुरक्षित होता है' । इसके साथ 'स्वाहा' का उच्चारण नहीं होता, देवों में मरुत (साधारण जन) आहुति दिये हुये को नहीं खाते । 'स्वाहा' के बिना जो आहुति दी जाती है वह आहुति नहीं समझी जाती । मरुत देवों में से हैं । इस प्रकार वह इसको मरुतों के साथ प्रतिष्ठित कर देता है ॥१७॥

अब वह इसको कोयले से ढक देता है । इस मन्त्र से, 'मही द्यौ पृथिवी च न इम यज्ञं मिमिक्षताम् । पिपृता नो भरीमभि' (यजु० ८।३२, ऋ० १।२२।१३) । 'बड़े द्यौ पृथिवी इस हमारे यज्ञ को सिलावें और हमको शक्ति देने वाले पदार्थों से पूर्ण करें' ॥१८॥

षोडशिग्रहः

अध्याय ५—ब्राह्मण ३

इन्द्रो ह वै षोडशी । तं नु सकृदिन्द्रं भूतान्यत्यरिच्यन्त प्रजा वै भूतानि ता हैनेन सहभवमिवासुः ॥१॥

इन्द्रो ह वाऽईक्षां चक्रे । कथं न्वहमिदꣳ सर्वमतितिष्ठेयमर्वागेव मदिदꣳ सर्वꣳ स्यादिति स एतं ग्रहमपश्यत्तमगृह्णीत स इदꣳ सर्वमेवात्यतिष्ठदर्वागेवास्मादिदꣳ सर्वमभवत्सर्वꣳ ह वा ऽइदमतितिष्ठत्यर्वागेवास्मादिदꣳ सर्वं भवति यस्यैवं विदुष एतं ग्रहं गृह्णन्ति ॥२॥

तस्मादेतदृषिणाभ्यनूक्तम् । न ते महित्वमनमूदध द्यौयदन्यया स्फिग्या क्षामवस्था इति न ह वा ऽअस्यासौ द्यौरन्यतरां चन स्फिगीमनुवभूव तथेदꣳ सर्वमेवात्यतिष्ठदर्वागेवास्मादिदꣳ सर्वममवत्सर्वꣳ ह वाऽइदमतितिष्ठत्यर्वागेवास्मादिदꣳ सर्वं भवति यस्यैवं विदुष एतं ग्रहं गृह्णन्ति ॥३॥

तं वै हरिवत्यऽर्चा गृह्णाति । हरिवतीषु स्तुवते हरिवतीरनुशꣳसति वीर्यं वै हर

षोडशी ग्रह इन्द्र है । एक बार भूत अर्थात् प्राणी वर्ग इन्द्र से बढ़ गये । प्राणी ही प्रजा हैं । वे उसकी बराबरी करने लगे ॥१॥

इन्द्र ने सोचा मैं इन सबसे कैसे बढ सकूँ और यह सब मुझ से नीचे किस प्रकार रहें । उसने इस ग्रह (षोडशी) को देखा और इसको ले लिया । वह इन सबसे बढ़ गया और ये सब उससे नीचे हो गये । जो इस रहस्य को समझकर इस ग्रह को ग्रहण करता है वह सब से बढ़ जाता है और सब उसके अधीन हो जाते हैं ॥२॥

इसीलिये तो ऋषि का वचन है—'न ते महित्वमनु भूदध द्यौर्यदन्यया स्फिग्या क्षामवस्थाः' (ऋ० ३।३२।११) । 'जब तू अपनी दूसरी जाँघ के सहारे पृथिवी पर ठहरा तो द्यौलोक तेरी बड़ाई का अनुभव नहीं कर सका । या तेरी बड़ाई को न पहुँच सका' । वस्तुतः यह द्यौ उसकी दूसरी जाँघ तक न पहुँच सका । इस प्रकार वह यहाँ की सब वस्तुओं से बढ़ गया और सब वस्तुएँ उसके नीचे हो गईं । वस्तुतः इस रहस्य को समझकर यदि जिस किसी के लिये इस ग्रह को निकालते हैं । वह सबसे बढ़ जाता है और सब उसके अधीन हो जाते हैं ॥३॥

इस ग्रह को लेते समय 'हरिवती' ऋचा पढ़ी जाती है । (अर्थात् वह मंत्र जिसमें 'इन्द्र हरिवान्' का उल्लेख हो) । (उद्गाता लोग) 'हरिवती' से ही स्तुति करते हैं । और होता 'हरिवती' का ही पाठ करता है । इन्द्र ने अपने शत्रु असुरों का वीर्य अर्थात्

इन्द्रो ऽसुराणाꣳ सपत्नानाꣳ समवृङ्क्त तथो ऽएवैष एतद्वीर्यꣳ हर सपत्नानाꣳ संवृङ्क्ते तस्माद्धरिवत्यऽर्चा गृह्णाति हरिवतीषु स्तुवते हरिवतीरनुशꣳसति ॥४॥

तं वाऽअनुष्टुभा गृह्णाति । गायत्रं वै प्रातः सवन त्रैष्टुभ माध्यन्दिनꣳ सवनं जागतं तृतीयसवनमथातिरिक्तानुष्टुबत्येवैनमेतद्रेचयति तस्मादनुष्टुभा गृह्णाति ॥५॥

त वै चतुःस्रक्तिना पात्रेण गृह्णाति । त्रयो वाऽइमे लोकास्तदिमानेव लोकास्तिसृभिः स्रक्तिभिराप्नोत्यत्येवैनं चतुर्थ्या स्रक्त्यारेचयति तस्माच्चतुःस्रक्तिना पात्रेण गृह्णाति ॥६॥

तं वै प्रातः सवने गृह्णीयात् । आग्रयण गृहीत्वा स प्रातः सवने गृहीत ऐतस्मात्कालादुपशेते तदेनꣳ सर्वाणि सवनान्यतिरेचयति ॥७॥

माध्यन्दिने वैनꣳ सवने गृह्णीयात् । आग्रयण गृहीत्वा सोऽ एषा मीमाꣳसैव प्रातः सवन ऽएवैनं गृह्णीयादाग्रयणं गृहीत्वा स प्रातः सवने गृहीत एतस्मात्कालादुपशेते ॥८॥

अथातो गृह्णात्येव । आतिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी । अर्वाचीनꣳसु ते मनो ग्रावा कृणोतु वग्नुना । उपयामगृहीतोऽसीन्द्राय त्वा पोडशिनऽएष ते योनिरिन्द्राय त्वा पोडशिने' (यजु० ८।३१, ऋ० १।८४।१) । 'हे वृत्र को मारने वाले रथ पर चढ़ । तेरे घोड़े मन्त्रों द्वारा जीत दिये गये । पत्थर (सोम पीसने का) अपने

इन्द्रो ऽसुराणाꣳ सपत्नानाꣳ समवृङ्क्त तथो ऽएवैष एतद्वीर्यꣳ हर सपत्नानाꣳ संवृङ्क्ते तस्माद्धरिवत्यऽर्चा गृह्णाति हरिवतीषु स्तुवते हरिवतीरनुशꣳसति ॥४॥

तं वाऽअनुष्टुभा गृह्णाति । गायत्रं वै प्रातः सवन त्रैष्टुभ माध्यन्दिनꣳ सवनं जागतं तृतीयसवनमथातिरिक्तानुष्टुबत्येवैनमेतद्रेचयति तस्मादनुष्टुभा गृह्णाति ॥५॥

त वै चतुःस्रक्तिना पात्रेण गृह्णाति । त्रयो वाऽइमे लोकास्तदिमानेव लोकास्तिसृभिः स्रक्तिभिराप्नोत्यत्येवैनं चतुर्थ्या स्रक्त्यारेचयति तस्माच्चतुःस्रक्तिना पात्रेण गृह्णाति ॥६॥

तं वै प्रातः सवने गृह्णीयात् । आग्रयण गृहीत्वा स प्रातः सवने गृहीत ऐतस्मात्कालादुपशेते तदेनꣳ सर्वाणि सवनान्यतिरेचयति ॥७॥

माध्यन्दिने वैनꣳ सवने गृह्णीयात् । आग्रयण गृहीत्वा सोऽ एषा मीमाꣳसैव प्रातः सवन ऽएवैनं गृह्णीयादाग्रयणं गृहीत्वा स प्रातः सवने गृहीत एतस्मात्कालादुपशेते ॥८॥

अथातो गृह्णात्येव । आतिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी । अर्वाचीनꣳसु ते मनो ग्रावा कृणोतु वग्नुना । उपयामगृहीतोऽसीन्द्राय त्वा पोडशिनऽएष ते योनिरिन्द्राय त्वा पोडशिने' (यजु० ८।३१, ऋ० १।८४।१) । 'हे वृत्र को मारने वाले रथ पर चढ़ । तेरे घोड़े मन्त्रों द्वारा जीत दिये गये । पत्थर (सोम पीसने का) अपने

इन्द्र ने असुरों और सपत्नों के 'हर' को छीन लिया । इसी प्रकार यह (यजमान) भी अपने शत्रुओं के 'हर' को छीन लेता है । इसीलिये वह 'हरिवान्' वाली ऋचा से ग्रह को लेता है । हरिवान् की स्तुति होती है और हरिवती ऋचाओं का ही (उद्गाता लोग) पाठ करते हैं ॥४॥

यह इसको अनुष्टुभ् छन्द से लेता है । प्रातः सवन गायत्री का है । दोपहर का सवन त्रिष्टुभ् का । तीसरा सवन जगती का । अनुष्टुभ् इस सब के ऊपर है । इसी प्रकार इस ग्रह को भी सब के ऊपर रखता है । इसलिये इसको अनुष्टुभ् छन्द से ग्रहण करता है ॥५॥

उसको चौकोर पात्र में लेता है । यह लोक तीन हैं । तीन कोनों से यह तीन लोकों का ग्रहण करता है । चौथे कोने से वह इस सोने को सब के ऊपर स्थापित करता है । इसलिये वह इसके चौकोर पात्र लेता है ॥६॥

इसको प्रातः सवन में आग्रयण के लेने के पीछे लेना चाहिये । प्रातः सवन में लेने के पश्चात् इस समय से रक्खा ही रहता है । इस प्रकार वह इसको सब सवनों से बढ़ा देता है ॥७॥

या आग्रयण के लेने के पीछे दोपहर के सवन में इसको लेवे ? यह तो मीमांसा मात्र है । लेना तो प्रातः सवन में ही चाहिये । आग्रयण के पश्चात् । वह प्रातः सवन में लिये जाने के पश्चात् रक्खा ही रहता है ॥८॥

वह उसमें से इस मन्त्र से लेता है—'आतिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी । अर्वाचीनꣳसु ते मनो ग्रावा कृणोतु वग्नुना । उपयामगृहीतोऽसीन्द्राय त्वा पोडशिनऽएष ते योनिरिन्द्राय त्वा पोडशिने' (यजु० ८।३१, ऋ० १।८४।१) । 'हे वृत्र को मारने वाले रथ पर चढ़ । तेरे घोड़े मन्त्रों द्वारा जीत दिये गये । पत्थर (सोम पीसने का) अपने

त्वा षोडशिनऽइति ॥९॥

अनया वा । युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा । अथा न इन्द्र सोमपा गिरामुपश्रुति चर । उपयामगृहीतोऽसीन्द्राय त्वा षोडशिनऽएष ते योनिरिन्द्राय त्वा षोडशिनऽइति ॥१०॥

अथेत्य स्तोत्रमुपाकरोति । सोमोऽत्यरेच्युपावर्तध्वमित्यत्येवैनमेतद्रेचयति तं वै पुरास्तमयादुपाकरोत्यस्तमितेऽनुशश्ससति तदेनेनाहोरात्रे संदधाति तस्मात्पुरास्तमयादुपाकरोत्यस्तमितेऽनुशश्ससति ॥११॥ ब्राह्मणम् ॥४॥ [५. ३.] ॥

शब्द द्वारा तेरे मन को इधर खींचे । तू आश्रय के लिये लिया गया है षोडशी इन्द्र के लिये तुझको । यह तेरी योनि है । इन्द्र षोडशी के लिये तुझको' ॥९॥

या इस मन्त्र से—'युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा । अथा नऽइन्द्र सोमपा गिरामुपश्रुतिं चर । उपयामगृहीतोऽसीन्द्राय त्वा षोडशिनऽएष ते योनिरिन्द्राय त्वा षोडशिने' (यजु० ८।३४, ऋ० १।१०।३) । 'बड़े केश वाले, प्रबल और लगाम वाले घोड़ों को जोतो । हे सोम या इन्द्र ! हमारी वाणी सुनने के लिये यहाँ आ । तू आश्रय के लिये लिया गया है इन्द्र षोडशी लिये तुझको । यह तेरी योनि है । तुझको इन्द्र षोडशी के लिये' ॥१०॥

अब लौट कर स्तोत्र पढ़ता है, 'सोम सब के ऊपर हो गया । लौट आओ' । वस्तुतः वह इस को ऊपर बढ़ा देता है (षोडशी ग्रह के द्वारा) । सूर्यास्त से पहले ही पढ़ता है । सूर्यास्त के पीछे शस्त्र पढ़ा जाता है । वह सूर्यास्त से पहले वह इसको पढ़ता है और सूर्यास्त के पीछे शस्त्र-पाठ करता है । इस प्रकार वह रात और दिन को मिला देता है ॥११॥

अतिग्राह्या ग्रहाः

अध्याय ५—ब्राह्मण ४

सर्वे ह वै देवाः । अपे सदृशा आसुः सर्वे पुण्यास्तेषाꣳ सर्वेषाꣳ सदृशानाꣳ सर्वेषां पुण्यानां त्रयोऽकामयन्तातिष्ठावानः स्यामेत्यग्निरिन्द्रः सूर्यः ॥१॥

पहले सब देव एक समान थे । सब भले थे । उन सब एक से और पुण्य-देवों में से तीन अर्थात् अग्नि, इन्द्र और सूर्य ने चाहा कि हम बढ़ जावें ॥१॥

तेऽर्चन्तः श्राम्यन्तश्चेरुः । तऽएतानतिग्राह्यान्ददृशुस्तानत्यगृह्णत तद्यदेनानत्यगृह्णत तस्मादतिग्राह्या नाम तेऽतिष्ठावानोऽभवन्यथैतऽएतदतिष्ठेवातिष्ठेव ह वै भवति यस्यैवं विदुष एतान्महान्गृह्णन्ति ॥२॥

नो ह वाऽइदमग्रेऽग्नौ वर्च आस । यदिदमस्मिन्वर्च. सोऽकामयतेदं मयि वर्चः स्यादिति स एतं ग्रहमपश्यत्तमगृह्णीत ततोऽस्मिन्नेतद्वर्च आस ॥३॥

नो ह वाऽइदमग्रऽइन्द्रऽओज आस । यदिदमस्मिन्नोजः सोऽकामयतेदं मय्योजः स्यादिति स एतं ग्रहमपश्यत्तमगृह्णीत ततोऽस्मिन्नेतदोज आस ॥४॥

नो ह वाऽइदमग्रे सूर्ये भ्राज आस । यदिदमस्मिन्भ्राजः सोऽकामयतेदं मयि भ्राजः स्यादिति स एतं ग्रहमपश्यत्तमगृह्णीत ततोऽस्मिन्नेतद्भ्राज आसैतानि ह वै तेजाꣳस्येतानि वीर्याण्यात्मन्धत्ते यस्यैव विदुष एतान्महान्गृह्णन्ति ॥५॥

तान्वै प्रातः सवने गृह्णीयात् । आग्रयणं गृहीत्वात्मा वाऽआग्रयणो बहु वाऽइदमात्मन एकैकमतिरिक्तं क्लोमहृदयं त्वधस्त्वत् ॥६॥

माध्यन्दिने वैनान्तृतीये गृह्णीयात् । उक्थ्यं गृहीत्वोपाकरिष्यन्वा पूतभृतोऽयꣳ ह

वे पूजा और श्रम करते रहे । उन्होंने इन अतिग्राह्य (ग्रहों) को देखा और उनको (अति+ग्रह) अधिक निकाल लिया । इसलिये इनका नाम 'अतिग्राह्य' पड़ा । वे बढ़ गये जैसे कि अब तक बढे हैं । जो कोई इस रहस्य को समझकर इन 'अतिग्राह्य' ग्रहों को निकालता है वह बढ़ जाता है ॥२॥

अग्नि में पहले वह तेज नहीं था जो अब है । उसने चाहा कि मुझ में तेज हो जाय । उसने इस ग्रह को देखा और अपने लिये निकाल लिया । तब से उसमें यह तेज आ गया ॥३॥

इन्द्र में पहले यह ओज नहीं था जो अब है । उसने चाहा कि मुझ में ओज आ जाय । उसने इस ग्रह को देखा और अपने लिये निकाल लिया । तब से उसमें ओज है ॥४॥

सूर्य में पहले वह चमक न थी जो अब है । उसने चाहा कि मुझमें यह चमक आ जाय । उसने इस ग्रह को देखा और अपने लिये निकाल लिया । तब से उसमें चमक है । वस्तुतः इस रहस्य को समझकर जिसके लिये यह ग्रह निकाले जाते हैं वह इन तेज, और पराक्रमों-वाला हो जाता है ॥५॥

इनको प्रातः सवन में लेना चाहिये । आग्रयण ग्रह को लेने के पीछे । आग्रयण आत्मा है । अन्य इसके एक-एक करके अतिरिक्त अंग हैं जैसे क्लोम (फेफड़े) और हृदय तथा अन्य ॥६॥

या इन ग्रहों को दोपहर के सवन में पूतभृत में से लेना चाहिये, उक्थ्य ग्रह को लेने के पीछे अथवा स्तोत्र पढ़ने के समय (उपाकरिष्यन) । उक्थ्य इसका अतिरिक्त आत्मा

वाऽअस्यैषोऽनिरुक्त आत्मा यदुक्थ्यः सोऽएषा मीमाथ्सैव प्रातः सवनऽएवैनान्गृह्णीयादाग्रयणं गृहीत्वा ॥७॥

ते माहेन्द्रस्यैवानु होमथ्स हूयन्ते । एष वाऽइन्द्रस्य निष्केवल्यो यहो यन्माहेन्द्रोऽप्यस्यैतन्निष्केवल्यमेष स्तोत्रं निष्केवल्यथ्स शस्त्रमिन्द्रो वै यजमानो यजमानस्य वाऽएते कामाय गृह्यन्ते तस्मान्माहेन्द्रस्यैवानु होमथ्स हूयन्ते ॥८॥

अथातो गृह्णात्येव । अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषम् । उपयामगृहीतोऽस्यग्नये त्वा वर्चसऽएष ते योनिरग्नये त्वा वर्चसे ॥९॥

उत्तिष्ठन्नोजसा । सह पीत्वी शिप्रेऽअवेपयः । सोममिन्द्र चमूसुतम् । उपयामगृहीतोऽसीन्द्राय त्वौजसऽएष ते योनिरिन्द्राय त्वौजसे ॥१०॥

अदृश्रमस्य केतवः । विरश्मयो जना २ ॥ऽअनु । भ्राजन्तो अग्नयो यथा उपहै । परन्तु यह तो मीमांसा मात्र है । वस्तुतः इसको आग्रयण के पीछे प्रातः सवन में ही लेना चाहिये ॥७॥

माहेन्द्र ग्रह के पीछे इनकी आहुति दी जाती है । यह जो माहेन्द्र ग्रह है, इन्द्र का निष्केवल्य (अकेला या अपना निज का) ग्रह है । इसी प्रकार स्तोत्र तथा शस्त्र भी इन्द्र के अपने निज के (निष्केवल्य हैं) । यजमान इन्द्र है, उसी के लिये यह ग्रह निकाले जाते हैं । इसलिये माहेन्द्र ग्रह के पीछे इनकी आहुति दी जाती है ॥८॥

इन ग्रहों को इस प्रकार निकालता है—(पहला इस मन्त्र से) 'अग्ने पवस्व स्वपाऽअस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषम् । उपयाम गृहीतोऽस्यग्नये त्वा वर्चसऽएष ते योनिरग्नये त्वा वर्चसे' (यजु० ८।३८, ऋ० ९।६६।२१) । 'हे अग्नि, अपने कार्य में दक्ष, तू पवित्र हो, मुझे तेज और पराक्रम दे । धन और पुष्टि दे । तू आश्रय के लिये लिया गया है । अग्नि के लिये तुझे । तेज के लिये । यह तेरी योनि है । अग्नि के लिये तुझको, तेज के लिये तुझको' ॥९॥

दूसरा इस मन्त्र से—'उत्तिष्ठन्नोजसा सह पीत्वी शिप्रेऽअवेपयः । सोममिन्द्र चमूसुतम्' । उपयामगृहीतोऽसीन्द्राय त्वौजसऽएष ते योनिरिन्द्राय त्वौजसे' (यजु० ८।३९, ऋ० ८।७६।१०) । 'हे इन्द्र ! आपने ओज के साथ ग्रह में निकाले हुये सोम को इस प्रकार पिया है कि ठोढी आदि काँप गये हैं । तू आश्रय के लिये लिया गया है । तुझे इन्द्र के लिये ओज के साथ । यह तेरी योनि है । तुझे इन्द्र के लिये । ओज के लिये' ॥१०॥

तीसरा इस मन्त्र से—'अदृश्रमस्य केतवो वि रश्मयो जनाँ२ऽअनु । भ्राजन्तो अग्नयो यथा । उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजाया' (यजु० ८।४०, ऋ० १।५०।१) । 'जैसे तेजयुक्त अग्नियाँ दिखाई देती हैं उसी प्रकार इसके केतु और रश्मियाँ चमकें । तुझे आश्रय के लिये लिया गया । सूर्य के लिये तुझको, चमकने वाले के

यामगृहीतोसि सूर्य्याय त्वा भ्राजायैष ते योनिः सूर्य्याय त्वा भ्राजायेति ॥११॥

तेषां मन्त्रः । अग्ने वर्चस्विन्वर्चस्वांस्त्वं देवेष्वसि वर्चस्वानहं मनुष्येषु भूयासमिन्द्रौजिष्ठौजिस्त्वं देवेष्वस्योजिष्ठो ऽहं मनुष्येषु भूयासꣳ सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठो ऽहं मनुष्येषु भूयासमित्येतानि ह वै भ्राजाꣳस्येतानि वीर्याण्यात्मन्धत्ते यस्यैवं विदुष एतान्यहान्यृह्यन्ति ॥१२॥

तान्वै पृष्ठ्ये षडहे गृह्णीयात् । पूर्वे त्र्यह ऽआग्नेयमेव प्रथमेऽहन्नैन्द्रं द्वितीये सौर्यं तृतीय ऽएवमेवान्वहम् ॥१३॥

तानु हैकऽउत्तरे त्र्यहे गृह्णन्ति । तदु तथा न कुर्यात्पूर्व ऽएवैनांस्त्र्यहे गृह्णीयाद्यदुत्तरे त्र्यहे ग्रहीष्यन्त्स्यात्पूर्व ऽएवैनास्त्र्यहे गृहीत्वाथोत्तरे त्र्यहे गृह्णीयादेवमेव यथापूर्वं विश्वजिति सर्वपृष्ठ ऽएकाह ऽएव गृह्यन्ते ॥१४॥ ब्राह्मणम् ॥ ५ [५. ४.] ॥

लिये तुझको । यह तेरी योनि है । सूर्य के लिये तुझको, प्रकाश के लिये तुझको' ॥११॥

अब सोम पान इस प्रकार :—(पहला)—'अग्ने वर्चस्विन् वर्चस्वाँस्त्वं देवेष्वसि वर्चस्वानहं मनुष्येषु भूयासम्' (यजु० ८।३८) । 'हे वर्चस्वी अग्नि ! तू देवों में वर्चस्वी है। मैं मनुष्यों में वर्चस्वी हो जाऊँ' । (दूसरा)—'इन्द्रौजिष्ठौजिष्ठस्त्वं देवेष्वस्योजिष्ठोऽहं मनुष्येषु भूयासम्' (यजु० ८।३६) । 'हे ओज वाले इन्द्र ! तू देवों में ओज वाला है। मैं मनुष्यों में ओजिष्ठ हो जाऊँ' । (तीसरा)—'सूर्य्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोऽहं मनुष्येषु भूयासम्' (यजु० ८।४०) । 'हे तेजयुक्त सूर्य ! तू देवों में तेजयुक्त है । मैं मनुष्यों में तेजयुक्त हो जाऊँ' । इस रहस्य को जानने वाले जिस मनुष्य के लिये यह ग्रह निकाले जाते हैं उसके लिये यह ऋत्विज् उसमें तेज और पराक्रम की स्थापना करते हैं ॥१२॥

इनको पृष्ठ्य षडह (छः दिन षडह होता है) के पहले तीन दिनों में निकालना चाहिये । अर्थात् अग्नि का पहले दिन, इन्द्र का दूसरे दिन और सूर्य का तीसरे दिन । इस प्रकार एक-एक प्रतिदिन ॥१३॥

कुछ लोग इनको पिछले तीन दिन मे निकालते हैं परन्तु ऐसा न करना चाहिये । इनको पहले तीन दिन में ही निकालना चाहिये । यदि पिछले तीन दिनों में ही निकालने की इच्छा हो तो पहले इनको पहले तीन दिन मे निकाल ले और फिर पिछले तीन दिन में । 'विश्वजित् सर्वपृष्ठ' में यह तीनों ग्रह यथाक्रम एक ही दिन में निकाले जाते हैं ॥१४॥

अध्याय ५—ब्राह्मण ५

एष वै प्रजापतिः । य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतं वेवाप्येतर्ह्यनु प्रजायन्ते ॥१॥

उपाꣳशुपात्रमेवान्वजाः प्रजायन्ते । तद्वै तत्पुनर्यज्ञे प्रयुज्यते तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्ते ॥२॥

अन्तर्यामपात्रमेवान्ववयः प्रजायन्ते । तद्वै तत्पुनर्यज्ञे प्रयुज्यते तस्मादिमाः प्रजाः पुनरभ्यायतप्रजायन्ते ॥३॥

अथ यदेतयोरुभयोः । सह सतोरुपाꣳशुं पूर्वं जुहोति तस्मादु सह सतो ऽजाविकस्योभयस्यैवाजाः पूर्वा यन्त्यनूच्यो ऽवयः ॥४॥

अथ यदुपाꣳशुꣳ हुत्वा । ऊर्ध्वमुन्माष्टिं तस्मादिमा अजा अरा इतरा आक्रममाणा-इव यन्ति ॥५॥

अथ यदन्तर्यामꣳ हुत्वा । अवाञ्चमवमाष्टिं तस्मादिमा अवयो ऽवाचीनशीर्ष्ण्यः स्वनन्त्य-इव यन्त्येता वै प्रजापतेः प्रत्यक्षतमा यदजावयस्तस्मादेतासिः संवत्सरस्य विजायमाना द्वी त्रीनिति जनयन्ति ॥६॥

यह जो यज्ञ किया जाता है यही प्रजापति है जिससे प्रजायें उत्पन्न हुई हैं या अब तक उत्पन्न होती हैं ॥१॥

उपांशु पात्र के पीछे बकरियाँ लाई जाती हैं । इस उपांशु पात्र का प्रयोग यज्ञ में पुनः-पुनः होता है । इसलिये यह प्रजा भी फिर-फिर लाई जाती है ॥२॥

अन्तर्याम पात्र के पीछे भेड़ें लाई जाती हैं । इस अन्तर्याम पात्र का प्रयोग यज्ञ में पुनः-पुनः होता है । इसलिये यह प्रजा भी फिर फिर लाई जाती है ॥३॥

अब चूँकि इन दोनों पात्रों के होते हुये उपांशु की आहुति पहले दी जाती है, इसी प्रकार बकरियों और भेड़ों के साथ होते हुये बकरियाँ आगे चलती हैं । भेड़ें पीछे ॥४॥

अब चूँकि उपांशु की आहुति देकर उसको ऊपर से पोंछते हैं इसीलिये जिस प्रकार तेज (गाड़ी के) आरे ऊपर को चलते हैं इसी प्रकार यह बकरियाँ भी बड़ी तेजी से चढ़ जाती हैं ॥५॥

और चूँकि अन्तर्याम की आहुति देकर उसको नीचे से पोंछते हैं । इसलिये भेड़ें नीचे को सिर करके चलती हैं मानों खोद रही हैं । यह बकरियाँ और भेड़ें प्रजापति के यज्ञ से प्रत्यक्ष नमूने हैं । इसलिये वर्ष में तीन बार बच्चा देती हैं और दो या तीन बच्चे देती हैं ॥६॥

शुक्रपात्रमेवानु मनुष्याः प्रजायन्ते । तद्वै तत्पुनर्यज्ञे प्रयुज्यते तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्त ऽएष वै शुक्रो य एष तपत्येष ऽउ ऽएवेन्द्रः पुरुषो वै पशूनामेन्द्रस्तस्मात्पशूनामीष्टे ॥७॥

ऋतुपात्रमेवान्वेकशफं प्रजायते । तद्वै तत्पुनर्यज्ञे प्रयुज्यते तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्त ऽइतीव वाऽऋतुपात्रमितीवैकशफस्य शिर आग्रयणपात्रमुक्थ्यपात्रमादित्यपात्रमेतान्येवानु गावः प्रजायन्ते तानि वै तानि पुनर्यज्ञे प्रयुज्यन्ते तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्ते ॥८॥

अथ यदजाः । कनिष्ठानि पात्राण्यनु प्रजायन्ते तस्मादेताभिः संवत्सरस्य विजायमाना द्वौ त्रीनिति जनयन्त्यः कनिष्ठाः कनिष्ठानि हि पात्राण्यनु प्रजायन्ते ॥९॥

अथ यद्गावः । भूयिष्ठानि पात्राण्यनु प्रजायन्ते तस्मादेताः सकृत्संवत्सरस्य विजायमाना एकैकं जनयन्त्यो भूयिष्ठा भूयिष्ठानि हि पात्राण्यनु प्रजायन्ते ॥१०॥

अथ द्रोणकलशे । अन्ततो हारियोजनं ग्रहं गृह्णाति प्रजापतिर्वै द्रोणकलशः स इमाः प्रजा उपावर्तते ता अवति ता अभिजिघत्येतद्वा ऽएना भवति यदेनाः प्रजनयति

शुक्र पात्र के पीछे मनुष्य लाये जाते हैं। चूँकि इस पात्र का यज्ञ में पुनः-पुनः प्रयोग होता है, इसलिये प्रजा भी पुनः-पुनः लाई जाती है। शुक्र वही है जो तपता है (अर्थात् सूर्य); यही इन्द्र है। मनुष्य पशुओं में इन्द्र है। इसलिये यह उनके ऊपर राज्य करता है ॥७॥

ऋतु पात्र के पीछे एक खुर वाले (पशु) लाये जाते हैं। चूँकि यज्ञ में इस पात्र का प्रयोग फिर-फिर होता है, इसलिये यह प्रजा भी फिर-फिर लाई जाती है। ऋतु पात्र ऐसा होता है (हाथ से बताकर) और एक खुर वाले पशुओं का सिर भी ऐसा होता है। आग्रयण पात्र, उक्थ्य पात्र और आदित्य पात्र—इन पात्रों के पीछे गायें लाई जाती हैं। इन सब का यज्ञ में पुनः-पुनः प्रयोग होता है इसलिये प्रजायें भी बार-बार लाई जाती हैं ॥८॥

चूँकि बकरियाँ कनिष्ठ पात्रों के पीछे लाई जाती हैं इसलिये यह साल में तीन बार बच्चा देती है और दो या तीन बच्चे होते हैं। और कनिष्ठ होते हैं क्योंकि यह कनिष्ठ पात्रों के पीछे लाई जाती हैं ॥९॥

और गायें चूँकि भूयिष्ठ (पुरुकल) पात्रों के पीछे लाई जाती हैं। इसलिये साल में एक बार एक ही बच्चा देकर भी वह पुरुकल होती हैं। क्योंकि भूयिष्ठ पात्रों के पीछे लाई जाती हैं ॥१०॥

अब द्रोण कलश में अन्त को हारियोजन ग्रह निकालता है। द्रोण कलश प्रजापति है। यह इन्हीं प्रजाओं का रूप हो जाता है। इनकी रक्षा करता है। इनको सूँघता है।

यति ॥११॥

पञ्च ह त्वेव तानि पात्राणि । यानीमाः प्रजा अनु प्रजायन्ते समानमुपाꣳशुवन्तर्यामयोः शुक्रपात्रमृतुपात्रमाग्रयणपात्रमुक्थ्यपात्रं पञ्च वा ऽऋतवः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिर्यज्ञो यद्यु षडेवऽर्तवः संवत्सरस्येत्यादित्यपात्रमेवैतेपाꣳ षष्ठम् ॥१२॥

एकꣳ ह त्वेव तत्पात्रम् । यदिमाः प्रजाः अनु प्रजायन्तऽउपाꣳशुपात्रमेव प्राणो हि प्रजापतिः प्रजापतिꣳ ह्येवेदꣳ सर्वमनु ॥१३॥ ब्राह्मणम् ६ ॥ [५. ५.]

यह इनको उत्पन्न करता है अर्थात् इन्हीं का सा रूप हो जाता है ॥११॥

यह पात्र पाँच हैं जिनके अनुसार प्रजायें लाई जाती है। उपांशु और अन्तर्याम (मिलकर) एक हुआ। शुक्रपात्र, ऋतु पात्र, आग्रयण पात्र, उक्थ्य पात्र। साल की पाँच ऋतुएँ होती हैं। वर्ष प्रजापति है, प्रजापति यज्ञ है। अगर कहें कि सवत्सर में छः ऋतुएँ होती हैं तो छठा आदित्य ग्रह भी तो है ॥१२॥

वस्तुतः एक ही पात्र है जिसके पीछे प्रजाएँ लाई जाती हैं। अर्थात् उपांशु पात्र। उपांशु प्राण है। प्रजापति प्राण है। और इस संसार में प्रत्येक वस्तु प्रजापति के पीछे है ॥१३॥

ग्रहावेक्षणम्

अध्याय ५—ब्राह्मण ६

एष वै प्रजापतिः । य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतस्येवाप्येतर्ह्यनु प्रजायन्ते स आश्विनं ग्रहं गृहीत्वानवकाशानवकाशयति ॥१॥

स उपाꣳशुमेव प्रथममवकाशयति । प्राणाय मे वर्चोदा वर्चसे पवस्वेत्यथोपाꣳशुसवनं व्यानाय मे वर्चोदा वर्चसे पवस्वेत्यथान्तर्याममुदानाय मे वर्चोदा वर्चसे पवस्वेत्यथेन्द्र-

यह जो यज्ञ किया जाता है यही प्रजापति है। इसी से प्रजाएँ उत्पन्न हुई हैं और इसी से आज तक उत्पन्न होती हैं। आश्विन् ग्रह को लेने के पश्चात् यह अवकाश कृत्य को करता है (अर्थात् ग्रहों को देखना) ॥१॥

पहले उपांशु ग्रह का अवकाशन करता है, इस मंत्र से—'प्राणाय मे वर्चोदा वर्चसे पवस्व' (यजु० ७।२७)। 'हे वर्चस् के दाता मेरे प्राण के लिये, वर्चस् के लिये पवित्र हो'। उपांशु सवन को इस मंत्र से—'व्यानाय मे वर्चोदा वर्चसे पवस्व' (यजु० ७।२७)।

वायवं वाचे मे वर्चोदा वर्चसे पवस्वेत्यथ मैत्रावरुणं क्रतूदक्षाभ्यां मे वर्चोदा वर्चसे पवस्वेत्यश्विनश्च्रु श्रोत्राय मे वर्चोदा वर्चसे पवस्वेत्यथ शुक्रामन्थिनौ चक्षुभ्यां मे वर्चोदसौ वर्चसे पवेथामिति ॥२॥

अथाग्रयणम् । आत्मने मे वर्चोदा वर्चसे पवस्वेत्यथौक्थ्यमोजसे मे वर्चोदा वर्चसे पवस्वेत्यथ ध्रुवमायुषे मे वर्चोदा वर्चसे पवस्वेत्यथाग्नीध्रीयं विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवेथामिति वैश्वदेवौ वाऽआग्नीध्रावतो हि देवेभ्य उद्धरन्त्यतो मनुष्येभ्योऽतः पितृभ्यस्तस्माद्वैश्वदेवावाग्नीध्रीयौ ॥३॥

अथ द्रोणकलशम् । कोऽसि कतमोऽसीति प्रजापतिर्वै कः कस्यासि को नामासीति प्रजापतिर्वै को नाम यस्य ते नामामन्महीति मनुते ह्यस्य नाम यं त्वा सोमेनातीतृपामेति

'ध्यान के लिये, हे वर्चस् के दाता, वर्चस् के लिये पवित्र हो' । फिर अन्तर्याम को इस मन्त्र से—'उदानाय मे वर्चोदा वर्चसे पवस्व' (यजु० ७।२७) । 'हे वर्चस् के देने वाले, उदान के लिये, वर्चस् के लिये पवित्र हो' । फिर ऐन्द्र वायव को इस मंत्र से—वाचे मे वर्चोदा वर्चसे पवस्व' (यजु० ७।२७) । 'हे वर्चस् के देने वाले, वाणी के लिये, वर्चस् के लिये पवित्र हो' । अब मैत्रावरुण को इस मन्त्र से—'क्रतूदक्षाभ्यां मे वर्चोदा वर्चसे पवस्व' (यजु० ७।२७) । 'हे वर्चस् के देने वाले, विचार और क्रिया दोनों के लिये, वर्चस् के लिये पवित्र हो' । अब आश्विन को—'श्रोत्राय मे वर्चोदा वर्चसे पवस्व' (यजु० ७।२७) । 'हे वर्चस् के देने वाले, श्रोत्र के लिये, वर्चस के लिये पवित्र हो' । अब शुक्र और मन्थिन नहीं को इस मन्त्र से—'चक्षुभ्यां मे वर्चोदसौ वर्चसे पवेथाम्' (यजु० ७।२७) । 'हे वर्चस् के देने वाले तुम दोनों, आँखों के लिये, वर्चस् के लिये पवित्र हो' ॥२॥

अब आग्रयण को इस मन्त्र से—'आत्मने मे वर्चोदा वर्चसे पवस्व' (यजु० ७।२८) । 'हे वर्चस् के दाता, मेरे आत्मा के लिये, वर्चस् के लिये पवित्र हो । अब उक्थ्य को इस मन्त्र से—'ओजसे मे वर्चोदा वर्चसे पवस्व' (यजु० ७।२८) । 'मेरे ओज के लिये, हे वर्चस् के दाता । वर्चस् के लिये पवित्र हो' । अब ध्रुव को—'आयुषे मे वर्चोदा वर्चसे पवस्व (यजु० ७।२८) । 'हे वर्चस् के दाता, मेरी आयु के लिये, वर्चस् के लिये पवित्र हो' । अब आग्नीध्र अर्थात् पूतभृत और आधवनीय को—'विश्वभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवस्व' (यजु० ७।२८) । 'मेरी सब प्रजाओं के लिये, हे वर्चस् के देने वालों, वर्चस् के लिये पवित्र हो' । यह दो पात्र विश्वेदेवों के हैं । क्योंकि इन्हीं में से सोम निकाल गया है मनुष्य के लिये भी और पितरों के लिये भी । इसलिये यह दो पात्र विश्वेदेवों के हों ॥३॥

अब द्रोण कलश को—योऽसि कतमोऽसि (यजु० ७।२६) । 'कः प्रजापति है' । 'यस्यासि को नामासि' (यजु० ७।२६) । 'को नाम' प्रजापति है । 'यस्य ते नामामन्महि' (यजु० ७।२६) । 'जिस तेरे नाम का हम चिन्तन करते हैं' । वस्तुतः यह उसके नाम का चिन्तन करता है । 'य त्वा सोमेनातीतृपाम्'(यजु० ७।२६) । 'जिस तुझको मैंने सोम से

तर्पयति ह्येनꣳ सोमेन स आश्विनं ग्रहं गृहीत्वान्वङ्गमाशिषमाशास्ते सुप्रजाः प्रजाभिः स्यामिति तत्प्रजामाशास्ते सुवीरो वीरैरिति तद्वीरानाशास्ते सुपोषः पोषैरिति तत्पुष्टिमाशास्ते ॥४॥

तान्वै न सर्वमिषावकाशयेत् । योन्येव ज्ञातस्तमवकाशयेद्योवास्य प्रिय स्याद्यो वानूचानोऽनूक्तेनैनान्प्राप्नुयात्स ह्याश्विनं ग्रह गृहीत्वा कृत्स्न यज्ञं जनयति त कृत्स्न यज्ञं जनयित्वा तमात्मन्धत्ते तमात्मन्कुरुते ॥५॥ ब्राह्मणम् ॥ ७ ॥ [५. ६] ॥

तृप्त किया' । वह इनको सोम से तृप्त करता है । आश्विन ग्रह को लेकर एक-एक अंग को आशीर्वाद कहता है—'सुप्रजाः प्रजाभिः स्याम्' (यजु० ७।२६) । 'सन्तानों से युक्त होऊँ' । इस प्रकार वह सन्तान के लिये प्रार्थना करता है । सुवीरो वीरै' (यजु० ७।२६) । वीरों के द्वारा सुवीर होऊँ' । इस प्रकार वीरों के लिये प्रार्थना करता है । 'सुपोषः पोषै.' (यजु० ७।२६) । 'सम्पुष्टिदायक पदार्थों द्वारा सुपोष होऊँ' । इस प्रकार पुष्टि के लिये प्रार्थना करता हूँ ॥४॥

सब से अवकाशन न कराये । केवल उसी से जो ज्ञात हो । या जो अपना प्रिय हो या जिसने वेद पाठ द्वारा अपने को ऋचाओं से युक्त किया हो । आश्विन ग्रह को लेकर यह सब यज्ञ को उत्पन्न करता है और सब यज्ञ को उत्पन्न करके वह उसको अपने में धारण करता है । वह उसको अपना बना लेता है ॥५॥

सोमप्रायश्चित्तानि

अध्याय ५—ब्राह्मण ७

ता वाऽएताः । चतुस्त्रिꣳशद्वयाहृतयो भवन्ति प्रायश्चित्तयो नामैष वै प्रजापतिर्य एष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाता एतस्मैवाप्येतर्ह्यनु प्रजायन्ते ॥१॥

अष्टौ वसवः । एकादश रुद्रा द्वादशादित्या इमेऽएव द्यावापृथिवी त्रयस्त्रिꣳशौ

चौंतीस व्याहृतियाँ होती हैं जिनको प्रायश्चित्ति कहते हैं । यह जो यज्ञ किया जाता है वही प्रजापति है जिससे यह प्रजायें उत्पन्न हुई हैं और जिससे अब तक यह प्रजायें उत्पन्न होती हैं ॥१॥

आठ वसु, ग्यारह रुद्र और बारह आदित्य और यह दो द्यौ तथा पृथिवी । यह हुये तैंतीस । प्रजापति है चौंतीसवाँ । यह (यजमान) को प्रजापति कर देता है । यह जो है

त्रयस्त्रिंश्शद्वै देवाः प्रजापतिश्चतुस्त्रिंश्शस्तदेन प्रजापतिं करोत्येतद्वा ऽअस्त्येतद्धयमृत यदमृतं तद्धयस्त्येतदु तद्यन्मर्त्यꣳ स एष प्रजापतिः सर्वं वै प्रजापतिस्तदेन प्रजापतिं करोति तस्मादेताश्चतुस्त्रिंश्शद्वाहुतयो भवन्ति प्रायश्चित्तयो नाम ॥२॥

ताहैके । यज्ञ तन्व इत्याचक्षते यज्ञस्य ह त्वेवैतानि पर्वाणि स एष यज्ञस्तायमान एता एव देवता भवन्नेति ॥३॥

सा यदि घर्मदुघा ह्वलेत् । अन्यामुपसंक्रामेयुः स यस्यामेनैनं वेलायां पुरा पिन्वयन्ति तद्वैवैनामुदीचीꣳ स्थापयेदग्रेण वा शालां प्राचीम् ॥४॥

तद्वे एते ऽअगितः । पुच्छकाण्डꣳ शिखण्डास्थेऽउच्छ्रयाते तयोर्यद्दक्षिणं तस्मिन्नेताश्चतुस्त्रिंश्शतमाज्याहुतीर्जुहोत्येतावान्वै सर्वो यज्ञो यावत्य एताश्चतुस्त्रिंश्शद्वाहुतयो भवन्ति तदस्या कृत्स्नमेव सर्वं यज्ञ दधात्येषा ह्यतो घर्म पिन्वतऽएषो तत्र प्रायश्चित्तिः क्रियते ॥५॥

अथ यद्यज्ञस्य ह्वलेत् । तत्समन्वीक्ष्य जुहुयादीक्षोपसत्स्वाहवनीये प्रसुतऽआग्नीध्रे विवाऽएतद्यज्ञस्य पवस्त्रꣳसत यद्ध्वलति सा यैव तर्हि तत्र देवता भवति तयैवैतद्भिषज्यति तया सदधाति ॥६॥

अथ यदि स्कन्देत् । तदद्भिरुपनिनयेदद्भिर्वाऽइदꣳ सर्वमाप्तꣳ सर्वस्यवाप्त्यै वैष्णव

वह अमृत है, जो अमृत है वह यह है । जो मर्त्य है वह भी प्रजापति है, क्योंकि प्रजापति सब कुछ है । इस प्रकार यह इसको प्रजापति बनाता है । इस प्रकार यह चौंतीस व्याहृतियाँ हैं जिनको प्रायश्चित्ति कहते हैं ॥२॥

कुछ इनको 'यज्ञ का तनु' कहते हैं । यह यज्ञ के ही पर्व हैं । यह यज्ञ जब किया जाता है तो वह इन देवताओं का रूप धारण करता जाता है ॥३॥

यदि वह धर्मदुघा दूध न दे (वह गाय जिसके दूध को औटा कर घर्म बनाया जाता है धर्मदुघा कहलाती है) तो दूसरी को लेवें । और जिस स्थान पर उसको दूहते, उसी स्थान पर उसको खड़ा करें, उत्तराभिमुख या शाला की ओर मुख करके ॥४॥

और जो पूँछ की डंडी के दोनों ओर जो शिखण्ड या निकली हुई हड्डियाँ हैं उनमें जो दाहिनी है, उसी पर वह चौंतीस आहुतियाँ देता है । यह सब यज्ञ ही तो है यह जो चौंतीस आहुतियाँ हैं । इस प्रकार वह उस सम्पूर्ण यज्ञ को उसमें स्थापित कर देता है । क्योंकि वहीं से घर्म निकलता है, यही उसका प्रायश्चित्त है ॥५॥

अब यज्ञ का जो भाग सफल न हो उसी के उद्देश से आहुति दे । उपसदों में और आहवनीय में, दीक्षा यज्ञ में, तथा सोम यज्ञ में, आग्नीध्र में । क्योंकि यज्ञ के जिस भाग में सफलता न हो वही टूटा हुआ समझो । और जो उसका देवता है उसी के द्वारा वह सम्पूर्ण होता है ॥६॥

यदि कुछ गिर जाय तो उस पर पानी डाल दे । क्योंकि वह सब जलों से ही व्याप्त

वारुण्यऽर्चा यद्वाऽइदं किं चार्च्छति वरुण एवेदꣳ सर्वमार्पयति ययोरोजसा स्कभिता रजाꣳसि वीर्येभिर्वीरतमा शविष्ठा । या पत्येतेऽअप्रतीता सहोभिर्विष्णूऽअगन्वरुणा पूर्वहुताविति यज्ञो वै विष्णुस्तस्यैतदार्च्छति वरुणो वाऽ आर्पयिता तद्यस्याश्चैनेतदेवताया आर्च्छति यो च देवतापर्यति ताभ्यामवैतदुभाभ्यां गिरण्यत्युभाभ्याꣳ संदधाति ॥७॥

अथोऽअभ्येव मृशेत् । देवान्दिवमगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा द्रविणमष्टु पितॄन्पृथिवीमगन्यज्ञस्ततो गा द्रविणमष्टु यं क च लोकमगन्यज्ञस्ततो मे भद्रमभूदित्येवैतदाह ॥८॥

तदस्यैतदारुणिराह । किꣳ स यजेत यो यज्ञस्य व्यृद्धया पापीयान्मन्येत यज्ञस्य वाऽअहं व्यृद्ध्या श्रेयान्भवामीत्येतद्ध स्म स तदभ्याह यदेता आशिष उपगच्छति ॥९॥ ब्राह्मणम् ॥८ [५. ७.] ॥

है । सब की प्राप्ति के लिये । विष्णु और वरुण की ऋचा पढ़ कर । यहाँ जो कुछ कष्ट मनुष्य को होता है वह सब वरुण देवता के ही द्वारा होता है । 'ययोरोजसा स्कभिता रजाꣳसि वीर्येभिर्वीरतमा शविष्ठा । या पत्येतेऽअप्रतीता सहोभिर्विष्णूऽअगन् वरुणा पूर्वहुतौ' (यजु० ८।५६, अथर्व ७।२५।१) । 'जिन दोनों के ओज से यह लोक ठहरे हुये हैं जो पराक्रमों के द्वारा सब से वीर और उत्तम हैं; जो अपूर्व शक्ति से युक्त है । इन बुलाये हुये विष्णु और वरुण के पास (यह यज्ञ) गया है' । यज्ञ विष्णु है । यह यज्ञ ही कष्ट में है । वरुण ने कष्ट दिया है । जिस देवता की हानि होती है और जिस देवता के द्वारा हानि होती है उन दोनों के ही द्वारा उसका उपचार करता है । उसी के द्वारा वह इसको संयुक्त करता है ॥७॥

इस मंत्र से स्पर्श करे—'देवान् दिवमगन् यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन् यज्ञस्ततो मा द्रविणमष्टु पितॄन् पृथिवीमगन् यज्ञस्ततो गा द्रविणमष्टु यं क च लोकमगन् यज्ञस्ततो मे भद्रमभूत्' (यजु० ८।६०) । 'यज्ञ देवों के पास द्यौलोक को गया । वहाँ से मुझे धन मिले । यज्ञ मनुष्यों के पास अन्तरिक्ष में गया । वहाँ से मुझे धन मिले । यज्ञ पितरों के पास पृथिवी में गया । वहाँ से मुझे धन मिले । जिस किसी लोक में यज्ञ गया वहीं मेरा कल्याण हो' । इसका तात्पर्य यह है कि यज्ञ जहाँ कहीं जाय, वहीं मेरा कल्याण हो ॥८॥

इस पर आरुणि ने कहा था कि 'वह क्यों यज्ञ करे जो यज्ञ की त्रुटि पर अपने को पापी समझे । मैं तो यज्ञ की त्रुटि द्वारा अच्छा होता हूँ' । यह बात उसने आशीर्वाद को ध्यान में रखते हुये कही थी ॥९॥

अध्याय ५—ब्राह्मण ८

तद्यत्रैतत्त्रिरात्रे सहस्रं ददाति । तदेषा साहस्री क्रियते स प्रथमेऽहंस्त्रीणि च शतानि नयति त्रयस्त्रिंशतं चैवमेव द्वितीयेऽह स्त्रीणि चैव शतानि नयति त्रयस्त्रिंशतं चैवमेव तृतीयेऽहं स्त्रीणि चैव शतानि नयति त्रयस्त्रिंशतं चाथैषा साहस्र्यतिरिच्यते ॥१॥

सा वै त्रिरूपास्यादित्याहुः एतद्धयस्यै रूपतममिवेति रोहिणीह त्वेवोपध्वस्ता स्यादेतद्धैवास्यै रूपतममिव ॥२॥

सास्यादप्रवीता । वाग्वाऽएषा निदानेन यत्साहस्र्यातयाम्न्यप्रवीता तस्मादप्रवीता स्यात् ॥३॥

तां प्रथमेऽहन्नयेत् । वाग्वाऽएषा निदानेन यत्साहस्री तस्या एतत्सहस्रं वाचः प्रजातं पूर्वाहैपैति पश्चादेनां प्रजातमन्वेत्युत्तमे वै नाम हन्नयेत्पूर्वमहास्यै प्रजातमेति पश्चादेपान्वेति सोऽएषा मीमाꣳसैवोत्तमऽएवैनामहन्नयेत्पूर्वमहास्यै प्रजातमेति पश्चादेपान्वेति ॥४॥

तामुत्तरेण हविर्धाने । दक्षिणेनाग्नीध्रं द्रोणकलशमवघ्रापयति यज्ञो वै द्रोणकलशो

जब वह उस त्रिरात्र यज्ञ में सहस्र गायें देता है तो गायें सहस्रवीं होती हैं। पहले दिन तीन सौ तैंतीस गायें लाता है। इसी प्रकार दूसरे दिन भी तीन सौ तैंतीस लाता है। तीसरे दिन भी तीन सौ तेंतीस लाता है। अब हजारवीं रह गईं ॥१॥

कुछ लोग कहते हैं कि वह तीन रंग की हो। क्योंकि यही इसका सब से अच्छा रूप है। परन्तु वह रोहिणी (लाल) और उपध्वस्त (धब्बेदार) हो, यही उसका उत्तम से अच्छा रूप है ॥२॥

वह अप्रवीत (अदुत योनि) होनी चाहिये। यह जो साहस्री है यह वस्तुतः वाणी है। यह वाणी आतयाम्नी (पूर्ण शक्ति वाली) है। जो अदुत योनि है वह पूर्ण शक्ति वाली है। इसलिये इसको अप्रवीत होना चाहिये ॥३॥

उसको पहले दिन ही ले आवे। क्योंकि यह साहस्री वस्तुतः वाणी है। यह जो सहस्र सन्तान (प्रजात) है वह इसी वाणी की है। वह आगे-आगे चलती है और उसकी सन्तति पीछे पीछे। या अन्तिम दिवस लावे। उस दिन आगे-आगे उसकी सन्तति चले और पीछे-पीछे वह। परन्तु यह तो मीमांसा मात्र है। उसको अन्तिम दिवस ही लाना चाहिये और आगे-आगे उसकी सन्तति हो और वह पीछे ॥४॥

हविर्धान के उत्तर और आग्नीध्र के दक्षिण को वह द्रोण कलश को सुँघवाता है।

यज्ञमेवैनामेतद्दर्शयति ॥५॥

आजिघ्रकलशम् । मह्या त्वा विशन्त्विन्दव इति रिरिचान इव वाऽएष भवति यः सहस्रं ददाति तमेवैतद्रिरिचानं पुनराप्याययति यदाहाजिघ्रकलशं मह्या त्वा विशन्त्विन्दव इति ॥६॥

पुनरूर्जा निवर्तस्वेति । तद्वेव रिरिचानं पुनराप्याययति यदाह पुनरूर्जा निवर्तस्वेति ॥७॥

सा नः सहस्रं धुक्ष्वेति । तत्सहस्रेण रिरिचानं पुनराप्याययति यदाह सा नः सहस्रं धुक्ष्वेति ॥८॥

उरुधारा पयस्वती पुनर्मावितादद्रयिरिति । तद्वेव रिरिचानं पुनराप्याययति यदाह पुनर्मा विशताद्रयिरिति ॥९॥

अथ दक्षिणे कर्णेऽआजपति । इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतेऽदिति सरस्वति महि विश्रुति । एता तेऽअघ्न्ये नामानि देवेभ्यो मा सुकृतं वृतादिति वोचेरिति वैतानि हवाऽअस्यैदेवत्रा नामानि सा यानि ते देवत्रा नामानितैर्मा देवेभ्यः सुकृतं ब्रूतादित्येवैतदाह ॥१०॥

द्रोणकलश यज्ञ है । इस प्रकार वह उसको यज्ञ के दर्शन कराता है ॥५॥

इस मंत्र से—'आजिघ्र कलशम् । मह्या त्वा विशन्त्विन्दवः' (यजु० ८।४२)। 'कलश को सूँघ । इस तुझ महान् में सोम की बूँदें प्रवेश करें' । यह जो एक हजार गायें दान करता है वह खाली सा हो जाता है । इसी खाली को फिर भरता है । जब वह कहता है कि 'हे बड़ी गाय ! कलश को सूँघ, जिससे यह सोम की बूँदें तुझमें प्रवेश करें ॥६॥

'पुनरूर्जा निवर्त्तस्व' (यजु० ८।४२)। 'ऊर्ज के साथ फिर आ' । ऐसा कहने से वह मानो खाली चीज को भरता है ॥७॥

'सा नः सहस्र धुक्ष्व' (यजु० ८।४२)। 'हजार गुना हमारे लिये दूध दे' । ऐसा कहने से मानो वह खाली को भरता है ॥८॥

'उरुधारा पयस्वती पुनर्मावितादद्रयिः' (यजु० ८।४२)। 'हे बड़ी धार वाली और दूध वाली ! मुझे फिर धन मिले' । ऐसा कहने से वह खाली को फिर भरता है ॥९॥

अब वह उसके दाहिने कान में जपता है, 'इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतेऽदिते सरस्वति महि विश्रुति । एता तेऽअघ्न्ये नामानि देवेभ्यो मा सुकृतं ब्रूतात्' (यजु० ८।४३)। हे गाय तेरे इतने नाम हैं—इडा, रन्ता, हव्या, काम्या, चन्द्रा, ज्योति, अदिति, सरस्वती, मही, विश्रुती । तू देवताओं से मेरे पुण्य को कह दे । वस्तुतः देवों में इसके यही नाम हैं । इसका यही तात्पर्य है कि देवों में तेरे जो-जो नाम प्रचलित हैं उनके द्वारा मेरे पुण्य को देवलोक में पहुँचा दे ॥१०॥

तामवार्जन्ति । सा यद्यपुरुषाभिवीता प्राचीयात्तत्र विद्यादरात्सीदयं यजमानः कल्याणं लोकमजैषीदिति यदुदीचीयाच्छ्रेयानस्मिल्लोके यजमानो भविष्यतीति विद्याद्यदि प्रतीचीयादिभ्यतिरिक्त इव धान्यतिरिक्तो भविष्यतीति विद्याद्यदि दक्षिणेयात्क्षिप्रेऽस्माल्लोकाद्यजमानः प्रैष्यतीति विद्यादेतानि विज्ञानानि ॥११॥

तद्वा एतास्तिस्रस्तिस्रस्त्रिंशत्यधि भवन्ति । तास्वेतामुपसमाकुर्वन्ति वि वाऽएतां विराजं बृहन्ति यां व्याकुर्वन्ति विच्छिन्नोऽएषा विराड्या विवृढा दशाक्षरा वै विराट्तत्कृत्स्ना विराजꣳ संदधाति ताꣳ होत्रे दद्याद्धोता हि साहस्रस्तस्मात्ताꣳ होत्रे दद्यात् ॥१२॥

द्वौ वौन्नेतारौ कुर्वीत । तयोर्यतरो नाथावयेत्तस्मा ऽएना दद्याद्वयृद्धो वा ऽएष उन्नेता य ऋत्विक्सन्नाश्नावयति व्यृद्धो ऽएषा विराड्या विवृढा तद्वयृद्ध ऽएवैतद्वयर्धं दधाति ॥१३॥

तदाहुः । न सहस्रेऽधि किं चन दद्यात्सहस्रेण ह्येव सर्वान्कामानाप्नोतीति तदु होवाचासुरिः काममेव दद्यात्सहस्रेणाह सर्वान्कामानाप्नोति कामेनो ऽअस्येतरद्दत्तं

उसको छोड़ देते हैं। यदि वह किसी पुरुष की प्रेरणा के बिना ही पूर्व की ओर चल दे तो समझना चाहिये कि यह यजमान सफल हो गया, उसने कल्याण लोक को जीत लिया। यदि उत्तर को जाय तो समझना चाहिये कि यजमान इस लोक में ही यशस्वी होगा। यदि पश्चिम की ओर जाय तो समझना चाहिये कि धन-धान्य आदि से पूर्ण होगा। यदि दक्षिण की ओर जाय तो समझना चाहिये कि यजमान शीघ्र ही इस लोक से चल बसेगा। ऐसी सूचनायें हैं ॥११॥

यह जो गायें तीस से तीन-तीन हजार ऊपर होती हैं, उनमें इसको मिला देते हैं। जब विराट् छन्द को लेते हैं और उसका विश्लेषण करते हैं तो वह विच्छिन्न हो जाता है। अर्थात् उस विराट् छन्द के टुकड़े-टुकड़े हो जाते हैं। यह जो दश अक्षर का विराट् है वह पूरा-पूरा है। इस प्रकार दश अक्षर पूरा करने से विराट् छन्द पूरा हो जाता है। इस गाय को होता के अर्पण करना चाहिये। होता साहस्र (हजारवाँ) है इसलिये इसको होता को ही देना चाहिये ॥१२॥

दो उन्नेताओं की नियुक्ति करनी चाहिये। इनमें से जो ओपट न पढ़े उसी को इस गाय को दे। यह उन्नेता अपूर्ण है जो ऋत्विज् होता हुआ भी ओपट नहीं पढ़ता। जिस विराट् छन्द का विश्लेषण कर दिया गया वह भी तो अपूर्ण है। इस प्रकार अपूर्ण में अपूर्ण को रखता है ॥१३॥

इस पर कुछ लोगों का कहना है कि हजार गायों से अधिक कुछ न देना चाहिये, क्योंकि हजार गायों का दान ही सब कामनाओं की पूर्ति कर देता है। परन्तु आसुरि का मत है कि जितनी इच्छा हो उतना देवे। अवश्य ही सहस्र गायों के दान से सब कामनायें

भवतीति ॥१४॥

अथ यदि रथं वा युक्तं दास्यन्त्स्यात् । यद्वा वशायै वा वपायाश्च हुतायां दद्याद्धुदयसानीयावां वेष्टौ ॥१५॥

स वै दक्षिणानयन् । अन्यूना दशतो नयेद्यस्मा ऽएकां दास्यन्त्स्याद्दशभ्यस्तेभ्यो दशतमुपावर्तयेद्यस्मै द्वे दास्यन्त्स्यात्पञ्चभ्यस्तेभ्यो दशतमुपावर्तयेद्यस्मै तिस्रो दास्यन्त्स्यात्त्रिंशभ्यस्तेभ्यो दशतमुपावर्तयेद्यस्मै पञ्च दास्यन्त्स्याद्द्वाभ्यां ताभ्यां दशतमुपावर्तयेदेवमा शतात्तथो ह्यस्यैषान्यूना विराडमुष्मिंल्लोके कामदुघा भवति ॥१६॥ ब्राह्मणम् ॥६॥ [५. ८] चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या १२५ ॥

पूर्ण हो जाती है । परन्तु जो अधिक दिया जाय अपनी इच्छा से दिया जाय ॥१४॥

अब यदि घोड़े जुते हुये रथ को देना हो तो या तो उसको वशा की वपा की आहुति के पश्चात् देना चाहिये या अन्तिम आहुति के पीछे ॥१५॥

जब दक्षिणा के लिये (गायें) लावे तो दस-दस कर के लावे; कम न हों । यदि किसी को एक गाय देनी हो तो दस गायें दस को दे देवे । यदि किसी को दो-दो देनी हो तो पाँच को दे देवे । यदि तीन-तीन देनी हो तो दस गायों को तीन को दे देवे । यदि पाँच-पाँच देनी हो तो उन दस को दो को दे देवे । इस प्रकार सौ तक । इस प्रकार यह पूर्ण विराट् परलोक में उसके लिये कामदुघा हो जाती है ॥१६॥

व्यूढ द्वादशाह धर्मः

अध्याय ५—ब्राह्मण ९

तद्यत्रैतद्द्वादशाहेन व्यूढछन्दसा यजते । तदमहान्व्यूहति व्यूहत उद्गाता च होता च छन्दाꣳसि स एष प्रज्ञात एव पूर्वस्म्यहो भवति समूढछन्दास्तदैन्द्रपायवाग्रान्व्यूहति ॥१॥

जब द्वादशाह यज्ञ को (जो यज्ञ बारह दिन का हो वह द्वादशाह कहलाता है) व्यूढ छन्दों से करता है तो ग्रहों का क्रम बदल देता है । (जिन छन्दों का क्रम बदल दिया जाय वे व्यूढ छन्द हैं) । उद्गाता और होता दोनों ही छन्दों के क्रमों को बदल देते हैं । पहले तो छन्दों के सामान्य क्रम से त्र्यह (तीन दिन का यज्ञ) होता है । इसमें वह ऐन्द्रवायव आदि ग्रहों को लेता है ॥१॥

अथ चतुर्थेऽहन् व्यूहति । महान्व्यूहन्ति छन्दाꣳसि तदाग्रयणाग्रान्गृह्णाति प्राजापत्यं वाऽएतच्चतुर्थमहर्भवत्यात्मा वाऽआग्रयण आत्मा वै प्रजापतिस्तस्मादाग्रयणाग्रान्गृह्णाति ॥२॥

तं गृहीत्वा न सादयति । प्राणा वै ग्रहा नेत्प्राणान्मोहयानीति मोहयेद्य प्राणान्यत्सादयेत्तं धारयन्त एवोपासतेऽथ महान्गृह्णात्यथ यदा महान्गृह्णात्यथ यत्रैवैतस्य कालस्तदेनꣳ हिङ्कृत्य सादयत्यथैतत्प्रज्ञातमेव पञ्चममहर्भवति तदैन्द्रवायवाग्रान्गृह्णाति ॥३॥

अथ षष्ठेऽहन्व्यूहति । महान्व्यूहन्ति छन्दाꣳसि तच्छुक्राग्रान्गृह्णात्यैन्द्रं वाऽएतत्षष्ठमहर्भवत्येष वै शुक्रो य एष तपत्येष उऽएवेन्द्रस्तस्माच्छुक्राग्रान्गृह्णाति ॥४॥

तं गृहीत्वा नसादयति । प्राणा वै ग्रहा नेत्प्राणान्मोहयानीति मोहयेद्य प्राणान्यत्सादयेत्तं धारयन्त एवोपासतेऽथ महान्गृह्णात्यथ यदा महान्गृह्णात्यथ यत्रैवैतस्य कालस्तदेनꣳ सादयति ॥५॥

अथ सप्तमेऽहन्व्यूहति । महान्व्यूहन्ति छन्दाꣳसि तच्छुक्राग्रान्गृह्णाति वार्हतं

चौथे दिन ग्रहों का क्रम बदल देता है । वे छन्दों के क्रम को बदल देते हैं । इसमें वह आग्रयण आदि ग्रहों को लेता है । चौथा दिन प्रजापति का अपना है । और आग्रयण आत्मा है । प्रजापति आत्मा है । इसलिये आग्रयण से आरम्भ होने वाले ग्रहों को लेता है ॥२॥

उस ग्रह को लेकर रखता नहीं । यह ग्रह प्राण है । ऐसा न हो कि प्राणों में कुछ विक्षोभ उत्पन्न हो जाय । यदि वह इसको रख देगा तो अवश्य ही प्राणों को विक्षुब्ध कर देगा । वे ग्रहों को लिये-लिये पास बैठे रहते हैं । अध्वर्यु दूसरे ग्रहों को लेता रहता है । जब वह ग्रहों को लेता है तो हर एक ग्रह की पारी आने पर वह हिङ्कार का उच्चारण करता है और ग्रह को रख देता है । अब साधारण पाँचवाँ दिन आता है । उस दिन ऐन्द्रवायव से आरम्भ होने वाले ग्रह लिये जाते हैं ॥३॥

अब छठे दिन वह ग्रहों के क्रम को बदल देता है । और वे छन्दों के क्रम को बदल देते हैं । उस दिन शुक्र से आरम्भ होने वाले ग्रह लिये जाते हैं । यह जो छटा दिन है वह इन्द्र का अपना है । शुक्र वह है जो ऊपर तपता है (सूर्य) और वही इन्द्र है । इसलिये वह शुक्र से आरम्भ होने वाले ग्रहों को लेता है ॥४॥

उसको लेकर रखता नहीं । यह ग्रह प्राण है । ऐसा न हो कि प्राणों में विक्षोभ हो जाय । यदि रक्खेगा तो अवश्य ही प्राणों में विक्षोभ होगा । उसको लिये-लिये पास में बैठे रहते हैं । और अध्वर्यु दूसरे ग्रहों को लेता रहता है । इन ग्रहों के लेने में जब इनकी पारी आती है तो रख देता है ॥५॥

अब सातवें दिन वह ग्रहों के क्रम को बदल देता है, और वे छन्दों के क्रम को बदल देते हैं । उस दिन वह शुक्र ग्रह से आरम्भ करता है । यह सातवाँ दिन पृष्ठस्तुति का

वा ऽएतत्सप्तममहर्भवत्येष वै शुक्रो य एष तपत्येष उऽएव बृहत्तस्माच्छुक्रामा-ग्रहणाति ॥६॥

तं गृहीत्वा न सादयति । प्राणा वै ग्रहा नेत्प्राणान्मोहयानीति मोहयेद्य प्राणान्य-त्सादयेत्तं धारयन्त एवोपासतेऽथ ग्रहान्गृह्णात्यथ यदा ग्रहान्गृह्णात्यथ यत्रैवैतस्य काल-स्तदेनꣳ सादयत्यथैतरग्नातमेकाष्टमहर्भवति तदैन्द्रवायवाग्रान्गृह्णाति ॥७॥

अथ नवमेऽहन्व्यूहति । ग्रहान्व्यूहन्ति छन्दाꣳसि तदाग्रयणाग्रान्गृह्णाति जागतं वाऽएतन्नवमहर्भवत्यात्मा वाऽआग्रयणः सर्वं वाऽइदमात्मा जगत्तस्मादाग्रयणाग्रा-न्गृह्णाति ॥८॥

तं गृहीत्वा न सादयति । प्राणा वै ग्रहा नेत्प्राणान्मोहयानीति मोहयेद्य प्राणान्य-त्सादयेत्तं धारयन्त एवोपासतेऽथ ग्रहान्गृह्णात्यथ यदा ग्रहान्गृह्णात्यथ यत्रैवैतस्य काल-स्तदेनꣳ हिंकृत्य सादयति ॥९॥

तदाहुः । न व्यूहेद्ग्रहान्प्राणा वै ग्रहा नेत्प्राणान्मोहयानीति मोहयेद्य प्राणान्य-द्व्यूहेत्तस्माच्च व्यूहेत् ॥१०॥

है । शुक्र वही है जो तपता है (सूर्य) । और यह बृहत् अर्थात् बड़ा है । इसलिये शुक्र ग्रह से आरम्भ करता है ॥६॥

उसको लेकर रखता है । प्राण ग्रह हैं । ऐसा न हो कि प्राणों में विक्षोभ हो जाय । यदि रख देगा तो प्राणों में अवश्य विक्षोभ हो जायगा । उनको लिये लिये पास बैठे रहते हैं । और अध्वर्यु दूसरे ग्रह निकालता रहता है । जब उसकी पारी आती है तो उसको रख देता है । आठवाँ दिन सामान्य होता है । उस दिन ऐन्द्रवायव ग्रह से आरम्भ करते हैं ॥७॥

अब नवें दिन यह ग्रहों के क्रम को बदलता है और वे लोग छन्दों के क्रम को बदल देते हैं । उस दिन आग्रयण ग्रह से आरम्भ करते हैं । यह नवाँ दिन जगती छन्द का होता है । आत्मा आग्रयण है । यह सब जगत् आत्मा है । इसलिये आग्रयण ग्रह से आरम्भ करते हैं ॥८॥

उसको लेकर रखता नहीं । ग्रह प्राण हैं । ऐसा न हो कि प्राणों में विक्षोभ उत्पन्न हो जाय । यदि रख देगा तो अवश्य ही प्राणों में विक्षोभ उत्पन्न कर देगा । उसको लिये-लिये बैठे रहते हैं और अध्वर्यु अन्य ग्रहों को लेता रहता है । जब पारी आती है तो उस-उस ग्रह को हिंकार बोलकर रख देता है ॥९॥

कुछ लोग कहते हैं कि ग्रहों का क्रम नहीं बदलना चाहिये । ग्रह प्राण हैं । कहीं ऐसा न हो कि प्राणों का क्रम बदल जाय । जब इनके ग्रहों का क्रम बदलेगा तो प्राणों में अवश्य ही विक्षोभ होगा । इसलिये ग्रहों के क्रम को न बदले ॥१०॥

तदु व्यूहेदेव अह्नाने वै ग्रहाः कामं वाऽइमान्यङ्गानि व्यत्यासꣳशेते तस्मादु व्यूहेदेव ॥११॥

तदु नैव व्यूहेत् । प्राणा वै ग्रहा नेत्प्राणान्मोहयानीति मोहयेद्ध प्राणान्यद्व्यूहेत्तस्मान्न व्यूहेत् ॥१२॥

किं नु तत्राध्वर्योः । यदुद्गाता च होता च छन्दाꣳसि व्यूहत एतद्वाऽअध्वर्युर्व्यूहति ग्रहान्यदैन्द्रवायवाग्रान्प्रातःसवने गृह्णाति शुक्रामान्माध्यन्दिने सवनऽआग्रयणामास्तृतीयसवने ॥१३॥ ब्राह्मणम् ॥१॥ [५. ६.]

परन्तु उसको बदल देना चाहिये । क्योंकि ग्रह अग हैं और सोते में इच्छा होती है कि अगों को एक ओर से दूसरी ओर को फेरा जाय । इसलिये क्रम को बदल देना उचित है ॥११॥

उनको कभी न बदलें । ग्रह प्राण हैं । कहीं प्राणों में गड़बड़ न हो जाय । क्योंकि जब वह ग्रहों को बदलेगा तो अवश्य ही प्राणों में गड़बड़ होगी । इसलिये न बदलना चाहिये ॥१२॥

अच्छा, जब उद्गाता और होता छन्दों के क्रम को बदलें तो अध्वर्यु क्या करे ? प्रातः सवन में वह ऐन्द्रवायव ग्रह को लेता है । दोपहर के सवन में शुक्र ग्रह को और तीसरे सवन में आग्रयण ग्रह को । इस प्रकार अध्वर्यु ग्रहों के क्रम को बदल देता है ॥१३॥

सोमापहरणादि

अध्याय ५—ब्राह्मण १०

यदि सोममपहरेयुः । विधावतेच्छति न यात्स यदि विन्दन्ति किमाद्रियेरन्यद्य न विन्दन्ति तत्र प्रायश्चित्तिः क्रियते ॥१॥

द्वयानि वै फाल्गुनानि । लोहितपुष्पाणि चाहणपुष्पाणि च स यान्यरुणपुष्पानि

यदि सोम चोरी जाय तो कहना चाहिये कि 'दौड़ो और तलाश करो' । यदि मिल जाय तो अच्छा ही है । परन्तु यदि न मिले तो इस प्रकार इसका प्रायश्चित्त हो जाता है ॥१॥

फाल्गुन वृक्ष दो प्रकार का होता है लोहित-पुष्प और अरुण-पुष्प । जो अरुण-पुष्प

फाल्गुनानि तान्यभिषुणुयादेष वै सोमस्य न्यङ्को यदरुणपुष्पाणि फाल्गुनानि तस्मादरुण पुष्पाण्यभिषुणुयात् ॥२॥

यद्यरुणपुष्पाणि न विन्देयुः । श्येनहृतमभिषुणुयाद्यत्र वै गायत्री सोममच्छापतत्तस्याऽऽ हरन्त्यै सोमस्याध्वर्युरपतत्तच्छ्येनहृतमभवत्तस्माच्छ्येनहृतमभिषुणुयात् ॥३॥

यदि श्येनहृतं न विन्देयुः । आदारानभिषुणुयाद्यत्र वै यज्ञस्य शिरोऽच्छिद्यत तस्य या रसोऽत्यग्रुष्यत्तत आदारा समभवंस्तस्मादादारानभिषुणुयात् ॥४॥

यद्यादारान् न विन्देयुः । अरुणदूर्वा अभिषुणुयादेष वै सोमस्य न्यङ्को यदरुणदूर्वास्तस्मादरुणदूर्वा अभिषुणुयात् ॥५॥

यद्यरुणदूर्वा न विन्देयुः । अपि यानेव काश्च हरितान्कुशानभिषुणुयात्तत्राप्येकामेव गां दद्यादथावभृथादेवोदेत्य पुनर्दीक्षेत पुनर्यज्ञो ह्येव तत्र प्रायश्चित्तिरिति नु सोमापहृतानाम् ॥६॥

अथ कलशादि राम् । यदि कलशो दीर्यतानुलिप्सध्वमिति ब्रूयात्स यद्यनुलमेरन् प्रसृतमात्रं वाञ्जलिमात्रं वा तदन्यैरुदधनैरभ्युक्षीय यथाप्रभाव प्रचरेयुर्यद्यु नानुलमेरन्नाग्नयणस्यैव प्रस्कन्दान्यैरुदधनैरभ्युक्षीय यथाप्रभावं प्रचरेयु स यदनीतासु दक्षिणासु कलशो

फाल्गुन हों उनको निचोड़े। क्योंकि जो अरुण पुष्प का फाल्गुन है वे सोम के समान होते हैं। इसलिये उन्हीं फाल्गुनों को पीसना चाहिये जिनके अरुण पुष्प हों ॥२॥

यदि अरुण फूल वाले न मिलें तो श्येनहृत वृक्ष को निचोड़ना चाहिये। जब गायत्री सोम को लेने के लिये उड़ी और ला रही थी तो सोम की एक डाली उससे गिर पड़ी, वही श्येनहृत वृक्ष बन गई। इसलिये श्येनहृत वृक्ष को निचोड़ना चाहिये ॥३॥

यदि श्येनहृत भी न मिले तो आदार वृक्ष को लेना चाहिये। जब यज्ञ का शिर काटा गया तो उससे जो रस बहा उससे आदार वृक्ष उगा। इसलिये आदार वृक्ष को निचोड़ना चाहिये ॥४॥

यदि आदार वृक्ष न मिले तो अरुण दूर्वा को पीसे। अरुण दूर्वा सोम के सदृश होती है। इसलिये अरुण दूर्वा को पीसना चाहिये ॥५॥

यदि अरुण दूर्वा न मिले तो कैसे ही हरित कुशों को पीस डाले। परन्तु एक गाय भी दान करे और अवभृथ स्नान के पीछे दीक्षा भी ले। सोम के चोरी जाने का यही प्रायश्चित्त है कि यह दूसरा यज्ञ रचा जाय ॥६॥

जिनका कलश टूट जाय उनका क्या कहना? जब कलश टूट जाय तो कहना चाहिये कि 'इसे पकड़ो'। यदि मुट्ठी भर या पलों भर सोम मिल जाय तो एक घृत पात्र से पानी मिला कर यथाशक्ति काम निकालना चाहिये। परन्तु यदि कुछ भी न मिल सके तो आग्नयण में से कुछ लेकर दूसरे घृत पात्रों में से पानी मिला कर यथाशक्ति काम

दीयेत तत्राप्येकामेव गां दद्यादथावभृथादेवोदेत्य पुनर्दीक्षेत पुनर्यज्ञो ह्येव तत्र प्रायश्चित्तिरिति नु कलशादिगाम् ॥७॥

अथ सोमातिरिक्तानां । यद्यग्निष्टोममतिरिच्येत पूततभृत एवोक्थ्यं गृह्णीयाद्यद्युक्थ्यमतिरिच्येत षोडशिनमुपेयुर्यदि षोडशिनमतिरिच्येत रात्रिमुपेयुर्यदि रात्रिमतिरिच्येताहरुपेयुर्नैत्त्वेवातीरेकोऽस्ति ॥८॥ ब्राह्मणम् ॥ २ ॥ [५. १०] पञ्चमोध्यायः [१६]

निकालना चाहिये । यदि दक्षिणा की गायें लाने से पहले कलश टूट जाय तो एक गाय दान दे और अवभृथ स्नान के पीछे फिर दीक्षित होवे । क्योंकि यह दूसरा यज्ञ ही इसका प्रायश्चित्त है । इतना उन लोगो के लिये जिनसे कलश टूट जाय ॥७॥

अब उन लोगों के विषय में जिनसे सोम कुछ शेष रह जाय । यदि अग्निष्टोम के पीछे कुछ सोम शेष रह जाय तो पूतभृत में से उक्थ्य ग्रह को भर ले । यदि उक्थ्य भरने पर भी शेष रहे तो षोडशी करे । यदि षोडशी पर भी बच रहे तो अतिरात्र यज्ञ करे । यदि अतिरात्र से भी बच रहे तो दिन का यज्ञ (बृहत्साम या महाव्रत) करे । इसके पीछे तो अवश्य ही कुछ न बचेगा ॥८॥

अध्याय ६—ब्राह्मण १

प्रजापतिर्वा एष यदंशुः सोऽस्यैष आत्मैवात्मा ह्ययं प्रजापतिस्तदस्यैतमात्मानं कुर्वन्ति यत्रैतं गृह्णन्ति तस्मिन्नेतान्प्राणान्दधति यथा यथैते प्राणा ग्रहा व्याख्यायन्ते स ह सर्वतनूरेव यजमानोऽमुष्मिल्लोके सम्भवति ॥१॥

तदारम्भणवत्। यत्रैतं गृह्णन्त्यथैतदनारम्भणमिव यत्रैतं न गृह्णन्ति तस्माद्वा अप्यंशुं गृह्णाति ॥२॥

त वा औदुम्बरेण पात्रेण गृह्णाति। प्रजापतिर्वा एष प्राजापत्य उदुम्बरस्तस्मादौदुम्बरेण पात्रेण गृह्णाति ॥३॥

तं वै चतुःस्रक्तिना पात्रेण गृह्णाति। त्रयोवाऽइमे लोकास्तदिमानेव लोकांस्तिसृभिराप्नोति प्रजापतिर्वाऽअतीमाल्लोकाꣳश्चतुर्थस्तत्प्रजापतिमेव चतुर्थ्याप्नोति तस्माच्चतुःस्रक्तिना पात्रेण गृह्णाति ॥४॥

स वै तूष्णीमेव प्रावाणमादत्ते। तूष्णीमꣳशूनधिषवति तूष्णीमप उपसृजति तूष्णी-

यह जो अंशु ग्रह है वह प्रजापति ही है। यह इस यज्ञ का आत्मा है। क्योंकि प्रजापति आत्मा है। इस प्रकार जब वह इस ग्रह को निकालते हैं तो मानो यज्ञ के आत्मा को बनाते हैं। इसमें प्राणों को स्थापित करता है। जैसे इन प्राणों अर्थात् ग्रहों की व्याख्या होती है। यजमान अपने सम्पूर्ण शरीर सहित परलोक में जन्म लेता है ॥१॥

जब इस ग्रह को ग्रहण करते हैं तो यह आरम्भण है। जब नहीं ग्रहण करते तो आरम्भण नहीं है। इसलिये अंशु ग्रह को ग्रहण करना है ॥२॥

यह उदुम्बर लकड़ी का होता है। यह प्रजापति है। उदुम्बर प्रजापति का है। इसलिये उदुम्बर लकड़ी का पात्र होता है ॥३॥

यह चौकोर पात्र होता है। लोक तीन हैं। तीन कोनों से तीन लोकों की प्राप्ति होती है। इन तीन लोकों के अतिरिक्त चौथा प्रजापति है। इस प्रकार चौथे कोने से प्रजापति की प्राप्ति करता है। इसलिये चौकोर पात्र होता है ॥४॥

सिल-बट्टे (प्रावाण) को चुपके से लेता है। चुपके ही सोम अंशु को उस पर रखता है। चुपके से उस पर पानी छोड़ता है। चुपके से बट्टा उठाकर उसे एक बार पीसता है। चुपके से बिना शोर किये आहुति देता है। इस प्रकार यजमान को प्रजापति

मुद्यत्य सकृदभिपुणोति तूष्णीमेनमनवानञ्जुहोति तदनं प्रजापतिं करोति ॥५॥

अथास्याश्ऽहिरण्यं वद्धं भवति । तदुपजिघ्रति स यदेवात्र क्षणुते वा विवा लिश-तेऽमृतमायुर्हिरण्यं तदमृतमायुरात्मन्धत्ते ॥६॥

तदु होवाच राम औपतस्विनिः । काममेव प्राण्यात्कामसुदन्याद्वद्धे तूष्णीं जुहोति तदेवैनं प्रजापतिं करोतीति ॥७॥

अथास्याश्ऽ हिरण्यं वद्धं भवति । तदुपजिघ्रति स एवोदत्र क्षणुते वा षि व लिशतेऽमृतमायुर्हिरण्यं तदमृतमायुरात्मन्धत्त ॥८॥

तदु होवाच बुडिल आश्वतराश्विः । उद्यत्यैव गृह्णीयाद्वाभिपुणुयादभिपुणन्ति वाऽन्याभ्यो देवताभ्यस्तदन्यथा ततः करोति यथा चान्याभ्यो देवताभ्योऽथ यदुद्यच्छति तदेवास्याभिपवं भवतीति ॥९॥

तदु हावाच याज्ञवल्क्यः । अभ्येव पुणुयाच्च सो । इन्द्रमसुतो ममाद नाब्रह्माणो मघवानश्ऽ सुतास इत्यृषिणाभ्यनूक्तं न वाऽन्यस्यै कस्यै चन देवतायै सकृदभिपुणोति तदन्यथा ततः करोति यथो चान्याभ्यो देवताभ्यस्तस्मादभ्येव पुणुयादिति ॥१०॥

बना देता है । ५।

इसमें एक सोने का टुकड़ा रक्खा होता है । उसको सूँघता है । यदि वहीं खुजलाये या घाव हो जाय तो सोना अमृत है । इस प्रकार अपने में अमृत को धारण करता है ॥६॥

राम औपतस्विनि का कहना है कि जितना जी चाहे साँस ले । चुपके से आहुति देने-मात्र से ही यजमान प्रजापति बन जाता है ॥७॥

उसमें सोने का टुकड़ा होता है । उसको सूँघता है । यदि खुजलाये या घाव हो जाय तो सोना अमृत है । इसलिये इसमें अमृत या दीर्घ जीवन की स्थापना करता है ॥८॥

बुडिल आश्वतराश्वि का कहना है कि केवल घटने को उठाकर इसको ले लेवे, पीसे न । क्योंकि अन्य देवताओं के लिये पीसते हैं । इस प्रकार यह जैसा अन्य देवताओं के लिये करता है उससे कुछ भिन्न इसके लिये करता है।' यह जो घटने का ऊपर उठाना है वही पीसने के तुल्य है ॥९॥

इस पर याज्ञवल्क्य का कहना है कि पीसना अवश्य चाहिये । ऋषि का कहना है कि 'न सोम इन्द्रमसुतो ममाद नाब्रह्माणो मघवानश्ऽ सुतास.' (ऋ० ७।२६।१) । 'बिना पिसे सोम ने इन्द्र को तृप्त नहीं किया, न बिने सोम ने बिना स्तुति के' । किसी अन्य देवता के लिये एक बार से अधिक नहीं पीसा जाता । इस प्रकार जैसा अन्य देवताओं के लिये किया जाता है उससे भिन्न इसके लिये । इसलिये पीसना अवश्य चाहिये ॥१०॥

तस्य द्वादश प्रथम गर्भाः। षष्ठीह्यो दक्षिणा द्वादश वै मासाः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिरश्वगुस्तदेनं प्रजापतिं करोति ॥११॥ शतम् २८०० ॥

ताता द्वादश गर्भाः। ताश्चतुर्विंशतिश्चतुर्विंशतिर्वै संवत्सरस्यार्धमासा संवत्सरः प्रजापति. प्रजापतिरश्वंगुस्तदेनं प्रजापतिं करोति ॥१२॥

तदु ह कौकूस्तः। चतुर्विंशतिमेताः प्रथमगर्भाः षष्ठीहीर्दक्षिणा ददावृषभं पञ्चविंशं शश्वं हिरण्यमेतदु ह स ददौ ॥१३॥

स वा एष न सत्रस्येव ग्रहीतव्यः। आत्माध्वर्यस्यैव यो न्येव ज्ञानस्तस्य ग्रहीतव्यो यो वास्य। प्रयः स्याद्यो वानूचानोऽनूक्तेनैन प्राप्नुयात् ॥१४॥

सहस्रे ग्रहीतव्यः। सर्वं वै सहस्रश्वं सर्वमेव सर्वेदसे ग्रहीत यः सर्वं वै सर्ववेदसश्वं सर्वमेव विश्वजिति सर्वपृष्ठे ग्रहीतव्यः सर्वं वै विश्वजित्सर्वपृष्ठः सर्वमेव वाजपेये राजसूये ग्रहीतव्यः सर्वश्वं हि तत्सत्रे ग्रहीतव्यः सर्वं वै सत्रश्वं सर्वमेव एतानि ग्रहणानि ॥१५॥ ब्राह्मणम् ॥ ३ ॥ [६ १.]

इसकी दक्षिणा है बारह गर्भिणी गायें जो पहलौटी हों। वर्ष के बारह मास होते हैं। सवत्सर प्रजापति है। प्रजापति अश्व है। इस प्रकार यह यजमान को प्रजापति बना देता है ॥११॥

उनके बारह गर्भ भी तो होते हैं। इस प्रकार चौबीस हुये। सवत्सर में चौबीस अर्ध-मास होते हैं। सवत्सर प्रजापति है। अश्व प्रजापति है। इस प्रकार यजमान को प्रजापति बना देता है ॥१२॥

कौकूस्त ने चौबीस प्रथम गर्भा गायें अपने पहलौटी बच्चों के साथ दी थीं और पच्चीसवाँ साँड़ और सोना। इतना ही दिया था ॥१३॥

यह ग्रह सब के लिये नहीं निकालना चाहिये। क्योंकि यह यज्ञ का आत्मा है। या तो उसके लिये निकाले जिससे जान पहचान हो या जो अध्वर्यु का मित्र हो या जो वेदाध्ययन के द्वारा इसका अधिकारी बन गया हो ॥१४॥

हजार-गाय दान वाले यज्ञ में इसको निकालना चाहिये। सहस्र का अर्थ है सम्पूर्ण। यह ग्रह भी सम्पूर्ण है। सर्ववेदस् यज्ञ में इसको निकालना चाहिये। (सर्ववेद वह यज्ञ है जिसमें सम्पूर्ण सम्पत्ति दान कर दी जाती है)। सर्ववेद सब कुछ है और यह ग्रह भी सब कुछ है। सर्वपृष्ठ विश्वजित् में इसको निकालना चाहिये। विश्वजित् सर्वपृष्ठ सब कुछ है। और यह ग्रह भी सब कुछ है। वाजपेय और राजसूय यज्ञ में इसको निकालना चाहिये। क्योंकि यह सब कुछ है। सत्र में निकालना चाहिये। क्योंकि सत्र सब कुछ है और यह सब ग्रह निकालने की क्रिया में भी सब कुछ है ॥१५॥

अतिग्राह्य ग्रहग्रहणम्

अध्याय ६—ब्राह्मण १

एत वाऽएते गच्छन्ति । षड्भिर्मासैर्य एष तपति ये संवत्सरमासते तदुच्यतऽएव सामतो यथैतस्य रूपं क्रियतऽउच्यतऽऋक्तोऽयैतदेव यजुषः पुरश्चरणतो यदेतं गृह्णन्त्येते नोऽएवैनं गच्छन्ति ॥१॥

अथातो गृह्णात्येव । उदु त्यं जातवेदस देव वहन्ति केतव· । दृशे विश्वाय· सूर्यम् । उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्य्याय त्वा भ्राजायेति ॥२॥ ब्राह्मणम् ॥ ४ ॥ [६ २.] ॥ ॥

जो साल भर तक यज्ञ में बैठते हैं वह छः महीनों के द्वारा उसको प्राप्त होते हैं। जो वह चमकता है (अर्थात् सूर्य), ऐसा साम के अनुसार है। यह सूर्य का रूप हो जाता है यह ऋक् का विधान है। यजु के अनुसार भी यही है कि पुरश्चरण करके जो इस ग्रह को लेते हैं वे भी इसी सूर्य को प्राप्त होते हैं ॥१॥

उसको इस मन्त्र से लेता है, 'उदुत्य जातवेदस देव वहन्ति केतवः। दृशे विश्वाय सूर्यम्। उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजाय' (यजु० ८।४१, ऋ० १।५०।१)। 'उस रात्रि के अन्धकार को देव सूर्य की ओर यह केतु ले जाते हैं। जिससे सब संसार की वस्तुओं को देखा जा सके। तू आश्रय के लिये लिया गया है। तुझे सूर्य के लिये, तेज के लिये। यह तेरी योनि है। सूर्य के लिये तुझको। प्रकाश के लिये तुझको ॥२॥

पश्वयनस्तोमायने

अध्याय ७—ब्राह्मण १

अथातः पश्वयनस्यैव । पश्वेकादशिन्यैवेयात्स आग्नेयं प्रथमं पशुमालभतेऽथ वारुणमथ पुनराग्नेयमेवमेतया पश्वेकादशिन्येयात् ॥१॥

पशु अयन (पशु-याग) का यह नियम है। ग्यारह पशुओं से ही यज्ञ करे। अग्नि के लिये पहले पशु का आलभन करे, एक वरुण के लिये, फिर एक अग्नि के लिये। इस प्रकार ग्यारह पशुओं से यज्ञ करे ॥१॥

अथोऽअप्यैन्द्राग्नमेवाहरहः पशुमालभेत । अग्निर्वै सर्वा देवता अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वतीन्द्रो वै यज्ञस्य देवता तत्सर्वाश्चैवैतद्देवता नापराध्नोति यो च यज्ञस्य देवता तां नापराध्नोति ॥२॥

अथोत स्तोमायनस्यैव । आग्नेयमग्निष्टोमऽआलभेत तद्धिसलोमयदाग्नेयमग्निष्टोमऽआलभेत यद्युक्थ्यः स्यादैन्द्राग्नं द्वितीयमालभेतैन्द्राग्नानि ह्युक्थानि यदि षोडशीस्यादैन्द्रं तृतीयमालभेतेन्द्रो हि षोडशी यद्यतिरात्रः स्यात्सारस्वतं चतुर्थमालभेत वाग्वै सरस्वती योषा वै वाग्योषा रात्रिस्तद्यथायथ यज्ञक्रतून्व्यावर्तयत्येतानि त्रीण्ययनानि तेषां यतमत्काम-येत तेनेयाद्द्वाऽउपालम्भ्यौ पशू सौर्यं द्वितीय पशुमालभते वैषुवतेऽहन्प्राजापत्यं महाव्रते ॥३॥ ब्राह्मणम् ॥ ५ ॥ [६ ३.] ॥

या प्रतिदिन इन्द्र-अग्नि के लिये एक-एक पशु का आलभन करे। अग्नि ही सब देवता हैं। अग्नि में ही सब देवताओं के लिये आहुति दी जाती है। इन्द्र यज्ञ का देवता है। इस प्रकार न तो वह किसी देवता को अप्रसन्न करता है, न उसको जो यज्ञ का देवता है ॥२॥

स्तोम-अयन का नियम यह है। अग्निष्टोम में अग्नि के पशु का आलभन करे। अग्निष्टोम में अग्नि के लिये आलभन करना उचित ही है। यदि उक्थ्य यज्ञ हो तो दूसरे पशु को इन्द्र और अग्नि के लिये। क्योंकि उक्थ्य इन्द्र और अग्नि के हैं। यदि षोडशी हो तो तीसरा पशु इन्द्र के लिये होना चाहिये। क्योंकि इन्द्र षोडशी है। यदि अतिरात्र हो तो सरस्वती के लिये एक पशु हो क्योंकि सरस्वती वाणी है। वाणी स्त्री है और रात्रि भी स्त्री है। इस प्रकार यज्ञ-क्रतुओं की अलग-अलग पहचान है। यह तीन अयन या यज्ञ की रीतियाँ हैं। जैसा चाहे वैसा करे। दो पशुओं का आलभन अवश्य करे। दूसरे पशु का सूर्य के लिये विषुवत् के दिन और प्रजापति के लिये महाव्रत के दिन ॥३॥

महाव्रतीयः

अध्याय ६—ब्राह्मण ४

अथातो महाव्रतीयस्यैव प्रजापतेर्ह वै प्रजाः ससृजानस्य पर्वाणि विस्रस्थुः सुः स विस्रस्तैः पर्वभिर्न शशाक सध्रङ्हातुं ततो देवा अर्चन्तः शाम्यन्तश्चेलुरत ऽएतं महाव्रतीयं

अब महाव्रतीय ग्रह के विषय में यह बात है कि जब प्रजापति ने प्रजा को सृजा तो उसके शरीर के जोड़ पक गये और थके हुये जोड़ों से वह अपने को उठा न सका।

दद्शुस्तमस्माऽअग्रहुंस्तेनाग्र्य पर्वाणि समदधुः ॥१॥

स सम्ग्रहितैः पर्वभिः । इदमन्नाद्यमभ्युत्तस्थौ यदिदं प्रजापतेरन्नाद्य यद्वै मनुष्याणामशनं तद्देवाना मतं महद्वाऽइदं व्रतमभूदेनायश्च समहास्तेति तस्मान्महाव्रतीयो नाम ॥२॥

एवं वाऽएते भवन्ति । ये संवत्सरमासते यथैव तत्प्रजापतिः प्रजाः ससृजान आसीत्स यथैव तत्प्रजापतिः सवत्सरेऽन्नाद्यमभ्युदतिष्ठदेवमेवैतऽ एतत्सवत्सरेऽन्नाद्यमभ्युत्तिष्ठन्ति येषामेवं विदुषामेतं ग्रहं गृह्णन्ति ॥३॥

तं वाऽइन्द्रायैव विमृधे गृह्णीयात् । सर्वा वै तेषा मृधो हता भवन्ति सर्वं जितं ये संवत्सरमासते तस्माद्विमृधे वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः । योऽअस्मा२ऽअभिदासत्यधर गमया तमः । उपयाम गृहीतोऽसीन्द्राय त्वा विमृधऽएष ते योनिरिन्द्राय त्वा विमृधऽइति ॥४॥

अथो विश्वकर्म्मणे । विश्व वै तेषा कर्म्म कृतं सर्वं जितं भवति ये संवत्सरमासते

तब देव अर्चना तथा श्रम करते रहे । तब उन्होंने इस महाव्रतीय ग्रह को देखा । उसको उन्होंने इस (प्रजापति) के लिये लिया और उससे इसके जोड़ स्वस्थ हो गये ॥१॥

उन स्वस्थ जोड़ों से वह उस अन्न को प्राप्त हुआ जो कुछ कि प्रजापति का अन्न है । क्योंकि जो मनुष्यों का खाना है वही देवों का व्रत है । चूँकि यह महान् व्रत था जिससे वह स्वस्थ हो गया । इसलिये इसका नाम 'महाव्रतीय' पड़ा ॥२॥

जो साल भर के यज्ञ में बैठते हैं वे उसी प्रकार के हो जाते हैं, जैसा प्रजापति हो गया था जब वह प्रजा बनाने बैठा । जिस प्रकार प्रजापति वर्ष भर के पश्चात् अन्न को प्राप्त हुआ, इस प्रकार यह भी वर्ष भर के पश्चात् अन्न को प्राप्त होते हैं । और जो इन रहस्यों को समझते हैं उन्हीं के लिये वे इस (महाव्रतीय) ग्रह को निकालते हैं ॥३॥

इसको इन्द्र विमृध के लिये निकालना चाहिये । जो वर्ष भर के यज्ञ में बैठते हैं उनके साथ 'मृध' अर्थात् शत्रु या हँसी करने वाले मर जाते हैं और वे सब को जीत लेते हैं इसलिये 'इन्द्र विमृध' के लिये इस मन्त्र से, 'वि नऽइन्द्र मृधोजहि नीचा यच्छ पृतन्यतः । योऽअस्मा२ऽअभिदासत्यधर गमया तमः । उपयामगृहीतोऽसीन्द्राय त्वा विमृधऽएष ते योनिरिन्द्राय त्वा विमृधे' (यजु० ८।४४, ऋ० १०।१५२।४) । हे इन्द्र हमारे शत्रुओं का नाश कर । उनको जो हमसे लड़ते हैं नीचा कर । जो हमारे ऊपर आक्षेप करते हैं, उनसे घोर निकृष्ट अधकार को प्राप्त करा । हे ग्रह ! तू आश्रय के लिये लिया गया है । तुझे इन्द्र मृध के लिये । यह तेरी योनि है । तुझे विमृध इन्द्र के लिये' ॥४॥

या विश्वकर्मा के लिये । जो साल भर के यज्ञ में बैठते हैं उनका सब काम पूर्ण हो जाता है वे सबको जीत लेते हैं इसलिये विश्वकर्मा के लिये इस मन्त्र से—'वाचस्पतिं विश्वकर्माणमूतये मनोजुव वाजेऽ अद्या हुवेम । स नो विश्वानि हवनानि जोषद् विश्वशम्भूरवसे

तस्माद्विश्वकर्म्मणे वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजेऽअद्या हुवेम । स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्म्मा । उपयाम गृहीतोऽसीन्द्राय त्वा विश्वकर्म्मणऽएष ते योनिरिन्द्राय त्वा विश्वकर्मणऽइति ॥५॥

यद्यऽऐन्द्रीं वैश्वकर्मणीं विद्यात् । तथैव गृह्णीयाद्विश्वकर्मन्हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् । तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् । उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मणऽएष ते योनिरिन्द्राय त्वा विश्वकर्मणऽइति ॥६॥ ब्राह्मणम् ॥ ६ [६. ४.] ॥

साधुकर्मा । उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मणऽ एष ते योनिरिन्द्राय त्वा विश्वकर्मणे' (यजु० ८।४५) । 'आज हम इस युद्ध मे वाचस्पति विश्वकर्मा को बुलाते हैं जो हमारे मनों का प्रेरक है । वह सब प्रकार से हित करने वाला और शुभ कर्म वाला हमारे सब हवनों की रक्षा के लिये स्वीकार करें । हे ग्रह तू आश्रय के लिये लिया गया है । तुझको विश्वकर्मा इन्द्र के लिये । यह तेरी योनि है तुझ के इन्द्र विश्वकर्मा के लिये ॥५॥

यदि वह इन्द्र और विश्वकर्मा वाली ऋचा को जानता हो तो इस प्रकार निकाले, 'विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् । तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् । उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मणऽ एष ते योनिरिन्द्राय त्वा विश्वकर्मणे' (यजु० ८।४६) । 'हे विश्वकर्मन् ! तूने उन्नति करने वाली हवि के द्वारा इन्द्र को त्राता (बचाने वाला) और अवध्य (न मारे जाने वाला) बना दिया । उसके लिये पूर्व लोगों ने नमस्कार किया क्योंकि वह उग्र और पूजनीय है । हे ग्रह ! तू आश्रय के लिये लिया गया है । तुझे इन्द्र विश्वकर्मा के लिये । यह तेरी योनि है । तुझको विश्वकर्मा इन्द्र के लिये' ॥६॥

ग्रहस्तुतिः

अध्याय ६—ब्राह्मण ५

एष वै ग्रहः । य एष तपति येनेमाः सर्वाः प्रजा गृहीतास्तस्मादाहुर्ग्रहान्गृह्णीम इति चरन्ति ग्रहगृहीताः सन्त इति ॥१॥

यह जो तपता है और जिसने सब प्रजाओं को थाम रक्खा है वह ग्रह है । इसलिये वे कहते हैं कि हम ग्रहों को ग्रहण करते हैं । या ग्रहों से थामे हुये हम चलते हैं । (यहाँ ग्रह के दो अर्थ दिये हैं । (१) जिसको ग्रहण किया जाय । (२) जिससे थामे हुये हम चलें) ॥१॥

वागेव ग्रहः । वाचा हीदꣳ सर्वं गृहीत किमु तद्वाग्ग्रहः ॥२॥

नामैव ग्रहः । नाम्ना हीदꣳ सर्वं गृहीतं किमु तन्नामग्रहो बहूनां वै नामानि विद्मोत नस्तेन ते न गृहीता भवन्ति ॥३॥

अन्नमेव ग्रहः । अन्नेन हीदꣳ सर्वं गृहीत तस्माद्यावन्तो नोऽशनमश्नन्ति ते नः सर्वे गृहीता भवन्त्येषैव स्थिति ॥४॥

स य एष सोमग्रहः । अन्न वाऽएष स यस्मै देवतायाऽएत ग्रह गृह्णाति सास्मै देवतैतेन ग्रहेण गृहीता त कामꣳ समर्धयति यत्काम्या गृह्णाति स उद्यन्त वादित्यमुपतिष्ठतेऽस्त यन्त वा ग्रहोऽस्यमुनगात्मा गृहाणासावदो मा प्रापदिति य द्विष्यादस्मै काममो मा समर्धीति वा न हैवास्म स कामꣳ समृध्यते यस्माऽएवमुपतिष्ठते ॥५॥ ब्राह्मणम् ॥ ७ [६, ५] ॥

वाणी एक ग्रह है । वाणी से यह सब थामा हुआ । क्या आश्चर्य है यदि वाणी ग्रह है ॥२॥

नाम ग्रह है । नाम से ही यह सब थामा हुआ है । क्या आश्चर्य है यदि नाम ग्रह हो । हम बहुतों के नामों को जानते हैं, क्या वे इस प्रकार हमसे बांधे नहीं गये ॥३॥

अन्न भी ग्रह है । अन्न से यह सब थामे हुये है । इसलिये जितने हमारा अन्न खाते हैं वह हम से थामे जाते हैं । यह स्थिति है ॥४॥

यह जो सोम ग्रह है वह अन्न है । जिस देवता के लिये यह ग्रह निकाला जाता है वह देवता इस ग्रह से बद्ध होकर उसकी कामना पूरा कर देता है जिसके लिये इस ग्रह को निकालते हैं । वह उदय होते हुये या अस्त होते हुये सूर्य की उपासना करें । यह सोच कर—'तू पकड़ने वाला (ग्रह) है । अमुक पुरुष को अमुक रोग के द्वारा पकड़ । अमुक पुरुष को अमुक वस्तु न मिल' । यह उसका नाम लेकर जिससे वह द्वेष करता है । या 'अमुक पुरुष की वृद्धि न हो, वह अपनी इच्छा को पूरा न करें' । वस्तुत यदि वह सूर्य की उपासना किसी के अहित के लिये करता है तो उस पुरुष की समृद्धि नहीं होती और न उसकी कामना पूरी होती है ॥५॥

सौमिकं ब्रह्मत्वम्

अध्याय ६—ब्राह्मण ६

देवा ह वै यज्ञं तन्वानाः। तेऽसुररक्षसेभ्य आसङ्गाद्भिभयांचक्रुस्ते होचु. को नो दक्षिणत आसिष्यतेऽथाभयेऽनाधृऽउत्तरतो यज्ञमुपचरिष्याम इति ॥१॥

ते होचुः। य एव नो वीर्यवत्तमः स दक्षिणत आस्तामथाभयेऽनाधृऽउत्तरतो यज्ञमुपचरिष्याम इति ॥२॥

ते होचुः। इन्द्रो वै नो वीर्यवत्तम इन्द्रो दक्षिणत आस्तामथाभयेऽनाधृऽउत्तरतो यज्ञमुपचरिष्याम इति ॥३॥

ते हेन्द्रमूचुः। त्वं वै नो वीर्यवत्तमोऽसि त्वं दक्षिणत आस्वाथाभयेऽनाधृऽउत्तरतो यज्ञमुपचरिष्याम इति ॥४॥

स होवाच। किं मे तत. स्यादिति ब्राह्मणाच्छंसिनं प्रवृणीतऽइन्द्रो ब्रह्मा ब्राह्मणादितीन्द्रस्य ह्येषा स इन्द्रो दक्षिणत आस्ताथाभयेऽनाधृऽउत्तरतो यज्ञमुपाचरंस्तस्माद्य एव वीर्यवत्तमः स्यात्स दक्षिणत आसीताथाभयेऽनाधृऽउत्तरतो यज्ञमुपचरेयुर्यो वै ब्राह्मणानामनूचानतमः स एषां वीर्यवत्तमोऽथ

यज्ञ रचाते हुये देवों को असुर राक्षसों के आक्रमण का भय हो गया। उन्होंने कहा, 'हममें से कौन दक्षिण की ओर बैठेगा कि हम अभय और निश्चिन्त होकर उत्तर की ओर यज्ञ करते रहें' ॥१॥

वे बोले, 'जो हम में सबसे प्रबल हो वह दक्षिण की ओर बैठे जिससे हम अभय और निश्चिन्त होकर उत्तर की ओर यज्ञ करते रहें' ॥२॥

वे बोले, 'इन्द्र ही हम मे सब से प्रबल है। इन्द्र दक्षिण की ओर बैठे जिससे हम अभय और निश्चिन्त होकर उत्तर में यज्ञ करें' ॥३॥

उन्होंने इन्द्र से कहा, 'तू हम में सबसे प्रबल है, तू दक्षिण की ओर बैठ जिससे हम अभय और निश्चिन्त होकर उत्तर में यज्ञ करें' ॥४॥

उसने उत्तर दिया, 'तो मुझे क्या मिलेगा'? उन्होंने कहा कि ब्राह्मणाच्छंसी का पद तेरा होगा, ब्रह्मसाम तेरा होगा। इसलिये ब्राह्मणाच्छंसी का वरण करते हैं तो कहते हैं कि 'इन्द्रो ब्रह्मा ब्राह्मणात्' अर्थात् इन्द्र ब्राह्मण होने के कारण ब्रह्मा है। यह पदवी इन्द्र की है। इन्द्र दक्षिण की ओर बैठा। और वे अभय तथा निश्चिन्त स्थान में यज्ञ करने लगे। इसलिये जो सबसे बलिष्ठ हो उसको दक्षिण की ओर बैठना चाहिये और उत्तर की ओर अभय और निश्चिन्त स्थान में उनको यज्ञ करना चाहिये। ब्राह्मणों में जो सबसे अधिक वेद पढ़ा है वही सबसे प्रबल है। अब जो कोई ब्रह्मा हो जाता है वह क्या यज्ञयाग नहीं

यदिदं य एव कश्च ब्रह्मा भवति कुवित्तृष्णीमास्तऽइति तस्माद्य एव वीर्यवत्तमः स्यात्स दक्षिणत आसीताथाभयेऽनाष्टऽउत्तरतो यज्ञमुपचरेयुस्तस्माद्ब्राह्मणा दक्षिणत आसतेऽथाभयेऽनाष्टऽउत्तरतो यज्ञमुपचरन्ति ॥५॥

स यत्राह । ब्रह्मन्स्तोष्यामः प्रशास्तरिति तद्ब्रह्मा जपत्येतं ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे । तेन यज्ञमव तेन यज्ञपतिं तेन मामव । स्तुत सवितुः प्रसवऽइति सोऽसावेव बन्धुरेतेन न्येवभूयिष्ठा–इवोपचरन्ति ॥६॥

अनेन त्वेवोपचरेत् । देव सवितरेतद्बृहस्पते प्रेति तत्सवितारं प्रसवायोपधावति स हि देवानां प्रसविता बृहस्पते प्रेति बृहस्पतिर्वै देवाना ब्रह्मा तद्य एव देवानां ब्रह्मा तस्माऽएवैतत्प्राह तस्मादाह बृहस्पते प्रेति ॥७॥

अथ मैत्रावरुणो जपति । प्रसूतं देवेन सवित्रा जुष्टं मित्रावरुणाभ्यामिति तत्सवितारं प्रसवायोपधावति स हि देवानां प्रसविता जुष्टं मित्रावरुणाभ्यामिति मित्रावरुणौ वै मैत्रावरुणस्य देवते तद्वेऽएव मैत्रावरुणस्य देवते ताभ्यामेवैतत्प्राह तस्मादाह जुष्टं मित्रावरुणाभ्यामिति ॥८॥ ब्राह्मणम् ॥ ८ [६. ६.] ॥

बैठता । इसलिये जो कोई सबसे प्रबल हो उसको दक्षिण की ओर बैठना चाहिये और औरों को उत्तर की ओर अभय तथा निश्चिन्त स्थान में यज्ञ करना चाहिये । इसलिये ब्राह्मण वेदी के दक्षिण भाग में बैठते हैं और दूसरे लोग उत्तर की ओर अभय और निश्चिन्त स्थान में यज्ञ करते हैं ॥५॥

जब प्रस्तोता कहता है कि 'हे ब्रह्मन् प्रशास्ता, हम स्तुति करेंगे' । तब ब्रह्मा जपता है, 'एतं ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे । तेन यज्ञमव तेन यज्ञपतिं तेन मामव' (यजु० २।१२) । 'हे देव सविता ! तेरे इस यज्ञ को ब्रह्म बृहस्पति के लिये विशेष किया है । इसलिये यज्ञ की रक्षा कर । यज्ञपति की रक्षा कर । मेरी रक्षा कर' । सविता की प्रेरणा से स्तुति करो । इसका भी वही फल है । वे अधिकतर स्तुति इसी मन्त्र से करते हैं ॥६॥

ऐसा कहकर भी स्तुति हो सकती है कि 'हे देव सविता, यह, हे बृहस्पति, आगे बढ़िये' । इससे वह प्रेरणा के लिये सविता की उपासना करता है । वही देवों का प्रेरक है । 'बृहस्पति, बढ़ो' यह इसलिये कहता है कि बृहस्पति देवों का ब्रह्मा है । इस प्रकार जो देवों का ब्रह्मा है उसकी घोषणा करता है । इसलिये कहता है कि बृहस्पति बढ़ो' ॥७॥

अब मैत्रावरुण जपता है, 'देव सविता से प्रेरित होकर मित्र और वरुण के लिये प्रिय हो' । इस प्रकार प्रेरणा के लिये सविता की उपासना करता है क्योंकि वह देवों का प्रेरक है । 'मित्र और वरुण के लिये प्रिय' इसलिये कि मैत्रावरुण के जो दो देवता हैं मित्र और वरुण । इस प्रकार मैत्रावरुण के जो दो देवता हैं उनके प्रति घोषणा करता है । इसलिये कहता है 'मित्र और वरुण के लिये' ॥८॥

ब्रह्मत्व-सदो-हविर्धान-विधिशेषः

अध्याय ६—ब्राह्मण ७

त्रयी वै विद्या । ऋचो यजूंष्यपि सामानीयमेवऽर्चोऽरयाश्च ह्यर्चति योऽर्चति स वागेवऽर्चो वाचा ह्यर्चति योऽर्चति सोऽन्तरिक्षमेव यजूंष्यपि द्यौः सामानि सैषा त्रयी विद्या सौम्येऽध्वरे प्रयुज्यते ॥१॥

इममेव लोकमृचा जयति । अन्तरिक्षं यजुषा दिवमेव साम्ना तस्माद्यस्यैका विद्या-नूक्ता स्यादन्वेवापीतरयोर्निमितं विवक्षेतेममेव लोकमृचा जयत्यन्तरिक्षं यजुषा दिवमेव साम्ना ॥२॥

तद्वा ऽएतत् । सहस्रं वाचः प्रजातं द्वेऽइन्द्रस्तृतीये तृतीयं विष्णुर्ऋचश्च सामानि चेन्द्रो यजूंष्यपि विष्णुस्तस्मात्सदस्यृक्सामाभ्यां कुर्वन्त्यैन्द्रश्च हि सदः ॥३॥

अथैतं विष्णुं यज्ञम् । एतैर्यजुभिः पुर इवैव बिभ्रति तस्मात्पुरश्चरणं नाम ॥४॥

वागेवऽर्चश्च सामानि च । मन एव यजूंष्यपि सा यत्रेयं वागासीत्सर्वमेव तत्राक्रियत सर्वं प्राज्ञायताथ यत्र मन आसीन्नैव तत्र किं चनाक्रियत न प्राज्ञायत नो हि मनसा ध्यायतः कश्चनाजानाति ॥५॥

—विद्या के तीन भाग हैं, ऋक्, यजु और साम । यह पृथिवी ऋक् है क्योंकि जो कोई ऋक् पढ़ता है यही पढ़ता है । वाणी ऋक् है क्योंकि जो कोई पढ़ता है वाणी से पढ़ता है । अन्तरिक्ष यजुः है और द्यौ साम है । सोम यज्ञ में इस तीनों भाग वाली विद्या का प्रयोग होता है ॥१॥

इस लोक को ऋक् से जीतता है, अन्तरिक्ष को यजुः से और द्यौ को साम से । इस-लिये जो एक विद्या को जानता हो उसको चाहिये कि अन्य दो विद्याओं को भी जान ले क्योंकि ऋक् से पृथिवी को जीतता है, यजुः से अन्तरिक्ष को और साम से द्यौ लोक को ॥२॥

यह वाणी की सहस्र प्रजा है । इन्द्र ने दो तिहाई ले लिया और विष्णु ने एक तिहाई । ऋक् और साम को इन्द्र ने और यजुः को विष्णु ने । इसलिये सदस् में ऋक् और साम से स्तुति करते हैं क्योंकि सदस् इन्द्र का अपना है ॥३॥

यजुओं से इस विष्णु अर्थात् यज्ञ को आगे लाते हैं इसलिये इसका नाम पुरश्चरण है ॥४॥

वाणी ही ऋक् और साम है । मन ही यजुः है । जहाँ वाणी थी वहाँ सब काम हो गया । सब ज्ञात हो गया । जहाँ मन था वहाँ कुछ न हुआ, कुछ न ज्ञात हुआ । क्योंकि जो कोई मन में विचार करता है उसको कोई भी नहीं जानता ॥५॥

ते देवा वाचमब्रुवन् । प्राची प्रेहीदं प्रशपयेति सा होवाच किं मे ततः स्यादिति यत्किंचावषट्कृतꣳ स्वाहाकारेण यज्ञे हूयते तत्त ऽइति तस्माद्यत्किंचावषट्कृतꣳ स्वाहाकारेण यज्ञे हूयते तद्वाचः सा प्राची प्रैत्सैनत्प्राशपयदितीदं कुरुतेतीदं कुरुतेति ॥६॥

तस्मादु कुर्वन्त्येवऽर्चा हविर्धाने । प्रातरनुवाकमन्वाह सामिधेनीरन्वाह आग्नेऽभिष्टौत्येवꣳ हि सयुजावभवताम् ॥७॥

तस्मादु कुर्वन्त्येव सदसि । यजुषोदुम्बरीमुच्छ्रयन्ति सदः संमिन्वन्ति धिष्ण्यानुपकिरन्त्येवꣳ हि सयुजावभवताम् ॥८॥

तद्वाऽएतत्सदः परिश्रयन्ति । एतस्मै मिथुनाय तिर इवेदं मिथुनं चर्यताऽइति व्यृद्धं वाऽएतन्मिथुनं यदन्यः पश्यति तस्माद्यदपि जायापती मिथुनं चरन्तौ पश्यन्ति ध्येव द्रवत आग एव कुर्वाते तस्मादद्वारेण सदः प्रेक्षमाणं ब्रूयान्मा प्रेक्षथा इति यथा ह मिथुनं चर्यमाणं पश्येदेवं तत्कामं द्वारेण देवकृतꣳ हि द्वारम् ॥९॥

एवमेवैतद्धविर्धानं परिश्रयन्ति । एतस्मै मिथुनाय तिर इवेदं मिथुनं चर्यताऽइति

उन देवों ने वाणी से कहा 'आगे चल और इसका शान कर' । उसने कहा, 'मुझे क्या लाभ होगा' । उन्होंने कहा कि जो कुछ बिना वषट्कार के स्वाहाकार से दिया जाता है वह सब तेरा होगा' । इसलिये जो कुछ वषट्कार के बिना स्वाहाकार से दिया जाता है वह सब वाणी का होता है । वह आगे बढ़ी और यह विशप्ति दी कि 'ऐसा करो, ऐसा करो' ॥६॥

इसलिये वे भी हविर्धान में अक्सर ही यज्ञ करते हैं । (होता) प्रातःकाल अनुवाक पढ़ता है, सामिधेनियों को पढ़ता है । वह (आग्नेय) आग्नेय की स्तुति करता है । इस प्रकार यह दोनों अर्थात् मन और वाणी संयुक्त हो गये ॥७॥

इसलिये सदस् में यजुः से यज्ञ करते हैं । वे उदुम्बरी को उठाते हैं, सदस् को खड़ा करते हैं । वह धिष्ण्या का निर्माण करते हैं । इस प्रकार मन और वाणी दोनों संयुक्त हो जाते हैं ॥८॥

इस सदस् को वे चारों ओर से घेर देते हैं, मैथुन के लिये, यह सोचकर कि 'गुप्त रीति से ही मैथुन (मन और वाणी का संयोग) होगा' । क्योंकि यदि कोई देख लें तो मैथुन अनुचित हो जाता है । इसीलिये जब स्त्री पुरुष मैथुन करते हुये देख लिये जाते हैं तो वे एक दूसरे को छोड़कर अलग हो जाते हैं क्योंकि यह बुरा लगता है । इसलिये जो कोई सदस् में द्वार के सिवाय अन्य स्थान से झाँके उससे कहना चाहिये कि मत झाँको । क्योंकि यह ऐसी ही बात है जैसे किसी को मैथुन करते हुये देखे । द्वार की ओर से कोई देख सकता है क्योंकि द्वार तो देवों का बनाया हुआ है ॥९॥

इसी प्रकार हविर्धान को भी चारों ओर से घेर देते हैं, मैथुन के लिये । अर्थात् मैथुन गुप्त रीति से किया जाय । जो कोई दूसरा मैथुन करते देख लेता है वह मैथुन अनुचित

व्यृद्धं वाऽ एतन्मिथुन यदन्यः पश्यति तस्माद्यद्यपि जायापती मिथुनं चरन्तौ पश्यन्ति व्येव द्रवत आग एव कुर्वाते तस्माद्द्वारेण हविर्धानं प्रेक्षमाणं ब्रूयान्मा प्रेक्षथा इति यथा ह मिथुनं चर्यमाणं पश्येदेव तत्कामं द्वारेण देवकृतश्ँ हि द्वारम् ॥१०॥

तद्वाऽएतद्ऋषा साम योषामृचश्ँ सदस्यध्येति तस्मान्मिथुनादिन्द्रो जातस्तेजसो वै तत्तेजोजातं यद्दचश्च साम्नश्चेन्द्र इन्द्र इति ह्येतमाचक्षते य एष तपति ॥११॥

अथैतद्ऋषा सोमः । योषा अपो हविर्धानेऽध्येति तस्मान्मिथुनाच्चन्द्रमा जातोऽन्नाद्वै तदन्नं जातं यदद्भ्यश्च सोमाच्च चन्द्रमाश्चन्द्रमा ह्येतस्यान्नं य एष तपति तद्यजमानं चैवैतज्जनयत्यन्नाद्यं चास्मै जनयत्यृचश्च साम्नश्च यजमानं जनयत्यद्भ्यश्च सोमाच्चास्माऽन्नाद्यम् ॥१२॥

यजुषा ह वै देवा । अग्रे यज्ञं तेनिरेऽथऽर्चाथ साम्ना तदिदमप्येतर्हि यजुषैवाग्रे यज्ञं तन्वतेऽथऽर्चाथ साम्ना यजो ह वै नामैतद्यद्यजुरिति ॥१३॥

यत्र वै देवाः इमा विद्याः कामान्दुदुहे तद्ध यजुर्विद्यैव भूयिष्ठान्कामान्दुदुहे सा

समझा जाता है । इसलिये यदि पति-पत्नी मैथुन करते हुये देख लिये जाते हैं तो वे अलग हो जाते हैं क्योंकि यह बुरी बात समझी जाती है । इसलिये यदि कोई द्वार के अतिरिक्त और किधर से ही हविर्धान में झाँके तो उससे कहना चाहिये कि 'मत झाँको' अर्थात् मानो वह मैथुन को देख रहा है । द्वार में होकर कोई देख सकता है । क्योंकि द्वार देवों द्वारा निर्मित है ॥१०॥

इस सदस् में नर साम नारी ऋक् की कामना करता है । इनके मैथुन से इन्द्र उत्पन्न होता है । तेज से ही तेज उत्पन्न हुआ । जो ऋक् और साम से इन्द्र हुआ क्योंकि इन्द्र उसी को कहते हैं जो तपता है (सूर्य) ॥११॥

इस हविर्धान में नर सोम नारी जल (संस्कृत में 'आप' स्त्रीलिंग है । अर्वी और हीब्रू में भी जल के वाचक स्त्रीलिंग मिलते हैं) की कामना करता है । इसके मैथुन से चाँद उत्पन्न होता है । यह जो जल और सोम के मैथुन से चाँद उत्पन्न हुआ मानो अन्न से अन्न उत्पन्न हुआ । क्योंकि चन्द्रमा उसका अन्न है जो तपता है (सूर्य का) । इस प्रकार वह यजमान को उत्पन्न करता है । और उसके लिये अन्न को उत्पन्न करता है । ऋक् और साम से वह यजमान को उत्पन्न करता है और सोम और जल से वह उसके लिये अन्न उत्पन्न करता है ॥१२॥

देवों ने पहले यजुः से यज्ञ किया, फिर ऋक् से, फिर साम से । इसीलिये यह भी पहले यजुः से यज्ञ करते हैं फिर ऋक् से फिर साम से । क्योंकि वे कहते हैं कि 'यज्ञ' ही 'यजुः' है ॥१३॥

जब देवों ने इन विद्याओं से अपनी कामनाओं को दूहा तो सब से अधिक यजुः से दूहा' । इस प्रकार यह खाली सा हो गया । यह उन दो विद्याओं के बराबर न रहा, अन्तरिक्ष

निर्धीततमेवास सा नेतरे विद्ये प्रत्यास नान्तरिक्षलोक इतरौ लोकौ प्रत्यास ॥१४॥

ते देवा अकामयन्त । कथ न्वियं विद्येतरे विद्ये प्रतिस्यात्कथमन्तरिक्षलोक इतरौ लोकौ प्रति स्यादिति ॥१५॥

ते होचुः । उपाꣳश्वेव यजुर्भिश्चराम तत एषा विद्येतरे विद्ये प्रतिभविष्यति ततोऽन्तरिक्षलोक इतरौ लोकौ प्रति भविष्यतीति ॥१६॥

तैरुपाꣳश्वचरन् । आप्याययन्नेवैनानि तत्तत एषा विद्येतरे विद्ये प्रत्यासीत्ततोऽन्तरिक्षलोक इतरौ लोकौ प्रत्यासत्तिस्माद्यजूꣳषि निरुक्तानि सन्त्यनिरुक्तानि तस्मादयमन्तरिक्षलोको निरुक्तः सन्ननिरुक्तः ॥१७॥

स य उपाꣳशु यजुर्भिश्चरति । आप्याययत्येवैनानि स तान्येनमापानीन्याप्याययन्त्यथ य उच्चैश्चरति रूक्षयत्येवैनानि स तान्येनꣳ रूक्षाणि रूक्षयन्ति ॥१८॥

वाग्वै चर्चश्च सामानि च । मन एव यजूꣳषि स यऽऋचा च साम्ना च चरन्ति वाक्ते भवन्त्यथ ये यजुषा चरन्ति मनस्ते भवन्ति तस्मान्नानभिप्रेषितमध्वर्युणा किंचन क्रियते यदैवाध्वर्युराहानुब्रूहि यजेत्यथैव ते कुर्वन्ति यऽऋचा कुर्वन्ति यदैवाध्वर्युराह सोमः पवतऽउपावर्तध्वमित्यथैव ते कुर्वन्ति ये साम्ना कुर्वन्ति नो ह्यनभिगतं मनसा

दोनों लोकों के बराबर न था ॥१४॥

देवों ने चाहा कि यह विद्या उन दो विद्याओं के बराबर कैसे हो। यह अन्तरिक्ष उन दो लोकों के बराबर कैसे हो ? ॥१५॥

उन्होंने कहा, 'धीमी आवाज से यजुः से यज्ञ करें तब यह विद्या उन दो विद्याओं के बराबर हो जायगी। तब अन्तरिक्ष इन दो लोकों के बराबर हो जायगा ॥१६॥

उनके धीमी आवाज से यज्ञ करने से यजुओं की शक्ति बढ़ गई। यह विद्या दूसरी दो विद्याओं के बराबर हो गई। इस प्रकार अन्तरिक्ष लोक अन्य दो लोकों के तुल्य हो गया। इसलिये यजुः निरुक्त (स्पष्ट) होते हुये भी अनिरुक्त है इसलिये अन्तरिक्ष निरुक्त होते हुये भी अनिरुक्त है ॥१७॥

जो यजुओं को धीमी आवाज से पढ़ता है वह यजुओं को शक्तिशाली करता है और यह शक्तिशाली होकर उसको शक्तिशाली करते हैं। जो यजुओं को उच्चस्वर से पढ़ता है वह उनको निर्बल बनाता है और वे निर्बल होकर उसको निर्बल कर देते हैं ॥१८॥

ऋक् और साम वाणी हैं। मन ही यजुः है। जो ऋक् और साम से यज्ञ करते हैं वह वाणी है और जो यजु से यज्ञ करते हैं वे मन हैं। इसलिये बिना अध्वर्यु की आज्ञा के कुछ काम नहीं किया जाता। जब अध्वर्यु कहता है 'अनुवाक् कहो, यज्ञ करो' तब ये यज्ञ करते हैं जो ऋक् से यज्ञ करते हैं। जब अध्वर्यु कहता है 'कि सोम पवित्र हो गया, लौटो' तो वे यज्ञ करते हैं जो साम से यज्ञ करते हैं। मन के द्वारा विचारे बिना तो वाणी कुछ

वाग्वदति ॥१६॥

तद्वाऽएतन्मनोऽध्वर्युः। पुर इवैव चरति तस्मात्पुरश्चरणं नाम पुर इव ह वै श्रिया यशसा भवति य एवमेतद्वेद ॥२०॥

तद्वाऽएतदेव पुरश्चरणम्। य एष तपति स एतस्यैवावृता चरेद्ग्रहं गृहीत्वैतस्यैवावृतमन्वावर्तत प्रतिगीयैतस्यैवावृतमन्वावर्तेत ग्रहꣳ हुत्वैतस्यैवावृतमन्वावर्तेत स हैष भर्ता स यो हैवं विद्वानेतस्यावृता शक्नोति चरितुꣳ शक्नोति हैव भार्य्यान् भर्तुम् ॥२१॥
ब्राह्मणम् ॥ ६ [६. ७] ॥

कहती नहीं ॥१६॥

इस प्रकार मन रूपी अध्वर्यु आगे आगे चलता है। इसीलिये पुरश्चरण नाम पड़ा। जो इस रहस्य को समझता है वह श्री और यश में आगे होता है ॥२०॥

यह पुरश्चरण वही है जो तपता है (अर्थात् सूर्य्य)। उसी की चाल के अनुसार चलना चाहिये। जब सोम ग्रह को लेवे तो उसी की चाल के अनुसार घुमावे। जब वह होता के गीत का अनुसरण करें तो भी सूर्य्य की चाल का ही अनुसरण करना चाहिये। जब वह ग्रह की आहुति दें तब भी सूर्य्य की चाल का ही अनुसरण करना चाहिये। सूर्य्य ही भर्त्ता है। जो इस रहस्य को समझ कर सूर्य्य का अनुसरण करता है वह अपने आश्रितों (भार्या) को पालन कर सकता है ॥२१॥

सत्रायणम्

अध्याय ६—ब्राह्मण ८

या वै दीक्षा सा निषत्। तस्मात्रं तस्मादेनानासत्ऽइत्याहुरथ यत्तो यज्ञं तन्वते तद्यन्ति तन्वयति यो नेता भवति स तस्मादेनान्यन्तीत्याहुः ॥१॥

या ह दीक्षा सा निषत्। तत्सत्रं तदयनं तत्सत्रायणमथ यत्तो यज्ञस्योद्यं

यह जो दीक्षा है उसका नाम है निषत् (बैठना)। उसी को सत्र (बैठक session) कहते हैं। इसीलिये कहते हैं कि 'आसत' अर्थात् वह बैठे हैं। और इसके पश्चात् जब यज्ञ करते हैं तब वह 'यन्ति' अर्थात् 'जाते हैं'। इनमें जो 'नयति' अर्थात् अगुआ होता है वह 'नेता' होता है। इसलिये इनको कहते हैं कि यह जाते हैं। (तात्पर्य यह है कि 'दीक्षा' के लिये 'बैठने' का और यज्ञ करने के लिये 'जाने' शब्द का प्रयोग होता है ॥१॥

जो दीक्षा है वह निषत् या बैठना है। वही सत्र (बैठक) है। वह 'अयन' (जाना)

गत्वोत्तिष्ठन्ति तदुत्थानं तस्मादेनानुदस्थुरित्याहुरिति नु पुरस्ताद्वदनम् ॥२॥

अथ दीक्षिष्यमाणाः समवस्यन्ति । ते यद्यग्निं चेष्यमाणा भवन्त्यरणिष्वेवाग्नीन्त्समारोह्योपसमायन्ति यत्र प्राजापत्येन पशुना यक्ष्यमाणा भवन्ति मथित्वोपसमाधायोद्धृत्याहवनीयं यजन्तऽएतेन प्राजापत्येन पशुना ॥३॥

तस्य शिरो निदधति । तेषा यदि तदहर्दीक्षा न समैत्यरणिष्वेवाग्नीन्त्समारोह्य यथायथं विपरेत्य जुह्वति ॥४॥

अथ यदहरेषां दीक्षा समैति । अरणिष्वेवाग्नीन्त्समारोह्योपसमायन्ति यत्र दीक्षिष्यमाणा भवन्ति गृहपतिरेव प्रथमो मन्थते मध्यं प्रति शालाया अथेतरेषामर्धा दक्षिणत उपविशन्त्यर्धा उत्तरतो मथित्वोपसमाधायैकैकमेवोल्मुकमादायोपसमायन्ति गृहपतेर्गार्हपत्यं गृहपतेरेव गार्हपत्यादुद्धृत्याहवनीय दीक्षन्ते तेषाञ्च समान आहवनीयो भवति नाना गार्हपत्या दीक्षितोपसत्सु ॥५॥

अथ यदहरेषा क्रयो भवति । तदहर्गार्हपत्यां चितिमुपदधात्यथेतरेभ्य उपवसथे घिष्णियान्वैसर्जिनानां काले प्राच्यः पत्न्य उपसमायन्ति प्रजहत्येतानपराग्नीन्हुतऽएव

भी है । वह 'सदायण' अर्थात् 'बैठने के लिये जाना' है । और जब यज्ञ की समाप्ति पर उठते हैं उसको 'उत्थान' कहते हैं । इसलिये कहते हैं कि 'वे उठ बैठे' । यह हुआ प्राक्कथन (पुरस्ताद् वदनम्) ॥२॥

जिनको दीक्षित होना है वे (समय तथा स्थान को) तै कर लेते हैं । जिनको वेदी बनानी है वह अरणियों में अग्नियों को लेकर वहाँ चले जाते हैं जहाँ प्रजापति के लिये पशु का आलभन करना है । आग को मथ कर उसमें प्रजापति सम्बन्धी पशु-यज्ञ करते हैं ॥३॥

उसके सिर को रख लेते हैं । यदि उसी दिन उनकी दीक्षा नहीं होनी है तो अरणियों में ही फिर आग लेकर अपने अपने घर चले जाते हैं और दैनिक आहुतियों में ही देते हैं ॥४॥

यदि उनकी दीक्षा उसी दिन होती है तो अरणियों में ही अग्नि को लेकर उस स्थान पर आ जाते हैं जहाँ दीक्षा होनी है । शाला के बीच में वहीं पर गृहपति पहले (आग को) मथता है । इनमें से आधे उसकी दक्षिण की ओर बैठते हैं, आधे उत्तर की ओर । जब आग मथ जाती है और उस पर समिधा रख जाती है तो वे एक एक लकड़ी को लेकर गृहपति की गार्हपत्य अग्नि तक आते हैं । गृहपति को ही गार्हपत्य से आहवनीय लेकर दीक्षा लेते हैं । दीक्षा और उपसद् में आहवनीय एक ही होती है और गार्हपत्य अलग अलग ॥५॥

जिस दिन इनको (सोम) मोल लेना है, उस दिन गार्हपत्य को बिछाते हैं ॥६॥ उपवास के दिन (सोमयज्ञ से पूर्व दिन को उपवसथ कहते हैं) दूसरों के लिये बिछाना

वैसाजने ॥६॥

राजानं प्रणयति । उद्यत एवैष आग्नीध्रीयोऽग्निरित्यथैर्भवतऽएकैकमेवोल्मुकमादाय यथाविध्यं विपरायन्ति तैरेव तेषामुल्मुकैः प्रघ्नन्तीति ह स्माह याज्ञवल्क्यो ये तथा कुर्वन्तीत्येतन्नैकमयनम् ॥७॥

अथेदं द्वितीयम् । अरणिष्वेवाग्नीन्त्समारोह्योपसमायन्ति यत्र प्राजापत्येन पशुना यक्ष्यमाणा भवन्ति मथित्वोपसमाधायोद्धृत्याहवनीयं यजन्त ऽएतेन प्राजापत्येन पशुना ॥८॥

तस्य शिरो निदधति । तेषां यदि तदहर्दीक्षा न समैत्यरणिष्वेवाग्नीन्त्समारोह्य यथायथं विपरेत्य जुह्वति ॥९॥

अथ यदहरेषां दीक्षा समैति । अरणिष्वेवाग्नीन्त्समारोह्योपसमायन्ति यत्र दीक्षिष्यमाणा भवन्ति गृहपतिरेव प्रथमो मन्थनेऽथेतरे पर्युपविश्य मन्थन्ते ते जातं जातमेवानुप्रहरन्ति गृहपतेर्गार्हपत्ये गृहपतेरेव गार्हपत्यादुद्धृत्याहवनीयं दीक्षन्ते तेषाꣳ समान आहवनीयो भवति सगानो गार्हपत्यो दीक्षोपसत्सु ॥१०॥

अथ यदहरेषां क्रयो भवति । तदहर्गार्हपत्यां चितिमुपदधात्यथेतरेभ्य उपवसथे

चिनते हैं । विसर्जन के दिन पत्नियाँ भी साथ आती हैं । और यजमान उन दूसरी अग्नियों को (गार्हपत्यों को) छोड़ जाते हैं । जब वैसर्जन आहुति हो चुकती है तो—॥६॥

सोम राजा को लाते हैं । आग्नीध्रीय अग्नि उसी समय अभी लाई हुई होती है । वे इसमें से एक एक लकड़ी लेकर अपनी-अपनी धिष्ण्या में चले जाते हैं (याज्ञवल्क्य ने) कहा है कि यह इन्हीं लकड़ियों से वध करते हैं । यह रीति है ॥७॥

दूसरी यह है । अरणियों पर अग्नियों को लेकर वहाँ जाते हैं जहाँ प्रजापति सम्बन्धी पशु यज्ञ करना है । आग मथकर उस पर समिधा रख के उस में से आहवनीय को लेकर प्रजापति सम्बन्धी पशु यज्ञ करते हैं ॥८॥

उसके सिर को रख लेते हैं । यदि उस दिन दीक्षा नहीं होनी होती तो अरणियों पर अग्नियों को लेकर अपने-अपने घर चले जाते हैं और वहाँ (दैनिक) आहुतियाँ देते हैं ॥९॥

यदि दीक्षा उसी दिन लेनी हो तो अरणियों पर अग्नियों को लेकर वहाँ चले आते हैं जहाँ दीक्षा लेनी है । पहले गृहपति ही मथता है फिर और उसके पास बैठकर मथते हैं । और जो जो अपनी आग मथता है वह उसको गृहपति के ही गार्हपत्य में डाल देता है । गृहपति के ही गार्हपत्य से आहवनीय लेकर दीक्षा लेते हैं, उनकी आहवनीय एक ही होती है और एक ही गार्हपत्य दीक्षा में भी और उपसदों में भी ॥१०॥

जिस दिन उनको सोम का क्रय करना हो (मोल लेना हो) उस दिन गार्हपत्य को चिनते हैं । और उपवसथ के दिन दूसरों के लिये धिष्ण्या । विसर्जन के समय पत्नियाँ

धिष्ण्यान्वैसर्जनानां काले प्राच्यः पत्न्य उपसमायन्ति प्रजहत्येतमपरमग्निधं हुतऽएव वैसर्जने ॥११॥

राजानं प्रणयति। उद्यत एवैष आग्नीध्रीयोऽग्निर्भवत्यथैतऽएकैकमेवोल्मुकमादाय यथाधिष्ण्यं विपरायन्ति समदमु हैव ते कुर्वन्ति समर्द्धनान्विन्दत्यर्तुका ह भवन्त्यपि ह तमर्धध्रं समर्द्धिन्दति यस्मिन्नर्धे यजन्ते ये तथा कुर्वन्त्येतद्वितीयमयनम् ॥१२॥

अथेदं तृतीयम्। गृहपतेरेवारण्यो. संवदन्ते य इतोऽग्निर्जनिष्यते स नः सह यदनेन यज्ञेन जेष्यामोऽनेन पशुबन्धेन तनः सह सह नः साधुकृत्या य एव पापं कुर्वत्तस्येव तदित्येवमुक्त्वा गृहपतिरेव प्रथमः समारोहयतेऽथेतरेभ्यः समारोहयति स्वय वैव समारोहयन्ते तऽआयन्ति यत्र प्राजापत्येन पशुना यक्ष्यमाणा भवन्ति मथित्वोपसमाधायोद्धृत्याहवनीयं यजन्तऽएतेन प्राजापत्येन पशुना ॥१३॥

तस्य शिरो निदधति। तेषां यदि तदहर्दीक्षा न समैत्यरणिष्वेवाग्नीन्त्समारोहय यथायथ विपरेत्य जुह्वति ॥१४॥

अथ यदहरेषां दीक्षा समैति। गृहपतेरेवारण्यो' संवदन्ते य इतोऽग्निर्जनिष्यते स नः सह यदनेन यज्ञेन जेष्यामोऽनेन सत्रेण तनः सह सह नः साधुकृत्याय एव पापं कर-

आगे आती हैं और यजमान इस दूसरी अग्नि को छोड़ जाता है और तब विसर्जन की आहुति दी जाती है ॥११॥

तभी सोम राजा को लाता है। आग्नीध्र अग्नि उस समय लाई हुई होती है। उसमें से एक एक लकड़ी को लेकर अपनी-अपनी धिष्ण्या में लाते हैं। जो इस प्रकार करते हैं वे झगड़ा करते हैं। झगड़ा उनके बीच में आ जाता है। वे झगड़ा पर बैठते हैं जो इस प्रकार यज्ञ करते हैं। यह दूसरी रीति है ॥१२॥

यह तीसरी रीति है—गृहपति की ही अरणियों में साझी हो जाते हैं। 'जो अग्नि इनसे उत्पन्न होगी इसमें हमारा भाग है। यह यज्ञ के करने से जो फल होगा या पशु-बन्ध से, इस में हमारा भाग है। जो पुण्य कर्म है उसमें हम सब शामिल हैं। जो पाप करे वह उसका अपना है। ऐसा कहकर गृहपति पहले अपने लिये आग लेता है फिर दूसरों के लिये, या वे स्वय अपने लिये लेते हैं वे उस स्थान पर आते हैं जहाँ प्रजापति का पशु-याग होना होता है। आग मथकर, समिधा रखकर आहवनीय को लेते हैं और प्रजापति सबन्धी पशु यज्ञ करते हैं ॥१३॥

उसके सिर को रख लेते हैं। यदि उस दिन उनकी दीक्षा नहीं होनी होती तो अरणियों पर अग्नियों को लेकर अपने-अपने घर चले जाते हैं और आहुतियाँ दे लेते हैं ॥१४॥

यदि इस दिन दीक्षा होनी होती है तो गृहपति की ही अरणियों में साझा कर लेते हैं कि जो अग्नि उत्पन्न होगी उसमें हमारा भाग है और जो इस होने वाले यज्ञ तथा उस

वत्तस्यैव तदित्येवमुक्त्वा गृहपतिरेव प्रथमः समारोहयतेऽथेतरेभ्यः समारोहयति स्वयं वैव समारोहयन्ते तऽआयन्ति यत्र दीक्षिष्यमाणा भवन्ति मथित्वोपसमाधायोद्धृत्याहवनीयं दीक्षन्ते तेषाꣳ समान आहवनीयो भवति समानो गार्हपत्यो दीक्षोपसत्सु ॥१५॥

अथ यदहरेषो क्रयो भवति। तदहर्गार्हपत्यां चितिमुपदधात्यथेतरेभ्य उपवसथे धिष्ण्यान्वैसर्जिनानां काले प्राच्यः पत्न्य उपसमायन्ति प्रजहत्येतमपरमग्निꣳ हुतऽएव वैसर्जिने ॥१६॥

राजानं प्रणयति। उद्यत एवैष आग्नीध्रीयोऽग्निर्भवत्यथैनऽएकैकमेवोल्मुकमादाय यथाधिष्ण्य विपरायन्ति तत्तत्कृत नाकृतं यन्नानाधिष्ण्या भवन्ति वरीयानाशाऽसत्परि चरणीयत्यथ यन्नानापुरोडाशा भूयो हविरुच्छिष्टमसत्समाप्त्याऽ इति ॥१७॥

अथ येन सत्रेण देवाः। क्षिप्रऽएव पाप्मानमपाघ्नतेमा जितिमजयन्येषामियं जितिस्तदत उद्यतऽएकगृहपतिका वै देवा एकपुरोडाशा एकधिष्ण्याः क्षिप्रऽएव पाप्मानमपाघ्नत क्षिप्रे प्राजायन्त तथोऽएवैतऽएकगृहपतिका एकपुरोडाशा एकधिष्ण्याः क्षिप्रऽएव पाप्मानमपघ्नते क्षिप्रे प्रजायन्ते ॥१८॥

से फल होना है उसमे हमारा साझा है। -जो-जो पुण्य करना है उसमे हमारा साझा है। जो पाप हो जाय वह हर एक का अपना अपना है। ऐसा कहकर पहले गृहपति अरणियों पर अपने लिये मथता, फिर दूसरों के लिये या वे स्वय अपने लिये मथ लेते हैं। अब वे वहाँ आते हैं जहाँ दीक्षा होनी होती है। मथ कर, समिधा रखकर आहवनीय को लाते हैं और उसमे दीक्षा लेते हैं। दीक्षा और उपसद में इनकी एक ही आहवनीय होती है और एक ही गार्हपत्य ॥१५॥

अब जिस दिन सोमयज्ञ करना हो उस दिन गार्हपत्य को चिनते हैं। और उपवास के दिन दूसरों के लिये धिष्ण्या। विसर्जन के समय पत्नियाँ आगे आती हैं। और यजमान उस दूसरी अग्नि को छोड़ जाता है। विसर्जन की आहुति होने पर—॥१६॥

सोम राजा को लाता है। आग्नीध्र अग्नि लाई हुई होती है। उसमे से एक एक लकड़ी लेकर अपनी अपनी धिष्ण्या मे लाते हैं। इस प्रकार यह हो जाता है। अधूरा (अहुत) नहीं रहता। अलग अलग धिष्ण्या इसलिये होती हैं कि बीच मे आने-जाने के लिये अवकाश रहे। पुरोडाश अलग अलग इसलिये होता है कि यज्ञ की समाप्ति के लिये अधिक हव्य बच रहे ॥१७॥

जिस यज्ञ मे देवों ने शीघ्र ही पाप को मार डाला और यह विजय पा ली जो इस समय हमको प्राप्त है उसकी व्यवस्था हो चुकी। एक गृहपति, एक पुरोडाश, एक धिष्ण्या से उन्होंने पाप को शीघ्र ही भगा दिया और शीघ्र ही उत्पन्न हो गये। इसी प्रकार यह भी एक गृहपति, एक पुरोडाश और एक धिष्ण्या से पाप को शीघ्र ही भगा देते हैं और फिर उत्पन्न हो जाते हैं ॥१८॥

अथादः पूर्वस्मिन्नुदीचीनवंश्या शाला भवति । तन्मानुषꣳ समान आहवनीयो भवति नाना गार्हपत्यास्तद्विकृष्ट गृहपतेरेव गार्हपत्ये जाघन्या पत्नीः सयाजयन्त्याज्येनेतरे प्रतियजन्तऽआसने तद्विकृष्टम् ॥१६॥

अथात्र प्राचीनवंश्या शाला भवति । तद्देवत्रा समान आहवनीयो भवति समानो गार्हपत्यः समान आग्नीध्रीयस्तदेतत्सत्रꣳ समृद्ध यथैकाहः समृद्ध एवं तस्य न ह्वलास्ति तस्यैषैव समान्या पृथदन्यद्विष्ण्येभ्यः ॥२०॥ ब्राह्मणम् ॥ १० ॥ [६ ८] ॥

पहली दशा मे एक शाला होती है जिसमें बाँस दक्षिण से उत्तर की ओर होते है। यह मानुषी विधि है। एक ही आहवनीय होती है और भिन्न भिन्न गार्हपत्य। यह विकृष्टि अर्थात् भिन्नता है। गृहपति के ही गार्हपत्य मे पशु के पिछले भाग से पत्नी सयाज आहुतियाँ देते हैं। और दूसरे बैठकर घी की आहुति देते हैं। यह विकृष्टि अर्थात् भिन्नता है ॥१६॥

परन्तु यहाँ ऐसी शाला होती है जिसमें पश्चिम से पूर्व की ओर बाँस होते हैं। यहाँ एक ही आहवनीय होती है और एक ही गार्हपत्य। एक आग्नीध्रीय। इस प्रकार यह सत्र सफल होता है जैसे एकाह (एक दिन का यज्ञ) सफल हुआ। इसमें कोई वैफल्य नहीं। विष्ण्या को छोड़कर यहाँ हर बात में समानता है ॥२०॥

सत्रधर्माः

अध्याय ६—ब्राह्मण ९

देवा ह वै सत्रमासत। श्रियं गच्छेम यशः स्यामान्नादाः स्यामेति तेभ्य एतदश्वमभिजितमपाचिक्रमिपत्पशवो वाऽअन्नं पशवो हैवेभ्यस्तदपाचिक्रमिपन्यद्वै न इमे श्रान्ता न हिꣳस्युः कथमिव स्विन्नः सद्वयन्तऽइति ॥१॥

तऽएते गार्हपत्ये द्वेऽआहुतीऽअजुहवुः। गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तदे

देव एक सत्र में बैठे इस इच्छा से कि श्री और यश मिले, अन्न पीने वाले हो जाय। उनसे वह अश्व जो उन्होंने जीता था भाग गया। पशु अन्न है। पशु ही उनसे भाग गये, यह सोचकर कि यह देव थक गये हैं, कहीं इनको हानि न पहुँचावें, और न जाने हमारे साथ कैसा बर्ताव करें ॥१॥

उन्होंने गार्हपत्य म इन दो आहुतियों को दिया। गार्हपत्य गृह है। गृह प्रतिष्ठा है। इस प्रकार उन्होंने इनको घरों में ही थाम लिया इस प्रकार इनसे जीता हुआ अन्न

नान्यृहेष्वेव न्ययच्छन्तस्तथैभ्य एतदन्नाद्यमभिजितं नापाक्रामत् ॥२॥

तथोऽएवैमे सत्रमासते । ये सत्रमासते श्रिय गच्छेम यशः स्यामान्नादाः स्यामेति तेभ्य एतदन्नाद्यमभिजितमपचिक्रमिषति पशवो वाऽअन्न पशवो हैवैभ्यस्तदपचिक्रमिषन्ति यद्वै न इमे श्रान्ता न हिꣳस्युः कथमिव स्विन्नः सन्दयन्तऽइति ॥३॥

तऽएते गार्हपत्ये द्वेऽआहुती जुह्वति । गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तदेना-न्यृहेष्वेव नियच्छन्ति तथैभ्य एतदन्नाद्यमभिजितं नापक्रामति ॥४॥

तथोऽएवैतस्मात् । एतदन्नाद्यमुपाहृतमपचिक्रमिषति यद्वै मायं न हिꣳस्यात्कथमिव स्विन्मा सन्दयतऽइति ॥५॥

तस्य परस्तादेवाग्रेऽल्पश इव प्राश्नाति । तदेनदुपनिगदति तद्वेद न वै तथा मूयथामꣳसि न वै मा हिꣳसीदिति तदेनमुपावहयते स ह प्रिय एवान्नस्यान्नादो भवति य एवं विद्वानेतस्य व्रतꣳ शक्नोति चरितुम् ॥६॥

तद्वा ऽएतत् । दशमेहन्त्सत्रोत्थानं क्रियते तेषामेकैक एव वाचयम आस्ते वाचमा-प्याययस्तयापीनयायातयाम्न्योत्तरमहरुत्तन्वतेऽथेतरे विसृज्यन्ते समिद्धारा वा स्वाध्यायं वा

न भागा ॥२॥

इसी प्रकार यह लोग भी जो सत्र में बैठते हैं इस आशा से बैठते हैं कि श्री और यश मिले, अन्न को खाने वाले हो जाय । जो अन्न उन्होंने जीता है वह उनसे भागना चाहता है । पशु अन्न हैं, अर्थात् पशु भागना चाहते हैं यह सोचकर कि यह थके हुये हैं, कहीं हमको हानि न पहुँचावे, (न जाने हमसे) हमसे कैसा वर्ताव करें ॥३॥

वे गार्हपत्य में दो आहुतियाँ देते हैं । गृह गार्हपत्य है । गृह प्रतिष्ठा है । इस प्रकार उनको गृहों में ही थाम लेते हैं । इस प्रकार यही जीता हुआ अन्न उनसे भाग नहीं सकता ॥४॥

इसी प्रकार जीता हुआ अन्न उनसे भागना चाहता है कि कहीं यह मुझे हानि न पहुँचावें । न जाने कैसे वर्ताव करें ॥५॥

इसमें से पीछे की ओर से थोड़ा सा खाता है । इस प्रकार वह उसका साहस बढ़ाता है । तब वह जानता है कि वैसा नहीं हुआ जैसा मैंने समझा था । इन्होंने मुझे हानि नहीं पहुँचाई । इस प्रकार वह उसके आश्रय हो जाते हैं । वह अन्न का प्रिय हो जाता है, अन्न का खाने वाला हो जाता है यदि वह इस रहस्य को समझकर व्रत कर सकता है ॥६॥

यह कृत्य दसवें दिन सत्रोत्थान के समय होता है । हर एक चुप बैठता है इस प्रकार वाणी को शक्ति देते हुये । उस शक्तिशाली और पूर्ण वाणी से वह अन्तिम दिवस का कृत्य करते हैं । अब दूसरों का विसर्जन हो जाता है या तो समिधा लेने के लिये या स्वाध्याय के

तत्राप्यश्नन्ति ॥७॥

तेऽपराह्णऽउपसमेत्य । अप उपस्पृश्य पत्नीशालꣳ सम्प्रपद्यन्ते तेषु समन्वारब्धे-ष्वेतेऽआहुती जुहोतीह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहेति पशूनेवैतदाह पशूने-वैतदात्मन्नियच्छन्ते ॥८॥

अथ द्वितीयां जुहोति । उपसृजन्धरुणं मात्रऽइत्यग्निमेवैतत्पृथिव्याऽउपसृजन्नाह धरुणो मातरं धयन्नित्यग्निमेवैतत्पृथिवी धयन्तमाह रायस्पोषमस्मासु दीधरत्स्वाहेति पशवो वै रायस्पोषः पशूनेवैतदात्मन्नियच्छन्ते ॥९॥

ते प्राञ्च उपनिष्क्रामन्ति । ते पश्चात्प्राञ्चो हविर्धाने सम्प्रपद्यन्ते पुरस्ताद्वै प्रत्यञ्च स्तथ्स्यमाना अथैवꣳ सत्रोत्थाने ॥१०॥

तऽउत्तरस्य हविर्धानस्य । जघन्यायां कूवर्यार्थꣳ सामाभिगायन्ति सत्रस्यऽऋद्धि-रिति राद्धिमेवैतदभ्युत्तिष्ठन्त्युत्तरवेदेर्वोत्तरायार्थꣳ श्रोणावितरं तु कृततरम् ॥११॥

यदुत्तरस्य हविर्धानस्य । जघन्याया कूवर्यामगन्म ज्योतिरमृता अभूमेति ज्योतिर्वा ऽएते भवन्त्यमृता भवन्ति ये सत्रमासते दिव पृथिव्या अध्यारुहामेति दिवं वा एते पृथिव्या

लिये । अब खाना खाते हैं ॥७॥

तीसरे पहर को साथ आकर और जल का स्पर्श करके पत्नीशाला में जाते हैं । जब वे उसके पास होते हैं वह आहुति दे देता है इस मन्त्र से :—'इह रतिरिह रमध्वमिह धृति-रिह स्वधृतिः स्वाहा' (यजु० ८।५१) । 'यहाँ प्रसन्नता है, यहाँ आनन्द मनाइये । यहाँ धृति है । यहाँ आपकी अपनी धृति है—स्वाहा' । वह पशुओं से ऐसा कहता है । इस प्रकार वे अपने लिये पशुओं को प्राप्त कर लेते हैं ॥८॥

अब दूसरी आहुति देता है :—'उपसृजन् धरुण मात्रे' (यजु० ८।५१) । 'बछड़े को माता के लिये छोड़ते हुये' । इसका तात्पर्य है कि अग्नि को पृथिवी के पास छोड़ते हुये । 'धरुणो मातर धयन्' (यजु० ८।५१) । 'बछड़ा मा का दूध पीता हुआ अर्थात् अग्नि पृथिवी से दूध पीती हुई । 'रायस्पोषमस्मासु दीधरत् स्वाहा' (यजु० ८।५१) । 'वह हममें धन को जारी रक्खे' । इस प्रकार वह पशुओं को अपने में स्थित रखता है ॥९॥

वे पूर्व की ओर निकलते हैं और पीछे से पूर्व की ओर हविर्धान में प्रवेश करते हैं । आगे से पीछे को उस समय गये थे जब यज्ञ करना था । सत्रोत्थान में इस प्रकार ॥१०॥

उत्तरी हविर्धान के पिछले भाग मे सामगान करते हैं जिसको 'सत्र की ऋद्धि' (यजु० ८।५२) कहते हैं । यहीं वह ऋद्धि को प्राप्त होते हैं । या उत्तर वेदी के उत्तर भाग में । परन्तु दूसरी विधि अधिक प्रचलित है ॥११॥

अर्थात् उत्तरी हविर्धान के पिछले भाग में । 'अगन्म ज्योतिरमृताऽअभूम' (यजु० ८।५२) । 'हमको ज्योति मिल गई । हम अमर हो गये' । जो सत्र में बैठते हैं उनको

अभ्यारोहन्ति ये सत्रमासतेऽविदाम देवानिति विन्दन्ति हि देवान्त्स्वर्ज्योतिरिति त्रिर्निधनमुपावयन्ति स्वर्लोके ज्योतिर्लोके भवन्ति तद्यदेवैतस्य साम्नो रूपं तदेवैते भवन्ति ये सत्रमासते ॥१२॥

ते दक्षिणस्य हविर्धानस्य । अधोऽधोऽक्षꣳ सर्पन्ति स यथाहिस्त्वचो निर्मुच्येतैवꣳ सर्वस्मात्पाप्मनो निर्मुच्यन्तेऽतिच्छन्दसा सर्पन्त्येषमौ सर्वाणि छन्दाꣳसि यदतिच्छन्दास्तथैनान्पाप्मा नान्वत्येति तस्मादतिछन्दसा सर्पन्ति ॥१३॥

ते सर्पन्ति । युवं तमिन्द्रा पर्वता पुरोयुधा यो नः पृतन्यादप तं तमिद्धतं वज्रेण तं तमिद्धतम् । दूरे चत्ताय छन्त्सद्गहने यदिनक्षत् । अस्माकꣳ शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वत इति ॥१४॥

ते प्राञ्च उपनिष्क्रामन्ति । ते पुरस्तात्प्रत्यञ्चः सदः सम्प्रपद्यन्ते पश्चाद्वै प्राश्वस्तꣳस्यमाना अथैवꣳ सत्रोत्थाने ॥१५॥

ते यथाधिष्ण्यमेवोपविशन्ति । देवभ्यो ह वै वाचो रसोऽभिजितोऽपचिक्रमिषां ज्योति मिल जाती है । यह अमर हो जाते हैं । 'दिवं पृथिव्याऽअभ्यारुहाम' (यजु० ८।५२) । 'हम पृथिवी से द्यौलोक में पहुँच गये' । जो सत्र में बैठते हैं वह पृथिवी से द्यौलोक में पहुँच जाते हैं । 'विदाम देवान्' (यजु० ८।५२) । 'हम ने देवों को प्राप्त किया' । क्योंकि यह वस्तुतः देवों को पा जाते हैं । 'स्वर्ज्योतिः' (यजु० ८।५२) । 'स्वर्ग को और ज्योति को' । इसको तीन बार कहते हैं । यही स्वर्ग और ज्योति के भागी हो जाते हैं । इस प्रकार जो सत्र में बैठते हैं उनका वही रूप हो जाता है जो साम का रूप है ॥१२॥

वे दक्षिणी हविर्धान के धुरे के नीचे रेंगते हैं । जिस प्रकार साँप अपनी केंचुल छोड़ देता है उसी प्रकार यह अपने पापों से मुक्त हो जाते हैं । अतिछन्दस् से रेंगते हैं । वे जो अतिछन्दस् हैं वे ही सब छन्द हैं । इस प्रकार पाप उनको नहीं लगता । इसलिये वे अतिछन्दस् से रेंगते हैं ॥१३॥

यह इस मन्त्र को पढ़कर रेंगते हैं :—'युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तन्तमिद्धतं वज्रेण तं तमिद्धतम् । दूरे चत्ताय छन्त्सद्गहनं यदिनक्षत् । अस्माकꣳ शत्रून् परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः' (यजु० ८।५३) । 'हे इन्द्र और पर्वत ! तुम दोनों उसको जो हमसे युद्ध में लड़ता है मारो । वज्र से उसको मारो । उसको भी जो दूर देश में जाकर छिप गया हो । हे शूर ! हमारे शत्रुओं को फाड़ डालने वाला चारों ओर से फाड़ डाले—चारों ओर से' ॥१४॥

वे पूर्व की ओर निकलते हैं और सदस् में आगे से पीछे की ओर प्रवेश करते हैं । पीछे से आगे की ओर उस समय आये थे जब यज्ञ करना था । सत्रोत्थान के अवसर पर इस प्रकार ॥१५॥

वे अपनी-अपनी विष्णया के पास बैठ जाते हैं । एक बार वाणी के रस ने देवों से

चक्रार स इमामेव पराङत्यसिसृप्सदियं वै वाक्तस्या एष रसो यदोषधयो यद्वनस्पतयस्तमेतेन साम्नाप्नुवन्तस एनानाप्तोऽभ्यावर्तत तस्मादस्यामूर्ध्वा ओषधयो जायन्तऽऊर्ध्वा वनस्पतयस्तथोऽएवैतेभ्य एतद्वाचो रसोऽगिजितोऽपचिक्रमिषति स इमामेव पराङत्यसिसृप्सतीयं वै वाक्तस्या एष रसो यदोषधयो यद्वनस्पतयस्तमेतेन साम्नाप्नुवन्ति स एनानाप्तोऽभ्यावर्तते तस्मादस्यामूर्ध्वा ओषधयो जायन्त ऽऊर्ध्वा वनस्पतयः ॥१६॥

सर्पराज्ञ्या ऋचा स्तुवते । इयं वै पृथिवी सर्पराज्ञी तदनयैवैतत्सर्वमाप्नुवन्ति स्वयम्प्रस्तुतमनुपगीतं यथा नान्य उपशृणुयादति ह रेचयेद्यदन्यः प्रस्तुयादतिरेचयेद्यदन्य उपगायेदतिरेचयेद्यदन्य उपशृणुयात्तस्मात्स्वयम्प्रस्तुतमनुपगीतम् ॥१७॥

चतुर्होतॄन्होता व्याचष्टे । एतदेवैतत्स्तुतमनुशंश्यति यदि होता न विद्याद्गृहपतिर्व्याचक्षीत होतुस्त्वेव व्याख्यानम् ॥१८॥

अथाध्वर्योः प्रतिगरः । अरात्सुरिमे यजमाना भद्रमेभ्योऽभूदिति कल्याणमेवैतन्मानुष्यै वाचो वदति ॥१९॥

जिन्होंने इसको जीत लिया या अलग होना चाहा । उसने पृथ्वी पर रेंग रेंग कर भागने का यत्न किया । पृथिवी ही वाणी है । यह जो ओषधियाँ या वनस्पतियाँ हैं यही इसका रस हैं । उसको इसी साम के द्वारा पकड़ा । इस प्रकार पकड़ने पर वह लौट आया । इसीलिये भूमि पर ओषधियाँ और वनस्पतियाँ ऊपर को उगीं । इसी प्रकार वाणी का रस इन यजमानों को भी जिन्होंने इसको जीत लिया है छोड़ना चाहता है । और इस भूमि पर बह कर भागने की कोशिश करता है । क्योंकि यह पृथिवी वाणी है और इसका रस यह ओषधियाँ और वनस्पतियाँ हैं । इसी साम के द्वारा वे इसको पकड़ते हैं और पकड़ा जाने पर वह लौट आता है । इसलिये इस पृथ्वी पर ओषधियाँ ऊपर को उगती हैं और वनस्पतियाँ भी ऊपर को ही उगती हैं ॥१६॥

सर्पराज्ञी ऋचाओं से स्तुति करते हैं । यह पृथ्वी सर्पराज्ञी है । इसके द्वारा यह सब चीजों की प्राप्ति करते हैं । उद्गाता अकेले ही स्तुति करता है (बिना प्रस्तोता के) और उपगाता भी साथ में नहीं होते इसलिये कि कोई इसे सुन न ले । अति हो जाय यदि कोई दूसरा स्तुति करे । अति हो जाय यदि दूसरा गावे । अति हो जाय यदि दूसरा सुनलें । इसलिये बिना उपगाता की सहायता के उद्गाता स्वय ही स्तुति करता है ॥१७॥

होता चतुर्होतृ का पाठ करता है और उस स्तुति के बाद शस्त्र पढ़ता है । यदि होता उनको न जानता हो तो गृहपति पढे । परन्तु है तो यह होता के पढ़ने के लिये ही ॥१८॥

अब अध्वर्यु प्रत्युत्तर देता है—'यह यजमान सफल हो गये । इनका कल्याण हो' । इस प्रकार वह मानुषी वाणी के लिये कल्याण चाहता है ॥१९॥

अथ वाकोवाक्ये ब्रह्म वं वदन्ति । सर्वं वै तेषामाप्तं भवति सर्वं जितं ये सत्रमासते-ऽचारिषुर्यजुभिस्तत्तान्यापंस्तदवारुत्सताशंसिषुर्ऋचस्तत्ता आपंस्तदवारुत्सतास्तोषत साम-भिस्तत्तान्यापंस्तदवारुत्सताथैषामेतदेवानाप्तमनवरुद्धं भवति यद्वाकोवाक्यं ब्राह्मणं तदेतेनाप्नुवन्ति तदवरुन्धते ॥२०॥

औदुम्बरीमुपसंशृत्य वाचं यच्छन्ति । विदुहन्ति वाऽएते यज्ञं निर्धयन्ति ये वाचा यज्ञं तन्वते वाग्वि यज्ञस्तामेषां पुरैकैक एव वाचंयम आस्ते वाचमाप्याययंस्तयापीनयाया-तयाम्न्योत्तरसहस्तन्वतेऽथात्र सर्वैव वागासा भवत्यपवृक्ताताश्च सर्वऽएव वाचंयमाः वाचमा-प्याययन्ति तयापीनयायातयाम्न्यातिरात्रं तन्वते ॥२१॥

औदुम्बरीमन्वारभ्यासते । अन्नं वाऽऊर्गुदुम्बर ऊर्जैवैतद्वाचमाप्याययन्ति ॥२२॥

तेऽस्तमिते प्राञ्च उपनिष्क्रामन्ति । ते जघनेनाहवनीयमासतेऽमेण हविर्धाने तान्वाचंयमानेव वाचंयमः प्रतिप्रस्थाता वसतीवरीभिरभिपरिहरति ते यत्कामा आसीरंस्तेन वाचं विसृजेरन्कामैर्ह स्म वै पुरऽर्षयः सत्रमासतेऽसौ नः वामः स नः स मृध्यतामिति

अब वाकोवाक्य के रूप में ब्रह्मोद्य पढ़ते हैं । उनको सभी कुछ प्राप्त हो जाता है, सब जीत लिया जाता है जो सत्र में बैठते हैं । इन्होंने यजुओं से यज्ञ किया । इतना उनको मिल गया । इतना प्राप्त हो गया । उन्होंने ऋचायें पढ़ी । उनको इतना मिल गया । इतना प्राप्त हो गया । उन्होंने साम से स्तुति की । उनको इतना मिल गया, इतना प्राप्त हो गया । परन्तु इतना नहीं मिला, इतना नहीं प्राप्त हुआ अर्थात् वाकोवाक्य या ब्राह्मण, इसको वह इसके द्वारा प्राप्त करते हैं ॥२०॥

औदुम्बरी के पास पहुँचकर वे वाणी को रोक लेते हैं । जो वाणी से यज्ञ करते हैं वे यज्ञ को दूह लेते या चूस लेते हैं । क्योंकि वाणी यज्ञ है । इससे पहले हर एक वाणी को रोक कर बैठता है अर्थात् उसको प्रबल बनाता है । इस रुकी हुई और प्रबल हुई वाणी के द्वारा वे अन्त के दिन यज्ञ करते हैं । परन्तु इस वाकोवाक्य मे समस्त वाणी थक जाती है । वे सब इसी वाणी को चुप होकर शक्तिशाली करते हैं । इस प्रकार प्रबल और शक्ति सम्पन्न वाणी से वे अतिरात्र करते हैं ॥२१॥

औदुम्बरी को छूकर बैठते हैं । अन्न शक्ति है । उदुम्बर शक्ति है । उदुम्बर से ही वह वाणी को शक्ति देते हैं ।

सूर्यास्त पर वे सदस् से पूर्व की ओर बाहर आते हैं । और हविर्धान के सामने आहवनीय के पीछे बैठते हैं । जब वे चुपचाप बैठे होते हैं तो प्रतिप्रस्थाता उनको चारों ओर वसतीवरी जलों को फिराता है । जिस कामना के लिये उन्होंने यह सत्र रचा उसी कामना से उनको इस वाणी को छोड़ना चाहिये । (अर्थात् मौन तोड़ते समय उसी समय बात को कहना चाहिये) । क्योंकि पहले सत्र में ऋषियों ने भिन्न-भिन्न कामनाओं से सत्र किये थे अर्थात् यह हमारी इच्छा है । हमको यह मिले इत्यादि' । और यदि उनकी काम-

यद्वऽअनेककामाः स्युर्लोककामा वा प्रजाकामा वा पशुकामा वा ॥२३॥

अनेनैव वाचं विसृजेरन् । भूर्भुवः स्वरिति तत्सत्येनैवैतद्वाचꣳ समर्धयन्ति तया समृद्धयाशिष आशासते सुप्रजाः प्रजाभिः स्यामेति तत्प्रजामाशासते सुवीरा वीरैरिति तद्वीरानाशासते सुपोषाः पोषैरिति तत्पुष्टिमाशासते ॥२४॥

अथ गृहपतिः सुब्रह्मण्यामाह्वयति । यं वा गृहपतिर्ब्रूयात्पृथगु हैवैके सुब्रह्मण्यामाह्वयन्ति गृहपतिस्त्वेव (सुब्रह्मण्यामाह्वयेद्यं वा गृहपतिर्ब्रूयात्तस्मिन्त्समुपह्वमिष्ट्वा समिधोऽभ्यादधति ॥२५॥ ब्राह्मणम् ॥ ११ [६. ६] ॥ पञ्चमः प्रपाठकः ॥ कण्डिका संख्या १२६ ॥ षष्ठोऽध्यायः [२०] ॥ अस्मिन्काण्डे कण्डिका संख्या ६४८ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे ग्रहनाम चतुर्थं काण्डं समाप्तम् ॥४॥

नायें अनेक हों अर्थात् लोक की कामना, सन्तान की कामना या पशुओं की कामना तो ॥२३॥

'भूः भुवः स्वः' कहकर मौन तोड़ना चाहिये । इस प्रकार सत्य के द्वारा वाणी को शक्तिशाली बनाते हैं । और इसी शक्तिशाली वाणी से आशीर्वाद देते हैं । 'सुप्रजाः प्रजाभिः स्याम' (यजु० ८।५३) । 'हम सन्तान वाले हों' । इससे सन्तान की प्रार्थना करते 'सुवीराः वीरैः' (यजु० ८।५३) । 'वीर पुरुषों से युक्त हों' । इससे वीर पुरुषों के लिये प्रार्थना करते हैं । 'सुपोषाः पोषैः' (यजु० ८।५३) । 'सम्पत्तिशाली हों' । इससे सम्पत्ति के लिये प्रार्थना ॥२४॥

अब गृहपति सुब्रह्मण्या को पढ़ता है । या वह पुरुष जिस को गृहपति नियुक्त कर दें । कुछ लोग सुब्रह्मण्या को पृथक् पृथक् पढ़ते हैं । परन्तु गृहपति को ही सुब्रह्मण्या पढ़नी चाहिये या उसको जिसे गृहपति आज्ञा दे । (अतिरात्र भोज में) निमंत्रण की इच्छा करके वे आग पर समिधायें रख देते हैं ॥२५॥

माध्यन्दिनीय शतपथब्राह्मण की श्रीमत् पण्डित गंगाप्रसाद उपाध्याय कृत 'रत्नकुमारी-दीपिका' भाषा व्याख्या का ग्रहनाम चतुर्थ काण्ड समाप्त हुआ ।

चतुर्थ-काण्ड

प्रपाठक	कण्डिका-संख्या
प्रथम [४. २. १.]	१३६
द्वितीय [४. ३. ३.]	१३६
तृतीय [४. ४. ४.]	१२२
चतुर्थ [४. ५. ८.]	१२५
पञ्चम [४. ६. ६]	१२६
योग	६४८
पूर्व के काण्डों का योग	२२४६
पूर्णयोग	२८९४

BHARATIYA VIDYA BHAVAN'S LIBRARY BOMBAY-7

मुद्रक—कला प्रेस, इलाहाबाद—२